
८
२/१.

नैषधचरितम्।

महाकवि श्रीहर्षविरचितम्।

कोलाचल मल्लिनाथ सूरि विरचितया टीकयाऽन्वितम्।

वि, ए, उपाधिधारिणा

श्रीजीवानन्द विद्यासागरभट्टाचार्य्येण

संस्कृतं परिवर्त्तितं सन्निवेशितं
प्रकाशितञ्च।

प्रथमखण्डम् (प्रथमावधि त्रयोदशसर्गपर्य्यन्तम्।)

कलिकातानगरे

सुचारुयन्त्रे मुद्रितम्।

প্রিণ্টার শ্রীরামব্রহ্ম মুখোপাধ্যায়।

ইং ১৮৭৫।

मुद्रक श्रीराम ब्रह्म मुखर्जी.
सन् १८७५

नैषधचरितम् ।

प्रथमः सर्गः ।

निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः १

इन्दीवरदलश्याममिन्दिरानन्दकन्दलम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥
अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥

अथ तत्रभवान् श्रीहर्षकविः, "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनत्वाच्च "काव्यालापांश्च वर्जयेदिति" तन्निषेधस्यासत्काव्यविषयताञ्च पश्यन् नैषधाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात्, "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च कथानायकस्य राज्ञो नलस्य भूतिलक्षणं परममङ्गलं वस्तु निर्दिशति । निपीयेति । क्षितिरक्षिणः क्ष्मापालस्य यस्य नलस्य कथाम् उपाख्यानम् निपीय नितरामास्वाद्य, पीङ् स्वादे क्त्वो ल्यबिति ल्यबादेशः, न तु पिबतेः न ल्यपीतिप्रतिषेधादीत्त्वासम्भवात् । बुधास्तज्ज्ञाः सुराश्च "ज्ञातृचान्द्रिसुराबुधा" इति क्षीरस्वामी । सुधामपि तथा यथैतत्कथामित्यर्थः नाद्रियन्ते न रोचन्त इत्यर्थः अमृतादतिरिच्यते रसैस्तत्कथा इति भावः, सितच्छत्रं कृतं सितच्छत्रितं सितातपत्रीकृतमित्यर्थः, तत् करोतीति ण्यन्ताद्

रसैः कथा यस्य सुधावधीरिणी नलः स भूजानिरभूद्गुणाद्भुतः।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्त्तिमण्डलः ॥ २॥
पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव तत्कथा।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥३

कर्म्मणि क्तः: तत् कीर्त्तिमण्डलं यस्य सः महसां तेजसां राशिः रविरिव तेजस्वीत्यर्थः, महैरुत्सवैरुज्ज्वलः प्रकाशमानः नित्यमहोत्सवशालीत्यर्थः "मह उद्धव उत्सव" इत्यमरः। एतेन समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारो व्यज्यते, नलो नलाख्यः स राजा आसीदस्ति स.। अत्र सुधायाः अनादरासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः, महसां राशिरिति तेजस्तद्वतोरभेदोक्तेर्भेदेऽप्यभेदरूपातिशयोक्तिः, कीर्त्तिमण्डले सितच्छत्रत्वरूपणात् रूपकालङ्कार इति त्रयाणां संसृष्टिः। अस्मिन् सर्गे वंशस्थवृत्तम् "जतौ तु वंशस्थमुदीरितं जराविति" लक्षणात् ॥ १ ॥

अथ तस्य गुणवर्णनायोपद्घातत्वेन सामान्यतो गुणाद्भुतत्वं तावदाह रसैरिति। यस्य नलस्य कथा रसैः स्वादैः "रसो गन्धः रसः स्वाद" इति विश्वः। सुधामवधीरयति तिरस्करोतीति सुधावधीरिणी, अमृतादतिरिच्यमानस्वादा इत्यतिशयोक्तिः। ताच्छील्ये णिनिः। भूर्जाया यस्य स भूजानिः भूमेरेकाधिराडित्यर्थः। जायाया निङिति बहुव्रीहौ जायाशब्दस्य निङादेशः। स नलः गुणैः पुण्यश्लोकत्वादिभिरद्भुतोऽभूत्। अत्र नलस्य पूर्वश्लोकोक्तसत्त्वानुवादेन गुणाढ्यत्वविधेर्न पौनरुक्त्यम्। कथम्भूतः, सुवर्णदण्डश्च एकसितातपत्रञ्च, ते कृते तथोक्ते, द्वन्द्वात् तत् करोतीति ण्यन्तात् कर्म्मणि क्तः, सुवर्णदण्डैकसितातपत्रिते ज्वलत्प्रतापावलिः कीर्त्तिमण्डलञ्च येन स तथोक्तः अप्रतिहतकीर्त्तिप्रताप इत्यर्थः। अत्रावलिमण्डलशब्दौ प्रतापकीर्त्त्योर्दण्डत्वातपत्रत्वयोरुपयोगार्थौ इह कीर्त्तेरातपत्रत्वरूपणं, पूर्वश्लोकोक्तमपि सुवर्णदण्डवैशिष्ट्यात् चास्याप्यपूर्वत्वात् वैचित्र्यविशेषः, प्रतापकीर्त्त्योर्यथासंख्यं सुवर्णदण्डत्वसितातपत्रत्वरूपणात् यथासंख्यरूपकातिशयोक्तीनां संसृष्टिः ॥ २ ॥

कविः काव्यवर्णनायकस्योत्कर्षमावहन् सम्प्रति स्वविनयमाविष्करोति पवित्रमिति। अत्रास्मिन् कलियुगे तस्य नलस्य कथा तत्कथा स्मृता सती जगल्लोकं

अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्द्दशत्व कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥४॥

रसक्षालनमेव अम्बु क्षालनमेवेत्युत्प्रेक्षा, "देहधात्वम्बुपारदा" इति रसशब्दार्थोक्तौ विश्वः। पवित्रमातनुते शुभ्रं करोति, सा तत्कथा आविलां कलुषामपि स्वसेविनीमेव स्वंसेवमानां निरन्तरस्वकीर्त्तनपरामित्यर्थः, मद्गिरं न कथं पवित्रयिष्यति पवित्रं करिष्यत्येवेत्यर्थः "कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनमिति" स्मरणादिति भावः, या स्मृतिमात्रेण शोधनी सा कीर्त्तनात् किमुतेति कैमुत्यन्यायेन शोधकत्वोक्तेरर्थापत्तिरलङ्कारः । "एकस्य वस्तुनो भावात् यत्र वस्त्वन्यथा भवेत् । कैमुत्यन्यायतः सा स्यादर्थापत्तिरलङ्क्रियेति" लक्षणात् ॥ ३ ॥

अथास्य गुणाद्भुतत्वं प्रपञ्चयति अधीतीति । अयं नलश्चतुर्दशसु विद्यासु वेदवेदाङ्गादिषु "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्म्मशास्त्रञ्च विद्या ह्येताश्चतुर्दशेति" स्मरणादिति भावः । अधीतिरध्ययनं बोधोऽर्थावगतिः आचरणं तदर्थानुष्ठानं प्रचारणमध्यापनं तैश्चतुर्भिरुपाधिभिर्विशेषणैश्च "उपाधिर्धर्म्मचिन्तायां कैतवे च विशेषणे" इति विश्वः । चतस्रो दशा अवस्थाः प्रणयन् प्रापयन् अर्थात् विद्यामेव कर्म्म । आधारत्वन्तु वक्ष्यमाणचतुर्द्दशत्वधर्म्मापेक्षयेति विवेकः, चतस्रो दशा अवस्था यासां तासां भावः चतुर्दशत्वम् त्वतलोर्गुणवचनस्येति पुंवद्भावो वक्तव्य इति स्त्रियाः पुंवद्भावः संज्ञाजातिव्यतिरिक्ताश्च गुणवचना इति संप्रदायः । चतुर्द्दशसंख्याकत्वं गम्यते तदभेदाध्यवसायेन विरोधमाभासयति कुतः कथं वा स्वयङ्कृतवान् न वेद्मि तत्कारणं दुर्विज्ञेयमित्यर्थः । स्वतःसिद्धस्य स्वयङ्करणं कथं पिष्टपेषणादित्येको विरोधः चतुर्द्दशानां चतुरावृत्तौ षट्पञ्चाशतः कथं चतुर्दशत्वमित्यपरः, चतुरवस्थापरत्वेन तत्परिहारात् विरोधाभासोऽलङ्कारः "आभासत्वे विरोधस्य विरोधाभास उच्यते" इति लक्षणात् । फलवदर्थबोधपर्य्यन्तोऽस्य विद्यापरिश्रम इति भावः ॥४॥

अमुष्य विद्या रसनाग्रनर्त्तकी त्रयीव नीताङ्गगुणेन विस्तरम् ।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम् ॥५॥
दिगीशवृन्दांशविभूतिरीशिता दिशां स कामप्रसभावरोधिनीम् ।
बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकाम् ॥६॥

अमुष्येति । अमुष्य नलस्य रसनाग्रनर्त्तकी रसनाग्रसञ्चारिणीत्यर्थः । शिल्पिनि ष्वुन् षिद्गौरादिभ्यश्चेति ङीष् सा विद्या सुदविद्येत्यर्थः अस्याश्च रसनेन्द्रियाग्राह्यप्रतिपादकत्वात् रसनाग्रनर्त्तकीति व्यपदेशः त्रयी इव त्रिवेदीव "इति वेदास्त्रयस्त्रयीत्यमरः । अङ्गानां अङ्गभूतानां रसानां षसां गुणेन उल्बणानुल्बणसमतारूपेण त्रिविधेन धर्म्मेण । अन्यत्राङ्गानां षसां निरुक्तादीनां गुणेन आवृत्त्या विस्तरं प्रपञ्चं नीता सती नवानां द्वयं लक्षणया नवकद्वयम् अष्टादशेत्यर्थः । तेषां द्वीपानाम् अपृथक् पृथक्भूता जयश्रियस्तासां जिगीषया जेतुमिच्छयेवेत्यर्थः व्यञ्जकाप्रयोगात् गम्योत्प्रेक्षा, अष्टादशताम् अगाहत अभजत । सुदविद्यापक्षे षसां रसानाम् उक्तरीत्या त्रैगुण्यात् त्रयी पक्षे त्वेकैकवेदशैकैकाङ्गवैशिष्ट्येन षाड्विध्याच्चाष्टादशत्वलाभः प्रागुक्ताश्चतुर्द्दश विद्या उक्ता "आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः । अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादश स्मृताः" इति स्मरणात् । अङ्गविद्यागुणनेन त्रय्या अष्टादशत्वमित्युपाध्यायविश्वेश्वरभट्टारकव्याख्याने तु अङ्गानि वेदाश्चत्वार इत्याथर्व्वणस्य पृथग्वेदत्वे त्रयीत्वहानिः त्रय्यन्तर्भावे तु नाष्टादशत्वसिद्धिरिति चिन्त्यं, उपमोत्प्रेक्षयोः संसृष्टिः ॥५॥

दिगीशेति । दिगीशवृन्दस्य इन्द्रादिदिक्पालकसङ्घस्यांशा मात्रास्तेषां विभूतिर्महिमा "अष्टाभिर्लोकपालानां मात्राभिर्निर्मितो नृपः" इति स्मरणादिति भावः । अत्र नलस्य विभूतिभेदेऽप्यभेदोक्तेरतिशयोक्तिः । अत्र दिशामीशिता दिशामिति बहुवचनादिन्द्रादीनामेकैकदिगीशितृत्वं नलस्य तु सर्वदिगीशितृत्वमिति व्यतिरेको व्यज्यते, सः नलः कामस्येच्छायाः प्रसभं बलात्कारेणावरुणद्धीति तथोक्तं स्वेच्छाप्रवृत्तिनिवारकमित्यर्थः । अन्यत्र कन्दर्पदर्पघ्नीमित्यर्थः, निजमात्मीयं यत् त्रिनेत्रावतरत्वं दिगीशांशप्रभवत्वप्रयुक्तमीश्वरावतरत्वं तस्य बोधिकां ज्ञापिकां तृतीयदृशं दृ-

पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे ? ।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन् दधावधर्म्मोऽपि कृशस्तपस्विताम् ॥७॥
यदस्य यात्रासु बलोद्धतं रजःस्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ॥८॥

श्वरत्वञ्चवत्वम् । अत्र तृजकाभ्यां कर्त्तरीति" कृद्योगसमासस्यैव निषेधाच्छेषषष्ठीसमासः तत्प्रयोजक इत्यादिसूत्रकारप्रयोगदर्शनादिति । शास्त्राणि श्रुतिस्मृत्यादीन्येव द्वयाधिकान्तृतीयां दृशमिति रूपकम् । बभार अत एव ईश्वरांशत्वं सिद्धमिति भावः । विशालाक्षोऽपि शास्त्रेणैव चक्षुष्मानाभातीति भावः । अवतरेत्यत्राप्प्रत्ययान्तेन 'तरशब्देन सुप्सुपेति समासः नतूपसृष्टात् प्रत्ययोत्पत्तिः अवेट् स्तोर्घञ् घञ् प्रसङ्गात् । अत्रोक्तयोः रूपकातिशयोक्त्योः संसृष्टिः ॥ ६ ॥

पदैरिति । अमुना नलेन कृते कृतयुगे सुकृते धर्मे वृषरूपत्वाच्चतुर्भिः पदैश्चरणैः चतुर्भागैश्च स्थिरीकृते सति के तपो न प्रपेदिरे ? । सर्वेऽपि प्रापुरेवेत्यर्थः । कुतः यद्यस्मादस्मादधर्मोऽपि कृशः सन् एकाङ्घ्रेरेकपादस्य एकनिष्ठाङ्गुलिना भुवं स्पृशन् कृतेऽप्यधर्मस्य लेशतः सम्भवादंशेन स्पृशतीत्यर्थः तपस्वितां तापसत्वं दीनत्वञ्च "मुनिदीनौ तपस्विनाविति" विश्वः, अस्य शासनादधर्मोऽपि धर्मेष्वासक्तोऽभूत् किमुतान्य इति भावः । अतएवार्थापत्तिरलङ्कारः, "एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा भवेत् । कैमुत्यन्यायतः सा स्यादर्थापत्तिरलङ्क्रियेति" लक्षणात् । तेनाधर्म्मोऽपि धार्म्मिक इति विरोधो व्यज्यते ॥ ७ ॥

यदस्येति । अस्य नलस्य यात्रासु जैत्रयात्रासु बलोद्धतं सैन्योद्धतं स्फुरतः प्रतापस्यैवानलस्य यो धूमः तस्येव मञ्जिमा मञ्जुत्वं यस्य तत् तथोक्तं सप्तम्युपमानेत्यादिना बहुव्रीहिः । मञ्जुशब्दादिमनिच् । यद्रजस्तदेव गत्वा सुधाम्बुधौ क्षीरसागरे पतितं सत् पङ्कीभवद्द्रवद्रव्यमेलनात् पङ्कीभूतं सत् विधौ चन्द्रे अङ्कतां अङ्कत्वं दधाति पङ्किलादुत्थितः पङ्किलो भवति पङ्किलत्वञ्चान्यथा न सम्भवतीति भावः रूपकसंसृष्टगस्योत्प्रेक्षा ॥ ८ ॥

स्फुरद्धनुर्निस्वनतद्घनाशुग प्रगल्भवृष्टिव्ययितस्य सङ्गरे ।
निजस्य तेजःशिखिनः परःशता वितेनुरङ्गारमिवायशः परे ॥९॥
अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः ॥१०॥
निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः ।

स्फुरदिति । सङ्गरे युद्धे शतात्परे परःशताः अपरिमिता इत्यर्थः । पञ्चमीति योगविभागात्समासः राजदन्तादित्वादुपसर्जनस्य परनिपातः पारस्करादित्वात्सुडागमः । परे शत्रवः स्फुरन्तौ धनुर्निस्वनौ निजचापतद्घोषावेव च इन्द्रचापगर्जिते यस्य स तथोक्तः स चासौ तद्घनः स नल एव घनः तस्याशुगानां बाणानां प्रगल्भवृष्टिर्महावृष्टिः सैव आशुगेन वायुना प्रगल्भवृष्टिः "आशुगौ वायुविशिखौ" इत्यमरः । तया व्ययितस्य निर्वापितस्य विपूर्वादयतेः कर्मणि क्तः । निजस्य तेजःशिखिनः प्रतापाग्नेर्निर्वाणम् अङ्गारमिवेत्युत्प्रेक्षावाचिशब्दोऽयम् । अयशोऽपकीर्त्तिं वितेनुः अयशश्च मलिनमिति कविप्रसिद्धम् । निःसपत्नोऽयमिति भावः । रूपकोत्प्रेक्षयोः सङ्करः ॥ ९ ॥

अनल्पेति । राज्ञो हन्ति राजघः घातक इत्यर्थः । राजघ उपसंख्यानमिति निपातः । स नलः अनल्पं दग्धान्यरिपुराणि यैस्ते अनल्पदग्धारिपुराः अत एव अनला अनलायमाना उज्ज्वलाश्च इत्यर्थः । तैर्निजप्रतापैरिव जयाय सृष्टया जयार्थयेत्यर्थः नीराजनया आरात्रिकयेत्यर्थः ज्वलद्दीप्यमानं भुवो वलयं भूचक्रं प्रदक्षिणीकृत्य प्रदक्षिणं परिभ्राम्य रराज । अत्र ज्वलत्प्रतापानलो नलो दिग्जैत्रयात्रायां प्राच्यादिप्रादक्षिण्येन भूमण्डलं परिभ्रमन् निजप्रतापनीराजनया भूदेवतां नीराजयन्निव रराजेत्युत्प्रेक्षा । व्यञ्जकाद्यप्रयोगाद्गम्या, किञ्च प्रतापैर्नीराजयति प्रतापानलस्य नीराजनत्वरूपणादरिपुराणां वर्त्तित्वरूपकमित्येकदेशवर्त्ति तदुत्थापिता चेयमुत्प्रेक्षेति । अनयोरङ्गाङ्गिभावेन सङ्करः ॥१०॥

निवारिता इति । तेन नलेन निरीतिभावं ईतिरहितत्वं गमिते

न तत्यजुर्नूनमनन्य संश्रयाः प्रतीपभूपालमृगीदृशां दृशः ॥ ११॥
सितांशुवर्णैर्वयति स्म तद्गुणैर्महासिवेम्नः सहकृत्वरी बहुम् ।
दिगङ्गनाङ्गाभरणं रणाङ्गणे यशःपटं तद्भटचातुरीतुरी ॥ १२ ॥
प्रतीपभूपैरिव किं ततोभिया विरुद्धधर्मैरपि भेत्तृतोज्झिता ।
अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक् चारदृगप्यवर्त्तत॥१३

अखिले महीतले निवारिताः निष्कासिता अतिदृष्टयोऽनन्यसंश्रया आश्रयान्तरशून्याः सत्यः प्रतीपभूपालानां मृगीदृशाम् अरिवधूनां दृशः । क्षणमपि न तत्यजुः यथा निष्कासिता अपि शरणागताः स्त्रियः तदाज्ञया कुत्रचित् तिष्ठन्ति तद्वदित्यर्थः । नूनमित्युत्प्रेक्षायाम्. अरिवधात्तन्नार्यो निरन्तरं रुदन्तीति भावः । "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः" इति ॥ ११ ॥

सितांश्विति । महासिरेव वेमा वाय वापदण्डः "पुंसि वेमा वाय दण्ड" इत्यमरः । तस्य सहकृत्वरी सहकारिणी सहे चेति करोतेः क्वनिप्प्रत्ययः वनोर चेति ङीप् रश्च । सा तस्य नलस्य भटानां चातुरी चातुर्य्यं सैव तुरी वयनविशेषः सैव कर्त्री सितांशोश्चन्द्रस्येव वर्णो येषां तैः शुभ्रैरित्यर्थः अन्यत्र सिताः-शुक्लाअंशूनामवयवानां वर्णाः कारणत्वेनैषां तैः कारणगुणपूर्वैरित्यर्थः तद्गुणैस्तस्य नलस्य गुणाः शौर्य्यौदार्य्यादयः तैरेव गुणैस्तन्तुभिः श्लिष्टरूपकम् । दिशामिवाङ्गनानामङ्गावरणं गात्रसंवरणं बहुं महान्तं यश एव पटं रणाङ्गणे वयति स्म ततान । रूपकालङ्कारः ॥ १२ ॥

प्रतीपेति । प्रतीपभूपैः शत्रुभूपैरिव विरुद्धधर्मैः सहाऽनवस्थायिधर्मैरिव ततो नलात् भिया भयेन भेत्तृता स्वाश्रयभेदकत्वमुज्झिता परित्यक्ता किं ? कुतः यद्यस्मात् स नलः ओजसा तेजसा मित्रजित् सूर्यजित् मित्रजिच्च भवतीति विरुद्धएकोऽर्थः, शत्रुजिदित्यविरोधः चारदृक् "राजानश्चारचक्षुषः" इति नीतिशास्त्रात् गूढचारचक्षुरपि विचारदृक् चारदृग् न भवतीति विरोधः । विचारेण पश्यत्यविरोधः । अवर्त्तत अपिर्विरोधे । अतएवायं विरोधालङ्कारः । "आभासत्वे विरोधस्य विरोधालङ्कृतिर्मतेति" लक्षणात् ।

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥१४
अयन्दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः ॥१५
विभज्य मेरुर्न यदर्थिसात् कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम्॥१६

एतदुपजीवनेन विरुद्धधर्म्माध्यासस्य स्वाश्रयबाधकत्वाभावोत्प्रेक्षा सा च प्रतीपभूपैरित्युपमानुप्राणितेति त्रयाणां सङ्करः ॥ १२ ॥

तदोजस इति । तदोजसस्तत्प्रतापस्य तद्यशसश्च स्थितौ, सत्यां तयोः स्थितयोरित्यर्थः । इमौ वक्ष्यमाणौ भानुर्विधुश्च वृथा व्यर्थाविति यदा यदा चित्ते कुरुते अनुसन्धत्ते तदा तदातदेत्यर्थः परिवेषस्य कादाचित्कत्वादिति भावः । विधिर्विधाता भानोर्विधोरपि परिवेषस्य परिधेः कैतवात् "परिवेषस्तु परिधिरुपसूर्य्यकमण्डले" इत्यमरः । कुण्डलनां मण्डलरेखां करोति तनोति यथा लेखकोऽधिकाक्षरवर्जनायेति भावः । विजितचन्द्रार्कौ यस्य कीर्तिप्रतापाविति भावः । अत्र परिवेषमिषेण सूर्य्याचन्द्रमसोः कुण्डलनोत्प्रेक्षणात् सापह्नवोत्प्रेक्षा सा च व्यञ्जकाप्रयोगाद्गम्या ॥ १४ ॥

अयमिति । अल्पितकल्पपादपः त्यागशीलतयाऽल्पीकृतकल्पवृक्षो नृपः अर्थिजनस्य ललाटे जाग्रतीं प्रकाशमानाम् । अयं दरिद्रो निस्वो भविता भविष्यतीत्येवं रूपां वैधसीं वैधात्रीं लिपिम् अक्षरविन्यासं दारिद्र्येण दरिद्रतां दारिद्र्यराहित्यं प्रणीय संपाद्य मृषा मिथ्या न चक्रे ब्रह्मशासनस्यान्यथा कर्तुमशक्यत्वात् कथञ्चिदस्याव्यर्थाक्षं सम्पादितवानित्यर्थः ब्रह्मलिखितमन्यथा कर्त्तुं क्षमोऽयमिति भावः । एवंकरणा सम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः ॥ १५ ॥

विभज्येति । मेरुर्हेमाद्रिः विभज्य भागीकृत्य अर्थिसादर्थिने देयमिति त्रा चेति त्राच्प्रत्ययः । न कृतः, सिन्धुरब्धिः उत्सर्गजलव्ययैर्दानाम्बुवियोगैर्मरु

अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च।
दधौ पटीयान् समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥१७॥
अधोविधानात् कमलप्रवालयोः शिरःसु दानादखिलक्षमाभुजाम्।
पुरेदमूर्द्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्द्ध्वरेखया ॥ १८ ॥

र्निर्जलदेशो न कृत इति यत् तेन नलेन तत् पूर्वोक्तं निजयशोयुगम् अपकीर्त्तिद्वयं द्वयोः फालयोः शिरोभागयोर्बद्धाः संयताः 'फलतेर्विशरणार्थेऽप्प्रत्ययः' प्रायेण। पुंसामपि सीमन्तितशिरोरुहत्वाद्द्विफालबद्धा इत्युक्तम्। एवं द्विधा विभक्ताश्चिकुराः शिरोरुहाः सन्तः शिरःस्थितम् अमानि द्विधाकृतकेशरूपेणाऽयशोयुगमेव स्वशिरसि तिष्ठतीत्यमन्यतेत्यर्थः मन्यतेः कर्मणि लुङ्। केशेषु कृष्णत्वसाम्येन अयशोरूपणाद्रूपकालङ्कारः ॥ १६ ॥

अजस्रमिति। दिनेश्वरस्य श्रीरिव श्रीर्यस्य स इति निदर्शनालङ्कारः। पटीयानयं देवो राजा सूर्यश्च "देवः सूर्ये यमे राज्ञीति" विश्वः। अजस्रमनिशं मुदा सम्मानेन कृतसन्तोषेणैव न तु निर्बन्धेनेति भावः। अभ्यासं समीपम् उपेयुषा प्राप्तवता उपेयिवाननाश्वाननूचानश्चेति निपातः। कविना कविभिर्बुधेन बुधैश्च समं न तु दुष्टैरिति भावः। उभयत्र जात्या एकवचनम्, अन्यत्र बुधशुक्राभ्यां संहत इत्यर्थः। तत्साहचर्यं च सूर्यस्य ज्योतिःशास्त्रादवगन्तव्यं समयं कालं नयन् गमयन्। दिने दिने उदयमभ्युदयमाविर्भावं दधौ अत्र निदर्शनश्लेषयोः सङ्करः ॥ १७ ॥

अधइति। कमलप्रवालयोः कर्णयोरधोविधानादधःकरणात्तिरस्करणादिति सौन्दर्यातिशयोक्तिः। अखिलक्षमाभुजां सर्वेषामरिभूभुजामिति भावः। शिरःसु दानाद्विधानादिति शौर्यातिशयोक्तिः। इदमस्य नलस्य पदं चरणमूर्द्ध्वम् उत्कृष्टमुपरिष्टाच्च पुरा भवतीति भविष्यतीति यावत् पुरानिपातयोर्लट् इति पुराशब्दयोगात् भविष्यदर्थे लट् इतीदम्मत्वेतिशेषः गम्यमानार्थत्वादप्रयोगः। वेधसा कर्त्रा ऊर्द्ध्वरेखया अङ्कितं सौन्दर्य

जगज्जयं तेन च कोषमक्षयं प्रणीतवान् शैशवशेषवानयम् ।
सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम् ॥१९॥
अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे ।
तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः२०
किमस्य रोम्णां कपटेन कोटिभिर्विधिर्न लेखाभिरजीगणद्गुणान्
न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः ॥२१॥

शौर्य्याभ्यां सर्वोत्तरम्भविष्यतीति ज्ञापनार्थमङ्कितं किम् ? इत्युत्प्रेक्षा ऊर्द्धरेखाङ्कितपादः सर्वोत्तरः स्यादिति सामुद्रिकाः ॥ १८ ॥

अस्य गुणाङ्कुरत्वमभिधाय अधुना वक्ष्यमाणकाव्यकथोपयोगितयाऽस्य यौवनप्राप्तिमाह । जगदिति । अयं नलः शैशवशेषवानीषदवशिष्टशैशवावस्थ एव जगज्जयन्तेन जगज्जयेन अक्षयं कोषं धर्म्मजातं च प्रणीतवान् सम्पादितवान् अथ रतीशस्य सखा मदनमित्रमृतुर्वसन्तोऽयं वनं यथा, तथा यौवनमस्य वपुरालिङ्गत् आश्लिक्षत संक्रान्तमित्यर्थः उपमालङ्कारः ॥ १९ ॥

अथ यौवनमेव वर्णयति । अधारीत्यादि । तदङ्घ्रिणा तच्चरणेन पद्मेषु विषये घृणा जुगुप्सा अवज्ञेति यावत् । "घृणा जुगुप्साकृपयोरिति" विश्वः । अधारि धृतेति नीचत्वादिति भावः । पल्लवे किसलये तच्छयस्य तत्पाणेः छाया तच्छयच्छायं "पञ्चशाखः शयः पाणिः" इत्यमरः । विभाषेत्यादिना समासे छायानपुंसकत्वम् । तस्य लवो लेशोऽपि क्व न क्वचिदित्यर्थः । शरदि भवः शारदः सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् । पर्वणि भवः पार्विकः कालाट्ठञस्तद्धित इति टिलोपः । स चासौ शर्वरीश्वरश्चन्द्रः तदास्यदास्ये तन्मुखकैङ्कर्य्येऽप्यधिकारितां योग्यतां न गतः एतस्य पादपाणिमुखमप्रतिममिति भावः । अत्राङ्घ्र्यादीनां पद्मादिषु घृणाद्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ २० ॥ [वङ्गपुस्तके पार्वण इति पाठः] ।

किमिति । विधिः वेधाः अस्य नलस्य गुणान् रोम्णां कपटेन मिषेण कोटिभिः कोटिसंख्यरेखाभिर्नाजीगणत् न गणितवान् इव

अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता ।
उरःश्रिया तत्र च गोपुरस्फुरत् कवाटदुर्धर्षतिरःप्रसारिता ॥ २२ ॥
स्वकेलिलेशस्मितनिन्दितेन्दुनो निजांशदृक्तर्जितपद्मसम्पदः ।
अतद्द्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे ॥ २३ ॥
सरोरुहं तस्य दृशैव तर्जितं जिताः स्मितेनैव विधोरपि श्रियः ।

गण इति गणेर्णौ चाभ्यासस्येकारः । जगत्कृता विधात्रा रोमकूपौघानां मिषात् दूषणानां दोषाणां शून्यस्यात्यन्ताभावस्य बिन्दवोऽज्ञापकवर्त्तुलरेखा न कृताः किम्? अस्मिन् गुणा एव सन्ति न दोषा इति भावः । अत्र रोम्णां रोमकूपाणाञ्च कपटमिषशब्दाभ्यां तद्वाक्यस्यापह्नवे गुणगणनालेखत्वदूषणशून्यबिन्दुत्वयोरुत्प्रेक्षणात्सापह्नवोत्प्रेक्षयोः संसृष्टिः ॥ २१ ॥

अमुष्येति । अमुष्य नलस्य दोर्भ्यां कर्तृभ्यामरिदुर्गाणां लुण्ठने भञ्जने अर्गलानां कवाटविष्कम्भदारूणाम् "तद्विष्कम्भोऽर्गलं न ना" इत्यमरः । दीर्घाणि च तानि पीनानि च तेषां भावो दीर्घपीनता आयतपीवरत्वं गृहीता ध्रुवम्? किंचामुष्योरःश्रिया वक्षोलक्ष्म्या कर्त्र्या तत्रारिदुर्गलुण्ठने गोपुरेषु पुरद्वारेषु स्फुरतां कवाटानां दुर्धर्षाणि च तानि तिरःप्रसारीणि तेषां भावस्तत्ता अप्रधृष्यत्वं चेत्यर्थः सा गृहीता ध्रुवम् । अर्गलदीर्घबाहुरयं कवाटवक्षाश्चेति भावः ॥ २२ ॥

स्वकेलीति । स्वकेलिलेशेन स्वलीलाशकलेन स्मितेन निर्जितेन्दुनो निराकृतचन्द्रस्य निजांशेन स्वावयवेन दृशा दृष्ट्या तर्जितपद्मसम्पदो भर्त्सितकमलसौभाग्यस्य तन्मुखस्य तयोश्चन्द्रारविन्दयोर्द्वयी युग्मं तस्य जित्वरञ्जिष्णु ततोऽधिकं सुन्दरान्तरं यत्र नास्ति तस्मिन् चराचरे जगति "चराचरं स्याज्जगदिति" विश्वः । प्रतिमा उपमानं नास्तीत्यर्थः । अस्ति भवतिपरोऽप्रयुज्यमानोऽप्यस्तीति वचनात् अत्र चन्द्रारविन्दजयस्य विशेषणत्वात् नलमुखाप्रतिमानहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २३ ॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह । सरोरुहमिति । तस्य दृशैव सरोरुहं

कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता ॥२४
स्ववालभारस्य तदुत्तमाङ्गजैः समञ्चमर्य्येव तुलाभिलाषिणः ।
अनागसे शंसति बालचापलं पुनः पुनः पुच्छविलोलनच्छलात्॥२५
महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया
द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥२६॥

निर्ज्जितं स्मितेन मन्दहासेनैव विधोरिन्दोः श्रियः कान्तयः जिता विनिर्जिता परमाभ्यामन्यत् भव्यं रम्यं वस्तु कुतः न कुत्रापीत्यर्थः तदाननस्योपमितौ उपमाने महीयसी महत्तरा दरिद्रता नास्तिता । अहोरात्रेऽपि चन्द्रारविन्दजयस्य वाक्यार्थस्य मुखोपमानदारिद्र्यहेतुकत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २४ ॥

स्ववालेति ॥ चमरी मृगविशेषः स्वयमेव तदुत्तमाङ्गजैर्नलमूर्द्धजैः समं सह तुलाभिलाषिणः साम्याभिलाषलक्षणापराधिन इत्यर्थः । जघन्यस्योत्तमजन्मभिः सह साम्याभिमानोऽपि महानपराध इति भावः। स्ववालभारस्य निजलोमचयस्य अनागसे अनपराधाय क्वचित्तदभावे नञ् समास इष्यते । पुनः पुनः पुच्छस्य विलोलनच्छलात् विचालनव्याजात् वालचापलं रोमचाञ्चल्यं बवयोरभेदाद्बालचाञ्चल्यं च शंसति कथयति बालचपलत्वं सोढव्यमिति समाधत्त इत्यर्थः। अत्र पुच्छविचालनशब्देन अपह्नुत्य बालवालयोरभेदाध्यवसायेन बालचापलत्वारोपादपह्नवभेदः ॥२५॥

अथास्य यौवनप्रवेशफलं प्रस्तौति महीभृत इति । तस्य महीभृतो नलस्य मन्मथस्येव श्रिया सौन्दर्य्येण च निजस्यात्मीयस्य चित्तस्य तं नलं प्रतीच्छया रागेण च तत्र तस्मिन् नृपे विषये जगत्त्रयीभुवां लोकत्रयवर्त्तिनीनां नतभ्रुवां सुभ्रुवां द्विधा मन्मथविभ्रमोऽभवत् तत्सौन्दर्य्यान्मन्मथ इति भ्रान्तिः स्वानुरागान्मन्मथविकारश्चाभूदित्यर्थः। विश्वातिशयसौन्दर्य्यमस्येति भावः। अत्र नलश्रीर्विश्ववनितेच्छया श्लिष्टपदोपात्तविभ्रमद्वयेन च यथासंख्यासम्भवात् श्लेषसङ्कीर्णो यथासंख्यालङ्कारः॥२६॥

निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्ज्जितः।
अमूस्तमभ्यासभरं विवृण्वते निमेषनिस्वैरधुनापि लोचनैः ॥२७॥
अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्।
इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः२८
विलोकयन्तीभिरजस्रभावनाबलादमुं तत्र निमीलनेष्वपि।
अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्म्मितः २९

निमीलनेति। त्रिदशीभिः सुराङ्गनाभिः निमीलनभ्रंशजुषा निमेषाभावभाजा निर्निमिषयेत्यर्थः। दृशा दृष्ट्या तं नलं भृशं निपीय गाढं दृष्ट्वेत्यर्थः। योऽभ्यासभरोऽर्जितः कृतः अमूस्त्रिदश्यस्तमभ्यासभरम् आवृत्त्यतिशयं निमेषनिस्वैर्निमेषरहितैर्लोचनैरधुनापि विवृण्वते प्रकटयन्तीत्यर्थः। तासां स्वाभाविकस्य निमेषाभावस्य तादृशनिरीक्षणाभ्यासवासनायत्तत्वमुत्प्रेक्ष्यते सा चेवाद्यप्रयोगात् गम्या॥ २७॥

अद इति॥ चक्षुःश्रवसां प्रिया नागकान्ता अद इदं नोऽस्माकं दृशोश्चक्षुषोर्द्वयन्तं नलमाकर्णयतीति तदाकर्णि सत् तासां चक्षुःश्रवस्त्वादिति भावः। फलाढ्यजीवितं सफलजीवितं, न वीक्षत इत्यावीक्षि अत्रापि ताच्छील्ये णिनिः, तस्यावीक्षि तदवीक्षि तदपश्यदफलं चेत्येवं नले विषये तदा नलकाले आत्मना स्वेन हृदा चित्तेन स्तुवन्ति स्म निन्दन्ति स्म उभयकारणसम्भवादुभयकार्योदयमिति भावः। ईदृङ्निन्दास्तुत्यत्यन्तासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः॥ २८॥

विलोकयन्तीभिरिति॥ अजस्रभावनाबलान्निरन्तरध्यानप्रभावादमुं नलं तत्र निमीलनेषु निमेषावस्थास्ववलोकयन्तीभिरुन्मेषावस्थायामसाक्षात्कुर्वन्तीभिर्मानुषीभिरमुष्य नलस्य दर्शने निमेषनिर्मितो निमीलनकृतो विघ्नलेशोऽपि नालम्भि नालभि "विभाषा चिण्णमुलोरिति विकल्पेन नुमागमः। अत्र मर्त्यानां पर्यायावस्थासम्बन्धेऽपि तदकथनादतिशयोक्तिः॥ २९॥

न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम्।
तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम्॥३०
श्रियास्य योग्याहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः।
विहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः॥३१॥
यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिजस्य पत्तनम्।
विदर्भजाया मदनस्तथा मनो नलावरुद्धं वयसैव वेशितः॥३२॥

नेति। का स्त्री निशि स्वप्नगतं स्वप्नलब्धमित्यर्थः। तं नलं न ददर्श, गोत्रस्खलिते नामविपर्य्यासे च तं का न जगाद नाजुहावेत्यर्थः। रते च का वा तदात्मतया नलात्मकत्वेन ध्यातधवा भावितनिजप्रिया सती स्वस्य मनोभवोद्भवं मदनोद्रेकं न चकार। सर्व्वापि सर्व्वं चकारैवेत्यर्थः। कामान्धाः किं न कुर्वन्तीति भावः। अत्रापि दर्शनाद्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः॥ २० ॥

श्रियेति। तन्नलमालोक्य श्रिया कामनीयकेनाहमस्य योग्या अनुरूपेति स्वमात्मानमीक्षितुं परीक्षितुं करे धृतो दर्पणः सुरूपया रम्यया अहमस्य योग्येत्यभिमानेनेति यावत्। "प्राज्ञरूपे बुधे रम्ये चाभिरूपः सुरूपवदिति" विश्वः। अतएवापदर्पयाऽपगताहङ्कारया कया स्त्रिया भैमीं विहाय दमयन्तीं विना श्वासैर्दुःखनिःश्वासैर्मलीमसो मलिनो न कृतः ज्योत्स्नातमिस्रेत्यादिना निपातः। सर्व्वाभिः कृत एवेत्यर्थः दर्पणे निजवैरूप्यदर्शनादिति सुन्दर्य्योऽपि तदनुरूपचापलाल्लज्जिता इति भावः। अत्र सर्व्वासामेवंविधव्यापारासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः॥ ३१ ॥

एवं नलस्य लोकोत्तरसौन्दर्य्यद्योतनाय स्त्रीमात्रस्य तं प्रत्यनुरागमुक्त्वा सम्प्रति दमयन्त्यास्तमाह यथेत्यादि। मदनः प्राक् प्रद्युम्नावतार इति भावः। भोगभोजिना सर्पकायखादिना वयसा खगेन गरुड़ेन उह्यमानः ऊढ़ः सन्। वहेः कर्म्मणि यकि संप्रसारणे पूर्वरूपम्। अनलावरुद्धं वह्निपरिवेष्टितं विरोचनस्यापत्यं पुमान् वैरोचनिः बलिः तज्जस्य बाणा-

नृपेऽनुरूपे निजरूपसम्पदां दिदेश तस्मिन् बहुशः श्रुतिं गते ।
विशिष्य सा भीमनरेन्द्रनन्दना मनोभवाज्ञैकवशंवदं मनः ॥३३॥
उपासनामेत्य पितुः स्म रज्यते दिने दिने सावसरेषु वन्दिनाम् ।
पठत्सु तेषु प्रति भूपतीनलं विनिद्ररोमाजनि शृण्वती नलम् ॥३४॥

पुरस्य पत्तनं प्रसह्य यथा वेशितः खलु "ततो गरुडमारुह्य स्मृतमात्रगतं हरिः । बलप्रद्युम्नसहितो बाणस्य प्रययौ पुरम्" इत्युषाहरणे विष्णुपुराणात् । तथा नलावरुद्धं नलाक्रान्तं विदर्भजाया दमयन्त्या मनो भोगभोजिना सुखभोजिना "भोगः सुखेऽस्त्र्यादिभृतावहेश्च फणकाययोः" इत्यमरः । भुजे[illegible] णिनिः । वयसा यौवनेन कर्त्रा खगेनेवेति गम्यते "खगबाल्यादिनोर्वयः" इत्यमरः । ऊह्यमानः परैस्तर्क्यमाणः भक्त्या स्तूयमान इति भावः । ऊहेर्वितर्कार्थात् कर्म्मणि यक् । वेशितः प्रवेशितः । वियोगिनां चेतसि यौवनेन मदनरोह इति भावः । यथोह्यमानो नलेति चेति शब्दश्लेषः । श्लिष्टविशेषणा चेयमुपमा सा च वयसेति वयसोरभेदाध्यवसायमूलातिशयोक्त्यनुप्राणितेति सङ्करः ॥ ३२ ॥

इह विरहिणां चक्षुःप्रीत्यादयो दशावस्थाः सन्ति तत्र चक्षुःप्रीतिः श्रवणानुरागस्याप्युपलक्षणमतस्तत्पूर्व्विकां मनःसङ्गाख्यां द्वितीयामवस्थामाह । नृप इत्यादि । सा भीमनरेन्द्रनन्दना दमयन्ती नन्द्यादित्वाल्ल्युप्रत्ययः । निजरूपसम्पदां स्वलावण्यसम्पत्तीनामनुरूपे बहुशः बह्वल्पार्थाच्छस्कारकादन्यतरस्यामित्यभादनार्थे शस्प्रत्ययः । श्रुतिं श्रवणं गते एतेन श्रवणानुराग उक्तः, तस्मिन् नृपे नले मनोभवाज्ञाया एकं वशंवदम् एकस्यैव विधेये शिवभागवत् समासः । प्रियवशे वदः खच् अरुर्द्विषदित्यादिना तस्य मुम् । मनो विशिष्य दिदेश अस्येदामिति निश्चित्यातिससर्जेत्यर्थः तद्गुणश्रवणात्तदासक्तचित्तासीदित्यर्थः ॥ ३३ ॥

अथास्याः श्रवणानुरागमेव चतुर्भिर्वर्णयति । उपासनामित्यादि । सा भैमी दिने दिने प्रतिदिनं नित्यवीप्सयोरिति वीप्सायां द्विर्भावः । वन्दिनां स्तुतिपाठकानामवसरेषु पितुरुपासनां सेवामेत्य प्राप्य तेषु वन्दिषु

कथाप्रसङ्गेषु मिथः सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयान्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया ॥ ३५ ॥
स्मरात्परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ॥ ३६ ॥
नलस्य पृष्टा निषधागता गुणान्मिषेण दूतद्विजवन्दिचारणाः ।
निपीय तत्कीर्त्तिकथामथानया चिराय तस्थे विमनायमानया ३७

भूपतीन् प्रति भूपतीनुद्दिश्य पठत्सु सत्स्विति शेषः । नलं शृण्वती अलं सृज्यते स्म रक्ताभूदित्यर्थः । सृजेर्दैवादिकाल्लट् । अतएव विनिद्ररोमा रोमाञ्चिता अजनीति सात्त्विकोक्तिः । जनेः कर्त्तरि लुङ् दीपजनेत्यादिना च्लेश्चिणादेशः ॥ नलगुणश्रवणजन्योरागस्तस्य रोमाञ्चेन व्यक्तोऽभूदिति भावः ॥३४॥

कथेति । मिथोऽन्योन्यं रहसि कथाप्रसङ्गेषु विस्रम्भगोष्ठीप्रसङ्गेषु सखीमुखान्नलनामनि नलाख्ये तृणे श्रुते सति "नलः पोटगले राज्ञीति" विश्वः । अनया तन्व्या दमयन्त्या द्रुतमन्यत् कार्य्यान्तरं विधूय निराकृत्य मुदा हर्षेण तदाकर्णने नलशब्दाकर्णने सज्जकर्णया दत्तकर्णया अभूयत अभावि । भुवो भावे लङ् । अर्थान्तरप्रयुक्तोऽपि नलशब्दो नृपस्मारकतया तदाकर्षकोऽभूदिति रागातिशयोक्तिः ॥ ३५ ॥

स्मरादिति । परासोर्मृतात् अतएवानिमेषलोचनान्निश्चलाक्षाद्देवादिति च गम्यते उभयथापि भयहेतूक्तिः । तस्माद्बिभेमीति तद्भिन्नं ततोऽन्यदुदाहरेति तत्सदृशं निदर्शयेत्याह सा दमयन्ती यूनः स्तुवता जनेन प्रयोगकर्त्रा तदास्पदे स्मरस्थाने निदर्शनं दृष्टान्तं नैषधं निषधानां राजानं नलं जनपदशब्दात्क्षत्रियेभ्योऽञ् । अभ्यषेचयत् स्मरस्य स्थाने तत्सदृश एवाभिषेक्तुं युक्तः । स च नलादन्यो नास्तीति तस्मिन् नल उदाहृतेऽनुतर्षं शृणोतीति रागातिरेकोक्तिः उपसर्गात् सुनोतीत्यादिना अड्व्यवायेऽपि षत्वम् ॥ ३६ ॥

नलस्येति । निषधेभ्य आगता दूताः सन्देशहरा द्विजा ब्राह्मणा वन्दिनः स्तावकाः चारणा देशभ्रमणजीविनः ते सर्वे मिषेण व्याजेन नल-

प्रियं प्रियाञ्च त्रिजगज्जयिश्रियौ लिखाधिलीलागृहभित्ति कावपि।
इति स्म सा कारुतरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते॥ ३८
मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति।
अदृष्टमप्यर्थंदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिम्॥ ३९॥
निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात्।

स्य गुणान् पृष्टाः पृच्छतेर्दुहादित्वात् प्रधाने कर्मणि क्तः। अथ प्रश्नानन्तरमनया भैम्या तत्कीर्त्तिकथां नलस्य यशःकथामृतं निपीय नितरां स्तुतेत्यर्थः। चिराय विमनायमानया विमनोभवन्त्या भृशादित्वात्क्यङि सलोपश्च अकृत्सार्वधातुकयोर्दीर्घः ततो लटः शानजादेशः। तदा तस्थे स्थितं तिष्ठतेर्भावे लिट्। अयञ्च दूतादिव्यवधानेन गुणकीर्त्तनलक्षणः प्रलापाख्यो रत्यनुभवः॥ २७॥

प्रतिकृतिस्वप्नदर्शनादयो विरहिणां विनोदोपाया अथ तत्कथनमुखेन दर्शनानुरागञ्चास्या दर्शयन् प्रतिकृतिदर्शनं तावदाह प्रियमिति॥ सा भैमी त्रीणि जगन्ति समाहृतानि त्रिजगत्। समाहारो द्विगुरेकवचनम्। तस्य जयिनी लोकत्रयजित्वरी श्रीः शोभा ययोस्तादृशौ कावपि प्रियं प्रियाञ्च तौ अधिलीलागृहभित्ति विलासवेश्मकुड्ये विभक्त्यर्थेऽव्ययीभावः। लिखेत्युक्तौ कारुतरेण शिल्पिकाखडेन प्रयोज्येन लेखितं नलस्य च स्वस्य च सख्यं रूपसाम्यापादनम् ईक्षते स्म॥ २८॥

मनोरथेनेति। मनोरथेन सङ्कल्पेन स्वपतीकृतं स्वभर्तृकृतं नलम् अभूततद्भावे च्वौ दीर्घः। स्वपतो निद्राती सा दमयन्ती क्व निशि कुत्र रात्रौ न पश्यति स्म सर्वस्यामपि रात्रौ दृष्टवती। तथा हि सुप्तिः स्वप्नः अदृष्टम् अत्यन्ताननुभूतमप्यर्थं किमुत दृष्टमिति भावः। अदृष्टवैभवात् प्राक्तनभाग्यबलात् जनदर्शनातिथिं लोकदृष्टिगोचरं करोति तदत्रापि निमित्तादृष्टात्तादृक् स्वप्नज्ञानमुत्पन्नमित्यर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ २९॥

निमीलितादिति। निद्रया प्रयोजिकया निमीलितान्मुकुलितादुप-

अदर्शि सङ्गोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः ४०
अहो अहोभिर्महिमा हिमागमेऽप्यतिप्रपेदे प्रति तां स्मरार्दिताम्
भि
तपर्त्तुपूर्त्तावपि मेदसां भरा विभावरीर्बिभराम्बभूविरे ॥ ४१ ॥
स्वकान्तिकीर्त्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम् ।
कदाचिदस्या युवधैर्य्यलोपिनं नलोऽपि लोकादशृणोद्गुणोत्करम् । ४२

रतव्यापारादित्यर्थः, अक्षियुगाच्च तथा बाह्येन्द्रियाणां चक्षुरादीनां मौनेन व्यापारराहित्येन मुद्रितात्प्रतिष्टब्धात् मनसो बहिरस्वातन्त्र्यादिति भावः । हृदो हृदयादपि सङ्गोप्य गोपयित्वेत्यर्थः, अन्तर्द्धौ येनादर्शनमिच्छतीत्यक्षियुगमनसोरपादानत्वम् । अदर्शनं चात्र मनसो बाह्येन्द्रियमौनमुद्रितादिति विशेषणसामर्थ्यादिन्द्रियार्थसंप्रयोगजन्यज्ञानविरह एवेति ज्ञायते, स्वप्नज्ञानं तु मनोजन्यमेव । तदजन्यज्ञानसत्त्वेत्याह कदाप्यवीक्षितः इति । अत्यन्तादृष्टचर इत्यर्थः, महद्रहस्यमतिगोप्यं वस्तु स महीपतिर्नलः अस्या भैम्या अदर्शि दर्शयाञ्चक्रे दृशेर्ण्यन्तात् कर्मणि लुङ् । यथा काचिच्चेटी कस्यैचित्कामिन्यै कञ्चन कान्तं संगोप्य दर्शयति तद्वदिति ध्वनिः॥ ४०॥

अथास्याश्चिन्ताजागरावाह । अहो इति । हिमागमे हेमन्तेऽपि स्मरार्दितां तां दमयन्तीं प्रति अहोभिर्दिवसैः अतिमहिमा अतिवृद्धिः प्रपेदे तदा तपर्त्तुपूर्त्तावपि ग्रीष्मान्तेऽपि विभावरीभिर्निशाभिः मेदसां भरा मांसराशयोऽतिवृद्धिरिति यावत् बिभराम्बभूविरे बभ्रिरे भृञः कर्मणि लिट् आम्प्रत्ययः । अहो आश्चर्यं शास्त्रविरोधादनुभवविरोधाच्चेति भावः, विरहिणां तथा प्रतीयत इत्यविरोधः एतेनास्या निरन्तरचिन्ता जागरश्च गम्यते । अहोशब्दस्य ओदिति प्रगृह्यत्वात् प्रकृतिभावः ।। ४१ ॥

स्वेत्यादि । अथ नलोऽपि स्वस्य कान्त्या सौन्दर्य्येण याः कीर्त्तयः तासां व्रजः पुञ्ज एव मौक्तिकस्रक् मुक्ताहारः तस्या अन्तः अभ्यन्तरे घटनागुणश्रियङ्गुम्फनसूत्रलक्ष्मीं श्रयन्तं भजन्तं युवधैर्यलोपिनं ,

तमेव लब्ध्वावसरं ततः स्मरः शरीरशोभाजयजातमत्सरः ।
अमोघशक्त्या निजयेव मूर्त्तया तया विनिर्ज्जेतुमियेष नैषधम् ॥ ४३
अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजाश्रियः ।
तदुच्चधैर्य्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥ ४४ ॥
अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन्
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्ज्जितान्यपि ४५

तरुणचित्तस्थैर्य्यपरिहारिणम् अस्या दयमन्त्या गुणोत्करं सौन्दर्य्यसन्दोहं लोकादागन्तुकजनात् अशृणोत् अत्र कीर्त्तिव्रजगुणोत्करयोर्मुक्ताहारगुम्फनसूत्रत्वरूपणाद्रूपकालङ्कारः ॥ ४२ ॥

अथास्य तस्यां रागोदयं वर्णयति । तमेवेति । ततो गुणश्रवणानन्तरं शरीरशोभाया देहसौन्दर्य्यस्य जयेन जातमत्सरः उत्पन्नवैरः स्मरः तमेवावसरमवकाशं लब्ध्वा मूर्त्तया मूर्त्तिमत्या निजया अमोघशक्त्येव अकुण्ठितसामर्थ्येनेवेत्युत्प्रेक्षा । तया दमयन्त्या नैषधं नलं विनिर्जेतुमियेष इच्छति स्म स्वान्वेषिणो हि विद्वेषिण इति भावः, तेन रागोदय उक्तः ॥ ४३ ॥

अकारीति ॥ तेन क्षमाभुजा नलेन भीमनृपात्मजायाः दमयन्त्याः श्रियः गुणः तदीयः गुणः सौन्दर्य्यादिः श्रवणातिथिः श्रोत्रविषयः अकारि कृतः श्रुत इत्यर्थः । करोतेः कर्म्मणि लुङ् । स तस्य नलस्य उच्चधैर्यव्ययाय उन्नतधैर्य्यनाशाय संहितेषुणा स्मरेण च स्वात्मनः शरासनाश्रयः चापनिष्ठो गुणो मौर्वी श्रवणातिथिरकारि आकर्णं कृष्ट इत्यर्थः । दमयन्तीगुणश्रवणान्नलमनसि महान् मदनविकारः प्रादुर्भूत इत्यर्थः । अत्रोक्तवाक्यार्थस्य पूर्व्ववाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

अमुष्येति । स स्मरः साहसी साहसकरः "न साहसमनारुह्य नरोभद्राणि

अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत्।
अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि धैर्य्यकञ्चुकम् ॥४६॥
किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो।
स्मरन्तनुच्छायतया तमात्मनः शशाक शङ्के स न लङ्घितुं नलः ४७

पश्यतीति न्यायादविलम्बी सन्नित्यर्थः। अमुष्य धीरस्य अविचलितस्य नलस्य जयाय शरासनज्यां निजधनुर्मौर्वीं विशिखैः शरैः सनाथयन् सनाथं कुर्वन् संयोजयन्नित्यर्थः, त्रयाणां लोकानां समाहारस्त्रिलोकी तद्धितार्थेत्यादिना समासः अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यत इति स्त्रीलिङ्गत्वाद्द्विगोरिति ङीप्। तस्य विजयेनार्ज्जितानि सम्पादितान्यपि यशांसि संशये निमज्जयामास किं पुनः सम्प्रति सम्पाद्यमित्यपिशब्दार्थः, इन्द्रपेक्षया अनुचितकर्मारम्भे मूलमपि नश्येदिति संशयितवानित्यर्थः, अत्र स्मरस्योक्तसंशयाऽसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ४५ ॥

दैवसहायात् पुष्पेषोरेव पुरुषकारः फलित इत्याह। अनेनेति। अनेन नलेन सह भैमीं घटयिष्यतः योजयिष्यतो विधेर्विधातुरवन्ध्येच्छतया अमोघसङ्कल्पत्वेन तत्तस्मात्तथा तेन प्रकारेण योऽग्रे वक्ष्यत इति भावः। व्यलासि विलसितं लसतेर्भावे लुङ्। यत् पौष्पैरपि न तु कठिनैरनङ्गस्य न तु देहवतः मार्गणैर्धैर्य्यमेवकञ्चुकमस्य नलस्य अभेदि भिन्नं कर्म्मणि लुङ्। दमयन्तीनलयोर्दाम्पत्यघटनाय अनङ्गमार्गणैर्नलधैर्यकञ्चुकभेदनाद्विधेरवन्ध्येच्छत्वं विज्ञायत इत्यर्थः, दैवानुकूल्ये किं दुष्करमिति भावः। तत्रानङ्गपौष्पयोः कञ्चुकं भिन्नमिति विरोधः तस्य विलासेनाभासीकरणाद्विरोधाभासः स च धैर्यकञ्चुकमिति रूपकोत्थापित इति तयोरङ्गाङ्गिभावेन सङ्करः ॥ ४६ ॥

अथ विधिमपि जितवतः किं विध्यपेक्षयेत्याशयेनाह। किमिति। किमन्यत् अन्यत् किमुच्यते पितामहो विधिरपि तस्य स्मरस्यास्त्रैस्तापितः सन्तापितः अद्यापि वारिजमाश्रयति तस्य पद्मासनत्वादिति

उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम् ? ।
त्रपासरिद्दुर्गमपि प्रतीर्य्य सा नलस्य तन्वी हृदयं विवेश यत्॥४८॥
अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा ।
अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ॥४९

भावः । सर्वनीतेरपचारस्य गम्यते, अहो विधेरपि स्मरविधेयत्वमाश्चर्यम् पितामहतापिनं स्मरं स नलः आत्मनस्तनोः छायेव छाया कान्तिर्यस्य तस्य भावस्तत्ता तया तनुच्छायतया तनोश्छाया अनातपः तनुच्छाया तत्तयेति च गम्यते "छाया त्वनातपे कान्ताविति" वैजयन्ती । लङ्घितुं न शशाक इत्यहं शङ्के न हि स्वच्छाया लङ्घितुं शक्या इति भावः। अत्र स्मरलङ्घने पितामहोऽप्यशक्तः किमुत नल इत्यर्थापत्तिस्तावदेकोऽलङ्कारः। "एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा भवेत् । कैमुत्यन्यायतः सा स्यादर्थापत्तिरलङ्क्रियेति" लक्षणात् । तनोश्छायेव च्छायेत्युपमा छाययोरभेदाध्यवसायादतिशयोक्तिः। एतत्त्रितयोपजीवनेनालङ्घ्यत्वे तनुच्छायताया हेतुत्वोत्प्रेक्षणादुत्प्रेक्षा सङ्कीर्णा सा च शङ्क इति व्यञ्जकप्रयोगाद्वाच्येति ॥ ४७ ॥

उरोभुवेति। सा तन्वी भैमी त्रपैव सरित् सैव दुर्गं नलसम्बन्धि तदपि प्रतीर्य्य नलस्य हृदयं विवेशेति यत् तत्प्रवेशनं यत्तदोर्नित्यसम्बन्धात् वयस्कृतेन नवोपहारेण नूतननिर्म्माणेन उरोभुवा तज्जन्येन कुम्भयुगेन कुचयुगाख्येनेति भावः । इत्यतिशयोक्तिः । नलोकेत्यादिना तद्योगषष्ठीप्रतिषेधात्कर्त्तरि तृतीया, नपुंसके भाव उपसंख्यानमिति षष्ठी तु शेषविवक्षायाम् । जृम्भितं जृम्भणं किमुत्प्रेक्षा साचोक्तातिशयोक्तिमूलेति सङ्करः । दमयन्तीकुचकुम्भ विभ्रमश्रवणान्नलस्त्रपां विहाय तस्यामासक्तचित्तोऽभूदित्यर्थः तेन मनःसङ्ग उक्तः ॥४८॥

अथास्य जागरावस्थामाह । अपह्नुवानस्येति । निजामधीरतां चपलत्वं जनायापह्नुवानस्यापलपतः श्लाघह्नुङ्स्थेत्यादिना स-

स्मरोपतप्तोऽपि भृशं न स प्रभु र्विदर्भराजन्तनयामयाचत ।
त्यजन्त्यसून् शर्म्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम्॥५०
मृषाविषादाभिनयादयं क्वचित् जुगोप निःश्वासततिं वियोगजाम्।
विलेपनस्याधिकचन्द्रभागता-विभावनाच्चापललाप पाण्डुताम्॥५१

म्प्रदानत्वाच्चतुर्थी । अस्य नलस्य मनोभुवा कामेन यज्जागरप्रलापादिकं कृतन्तस्यैव जागरदुःखस्य साक्षिणी । साक्षाद्द्रष्टरि संज्ञायामिति साक्षाच्छब्दादिनिप्रत्यये ङीप् । शशाङ्केन कोमला रम्या निशा चाबोधि । दीपजनेत्यादिना कर्त्तरि च्लेश्चिणादेशः । तथा शशाङ्कवत्कोमला मृदुला शय्या अबोधि निशायां शय्यायां जागरणयोस्तस्य साक्षित्वमिति भावः ॥ ४९ ॥

ननु किमनेन निर्बन्धेन, याच्यतामेव भूपतिर्दमयन्तीम् नेत्याह । स्मरेत्यादि । भृशङ्गाढं स्मरोपतप्तः कामसन्तप्तोऽपि प्रभुः समर्थः स नलः विदर्भराजस्य भीमनृपतेस्तनयां दमयन्तीं न अयाचत न याचितवान् दुहियाचेत्यादिना याचेर्द्विकर्मकता । तथाहि मानिनो मनस्विनोऽत्युच्चमनस्काः प्राणान् शर्म च सुखञ्च त्यजन्ति एतत्त्यागोऽपि वरं मनाक् वरमिति मनागुत्कर्षे इति, महोपाध्यायवर्द्धमानः । किन्तु, एकमद्वितीयमयाचितव्रतम् अयाच्ञानियमन्तु न त्यजन्ति मानिनां प्राणत्यागदुःखाद् महद् याच्ञाया दुःखमित्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५० ॥

मृषेति । अयं नलो वियोगजां दमयन्तीवियोगजन्यां निःश्वासततिं निःश्वासपरम्परां क्वचित् कुत्रचिद्वस्त्वन्तरे विषये मृषाविषादस्य मिथ्यादुःखस्याभिनयात् छलेन जुगोप सववार । तथा पाण्डुतां विशदतां शरीरपाण्डिमानं च विलेपनस्य चन्दनादधिकः चन्द्रभागः कर्पूरांशो यस्मिन् विलेपने "घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका" इत्यमरः । तस्य भावस्तत्ता तस्या विभावनात् कर्पूरभागाधिकतोत्प्रेक्षणादपललाप निह्नुते स्म ॥ ५१ ॥

शशाक निह्नोतुमनेन तत्प्रियामयं बभाषे यदलीकवीक्षिताम् ।
समाजएवालपितासु वैणिकैर्मुमूर्च्छ यत्पञ्चममूर्छनासु च ॥५२॥
अवाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्त्तितस्थितिः ।
असंवरे शम्बरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ॥ ५३ ॥
अलं नलं रोद्धुममी किलाभवन् गुणा विवेकप्रभवा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव यत् सृजत्ययं सर्गनिसर्ग ईदृशः ॥ ५४ ॥

शशाकेति । अयं नलोऽलीकवीक्षितां मिथ्यादृष्टां प्रियां दमयन्तीं समाजे सभायामेव यत् बभाषे बभाण वीणा शिल्पमेषां तैर्वैणिकैः वीणावादैः "शिल्पमिति ठञ्"। आलपितासु सूच्चरितासु व्यक्तिं गतास्वित्यर्थः। "रागव्यञ्जक आलाप" इति लक्षणात् । पञ्चमस्य पञ्चमाख्यस्य स्वरस्य मूर्च्छनासु आरोहावरोहणेषु "क्रमात् स्वराणां सप्तानाम् आरोहश्चावरोहणम् मूर्च्छेत्युच्यत इति" लक्षणात् । पञ्चमग्रहणन्तस्य कोकिलालापकोमलत्वेन उद्दीपकत्वातिशयविवक्षयेत्यनुसन्धेयम् । मुमूर्च्छेत्यपि यत्तदुभयम् अनेन प्रकारेण निह्नोतुमाच्छादयितुं न शशाक । अये इति पाठे विषादे इत्यर्थः । 'अये क्रोधे विषादे चेति'' विश्वः । एतेन ह्रीत्यागोन्माद-मूर्च्छावस्थाः सूचिताः ॥ ५२ ॥

अवापेति । जितेन्द्रियाणां धुर्यग्रे कीर्त्तितस्थितिः स्तुतमर्यादः स महीपतिः नलः तत्र समाजे असंवरे संवरितुमशक्ये संवरणं संवरः शमस्येत्यपि न विद्यते संवरो यस्य तस्मिन् शम्बरवैरिविक्रमे मन्मथविकारे क्रमेण स्फुटतामुपेयुषि सति सापत्रपतां सलज्जताम् अवाप-धैर्यशालिनां तद्भङ्गस्त्रपाकर इति भावः ॥ ५३ ॥

ननु विवेकिनः कुत इदं चापल्यम् इत्यत आह । अलमिति । युक्तायुक्तविचारो विवेकः तत्प्रभवा अमी गुणा धैर्यादयः नलमिदं स्त्रीलाभरूपं चापलं निरोद्धुम् दुहियाचीत्यादिना द्विकर्मकत्वम् । अलं समर्था नाभवन्

अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि
क्षणन्तदाऽऽरामविहारकैतवान्निषेवितुं देशमियेष निर्ज्जनम् ॥५५॥
अथ श्रिया भर्त्सितमीनकेतनः समं वयस्यैः स्वरहस्यवेदिभिः ।
पुरोपकण्ठोपवनङ्किलेक्षिता दिदेश यानाय निदेशकारिणः ॥५६॥
अमी ततस्तस्य विभूषितं सितं जवेऽपि मानेऽपि च पौरुषाधिकम्
उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोभितमन्दुरोदरम् ॥५७॥

किल खलु, तथाहि स्मरः कामः जनमिति शेषः जनं रत्यां रागे अनिरुद्धं सृजति अनीश्वरमवशङ्करोति रत्यां रतिदेव्यां अनिरुद्धाख्यं कुमारं सृजतीति ध्वनिः। इति यत् अयं सर्गनिसर्गः सृष्टिस्वभाव ईदृशः । "रतिः स्मरप्रियायां च रागेऽपि सुरतेऽपि च" "अनिरुद्धः कामपुत्रेऽरुद्धचानीश्वरेऽपि चेति" विश्वः। अत्र स्मररागदुर्वारतायाः सर्वसृष्टिसाधारण्येन चापलदुर्वारतासमर्थनात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥५४॥

अथास्य मनोरथसिद्धौपायिकदिव्यहंससंवादनिदानभूतं वनविहारं प्रस्तौति । अनङ्गेति । स नैषधो नलो यत्नवानप्यनङ्गचिह्नं मूर्छाप्रलापादिस्मरविकारं विना संसदि क्षणमप्यासितुं यदा नो शशाक तदा आरामविहारकैतवादुपवनविरहणव्याजान्निर्जनं देशं निषेवितुम् इयेष देशान्तरं गन्तुमैच्छदित्यर्थः । एतेन चापलाख्ये सञ्चारिणि भ्रमणलक्षणोऽनुभाव उक्तः ॥ ५५ ॥

अथेति । अथानन्तरं श्रिया सौन्दर्येण भर्त्सितमत्स्यकेतनस्तिरस्कृतस्मरः स नलः स्वरहस्यवेदिभिः निजभैमीरागमर्मज्ञैर्वयसा तुल्या वयस्याः स्निग्धाः "स्निग्धो वयस्यः सवयाः" इत्यमरः। तैः सह समं पुरोपकण्ठोपवनं पुरसमीपाराममीक्षिता द्रष्टा तृन्नन्तमेवैतत् अतएव न लोकेत्यादिना षष्ठीप्रतिषेधः। किलेत्यलीके, निदेशकारिणः आज्ञाकरान् यानाय यानमानेतुमित्यर्थः क्रियार्थोपेत्यादिना चतुर्थी । दिदेश आज्ञापयामास ५६॥

अमी इति । तत आज्ञापनानन्तरं अमी निदेशकारिणः तस्य विभू-

अथान्तरेणावटुगामिनाध्वना निशीथिनीनाथमहःसहोदरैः ।
निगालगाद्देवमणेरिवोत्थितैर्विराजितं केशर केशरश्मिभिः ॥ ५८॥
अजस्रभूमीतटकुट्टनोद्गतैरुपास्यमानं चरणेषु रेणुभिः ।
रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥५९॥
चलाचलप्रोथतया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम् ।

षितमलङ्कृतं जवेऽपि वेगेऽपि माने प्रमाणेऽपि पौरुषात् पुरुषगतिवेगात् पुरुषप्रमाणात् चाधिकं ऊर्द्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिष्वित्यमरः । पुरुषहस्तिभ्यामण् चेत्यण्प्रत्ययः । अजस्रञ्चञ्चलैश्चटुलस्वभावैः खुराञ्चलैः शफाग्रैः चोदितं मन्दुरोदरं चूर्णीकृताश्वशालाभ्यन्तरं वाजिशाला तु मन्दुरेत्यमरः । एतेनोत्तमाश्वलक्षणयुक्तं सितं श्वेतमश्वमुपाहरन्नानिन्युरित्यर्थः ॥ ५७ ॥

अथ सप्तभिः कुलकमाह । अथेत्यादि । अथानयनानन्तरं स नलः हयमारुरोहेत्युत्तरेणान्वयः । कथंभूतमान्तरेणाभ्यन्तरेण अवटुगामिना कृकाटिकाख्य मस्तक पृष्ठभाजा अवटुर्घाटाकृकाटिकेत्यमरः अध्वना मार्गेण निगालगाद्गलोद्देशात् निगालस्तु गलोद्देश इत्यमरः । देवमणिः आवर्त्तविशेषः निगालजो देवमणिरिति लक्षणात् । दिव्यमाणिक्यं च गम्यते तस्मादुत्थितैरिव स्थितैरित्युत्प्रेक्षा । निशीथिनीनाथमहःसहोदरैश्चन्द्रांशुसदृशैरित्युपमा । केशरकेश एव रश्मय इति रूपकं तैर्विराजितम् ॥ ५८ ॥

अजस्रेति । अजस्रेण भूमितट कुट्टनेन उद्गतैरुत्थितैरेणुभिः रयप्रकर्षस्य वेगातिशयस्याध्ययनार्थमभ्यासायागतैरणिमाङ्कितैरणुत्वपरिमाणविशिष्टैर्जनस्य लोकस्य चेतोभिरिवेत्युत्प्रेक्षा । चरणेषु पादेषु उपास्यमानं सेव्यमानं अणुपरिमाणं मन इति तार्किकाः ॥ ५९ ॥

चलाचलेति । पुनः, चलाचलप्रोथतया स्वभावतः स्फुरमाणघोणतया

अलं गिरा वेद किलायमाशयं स्वयं हयस्येति च मौनमास्थितम् ६०
महारथस्याध्वनि चक्रवर्त्तिनः परानपेक्ष्योद्वहनाद्यशः सितम् ।
रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः ॥ ६१ ॥
सितत्विषश्चञ्चलतामुपेयुषो मिषेण पुच्छस्य च केशरस्य च ।

चरिचलिपतीनामुपसंख्यानाच्चलेर्द्विर्वचनम् । दीर्घस्त्र घोणा तु प्रोथमस्त्रियामित्यमरः । महोभृते नलाय स्ववेगदर्पान् वेगातिरेकान् वक्तुमुत्सुकमुद्युक्तमिवेत्युत्प्रेक्षा अथावचने हेतुमुत्प्रेक्षते अलमिति गिरा उक्त्या अलं कृत, अयं नलः स्वयं हयस्याश्वस्य आशयमभिप्रायं वेद वेत्ति किल । विदोलटोवेत्ति नलादेशः इति हेतोरिवेत्यनुषङ्गः मौनं तुष्णीम्भावञ्च चास्थितं प्राप्तं अश्व हृदय वेदो नल इति प्रसिद्धिः ॥ ६० ॥

महारथस्येति । महान् रथो यस्य तस्य महारथस्य आत्मानं सारथिञ्चाश्वं रक्षन्युध्येत यो नरः । स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः इत्युक्तलक्षणस्य रथिकविशेषस्येत्यर्थः। अन्यत्र महारथो नलः तस्य महारथस्य चक्रं राष्ट्रं वर्त्तयतीति चक्रवर्त्ती सार्वभौमः तस्य नलस्य, हरिश्चन्द्रो नलो राजा पुरुः कुत्सः पुरूरवाः । सगरः कार्त्तवीर्य्यश्च षडेते चक्रवर्त्तिन इत्यागमात् अन्यत्र चक्रेणैकेन वर्त्तनशीलस्येत्यर्थः । अध्वनि मार्गे नापेक्षत इत्यनपेक्षं पचाद्यच् परेषामनपेक्षं तस्मादुद्वहनादसहायोद्वहनाद्धेतोर्यशः सितं कीर्त्तिविशदं अतएवानीदृशा मीदृशयशो रहितानाम् । सप्त युजन्ति रथमेकचक्रमिति सप्तानां सम्भूयोद्वहनश्रवणादिति भावः । रवेरर्वतामश्वानामन्तर्बलं मन्तःसारं रदानान्दन्तानां ये अवदाताः सिताः अंशवः तेषां मिषाद्धसन्तं हसन्तमिवस्थितमित्यर्थः । अत्र मिषशब्देनांशूनां असत्यत्वमापाद्य हासत्वोत्प्रेक्षणात्सापह्नवोत्प्रेक्षेयं गम्या च व्यञ्जकाप्रयोगात्, रदना दशना दन्ता रदा इत्यमरः ॥ ६१ ॥

सितेति । पुनः कथम्भूतं सितत्विषः विशदप्रभस्य चञ्चलतामुपेयुषः

स्फुटं चलच्चामरयुग्मचिह्नकैरनिह्नुवानं निजवाजिराजताम्॥ ६२
अपि द्विजिह्वाभ्यवहारपौरुषे मुखानुषक्तायतवल्गुवल्गया।
उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः॥ ६३ ॥
स सिन्धुजं शीतमहः सहोदरं हरन्तमुच्चैः श्रवसः श्रियं हयम्।
जिताखिलक्ष्माभृदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः ६४॥
निजा मयूखा इव तीक्ष्णदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम्।

चञ्चलस्येत्यर्थः। पुच्छस्य लाङ्गूलस्य केशरस्य ग्रीवास्थबालस्य च मिषेण छलेन चलतश्चामर युग्मस्य चिह्नकैः लक्षणैः स्फुटां प्रसिद्धां निजां वाजिराजतां अश्वेश्वरत्वं अनिह्नुवानं प्रकाशयन्तं इव अराज्ञः कथञ्चामरयुग्ममिति भावः। पूर्व्ववदलङ्कारः॥ ६२॥

अपीति। पुनः कथम्भूतं स्थितं रयस्मये वेगप्रयुक्ताहङ्कारे प्रसभं प्रसह्य जितस्य प्रागेव निर्जितस्य गरुत्मतः मुखानुषक्ता वक्त्रलग्ना आयता दीर्घा वल्गूरम्या च या वल्गा मुखरज्जुः तयातन्मिषेणेत्यर्थः; द्विजिह्वानामहीनामभ्यवहारे आहारे यत् पौरुषे सर्पभक्षण पुरुषकारेऽपि प्रतिमल्लतां प्रतिद्वन्द्वितामुपेयिवांसं प्राप्तं तथाच गम्योत्प्रेक्षेयं उपेयिवाननश्वाननूचानश्चेति क्वसु प्रत्ययान्तो निपातः॥ ६३॥

सइति। जिता अखिलाःक्ष्माभृतो भूपा भूधराश्च येन सः अनल्पलोचनो विशालाक्षः अन्यत्र बहुनेत्रः सहस्राक्षइति यावत् क्षितिपाकशासनः क्षितीन्द्रो नलः देवेन्द्रश्च सिन्धुजं सिन्धुदेशोद्भवं समुद्रोद्भवञ्च देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियामित्यमरः। शीतमहःसहोदरं चन्द्रसवर्णमित्यर्थः, अन्यत्र चन्द्रभ्रातरमेकयोनित्वादिति भावः। उच्चैःश्रवस इन्द्राश्वस्य श्रियं हरन्तं तत्स्वरूपमित्यर्थः, तं हयमारुरोह अत्रोच्चैःश्रवसः श्रियं हरन्तमिवेत्युपमा। साच श्लिष्टविशेषणात् सङ्कीर्णेयं क्षितिपाकशासन इत्यतिशयोक्तिः॥ ६४॥

निजा इति। निजा आत्मीयाः प्रकाशरूपा उज्ज्वलाकारा भा-

तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः ॥ ६५ ॥
चलन्नलङ्कृत्य महारयं हयं स वाहवाहोचितवेशपेशलः ।
प्रमोदनिष्पन्दतराक्षिपक्ष्मभि र्व्यलोकि लोकैर्नगरालयैर्नलः ॥ ६६
क्षणादथैष क्षणदापतिप्रभः प्रभञ्जनाध्येयजवेन वाजिना ।
सहैव ताभिर्जनदृष्टिवृष्टिभि र्वहिः पुरोऽभूत्पुरुहूतपौरुषः ॥ ६७॥
ततः प्रतीच्छप्रहरेतिभाषिणी परस्परोल्लासितशल्यपल्लवे ।

स्वरूपाश्च अश्वान्वारयन्तीत्यश्ववाराः अश्वारोहाः स्फुरदर विन्दाङ्कित पाणि पङ्कजं पद्मरेखाङ्कित हस्तं अन्यत्र पद्महस्तं जवनो जवशीलः युचं क्रमेत्यादिना युच् । तेनाश्वेन अन्यत्र तैरश्वैर्यातीति तथोक्तं मनुजा मनोर्जाता मनुजा नरा तेषामीशं राजानञ्च तं नलं तिग्मदीधितिं सूर्य्यं मयूखा इव अन्वयुः । अन्वगच्छन् याति लिट् झेर्जसादेशः ॥ ६५ ॥

चलन्निति । वाहवाहोचितवेषपेशलः अश्ववाहोचितनेपथ्य चारुः चारौ दक्षे च पेशल इत्यमरः । स नलो महारयं अतिजवं हयमलङ्कृत्य चलन् स्वयं हयस्य भूषणीभूय गच्छन्नित्यर्थः । प्रमोदेन निष्पन्दतराणि अत्यन्तनिश्चलानि अक्षिपक्ष्माणि येषान्तै रनिमेषदृष्टिभिरित्यर्थः । नगरालयैर्नगरनिवासिभिरित्यर्थः । लोकैर्जनैर्व्यलोकि विस्मय हर्षाभ्यां विलोकित इत्यर्थः वृत्त्यनुप्रासोऽलङ्कारः ॥ ६६ ॥

क्षणादिति । अथानन्तरं क्षणदापतिप्रभश्चन्द्रतुल्य त्वया पुरुहूत पौरुषः इन्द्रस्येव पौरुषं कर्म्म तेजो वा यस्य तादृश एष नलः । प्रभञ्जनेन वायुना अध्येयः शिक्षणीयः जवो वेगो यस्य तथाविधेन वाजिना अश्वेन क्षणादिति क्षणात्ताभिः पूर्वोक्ताभिः जनानां दृष्टिवृष्टिभिः दृक्पातैः सह जनैर्दृश्यमान इवेत्यर्थः । वहिः पुरः पुराद्वहिः बहिस्थितोऽभूदिति बहिर्योगे पञ्चमी । पूर्वं पुरे दृष्टः क्षणादेव पुराद्बहिर्दृष्ट इति वेगातिशयोक्तिः ॥ ६७ ॥

मृषामृधं सादिवले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥६८॥
प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुत्थितं रजः ॥ ६९ ॥
हरेर्यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमणेन तस्य नः ।
त्रपा हरीणामिति नम्रिताननैर्न्यवर्त्ति तैरर्द्धनभःकृतक्रमैः ॥७०

तत इति । ततः पुराद्बहिर्गमनानन्तरं प्रतीच्छ गृहाण प्रहर जहीति भाषिणि भाषमाणे इत्यर्थः । परस्परमन्योन्योपरि उल्लासितानि प्रसारितानि शल्यपल्लवानि तोमराग्राणि याभ्यान्ते तथोक्ते शल्यं तोमरमिति अमरः । नलस्य नासीरगते नासिकाग्रवर्त्तिनि सेनामुखन्तु नासीरमित्यमरः । सादिबले तुरङ्गसैन्ये कुतूहलात् मृषा मृधं मिथ्या युद्धं युद्धनाटकमित्यर्थः । वितेनतु चक्रतुः मृधमायोधनं संख्यमित्यमरः ॥६८॥

प्रयातुमिति । इयं धरा भूः समुद्रातिरिक्तेति भावः । अस्माकं प्रयातुं प्रस्थातुं कियत्पदं गन्तव्यं स्थानं न किञ्चित्पर्य्याप्तमित्यर्थः । तत् तस्मा दम्भोधिरपि स्थलायतां स्थलवदाचरतु भूरेव भवत्वित्यर्थः । कर्त्तुः क्यञ् सलोपश्चेति क्यङ् प्रत्ययः । इतीवेति इतीव इतिमत्वेत्यर्थः इतिनैव गम्यमानार्थत्वादप्रयोगः अन्यथा पौनरुक्त्यात् क्रिया निमित्तोत्प्रेक्षा । निजवेगेन दर्पितैः सञ्जातदर्पैः वाहैर्नवाश्वैः पयोधिरोधक्षमं समुद्रच्छादन पर्याप्तं रज उत्थितं उत्थापितं तथा सान्द्रमिति भावः ६९॥

हरेरिति । यत् खमाकाशं हरेर्विष्णोरेकैकेन एकाकिना एकादाकिनश्चासहाये क इति चकारात् कन्प्रत्ययः । पदा पादेन पादः पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः । पद्दन्नित्यादिना पदादेशः । अक्रामि अलङ्घि, तस्य खस्य चतुर्भिः पदैः क्रमणे लङ्घने कृते सत्यपीति शेषः । हरीणां वाजिनां विष्णूनां चेति गम्यते, यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु, शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमरः । उभयत्रापि नोऽस्माकं

चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धतयैव सैन्धवाः ।
विहारदेशं तमवाप्य मण्डलीमकारयन्भूरि तुरङ्गमानपि ॥७१॥
द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम् ।
इतीव धारामवधीर्य्य मण्डलीक्रियाश्रियामण्डि तुरङ्गमैः स्थली७२

त्वमेतिवेत्यर्थः । गम्यार्थत्वादिवशब्दस्या प्रयोगः अतएव गम्योत्प्रेक्षा, नम्रितानि निम्नोन्नतानि आननानि यैस्तैः हरिभिः अश्वैः नभसि कृतक्रमैः कृतलङ्घनैः सद्भिर्न्यवर्त्ति निवर्त्तितम् भावे लुङ् । यदन्येन पुंसा लघूपायेन साधितं तस्य गुरूपायेन करणं समानस्य लाघवाय भवेदिति भावः । एतेनप्लुतगति रुक्ता तत्र गगन लङ्घनस्य सम्भवादिति भावः ॥ ७० ॥

चमूचरा इति । तस्य नृपस्य चमूचराः सेनाचराः चरेष्टच् सिन्धुदेशभवाः सैन्धवाः अश्वाः हयसैन्धवसप्तय इत्यमरः । तत्र भवेत्यण्प्रत्ययः तत्सम्बन्धिनोऽपि सैन्धवाः तस्येदमित्यण् ते सादिनः अश्वसादिन इत्यर्थः, जिनोक्तिषु श्राद्धतयैव जैनदर्शन श्रद्धालुतयैवेत्युत्प्रेक्षा श्रद्धार्चाऽऽष्टक्तिभ्योऽणितिमत्वर्थीयोऽण्प्रत्ययः। तं विहारदेशं सञ्चारभूमिं सुगतालयञ्च विहारो भ्रमणे स्कन्धे लीलायां सुगतालय इति विश्वः। अवाप्यतुरङ्गमान् भूरि बहुलं मण्डलीमपि मण्डलाकारं च अकारयन् अपि शब्दोऽवाप्नि समुच्चयार्थः । अन्यत्र मण्डलीं मण्डलासनमित्यर्थः बौद्धाः स्वकर्मानुष्ठानेषु प्रायेण मण्डलानि कुर्व्वन्ति इति प्रसिद्धिः ॥ ७१ ॥

द्विषद्भिरिति । अस्य नलस्य द्विषद्भिरेव पलायमानैरिति भावः । दिशो लङ्घिता, अस्य यशोभिरेवाब्धिः गोःपदं गोष्पदमकारि गोष्पदमात्रः कृतः गोष्पदं सेविता सेवित प्रमाणार्थे सुडागमत्वयोर्निपातः। इतीव इति मत्वेवेत्युत्प्रेक्षा, अन्यसाधारणं कर्म नोत्कर्षाय भवेदिति भावः तुरङ्गैर्धाराकृतिं जातावेकवचनं पञ्चापि धारा इत्यर्थः । आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतं, गतयोऽमूः पञ्च धारा इत्यमरः ।

अचीकरच्चारुहयेन या भ्रमीर्निजातपत्रस्य तलस्थले नलः ।
मरुत् किमद्यापि न तासु शिक्षते वितत्य वात्यामयचक्रचंक्रमान् ॥७३
विवेश गत्वा स विलासकाननं ततः क्षणात् क्षौणिपतिर्धृतीच्छया ।
प्रवालरागच्छुरितं सुषुप्सया हरिर्घनच्छायमिवाम्भसां निधिम् ॥७४
वनान्तपर्य्यन्तमुपेत्य सस्पृहं क्रमेण तस्मिन्नवतीर्णदृक्पथे ।

अवधीर्य्य अनादृत्य मण्डलीक्रिया श्रिया मण्डलीकरणलक्ष्म्या मण्डलगत्यैवेत्यर्थः । स्थली कृत्रिमा भूः जानपदेत्यादिना कृत्रिमार्थे ङीप् अमण्डि अभूषि मण्डि भूषणमिति धातोर्ण्यन्तात् कर्मणि लुङ् इदित्त्वान्नुमागमः ॥ ७२ ॥

अचीकरदिति । नलश्चारु यथा भवति तथा हयेन प्रयोज्येन कर्त्रा निजातपत्रस्य तलस्थले अधःप्रदेशे अधः स्वरूपयोरस्त्री तलमित्यमरः । या भ्रमीर्मण्डलगती रचीकरत् कारितवान् करोतेर्णौ चङ् । तासु भ्रमीषु विषये मरुत् अद्यापि वातानां समूहो वात्या पाशादिभ्यो यः । अत्र तद्भ्रमयो लक्ष्यन्ते तन्मयान् तद्रूपान् चक्रचंक्रमान् मण्डलगतीर्वितत्य विस्तीर्य्य न शिक्षते किन्नाभ्यस्यते किमित्युत्प्रेक्षा शिक्षितश्चेत् तथा सोऽपि गतिं कुर्य्यादित्यर्थः वायोरप्यसम्भाविता गतो रचीकरदिति भावः ॥ ७३ ॥

विवेशेति । ततः स क्षौणीपतिः क्षणाद्गत्वा धृतीच्छया सन्तोषकाङ्क्षया प्रवालाः पल्लवाः अन्यत्र विद्रुमाः प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लव इति अमरः । तेषां रागेणारुण्येन छुरितं रूषितं घनच्छायं सान्द्रानातपं अन्यत्र मेघकान्तिं छायात्वनातपे कान्ताविति विश्वः । विलासकाननं क्रीड़ावनं अन्यत्र बवयोरभेदात् बिलासकानां बिलेशयानां सर्पाणां आननं प्राणनं सुषुप्सया स्वप्तुमिच्छया हरिर्विष्णुरम्भसान्निधिमब्धिमिव विवेश ॥ ७४ ॥

वनान्तेति । अनुव्रजद्बन्धुसमाजबन्धुभिः स्नेहादनुगच्छद्बन्धु-

न्यवर्त्ति दृष्टिप्रकरैः पुरौकसा मनुव्रजद्बन्धुसमाजबन्धुभिः ॥७५॥

ततः प्रसूने च फले च मञ्जुले स सम्मुखस्थाङ्गुलिना जनाधिपः ।
निवेद्यमानं वनपालपाणिना व्यलोकयत्काननरामणीयकम् ॥७६

फलानि पुष्पाणि च पल्लवे करे वयोऽतिपातोद्गतवातवेपिते ।
स्थितैः समाधाय महर्षिवार्द्धका द्वने तदातिथ्यमशिक्षि शाखिभिः ७७

सङ्घसदृशैरित्यर्थः । अतएवोपमालङ्कारः । पुरौकसां दृष्टिप्रकरैर्दृष्टिसमूहैः कर्त्तृभिर्वनान्तपर्य्यन्तं काननोपान्तसीमां उदकप्रान्तपर्य्यन्तञ्चेति गम्यते, वने सलिलकानने इत्यमरः । सस्पृहं साभिलाषं यथा तथा उपेत्य गत्वा अथ अनन्तरं क्रमेण तस्मिन् नले अतीतदृक्पथे अतिक्रान्तदृष्टिविषये सति न्यवर्त्ति निवृत्तं भावे लुङ् । यथा बन्धुभिः उदकात् प्रियं पान्थं अनुव्रजेदित्यागमात्प्रवसन्त मनुव्रज्य निवर्त्त्यते तद्वदित्यर्थः ॥ ७५ ॥

तत इति । ततः वन प्रवेशानन्तरं स जनाधिपो नलः मञ्जुले मनोज्ञे प्रसूने कुसुमे फले च विषये सम्मुखीना सन्दर्शिनी संमुखावस्थितवस्तुप्रकाशिकेति यावत् । यथामुख सम्मुखस्य दर्शन इति खप्रत्ययान्तो निपातः । तादृशी अङ्गुली यस्य तेन वनपालपाणिना निवेद्यमानं इदमिदमित्यङ्गुल्या पुष्पफलादिनिर्देशेन प्रदर्श्यमानमित्यर्थः । काननरामणीयकं वनरामणीयकं योपधाद्गुरूपोत्तमाद्वुञ् इति वुञ्प्रत्ययः । व्यलोकयत् अपश्यदिति स्वभावोक्तिः ॥ ७६ ॥

फलानीति । वयोऽतिपातेन पक्षिपातेन बाल्याद्यपगमेन चोद्गतेनोत्थितेन वातेन वायुना वातदोषेण च वेपिते कम्पिते खगबाल्यादिनोर्वय इत्यमरः । पल्लव एव कर इति व्यस्तरूपकं फलानि पुष्पाणि च समाधाय निधाय स्थितैस्तिष्ठद्भिः वने शाखिभिर्वृक्षैः वेदशाखाध्यायिभिश्च शाखाभेदे द्रुमे शाखा वेदेऽपीति वैजयन्ती । तदातिथ्यं तस्य नलस्यातिथ्यं अतिथ्यर्थं कर्म अतिथेर्ञ्य इति ञ्यप्रत्ययः । महर्षीणां वार्धकाद्वृद्ध समूहात् ततत्यवृद्ध महर्षि सङ्घादित्यर्थः । शिव भागवत्समासः । वृद्ध सङ्घे

विनिद्रपत्रालिगतालिकैतवान्मृगाङ्कचूडामणिवर्जनार्जितम् ।
दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम् ॥७८
वियोगभाजां हृदि कण्टकैः कटु र्निधीयसे कर्णिशरः स्मरेण यत्।
ततोदुराकर्षतया तदन्तकृद्विगीयसे मन्मथदेहदाहिना ॥ ७९ ॥

तु वार्द्धकमित्यमरः । वृद्धाच्चेति वक्तव्यमिति समूहार्थे वुञ् प्रत्ययः । अशिक्षि शिक्षितमभ्यस्तं अन्यथा कथमिदमाचरितमिति भावः । कर्मणि लुङ् उत्प्रेक्षेयं सा च व्यञ्जका प्रयोगाद्गम्या पूर्व्वोक्तरूपकश्लेषाभ्यां उत्थापिता चेति सङ्करः ।। ७७ ।।

विनिद्रेति । विनिद्रपत्रालिगतालिकैतवात् विकचदलावलिस्थित भृङ्गमिषात् मृगाङ्कचूडामणेरीश्वरस्य कर्त्तुर्व्वर्ज्जनेन परिहारेणार्ज्जितं सम्पादितं न केतक्या सदाशिवमिति निषेधादिति भावः । आशासु चरिष्णु सञ्चरणशीलं अलङ्कृञित्यादिना चरेरिष्णुच्प्रत्ययः । दुर्यशोऽपकीर्त्तिं दधानं कैतकं केतकीकुसुमं तत्र वने स नलः कौतुकी सन् ददर्श अर्हस्य महापुरुषस्य बहिष्कारो दुष्कीर्त्तिकर इति भावः। अत्रालिकैतवादियलित्वापह्नवेन तेषु दुर्यशस्त्वारोपादपह्नुत्यलङ्कारः। निषेध्यविषयं साम्यादन्यारोपेऽपह्नुतिरिति लक्षणात् ॥ ७८ ॥

अथ त्रिभिः केतकोपालम्भमाह । वियोगेत्यादि । हे कैतक ! यद्यस्मात्त्वं स्मरेण वियोगभाजां हृदि कण्टकैः निजतीक्ष्णावयवैःकटुस्तीक्ष्णः कैतकविशेषणस्यापि कर्णिशरत्वं विशेषणविवक्षया पुल्लिङ्गनिर्देशः किन्तु उद्देश्य विशेषणस्य विधेयविशेषणत्वं क्लिष्टं । कर्णवत् कर्णि प्रतिलोमशल्यं तद्वान्शरः कर्णिशरः सन्निधीयसे कण्टककटोः कैतकस्य कर्णिशरत्वरूपणाद्रूपकलङ्कारः। ततः कर्णिशरत्वादितद्दुराकर्षतया दुरुद्धारतया तदन्तकृत्तेषां वियोगिनां मारकं मन्मथदेहदाहिना स्मरहरेण विगीयसे-विगर्ह्यसे द्वेष्य वत् द्वेष्योपकरणमप्यसह्यमेव तदपि हिंस्रं चेत् किमु वक्तव्यमिति भावः। अत्रेश्वरकर्तृकस्य केतकीविगर्हणस्य तद्गतवियोगिहिं-

त्वदग्रसूची सचिवः स कामिनो र्मनोभवः सीव्यति दुर्यशः पटौ ।
स्फुटञ्च पत्रैः करपत्रमूर्त्तिभि र्वियोगिहृद्दारुणि दारुणायते ॥ ८०
धनुर्मधुस्विन्नकरोऽपि भीमजापरं परागैस्तव धूलिहस्तयन् ।
प्रसूनधन्वा शरसात्करोति मा मिति क्रुधाक्रुश्यत तेन कैतकम् ॥ ८१
विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः ।

स्तत। हेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा व्यञ्जका प्रयोगाद्गम्या सा चोक्तरूपकोत्थापितेति शङ्करः ॥ ७९ ॥

त्वदिति । तवाग्रमग्र्येव सूच्यः सचिवाः सहकारिणो यस्य स तथोक्तः स प्रसिद्धो मनोभवः कामिनी च कामी च कामिनौ तयोः, पुमान् स्त्रियेत्येकशेषः । दुर्यशांसि अपकीर्त्तयस्ताः पटाविति रूपकं तानि सीव्यति कण्टकसूतं करोतीत्यर्थः किञ्चेतिचार्थः । करपत्रमूर्त्तिभिः क्रकचाकारैः क्रकचोऽस्त्री करपत्रमित्यमरः । पत्रैस्तैर्वियोगिनां हृद्येव दारुणि दारयतीति दारुणो विदारको भेत्ता स इवाचरतीति दारुणायते कर्त्तुः क्यङ् सलोपश्चेति क्यङन्तात् लट् दारुणायत इत्युपमा सा च हृद्दारुणीति रूपकानुप्राणितेति सङ्करः ॥ ८० ॥

धनुरिति । हे कैतक ! प्रसूनं धन्व धनुर्यस्येति प्रसूनधन्वा पुष्पचापः वा संज्ञायामित्यनङादेशः। अतएव धनुषो मधुना मकरन्देन स्विन्नकरः आर्द्रपाणिः सन् अतएव परागैः रजोभिः धूलिहस्तयन् पुनःपुनः धूल्युद्भावितहस्तमात्मानं कुर्वन् अन्यथा धनुस्संसणादिति भावः तत्करोते र्ण्यन्ताल्लटः शत्रादेशः अतिभीमजापरं अतिमात्रदमयन्त्यासक्तं मां शरसात् शराधीनङ्करोति तदधीने च इति सातिप्रत्ययः अन्यथा स्रस्तचापः स मां किङ्कुर्यादिति भावः। इतीत्थं श्लोकत्रयोक्तिरिति नेन राज्ञा क्रुधा कैतकं आक्रुश्यत अपराधोद्घाटनेन अघोष्यतेत्यर्थः ॥ ८१ ॥

विदर्भेति । तरुगुल्मलतादीनां अकाले कुशलैः कृतम् । पुष्पाद्युत्पा-

फलानि धूमस्य धयानधोमुखान् स दाड़िमे दोहदधूपिनि द्रुमे ८२
वियोगिनीमैक्षत दाड़िमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम् ।
फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥ ८३

दिकं द्रव्यं दोहदं स्यात्तु तत्क्रियेति शब्दार्णवे दोहदश्चासौ धूपश्च तदुक्तं मेषामिषाम्बुसंसेकस्तत्केशामिषधूपनं श्रेयानयं प्रयोगः स्यात् दाडिमीफलवृद्धये । मत्स्याज्यत्रिफलालेपैर्मांसै राजाविकोद्भवैः लेपिता धूपिता सूते फलन्तालीव दाडिमी । आविक्षायेन संसिक्ता धूपिता तप्तरोमभिः । फलानि दाडिमी सूते सुबहूनि पृथूनि चेति तद्वति दाडिमीद्रुमे फलानि विदर्भसुभ्रुवो दमयन्त्याः स्तनयोर्या तुङ्गता तदाप्तये तादृगौन्नत्यलाभायेत्यर्थः । अलमत्यर्थं तपस्यत तपश्चरतः, कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोरिति क्यङ् प्रत्यये तपसः परस्मैपदञ्च वक्तव्यं, धूमस्य दोहदधूमस्य धयन्तीति धयान् पातॄन् धेट पाने अत्रातश्चोपसर्ग इति उपसर्गग्रहणान्नानुवर्त्तिं पवत्वात् पाघ्रेत्यादिना नुपस्पृष्टादपि धेटः शप्रत्यय इति गतिः अतएव कारकां केचिदुपसर्ग इति नानुवर्त्तयन्तीति अधोमुखान् घटानिव अपश्यदित्युत्प्रेक्षा महाफलार्थिन इत्थं उग्रं तपस्यन्तीति भावः ॥ ८२ ॥

वियोगिनीमिति । असौ नलः प्रियास्मृतेर्दमयन्ती स्मरणादिव स्पष्टं व्यक्तमुदीतेति ईण् गताविति धातोः कर्त्तरि क्तः। उदिताः उद्गताः कण्टकाः स्वावयवसूचय एव कण्टका रोमाञ्चा यस्यास्तामिति श्लिष्टरूपकम् । वेणौ द्रुमाङ्गे रोमाञ्चे क्षुद्रशत्रौ च कण्टक इति वैजयन्ती । फलान्येव स्तनौ तावेव स्थानं तत्र विदीर्णः रागो यस्यास्तेति रागि रक्तवर्णमनुरक्तञ्च यत्तस्मिन् हृदि विशत् वीजभक्षणान्तः प्रविशच्छूकास्य रूपं शुकतुण्डमेव स्मरस्य किंशुकं फलाग्रकुड्मलमेवाशुगो बाणो यस्यास्तां दाड़िमीमेव वियोगिनीं विरहिणी मैक्षत अपश्यत् रूपकालङ्कारः। विः पक्षी तद्योगिनीमिति च गम्यते ॥ ८३ ॥

स्मरार्द्धचन्द्रेषु निभे क्रशीयसां स्फुटं पलाशेऽध्वजुषाम्पलाशनात्।
स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम्

नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यान्दरकम्पिनी पपे॥ ८५॥

विचिन्वतीः पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्वलच्छलात्।

स्मरार्द्धेति। नलः स्मरस्य योऽर्द्धचन्द्रः अर्द्धचन्द्राकार इषु स्तन्निभे तत्सदृशे नित्यसमासत्वादस्वपदविग्रहः, अत आहामरः, स्युरुत्तरपदे त्वमी निभसङ्काशनीकाशप्रतिकाशोपमादय इति। वियोगिनां हृत्खण्डिनि हृदयभेदिनि क्रशीयसां कृशतराणां अध्वजुषां अध्वगामिनाम् पलाशनात् मांसभक्षणात् पलाशे पलमश्नन्तीति व्युत्पत्त्या पलाशसंज्ञाभाजि किंशुककलिकायामित्यर्थः। अन्वितं सम्बद्धं वृन्तं प्रसवबन्धनं तदेव कालखण्डजं खण्डं यकृत्खण्डमिति व्यस्तरूपकं आलोकत आलोकितवान् कालखण्डं यकृत्समे इत्यमरः। तच्च दक्षिणपार्श्वस्थः कृष्णवर्णो मांसपिण्डविशेषः ॥ ८४ ॥

नवेति। गन्धवहेन वायुना चुम्बिता स्पृष्टा अन्यत्रानुलिप्तेन पुंसा वीक्षिता मकरन्दशीकरैः पुष्परसकणैः करम्बिताङ्गी व्यामिश्रितरूपा अन्यत्र स्विन्नाङ्गीति च गम्यते स्मितशोभिनः विकासरस्या कुड्मला मुकुला रदनाश्च यस्यास्तां मन्दहासमधुरदन्तमुकुला च गम्यते दरकम्पिनी वायुः स्पर्शादीषत्कम्पिनी सात्त्विकवेपथुमती च नवा लता वल्ली तत्सदृशी कान्ता च गम्यते नृपेण कर्त्रा दृशा करणेन दरादराभ्यां भयतृष्णाभ्यां उपलक्षितेन सतापवेपिता गाढं दृष्टा इत्यर्थः। उद्दीपकत्वात् दरः प्रियाया दृश्यादादरश्च दरोऽस्त्री शङ्काभिगर्त्तेष्व ल्पार्थे त्वव्ययं इति वैजयन्ती। अत्र प्रस्तुतविशेषणसाम्यादप्रस्तुतनायिकाप्रतीतेः समासोक्तिरलङ्कारः। विशेषणस्तौल्येन यत्र प्रस्तुतवर्णनात्। अप्रस्तुतस्य गम्यत्वे सा समासोक्तिरिष्यत इति लक्षणात् ॥ ८५ ॥

व्यलोकयच्चम्पककोरकावलीः स शम्बरारेर्बलिदीपिका इव ॥८६॥
अमन्यतासौ कुसुमेषुगर्भजं परागमन्धङ्करणं वियोगिनाम् ।
स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु सङ्गतम् ॥ ८७ ॥
पिकाद्वने शृण्वति भृङ्गहूङ्कृतैर्दशामुदञ्चत्करुणं वियोगिनाम् ।
अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः ॥८८॥

विचिन्वतीरिति । पन्थानं गच्छन्ति नित्यमिति पान्थाः नित्यपथिकाः पथोऽण् नित्यमित्यण्प्रत्ययः पन्थादेशश्च । तएव पतङ्गाः पक्षिणः पतङ्गः पक्षिसूर्ययोः इत्यमरः । तेषां हिंसनैः वधैः अपुण्यकर्माण्येव अलयः कज्जलानीवेत्युपमित समासः । तेषां छलादित्यपह्नवालङ्कारः । विचिन्वतीः संगृह्णतीः हिंसापापकारिणीरित्यर्थः । चम्पककोरकावलीः शम्बरारेर्मनसिजस्य बलिदीपिकाः पूजादीपिका इवेत्युत्प्रेक्षा स नलो व्यलोकयत् ॥ ८६ ॥

अमन्यतेति । असौ नलः कुसुमान्येव इषवः कामबाणास्तेषां गर्भजं गर्भजातं वियोगिनामिति कर्मणि षष्ठी । अन्धाः क्रियन्तेऽनेनेत्यन्धङ्करणं आढ्यसुभगेत्यादिना च्व्यर्थे ख्युन्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः । तं परागं पुरा पूर्वं पुरारये पुरहराय स्मरेण मुक्तेषु शरेषु सङ्गतं संसक्तं तस्य पुरारेरङ्गे यद्भस्म तदिवामन्यत इति उत्प्रेक्षितवानित्यर्थः । पुरापुरारये ये मुक्ताः तएवैते पुरोवर्त्तिनः कुसुमेषव इत्यभिमानः, अन्यथैषां तदङ्गभस्मसङ्गोत्प्रेक्षानुत्थानादिति ॥ ८७ ॥

पिकादिति । वने उपवने श्रोतरि पिकाद्वक्तः सकाशात् भृङ्गहूङ्कृतैर्वियोगिनां दशां अलिहूङ्कारकृतां दुःखावस्थामित्यर्थः उदञ्चत्करुणं विकसद्वृक्षविशेषं उद्यत्कृपञ्च यथा तथा शृण्वति सति करुणस्तु रसे वृक्षे कृपायां करुणा मतेति विश्वः । अनास्थया श्रोतुमनिच्छया सूनं प्रसूनमेव करं प्रसारयतीति प्रसारिणीं पुष्परूपहस्तविस्तारिणीं तयोक्तां अनिष्टकथां करे वारयन्तीमिव स्थितामित्यर्थः । सूनकरेति प्रसारिणीमिति रूपकानुप्राणिता गम्योत्प्रेक्षेयं । स्थलपद्मिनीं नलो दूनः परितप्तः सन् दूङः कर्त्तरि क्तः ल्वादिभ्यश्चेति निष्ठानत्वं, ददर्श ॥ ८८ ॥

रसालसालः समदृश्यतामुना स्फुरद्द्विरेफारवरोषहूङ्कृतिः।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्ज्जनाभियम्॥८९॥
दिने दिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छं च तापमृच्छ च।
इतीव पान्थं शपतः पिकान् द्विजान्सखेदमैक्षिष्ट स लोहितेक्षणान्॥
अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया दृशा।
स धूमकेतुं विपदे वियोगिना मुदीतमातङ्कितवानशङ्कत॥९१॥

रसालेति। अमुना नलेन स्फुरन्तो द्विरेफास्तेषामारवो भ्रमरझङ्कार एव रोषणे या हूङ्कृतिर्हूङ्कारो यस्य सः समीरलोलै र्वायुचलैर्मुकुलै रङ्गुलिभिरिति भावः। वियोगिने जनाय तर्जनाभियन्दित्सन् दातुमिच्छन्निव स्थितः ददातेः सन् प्रत्ययः सनि मीमेत्यादिना इसादेशः अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः सार्व्वधातुक इति सकारस्य तकारः। रसालसालस्तरुः समदृश्यत सम्यग्दृष्टः द्विरेफेत्यादि रूपकोत्थापितेयन्तर्जनाभयजननोत्प्रेक्षेति सङ्करः॥ ८९॥

दिनेदिने इति। रे इति हीनसम्बोधने रे! त्वं दिने दिने अधिकं तनुः एधि अधिकं कृशो भव अस्तेर्लोट् सिप् हुझल्भ्योहेरिति द्वित्वम् घ्वसोरेदावभ्यासलोपश्च इति एत्वं, पुनःपुनः मूर्च्छं च मृत्युं मरणं ऋच्छ च इति पान्थं निजपथिकं शपतः शपमानानिव स्थितानित्युत्प्रेक्षा, लोहितेक्षणान् रक्तदृष्टीन् एकत्र स्वभावतोऽन्यत्र रोषाच्चेति द्रष्टव्यं, पिकान् कोकिलान् द्विजान् पक्षिणो ब्राह्मणांश्च स नलः सखेदमैक्षिष्ट स्वस्यापि उक्तशङ्कयेतिभावः॥ ९०॥

अलिस्रजेति। अलिस्रजा भ्रमरपङ्क्त्या उच्चशेखरमुन्नतशिरोभूषणं अलिमलिनाङ्कमित्यर्थः। शिखास्वापीड़शेखरावित्यमरः। चाम्पेयं चम्पकविकारं कुड्मलं अथ चाम्पेयः चम्पको हेमपुष्पक इत्यमरः। नन्वयुक्तमिदं न षट्पदो गन्धफलीमजिघ्रदित्यादावलीनां चम्पकस्पर्शाभाव प्रसिद्धेरिति चेत् नैवं किन्तु स्पृष्टेयत्तावत्तेवास्पर्शोक्तिः क्वचित् केषाञ्चिदुक्ति परिहारः अथवा चाम्पेयं नागकेसरं चाम्पेयः केसरो नागकेशरः

गलत्परागं भ्रमिभङ्गिभिः पतत् प्रसक्तभृङ्गावलि नागकेशरम् ।
स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणमिव व्यलोकयत् ९२
तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद्गुणस्पृशः ।
स्वचापदुर्निर्गतमार्गणभ्रमात् स्मरः स्वनन्तीरवलोक्य लज्जितः ९३
मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्चरच्चन्दनसारसौरभम् ।

काञ्चनाह्वय इत्यमरः । अधीरया दृशा निपीय विक्लवदृष्या गाढं दृष्ट्वाशङ्कितवान् किञ्चिदनिष्टमुत्प्रेक्षितवान् स नलः अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधा इति लक्षणात् । वियोगिनां विपदे उदीतमुत्थितं धूमकेतुमशङ्कत अतर्कयदित्युत्प्रेक्षालङ्कारः ॥ ९१ ॥

गलदिति । स नलो गलत्परागं निर्यद्रजस्कं भ्रमिभङ्गिभिः भ्रमणप्रकारैः उपलक्षितं पतद्भ्रंश्यत् प्रसक्तभृङ्गावलि सक्तालिकुलं नागकेशरं कुसुमविशेषं मारनाराचनिघर्षणैः स्मरशरकर्षणैः स्खलन्तः लुठन्तः ज्वलन्तश्च कणाः स्फुलिङ्गा यस्य तं शाणं निकषोत्पलमिवेत्युत्प्रेक्षा व्यलोकयत् शाणस्तु निकषः कष इत्यमरः ॥ ९२ ॥

तदङ्गमिति । सुगन्धि शोभनगन्धं गन्धस्येत्यादिना समासान्त इकारः तदङ्गं तस्य नलस्याङ्गमुद्दिश्य लक्षीकृत्य गुणो गन्धादिः मौर्वी च, गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति वैजयन्ती । तत्स्पृशस्तद्युक्ताः स्पृशोऽनुदके किन्, कुसुमादपादानात् पातुकाः धावन्तीः लषपतेत्यादिना उकञ्प्रत्ययः । स्वनन्ती ध्वनन्तीः शिलीमुखालीः अलिपङ्क्तीः बाणपङ्क्तीश्चावलोक्य स्मरः स्वचापात् पौष्पात् दुर्निर्गताः विषमनिर्गता ये मार्गणा बाणास्तद्भ्रमाद्धेतोर्लज्जितोऽभवत् न्यूनमिति शेषः । दुर्निर्गतेषवो ह्यधिकं स्वनन्तीति प्रसिद्धेः । अत्र स्वनच्छिलीमुखेषु दुर्निर्गतमार्गणभ्रमाद्भ्रान्तिमदलङ्कारः स च शीलमुखेति श्लेषानुप्राणितादुत्थापिता चेयं स्मरस्य लज्जितत्वोत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ९३ ॥

मरुदिति । मरुता वायुना ललत्पल्लवानाञ्चलत्किसलयानां कण्टकैस्तीक्ष्णाग्रैरवयवैः क्षतं अन्यत्र विलसद्विटनखैः क्षतमिति गम्यते समुच्चरत् परितः प्रसर्पत् चन्दनासारस्येव सौरभं यस्य तत् अतएव वारनारीकुचेन वेश्या-

स वारनारीकुचसञ्चितोपमं ददर्श मालूरफलं पचेलिमम् ॥८४॥
युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम् ।
स्मरेषुधीकृत्य धिया भियान्धया स पाटलायाः स्तवकं प्रकम्पितः८५
मुनिद्रुमः कोरकितः शितिद्युतिर्वनेऽमुनामन्यत सिंहिकासुतः ।
तमिस्रपक्षत्रुटिकूटभक्षितः कलाकलापं किल वैधवं वमन् ॥८६॥
पुरोहठाक्षिप्ततुषारपाण्डुरच्छदावृतेर्वीरुधि बद्धविभ्रमाः ।

स्तनेन सञ्चितोपमं सम्पादितसादृश्यमित्युपमालङ्कारः वारस्त्री गणिकावेश्येत्यमरः । कुलाङ्गनानखक्षताद्यनौचित्याद्वारविशेषणं, पचेलिमं स्वतः पक्वं कर्मकर्त्तरि केलिमच् उपसंख्यानमिति पचेः केलिमच् प्रत्ययः । मालूरफलं बिल्वफलं बिल्वे शाण्डिल्यशैलूषौ मालूरः श्रीफलावपीत्यमरः । स नलो ददर्श ॥ ८४ ॥

युवेति । युवा च युवती च तयोर्यूनोर्द्वयी मिथुनं तस्याश्चित्तयोः कर्मणोर्निमज्जने ण्यन्ताल्लुट् उचितैः क्षमैः प्रसूनैः पुष्पबाणैः शून्येतरदशून्यं पूर्णं गर्भगह्वरं गर्भकुहरं यस्य तत् पाटलायाः पाटलवृक्षस्य स्तबकं कुसुमगुच्छम्भियान्धया भयमूढया धिया भयजन्यभ्रान्त्येत्यर्थः स्मरेषुधीकृत्य कामतूणीकृत्य तथा विभाव्य इत्यर्थः, अतएव भयात् प्रकम्पितश्चकम्पे अत्र पाटलस्तबके मदनतूणीरभ्रमात् भ्रान्तिमदलङ्कारः कविसंमतसादृश्याद्विषये विहितात्मनि । आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मत इति लक्षणात् ॥ ८५ ॥

मुनीति । अमुना नलेन वने कोरकितः सञ्जातकोरकः शितिद्युतिः पत्रेषु कृष्णच्छविः मुनिद्रुमोऽगस्त्यवृक्षः तमिस्रपक्षे त्रुटिकूटेन क्षयव्याजेन भक्षितं अभक्षितत्वे कुतः क्षय इति भावः । अत्र कूटशब्देन क्षयापह्नवेन भक्षणारोपादपह्नव भेदः । वैधवं चन्द्रसम्बन्धि विधुः सुधांशुः शुभ्रांशुरित्यमरः । कलाकलापं कलासमूहं वमन्नुद्गिरन् सिंहिकासुतो राहुरमन्यत किल खलु? अत्र कोरकितशितद्युतित्वाभ्यां मुनिद्रुमस्येन्दुकलाकलापवमनविशिष्टराहुत्वोत्प्रेक्षा साचोक्तापह्नवोत्थापितेति सङ्करः ॥ ८६ ॥

मिलन्निमीलं विदधुर्विलोकिता नभस्वतस्तं कुसुमेषुकेलयः ॥९७॥
गता यदुत्सङ्गतले विशालतां द्रुमाः शिरोभिः फलगौरवेण ताम्।
कथं न धात्रीमतिमात्रनामितैः स वन्दमानानभिनन्दति स्म तान् ९८
नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः।
विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽधत्त न कौमुदी मुदः ९९

पुर इति। पुरोऽग्रे हठात् झटित्याक्षिप्ता आकृष्टा तुषारेण हिमेन पाण्डुराणां छदानां पत्राणां तुषारवद् पाण्डुरस्य च्छदस्याच्छादकस्य वस्त्रस्य चावृतिरावरणं येन तस्य नभस्वतो वायोः विरुधि लतायां नद्धाः अनुबद्धा विभ्रमा भ्रमणानि विलासाश्च यासान्ताः कुसुमेषु विषये केलयः क्रीडाः कुसुमेषु केलयः कामक्रीडाश्च विलोकिताः सत्यस्तं न नलं मिलन्निमीलोमिलनं यस्य तं विदधुः निमीलिताचक्षुरित्यर्थः विरहिणा उद्दीपकदर्शनस्य दुःसहदुःखहेतुत्वात् अन्यत्र नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनामिति निषेधादिति भावः। अत्र प्रस्तुतनभस्वद्विशेषणसामर्थ्यादप्रस्तुतकामुकविरह प्रतीतेः समासोक्तिरलङ्कारः ॥ ९७ ॥

गता इति। द्रुमा यस्या धात्र्या उत्सङ्गतले उपरि देशे च विशालतां वृद्धिङ्गताः तां धात्रीम्भुवञ्च उपमातरं वा धात्री जनन्यामलके वसुमत्युपमातर्य्यपीति विश्वः, धः कर्मणि ष्ट्रन्निति दधातेष्ट्रन् प्रत्ययः। फलगौरवेण फलभरेण सुकृतातिशयेन च हेतुना अतिमात्रं नामितैः प्रह्वीकृतैः नम्रैर्भित्वविकल्पाद्द्रुस्वभावः शिरोभि रग्रैः उत्तमाङ्गैश्च वन्दमानान् स्पृशतोऽभिवादयमानांश्च तान् प्रकृतान् द्रुमान् अतएव यच्छब्दानपेक्षा स नलः कथं नाभिनन्दति स्म अभिननन्दैवेत्यर्थः, वृक्षाणां चेतानुरूपफलस्य सम्पत्तिं अपत्यानां च मातृभक्तिञ्च को नाम नाभिनन्दतीति भावः। अत्रापि विशेषणसामर्थ्यात्पुत्र प्रतीतेः समासोक्तिरलङ्कारः ॥ ९८ ॥

अत्रातपस्य चन्द्रिकात्व निरूपणाय तद्धर्मान् सम्पादयति। नृपायेति। वनानिलैः उद्यानवातैः हिमं शीतलं कृतं हिमितन्तत्करोतेर्ण्यन्तात् कर्म्मणि क्तः। पुष्परसैर्वनवातानीतैः मकरन्दैः सुधीकृतममृतीकृतं

वियोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ॥१००॥
अशोकमर्थान्वितनामताशया गतान् शरण्यं गृहशोचिनोऽध्वगान्
अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम् ॥१०१॥

तथा केतकरेणुभिः सितं विनिर्मितं शुभ्रीकृतं अह्नोमहस्तेजः अहर्महः आतपः रोः सुपीति रेफादेशः । तदेव कौमुदीति व्यस्तरूपकं वियोगिने तस्मै नृपाय मुदः प्रमोदान् नाधत्त न कृतवती प्रत्युतोद्दीपकैवाभूदिति भावः ॥ ९९ ॥

वियोगेति । वियोगभाजोऽपि वियोगिनोऽपि नृपस्य तदाननमेव साक्षादमृतांशुं प्रत्यक्षचन्द्रं पश्यता अतएव रोषादद्यापि चन्द्रतां न जहातीति क्रोधादिवारुणचक्षुषा पिकेन चन्द्रवैरिणी कुहूर्निजालाप एवकुहूर्नष्टचन्द्रममावास्येति श्लिष्टरूपकं, कुहूः स्यात् कोकिलालापनष्टेन्दुकलयोरपीति विश्वः । मुहुराहूयत आहूता किमित्युत्प्रेक्षा पूर्वोक्तरूपकसापेक्षेति सङ्करः । अस्य चन्द्रस्येयमेव कुहूराह्वानीया स्यात् तत्कान्तिराहित्यसम्भवादिति भावः ॥ १०० ॥

अशोकमिति । एष नलः पल्लवैः प्रतीष्टानि प्रतिगृहीतानि संछन्नानि कामस्य ज्वलदस्त्राणि तद्रूपकाणि जालकानि क्षारकानि बालमुकुलगुच्छा येन तं पल्लवसंछन्नजालरूपकामास्त्रमित्यर्थः । अन्यथा तद्दर्शनादेव ते म्रियेरन्निति भावः । अशोकमत एवार्थान्वितनामता नास्ति शोकोऽस्मिन्नित्यन्वर्थसंज्ञा तद्युक्ततया आशया अस्मानप्यशोकान् करिष्यतीत्यभिलाषेण शरणे रक्षणे साधुं समर्थं शरण्यं मत्वेति शेषः । शरणं रक्षणे गृह इति विश्वः तत्र साधुरिति यत्प्रत्ययः । आगतान् शरणागतानित्यर्थः । गृहान् दारान् शोचन्तीति गृहशोचिनः गृहानुद्दिश्य शोचन्त इत्यर्थः । गृहः पत्न्यां गृहे स्मृत इति विश्वः । अध्वगान् प्रोषितान् अवन्तमिव शरणागत रक्षणे महाफलकरणादन्यथा महादोषकरणाच्च रक्षन्तमिवेत्यर्थः । अमन्यत ज्ञातवान् अस्त्रभीरूणां तद्गोपनमेव रक्षणाय इति भावः ॥ १०१ ॥

विलासवापीतटवीचिवादनात् पिकालिगीतेः शिखिलास्यलाघवात्
वनेऽपि तौर्य्यत्रिकमारराध तं क भोगमाप्नोति न भाग्यभाग्जनः॥१२०

तदर्थमध्याप्य जनेन तद्वने शुका विमुक्ताः पटवस्तमस्तुवन् ।
स्वरामृतेनोपजगुश्च शारिकास्तथैव तत्पौरुषगायनीकृताः॥१०३

इतीष्टगन्धाढ्यमटन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि च ।
अविन्दतामोदभरं बहिश्चरं विदर्भसुभ्रूविरहेण नान्तरम्॥१०४॥

करेण मीनं निजकेतनं दधत् द्रुमालवालाम्बुनिवेशशङ्कया ।

विलासेति। विलासवापी विहारदीर्घिका तस्यास्तटे वीचीनां वादनात्पिकाना मलीनाञ्च गीतेर्गानात् शिखिनां मयूराणां लास्य लाघवात् नृत्यनैपुण्यात् च वनेऽपि तं नलं तौर्य्यत्रिकं नृत्यगीतवाद्यत्रयं कर्त्तृ आरराध आराधयामास तथा हि, भाग्यभाक् भाग्यवान् जनः क भुज्यत इति भोगः सुखं तं नाप्नोति सर्व्वत्रैवाप्नोतीत्यर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ १०२॥

तदर्थमिति। जनेन सेवकजनेन तदर्थं नलप्रीत्यर्थमध्याप्य स्तुतिं पाठयित्वा तस्मिन् वने विमुक्ताः विसृष्टाः पटवः स्फुटगिरः शुकास्तं नलमस्तुवन् तथैव शुकवदेव तदर्थमध्याप्य मुक्ताः तत्पौरुषस्य नल पराक्रमस्य गायिन्यो गायकाः कृता गायनीकृताः शारिकाः शुकवध्वः स्वरामृतेन मधुरस्वरेणेत्यर्थः उपजगुश्च॥ १०३॥

इतीति। इतीत्थमिष्टगन्धाढ्यं इष्ट सौगन्ध सम्पन्नं वन मटन् देशकालाध्वगन्तव्या कर्म्म संज्ञा ह्यकर्म्मणामिति वनस्य देशत्वात् कर्म्मत्वं, असौ नलः पिकैः कोकिलैरुपगीतोऽपि शुकैःस्तुतोऽपि च परं केवलं परं स्यादुत्तमानाप्तवैरिदूरेषु केवल इति विश्वः। बहिरामोदभरं सौरभ्यातिरेकमेवाविन्दत विदर्भसुभ्रू विरहेण हेतुना आन्तरमामोदभरमानन्दातिरेकरूपन्नाविन्दत न लब्धवान् प्रत्युत दुःखमेवान्वभूदिति भावः। आमोदो गन्धहर्षयोरिति विश्वः॥ १०४॥

करेणेति। स नलः निजकेतनं निजलाञ्छनं मीनं द्रुमालवालाम्बुषु

व्यतर्कि सर्वर्त्तुघने वने मधुं स मित्रमत्रानुसरन्निव स्मरः ॥१०५॥
लताबलालास्यकलागुरु स्तरुप्रसूनगन्धोत्करपश्यतोहरः ।
असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः ॥१०६॥
अथ स्वमादाय भयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात् ।
निलीय तस्मिन्निवसन्नपांनिधि र्वने तडागो ददृशेऽवनीभुजा ॥१०७॥
पयोनिलीनाभ्रमुकामुकावली रदाननन्तोरगपुच्छसच्छवीन् ।

निवेशशङ्कया प्रवेशभिया करेण दधत् तादृक्शुभरेखाव्याजेन दधान इत्यर्थः सर्वर्त्तुघने सर्वर्त्तुसङ्कुले अत्र अस्मिन् वने मित्रं सखायं मधुं वसन्तमनुसरन् अन्विष्यन् स्मरः इव व्यतर्कि इत्युत्प्रेक्षा ॥ १०५ ॥

लतेति । लताएवाबलास्तासां लास्यकलासु मधुरवृत्तविद्यासु गुरुरुपदेष्टेति मान्द्योक्तिः, तरुप्रसूनगन्धोत्कराणां द्रुमकुसुमसौरभसम्पदां पश्यतोहरः । पश्यन्तमनादृत्य हरः प्रसह्यापहर्त्तेत्यर्थः । पश्यतो योहरत्यर्थं स चोरः पश्यतोहर इति हलायुधः, पचाद्यच् षष्ठी चानादरे इति षष्ठी । वाग्दिक्पश्यद्भ्योयुक्तिदण्डहरेष्विति वक्तव्यादलुक् । सौरभ्ययुक्तं, मधुमकरन्दएव गन्धवारि गन्धोदकं तत्र प्रणीतलीलाप्लवनः एतेनकृत लीलावगाहन इतिशैत्योक्तिः, ईदृग्वनानिलोऽमुं नलमसेवत गुणवान् सेवकः सेव्यप्रियो भवतीति भावः ॥ १०६ ॥

अथेति । अथ वनालोकनानन्तरं मन्थनाद्भयेन धनार्थं पुनर्मथिष्यतीति भयादित्यर्थः । चिरादुच्चितं सञ्चितं चिरत्नं चिरन्तनं चिरमरुत्वादिभ्यस्त्नो वक्तव्य इति त्नप्रत्ययः । तच्च तद्रत्नाधिकं श्रेष्ठवस्तु भूयिष्ठं चेति चिरत्नरत्नाधिकं रत्नं स्वजातौ श्रेष्ठेऽपीत्यमरः । स्वं धनमादाय तस्मिन् वने निलीयान्तर्धाय निवसन् वर्त्तमानोऽपान्निधिरिवेत्युत्प्रेक्षा तेन नलेन तड़ागः सरोविशेषोऽवनीभुजा राज्ञा ददृशे दृष्टः ॥ १०७ ॥

यदुक्तं धनमादायेति तदेवात्र सम्पादयति नवभिः श्लोकैः पय इत्यादिभिः । यस्तड़ागः जलेनार्द्ररङ्गस्य अर्द्धच्छन्नस्य तटान्तभूमिदस्तटप्रान्तनिर्गतस्येत्यर्थः मृणालजालस्य विषवृन्दस्य निभाद्व्याजादित्यपह्नवालङ्कारः, निभो-

जलद्विरदस्य तटान्तभूभिदो मृणालजालस्य निभाद्बभार यः ॥१०८॥
तटान्तविश्रान्ततुरङ्गमच्छटा स्फुटानुबिम्बोदयचुम्बनेन यः ।
बभौ चलद्वीचिकशान्तशातनैः सहस्रमुच्चैःश्रवसामिव श्रयन् ॥१०९॥
सिताम्बुजानां निवहस्य यश्छलाद्बभावलिश्यामलितोदरश्रियाम्
तमःसमच्छायकलङ्कसङ्कुलं कुलं सुधांशोर्बहुलं वहन् बहु ॥११०॥
रथाङ्गभाजा कमलानुषङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा ।

व्याजसदृक्षयोरिति विश्वः । अनन्तोरगस्य शेषाहेः पुच्छेन सच्छवीन् सवर्णान् तद्वद्धवलानित्यर्थः पयोनिलीनानामभ्रमुकामुकावलीनामैरावतश्रेणीनां रदान् दन्तान् बभार तत्रैक एवैरावतः अत्र त्वसंख्या इति व्यतिरेकः, अभ्रमुकामुका इति द्वितीयासमासो मधुपिपासुवत् नलोकेत्यादिना षष्ठी प्रतिषेधात् लषपतेत्यादिना कमेरुकञ्प्रत्ययः ॥ १०८ ॥

तटान्तेति । यस्तड़ागस्तटान्ते तीरप्रान्ते विश्रान्ता या तुरङ्गमच्छटा नलानीताश्वश्रेणी तस्याः स्फुटानुबिम्बोदयचुम्बनेन प्रकट प्रतिबिम्बाविर्भावप्रीत्या निमित्तेन च एकैकशस्तासां वीचीनामन्तःशातनैरुपताड़नैः-अश्वादेस्ताड़नीकशेत्यमरः, चलदुच्छलदुच्चैःश्रवसां सहस्रं श्रयन् प्राप्नुवन्निव बभावित्युत्प्रेक्षा व्यतिरेकस्तु पूर्ववत् एतेन नलाश्वानामुच्चैःश्रवः साम्यं गम्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ १०९ ॥

सितेति । यस्तड़ागः अलिभिः श्यामलितोदरश्रियां श्यामीकृतमध्यशोभानां सिताम्बुजानां पुण्डरीकाणां निवहस्य छलात् तमःसमच्छायैः तिमिरवर्णैः यः कलङ्कः तेन सङ्कुलं बहुलं सम्पूर्णम्बहुनेकं सुधांशोश्चन्द्रस्य कुलं वंशं वहन् सन् बभौ अत्र छलशब्देन पुण्डरीकेषु विषयापह्नवेन चन्द्रत्वाभेदादपह्नवभेदः व्यतिरेकस्तु पूर्ववत् ॥ ११० ॥

रथाङ्गेति । यस्तड़ागो रथाङ्गं चक्रवाकः चक्रायुधञ्च यद्यपि चक्रवाके रथाङ्गनामेति च प्रयोगो रूढः तथापि प्रायेणास्य चक्रशब्द पर्यायत्व प्रयोगदर्शनात् पदस्याप्युभयत्र प्रयोगङ्कुरुते कविः, तद्भाजा भजोण्विः, कमलैः कमलया चानुषङ्गिणा संसर्गवता शिलीमुखस्तोमसखेन अलिकुलसहचरेण

सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवान्वयायि यः ॥१११॥
तरङ्गिणीरङ्कजुषः स्ववल्लभा स्तरङ्गलेखा विभराम्बभूव यः ।
दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसञ्चयश्च यः ॥११२॥
महीयसः पङ्कजमण्डलस्य यश्छलेन गौरस्य च मेचकस्य च ।
नलेन मेने सलिले निलीनयोस्त्विषं विमुञ्चन् विधुकालकूटयोः ॥११३॥
चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः ।
ध्रुवन्दधुर्व्वाड़वहव्यवाड़वस्थितिप्ररोहत्तमभूमधूमताम् ॥ ११४

अन्यत्र सखिशब्दः सादृश्यवचनः तस्य वर्णनेत्यर्थः, मृणालं शेषाहिरिवेत्युपमित समासः तद्भुवा तदाकारेण अन्यत्र मृणालमिव शेषाहिः तद्भुवा तदाधारेण शार्ङ्गिणा विष्णुना सरोजिनीनां स्तम्बा गुल्माः अप्रकाण्डे स्तम्बगुल्म मित्यमरः, तेषां कदम्बस्य कैतवान्मिषात् अन्वयायि अनुयातोऽनुसृतोऽधिष्ठित इति यावत् अत्रापि कैतवशब्देन स्तम्बत्वमपह्नुत्य शार्ङ्गित्वारोपादपह्नवभेदः ॥ १११ ॥

तरङ्गिणीरिति । यस्तड़ागोऽङ्कजुषोऽन्तिकभाजः उत्सङ्गसङ्गिन्यस्ववा तरङ्गरेखास्तरङ्ग राजिरेव स्ववल्लभास्तरङ्गिणीरिति व्यस्तरूपकम्बिभराम्बभूव बभार भीह्रीभृहुवां श्लुवच्चेति भृञोविकल्पादाम् प्रत्ययः । किञ्च यस्तड़ागो दरोद्गतै रीषदुद्गतैः कोकनदौघकोरकैः रक्तोत्पलखण्डकलिकाभिः धृतप्रवालाङ्कुर सञ्चयश्च धृतविद्रुमाङ्कुर निकरश्चेति अत्रापि कोकनद कोरकाणां विद्रुमत्वे रूपणाद्रूपकालङ्कारः ॥ ११२ ॥

महीयसश्चेति । यस्तड़ागः महीयसो महत्तरस्य गौरस्य च मेचकस्य च पङ्कज मण्डलस्य सितासितसरोजयोः छलेन सलिले निलीनयोः विधुकाल कूटयोः सितासितयोरिति भावः । त्विषं विमुञ्चन् विसृजन्निव नलेन मेने अत्र छलेन विमुञ्चन्निवेति सापह्नवोत्प्रेक्षा ॥ ११३ ॥

चलीकृता इति । यत्र यस्मिन् तड़ागे तरङ्गरिङ्गणैस्तरङ्गकम्पनैश्चलीकृताः चञ्चलीकृताः अबालानां कठोराणां शैवाललतानां परम्पराः पङ्क्तयः हव्यं वहतीति हव्यवाडग्निः वहेश्चेति ञ्यप्रत्ययः । तस्य छन्दोमात्र विषयत्वात् अना-

प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती ।
धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनीयत्प्रभवाप्सरायिता ११५
यदम्बुपूरप्रतिबिम्बितायति र्मरुत्तरङ्गैस्तरलस्तटद्रुमः ।
निमज्ज्य मैनाकमहीभृतः सत स्ततान पक्षान् धुवतः सपक्षताम्
पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम् ।
स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः ११७

दरीषु भाषायांप्रयोगः वाडव हव्यवाहो वाडवाग्नेरेव स्थित्यान्तरवस्थानेन प्ररोहत्तमोवह्निःप्रादुर्भवत्तमोभूमाग्रेषान्ते च ते धूमाश्च तेषां भावस्तत्ता तां दधुः वह्निरुत्थित धूमपटलवद्बभुरित्यर्थः । भ्रुव मित्युत्प्रेक्षायाम्॥ ११४ ॥

प्रकाममिति । आदित्यं सूर्यमवाप्य प्रकामं कण्टकैः नालगतैः तीक्ष्णाग्रैरवयवैः करम्बिता दन्तुरिता अन्यत्रादित्यमदितिपुत्रमिन्द्रमवाप्य कण्टकैः पुलकैः करम्बिता अतएवामोदभरं परिमल सम्पदमानन्दसम्पदं विवृण्वती । प्रकटयन्ती दिवा दिवसे धृतानि स्फुट श्रीगृहाणि पद्मानि यस्य स विग्रहः स्वरूपं यस्याः सा अन्यत्र दिवा स्वर्गे वास्फुट श्रीगृहमुज्ज्वलशोभास्पदं विग्रहो देहो यस्याः सा स्वर्गलोकवासिनीत्यर्थः । यत्तडागः प्रभवः कारणं यस्याः सा तज्जन्या सरोजिनी पद्मिनी अप्सरायिता अप्सर इवाचरिता उपमानात् कर्त्तुः क्यज् सलोपश्चेति कर्त्तरिक्तः ओजसोऽप्सरसोरित्यप्सरसः सकारलोपः श्लिष्टविशेषणेयमुपमा ॥ ११५ ॥

यदिति । यस्य तडागस्याम्बुपूरे प्रतिबिम्बितायतिः प्रतिफलितायामः मरुत्तरङ्गैः वातवीजनैस्तरलश्चञ्चलः तटद्रुमः निमज्ज्य सतो वर्त्तमानस्य पक्षान् धुवतः कम्पयतो मैनाक महीभृतस्तदाख्यस्य पर्वतस्य सपक्षतां साम्यं ततानेत्युपमा ॥ ११६ ॥

पयोधीति । अथ स नैषधो निषधानां राजा नलः जनपदशब्दात् क्षत्रियादेरित्यन्, पयोधि लक्ष्मीमुषि तत्सदृश इत्यर्थः । अत्र केलिपल्वले क्रीड़ा सरसि रिरंसूनां रन्तुमिच्छूनां हंसीनां कलनादेषु सादरं सस्पृहन्तत्रान्तिके तत्समीपे विचरन्तं चित्रमद्भुतं हिरण्मयं सुवर्णमयं दाण्डिनायनादिना निपातनात्

प्रियासु बालासु रतिक्षमासु च द्विपत्रितं पल्लवितञ्च बिभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं मिषेण चञ्च्वोश्चरणद्वयस्य च ११८
महीमहेन्द्रस्तमवेक्ष्य स क्षणं शकुन्तमेकान्तमनोविनोदिनम् ।

साधुः हंसमबोधि ददर्शेत्यर्थः । दीपजनेत्यादिना कर्त्तरि चिण् ॥ ११७ ॥

पुनस्तमेव विशिनष्टि प्रियास्विति । बालासु अरतिक्षमासु किन्त्वासन्नयौवनास्वित्यर्थः । अन्यथा रागाङ्कुरासम्भवात् रतिक्षमासु युवतीषु द्विविधासु प्रियासु विषये क्रमाच्चञ्च्वो स्त्रोट्योः चञ्चुस्त्रोटिरुभे स्त्रियामित्यमरः । चरणद्वयस्य च मिषेण द्विपत्रितं सञ्जात द्विपत्रितं पल्लवितं सञ्जातपल्लवञ्च चञ्च्वोर्द्वयोः सम्पुटितत्वे साम्यात् द्विपत्रितत्वं चरणयोस्तु विभ्रमरागमत्त्वेन पल्लवसाम्यात्पल्लवत्वं राजहंसानां लोहितञ्च चरणत्वात् तस्मिन् मिषेणेत्युक्तं स्मरार्जितं स्मरेणैव दृचरोपणेनोत्पादितमित्यर्थः । राग एव महीरुहस्तस्याङ्कुरं रागमहीरुहाङ्कुरं बिभ्रतं चञ्चुपुटमिषेण द्विपत्रितं बालिकागोचररागं चरणमिषेण पल्लवितं युवतीविषये रागञ्च बिभ्रतमित्यर्थः । ईदृशं हंसमबोधीति पूर्वेणान्वयः । नाभ्यस्ताच्छतुरिति प्रतिषेधः वृक्षाङ्कुरो हि प्रथमं द्विपत्रितो भवति, पश्चात् पल्लवित इति प्रसिद्धम् । तत्र रागं बिभ्रत इति हंसविशेषणात्, तद्रागस्य हंसाधिकरणत्वोक्तिः, प्रियास्वधिकरणभूतास्वित्युपाध्याय विश्वेश्वरव्याख्यानं प्रत्याख्येयं, अन्यनिष्ठस्य रागस्यान्याधिकरणत्वायोगात् न चायमेक एवोभयनिष्ठ इति भ्रमितव्यम्, तस्येच्छापरतरपर्य्यायस्य तथात्वायोगात् वुद्ध्यादीनामपि तथात्वापत्तौ सर्वसिद्धान्त विरोधात्, विषमानुरागाभाव प्रसङ्गाच्च उभयोरपि रागत्व साम्यादुभयनिष्ठ भ्रमः केषाञ्चित् कान्तकामिनोरन्योन्याधिकरण रागयोरन्योन्यविषयत्वमेव नाधिकरत्वमेवमिति सिद्धान्तः, प्रियास्वितिविषय सप्तमी नत्वाधार सप्तमीति सर्वं रमणीयं; अत्र राग महीरुहाङ्कुरमिति रूपकं चञ्चुचरणमिषेणेत्यपह्नवानुप्राणितमिति सङ्करः । तेन च वाह्याभ्यन्तर रागयोर्भेदे अभेदलक्षणातिशयोत्थापिता चञ्चुचरणव्याजेनान्तरस्येव वहिरङ्कुरितत्वोत्प्रेक्षा व्यज्यत इत्यालङ्कारेणालङ्कार ध्वनिः ॥ ११८ ॥

महीति । महीमहेन्द्रो भूदेवेन्द्रः स नलः एकान्तं नितान्तं मनो

प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत्॥११९॥
अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा।
तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना॥१२०॥
अथावलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः।
स तिर्य्यगावर्त्तितकन्धरः शिरः पिधाय पक्षेण रतिक्लमालसः॥१२१॥

विनोदयतीति तयोक्तं तं शकुन्तं पक्षिणं क्षणमवेक्ष्य प्रियावियोगान्निर्भरमति मात्रं विधुरो दुःस्थोऽपि मनागीषत्कुतूहलाक्रान्तमनाः कौतुकितचित्तोऽभूत् गृहीतकामोऽभूदित्यर्थः॥ ११९ ॥

कथमीदृशे चापल्ये प्रवृत्तिरस्य धीरोदात्तस्येत्याशङ्क्य नात्र जन्तोः स्वातन्त्र्यं किन्तु भाव्यर्थानुसारिणी विधातुरिच्छैव तथा प्रेरयतीत्याह। अवश्येति। अवश्यभव्येष्ववश्यं भाव्यर्थेषु विषये भव्यगेयादिना कर्त्तरि यत्प्रत्ययान्तो निपातः लुपेदवश्यमः कृत्ये इत्यवश्यमो मकारलोपः अनवग्रहग्रहा अप्रतिबन्धनिर्बन्धा निरङ्कुशाभिनिवेशेति यावत् ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे इति विश्वः। वेधसः स्पृहा विधातुरिच्छा यया दिशा धावति येनाध्वना प्रवर्त्तते तयैव दिशा भृशावशात्मना त्यन्तपरतन्त्रस्वभावेन जनस्य चित्तेन तृणेन वात्या वातसमूह इव पाशादिभ्यो यः अनुगम्यते वेधसः स्पृहा कर्म्म॥ १२० ॥

चिकीर्षितार्थे दैवानुकूल्यं कार्य्यतो दर्शयति। अथेति। अथ नलदृष्टिप्राप्त्यनन्तरं रतिक्लमालसः सः खगो हंसः तदा नलकुतूहलकालक्षणमेकपादो यस्यां क्रियायामित्येकपादिका एकपादेनावस्थानं मत्वर्थीयष्ठन् प्रत्ययः तद्धितार्थेत्यादिना सङ्ख्या समासः यस्येति लोपस्य स्थानिवद्भावेन ताद्रूपाभावात्पान्नेदः पदादेशः तामेकपादिकामवलम्ब्य तिर्य्यगावर्जितकन्धरः आवर्त्तितग्रीवः सन् पक्षशिरः पिधाय उपपल्वलं पल्वले निदद्रौ सुष्वाप स्वभावोक्तिरलङ्कारः स्वभावोक्तिरलङ्कारो यथावद्वस्तुवर्णनमिति लक्षणात्॥ १२१ ॥

सनालमात्माननिर्ज्जितप्रभं ह्रिया नतं काञ्चनमम्बुजन्म किम्?
अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भःप्रभुचामरञ्च किम्?१२२॥
कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती।
तयोः प्रवालैर्व्वनयोस्तथाम्बुजै र्नियोद्धुकामे किमु बद्धवर्मणी? १२३
विधाय मूर्त्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीमयम्।
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना॥१२४

सनालमिति। स नलः तं निद्राणं हंसम् आत्माननेन निर्जितप्रभं निजमुखनिराकृतशोभम् अतएव ह्रियानतं सनालं नालसहितं काञ्चनं सौवर्णमम्बुजन्माम्बुजं किं? तथा विद्रुम दण्डेन मण्डितं भूषितं पीतवर्णमम्भःप्रभोरपाम्पत्युः वरुणस्य चामरं किम्? इतिशब्दोऽत्राहार्य्यः इति अबुद्ध बुद्धवानुत्प्रेक्षितवानित्यर्थः बुध्यते र्लुङि तङ् झषस्तथोर्द्धोऽध इति तकारस्य धकारः ॥ १२२ ॥

कृतेति। ततस्तन्निदर्शनानन्तरं हयादश्वात् कृतावरोहस्य कृतावतरणस्यास्य नलस्योपानहौ वर्मणि पादत्राणे पादरुपात्। स्त्रीत्यमरः पदे चरणे तयोर्वनयोः सलिल काननयो वने सलिल कानने इत्यमरः प्रवालैः पल्लवैः तथाम्बुजैः पद्मैश्चेत्यर्थः सहार्थे तृतीया नियोद्धुं कामोऽभिलाषो ययोस्ते नियोद्धुकामे युद्धकाम इत्यर्थः तुं काममनसोरपीति तुमुनो मकारलोपः अतो बद्धवर्म्मणी किमु बद्धकवचे इव ते रेजतुः किमित्युत्प्रेक्षा ॥ १२३ ॥

विधायेति। अयं नृपः स्वयमेव कपटेन छद्मना वामनीं ह्रस्वां गौरादित्वात् ङीप् बलिध्वंसि विडम्बिनीं कपटवामनविष्णुमूर्त्त्यनुकारिणीमित्यर्थः मूर्त्तिं विधाय कायं सङ्कुच्येत्यर्थः मौनिना निःशब्देन चरणेनोपेतपार्श्वः प्राप्तहंसान्तिकः पाणिना पतङ्गं पक्षिणं समधत्त सम्भृतवान् जग्राहेत्यर्थः स्वभावोक्तिरलङ्कारः ॥ १२४॥

तदात्तमात्मानमवेत्य संभ्रमात् पुनः पुनः प्रायसदुत्प्लवाय सः ।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम्१२५

ससम्भ्रमोत्पातिपतत्कुलाकुलं सरः प्रपद्योत्कतयानुकम्पिताम् ।
तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव॥१२६॥

पतत्त्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।
चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली ॥१२७॥

तदिति। स हंसः आत्मानं तदा तु तेन नलेनात्तं गृहीतमवेत्य ज्ञात्वा सम्भ्रमादुत्प्लवायोत्पतनाय पुनः पुनः प्रायसदायस्तवान् यसु प्रयत्न इति धातोर्लुङि पुषादित्वात् च्लेरङादेशः उड्डयने उत्पतने निराशतां गतो विरुत्य विक्रुश्य निरोद्धुः गृहीतुः करौ केवलं करावेव दशति स्म दष्टवान् अत्रापि स्वभावोक्तिरेव ॥ १२५ ॥

स इति। ससम्भ्रमं सत्वरमुत्पातिना उड्डीयमानेन पतत्कुलेन पक्षिसङ्घेनाकुलं सङ्कुलं सरः कर्तृ उत्कतया उन्मनस्तया उत्क उन्मना इति निपातनादिविधानाच्च साधुः अनुकम्पितां प्रपद्य कृपालुतां प्राप्य तं नृप मूर्मिलोलैश्चलै र्वारिरुहैः करैरिति व्यस्तरूपकं पतगग्रहात्पक्षिग्रहात् न्यवारयदिवेत्युत्प्रेक्षा वास्तव निवारणासम्भवादुत्प्रेक्षा। निवारणस्य करसाध्यत्वात् तत्र रूपकाश्रयणम् अतएवैवं शब्दस्य उपमावाचेनार्थानुसाराद्व्यवहितान्वयेनाप्युत्प्रेक्षा व्यञ्जकत्वमिति रूपकोत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः॥१२६॥

पतत्त्रिणेति। रुचिरेण पतत्त्रिणा हंसेन वञ्चितं विरहितं तत्पल्वलं सरः विहाय प्रयान्त्या गच्छन्त्या श्रियो लक्ष्म्याः स्खलद्भ्यां पदाम्भोरुह नूपुराभ्याम् उपमा साम्यं यस्याः सा कल हंसमण्डली कुले चुकूज यूयमंशे कूजनमेषां स्वभावस्तत्र हंसेनैव सह गच्छन्त्या सरः शोभायाः श्रीदेव्या सहाभेदाध्यवसायेन कूजत्कलहंसमण्डल्यां तन्नूपुरत्वमुत्प्रेक्ष्यते उपमाशब्दोऽपि मुख्यार्थानुपपत्तेः सम्भावना लक्षक इत्यवधेयम् ॥ १२७ ॥

न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग! यस्याः पतिरुज्झितस्थितिः।
इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु १२८
न जातरूपच्छदजातरूपता द्विजस्य दृष्टेयमिति स्तुवन् मुहुः।
अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा १२९
धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः।
तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान् १३०

नेति। इयं वसुधा वासयोग्या निवासार्हा न कुतः अङ्ग भो! यस्या वसुधाय उज्झितस्थितिः त्यक्तमर्यादः ईदृशः अनपराधपक्षिधारकः त्वं पतिः पालकः इत्थं खगाः क्षितिं प्रहाय नभ आश्रितास्तं नलमारवैरुच्चध्वनिभिराचुक्रुशुः खलु उक्तरीत्या सनिन्दोपालम्भनं चक्रुरिवेत्युत्प्रेक्षा गम्यते॥१२८॥

नेति। इयमीदृग्जातरूपच्छदैः सुवर्णपक्षैः जातरूपता उत्पन्नं सौन्दर्यत्वं द्विजस्य पक्षिणो न दृष्टा हिरण्मयः पक्षी न कुत्रापि दृष्ट इत्यर्थः इति मुहुस्तुवन् स जनाधिनाथः तथास्मिन्नन्तरे करपञ्जरस्पृशा तद्गतेन मानसं सरः ओकः स्थानं यस्येति सः तेन मानसौकसा हंसेन हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकस इत्यमरः। अवादि उक्तः वदेः कर्मणि लुङ्॥१२९॥

तदेव चतुर्भिराह। धिगित्यादि। हेम्नो जन्म येषान्तान् हेमजन्मनो हैमान् मम पक्षान् पतत्राणि समीक्ष्य तृष्णातरलम् आशावशगं भवन्मनो धिगस्त्विति निन्दा धिङ्निर्भर्त्सन निन्दयोरित्यमरः। धिगुपर्य्यादिषु त्रिष्विति धिग्योगात् मन इति द्वितीया तुषारशीकरैः हिमकिरणैरर्णवस्येव तव एभिः पक्षैः कियान् कमलाया लक्ष्म्याः कमलस्य जलस्य जलजस्य चोदयो वृद्धिर्भवेत् न कियानित्यर्थः॥१३०॥

नेति। हे नृप! त्वदीक्षणात् त्वन्मूर्त्ति दर्शनादेव विश्वसितान्तरात्मनो विस्रब्धचित्तस्य विश्वस्तस्येत्यर्थः मम वधः केवलं प्राणिमात्रवधो न किन्तु विश्वासघातपातकमित्यर्थः ततः किमत आह विश्वासजुषां विस्रम्भ-

न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।
विगर्हितं धर्मधनैर्निवर्हणं विशिष्य विश्वासजुषां द्विषामपि १३१

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते ?
धिगीदृशन्ते नृपतेः कुविक्रमं कृपाश्रये यः कृपणे पतत्त्रिणि१३२॥

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी ह्रिणीयते१३३

इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः।

भाजां द्विषामपि निवर्हणं हिंसनं धर्म्मधनैर्धर्म्मपरैः मन्वादिभिर्विशिष्यातिरिच्य विगर्हितमत्यन्तनिन्दितमित्यर्थः ॥ १३१ ॥

पदे पद इति। रणोद्भटाः रणेषु प्रचण्डाः भटा योधाः पदे पदे सन्ति सर्वत्र सन्तीत्यर्थः वीप्सायां द्विर्भावः एष हिंसारसो हिंसारागस्तेषु भटेषु न पूर्यते अत्र काकुः न पूर्य्यते किं इत्यर्थः नृपतेर्महाराजस्य ते तव ईदृशमवध्यवधरूपङ्कुविक्रमं धिक् यः कुविक्रमः कृपाश्रये कृपाविषये अनुकम्पनीये कृपणे दीने पतत्त्रिणि क्रियत इति विशेषः॥१३२

फलेति। यस्य मम मुनेरिव वारिभूरुहां जलरुहां पद्मादीनाम् अन्यत्र वारिरुहां भूरुहाञ्च फलेन मूलेन चेत्यमनेन दृश्यमानप्रकारेण वृत्तयो जीविकाः तस्मिन् अपि अनपराधेऽपीति भावः दण्डधारिणा दण्डकारिणा अदण्ड्यदण्डकेनेत्यर्थः। पत्या त्वया हेतुना अद्य धरणी कथं न ह्रिणीयते जुगुप्सत एवेत्यर्थः घृणा जुगुप्सा कृपयोरिति विश्वः। ह्रिणीयते कण्ड्वादियगन्ताल्लट् तत्र पति घृणिङिति ङित्करणादात्मनेपदम् अकार्य्यकारिणं भर्त्तारमपि गर्हन्ते स्त्रिय इति भावः ॥ १३३ ॥

इतीति। इतीत्थं खगो हंसस्तं नृपम् ईदृशैर्दोषालम्भैरित्यर्थः वाङ्मयैर्वाग्विकारैः एकाचो नित्यं मयटमिच्छन्तीति विकारार्थे मयट्प्रत्ययः पच्चिकायनात् चित्रं परैः स्वाकार्य्योद्घटनादपत्रपावैलक्ष्यं परार्त्तिदर्शने

दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥१३४
मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्व्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्द्दयन्नहो विधे! त्वां करुणा रुणद्धि न॥१३५
मुहूर्त्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तर स्त्वयैव मातः! सुतशोकसागरः१३६
मदर्थसन्देशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते ।

तन्निवर्त्तनेच्छा या कृपा ताभिः सहवर्त्तत इति सचित्रवैलक्ष्य कृपं विरचय्य विधाय ल्यपि लघुपूर्व्वादि समादेशः दया समुद्रे तदाशये तच्चित्ते कारुण्यरसापगाः करुणारस नदीः गिरः अतिथीचकार प्रवेशयामासेत्यर्थः समुद्रे नदी प्रवेशो युक्त इति भावः ॥ १३४ ॥

तावद्गिरः प्रपञ्चयति। मदित्यादिना। तत्र तावत्दैव मुपालभते हे विधे! जननी अहमेवैकः पुत्रो यस्याः सा मदेकपुत्रा मम नाशे तस्यागत्यन्तरं नास्तीत्यर्थः जरातुरा स्वयमप्यसमर्थेत्यर्थः वरटा स्वभार्य्या हंसस्य योषिद्वरटेत्यमरः। नवप्रसूतिरचिरप्रसवा तपस्विनी शोच्या एषजनः स्वयमित्यर्थः तयोर्जायाजनन्योर्गतिः शरणं तं जनं मामित्यर्थः अर्द्दयन् पीड़यन् हे विधे! विधातः! त्वां करुणा न रुणद्धि मत्पीड़नान्न निवारयतीति काकुः न रुणद्धि किमित्यर्थः ॥ १३५ ॥

अथ मातरं शोचयति। मुहूर्त्तेति। हे मातः! सखायः सुहृदो दया सखाः सदयाः संसारगर्हणेन क्षणमात्रं गलिता एव सन्तो निवृत्तिं शोकोपरतिमेष्यन्ति किन्तु त्वयैव सुतशोक एव सागरः परमत्यन्तः दुःखेनोत्तीर्य्यत इति दुरुत्तरो दुस्तरः तरतेः कृच्छ्रार्थे खल्प्रत्ययः ॥ १३६ ॥

अथ भार्य्यामुद्दिश्य विलपति। मदर्थेत्यादिना। हे प्रिय! मह्यमिमे मदर्थे अर्थेन सह नित्य समासः सर्व्वलिङ्गता च वक्तव्या तयोः सन्देशमृणालयोः वाचिकविसयोः मन्थरस्तत्प्रेषणे विलम्बित प्रवृत्तिः प्रियः कियद्दूरे देशे वर्त्तत इति त्वया उदिते उक्ते पृष्टे सतीत्यर्थः अथ प्रश्नानन्तरं

विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये! स कीदृग्भविता तव क्षणः १३७

कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटन्तपनिष्ठुराक्षरा १३८

अपि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं वतोदिता ।
मुखानि लोलाक्षि! दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि

ममैव शोकेन विदीर्णवक्षसा त्वयापि चित्राङ्गि! विपद्यते यदि।

रुदतः अनिष्टोच्चारणाशक्त्या अश्रूणि विसृजतः पक्षिणः इतो गच्छती गतान्विलोकयन्त्यास्तव स क्षणः स कालः कीदृग्भविता भविष्यति वज्रपात प्राय इति भावः कर्त्तरि लुट् ॥ १३७ ॥

कथमिति। हे विधातः! प्रियायाः वरटायाः शैत्यमृदुत्व शिल्पिनस्तादृक् तदङ्गशैत्यमार्दव निर्म्माणकात्तव पाणि पङ्कजात्पङ्कज मृदुशिशिरात् पाणेरित्यर्थः मयि विषये वल्लभया सह वियोक्ष्यसे इत्येवं रूपाम् अतएव ललाटं तपन्ति दहन्तीति ललाटन्तपानि सूर्य्य ललाटयोर्दृशितयोरिति खश्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः तानि निष्ठुराणि कर्णकठोराणि चाक्षराणि यस्याः सा लिपिरक्षरविन्यासः कथं निर्गता निःसृता अत्र कारणात् विरुद्धकार्य्योत्पत्ति कथनाद्विषमालङ्कारभेदः विरुद्धकार्य्यस्योत्पत्ति र्यत्रानर्थस्य भावयेत् । विरूपघटना वा स्याद्विषमालङ्कृतिर्मतेति॥१३८

अपीति। अपि चेत्यपरेत्यर्थः अद्यास्मिन् दिने सद्यः परुदित्यादिना निपातः स्वयूथ्यैः स्वसहचरैर्हंसैः कर्त्तृभिरशनि क्षतोपमं वज्र प्रहार प्रायं ममेमं वृत्तान्तम् अनर्थवार्त्ता उदिता उक्ता रुती सतिवुर्थस्यदुहादित्वादप्रधाने कर्म्मणि क्तः वचिस्वपीत्यादिना सम्प्रसारणं हे लोलाक्षि! दश दिशां मुखानि शून्यान्या लक्ष्य लक्ष्याकाराणि विलोकयिष्यसि असंशयं सन्देहो नास्तीत्यर्थः अर्थाभावेऽव्ययी भावः वतेति खेदे॥ १३९ ॥

हे चित्राङ्गि! लोहितचञ्चुचरणत्व द्विचित्र गात्रा मम शोकेनैव

तदस्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः १४०
तवापि हाहा विरहात् क्षुधाकुलाः कुलायकूलेषु विलुठ्य तेषु ते।
चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटितेक्षणा मम १४१
सुताः कमाहूय चिराय चूङ्कृतैर्विधाय कम्प्राणि मुखानि कं प्रति
कथासु शिष्यध्वमिति प्रमील्य स स्रुतस्य सेकाद्बुबुधे नृपास्रुणः १४२
इत्यमुं विलपन्तममुञ्चद्दीनदयालुतयावनिपालः।

मद्विपत्तिदुःखेनैव विदीर्णवक्षसा विदलितहृदा त्वया विपद्यते म्रियते यदि तत्तर्हि दैवेन हतः स्फुटं व्यक्तं पुनर्हतोऽस्मि हेति विषादे हा विस्मयविषादयोरिति विश्वः। कुतः यतः ते शिशवः परासवो मातुरप्यभावे पोषकाभावान्मृताः अतः शिशुमरणभावनया द्विगुणितं मे मरणदुःखं प्राप्तमित्यर्थः॥ १४०॥

ननु मन्मृतौ कथं तेषां मृतिरत आह। तवापीति। हे प्रिये! बहुभिर्मनोरथैश्चिरेण लब्धाः कष्टलब्धा इत्यर्थः अस्फुटितेक्षणाः अद्याप्यनुन्मीलितेक्षणा मम ते पूर्वकाः शिशवः तवापि न केवल ममेति भावः विरहात् विपत्तेः क्षुधाकुलाः क्षुत्पीड़िताः तेषु स्वसम्पादितेष्वित्यर्थः कुलायकूलेषु नीडान्तिकेषु कुलायो नीडमस्त्रियामित्यमरः। विलुठ्य परिवृत्य क्षणेन गताः मृतप्रायाः हाहेति खेदे॥ १४१॥

सुता इति। हे सुताः! चूङ्कृतैश्चूङ्कारैश्चिराय कं प्रति कमपि प्रति मुखानि कम्प्राणि चञ्चलानि विहाय कथासु शिष्यध्वं कथामात्रशेषाभावतः कुत्रापि पित्रोरदर्शनान्म्रियध्वं प्राप्तकाले लोट् मरणकालः प्राप्त इत्यर्थः इतीति इत्युक्त्वेत्यर्थः। गम्यमानार्थत्वादप्रयोगः प्रमील्य मूर्च्छां प्राप्य स हंसः स्रुतस्य दयार्द्रभावत्वाहृतो नृपस्यास्रुणः सेकाद्बुबुधे संज्ञां लेभिरे प्रायेणात्र स्वभावोक्तिरूह्या॥ १४२॥

अत्र सर्वत्र भिन्नसर्गान्तैरिति काव्यलक्षणाद्वृत्तान्तरेण श्लोकद्वय-

रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥१४३॥

आनन्दजास्रुभिरनुस्रियमाणमार्गान्
प्राक्शोकनिर्गलितनेत्रपयःप्रवाहान् ।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन
नीराजनां जनयतां निजबान्धवानाम् ॥ १४४ ॥

माह । इत्थमित्यादिना इत्थं विलपन्तं परिवेदमानमसुं हंसं अवनीपाल नलो दीनेष्वार्त्तेषु दयालुतया कारुणिकतया रूपमाकृतिरदर्शि अपूर्व्वत्वादवलोकितं यस्मै यदर्थं रूपदर्शनार्थमेव धृतो गृहीतोऽसि अथ यथेच्छं गच्छेत्यभिधाय अमुञ्चत् मुक्तवान् दोधक वृत्तमिदम्भभ भाद्गाविति लक्षणात् ॥ १४३ ॥

आनन्देति । हंसः चक्रनिभ चंक्रमणस्य मण्डलाकार भ्रमणस्य छलेन नीराजनाञ्जनयतां कुर्व्वतां निजबान्धवानां बन्धुसक्तं बान्धवा नीराजयन्तीति समाचारः प्राक्शोचनात्पूर्वं शोके निर्गलिता निःसरितानेत्र पयःप्रवाहाः वाष्पपूरास्तानानन्दजास्रुभिरानन्दवाष्पैरनुस्रियमाणमार्गान् अनुगम्यमानमार्गांश्चक्रे कृतवान् अत्र पक्षिणां स्वभावसिद्धबन्धुत्वमुक्तं युध्य भ्रमणं छलशब्देनापह्नुत्य तत्र नीराजनासारोपादपह्नवभेदः अत्र चमत्कारित्वात् मङ्गलाचाररूपत्वाच्च सर्व्वत्र सर्गान्त श्लोकेष्वानन्द शब्दप्रयोगः यथाह भगवान् भाष्यकारः मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि विहितानि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि चाभवन्ति अध्येतारश्च प्रवक्तारो भवन्तीति, वसन्ततिलकावृत्तम् उक्ता वसन्ततिलका नभजाजगौग इति लक्षणात् सर्गान्तत्वाद्वृत्तभेदः यथाह दण्डी सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः, सुसन्धिभिः सर्व्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जनमिति ॥ १४४ ॥

अथ कविः काव्यवर्णनमाख्यातपूर्व्वकं सर्गसमाप्तिं श्लोकबन्धेनाह । श्रीहर्षमिति । कविराज राजि मुकुटानां विद्वच्छ्रेष्ठश्रेणी मुकुटानां

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः॥ १४५॥

अलङ्कारभूतो हीरो वज्रमणिः हीरोनाम विद्वान् श्रीहर्षनामानं यं सुतं सुषुवे जनयामास मामल्ल देवी नाम स्वमाता सा च यं सुतं सुषुवे तस्य श्रीहर्षस्य यश्चिन्तामणिमन्त्रः तस्य चिन्तनमुपासना तस्य फले फलभूते शृङ्गारभङ्ग्या शृङ्गाररस चारुणि निषधानां राजा नैषधो नलः तदीय चरिते नलचरित नामके महाकाव्ये अयमादिः प्रथमः सर्गो गतः समाप्त इत्यर्थः एवमुत्तर त्रापि द्रष्टव्यम्॥ १४५॥

इति पद वाक्य प्रमाण पारावारपारीण महोपाध्यायकोलाचल मल्लिनाथ सूरिविरचितायां नैषधटीकायां प्रथमः सर्गः समाप्तः।

द्वितीयः सर्गः ।

अधिगत्य जगत्यधीश्वरा दथ मुक्तिं पुरुषोत्तमात्ततः ।
वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः ॥ १ ॥
अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम् ।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती ॥ २ ॥

अधिगत्येति। अथ मोचनानन्तरं स द्विजः पक्षी विप्रश्च दन्तविप्राण्डजा द्विजा इत्यमरः। जगत्यधीश्वरात् क्ष्मापतेः भुवनपतेश्च जगती भुवने क्ष्मायामिति विश्वः। पुरुषोत्तमात् पुरुषश्रेष्ठात् विष्णोश्च ततः तस्मात् प्रकृतान्नलात् अन्यत्र प्रसिद्धाच्च मुक्तिं मोचनं निर्व्वाणञ्च अधिगत्य प्राप्य य आनन्दो वचसामपि न गोचरः वक्तुमशक्यः यतोवाचो निवर्त्तन्त इत्यादेरवाङ्मानसगोचरश्च तमानन्दं परमानन्दञ्च अविन्दतालभत विदेर्लाभार्थात् कर्त्रभिप्राये क्रियाफल इत्यात्मनेपदं शेमुदादीनामिति नुमागमः अत्राभिधायाः प्रकृतार्थमात्र नियन्त्रणादुभय श्लेषानुपपत्तेर्भेदान्तरानवकाशाल्लक्षणायाश्च मुख्यार्थवाधमन्तरेण सम्भवात् ध्वनिरेवायं ब्राह्मणस्य विष्णोर्मोक्षानन्द प्राप्ति लक्षणार्थान्तर प्रतीतेर्न श्लेषः प्रकृताप्रकृतोभयगतः, अस्मिन् सर्गे एकशत श्लोकपर्य्यन्तं वियोगिनीवृत्तं विषमे ससजा गुरुः समसभरालोऽथ गुरु र्वियोगिनीति लक्षणादिति सङ्क्षेपः ॥ १ ॥

अधुनीतेति। स खगो हंसः उत्फुल्लतनूरुहीकृतां नृपकरपीड़नादुद्बुद्ध पतत्रीकृतां पतत्रञ्च तनूरुहमित्यमरः। तनुं शरीरं नैकधा अनेकधा नञर्थस्य न शब्दस्य सुप्सुपेति समासः नञ् समासेन लोपप्रसङ्गः अधुनीत धूतवान् धूञः क्र्यादेर्लङिति तङ् प्वादीनां ह्रस्व इति ह्रस्वः

अयमेकतमेन पक्षते रधिमध्योर्द्ध्वगजङ्घमङ्घ्रिणा ।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ॥ ३ ॥
स गरुद्वनदुर्गदुर्ग्रहान् कटु कीटान् दशतः सतः क्वचित् ।
नुनुदे तनुकण्डुपण्डितः पटुचञ्चूपुटकोटिकुट्टनैः ॥ ४ ॥
अयमेत्य तडागनीडजैर्लघु पर्य्यव्रियताथ शङ्कितैः ।
उदडीयत वैकृतात् करग्रहजादस्य विकस्वरस्वरैः ॥ ५ ॥

किञ्च करयन्त्रणेन नृपकरपीड़नेन दन्तुरे निम्नोन्नतमध्यप्रदेशे पक्षती पक्षमूले स्त्रीपक्षतिः पक्षमूलमित्यमरः, चञ्चुपुटेन त्रोटि सम्पुटेन व्यलिखत् विलेखनेन ऋजूचकारेत्यर्थः एतदादेः श्लोकचतुष्टयेषु स्वभावोक्तिरलङ्कारः ॥ २ ॥

अयमिति । अयं हंसः स्खलनक्षणएव मोचनानन्तरमेवेत्यर्थः एकतमेनाङ्घ्रिणा पक्षतेः पक्षमूलस्याधिमध्यं मध्ये ऊर्द्ध्वगामिनी जङ्घा यस्मिन् कर्मणि तद्यथातथा कण्डूयनेन तत्तथा द्रुतं कण्डूयितमौलिः सत्वरङ्कर्षित चूड़ः सन् आलयं निजावासं शिश्रिये प्राप्तवान् ॥ ३ ॥

स इति । पण्डितः निपुणः स हंसः गरुतः पक्षा एव वनदुर्गं तत्र दुर्ग्रहान् गृहीतुमशक्यान् कटु तीक्ष्णन्दशतः दन्तैस्तुदतः क्वचित् कुत्रचिदेव सतः वर्त्तमानान् कीटान् क्षुद्रजन्तून् पटुचञ्चूपुटस्य समर्थं त्रोटेः कोट्योः अग्रेण कुट्टनैः घट्टनैस्तनुरल्पा कण्डूर्यस्मिन् तनु कण्डु यथा तथा गो स्त्रियो रुपसर्ज्जनस्येति ह्रस्वः नुनुदे निवारितवान् स्वरितञित इत्यात्मने पदम् ॥ ४ ॥

अयमिति । अयं हंसस्तड़ागनीड़जैः सरः पक्षिभिस्तत्रत्य हंसैः नीडोद्भवा गरुत्मन्त इत्यमरः । लघु क्षिप्रमेत्यागत्य पर्य्यव्रियत परिवृतः वृणोतेः कर्म्मणि लङ् अथ परिवेष्टनानन्तरमस्य हंसस्य करग्रहजान्नल करपीड़नजन्याद्विकृतादेव वैकृताद्विलुण्ठित पक्षत्व रूपाद्विकार दर्शनादित्यर्थः स्वार्थेऽण् प्रत्ययः, शङ्कितैश्चकितैः अतएव विकस्वर स्वरैरुच्चैर्घोषैस्तैरुदडीयतोड्डीनं डीङोभावे लङ् ॥ ५ ॥

दधती बहुशैवललक्ष्मतां धृतरुद्राक्षमधुव्रतं खगः ।
स नलस्य ययौ करं पुनः सरसः कोकनदभ्रमादिव ॥ ६ ॥
पतगश्चिरकाललालनादतिविस्रम्भमवापितो नु सः ।
अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः ॥ ७ ॥
नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु ।
अवलम्बितकर्णशष्कुली कलसीकं रचयन्नवोचत ॥ ८ ॥

दधत इति । अथ स खगो हंसः बहुशैवला भूरिशैवला क्ष्माभूर्यस्य तद्बहुशैवलक्ष्मं तस्य भावः तत्ता तां दधतो दधानात् सरसः पल्वलात् बहूनि शैव लक्ष्माणि शिवभक्तचिह्नानि यस्य स बहुशैवलक्ष्मी तस्य भावः तत्ता तां दधतो दधानस्य नलस्य रुद्राक्षाणि मधुव्रता इवेत्युपमित समासः ते धृता येन तत्करं कोकनदभ्रमाद्रक्तोत्पल भ्रान्तेरिव पुनर्ययौ कोकनदन्तु रुद्राक्षसदृश मधुव्रतं खलु अत्र बहुशैवलेत्यादौ शब्दश्लेषस्तदनुप्राणिता रुद्राक्ष मधुव्रतमित्युपमा नतापेक्षाचेयं कोकनद भ्रमादिवेत्युत्प्रेक्षेति सङ्करः ॥ ६ ॥

अथास्य स्वयमागमनादुत्प्रेक्षते पतग इति । पतगो हंसश्चिरकाल लालनादुपलालनादति विस्रम्भं अति विश्वासं समौ विस्रम्भ विश्वासावित्यमरः । अवापितः प्रापितो नु किमित्युत्प्रेक्षा अन्यथा कथं पुनः स्वयमागच्छेदिति भावः । किञ्च एतस्य महीभुजो भुजम्भजन् स्वयमाप्नुवन् अतुलं कुतूहलं विदधे कौतुकञ्चकारेत्यर्थः अत्रोत्प्रेक्षावृत्त्यनुप्रासयोः शब्दार्थालङ्कारयोस्तिलतण्डुलवत् संसृष्टिः एक द्वित्र्यादि वर्णानां पुनरुक्ति र्भवेद्यदि । सङ्ख्या नियमसुल्लङ्घ्य वृत्त्यनुप्रास ईरित इति ॥ ७ ॥

नृपमानस इति । इष्टमानसः प्रियमानसः स राजहंसः कुतुकं हर्षस्तदेव अमृतं सुधा तस्योर्मिषु निमज्जदन्तर्गतं नृपमानसं नलमनः कर्णौ शष्कुल्या विव कर्णशष्कुल्यौ ते कलस्यौ ते अवलम्बिते अवधी कृते धृते च येन तत्तथोक्तं नद्यृतश्चेति कप्, रचयन् कुर्वन्नवोचत उक्तवान् जले मज्ज-

मृगया न विगीयते नृपैरपि धर्मागममर्मपारगैः ।
स्मरसुन्दर ! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः ॥ ९ ॥
अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणार्दिनो मृगान् मृगयाघाय न भूभृतां घ्नताम् ॥१०॥
यदवादिषमप्रियन्तव प्रियमाधाय जुगुप्सुरस्मि तत् ।
कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥ ११ ॥

न्पि तरणार्थं कलसमवलम्बते तद्वत्क[illegible] कलसावित्युपमा रूपकयोः संसृष्टिः ॥ ८ ॥

मृगयेति । धर्मागम मर्म्मपारगैः धर्म्मशास्त्रतत्व पारदर्शिभिरपि अन्तात्यन्ताध्वरदूरपार सर्व्वानन्तेषु ड इति गमेर्ड प्रत्ययः । नृपैर्मृगया आखेटो नावगीयते न गर्ह्यते तथापि हे स्मरसुन्दर ! मामत्यज इति यत् स त्यागस्तव दयोदयेनोज्ज्वलो विमलो निरुपाधिक इति यावत् धर्म्मः सुकृतं न केवलमाकारा देव सुन्दरोऽसि किन्तु धर्मतोऽपीति भावः ॥ ९ ॥

नतु प्राणिहिंसा कथं नावगीयते तत आह अबलेति । अबल स्वकुलाशिनो झषा दुर्व्वल स्वकुलघातिनो मत्स्या इति प्रसिद्धिः निजनीड़द्रुमपीड़िनो विखोच्चफल भक्षणादिना स्वाश्रयवृक्षपीड़ाकरान् खगान् अनवद्य तृणार्द्दिनः अनपराधि तृणहिंसकान् मृगान् अन्तः संज्ञा भवन्त्येते सुख दुःख समन्विता इति मनु स्मृत्या तरु तृणादीनामपि प्राणित्वात्तद्धिंसा पीड़ैवेति भावः, सर्व्वत्रापि ताच्छील्ये णिनिप्रत्ययः घ्नतां हिंसतां भूभृतां मृगया अघाय पापाय न भवति तद्वधस्य दण्डरूपत्वात् प्रत्युताकरणे दोष इति भावः ॥ १० ॥

तथापि किमर्थं पुनरागतन्त्वयेत्यत आह यदिति, तव यदप्रियमवादिषमवोचम् । प्रियमाधाय प्रियं कृत्वा तदप्रियन्तरोः कृतं स्वकृतमातपसन्तापम् अमृतमुदकमभिवृष्य पयः कीलालममृतमित्यमरः । अंशुमा-

उपनम्नमयाचितं हितं परिहर्त्तुं न तवापि साम्प्रतम् ।
करकल्पजनान्तराद्विधेः शुचितः प्रापि स हि प्रतिग्रहः ॥ १२ ॥
पतगेन मया जगत्पते रुपकृत्यै तव किं प्रभूयते ।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्त्तुमर्त्तयः ॥ १३ ॥
अचिरादुपकर्त्तुराचरेदथवात्मौपयिकीमुपक्रियाम् ।

निव नुनुत्सुर्नोदितुम् प्रमार्ष्टुमिच्छुः नुदप्रेरणे इत्यस्माद्धातोः सन्नन्तादुप्रत्ययः ॥ ११ ॥

तर्हि भवन्मोचनं सुकृतमेव मम पर्य्याप्तम् किं इष्टोपकारणेति न वाच्यमित्याह । उपनम्नमिति अयाचितमप्रार्थितमुपनम्नं उपनतं हितम् इष्टं चामुत्र चोपकारकं तवापि परिहर्त्तुं न साम्प्रतं न युक्तम् अयाचितं ग्राह्यमपि दुष्कृतकर्म्मण इति स्मरणादिति भावः तदपि मादृशात् कथं पृथग्जनात् ग्राह्यमत आह करेति हि यस्मात्कारणात् स प्रतिग्रहः करकल्पङ्करस्थानीयमित्यर्थः ईषदसमाप्तौ कल्पप्रत्ययः यज्जनान्तरं स्वयं यस्य तस्माच्छुचेः शुद्धाद्विधेः ब्रह्मणः प्रापि प्राप्तः न तु मत्त इति भावः आप्नोतेः कर्म्मणि लुङ् विधिरेव ते दाता अहं तस्योपकरणमात्रम् अतो न याच्ञा लाघवन्तवेति भावः ॥ १२ ॥

ननु सार्वभौमस्य मे तिरश्चा त्वया किमुपकरिष्यते तत्राह पतगेनेति । पतगेन पक्षिमात्रेण मया जगत्पतेः सार्वभौमस्य तवोपकृत्यै उपकाराय प्रभूयते शक्यते किं न भूयत एवेत्यर्थः भावे लट् इति वेद्मि अक्षमत्वं जानामि तदपि तथाप्यर्त्तयः यास्तु त्वया विनिवर्त्तिता इति भावः मां प्रत्युपकर्त्तुं न त्यजन्ति प्रत्युपकरणाय प्रेरयन्तीत्यर्थः अत पतगोऽप्यहं महोपकारिणस्ते महोपकारं करवाणीति भावः ॥ १३ ॥

अथ वा यथाशक्ति पक्षोऽस्त्वित्याह अचिरादिति । अथवा उपकर्त्तुरचिरादविलम्बादुपाय एवौपयिकः विनयादित्वात् स्वार्थे ठक् उपधाया ह्रस्वत्वञ्चेति ह्रस्वः तत आगता औपयिकी तामात्मौपयिकीं स्वोपाय साध्यामित्यर्थः तत आगत इत्यण् प्रत्यये टिड्ढाणञित्वादिना ङीप् उप-

पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः ॥ १४ ॥
भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम् ।
खगवागियमित्यतोऽपि किं न मुदन्धास्यति कीरगीरिव ॥ १५ ॥
स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥ १६ ॥

क्रियामाचरेत् प्रत्युपकारं कुर्यात् चरधातोर्विधि लिङ् इत्यमेवं सति सोपक्रिया पृथुरधिकास्तु अथ अथवा अणुरल्पास्तु विदुषां विवेकिनामिहास्मिन् विषये विशेषे ग्रह आग्रहो न गुणग्राहिणो विवेकिनः कृतज्ञतामेव अस्य पश्यन्ति न दोषमन्विष्यन्तीत्यर्थः ॥ १४ ॥

अथ स्ववाक्ये आदरं याचते भवितेति । हे नृप ! इदं वक्ष्यमाणं मदीरितं मद्वचः न विचारे विमर्शे चारु युक्तं न भविता न भविष्यति चेत्तदपि अविचारित रमणीयमपि श्रव्यम् श्रोतव्यम् इयं खगवागित्यतोऽपि हेतोः कीरगोः शुकवागिव मुदं न दास्यत्येव प्रयोजनान्तराभावेऽपि कौतुकादपि श्रोतव्यमित्यर्थः ददातेः लृट् ॥ १५ ॥

अथ यद्वक्तव्यं तदाह स इति अर्थेन अभिधेयेन सह वर्त्तत इति सार्थकम् तेन सहेति तुल्ययोग इति बहुव्रीहिः वोपसर्ज्जनस्येति सहशब्दस्य विकल्पात् सभावः शेषाद्विभाषेति कप् समासान्तः ततश्च्विरभूततद्भावे अरिसार्थेषु शत्रुसङ्घेषु सार्थकीकृतं नाम भीम इत्याख्या येन स तथोक्तः स प्रसिद्धः बिभ्यत्यस्मादिति भीमः भियोम इत्यपादानार्थे निपातनान्मप्रत्यय औणादिकः भीम इति भूपतिः नृपः जयति किल सर्व्वोत्कर्षेण वर्त्तते खलु विदर्भभूर्विदर्भदेशः यं भूपतिं प्रभुं भर्त्तारमवाप्य शक्रो भर्त्ता यस्यास्तां शक्रभर्तृकां नद्यृतश्चेतिकपि द्यान्दिवमपि हसति किमुतान्यभर्तृकदेशामित्यर्थः स्त्रियो हि भर्त्तुरुत्कर्षाद्धासङ्कुर्व्वन्तीति भावः अत्र विदर्भभुवोऽपि द्युहासासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ १६ ॥

दमनाद्दमनाक् प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात् ।
वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम् ॥ १७ ॥
भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ ॥ १८ ॥
श्रियमेव परं धराधिपाद्गुणसिन्धोरुदितामवेहि ताम् ।

दमनादिति । स भीमभूपतिरमनागल्पं प्रसेदुषो निजोपासनया प्रसन्नात् भाषायां सदवसश्रुव इति सदेर्लिटः क्वस्वादेशः दमनाद्दमनाख्यात् तथ्यगिरः अमोघवचनात् तपोधनादृषेः दिष्टानां कालानां विष्टपानां लोकानाञ्च त्रितययोरनन्यसदृशीं गुणोदयां कालत्रये लोकत्रये चानन्यसाधारणगुणप्रकर्षां तनयां दुहितरं वरमाप वरत्वेन लब्धवानित्यर्थः देवादृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिय इत्यमरः ॥ १७ ॥

अथास्या नामधेयं व्युत्पादयन्नेवाह भुवनत्रयेति, असौ वरप्रसादलब्धा तनया कर्त्री तनुश्रिया निजशरीरसौन्दर्य्येण करणेन भुवनत्रयसुभ्रुवां त्रैलोक्यसुन्दरीणां कमनीयतामदं सौन्दर्य्यगर्वं दमयन्ती अस्तं गमयन्ती दमेर्ण्यन्तान्न पाठमित्यादिना कर्त्रभिप्राय आत्मनेपदापवादः परस्मैपदप्रतिषेधेऽप्य कर्त्रभिप्राय विवक्षायां परस्मैपदे लटः शत्रादेशः उदियाय उदिता इणो लिट् ततस्तस्मादेव निमित्ताद्दमयन्तीत्यभिधामाख्यां दधे दधातेर्लिट् ॥ १८ ॥

अथैकविंशतिश्लोकैश्चिकुरादारभ्य दमयन्तीं वर्णयति श्रियमिति । हे नृप! तां दमयन्तीं गुणसिन्धोः गुणसागराद्धराधिपाद्भीमनरेन्द्रादुदितामुत्पन्नां श्रियं साक्षाल्लक्ष्मीमेव परं ध्रुवमवेहि जानीहि अवपूर्व्वादिणो लोटि सेर्हिरिति ह्यादेशे ङित्वाच्च सार्वधातुक गुणः संहितायामाद्गुणः अत्र केवलावपूर्व्वस्य इणो ज्ञानार्थत्वादाङि प्रश्लेषे तदलाभात्प्रश्लेषेऽप्योमाङोश्चेति पररूपमिति केषाञ्चित्प्रक्रियोपन्यासो वृथा प्रक्षाल्य त्यागः अवैहीति वृद्धिरवद्येति नाम सूत्रमप्यनाङ् प्रश्लेष एव भ्रान्ति प्राप्तवृद्धि

व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः ॥१९॥
चिकुरप्रकरा जयन्ति ते विदुषी मूर्द्धनि सा विभर्त्ति यान् ।
पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥ २० ॥
स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः ।
जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् ॥ २१ ॥

प्रतिषेधपरं गुण एव युक्तिः इति व्याख्यानादन्यथा ओमाङोश्चेति पररूपमेव युक्तमित्युच्यत इति न च देशव्यवधानान्न श्रीरेवेति वाच्यमित्याह व्यवधौ व्यवधाने सत्यपि उपसर्गेऽघोः किरिति किप्रत्ययः मृगचूडानिलयां हरशिखाश्रयां कलां विधोरिन्दोरेव कलां को वा न वेद सर्वोऽपि वेदैवेत्यर्थः विदोलटो वेति वैकल्पिकोनलादेशः यथा हरशिरोगतापि कला चन्द्रकलेव. तथा भीम भवनोदिताप्येषा श्रीरेवेति सौन्दर्यातिशयोक्तिः, अत्र श्रीकलयोः भूपमृडौ वाक्यद्वये विम्ब प्रतिविम्बभावेन सामान्यधर्म्मवत्तया निर्द्दिष्टाविति दृष्टान्तालङ्कारः यत्र वाक्यद्वये विम्ब प्रतिविम्बतयोच्यते, सामान्यधर्म्मः काव्यज्ञैः स दृष्टान्तो निगद्यत इति लक्षणात् ॥ १९ ॥

चिकुरप्रकरा इतीति। चिकुरप्रकराः केशसमूहाः जयन्ति सर्व्वोत्कर्षेण वर्त्तन्ते यान् वेत्तीति विदुषी विशेषज्ञा विदेःशतुर्वसुः उगितश्चेति ङीप् वसोः सम्प्रसारणं सा दमयन्ती मूर्द्धनि विभर्त्ति विद्वद्गृहीत एव सर्वस्याप्युत्कर्ष हेतुरिति भावः अतएव पशुना तिरश्चा चमरी मृगेणाप्य पुरस्कृतेना नादृतेन चामरेण चमरीपुच्छेन सह तत्तुलनान्तेषां चिकुराणां समीकरणञ्च इच्छतु न कोऽपीत्यर्थः सम्भावनायां लोट् अत्र तुलना निषेधस्यापुरस्कृतपदार्थ हेतुकत्वात् हेतोर्वाक्य पदार्थत्वे काव्य लिङ्ग मुदाहृतमिति लक्षणात् ॥ २० ॥

स्वदृशोरिति। मृगाः हरिणास्तस्या दमयन्त्या अखर्व्वयोः रायतयोर्वीक्षणयोरक्ष्णोः शोभया कर्त्र्या जितयोरतएव भयादुदयत्प्रमीलयोरुत्पद्यमाननिमीलनयोः स्वदृशोर्निज नयनयोः खुरैः शफैः शफं क्लीवे खुरः

अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि।
श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते!॥ २२॥
नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम्॥ २३॥

पुमानित्यमरः, कण्डूयनस्य कर्षणस्य कैतवाच्छलात्सान्त्वनां जनयन्ति लालनां कुर्व्वन्ति यथा लोके पर पराजिता निमीलिताक्षाः स्वजनैर्भयनिवृत्तये करतलास्फालनादिना परिसान्त्वयन्ते तद्वदिति भावः अत्र कैतवशब्देन कण्डूयनमपह्नुत्य सान्त्वनारोपादपह्नवभेदः॥ २१॥

अपीति। हे धरापते! दमो नाम भीमस्यैवात्मजस्तस्य स्वसुर्दमयन्त्याः लोकयुगं मातापितृकुलयुगं श्रुतिगामितया वेदप्रसिद्धतया सुतरां व्यतिभाते परस्परोत्कर्षेण भाति तथा दृशौ नेत्रे अपि श्रुतिगामितया कर्णान्तविश्रान्ततया व्यतिभाते परस्परोत्कर्षेण भातः तथा श्रुताः श्रुतिप्रसिद्धाः ते च ते दृष्टाः लोकप्रसिद्धाश्च विशेषणयोरपि विशेषणविशेष्यभावविवक्षायां विशेषणसमासः ते रमणीगुणाः स्त्रीधर्म्मा अपि श्रुतिगामितया जनैः श्रूयमाणतया श्रुतिः श्रोत्रे तथाम्नाये वार्त्तायां श्रोत्रकर्म्मणीति विश्वः। सुतरां व्यतिभाते व्यतिहारेण भान्ति आत्मने पदेष्वनत इति झस्यादादेशः सर्व्वत्र कर्त्तरि कर्त्तृव्यतिहार इत्यात्मनेपदम् अदादित्वाच्छपो लुक् सर्व्वत्र टेरेत्वम् अत्र लोकयुगादीनान्त्रयाणामपि प्रकृतत्वात् केवलप्रकृतिविषयतुल्ययोगिताभेदः प्रस्तुता प्रस्तुतानाञ्च केवलं तुल्यधर्म्मतः। औपम्यं गम्यते यत्र सा मता तुल्ययोगितेति लक्षणात्॥ २२॥

नलिनमिति। नलिनं पद्मं मलिनमचारु विवृण्वती कुर्व्वाणे पृषतीं मृगीमस्पृशती असमानत्वात् दूरादेव परिहार इत्यर्थः तदीक्षणे तल्लोचने अञ्जनाञ्चिते कज्जलपरिष्कृते सती खञ्जनं खञ्जरीटाख्य खञ्जननामकः पक्षिविशेषः खञ्जरीटस्तु खञ्जन इत्यमरः। तमपि रुचिगर्वदुर्विधं

अधरं खलु विम्बनामकं फलमाभ्यामिति भव्यमन्वयम् ।
लभतेऽधरविम्ब इत्यदः पदमस्या रदनच्छदे वदत् ॥ २४ ॥
हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
क्षतमध्यविलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥ २५ ॥

चारुत्वगर्वं निस्वं विदधाते कुर्वाते सर्वदाप्यनुपमेये इत्यर्थः निस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि स इत्यमरः। ईक्षणयो र्नलिनादिमलिनीकरणाद्य सम्बन्धे सम्बन्धोक्तेरतिशयोक्तिः तया चा समा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ २३ ॥

अधरमिति। अधरं विम्बमित्यदः पदम् अधरं विम्बमिवेत्युपमित समासाश्रयणेन स्त्रीणामधरेषु यत्पदं प्रयुज्यते तदित्यर्थः अस्याः दमयन्त्याः रदनच्छदम् ओष्ठमभिदधत् तदभिधानाय प्रयुक्तं सदित्यर्थः विम्बनामकं फलं विम्बमस्माद्दमयन्तीरदनच्छदादधरं किलापकृष्टं खल्विति अधरशब्दस्यापकृष्टार्थत्वे अधरं विम्बं यस्मात्तदिति बहुव्रीहिसमासे च सति भव्यमबाधितमन्वयं वृत्तिपदार्थसंसर्गलक्षणं लभते अन्यथा समर्थ समासाश्रयणे समर्थः पदविधिरिति ससमर्थ परिभाषा भज्येत तर्हि नोपमा स्यादिति भावः अत्र दमयन्तीदन्तच्छदस्य विम्बाधरीकरणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः पूर्ववत् ध्वनिश्च ॥ २४ ॥

हृतसारमिति। इन्दुमण्डलं दमयन्तीवदनाय तन्निर्माणायेत्यर्थः क्रियार्थोपपदस्येति चतुर्थी वेधसा हृतसारमुद्धृतमध्याङ्गमिव कृतः क्षतमध्यविल विहितमध्यरन्ध्रमतएव धृतो गम्भीरखनीखस्य निम्न मध्यरन्ध्राकाशस्य नीलिमा नैल्यन्तया विलोक्यते खनिः स्त्रियामाकरः स्यादित्यमरः कृदिकारादक्तिनो वा ङीप् वक्तव्य इति ङीप् अत्र कलङ्कापह्नवेन खनीलिमारोपादपह्नवभेदः स च क्षतमध्यविलमित्येतत्पदार्थहेतुकं काव्यलिङ्गानुप्राणितः तदपेक्षा चेयं हृत सारमित्युत्प्रेक्षेति सङ्करः तया चोपमा व्यज्यत इति पूर्ववत् ध्वनिः ॥२५॥

धृतलाञ्छनगोमयाञ्चलं विधुमालेपनपाण्डुरं विधिः।
भ्रमयत्युचितं विदर्भजाननीराजनवर्द्धमानकम् ॥ २६ ॥
सुषुमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात्।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ॥ २७॥
धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ।
नलिकेन तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः ॥ २८ ॥

धृतेति। विधिर्ब्रह्मा धृतं लाञ्छनमङ्क एव गोमयाञ्चल मध्यस्थित गोमय संश्लेषणम् एनम् आलेपन पाण्डुरं निजकान्ति सुधाधवलितमित्यर्थः विधुं चन्द्रमेव विदर्भजाननस्य वैदर्भीमुखस्य नीराजन वर्द्धमानकं नीराजन शरावम् शरावो वर्द्धमानक इत्यमरः। किरण दीपकलिकायुक्तमिति भावः भ्रमयत्युचितं लोकोत्तरत्वात् इति भावः एवं नीराजयन्तीति देशाचारः अत्र विधुतल्लाञ्छनादेर्नीराजन शराव गोमयादित्वेन रूपणात्सावयव रूपम्॥ २६॥

सुषमेति। सुषमा परमा शोभा सैव विषयः यस्मिन् परीक्षणे जलदिव्य शोधने कृते निखिलं पद्मं पद्मजातं तन्मुखादपादानात् भङ्गावधित्वादभाजि अभञ्जि स्वयमेव भग्नमभूदित्यर्थः स्फुटं कर्त्तरि लुङ् भञ्जेश्च चिणीति वैभाषिको नकारलोपः अतएवाधुनापि भङ्गलक्षणम्पराजयचिह्नं सलिलादुन्मज्जनं क्षणमपि नोह्यति न जहाति जलदिव्योन्मज्जनस्य पराजयलिङ्गत्व स्मरणादिति भावः उन्मज्जनक्रियानिमित्तेयं भङ्गोत्प्रेक्षा ॥ २७ ॥

धनुषी इति। तद्भ्रुवौ विश्वजयायोदिते उत्पन्ने रतिपञ्चबाणयोर्धनुषी नूनमित्यादि व्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा, किञ्च तस्याः दमयन्त्याः उच्चनासिके उन्नत नासापुटे त्वयि नालिकानान्द्रोणिचापशराणां विमुक्तिं कामयेते इति तथोक्तयोः तयोः शिलिकामिभिक्षाचरेभ्योऽण् इति अण् प्रत्ययः नालिकं पद्मखण्डे स्त्री नालिकः शरशल्ययोरिति विश्वः नलिकेन द्रोणि चापेन किमिति काकुः पूर्ववदुत्प्रेक्षा॥ २८ ॥

सदृशी तव शूर ! सा परं जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः ॥ २९ ॥
वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी ।
विधिनापि न रोमरेखया कृतसीम्नि प्रविभज्य रज्यतः ॥ ३० ॥
अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् ।

सदृशीति। हे शूर ! जलदुर्गस्थानि मृणालानि जयत इति तज्जितौ भुजौ यस्याः सा मित्रजुषामर्कसेविनां सुहृत्सलिलानाञ्च सहायसम्पन्नानामपीत्यर्थः मित्रं सुहृदि मित्रोऽर्के इति विश्वः। सरोरुहं श्रियः शोभा सम्पदश्च न लोकेत्यादिना षष्ठी प्रतिषेधः करलीलया भुजविलासेन भुजव्यापारेण बलिग्रहणेन च बलिहस्तांशवः कराः लीलाविलासक्रिययोरिति चामरः, गृहयालुः गृहिता गृहयगृहण इति धातोश्चौरादिकात् स्पृहि गृहीत्यादिना आलुच् प्रत्ययः अयामन्तेत्यादिनाणेरयादेशः सा दमयन्ती तव परमत्यन्तं सदृशी अनुरूपेत्युपमालङ्कारः शूरस्य शूरैव भार्या भवितुमर्हतीति भावः ॥ २९ ॥

वयसी इति। सुदृशि दमयन्त्यां स्वाभिविधिं स्वव्याप्तिं विधित्सुनी विधातुमिच्छती अहमिकया स्वयमेवाक्रमितुमिच्छती इत्यर्थः शिशुतातदुत्तरे बाल्ययौवने वयसी विधिना सीमाभिज्ञेन रोमरेखया सीमाचिह्नेन प्रविभज्य रोमराजेः प्रागेव अत्र शैशवेन स्थातव्यन्ततःपरं यौवनेनेति कालतो विभागं कृत्वा कृतसीम्नि कृतमर्यादे अपि विभाषा ङिश्योरित्यल्लोपः न रज्यतः न सन्तुष्यतः रम्यवस्तु दुस्त्यजमिति भावः एतेन वयःसन्धिरुक्तः अत्र प्रस्तुतवयो विशेषसाम्याद प्रस्तुत विवादप्रतीतेः समासोक्तिरलङ्कारः ॥ ३० ॥

सम्प्रति यौवनमेवाप्तमित्याह। अपीति कान्तिझरैर्लावण्यप्रवाहैरगाधतां दुरवगाहतां गमिते तद्वपुषि दमयन्तीशरीरे प्रसर्पतोस्सरतोः करयौवनयोर्द्वयोरपि उभौ कुचौ प्लवस्योन्मज्जनस्य कुम्भौ प्लवनार्थं कुम्भा-

स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥ ३१ ॥
कलशे निजहेतुदण्डजः किमु चक्रभ्रमिकारिता गुणः।
स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रमिमातनोति यत् ॥ ३२ ॥
भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः।

वित्यर्थः प्रकृति विकारभावादश्वघासादिवत्तादर्थ्ये षष्टी समासः लोके तरद्भिः अनिमज्जनाय कुम्भादिकमवलम्ब्यत इति प्रसिद्धम् भवतः खलु, अत्र कुचयोः स्मरयौवन प्लवन कुम्भत्वोत्प्रेक्षया तयोरौत्कट्यं कुचयोस्सातिवृद्धिर्व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ३१ ॥

कलश इति। निज हेतुदण्डजः स्वनिमित्तकारणजन्यः चक्रभ्रमकारिता कुलालभाण्ड भ्रमणजनकत्वं सैव गुणो धर्म्मो रूपादिस्व गुणः प्रधाने रूपादावित्यमरः। सः कलशे किमु दण्डकार्य्ये कलशे संक्रान्तः किमु इत्यर्थः, कुतः यद्यस्मात् स कलशः तस्या दमयन्त्याः उच्च कुचौ भवन् तत् कुचात्मना परिणतः सन् प्रभाझरे लावण्यप्रवाहे चक्रभ्रमं चक्र वाक भ्रान्तिं कुलालदण्डभ्रमणं चातनोति चक्रोगणे चक्रवाके चक्रं सैन्यरथाङ्गयोः,, ग्रामजाले कुलालस्य भाण्डे राष्ट्रास्त्रयोरपि इत्युभयत्रापि विश्वः। अत्र समवायि कारणगुणा रूपादयः कार्य्ये संक्रामन्ति न निमित्तगुणा इति तार्किकाणां समये स्थिते गुण इति चक्रभ्रम इति चोभयत्रापि वाच्य प्रतीयमानयोरभेदाध्यवसाय एव स तदुच्चकुचौ भवन्तीति कुच कलशभ्रमयोरभेदातिशयोक्त्युत्थापितझर चक्रभ्रमात्मकक्रिया निमित्ता कुचात्मनि कलशे
! कार्य्ये चक्रभ्रमकारितालक्षण निमित्त कारणगुणसंक्रमलक्षणेनोत्प्रेक्षेति सङ्क्षेपः तार्किकसमये विरोधात् विरोधाभासोऽलङ्कार इति कैश्चिदुक्तम् तदेतदत्यन्ताश्रुतचरमलङ्कारपारदृश्वानः प्रष्टव्यन्तु ॥ ३२ ॥

भजत इति। दमस्वसुर्दमयन्त्याश्चिकुरैर्निर्म्मित बर्ह गर्हणः कृतपिच्छनिन्दः जितबर्ह इत्यर्थः शिखी मयूरः षण्मुखं कार्त्तिकेयं भजते खलु तथा कुचशोभया जितकुम्भ इभराडैरावतोऽपि जम्भरिपुमिन्द्रं भजते पर

अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥ ३३ ॥
उदरं नतमध्यपृष्ठता स्फुरदङ्गुष्ठपदेन मुष्टिना ।
चतुरङ्गुलिमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ॥ ३४ ॥
उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु ।
धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥ ३५ ॥

परिभूताः प्रायत्राणाय प्रबलमाश्रयन्त इति प्रसिद्धम् अत्र शक्रैरावतयोः यथासंख्य जम्भारिभजनस्य जितवर्हत्वजित कुम्भत्व पदार्थहेतुकत्वात् तद्धेतुके काव्यलिङ्गे तदसम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिश्च ॥ ३३ ॥

उदरमिति। दमस्वसुरुदरं नतमध्यं निम्नमध्यप्रदेशं पृष्ठं यस्योदरस्य तस्य भावस्तत्ता तया स्फुरत् दृढ़ग्रहणं पृष्ठफलके स्फुटीभवदङ्गुष्ठपदमङ्गुष्ठन्यासस्थानं यस्य तेन मुष्टिना करणेन चतसृणामङ्गुलीनां समाहारश्चतुरङ्गुलि तद्धितेत्यादिना समाहारे द्विगुरेकवचननपुंसकत्वे तस्य मध्येभ्योऽन्तरालेभ्यो निर्गतं यत्त्रिवलि पूर्ववत् समासादिः कार्यः यत्तूक्तं वामनेन त्रिवलिशब्दः संज्ञा चेदिति सूत्रेण सप्तर्षय इत्यादिवद्दिक्संख्ये संज्ञायामिति संज्ञायां द्विगुरिति तदपि चेत्करणसामर्थ्यात्त्रिवलय इति बहुवचनप्रयोगदर्शने स्थितं गतिमात्रं न सार्वत्रिकमिति प्रदीपः तेन भ्राजत इति तद्भ्राजि वलित्रयशोभि कृतमित्युत्प्रेक्षा कौतुकिनेति शेषः मुष्टिग्राह्यमध्येयमित्यर्थः मुष्टिग्रहणादङ्गुष्ठनोदनात्पृष्ठमध्ये नम्रता उदरे च चतुरङ्गुलिनोदनाद्वलित्रयाविर्भावश्चेत्युत्प्रेक्ष्यते ॥ ३४ ॥

उदरमिति। कोऽपि कुतुकी दमस्वसुरुदरं मुष्टिना परिमाति किमु परिच्छिनत्ति किमित्युत्प्रेक्षा. कुतः यद् यस्मात् सहेमकान्तिभिर्वलिभिर्हैमकाञ्च्या सह चतसृभिस्त्रिवलिभिरित्यर्थः एतस्याः कनकसावर्ण्यं सूचितं धृतं तस्य मातुश्चतुरङ्गुली अङ्गुलीचतुष्टयं येन तदिव भातीत्युत्प्रेक्षा अनयोरुत्प्रेक्षयोर्हेतुहेतुमद्भूतयो रङ्गाङ्गिभावेन सजातीयः सङ्करः

पृथुवर्त्तुलतन्नितम्बकृ-
न्मिहिरस्यन्दनशिल्पशिक्षया ।
विधिरेककचक्रचारिणं
किमु निर्म्मित्सति मान्मथं रथम् ॥ २६ ॥

तरुमूरुयुगेण सुन्दरी
किमु रम्भां परिणाहिना परं ।
तरुणीमपि जिष्णुरेव तां
धनदापत्यतपःफलस्तनीम् ॥ २७ ॥

पूर्वश्लोके वलीनां तिसृणां चतुरङ्गुलिमध्यनिर्गतत्वमुत्प्रेक्षितम् । इह तु तासामेव काञ्चीसहितानां चतुरङ्गुलित्वमुत्प्रेक्षत इति भेदः प्रेक्षितुरितिभावः ॥ २५ ॥

पृथ्विति । पृथुवर्त्तुलं च तस्याः नितम्बं करोतीति नितम्बकृन्नितम्बं कृतवान्विधिः ब्रह्मा मिहिरस्यन्दनशिल्पशिक्षया रविरथनिर्म्माणाभ्यासपाटवेन एककं एकाकि एकादाकिनिच्चासहाय इति चकारात् कप्रत्ययः । तेन चक्रेण चरतीति तच्चारिणं मान्मथं रथं निर्मित्सति किमु ? सूर्य्यस्येव मन्मथस्यापि एकचक्रं रथं निर्मातुमिच्छति किमु इत्युत्प्रेक्षा अन्यथा किमर्थमिदं नितम्बनिर्म्माणमिति भावः मातेः सन्नन्ताल्लट् । सनि मिमे-त्यादिना इसादेशः सस्यार्द्धधातुके इति सकारस्य तकारः । अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः ॥ २६ ॥

तरुमिति । सुन्दरी दमस्वसा परिणाहिना विपुलेन ऊरुयुगेन रम्भां रम्भां नाम तरुं परन्त्विमेव न लोकेत्यादिना षष्ठीप्रतिषेधः । जिष्णुः किमु किन्तु धनदापत्यस्य नलकूबरस्य तपसः फलस्तनीं फलभूतकुचां तां रम्भानाम तरुणीमपि जिष्णुरेव । रम्भा कदल्यप्सरसोरिति विश्वः । रम्भे इव रम्भाया इव चोरू यस्याः स इत्युभयथा रम्भोरुरित्यर्थः ॥ २७ ॥

जलजे रविसेवयेव ये
पदमेतत्पदतामवापतुः ।
ध्रुवमेत्य रुतःसहंसकौ
कुरुतस्ते विधिपत्नदम्पती ॥ ३८ ॥

श्रितपुण्यसरःसरित्कथं
न समाधिक्षपिताखिलक्षयं ।
जलजं गतिमेतु मञ्जुलां
दमयन्तीपदनाम्नि जन्मनि ॥ ३९ ॥

सरसीः परिशीलितुं मया
गमिकर्मीकृतनैकनीवृता ।

जलजे इति ये जलजे द्विपद्मे रविसेवया सूर्योपासनयेव एतस्याः पदतां चरणत्वमेव पदं प्रतिष्ठामवापतुः ते जलजे कर्मभूते विधिपत्नदम्पती द्वन्द्वचारिणौ ब्रह्मवाहन हंसौ एत्यागत्य रुतः रवात्कूजनादित्यर्थः । रौतेःसम्पदादित्वात् क्विपि तुगागमः । सहंसकौ सकटकौ सहंसकौ च कुरुतः अभूत तद्भावे च्विः । हंसकः पादकटक इत्यमरः । हंसपक्षे वैभाषिकः कप्रत्ययः । ध्रुवमित्युत्प्रेक्षायां पद्महंसयो रविनाभावात् कयोश्चिद् व्यग्रयोस्तत्पदत्वमुत्प्रेक्ष्य दिव्यहंसयोरेव हंसकत्वञ्चोत्प्रेक्ष्यते ॥ ३८ ॥

श्रितेति । श्रिताःसेविताः पुण्याःसरःसरितः मानसादीनि सरांसि गङ्गाद्याःसरितश्च ये तत्समाधिना ध्यानेन निमीलनेन क्षपिताखिलक्षयं मञ्जुलाङ्गतिं रम्यगतिं उत्तमदशाञ्च । गतिर्मार्गे दशायां चेति विश्वः । कथं नैतु एत्वेवेत्यर्थः । पदस्य गतिसाधनत्वात्तत्रापि दमयन्ती सम्बन्धाच्चोभयगतिलाभः । तथापि जन्मान्तरेऽपि सर्वथा तपः फलितमिति भावः सम्भावनायां लोट् ॥ ३९ ॥

अथ कथं त्वमेनां वेत्सीत्यत आह । सरसीरिति ॥ सरसीःसरांसि परिशीलितुं परिचेतुं तत्र विहर्तुमित्यर्थः । चुरादिणेरनित्यत्वादत्र

अतिथित्वमनायि सा दृशोः
सदसत्संशयगोचरोदरी ॥ ४० ॥
अवधृत्य दिवोऽपि यौवतै-
र्न सहाधीतवतीमिमामहं ।
कतमस्तु विधातुराशये
पतिरस्या वसतीत्यचिन्तयम् ॥ ४१ ॥
अनुरूपमिमं निरूपय-
न्नथ सर्व्वेष्वपि पूर्व्वपक्षतां ।

न्तप्रयोगः । गमिर्गमनं शब्दपरशब्देनार्थो गम्यते तस्य कर्मी कृताः कर्मकारकीकृताः नैके अनेके नञर्थस्य नशब्दस्य सुप्सुपेति समासः । नितरां वर्त्तन्ते जना येष्विति नीवृतः जनपदाः येन तेन क्रान्तानेकदेशेनेत्यर्थः । नहि वृतीत्यादिना दीर्घः । मया सदसद्वेति संशयगोचरः सन्देहास्पदं उदरं यस्याः सा कृशोदरीत्यर्थः । नासिकोदरेत्यादिना ङीप् । सा दमयन्ती दृशोरतिथित्वमनायि स्वविषयतां नीता दृष्टेत्यर्थः । नयतेः कर्मणि लुङ् ॥ ४० ॥

अवधृत्येति । अहमिमां दमयन्तीं दिवः स्वर्गस्य सम्बन्धिभिर्यौवतैर्युवतिसमूहैरपि । गार्भिणं यौवतं गणे इत्यमरः । भिक्षादित्वात्समूहार्थे अण्प्रत्ययः तत्राप्यस्य युवतीति स्त्रीप्रत्ययान्तस्यैव प्रातिपदिकेन तद्ग्रहणात् तत्सामर्थ्यादेव भस्याढे तद्धिते इव पुंवद्भाव इति वृत्तिकारः न सहाधीतवतीमदृशं ततोऽप्यधिकसुन्दरीमित्यर्थः ॥ नञर्थस्य न शब्दस्य सुप्सुपेति समास इति वामनः । अवधृत्य निश्चित्य विधातुः ब्रह्मणः आशये हृदि अस्याः पतिः कतमो नु कतमो वा वसतीत्यचिन्तयम् तदेवेति शेषः ॥ ४१ ॥

अनुरूपमिति । अथेदानीं मनुरूपं योग्यन्त्वां निरूपयन् तस्याः पतित्वेनालोचनयन् सर्व्वेष्वपि युवसु पूर्व्वपक्षतां दूष्यकोटित्वं व्यपनेतुमपक्षः सन्नु त्वयि सिद्धान्तधियं न्यवेशयम् । त्वमेवास्याः पतिरिति निरचैषमि-

ध्रुवसु व्यपनेतुमक्षम
त्वयि सिद्धान्तधियं न्यवेशयम् ॥ ४२ ॥

अनया तव रूपसीमया
कृतसंस्कारविबोधनस्य मे ।
चिरमप्यवलोकिताद्य सा
स्मृतिमारूढवती शुचिस्मिता ॥ ४३ ॥

त्वयि वीर ! विराजते परं
दमयन्तीकिलकिञ्चितङ्किल ।
तरुणीस्तन एव दीप्यते
मणिहारावलिरामणीयकम् ॥ ४४ ॥

त्यर्थः । अयमेव विधातुरध्याशय इति भावः ॥४२॥

अथ त्वद्रूपदर्शनमेव सम्प्रति तत्स्मारकमित्याह । अनयेति । चिरमवलोकितापि सा शुचिस्मिता सुन्दरी कद्याधुना हस्तेन निर्दिशन्नाह अनया तवरूपसीमया सौन्दर्यकाष्ठया कृतसंस्कारविबोधनस्य उद्बुद्ध संस्कारस्य मे स्मृतिमारूढ़वती स्मृति पथङ्गता सदृशदर्शनं स्मारकमित्यर्थः॥४३॥

ततः किमत आह ॥ त्वयीत्यादि । हे वीर ! दमयन्त्याः किलकिञ्चितम् । क्रोधाश्रुहर्षभीत्यादेःसङ्करः किलकिञ्चितमित्युक्तलक्षणं ललितशृङ्गार चेष्टितं त्वयि परन्त्वय्येव विराजते किल शोभते खलु । तथाहि मणिहारावलेर्मुक्ताहार पङ्क्तेः रामणीयकं रमणीयत्वं योपधाद्गुरूपोत्तमाद्वुञ् । तरुणी स्तन एव दीप्यते नान्यत्रेत्यर्थः । स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेणेति प्रायग्रहणादेकवचन प्रयोगः । अत्र हारकिलकिञ्चितयो रुपमानोपमेय योर्वाक्यद्वये बिम्बप्रतिबिम्बतया स्तननृपयोःसमानधर्मत्वोक्तेर्दृष्टान्तालङ्कारः लक्षणन्तूक्तम् ॥ ४४ ॥

तव रूपमिदं तया विना
विफलं पुष्पमिवावकेशिनः।
इयमृद्धधना तथावनी
स्ववनी सम्भवदल्पिकापि का ॥ ४५ ॥
अनयामरकाम्यमानया
सह योगः सुलभस्तु न त्वया।
घनसंवृतयाम्बुदागमे
कुमुदेनेव निशाकरत्विषा ॥ ४६ ॥
तदहं विदधे तथा तथा
दमयन्त्याः सविधे तव स्तवम्।

तवेति। हे वीर! तवेदं रूपं सौन्दर्यं तया दमयन्त्या विना अवकेशिनो वन्ध्यवृक्षस्य वन्ध्योऽफलोऽवकेशी चेत्यमरः। पुष्पमिव विफलं निरर्थकं ऋद्धधना सम्पूर्णवित्ता इयमवनी तथा निरर्थका। सम्भवदल्पिका कूजत्कोकिला स्ववनी निजोद्यानमपि। ङीप्। का तुच्छा निरर्थकेत्यर्थः। तद्योगे तु सर्वं सफलमिति भावः। किं वितर्के परिप्रश्ने क्षेपे निन्दापराधयोरिति विश्वः। अत्र नलरूपावनीनां दमयन्त्या विना रम्यता निषेधाद्विनोक्तिरलङ्कारः। विना सम्बन्धि यत्किञ्चिदत्रान्यत्र परा भवेत्। रम्यतारम्यता वा स्यात् सा विनोक्तिरुदाहृतेति लक्षणात्। तस्याश्च पुष्पमिवेत्युपमया संसृष्टिः॥४५॥

अथान्यापेक्षां दर्शयितुं तस्याः दौर्लभ्यमाह। अनयेति अमरैरिन्द्रादिभिः काम्यमानयाभिलष्यमाणया दमयन्त्या सह योगः अम्बुदागमे घन संवृतया मेघावृतया निशाकरत्विषा सह योगः कुमुदेनेव त्वया न सुलभो दुर्लभ इत्यर्थः। अत्र तत्संयोग दौर्लभ्यस्य अमरकामनापदार्थहेतुकत्वात् काव्यलिङ्गभेदः तत्सापेक्षा चेयमुपमेति सङ्करः॥ ४६ ॥

अत्र कागतिरित्याह। तदिति। तत्तस्मात्कार्यस्य सप्रतिबन्धत्वादहं

हृदये निहितस्तया भवा-
नपि नेन्द्रेण यथापनीयते ॥ ४७ ॥
तव सम्मतिमेव केवला
मधिगन्तुं धिगिदं निवेदितं ।
ब्रुवते हि फलेन साधवो
न तु कण्ठेन निजोपयोगिताम् ॥ ४८ ॥
तदिदं विशदं वचोऽमृतं
परिपीयाभ्युदितं द्विजाधिपात् ।
अतितृप्ततया विनिर्ममे
स तदुद्गारमिव स्मितं सितम् ॥ ४९ ॥

दमयन्त्याः सविधे समीपे तथा तथा तव स्तवं स्तोत्रं विदधे विधास्य इत्यर्थः सामीप्ये वर्त्तमानप्रत्ययः । यथा तया हृदये विहितो भवानिन्द्रेणापि नापनीयते नेतुमशक्य इत्यर्थः । यथेन्द्रादिप्रलोभितापि त्वय्येव गाढ़ानुरागा स्यात्तथा करिष्यामीत्यर्थः ॥ ४७ ॥

तर्हि तथैव क्रियतां किं निवेदनेनेत्यत आह । तवेति । अत्रास्मिन् कार्य्ये केवलामेकान्तां सम्मतिमङ्गीकारमधिगन्तुमिदं निवेदितं निवेदनं धिक् । तथा हि साधवो निजोपयोगितां स्वोपकारित्वं फलेन कार्य्येण ब्रुवते बोधयन्ति किन्तु कण्ठेन वाग्वृत्त्या न ब्रुवते सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४८ ॥

तदिति । स नलो द्विजाधिपात् हंसाच्चन्द्राच्चाभ्युदितमाविर्भूतं विशदं प्रसन्नमवदातञ्च तत् पूर्व्वोक्तमिदमनुभूयमानं वच एवामृतमिति रूपकं तत्परिपीय अतएव अतितृप्ततया अति सौहित्येन तस्य वचोऽमृतस्य उद्गारमिव सितं स्मितं विनिर्ममे निर्मितवान् । माङः कर्त्तरि लिट्

परिरभ्य भुजाग्रजन्मना
पतगङ्कोकनदेन नैषधः।
मृदु तस्य मुदेऽगिरद्गिरः
प्रियवादामृतकूपकण्ठजाः॥ ५० ॥
न तुलाविषये तवाकृति
र्न वचो वर्त्मनि ते सुशीलता।

अतितृप्तस्य किञ्चिन्निःसार उद्गारः सितत्वसाम्यात् स्मितस्य वागमृतोद्गारोत्प्रेक्षा ॥ ४९॥

परिरभ्येति। निषधानां राजा नैषधः नलः जनपदशब्दात् क्षत्रियादञ्। भुजाग्रजन्मना कोकनदेन पाणिशोणपङ्कजेनेत्यर्थः। पतगं हंसं परिरभ्य तस्य हंसस्य तथा मुदे हर्षाय प्रियवादानामेवामृतानां कूपः निधिः कण्ठो वागीन्द्रियं तज्जन्याः गिरः मृदु यथा तथा अगिरत् प्रियवाक्यामृतैरसिञ्चदित्यर्थः। अत्र भुजाग्र जन्मना कोकनदेनेति विषयस्यानिगरणेन विषयिणः कोकनदस्यैवोपनिबन्धनात् अतिशयोक्तिः विषयस्यानुपादानाद्विषय्युपनिबध्यते यत्र सातिशयोक्तिः स्यात्कवि प्रौढोक्ति सम्मतेति लक्षणात् सा च पाणि कोकनदयोरभेदोक्तिः अभेदरूपा तस्याः प्रियवादामृत कूपकण्ठेति रूपक संसृष्टिः ॥५०॥

न तुलेति। हे हंस! तव आकृतिः आकारः तुलाविषये सादृश्यभूमौ न वर्त्तते असदृशीत्यर्थः। ते तव सुशीलता सौशील्यं वचो वर्त्मनि न वर्त्तते वक्तुमशक्येत्यर्थः। अतएवाकृतौ गुणाः यत्राकृतिस्तत्र गुणा इति सामुद्रिकाणां सारमुद्रया सिद्धान्तप्रतिपादनं सा त्वमेवोदाहरणं यस्याः सा तथोक्ता आकृति सौशील्ययोः त्वय्येव सामानाधिकरण्य दर्शनादित्यर्थः। अतएवोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुकत्वात् काव्यलिङ्गमलङ्कारः हेतोर्वाक्यार्थहेतुत्वे काव्यलिङ्गमुदाहृतमिति लक्षणात् ॥५१॥

त्वदुदाहरणाकृती गुणा
इति सामुद्रकसारमुद्रणा ॥ ५१ ॥
न सुवर्णमयी तनुः परं
ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिताऽ
न वलम्बे किमु मादृशेऽपि सा ॥ ५२ ॥
भृशतापभृता मया भवा
मरुदासादि तुषारसारवान् ।
धनिनामितरः सतां पुन
र्गुणवत्सन्निधिरेव सन्निधिः ॥ ५३ ॥

न सुवर्णेति। ननु हे हंस ! तवेयं तावकी युष्मदस्मदोरन्यतरस्यां खञ् चेति चकारादण् प्रत्यये ङीप् तवकममकावेकवचन इति तवकादेशः तनुः परं मूर्त्तिरेव सुवर्णमयी हिरण्मयी न किन्तु वागपि तथा सुवर्णमयी शोभनाक्षरमयीत्यर्थः। अनवलम्बे निरवलम्बे पथि परमाकाशे एव पक्षपातिता पक्षपातित्वं किमु किं वेत्यर्थः॥ निपातानामनेकार्थत्वात्। अनवलम्बे निराधारे मादृशेऽपि सा पक्षपातिता स्नेहत्तेत्यर्थः। अत्र तनुवाचोः प्रकृताप्रकृतयोः सुवर्णमयीति शब्दश्लेषः एवं पथि मादृशेऽपि पक्षपातितेति सजातीय संसृष्टिः तथा चोपमा व्यज्यते ॥ ५२ ॥

भृशेति। भृशतापभृता अतिसन्तापभाजा मया भवांस्तुषारैः शीकरैः सारवानुत्कृष्टो मरुत् मारुतः सन् आसादि सन्तापहरत्वादिति भावः। तथा हि धनिनां धनिकानां कुबेरादीनां इतरः पद्मशङ्खादिः संज्ञासौ निधिश्चेति सन्निधिः सतां विदुषां पुनः गुणाढ्यानां सन्निधिः सान्निध्यमेव सन्निधिः महानिधिः सन्तापहारित्वात्त्वमेव शिशिरमारुतः अन्यस्तु दहन एवेति भावः दृष्टान्तालङ्कारः उचर्यां ठक्कम् ॥ ५२ ॥

अतश्च श्रुतिमागतैव सा
त्रिजगन्मोहमहौषधिर्मम ।
अधुना तव शंसितेन तु
स्वदृशैवाधिगतामवैमि ताम् ॥५४॥
अखिलं विदुषामनाविलं
सुहृदा च स्वहृदा च पश्यताम् ।
सविधेऽपि न सूक्ष्मसाक्षिणी
वदनालङ्कृतिमात्रलक्षिणी ॥ ५५ ॥
अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः ।

अतश्च इति । त्रिजगतः त्रैलोक्यस्य मोहे सम्मोहने महौषधिः महौषधमिति रूपकं सा दमयन्ती अतश्चो मम श्रुतिं श्रोत्रमागतैव अधुना तव शंसितेन कथनेन तु स्वदृशा मम दृष्ट्यैवाधिगतां दृष्टामवैमि साक्षाद्दृष्टां मन्ये । आप्तोक्ति प्रामाण्यादिति भावः ॥५४॥

अथ स्वदृष्टेरप्याप्तदृष्टिरेव गरीयसीत्याह । अखिलमिति । सुहृदा आप्तमुखेन स्वहृदा स्वान्तःकरणेन च सुहृत् पदग्रहणं तद्वत्सुहृद स्वद्वेयत्वज्ञापनार्थं अखिलं कृत्स्नं अर्थमनाविलम सन्दिग्धं अविपर्यस्तं यथा तथा पश्यतामवधारयतां विदुषां विवेकिनां सविधे पुरोऽपि न सूक्ष्मसाक्षिणी असूक्ष्मार्थदर्शिनी सुप्सुपेति समासः । अक्षिणी वदनालङ्कृतिमात्रं न तु दूरसूक्ष्मार्थदर्शनोपयोगिनीत्यर्थः ॥५५॥

अमितमिति । हे खग ! जनैः विदर्भागतजनैः मम श्रवणप्राघुणिकीकृता कर्णातिथीकृता तद्विषयीकृतेत्यर्थः । आवेशिकः प्राघुणिक आगन्तुरतिथिस्त्वयेति हलायुधः । अमितमपरिमितं मधु क्षौद्रं तद्वदति मधुरेत्यर्थः ॥ तत्कथा तद्गुणवर्णना अधैर्यधारिणोऽतएवाधीरस्य मम मदनानलबोधने मदनाग्नि प्रज्वलने धाय्या सामिधेनी भवेत् कक्

मदनानलबोधनेऽभवत्
खगधाय्या धिगधैर्यधारिणः ॥ ५६ ॥
विषमो मलयाहिमण्डली
विषफूत्कारमयो मयोहितः ।
बत कालकलत्रदिग्भवः
पवनस्तद्विरहानलैधसा ॥ ५७ ॥
प्रतिमासमसौ निशापतिः
खग ! सङ्गच्छति यद्दिनाधिपम् ।

सामि धेनी धाय्या च या स्यादग्नि समिन्धनेत्यमरः । पाय्यसान्नाय्येत्यादिना निपातः । धिक्वाक्यार्थो निन्द्यः अत्र तत्कथायाः धाय्यात्मना प्रकृतमदनाग्नीन्धनोपयोगात् परिणामालङ्कारः आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इत्यलङ्कारसर्वस्वकारः ॥ ५६ ॥

विषम इति विषमः प्रतिकूलः कालकलत्र दिक् भवः यमदिग्भवः प्राणहर इति भावः पवनो दक्षिणमारुतः तद्विरहानलैधसा दमयन्तीविरहाग्नि समिधा तद्दाह्येनेत्यर्थः । मया मलये मलयाचले या अहिमण्डली सर्पसङ्घः तस्याः विषफूत्कारमयः ऊहितस्तद्रूप इति तर्कित इत्यर्थः । लोके च अग्निरेधांसि फूत्कारवातैर्ध्मायत इति भावः । बतेति खेदे विरहानलैधसेति रूपकोत्थापितेयं दक्षिण पवनस्य मलयाहीमण्डली फूत्कारकोत्प्रेक्षेति शङ्करः ॥५७॥

प्रतिमासमिति । असौ निशाकरो मासि मासि प्रतिमासम्प्रति दर्शमित्यर्थः । वीप्सायामव्ययीभावः दिनाधिपं सूर्यं संगच्छति प्राप्नोतीति यत्ततः प्राप्तेः स निशाकरः तीव्रतरैः एत एव धैर्यतस्करैः मम धैर्यहारिभिः करैः घोरैः तत् अग्निसमैः मम दाहाय संगच्छतीत्यनुषङ्गः किंशुशब्द उत्प्रेक्षायां अत्र सङ्गमनस्य दाहार्थत्वोत्प्रेक्षणात् फलोत्प्रेक्षा ॥५८॥

किमु तीव्रतरैस्ततः करै-
र्मम दाहाय स धैर्यतस्करैः ॥ ५८॥

कुसुमानि यदि स्मरेषवो
न तु वज्रं विषवल्लिजानि तत् ।
हृदयं यदमूमुहन्नमू-
र्मम यच्चातितरामतीतपन् ॥ ५९ ॥

तदिहानवधौ निमज्जता
मम कन्दर्पशराधिनीरधौ ।
भव पोत इवावलम्बनं
विधिनाकस्मिकसृष्टसन्निधिः ॥ ६० ॥

अथ वा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि नः ।

कुसुमानीति । स्मरेषवः कुसुमान्येव यदि न तु वज्रमशनिः सद्योमरणाभावादिति भावः । तत्तथा अस्तु किन्तु विषवल्लिजानि विषलतोत्पन्नानि । यद्यस्मादमूः स्मरेषवः पत्रीरोपइषुर्द्वयोरिति स्त्रीलिङ्गता मम हृदयममूमुहन् अमूर्च्छयन् मुह्यतेर्णौ चङ् यद्यस्मादतितरां अतिमात्रं अव्ययादाम्प्रत्ययः । अतीतपन् तापयन्ति स्म तपतेर्णौ चङ् मोहतापलक्षण विषकार्यदर्शनाद्विषवल्लित्वोत्प्रेक्षा ॥ ५९ ॥

तदिति । तत्तस्मादिहास्मिन्ननवधौ अपारै कन्दर्पशरैर्य आधिर्मनोव्यथा पुंस्याधिर्मानसी व्यथेत्यमरः । तस्मिन्नेव नीरधौ समुद्रे निमज्जतो अन्तर्गतस्य मम विधिना दैवेन कस्मादकाण्डे भवं आकस्मिकं अध्यात्मादित्वात्ठक् अव्ययानाम्भमात्रे टिलोपः तद्यथा तथा सृष्टसन्निधिः सन्निधानं भाग्यादागत इत्यर्थः । त्वं पोतो यानपात्रमिव यानपात्रन्तु पोतो इत्यमरः आलम्बनं भव ॥ ६० ॥

स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता ॥ ६१ ॥
तव वर्त्मनि वर्त्ततां शिवं
पुनरस्तु त्वरितं समागमः ।
अपि साधय साधयेप्सितं
स्मरणीयाः समये वयं वयः ॥ ६२ ॥
इति तं स विसृज्य धैर्य्यवा
न्नृपतिः सूनृतवाग्बृहस्पतिः ।
अविशद्वनवेश्म विस्मितः
श्रुतिलग्नैः कलहंसशंसितैः ॥ ६३ ॥

अथवेति । अथवा इयं नोऽस्माकं सम्बन्धिनी उभयप्राप्तौ कर्मणीति नियमात् कर्त्तरि कृद्योगे षष्ठी निषेधेऽपि शेषे षष्ठी पर्यवसानात् कर्तृत्वलाभः भवतः उभयप्राप्तौ कर्मणीति षष्ठी प्रवर्त्तना प्रेरणा ण्यासश्रन्थो युच् कथं पिष्टं न पिनष्टि स्वतः प्रवृत्तिविषयत्वात् पिष्टपेषणकल्पेत्यर्थः । हि यस्मात् ग्रहणानां ज्ञानानां यथार्थता याथार्थ्यं यथा प्रामाण्यमिव स्वतःसर्वप्रमाणानां प्रामाण्यमिव दृढतरतां जाता मनीषा स्वत एव मानमिति मीमांसकाः सतां परार्थता परार्थं प्रवृत्तिः स्वत एव नतु परतः उपमासंसृष्टोऽर्थान्तरन्यासः ॥ ६१ ॥

तवेति । हे ! वयः ! तव वर्त्मनि शिवं मङ्गलं वर्त्ततां त्वरितं क्षिप्रमेव पुनः समागमोऽस्तु अपिसाधय गच्छ ईप्सितमिष्टं साधय सम्पादय समये कार्य्यकाले वयं स्मरणीयाः अनन्यगामि कार्य्यं कुर्य्या इत्यर्थः ॥ ६२ ॥

इतीति धैर्य्यवानुपायलाभात् सधैर्य्यः सूनृतवाक् सत्यप्रियवादेषु बृहस्पतिः तथा प्रगल्भ इत्यर्थः । सूनृतं चप्रिये सत्ये इत्यमरः । स नृपतिरितीत्थं हंसं विसृज्य श्रुतिलग्नैः श्रोत्रप्रविष्टैः

अथ भीमसुतावलोकनैः
सफलं कर्तुमहस्तदेव सः।
क्षितिमण्डलमण्डनायितं
नगरं कुण्डिनमण्डजो ययौ ॥ ६४ ॥

प्रथमं पथि लोचनातिथिं
पथिकप्रार्थितसिद्धिशंसिनम्।
कलसं जलसंभृतं पुरः
कलहंसः कलयाम्बभूव सः ॥ ६५ ॥

अवलम्ब्य दिदृक्षयाम्बरे
क्षणमाश्चर्यरसालसं गतम्।
स विलासवनेऽवनीभृतः
फलमैक्षिष्ट रसालसंगतम् ॥ ६६ ॥

कलहंसस्य शंसितैरिङ्गितैः सन् वनेभ्य भोगगृहमविशत् ॥६३॥

अथेति। अथ सोऽण्डजो हंसः तदहरेव भीमसुतायाः भैम्या अवलोकनैः सफलं कर्तुं तस्मिन्नेव दिने तां द्रष्टुमित्यर्थः। क्षितिमण्डलस्य मण्डनायितं अलङ्कारभूतं कुण्डिनं कुण्डिनाख्यनगरं ययौ ॥६४॥

अथ लोकत्रयेण शुभनिमित्तान्याह प्रथममित्यादिना। स कलहंसः प्रथममादौ पथि मार्गे लोचनातिथिं दृष्टिप्रियं पथिकानां प्रस्थातॄणां प्रार्थितस्येष्टार्थस्य सिद्धिशंसिनं सिद्धिसूचकं जलसम्भृतं जलपूर्णं कलशं पूर्णकुम्भं पुरोऽग्रे कलयां बभूव ददर्श ॥६५॥

अवलम्ब्येति। स हंसो दिदृक्षया स्वगन्तव्यमार्गालोकनेच्छया अम्बरे क्षणमाश्चर्यरसेन तद्वस्तु दर्शननिमित्तेन अद्भुतरसेन अलसं मन्दङ्गतं गतिमवलम्ब्य अवनीभुजो नलस्य विलासवने विहारवने रसालेन चूतवृक्षेण सङ्गतं सम्बद्धं आम्रभूतोरसालोऽस्य वित्यमरः। फलमैक्षिष्ट दृष्टवान् ॥६६॥

नभसः कलभैरुपासितं
जलदैर्भूरितरक्षुपन्नगम् ।
स ददर्श पतङ्गपुङ्गवो
विटपच्छन्नतरक्षुपन्नगम् ॥ ६७ ॥

स ययौ धुतपक्षतिः क्षणं
क्षणमूर्ध्वायनदुर्विभावनः ।
विततीकृतनिश्चलच्छदः
क्षणमालोककदत्तकौतुकः ॥ ६८ ॥

तनुदीधितिधारया रया
त्ततया लोकविलोकनामसौ ।

नभस इति । पुमान् गौः वृषभः विशेषण समासः गोरतद्धित लुगिति समासान्तष्टच् स इव पतङ्गपुङ्गवः पक्षिश्रेष्ठः उपमितसमासः नभसः कलभैः खेचरकरिकल्पैरित्यर्थः । जलदैरुपासितं व्याप्तं भूरयः बहवस्तरक्षवो मृगादनाः पन्नगा यस्य तं विटपैः शाखाविस्तारेण विस्तारो विटपोऽस्त्रियामित्यमरः । छन्नतराः अतिशयेन छादिताः क्षुपा ह्रस्वशाखाः ह्रस्वशाखाशिफः क्षुप इत्यमरः । नगं पर्वतं ददर्श पूर्णकुम्भादिदर्शनं पान्थस्य शुभकरमिति निमित्तज्ञाः ॥६७॥

स इति । स हंसः क्षणं धुतपक्षतिः कम्पितपक्षमूलः क्षणं ऊर्ध्वायनेन ऊर्ध्वगमनेन दुर्विभावनो दुष्करावधारणो दुर्लक्ष्य इत्यर्थः । विततीकृतौ विस्तारीकृतौ निश्चलौ छदौ पक्षौ यस्य सः तथा क्षणं आलोककानां दृष्टृणां दत्तकौतुकः सन् ययौ । स्वभावोक्तिः ॥६८॥

तन्विति । असौ हंसो रयाद्धेतोः उत्पन्नयेति शेषः । लोकस्य आलोकि जनस्य परीक्षकजनस्य च विलोकनां दर्शनं ततया कौतुकाद्दर्शपरीक्षार्थविलोक्यमानयेत्यर्थः । तनोः शरीरस्य तन्वा सूक्ष्मया च दीधिति धार्य-

रुदहेम कषन्निवालसत्
कषपाषाणनिभे नभस्तले ॥ ६९ ॥
विनमद्भिरधःस्थितैः खगै-
र्झटिति श्येननिपातशङ्किभिः ।
स निरैक्षि दृशैकयोपरि
स्यदसांकारिपतत्रपद्धतिः ॥ ७० ॥
ददृशे न जनेन यन्नसौ
भुवि तच्छायमवेक्ष्य तत्क्षणात्
दिवि दिक्षु वितीर्णचक्षुषा
पृथुवेगद्रुतमुक्तदृक्पथः ॥ ७१ ॥
न वनं पथि शिश्रियेऽमुना
क्वचिदप्युच्चतरद्रुचारुतम् ।

रया रश्मिरेखया निमित्तेन कषपाषाणनिभे निकषोपलसन्निभे नभस्तले रुदहेम निजपक्ष सुवर्णं कषन् घर्षन्निवालसत् अशोभतेत्युत्प्रेक्षा ॥६९॥

विनमद्भिरिति । स्यदेन वेगेन सां कारिणी सामिति शब्दं कुर्वाणा पतत्रिपद्धतिः पक्षितरणि यस्य स हंसः श्येननिपातं शङ्कत इति तच्छङ्किभिः अतएव विनमद्भिर्विलीयमानैरधःस्थितैः खगैः झटिति द्राक् एकया दृशा उपरि निरैक्षि निरीक्षितः कर्मणि लुङ् । स्वभावोक्तिः॥७०॥

ददृश इति । यन् गच्छन् इणो लटः शत्रादेशः असौ हंसः भुवि तच्छायं तस्य हंसस्य छायां विभाषासेनेत्यादिना नपुंसकत्वम् । अवेक्ष्य तत् क्षणात् प्रथमं दिवि पश्चात् दिक्षु च वितीर्णचक्षुषा दत्तदृष्टिना जनेन पृथुवेगेन द्रुतं शीघ्रं मुक्तदृक्पथः सन् न ददृशे न दृष्टः क्षणमात्रेण दृष्टिपथमतिक्रान्त इत्यर्थः ॥ ७१ ॥

नेति । गतिवेगेन प्रसरद्रुचा प्रवृत्ततेजसा अमुना हंसेन क्वचिदपि उच्चतराणां अत्युन्नतानां द्रूणां द्रुमाणां चारुता रम्यता यस्मिन्तत् वनं न

न स गोत्रजमन्ववादि वा
गतिवेगप्रसरद्रुचा रुतम् ॥ ७२ ॥

अथ भीमभुजेन पालिता
नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं
हरशैलोपमसौधराजिता ॥ ७३ ॥

दयितं प्रति यत्र सन्तता
रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः
शशभृद्भित्तनिरङ्कभित्तयः ॥ ७४ ॥

शिश्रिये । सगोत्रजं बन्धुजन्यं रुतं कूजितं वा नान्ववादि नानूदितं मध्यमार्गे अध्वश्रमापनोदनं बन्धुसम्भाषणादिकमपि न कृतमिति सुहृत्कार्यानुसन्धानपरोक्तिः पलाशिद्रुद्रुमागमा इत्यमरः ॥ ७२ ॥

अथेति । धराजिता भूमिजयिना सत्सूद्विषेत्यादिना क्विपि तुग् भीमस्य भीमभूपस्य भुजेन पालिता हिमशैलोपमैः सौधैः राजिता मञ्जुर्मनोज्ञा असौ पूर्वोक्ता नगरी कुण्डिनपुरी पतगस्य हंसस्य दृक्पथं जगाम स तां ददर्शेत्यर्थः । अत्र यमकाख्यानुप्रासस्य हिमशैलोपमेति उपमायाश्च संसृष्टिः ॥ ७३ ॥

तां वर्णयति । दयितमिति । यत्र नगर्य्यां स्फटिकोपलविग्रहाः स्फटिकमय शरीरा इत्यर्थः । अतएव शशभृद्भित्त निरङ्कभित्तयः शशाङ्कशकलनिष्कलङ्कानि कुड्यानि येषान्ते । भित्तं शकल खण्डे वेत्यमरः । भिदेः क्विप् प्रत्ययः । भित्तंशकलमित्यादि निपातना इदाभ्यामित्यादिना निष्ठानत्वभावः गृहाः दयितं भीमं प्रति सन्ततं भुवः भूमेर्नायिकायाः रतिहासा इव केलि हासा इव रेजिरे इत्युत्प्रेक्षा ॥७४॥

नृपनीलमणीगृहत्विषा
मुपधेर्यत्र भयेन भास्वतः ।
शरणाप्तमुवास वासरे
ऽप्यसदावृत्त्युदयत्तमं तमः ॥ ७५ ॥

सितदीप्रमणिप्रकल्पिते
यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथी
नुपतस्थेऽतिरिकिकाथ तिथिः ॥ ७६ ॥

सुदतीजनमज्जनार्पितै
र्घुसृणैर्यत्र कषायिताशया ।

नृपेति । यत्र नगर्यां तमोऽन्धकारः भास्वतो भास्करात् भयेन नृपस्य ये नीलमणीनां गृहाः तेषां त्विषः तासां उपधेः छलादित्यपह्नवभेदः । रत्नं मणिर्द्वयोरित्यमरः । कृदिकारादक्तिन इति चा ङीष् वक्तव्यः । शरणाप्तं शरणं गृहं रक्षितारं अन्वागतं शरणं गृहरक्षित्रोरित्यमरः । वासरे दिवसेऽप्यसदावृत्ति अपुनरावृत्ति च्चि श्वोदयत्तमं उद्यत्तमं सदुवास ॥ ७५ ॥

सितेति । सितैः दीप्रैश्च मणिभिः प्रकल्पिते उज्ज्वल स्फटिकनिर्मिते हसदङ्करोदसि विलसदङ्करोदस्के द्यावापृथिवी व्यापिनीत्यर्थः । यदगारे यस्या नगर्या गृहेष्वित्यर्थः । जातावेकवचनं निशि निखिलान् तिथीनेकिका एकाकिनी एकैवेत्यर्थः । एकादाकिनच्चासहाय इति चकारात् कप्रत्ययः । प्रत्ययस्थात् कात् पूर्वस्येतीकारः । पूर्णिमा तिथिरेकातिथिः । तदाद्यास्तिथयोरित्यमरः । अतिथिःसन् उपतस्थे अतिथिर्भूय सङ्गतेत्यर्थः । उपाद्देव पूजेत्यादिना सङ्गतिकरणे आत्मनेपदं स्फटिकभवन कान्तिनित्यकौमुदी योगात् सर्वा अपि रात्रयो राकारात्रय इवासन्नित्यभेदोक्तौ रतिशयोक्ति भेदः ॥ ७६ ॥

सुदतीति । यत्र नगर्यां शोभना दन्ता यासान्ताः सुदत्यः स्त्रियः

न स गोत्रजमन्ववादि वा
गतिवेगप्रसरन्द्रुचा रुतम् ॥ ७२ ॥
अथ भीमभुजेन पालिता
नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं
हरशैलोपमसौधराजिता ॥ ७३ ॥
दयितं प्रति यत्र सन्तता
रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः
शशभृद्भित्तनिरङ्कभित्तयः ॥ ७४ ॥

शिश्रिये । सगोत्रजं बन्धुजन्यं रुतं कूजितं वा नान्ववादि नानूदितं मध्यमार्गे अध्वश्रमापनोदनं बन्धुसम्भाषणादिकमपि न कृतमिति सुहृत्कार्यानुसन्धानपरोक्तिः पलाशिद्रुद्रुमागमा इत्यमरः ॥ ७२ ॥

अथेति । धराजिता भूमिजयिना सत्सुद्विषेत्यादिना क्विपि तुग् भीमस्य भीमभूपस्य भुजेन पालिता हिमशैलोपमैः सौधैः राजिता मञ्जुर्मनोज्ञा असौ पूर्वोक्ता नगरी कुण्डिनपुरी पतगस्य हंसस्य दृक्पथं जगाम स तां ददर्शेत्यर्थः । अत्र यमकाख्यानुप्रासस्य हिमशैलोपमेति उपमायाश्च संसृष्टिः ॥ ७३ ॥

तां वर्णयति । दयितमिति । यत्र नगर्यां स्फटिकोपलविग्रहाः स्फटिकमय शरीरा इत्यर्थः । अतएव शशभृद्भित्त निरङ्कभित्तयः शशाङ्कशकलनिष्कलङ्कानि कुड्यानि येषान्ते । भित्तं शकल खण्डे वेत्यमरः । भिदेः क्विप् प्रत्ययः । भित्तंशकलमित्यादि निपातना इदाभ्यामित्यादिना निष्ठानत्वभावः गृहाः दयितं भीमं प्रति सन्ततं भुवः भूमेर्नायिकायाः रतिहासा इव केलि हासा इव रेजिरे इत्युत्प्रेक्षा ॥७४ ॥

नृपनीलमणीगृहत्विषा
मुपधेर्यत्र भयेन भास्वतः ।
शरणाप्तमुवास वासरे
ऽप्यसदावृत्त्युदयत्तमं तमः ॥ ७५ ॥
सितदीप्रमणिप्रकल्पिते
यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथी
नुपतस्थेऽतिथिरेकिका तिथिः ॥ ७६ ॥
सुदतीजनमज्जनार्पितै
र्घुसृणैर्यत्र कषायिताशया ।

नृपेति । यत्र नगर्यां तमोऽन्धकारः भास्वतो भास्करात् भयेन नृपस्य ये नीलमणीनां गृहाः तेषां त्विषः तासां उपधेश्छलादित्यपह्नव भेदः । रत्नं मणिर्द्वयोरित्यमरः । कृदिकारादक्तिन इति वा ङीष् वक्तव्यः । शरणाप्तं शरणं गृहं रक्षितारं अन्वागतं शरणं गृहरक्षित्रोरित्यमरः । वासरे दिवसेऽप्यसदावृत्ति अपुनरावृत्ति त्ति श्चोदयत्तमं उद्यत्तमं सदुवास ॥ ७५ ॥

सितेति । सितैः दीप्रैश्च मणिभिः प्रकल्पिते उज्ज्वल स्फटिकनिर्मिते हसदङ्करोदसि विलसदङ्करोदस्के द्यावापृथिवी व्यापिनीत्यर्थः । यदगारे यस्या नगर्या गृहेष्वित्यर्थः । जातावेकवचनं निशि निखिलान् तिथीनेकिका एकाकिनी एकैवेत्यर्थः । एकादाकिनिच्चासहाय इति चकारात् कप्रत्ययः । प्रत्ययस्थात् कात् पूर्वस्येतीकारः । पूर्णिमा तिथिरेकातिथिः । तदाद्यास्तिथयोरित्यमरः । अतिथिःसन् उपतस्थे अतिथिर्भूय सङ्गतेत्यर्थः । उपाद्देव पूजेत्यादिना सङ्गतिकरणे आत्मनेपदं स्फटिकभवन कान्तिनित्यकौमुदी योगात् सर्वा अपि रात्रयो राकारात्रय इवासन्नित्यभेदोक्तौ रतिशयोक्ति भेदः ॥ ७६ ॥

सुदतीति । यत्र नगर्यां शोभना दन्ता यासान्ताः सुदत्यः स्त्रियः

न निशाखिलयापि वापिका
प्रससाद ग्रहिलेव मानिनी ॥ ७७ ॥
क्षणनीरवया यया निशि
श्रितवप्रावलियोगपट्टया ।
मणिवेश्ममयं स्म निर्मलं
किमपि ज्योतिरबाह्यमीक्ष्यते ॥ ७८ ॥
विललास जलाशयोदरे

अत्रापि विधानाभावाद्दत्वादेश्चिन्त्य इति केचित् अग्रान्त शुद्ध शुभ्र वृषवराहेभ्यश्चेति चकारात् सिद्धिरित्यन्ये सुदत्प्रादयः स्त्रीषु योग रूढाः स्त्रियां संज्ञायामिति दत्रादेशात् साधव इत्यपरे तदेतत्सर्वमभिसन्धायाह वामनः सुदत्प्रादयः प्रतिविधेया इति । ता एव जना लोकाः तेषां मज्जनादवगाहना दर्पितैः क्षालितैः घुसृणैः कुङ्कुमैः कषायिताशया सुरभिताभ्यन्तरा भोगचिह्नैः कलुषित हृदया च वाप्येव वापिका दीर्घिका ग्रहिला ग्रहोऽनुग्रहनिर्बन्धाविति विश्वः । तद्वती दीर्घ रोषा पिच्छादि लच् दिवादिः । मानिनिस्त्री यासीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये इत्युक्त लक्षणोमानः तद्वती नायिकेव अखिलया निशा निशया सर्वरात्रि प्रसादनेनेत्यर्थः । न प्रससाद प्रसन्नहृदया नाभूत् तादृक् क्षोभादिति भावः॥७७॥

क्षणेति । निशि निशीथे क्षणं नीरवया एकत्र सुप्तजनत्वादन्यत्र ध्यानस्तिमितत्वान्निःशब्दयाश्रितः प्राप्तः वप्रावलिः योगपट्ट इव अन्यत्र वप्रावलिरिव योगपट्टो यया सा तथोक्ता यया नगर्या मणिवेश्ममयं तद्रूपं निर्मलं अबाह्यमन्तर्वर्ति किमपि अवाङ् मनसगोचरं ज्योतिः प्रभा आत्मज्योतिश्च ईक्ष्यते सेव्यते स्म । अत्र प्रस्तुतनगरी विशेषसाम्यादप्रस्तुत योगिनी प्रतीतेःसमासोक्तिः ॥७८ ॥

विललासेति । या नगरी परिखायाः कपटेन व्याजेन स्फुटं परितो व्यक्तं तथा स्फुरता प्रतिबिम्बेनावलम्बितं मध्ये चागृह्यमाणं

क्वचन द्यौरनुविम्बितेव या ।
परिखाकपटस्फुटस्फुरत्
प्रतिविम्बानवलम्बिताम्बुनि ॥ ७९ ॥
व्रजते दिवि यद्गृहावली
चलचेलाञ्चलदण्डताडनाः ।
व्यतरन्नरुणाय विश्रमं
सृजते हेलिहयालिकालनाम् ॥ ८० ॥
क्षितिगर्भधराम्बरालयै-
स्तलमध्योपरिपूरिणां पृथक् ।

चाम्बु यस्मिन् तस्मिन् प्रतिविम्बाक्रान्तमम्बु परितः स्फुरति प्रतिविम्बदेशे न स्फुरति तेनैव प्रतिबिम्बादिति भावः । क्वचन कुत्रचिज्जलाशयोदरे ह्रदमध्ये कस्यचित् ह्रदस्य मध्य इत्यर्थः । अनुबिम्बिता प्रतिविम्बिता द्यौरमरावतीव विललासेत्युत्प्रेक्षा ॥ ७९ ॥

व्रजत इति । यस्यां नगर्यां गृहावलीषु चलाः चञ्चलाः चेलाञ्चलाः पताकाग्राणि ता एव दण्डास्तैः ताड़नाः कशाघाता इत्यर्थः । ताः कर्त्र्यो दिवि व्रजते खे गच्छते हेलिहयालेः सूर्याश्वपङ्क्तेः हेलिरालिङ्गने रवाविति वैजयन्ती । कालनां चोदनां सृजते कुर्व्वते अरुणाय सूर्यसारथये विश्रमं स्वयं तत्कार्य्यकरणाद्विश्रान्तिं नोदत्तोपदेशेत्रादिना घञ् । वृत्ति प्रतिषेधः । व्यतरन् ददुः अत्र हेलिहयालेश्चेलाञ्चलदण्डताड़नासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिभेदः तेन गृहाणामर्कमण्डलपर्य्यन्तमौन्नत्यं व्यज्यत इति अलङ्कारेण वस्तुध्वनिः ॥८०॥

क्षितीति ॥ तलमध्योपरि अधोमध्योर्द्ध्वदेशान् पूरयन्तीति तत्पूरिणां जगतां पातालभूमिस्वर्गाणां पृथग सङ्कीर्णं यानि निजानि प्रतिनीतानि निजचिह्नानि निष्यन्नपान स्रक् चन्दनादि लिङ्गानि धारयन्तीति तद्धारिभिः तथोक्तैः सारैरुत्कृष्टैः क्षितिकुहरे धरायां भूपृष्ठे

जगतां खलु याखिलाद्भुता
जनि सारैर्निजचिह्नधारिभिः ॥८१ ॥
दधदम्बुदनीलकण्ठतां
वहदत्यच्छसुधोज्ज्वलं वपुः ।
कथमृच्छतु यत्र नाम न
क्षितिभृन्मन्दिरमिन्दुमौलिताम् ॥ ८२ ॥
वहुरूपकशालभञ्जिका
मुखचन्द्रेषु कलङ्करङ्कवः ।

अम्बरे आकाशे च ये आलया गृहाः तैः भूम्यन्तर्वहिः शिरोगृहैरित्यर्थः। या नगरी अखिला कृत्स्ना अद्भुता चित्रा अजनि जाता । दीप जनेत्यादिना जनेः कर्त्तरि लुङ् च्लेश्चिणादेशः अत्र अचिगर्भादीनां-तलमध्योपरि जगत् सतां तच्चिह्नानाञ्च यथा सङ्ख्यं सम्बन्धात् यथा संख्यालङ्कारः । एतेन त्रैलोक्यवैभवं गम्यते ॥८१॥

दधदिति । यत्र नगर्यां अम्बुदैरम्बुदवन्नीलः कण्ठः शिखरोपकण्ठः गलश्च यस्य तस्य भावः तत्तां कण्ठो गले सन्निधाने इति विश्वः । दधत् अच्छया सुधया लेपनद्रव्येण च सुधायदस्ततवचोज्ज्वलं वपुर्व्वहत् सुधालेपोऽमृतं सुधेत्यमरः । क्षितिभृत्मन्दिरं राजभवनं इन्दुमौलितां इन्दुमण्डलपर्यन्तशिखरत्वं कथं नाम न ऋच्छतु गच्छत्वेवेत्यर्थः । राजभवनस्य तादृगौन्नत्यं युक्तमिति भावः । अन्यत्र नीलकण्ठस्य इन्दुमौलित्वमीश्वरत्वं च युक्तमिति भावः । अत्र विशेषणविशेष्याणां श्लिष्टानामभिधायाः प्रकृतार्थमात्रनियन्त्रणात् प्रकृतेश्वरप्रतीतेः ध्वनिरेव ॥ ८२ ॥

वह्विति । वहुरूपकाः भूयिष्ठसौन्दर्याः प्रांषिकः कप्रत्ययः । तेषु शालभञ्जिकानां कृत्रिमपुत्तिकाणां मुखचन्द्रेषु कलङ्करङ्कवः चन्द्रत्वात् सम्भाविताः कलङ्कमृगाः ते यस्यां नगर्यां अनेकेषां बहूनां सम्बन्धानां

यदनेककसौधकन्धरा
हरिभिः कुक्षिगतीकृता इव ॥ ८३ ॥
वलिसद्म दिवं स तथ्यवा-
गुपरि स्माह दिवोऽपि नारदः ।
अधराथ कृता ययैव सा
विपरीताजनि भूमिभूषया ॥ ८४ ॥
प्रतिहट्टपथे घरट्टजात्
पथिकाह्वानदशक्तुसौरभैः ।

कन्धरासु कण्ठप्रदेशेषु ये हरयः सिंहाः तैः कुक्षिगतीकृता इव यस्याः किमित्युत्प्रेक्षा मुखचन्द्राणां निष्कलङ्कत्वनिमित्तात् अन्यथा कथं चन्द्रे निष्कलङ्कतेति भावः ॥ ८२ ॥

बलीति । स प्रसिद्धः तथ्यवाक् सत्यवचनः नारदः वलिसद्म दिवं पातालस्वर्गं दिवोमेरु स्वर्गादप्युपरिस्थितामुत्कृष्टाञ्चाह स्म उक्तवान् । अथेदानीं भूमिभूषया यया नगर्या अधरान्यूना अधस्ताच्च कृतेवेत्युत्प्रेक्षा सा बलिसद्मद्यौर्विपरीता नारदोक्तविपरीता अजनि सर्वोपरिस्थितायाः पुनरधस्थितिः वैपरीत्यम् ॥ ८४ ॥

प्रतीति । पन्थानं गच्छतीति । पथिकाः तेषामाह्वानं ददातीति तथोक्तं आह्वयिकं अध्वानं गच्छतामाकर्षकमित्यर्थः । शक्तूनां सौरभं सुगन्धो यस्मिन् प्रतिहट्टपथे प्रत्यापणपथे । अव्ययं विभक्तीत्यादिना वीप्सायामव्ययीभावः । तृतीयासप्तम्योर्बहुलमिति सप्तम्या अभावः । घरट्टाः गोधूमचूर्णयन्त्राणि तज्जात् यस्या नगर्याः उत्थितात् कलहात् घर्घरस्वनः निर्झरस्वरः कण्ठध्वनिः घनान् मेघानधुनापि नोज्झति न त्यजति सर्वदा सर्वहट्टेषु घरट्टा मेघध्वानं ध्वनन्तीति भावः; अत्र घनानां घरट्टकलहासम्बन्धेऽपि सम्बन्धोक्ते रतिशयोक्तिः तथा च घर्घरस्वनस्य तद्धेतुकत्वोत्प्रेक्षा व्यञ्जकाप्रयोगात् गम्योत्प्रेक्षेति स-

कलहान्न घनान् यदुत्थिता
दधुनाप्युज्झति घर्घरस्वरः ॥ ८५॥
वरणः कनकस्य मानिनीं
दिवमङ्कादमराद्रिरागताम् ।
घनरत्नकवाटपक्षतिः
परिरभ्यानुनयन्नुवास याम् ॥ ८६ ॥
अनलैः परिवेशमेत्य या
ज्वलदर्कोपलवप्रजन्मभिः ।
उदयं लयमन्तरा रवे
रवहद्बाणपुरीपरार्द्ध्यताम् ॥ ८७ ॥

ङ्कारः ॥ ८५ ॥

वरण इति । कनकस्य सम्बन्धी वरणः तद्विकारः प्राकारः स एवामराद्रिर्मेरुः यां नगरीं सैव मानिनीं कोपसम्पन्ना सत एव अङ्कान्निजोत्सङ्गादागतां भूलोकं प्राप्तां दिवममरावतीं घने निबिड़े रत्नानां कवाटे रत्नमय कवाटे एव पक्षतीपक्षमूले यस्य स सन् परिरभ्य उपगूह्य मेरोः पक्षवत्त्वात्पक्षतिरूपत्वं अनुसरन् अनुवर्त्तमानः उवास । कामिनः प्रणयकुपितां प्रेयसीं साप्रसादमनुगच्छन्तीति भावः । रूपकालङ्कारः स्फुट एव तेन चेयं नगरी कुतश्चित् कारणादागता द्यौरेव वरणस्य स्वर्णाद्रिरेवेत्युत्प्रेक्षा व्यज्यते ॥ ८६ ॥

अनलैरिति । या नगरी रवेरुदयं लयमस्तमयं चान्तरा तयोर्मध्यकाल इत्यर्थः । अन्तरान्तरेण युक्ते इति द्वितीया । ज्वलतः अर्कांशुसम्पर्कात् प्रज्वलतां अर्कोपलानां वप्राज्जन्म येषान्तैः सूर्यकान्तैः प्राकारजन्यैः अनलैः परिवेशमेत्य परिवेष्टनं प्राप्य बाणपूर्याः बाणासुरनगर्याः शोणितपुरस्य परार्द्ध्यतां श्रेष्ठतामवहत् अत्र अन्यधर्म्मस्यान्येन सम्बन्धासम्भवात् तादृशीं परार्द्ध्यतामिति सादृश्याक्षेपान्निदर्शनालङ्कारः ॥ ८७ ॥

बहुकम्बुमणिर्वराटिका
गणनाटत्करकर्कटोत्करः ।
हिमवालुकयाच्छवालुकः
पटु दध्वान यदापणार्णवः ॥ ८८ ॥
यदगारघटाट्टकुट्टिम
स्रवदिन्दूपलतुन्दिलापया ।

बह्विति । बहवः कम्बवः शङ्खा मणयश्च यस्मिन् सः वराटिकागणनाय कपर्दिका संख्यानाय अटन्तः तिर्यक् प्रचरन्तः कराः पाणय एव कर्कटोत्कराः कुलीरसङ्घा यस्मिन् सः हिमवालुकया कर्पूरेण अच्छवालुकः स्वच्छसिकतः यस्याः पुरः आपणः विपणिरेवार्णवः पटु धीरं दध्वान ननाद कपर्दो वराटिकेति हलायुधः । शङ्खः स्यात् कम्बुरस्त्रियामित्यमरः । सिताभ्रो हिमवालुका स्यात्कुलीरः कर्कटक इति चामरः ॥ ८८ ॥

यदीति । यस्याः नगर्याः अगारघटासु गृहपङ्क्तिषु अट्टानामट्टालिकानां कुट्टिमेषु निबद्धभूमिषु कुट्टिमोऽस्त्री निबद्धाभूरित्यमरः । स्रवद्भिरिन्दुसम्पर्कात् स्यन्दमानैरिन्दूपलैश्चन्द्रकान्तैः हेतुभिः तुन्दिला प्रवृद्धा आपो यस्याः तया तुन्दादिभ्योदलच् ऋक् पूरीत्यादिना समासान्तः । अभ्रगङ्गाया मन्दाकिन्या मन्दाकिनी वियद्गङ्गेत्यमरः । चन्द्रोदये चन्द्रोदये प्रतिचन्द्रोदयं वीप्सायामव्ययीभावः । पतिव्रतानामौचिती औचित्यं ब्राह्मणादित्वाद्गुणवचनेत्यादि नाष्यङ् प्रत्ययः षिद्गौरादिभ्यश्चेति ङीष् । स च मातरि षिच्चेति षित्वादेवसिद्धे मातामहशब्दस्य गौरादिपाठेनानित्यत्वज्ञापनाद्वैकल्पिकः अतएव वामनः ष्यञ् । षित्कार्य्य बहुलमिति स्त्रीनपुंसकयोर्भावक्रिययो ष्यञ् क्वचिच्च उञ् औचित्यं औचिती मैत्रं मैत्री उञ् प्रागुदाहृतमित्यमरश्च । न मुमुचे न तत्यजे भर्तुः समुद्रस्य चन्द्रोदये वृद्धिदर्शनात्तस्या अपि तथा वृद्धिरुचिता आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा म्रते हि म्रियते या स्त्री सा स्त्री

मुमुचे न पतिव्रतौचिती
प्रतिचन्द्रोदयमभ्रगङ्गया ॥ ८९ ॥

रुचयोऽस्तमितस्य भास्वतः
स्खलिता यत्र निरालयाः खलु ।
अभिसायमभुर्विलेपना
पणकश्मीरजपण्यवीथयः ॥ ९० ॥

विततं वणिजापणेऽखिलं
पणितुं यत्र जनेन वीक्ष्यते ।

ज्ञेया पतिव्रतेतिस्मरणादितिभावः । अत्राभ्रगङ्गायाः यदगारेत्यादिना विशेषणार्थासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः तथा च यदगाराणामतीन्दुमण्डलमौन्नत्यं गम्यते तदुत्थापिता चेयमस्याः पातिव्रत्यधर्मपरित्यागोत्प्रेक्षेति सङ्करः सा च व्यञ्जका प्रयोगात् गम्या ॥ ८९ ॥

रुचय इति । यत्र नगर्यां अनुसायं प्रतिसायं वीप्सायामव्ययीभावः । विलेपनापणेषु सुगन्धद्रव्यनिषद्यासु काश्मीरजानि कुङ्कुमान्येव पण्यानि पणनीयद्रव्याणि तेषां वीथयः श्रेणयः अस्तमितस्यास्तङ्गतस्य भास्वतः सम्बन्धिन्याः स्खलिताः अस्तमयक्षोभात् च्युताः अत एव निरालया निराश्रया रुचयः प्रभाः अभुः खलु कथञ्चित्प्रच्युताः सायन्तनार्कत्विष इव भान्ति स्मेत्यर्थः । कुङ्कुमराशीनां तदा तत् सावर्ण्यादियमुत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या भाते लुङि झेर्जुसादेशः ॥ ९० ॥

विततमिति ॥ यत्र नगर्यां वणिजा वणिक् जनेन पणितुं व्यवहर्तुं आपणे पण्यवीथ्यां विततं प्रसारितं अखिलं जगत्यां लोके स्थितं वस्तु पदार्थं जातं पुरा पूर्वं हरेर्विष्णोरुदरे मृकण्डुसूनुना मुनिना मार्कण्डेयेनेव जनेन लोकेन वीक्ष्यते विष्णूदरमिव समस्तवस्त्वाकरोऽयमवभासत इत्यर्थः । पुरा किल मार्कण्डेयो हरेरुदरं प्रविश्य विश्वं तत्राद्राक्षीदिति कथयन्ति ॥ ९१ ॥

मुनिनेव मृकण्डुसूनुना
जगतां वस्तु पुरोदरे हरेः ॥ ९१ ॥
सममेणमदैर्यदापणे
तुलयन् सौरभलोभनिश्चलम् ।
पणिता न जनारवैरवै-
दपि कूजन्तमलिं मलीमसम् ॥ ९२ ॥
रविकान्तमयेन सेतुना
सकलाहर्ज्वलनाहितोष्मणा ।

सममिति । यस्या नगर्या आपणे सौरभलोभनिश्चलं गन्धग्रहणनिष्पन्दं ततः क्रियया दुर्ज्ञेयमित्यर्थः । मलीमसं मलिनं सर्वाङ्गनीलमित्यर्थः । अन्यथा पीतमध्यस्यालेः पीतिम्नैव व्यवच्छेदात् अतो गुणतोऽपि दुर्ग्रहमित्यर्थः । ज्योत्स्नातमिस्रेत्यादिना निपातः । अलिं भृङ्गं एणमदैः समं कस्तूरीभिः सह तुलयन् तोलयन् पणिता विक्रेता कूजन्तमपि जनानामारावैः कलकलैः नावैत् शब्दतोऽपि नाज्ञातवान् इत्यर्थः । इह निश्चलस्यालेः गुञ्जनं कविना प्रौढवादेनोक्तमित्यनुसन्धेयं अत्रालेर्नैल्यादेस्वपदोक्तेः सामान्यालङ्कारः । सामान्यं गुणसामान्ये यत्र वस्त्वन्तरैकतेति लक्षणात् । तेन भ्रान्तिमदलङ्कारो व्यज्यते ॥९२॥

रविकान्तेति । यत्र नगर्यां सकलाहः कृत्स्नमहः राजाहःसखिभ्यष्टच् । रात्राह्नाहाः पुंसीति पुंलिङ्गता अत्यन्तसंयोगे द्वितीया योगविभागात्समासः । ज्वलनेन तपनकराभिपातात्प्रज्वलनेन आहितोष्मणा जनितोष्मणा जनितौष्ण्येन रविकान्तमयेन सेतुना सेतुसदृशेनाध्वना सूर्यकान्तकुट्टिमाध्वनेत्यर्थः । गच्छतां सञ्चरतां चरणौ चरणावित्यर्थः । स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेणेति जातौ द्विवचनम् । शिशिरे शिशिरर्तौ तत्रापि निशि हिमं पुरा नो दुनोति नापीडयत् यावत्पुरा निपातयोर्लट् ॥ अत्र सेतो रुष्मा सम्बन्धेऽपि तत्सम्बन्धोक्ते रतिशयोक्तिः

शिशिरे निशि गच्छतां पुरा
चरणौ यत्र दुनोति नो हिमम् ॥ ९३ ॥

विधुदीधितिजेन यत्पथं
पयसा नैषधशीलशीतलम् ।
शशिकान्तमयं तपागमे
कलितीव्रस्तपति स्म नातपः ॥ ९४ ॥

परिखावलयच्छलेन या
न परेषां ग्रहणस्य गोचरा ।
फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥ ९५ ॥

तत्रोत्तरस्याः पूर्वसापेक्षत्वात् सङ्करः ॥ ९३॥

बिध्विति । विधुदीधितिजेन इन्दुकरसम्पर्कजनेन पयसा सलिलेन नैषधस्य नलस्य शीलं वृत्तं स्वभावो वा तद्वच्छीतलं शशिकान्तमयं यत्पथं यस्या नगर्याः पन्थानं तपागमे ग्रीष्मप्रवेशे कलितीव्रः कलिकालवच्चण्डः आतपः न तपति स्म । नलकथायाः कलिनाशकत्वादिति भावः । अत्र नगरपथस्य इन्दूपलपयः सम्बन्धोक्ते रतिशयोक्तिः तत्सापेक्षत्वादुपमयोः सङ्करः ॥ ९४ ॥

परिखेति । परिखावलयच्छलेन परिखावेष्टनव्याजेन कुण्डलनां मण्डलाकाररेखां अवापिता परेषां शत्रूणां ग्रहणस्याक्रमणस्य अन्यत्र अन्येषां ग्रहणस्य ज्ञानस्य न गोचरा अविषया या नगरी विषमा दुर्बोधा फणिभाषित भाष्यफक्किका पतञ्जलिप्रणीत महाभाष्यस्य कुण्डलि ग्रन्थः तद्वदिति शेषः । अत्र नगर्याः कुण्डलिग्रन्थत्वेनोत्प्रेक्षा सा च परिखावलयच्छलेनेति अपह्नवोत्थापितत्वात् । सापह्नवा व्यञ्जकाप्रयोगाद्गम्या ॥ ९५ ॥

मुखपाणिपदाक्षि पङ्कजैः
रचिताङ्गेष्वपरेषु चम्पकैः ।
स्वयमादित यत्र भीमजा
स्मरपूजाकुसुमस्रजः श्रियम् ॥ ९६ ॥
जघनस्तनभारगौरवा
द्वियदालम्ब्य विहर्तुमक्षमाः ।
ध्रुवमप्सरसोऽवतीर्य यां
शतमध्यासत तत्सखीजनः ॥ ९७ ॥
स्थितिशालिसमस्तवर्णतां
न कथं चित्रमयी बिभर्तु या ।

सुखेति । यत्र नगर्यां मुखञ्च पाणी च पदे च अक्षिणी च यस्मिन् तस्मिन् प्राण्यङ्गत्वाद्द्वन्द्वैकवत् भावः पङ्कजैः रचिता सृष्टा अपरेषु मुखादिव्यतिरिक्तेष्वङ्गेषु चम्पकैश्चम्पकपुष्पैः रचिता सर्वत्र सादृश्याद्व्यपदेशः भीमजा भैमी स्वयं स्मरपूजा कुसुमस्रजः श्रिय शोभामादित आत्तवती। ददातेर्लुङि स्थाघ्वोरिच्चेतीत्वं ह्रस्वादङ्गादिति सलोपः । अत्र अन्यश्रियोऽन्यया सम्भवात् श्रियमिव श्रियमिति सदृश्याक्षेपान्निदर्शना भेदः तथा तदङ्गानां पङ्कजाद्यभेदोक्ते रतिशयोक्तिः तदुत्थापिता चेयं निदर्शनेति सङ्करः ॥ ९६ ॥

जघनेति । जघनानि च स्तनौ च जघनस्तनं प्राण्यङ्गत्वाद्द्वन्द्वैकवद्भावः तदेव भारः तस्य गौरवात् गुरुत्वाद्वियदालम्ब्य विहर्तुमक्षमाः शतं शतसंख्याकाः विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोरित्यमरः । अप्सरसोऽवतीर्य स्वर्गादागत्य तत्सखीजनः सत्यः 'जातावेकवचनं' यां नगरीमध्यासत अध्यतिष्ठन् अधिशीङ्स्थासां कर्मेति कर्मत्वं ध्रुवमित्युत्प्रेक्षा । अप्सरःकल्पाः शतसंख्या एनामुपासन्त इत्यर्थः ॥ ९७ ॥

स्थितीति ॥ चित्रमयी आश्चर्यप्रचुरा आलेख्यप्रचुरा च आलेख्या-

स्वरभेदमुपैतु या कथं
कलितानल्पसुखारवा न वा ॥ ९८ ॥
स्वरुचारुणया पताकया
दिनमर्केण समीयुषोत्तृषः ।
लिलिहुर्बहुधा सुधाकरं
निशि माणिक्यमया यदालयाः ॥ ९९ ॥
लिलिहे स्वरुचा पताकया
निशि जिह्वानिभया सुधाकरम् ।

स्वर्ययोस्त्रिय मित्यमरः । या नगरी स्थित्या मर्यादया स्थायित्वेन च शालन्ते ये ते समस्ता वर्णा ब्राह्मणादयः शुक्लादयश्च यस्याः तस्या भावस्तत्तां वर्णौ द्विजादौ शुक्लादावित्यमरः । कथं न बिभर्तु बिभर्त्त्वेवेत्यर्थः । कलितः प्राप्तः अनल्पानां बहूनां सुखानां आरवो बहुसुखानां ब्रह्मसुख परमसुखानां च आरवः शब्दो यस्याःसा या पुरी स्वरस्य ध्वनेर्भेदं नानात्वं स्वः स्वर्गादभेदं च कथं वा नोपैतु उपैत्वेवेत्यर्थः । उभयत्रापि सति कारणे कार्यं भवेदेवेति भावः । अत्र केवलप्रकृत श्लेषालङ्कारः । उभयोरप्यर्थयोः प्रकृतत्वात् किन्तु एकनाले फलद्वयवदेकस्मिन्नेव शब्दे अर्थद्वयप्रतीतेरर्थश्लेषः प्रथमार्धे । द्वितीये तु जतुकाष्ठवदेकवद्भूता शब्दद्वयादर्थद्वय प्रतीतेः शब्दश्लेषः ॥ ९८ ॥

स्वरुचेति । माणिक्यमयाः पद्मरागमयाः यदालयाः यस्यां नगर्यां गृहाः दिनं दिने अत्यन्तसंयोगे द्वितीया । समीयुषा सङ्गतेन अर्केण हेतुना उत्तृषः अर्कसम्पर्कादुत्पन्नपिपासाः सन्तः स्वरुचा स्वप्रभया अरुणया आरुण्यं प्राप्तयेति तद्गुणालङ्कारः तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिरिति लक्षणात् पताकया रसनायमानयेति भावः सुधाकरं बहुधा लिलिहुः आस्वादयामासुरित्यर्थः अह्नि सन्तप्ता निशि शीतोपचारं कुर्वन्तीति भावः । अत्र गृहाणां सन्तापनिमित्तः सुधाकरलेहनात्मकशीतोपचारः उत्प्रेक्ष्यते साचोक्ता तद्गुणोत्थेति सङ्करः व्यञ्जकाप्रयोगाद्गम्या ॥ ९९ ॥

श्रितमर्ककरैः पिपासु य
न्नृपसद्मामलपद्मरागजम् ॥ १०० ॥
अमृतद्युतिलक्ष्म पीतया
मिलितं यद्वलभीपताकया ।
वलयायितशेषशायिनः
सखितामादित पीतवाससः ॥ १०१ ॥
अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना ।

अथानयैव भङ्ग्या राजभवनं वर्णयति । लिलिह इति । अमलं पद्मरागजं यस्यां नगर्यां नृपसद्म राजभवनं अर्ककरैः श्रितं अतिसामीप्यादभिव्याप्तं श्रयतेः कर्मणि क्तः श्रिणातेः पक्वार्थादिति केचित् । तदा ह्रस्वश्चिन्त्यः प्रकृत्यन्तरं मृग्यमित्यास्तां तत् । अतएव पिपासु तृषितं सत् पिबतेः सन्नन्तादु प्रत्ययः । स्वकीया रम्यस्यान्तया स्वरुचा तद्रुपिसयेत्यर्थः । अत एव जिह्वानिभया पताकया सुधाकरं लिलिहे आस्वादयामास । लिहेः कर्त्तरि लिट् । स्वरितत्वादात्मनेपदं अलङ्कारस्य पूर्ववत् जिह्वानिभयेत्युपमासङ्करस्य विशेषः ॥१००॥

अमृतेति । पीतया पीतवर्णया यस्या नगर्याः वलभ्यां कूटागारन्तु वलभिरित्यमरः । पताकया मिलितं सामीप्यात्सङ्गतं अमृतद्युतिलक्ष्म चन्द्रलाञ्छनं वलयायिते वलयीभूते शेषे शेत इति तच्छायिनः पीतवाससः पीताम्बरस्य विष्णोः सखितां सदृशतामादित अग्रहीदित्युपमालङ्कारः ॥ १०१ ॥

अश्रान्तेति । यस्याः नगर्याः प्रासादे दुकूलं वल्लिरिव दुकूलवल्लिः दुकूलमयी पताकेत्यर्थः । अश्रान्तेन श्रुतिपाठेन नित्यवेदपाठेन पूताभ्यः पवित्राभ्यः रसनाभ्यो जिह्वाभ्यः आविर्भूतेषु भूरिस्तवेषु अनेकस्तोत्रेषु अजिह्मेन अकुण्ठेन ब्रह्मणो मुखाना मोघेन हेतुना विघ्निता सञ्जातविघ्ना नवस्वर्गक्रिया नूतनस्वर्ग सृष्टिरेव केलिः लीला यस्य तेन गाधि-

पूर्व्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥ १०२ ॥

यदतिविमलनीलवेश्मरश्मि
भ्रमरितभाः शुचिसौधवस्त्रवल्लिः ।
अलभत शमनस्वसुः शिशुत्वं
दिवसकराङ्कतले चला लुठन्ती ॥ १०३ ॥

स्वप्राणेश्वरनर्म्महर्म्म्यकटकातिथ्यग्रहायोत्सुकं
पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी ।

सुतेन विश्वामित्रेण पूर्वं ब्रह्मप्रार्थनात्पूर्वं सामिघटिता अर्धस्पृष्टा सामित्वर्द्धे जुगुप्सन इत्यमरः । मुक्तापश्चान्मुक्ता मन्दाकिनी नु आकाशगङ्गा किं अनिलस्य कर्तुरान्दोलनैश्चलनैर्दिवि आकाशे अखेलत् विजहारेत्युत्प्रेक्षा । एषा कथा त्रिशङ्कूपाख्याने द्रष्टव्या शार्दूलविक्रीडितवृत्तं सूर्याश्वैर्मसजास्तताः स गुरवः शार्दूलविक्रीडितं इति लक्षणात् ॥१०२॥

यदिति । यस्या नगर्याः अतिविमलैर्नीलवेश्मनः इन्द्रनीलनिकेतनस्य रश्मिभिः भ्रमरिता भ्रमरीकृता भ्रमरशब्दात्तत्करोतीति ण्यन्तात् कर्मणि क्तः वस्त्राग्राश्च भ्रमरैर्भाव्यमिति भावः । तथा भूता भाः छाया यस्याः सा श्यामीकृत प्रभेत्यर्थः । अतएव तद्गुणालङ्कारः शुचिः स्वभावतः शुभ्रा सौधस्य वस्त्रमेव वल्लिः वस्त्रवल्लिः पताकेत्यर्थः । रूपक समासः । भ्रमरितभा इति रूपकाद्देव साधकात् दिवसकरस्य सूर्यस्य अङ्कतले समीपदेशे उत्सङ्गप्रदेशे च चला चपला लुठन्ती परिवर्त्तमाना सती शमनस्वसुर्यमुनायाः शिशुत्वं शैशवमलभत बालयमुनेव बभावित्यर्थः । बालिकाश्च पितुरङ्के लुठन्तीति भावः । अत्रान्यस्य शैशवेनान्यसम्बन्धासम्भवेऽपि तत्सदृशमिति सादृश्याक्षेपान्निदर्शना पूर्व्वोक्ता तद्गुणरूपकाभ्यां सङ्कीर्णा ॥ १०३ ॥

स्वेति । यत्कामिनी यन्नगराङ्गना विमानेन कलितं कान्तं व्योम याभिस्ताः साक्षादप्सरसो दिव्याङ्गनेवा भवत् । स्त्रियां बह्वप्सरस इत्यभिधाना-

साक्षादप्सरसो विमानकलितव्योमान एवाभव
न्यन्न प्राप निमेषमभ्रतरसा यान्ती रसादध्वनि ॥ १०४ ॥
वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भै
र्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः ।
कस्यानोत्तानगाया दिवि सुरसुरभेरास्यदेशंगताग्रै
र्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥ १०५ ॥
विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः
शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् ।

देकत्वेऽपि बहुवचनप्रयोगः कृतः यद्वा आत्मनिजकेलिसौधशिखरादपादानात् स्वप्राणेश्वरस्य नर्महर्म्यं क्रीडासौधं तस्य कटकाञ्चितत्वादातिथ्यस्य ग्रहाय स्वीकाराय तत्र विश्रमार्थमित्यर्थः । उत्सुकमुद्युक्तां गच्छन्तमित्यर्थः । पयोदं मेघमारुह्य रसाद्रागाद् यान्ती गच्छन्ती अध्वनि अभ्रतरसा मेघवेगेन हेतुना निमेषं न प्राप अत्र नगरामराङ्गनयोर्भेदेऽपि अनिमेषमेघारोहणव्योमयानैः सैव इत्यभेदोक्तेरतिशयोक्तिभेदः शार्दूलविक्रीडित वृत्तम् ॥ १०४ ॥

वैदर्भीति । उत्तानायै देव गवावहन्तीति श्रुत्यर्थमाश्रित्याह । वैदर्भीकेलिशैले मरकतशिखरादुत्थितैः अथ ब्रह्माण्डाघातेन भग्नो स्यदजमदो वेगगर्वौ येषां तत्तया ह्रिया धृतं अवाङ्मुखत्वं यैस्तैरधोमुखैः अतएव दिवि उत्तानगाया ऊर्द्ध्वमुखाया इत्यर्थः । कस्याः सुरसुरभेः देवगव्या आस्यदेशं गताग्रैरंशुभिरेव दर्भैर्यस्याः नगर्याः सम्बन्धि गोग्रासप्रदानव्रतसुकृतमविश्रान्तं नोज्जृम्भते स्म किन्तु सर्वस्य अपि ग्रासदानाद्युत्तत्सुकृतमेवोज्जृम्भितमित्यर्थः । अत्रात्तमालङ्कारोऽयमिति केचित् अंशुदर्भाणां ब्रह्माण्डाघाताद्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः भेदः । स्रग्धरावृत्तं म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धराकीर्तितेयमिति लक्षणात् ॥ १०५ ॥

विधुरिति । तत्र तस्यां नगर्यां शशिदृषदुपक्लृप्तैश्चन्द्रकान्तशिलाबद्धैः

विफलितजलसेकप्रक्रियागौरवेण
व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥ १०६ ॥
अथ कनकपतत्रस्तत्र तां राजपुत्रीं
सदसि सदृशभासां विष्फुरन्तीं सखीनाम् ।
उडुपरिषदि मध्यस्थायिशीतांशुरेखा-
नुकरणपटुलक्ष्मीमक्षिलक्ष्मीचकार ॥ १०७ ॥
भ्रमणरयविकीर्णस्वर्णभासा खगेन
क्वचन पतनयोग्यं देशमन्विष्यताधः ।
मुखविधुमदसीयं सेवितुं लम्बमानः

अतएव विधुकरपरिरम्भात् चन्द्रकिरणसम्पर्कात् हेतोः आत्तनिष्यन्दैः जलप्रस्रवणैरेव पूर्णैस्तरूणामालवालैर्विफलितं व्यर्थीकृतं जलसेकस्य प्रक्रियायां प्रकारे गौरवं भारो यस्य तेन भैमीवनेन स हंसो हृतचित्तो व्यरचि कर्मणि लुङ् । अत्रालवालानां चन्द्रकान्तनिष्यन्दासम्बन्धेऽपि सम्बन्धोक्ते रतिशयोक्ति भेदः । एतदारभ्य चतुःश्लोकपर्यन्तं मालिनी वृत्तं न नमयय युतेयं मालिनी भोगिलोकैरिति लक्षणात् ॥१०६॥

अथेति । अथ दर्शनानन्तरं कनकपतत्रः स्वर्णपक्षी तत्र वने सदृशभासां आत्मतुल्यलावण्यानां सखीनां सदसि विस्फुरन्तीं स्फुरतिस्फुलत्योः परिनिविभ्यश्चेति षत्वं उडुपरिषदि तारकासमाजे मध्यस्थायिन्याः शीतांशुलेखायाश्चन्द्रकलायाः अनुकरणे पटुः समर्था लक्ष्मीः शोभा यस्याः सा इत्युपमालङ्कारः । तां राजपुत्रीं अक्षिलक्ष्मीचकार अद्राक्षीदित्यर्थः ॥ १०७ ॥

भ्रमणेति । अधो भूतले क्वचन कुत्रचित्पतनयोग्यं देशं स्थानं अन्विष्यता गवेषमाणेन अतएव भ्रमणरयेण विकीर्णा स्वर्णस्य भा दीप्तिर्यस्य तेन खगेन अमुष्या अयं अदसीयं वृद्धाच्छः त्यदादीनि चेति वृद्धिसंज्ञा मुखविधुं मुखेन्दुं सेवितुं लम्बमानः स्रंसमानः शशिपरिधिः

शशिपरिधिरिवोच्चैर्मण्डलस्तेन तेने ॥ १०८ ॥

अनुभवति शचीत्थं सा घृताचीमुखाभि
र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत्पक्षिणः प्रेक्ष्य भैमीम्
विपिनभुवि सखीभिः सार्द्धमाबद्धखेलाम् ॥ १०९ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा

चन्द्रपरिवेष इव उच्चैरुपरि मण्डलो वलयः तेने वितेने तनोतेः कर्मणि लिट् उत्प्रेक्षा स्वभावोक्तेः सङ्करः ॥ १०८ ॥

अनुभवतीति । विपिनभुवि वन प्रदेशे सखीभिः सहचरीभिः सख्यशिश्वीति भाषायामिति निपातनात् ङीप् । सार्द्धं आबद्धखेलां आबद्धक्रीडां क्रीडा खेला च कूर्दनमित्यमरः । भैमीं प्रेक्ष्य पक्षिणः सा प्रसिद्धा शची इन्द्राणी घृताचीमुखाभिः सहचरीभिः सह इत्थमुच्चैरुत्कृष्टं नन्दनानन्दं नन्दन सुखं नानुभवतीति मतिः बुद्धिरुदयासीदुत्थिता । अत्र प्रेक्ष्य मतिरिति मननक्रियापेक्षया समान कर्त्तृकत्वात् पूर्वकालत्वाच्च प्रेक्ष्येति क्त्वा निर्देशोपपत्तिः तावन्मात्रस्यैव तत्प्रत्ययोत्पत्तौ प्रयोजकत्वात् प्राधान्यन्त्वप्रयोजकमिति । न कश्चिद्विरोधः अत्रोपमानादुपमेयस्याधिक्योक्तेर्व्यतिरेकालङ्कारः भेद पधान साधर्म्यमुपमानोपमेययोः आधिक्यादल्पकथनाद्व्यतिरेकः स उच्यत इति लक्षणात् ॥ १०९ ॥

श्रीहर्षमित्यादि । व्याख्यातम् । द्वितीय एव द्वैतीयिकः द्वितीयादी-कक् स्वार्थे वा वक्तव्य इति कक् द्वैतीयीकतया मितो द्वितीयत्वेन गणितः द्वितीय इत्यर्थः अगमत् ॥ ११० ॥

काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥११०

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्याय
कोलाचल मल्लिनाथसूरिविरचितायां नैषधव्या-
ख्यायां जीवातु समाख्यायां
द्वितीयः सर्गः ॥ २ ॥

अथ तृतीयसर्गः ॥ ३ ॥

आकुञ्चिताभ्यामथ पक्षतिभ्यां
नभोविभागात्तरसावतीर्य ।
निवेशदेशाततधूतपक्षः
पपात भूमावुपभैमि हंसः ॥ १ ॥
आकस्मिकः पक्षपुटाहतायाः
क्षितेस्तदा यः स्वन उच्चचार ।

आकुञ्चिताभ्यामिति । अथ मण्डलीकरणानन्तरं हंसः । आकुञ्चिताभ्यां पक्षतिभ्यां पक्षमूलाभ्यां नभोविभागादाकाशदेशात्तरसा वेगेनावतीर्य निवेशदेशे उपनिवेशस्थाने आततौ विस्तारितौ धूतौ कम्पितौ च पक्षौ येन सः तथा सन्नुपभैमि भैम्याः समीपे सामीप्येऽव्ययीभावः नपुंसके ह्रस्वत्वं भूमौ पपात । स्वभावोक्तिरलङ्कारः ॥१॥

आकस्मिक इति । तदा पतनसमये पक्षपुटाहतायाः क्षितेः । अकस्माद्भवः आकस्मिकः अदृष्टहेतुको निर्हेतुक इत्यर्थः । यः स्वनो ध्वनिरुच्चचार उत्थितः स स्वनो अन्य विन्यस्तसदृशः । विषयान्तरनिविष्टदृष्टेस्तस्याः भैम्याः अन्तःकरणं द्राक्झटिति सम्भ्रान्तं ससंभ्रमं चकार

द्रागन्यविन्यस्तदृशः स तस्याः
सम्भ्रान्तमन्तः करणं चकार ॥ २ ॥
नेत्राणि वैदर्भसुतासखीनां
विमुक्ततत्तद्विषयग्रहाणि
प्रापुस्तमेकं निरुपाख्यरूपं
ब्रह्मेव चेतांसि यतव्रतानाम् ॥ ३ ॥
हंसं तनौ सन्निहितं चरन्तं
मुनेर्मनोवृत्तिरिव स्विकायाम् ।
ग्रहीतुकामादरिणाशयेन
यत्नादसौ निश्चलतां जगाहे ॥ ४ ॥

अकाण्डे सम्भावित शब्दश्रवणाच्चमत्कृतचित्ताभूदित्यर्थः स्वभावोक्तिः ॥२॥

नेत्राणीति । विदर्भाणां राजा वैदर्भः । तस्य सुतायाः भैम्याः सखीनां नेत्राणि विमुक्तास्तत्तद्विषयग्रहाः स्वदर्शग्रहणानि अन्यत्र तत्तद्विषयासङ्गो यैस्तानि सन्ति एकमेकचरम् । अद्वितीयञ्च नोपाख्यायत इति निरुपाख्यमवाच्यं उपमालङ्कारः । स्वरूपं च यस्य तं पुरोवर्त्तिनं हंसं तत्पदार्थभूतञ्च यत् यतव्रतानां योगिनां चेतांसि ब्रह्म परात्मानमिव प्राप्तः अत्यादरेण द्राच्चुरित्यर्थः ॥ ३ ॥

हंसमिति । असौ दमयन्ती मुनेर्मनोवृत्तिरिव स्विकायां स्वकीयायां प्रत्ययस्थात्कात् पूर्वस्येतीकारः । तनौ शरीरान्तिके अन्यत्र अभ्यन्तरे सन्निहितमाविर्भूतं चरन्तं सञ्चरन्तं वर्त्तमानं च हंसं मरालं परमात्मानं च हंसो विहङ्गभेदे च परमात्मनि मत्सरे इति विश्वः । आदरिणा निर्भीकेण शयेन पाणिना दरो स्त्रियां भये श्वभ्रे पञ्चशाखः शयः पाणिरित्यमरः । अन्यत्र आदरिणा आदरवता आशयेन चित्तेन ग्रहीतुकामा साक्षात् कर्त्तुकामा च यत्नात् निश्चलतां निश्चलाङ्गत्वं जगाहे जगाम ॥ ४ ॥

तामिङ्गितैरप्यनुमाय मायां
मयं न भैम्या वियदुत्पपात ।
तत्पाणिमात्मोपरिपातुकन्तु
मोघं वितेने प्लुतिलाघवेन ॥ ५ ॥
व्यर्थीकृतं पत्त्ररथेन तेन
तथावसाय व्यवसायमस्याः ।
परस्परामर्पितहस्ततालं
तत्कालमालीभिरहस्यतालम् ॥ ६ ॥
उच्चाटनीयः करतालिकानां
दानादिदानीं भवतीभिरेषः ।

तामिति । अयं हंसस्तां पूर्व्वोक्तां मायां कपटं इङ्गितैश्चेष्टितैरनुमाय निश्चित्यापि धैर्यात् स्थैर्यमास्थाय ल्यब्लोपे पञ्चमी । वियदाकाशं प्रति नोत्पपात नोत्पतितवान् आत्मनः उपरिपातुकम्पतयालुं लषपतेत्यादिना उकञ् प्रत्ययः । तस्याः पाणिं तु प्लुतिलाघवेन उत्पतनकौशलेन मोघं वितेने विफलयत्नं करोति आशाञ्च जनयति न तु पाणौ लगतीत्यर्थः ॥ ५ ॥

व्यर्थीकृतमिति । अस्याः भैम्याः व्यवसायं हंसग्रहणोद्योगं तेन पत्त्ररथेन पक्षिणा व्यर्थीकृतं तथावसाय ज्ञात्वा तत्कालं तस्मिन्काले अत्यन्तसंयोगे द्वितीया । स एव कालो यस्येति बहुव्रीहौ क्रियाविशेषणं परस्परां परस्परस्मामित्यर्थः । कर्मव्यतीहारे सर्व्वनाम्नो द्विर्भावः समासवच्च बहुलमिति बहुलग्रहणाद् समाससद्भावे पूर्व्वपदस्य प्रथमैकवचनं कस्कादित्वाद्विसर्जनीयस्य सत्वं उत्तरपदस्य यथायोगं द्वितीयाद्येकवचनं स्त्रीपुंसकयोरुत्तरपदस्याया विभक्तेराम्भावो वक्तव्य इति विकल्पादामादेशः । अर्पितहस्ततालं दत्त हस्तताडनं यथा तथा आलीभिः सखीभिरलं अत्यर्थं अहस्यत हसितं भावे लङ् ॥ ६ ॥

उच्चाटनीय इति । हे सख्यः ! भवतीभि रेष हंसः करतालिकानां

यान्वेति मां द्रुह्यति मह्यमेव
साचेत्युपालम्भि तयालिवर्गः ॥ ७ ॥
धृताल्पकोपा हसिते सखीनां
छायेव भास्वन्तमभिप्रयातुः ।
श्यामाथ हंसस्य करानवाप्ते
र्मन्दाक्षलक्ष्या लगति स्म पश्चात् ॥ ८ ॥
शस्ता न हंसाभिमुखी पुनस्ते
यात्रेति ताभिश्छलहास्यमाना ।

दानादन्योन्य हस्तताडन करणादुच्चाटनीयः निष्कासनीयः किमिति काकुः उच्चाटनीय एवेत्यर्थः । अत्र आसु मध्ये या मा मन्वेति सा मह्यमेव द्रुह्यति मां जिघांसतीत्यर्थः । क्रुध द्रुहेत्यादिना सम्प्रदानत्वात् चतुर्थी । इतीयं तया भैम्या आलिवर्गः सखीसङ्घः । उपालम्भि अशापि शापेनैव निवारित इत्यर्थः ॥ ७ ॥

धृतेति । अथ सखी निवारणानन्तरं सखीनां हसिते हास निमित्ते धृताल्पकोपा तासु ईषत्कोपा इत्यर्थः । भास्वन्तमभिप्रयातुः सूर्याभिमुखं गच्छतः छाया अनातपरेखेव श्यामा यौवनमध्यस्था श्यामा यौवनमध्यस्था इत्युत्पलमालायां । अन्यत्र श्यामा नीला हंसस्य कर्मणि षष्ठी । करेण हस्तेन अनवाप्तेरग्रहणाद्धेतोर्मन्दाक्षं ह्रीस्तेन लक्ष्या उपलक्ष्या ह्रीणा सतीत्यर्थः । अन्यत्र हंसस्य सूर्य्यस्य करानवाप्तेः । अंशु संस्पर्शाभावात् मन्दाक्षैरपटुदृष्टिभिर्लक्ष्या ग्राह्या तैः छाया लक्ष्यते न प्रकाश इति भावः । पश्चाल्लगति स्म पृष्ठे लग्नाभूत् प्राप्तग्रहणया तमन्वगात् रविश्वेतच्छदौ हंसौ बलिहस्तांशवः करा इति चामरः ॥ ८ ॥

शस्तेति । तवेयं हंसस्य श्वेतच्छदस्य सूर्यस्य चाभिमुखी यात्रा गमनं न शस्ता न प्रशस्ता श्रेयस्करी न शास्त्रविरोधात् । श्रमसन्ताप दृष्ट दोषाच्चेति भावः । इतीत्यन्ताभिः छलेन व्याजोक्त्या हास्यमाना सती भाविप्रियावेदको मङ्गलमूर्त्तित्वादागामि शुभ सूचकः एष हंसो मे सम-

साहस्म नैवाशकुनीभवेन्मे
भाविप्रियावेदक एष हंसः ॥ ९ ॥
हंसोऽप्यसौ हंसगतेः सुदत्याः
पुरः पुरश्चारु चलन् बभासे ।
वैलक्ष्यहेतोर्गतिमेतदीया-
मग्रेऽनुकृत्योपहसन्निवोच्चैः ॥ १० ॥
पदेपदे भाविनि भाविनी तं
यथा करप्राप्यमवैति नूनम् ।
तथा सखेलं चलता लतासु
प्रतार्य्य तेनाचकृषे कृशाङ्गी ॥ ११ ॥

नाशकुनी भवेदेव किन्तु शकुनमेव भवत्वित्यर्थः । अपक्षी न भवेदिति च गम्यते शकुनन्तु शुभाशंसा निमित्ते शकुनिः पुमानित्यमरः । अभूततद्भावे च्विः विध्यादिसूत्रेण प्रार्थने लिङ् । इत्याहस्म अवोचत् ब्रुवः पञ्चाना माहादेशः एतेन तदीय यात्रानिषेधः स्रवणदोषः परिहृतो वेदितव्यः ॥ ९ ॥

एवं दमयन्ती व्यापारमुक्त्वा सम्प्रति हंसस्य व्यापारमाह । हंसोऽपीति । असौ हंसोऽपि हंसस्य गतिरिव गतिर्य्यस्यास्तस्याः सुदत्याः शोभनदन्तायाः भैम्याः सुदती व्याख्याता । पुरःपुरः वीप्सायां द्विर्भावः । अग्रे समन्ताच्चारु चलन् रम्यं गच्छन् सन् वैलक्ष्यमेव हेतुस्तस्य वैलक्ष्यहेतोः अहो मामय मतिविड़म्बयतीति तस्या अपि विस्मयजननार्थमित्यर्थः । विलक्षो विस्मयान्वित इत्यमरः । षष्ठी हेतुप्रयोग इति षष्ठी । एतदीयां गतिमनुकृत्य अभिनीय उच्चैरुप हंसन्निवेत्युत्प्रेक्षा बभासे बभौ । लोके परिहासकाः तच्चेष्टाद्यनुकरणेन परान् विलक्षयन्ति ॥१०॥

पदेपद इति । भावयन्तीति भाविनी हंसग्रहणमेव मनसा भावयन्ती कृशाङ्गी भैमी भाविनि भविष्यत्यनन्तर इत्यर्थः । भविष्यति गम्यादय इति

रुषा निषिद्धालिजनां यदैनां
छायाद्वितीयां कलयाञ्चकार ।
तदा श्रमाम्भःकणभूषिताङ्गीं
स कीरवन्मानुषवागवादीत् ॥ १२ ॥
अये ! कियद्यावदुपैषि दूरं ?
व्यर्थं परिश्राम्यसि वा किमर्थम् ? ।
उदेति ते भीरपि किन्नु ? बाले !
विलोकयन्त्या न घनावनालीः ॥ १३ ॥
वृथार्पयन्तीमपथे पदं त्वां
मरुल्ललत्पल्लवपाणिकम्पैः ।

साधु । पदे पदे तं हंसं यथा करप्राप्यं करग्राह्यं नूनं निश्चितमवैति प्रत्येति तथा सखेलं चलता गच्छता तेन हंसेन प्रतार्य वञ्चयित्वा लतासु आचकृषे आकृष्टा एकान्तं नीतेत्यर्थः ॥ ११ ॥

रुषेति । रुषा निषिद्धालिजनां निवारितसखीजनां एनां यदा छाया एव द्वितीया यस्यास्तामेकाकिनीं कलयां चकार विवेद तदा श्रमाम्भःकणभूषिताङ्गीं स्वेदाम्बुलवपरिष्कृतशरीरां खिन्नगातान्तां स हंसः कीरवत् शुकवन्मनुष्यस्येव वाग्यस्य स सन्नवादीत् ॥ १२ ।

अयेति । अये बाले ! व्यर्थं कियद्दूरं यावदुपैषि उपैष्यसि ? यावत्पुरानिपातयोर्लट् । किमर्थं परिश्राम्यसि वा ? घनाः सान्द्राः वनालीर्वनपङ्क्तीर्विलोकयन्त्यास्ते भीरपि नोदेति किन्नु ? ॥ १३ ॥

वृथेति । वृथा व्यर्थमेव न पन्था अपथं ऋक्पूरित्यादिना समासान्तः अपथं नपुंसकं तस्मिन्नपथे दुर्मार्गे अकृत्ये च पदं पादं व्यवसायं च अर्पयन्तीं पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः । मरुता ललन् चलन् पल्लव एव पाणिस्तस्य कम्पैः कपोतहुङ्कारगिरा च वनालिः आलीव सखीव प्रतिषेधति निवारयति पश्य इति वाक्यार्थः कर्म । यथा लोके

आलीव पथ्य प्रतिषेधतीयं
कपोतहुङ्कारगिरा वनालिः ॥ १४ ॥
धार्य्यः कथंकारमहंभवत्या
वियद्विहारी वसुधैकगत्या ।
अहो ! शिशुत्वं तव खण्डितं न
स्मरस्य सख्या वयसाप्यनेन ॥ १५ ॥
सहस्रपत्रासनपत्रहंस-
वंशस्य पत्राणि पतत्रिणः स्मः ।

अमार्गप्रवृत्तं सुहृज्जनः पाणिना वाचा च वारयति तद्वदित्यर्थः । अतएव पक्षव पाणीत्यादौ रूपकाश्रयणं तत्सङ्कीर्णा च वनमालीवेत्युपमा ॥ १४ ॥

धार्येति । एकत्रैव गतिर्यस्यास्तया एकगत्या वसुधायामेकगत्या भूमात्रचारिण्येत्यर्थः । शिव भागवतवत्समासः । भवत्या वियद्विहारी खेचरोऽहं कथङ्कारं कथमित्यर्थः । अन्यथैवं कथमित्थं सुसिद्धाप्रयोगश्चेदिति कथं शब्दोपपदात्करोतेर्णमुल् । धार्यो धर्तुं ग्रहीतुं शक्य इत्यर्थः । शकि लिङ् चेति चकाराच्छक्यार्थे कृत्यप्रत्ययः । अनेन स्मरस्य सख्या सखिना तदुद्दीपकेन वयसा यौवनेन सखिशब्दस्य भाषितपुंस्कत्वात् पुंवद्भावः । न खण्डितं न निर्वर्तितं अहो विरुद्धवयसोरेकत्र समावेशादाश्चर्यमित्यर्थः । अत्राधार्यत्वस्य वसुधागतिवियद्विहारपदार्थहेतुकत्वादेकः काव्यलिङ्गभेदः । तथा शैशवाखण्डनस्य पूर्ववाक्यार्थहेतुकत्वादपर इति सजातीयसङ्करः ॥ १५ ॥

अथ प्रस्तुतोपयोगितया निजान्वयं निवेदयति । सहस्रेति । सहस्रपत्रासनस्य कमलासनस्य पत्रहंसाः वाहनहंसाः तेषां वंशस्य कुलस्य वेणोश्च पत्राणि वाहनानि पर्णानि च वंशो वेणुकुले वर्गे पत्रं स्याद्वाहने पर्णे इति विश्वः । पतत्रिणः स्मः ब्रह्मवाहनहंसवंश्याः स्वयमित्यर्थः । अस्मानिव पश्यन्तीति अस्मादृशास्मद्विधानात्त्यदादिष्वित्यादिना दृशेः

अस्माद्दृशां चाटुरसामृतानि
स्वर्लोकलोकेतरदुर्लभानि ॥ १६ ॥
स्वर्गापगाहेममृणालिनीनां
नालामृणालाग्रभुजो भजामः ।
अन्नानुरूपां तनुरूपऋद्धिं
कार्य्यं निदानाद्धि गुणानधीते ॥ १७ ॥
धातुर्नियोगादिह नैषधीयं
लीलासरः सेवितुमागतेषु ।

Very

किन्तु चाटुषु सुभाषितेषु ये रसाः शृङ्गारादयः त एव अमृतानि स्वर्लोके लोका जनाः लोकस्तु भुवने जन इत्यमरः । तेभ्यः इतरैर्मनुष्यैर्दुर्लभानि लब्धुमशक्यानीत्यर्थः ॥१६

अथ स्वाकारस्य कनकमयत्वे कारणमाह । स्वर्गेति । स्वर्गापगा स्वर्णदी तस्या हेममृणालिन्यः । तासां या नालाः काण्डाः । यानि मृणालानि कन्दाश्च अत्र नालामृणालशब्दस्य शब्दानुशासनं कोषं शब्दानामिति वस्समासे गुणभूतेन सम्बन्धः सोढव्यः नालानालमयास्त्रियामित्यमर वचनान्नालेति स्त्रीलिङ्गनिर्देशः न च तत्रापि सन्देहः । तद्व्याख्यानेषु देशान्तरकोषेषु च स्त्रीलिङ्गपाठस्यैव दर्शनात् तथा च दशमे सर्गे प्रयोक्ष्यते मृदुत्वमप्रौढ मृणालनालया इति नाला स्याद्बिसकन्द इति विश्वः तेषामग्राणि भुञ्जत इति तद्भुजः वयमिति शेषः । अन्नानुरूपामाहारसदृशीं तनोः शरीरस्य रूपऋद्धिं वर्णसमृद्धिं ऋत्यक इति प्रकृति भावः भजामः प्राप्ता स्म इत्यर्थः । तथा हि कार्यं जन्य द्रव्यं निदानादुपादानात् व्याख्यातोपयोग इत्युपादानतागुणान् रूपादिविशेष गुणान् अधीते प्राप्नोतीत्यर्थः । प्राप्तिविशेष वाचिन स्वत्वसामान्यलक्षणात् प्रायेण आहारपरिणति विशेष पूर्विकाः प्राणिनां कायकान्तय इति भावः सामान्येन विशेष समर्थनरूपोऽर्थान्तर न्यासः ॥१७॥

अथात्मनः स्वालोक सञ्चरणे कारणमाह । धातुरिति । धातुर्नि-

हैमेषु हंसेष्वहमेक एव
भ्रमामि भूलोकविलोकनोत्कः ॥ १८ ॥
विधेः कदाचिद्भ्रमणीविलासे
श्रमातुरेभ्यः स्वमहत्तरेभ्यः ।
स्कन्धस्य विश्रान्तिमदां तदादि
श्राम्यामि नाविश्रमविश्वगोऽपि ॥ १९ ॥
बन्धाय दिव्ये न तिरश्चि कश्चित्
पाशादिरासादितपौरुषः स्यात् ।

ब्रह्मणो नियोगादादेशादिह भूलोके नैषधीयं नलीयं लीलासरः सेवितुं क्रीड़ा सरसि विहर्तुमित्यर्थः । आगतेषु हैमेषु हेमविकारेषु । विकारार्थेऽण् प्रत्ययः । नस्तद्धित इति टिलोपः । हंसेषु मध्ये अहमेक एव भूलोकविलोकने उत्कः उत्सुकः सन् प्रमना विमना अन्तर्मनाः स्यादुत्क उन्मना इत्यमरः । उच्छब्दात्कन्प्रत्ययान्तो निपातः भ्रमामि पर्यटामि ॥ १८ ॥

अनवरत भ्रमणेऽपि श्रमजये कारणमाह । विधेरिति । कदाचिद्विधेः ब्रह्मणो भ्रमणी विलासे भुवनभ्रमणविनोदे श्रमातुरेभ्यः अवसन्नेभ्यः स्वमहत्तरेभ्यः स्वकुलवृद्धेभ्यः स्कन्धस्यांसस्य स्कन्धो भुजशिरोऽंसो स्त्रीत्यमरः । विश्रान्तिं अदां प्रादां स्वयमेव एवाहमित्यर्थः । ददातेर्लुङि गातिस्थेत्यादिना सिचो लुक् । तदादि तत्प्रभृति अविश्रममनवरतं नोदात्तोपदेशेत्यादिना श्रमेर्घञि वृद्धि प्रतिषेधः । विश्वगो विश्वं गच्छन्नपि अन्यत्रापि दृश्यत इति गमेर्डप्रत्ययः । न श्राम्यामि न खिद्ये ॥१९॥

अथ व्याधादिबन्धनमपि न मेऽस्तीत्याह । बन्धायेति । मादृशि दिव्ये तिरश्चि विषये विरलोदयस्य दुर्लभजन्मनो नरस्य मर्त्यस्य प्रायेणैवंविधो नास्तीत्यर्थः । अत्र विरो विगतरेफः स चासौ लोदयो लोदयवांश्च मत्वर्थीयोऽकारः । तस्य रेफस्थानाधिष्ठितलकारस्य नलस्येत्यर्थः । प्रब्दधर्मोऽर्थ उपचर्यते भुज्यत इति भोगः सुखं स्वर्गभोगस्य स्वर्गसुखस्य

एकं विना मादृशि तन्नरस्य
स्वर्भोगभाग्यं विरलोदयस्य ॥ २० ॥
इष्टेन पूर्त्तेन नलस्य वश्याः
स्वर्भोगमत्रापि सृजन्त्यमर्त्याः ।
महीरुहा दोहदसेकशक्ते
राकालिकं कोरकमुद्गिरन्ति ॥ २१ ॥
सुवर्णशैलादवतीर्य्य तूर्णं
स्वर्वाहिनीवारिकणावकीर्णैः ।

भाग्यं तत्प्रापकादृष्टमित्यर्थः स्वप्राप्तेस्तत्प्रापकत्वादिति भावः । तदेकं विना कश्चित् पाशादिः पाशाद्युपायः । बन्धाय बन्धनार्थं मासादितपौरुषः प्राप्तिव्यापारो न स्यात् स्वर्भोग भाग्यैक सुलभा वयं नोपायान्तरसाध्या इत्यर्थः । अस्मादृक् संसर्गादन्यः को नाम स्वर्गपदार्थ इति भावः ॥ २० ॥

तच्च भाग्यं नलस्यैवास्तीत्याह इष्टेनेति । इष्टेन यागेन पूर्त्तेन खातादि कर्मणा च । त्रिष्वथ क्रतु कर्मेष्टं पूर्त्तं खातादिकर्मणीत्यमरः । वश्याः वशङ्गता इति प्राग्दीव्यतीयो यत्प्रत्ययः । अमर्त्या देवा नलस्यात्रापि भूलोके स्वर्भोगं सृजन्ति स्वर्गसुखं सम्पादयन्तीत्यर्थः । ननु देवाश्च कथं लोकान्तर कायान्तर भोग्यं स्वर्गमिदानीं सृजन्तीत्याशङ्कां दृष्टान्तेन परिहरति । महीरुहो वृक्षाः दोहदस्य अकाल प्रसवोत्पादन द्रव्यस्य सेकस्य जलसेकस्य शक्तेः सामर्थ्यात्समानकाला वाद्यन्तौ उत्पत्तिविनाशावस्येत्याकालिकः उत्पत्त्यनन्तरविनाशीत्यर्थः । आकालिकडाद्यन्त वचन इति समानकाल शब्दस्याकाल शब्दादेशो ठञ् प्रत्ययान्तो निपातः । प्रकृते त्वकालभवं कोरकमुद्गिरन्तीत्यर्थः । तरुगुल्मलतादीनामकाले कुशलैः कृतं पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रियेति शब्दार्णवे दोहदवशाद्वृक्षा इव देवता अपि उत्कटपुण्यवशाददेशकालेऽपि फलं प्रयच्छन्तीत्यर्थः दृष्टान्तालङ्कारः ॥२१॥

तं वीजयामः स्मरकेलिकाले
पक्षैर्नृपं चामरबद्धसख्यैः ॥ २२ ॥
क्रियेत चेत्साधुविभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया ।
या स्वौजसां साधयितुं विलास
स्तावत् क्षमा नामपदं बहु स्यात् ॥ २३ ॥
राजा स यज्वा विबुधव्रजत्रा
कृत्वाध्वराज्योपमयैव राज्यम् ।

स्वर्भोगमेवाह सुवर्णेति । सुवर्णशैलान्मेरोस्तटं समवतीर्य अवरुह्य स्वर्वाहिनीवारिकणावकीर्णैः मन्दाकिनीजलबिन्दुसम्पृक्तैः चामरैः बद्धसख्यैस्तत्सदृशैः पक्षैः पतत्रैः स्मरकेलिकाले तं नृपं वीजयामः तादृक् पक्षवीजनैः सुरतश्रान्तिमपनुदाम इत्यर्थः ॥ २२ ॥

क्रियेतेति । साधु विभक्तिचिन्ता सज्जनविभागविचारः क्रियेत चेत्सानलाभिधाना व्यक्तिः मूर्तिः प्रथमाभिधेया प्रथमं परिगणनीया कुतः या व्यक्तिः स्वौजसां विलासैर्व्याप्तिभिः तावद्बहु तथा प्रभूतं नास्ति नामो नतिर्यस्येति अनामं अनम्रं पदं परराष्ट्रं साधयितुं स्वायत्तीकर्तुं क्षमा समर्था स्यात् । अन्यत्र साधुविभक्तिचिन्ता सत्यविभक्तिविचारः क्रियेत चेत् तदा सा प्रथमा व्यक्तिः प्रथमा विभक्तिः अभिधेया विचार्या यां स्वौजसां सु औजस् इत्येतेषां प्रत्ययानां विलासैः विस्तारैस्तावद्बहु अनेकं नामपदं सुबन्तपदं वृक्ष इत्यादिकं पदं साधयितुं निष्पादयितुं क्षमा अत्राभिधायाः प्रकृतार्थमात्रनियन्त्रितत्वाल्लक्षणायाश्चानुपपत्त्यभावेनाभावादप्रकृतार्थप्रतीतिर्ध्वनिरेव ॥ २३

राजेति । यज्वा तु विधिनेष्टवान् सुयजोर्ङ्वनिप् निमन्त्रिताः आमन्त्रिताः ये श्रोत्रियाः छान्दसा अधीतवेदा इत्यर्थः । श्रोत्रियच्छान्दसौ समावित्यमरः । श्रोत्रियश्छन्दोऽधीत इति निपातः । तस्मात्कृता दानेन तदधीनाकृता श्रीः सम्पद्येन सः राजा नलः अध्वरेषु यद्राज्य न्तदुपमया तस्मा-

भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः
पूर्वं त्वहो शेषमशेषमन्त्यम् ॥ २४ ॥
दारिद्र्यदारिद्रविणौघवर्षै-
रमोघमेघव्रतमर्थिसार्थे ।
सन्तुष्टमिष्टानि तमिष्टदेवं
नाथन्ति के नाम नलोकनाथम् ॥ २५ ॥
अस्मत् किल श्रोत्रसुधां विधाय
रम्भा चिरम्भामतुलां नलस्य ।
तत्रानुरक्ता तमनाप्य भेजे
तन्नामगन्धान्नलकूवरं सा ॥ २६ ॥

द्वयेनैव तद्ददेवेत्यर्थः । राज्यं विबुधा देवा विद्वांसश्च तद्व्रजत्वादानेन तत्सङ्गाधीनं कृत्वा देयेत्रा चेति चकारादितरत्र सातिप्रत्ययश्च तद्धितश्चा सर्वविभक्तिरित्यव्ययत्वं पूर्वं पूर्वनिर्दिष्टमध्वराज्यं शेषं हुतशेषं भुङ्क्ते अन्त्यं पश्चान्निर्दिष्टं राज्यन्तु शेषं कृत्स्नमखण्डं भुङ्क्ते अहो उपयुक्तादन्यः शेषः पूर्वस्या शेषस्य तथात्वं अन्त्यस्य अशेषत्वं कथं विरोधादित्याश्चर्यं अतएव विरोधाभासोऽलङ्कारः अखण्डमिति परिहारः ॥ २४ ॥

दारिद्र्येति । दारिद्र्यं दारयति निवर्तयतीति दारिद्र्य दारिणो द्रविणौघस्य धनराशेर्वर्षैरर्थिसार्थे विषये अमोघं मेघव्रतं वर्षुकत्व लक्षणं यस्य तं सन्तुष्टं दानहृष्टं इष्टदेवं यत्नाराधितसुरलोक नाथं तं नलं के नाम इष्टानि न नाथन्ति न याचन्ते सर्वेऽपि नाथन्त्येवेत्यर्थः । नाथतेर्याच्ञार्थस्य दुहादित्वाद्द्विकर्मकत्वम् ॥ २५ ॥

अस्मदिति । सा प्रसिद्धा रम्भा नलस्यातुलां अनुपमां भां सौन्दर्यमस्मत् मत्तः श्रोत्रसुधां विधाय कर्णौ अमृतं कृत्वा रसादा कर्ण्येत्यर्थः । तत्र तस्मिन्नले अनुरक्ता सती तं नलमनाप्य अप्राप्य आङ्पूर्वादाप्नोतेःक्त्वो ल्यबादेशः नञ् समासः । अन्यथात्वसमासे ल्यबादेशो न स्यात् तन्नामगन्धा-

स्वर्लोकमस्माभिरितः प्रयातैः
केलीषु तद्गानगुणान्निपीय
हाहेति गायन् यदशोचि तेन
नाम्नैव हाहा हरिगायनोऽभूत् ॥ २७ ॥

शृण्वन्सदारस्तदुदारभावं
हृष्यन्मुहुर्लोम पुलोमजायाः ।
पुण्येन नालोकत लोकपालः
प्रमोदवाष्पावृतनेत्रमालः ॥ २८ ॥

त्तस्य नलस्य नामान्तरसंसर्गाद्धेतोर्नलकूबरं कुवेरात्मजं भेजे किल तादृक्तस्य सौन्दर्यमिति भावः ॥ २६ ॥

स्वर्लोकमिति । केलीषु विनोदगोष्ठीषु तस्य नलस्य कर्तुर्गाने गुणान्निपीय इतः अस्माल्लोकात् स्वर्लोकं प्रयातैरस्माभिर्हरिगायनः इन्द्रगायको गन्धर्वः ण्युट् चेति गायतेः शिल्पिनि ण्युट्प्रत्ययः । गायन् यद्यस्मात् हाहेत्यशोचि तत तेनैव कारणेन नाम्ना हाहा अभूत् आलापाक्षरानुकारादिति भावः । हाहाहूहूश्चैव माद्याः गन्धर्वास्त्रिदिवौकसामित्यमरः । आलापाक्षरानुकारनिमित्तोऽयमाकारान्तः पुंसि चेति केचित् । हाहा खेदे हूहू हर्षे गन्धर्वेऽस्मू अनव्यये इति विश्वः । अव्ययमेवेति भोजः । अत्र शोकनिमित्तासम्बन्धेऽपि सम्बन्धादतिशयोक्तिः तया च गन्धर्वातिशायि गानमस्येति वस्तु व्यज्यते ॥ २७ ॥

शृण्वन्निति । नाकपाल इन्द्रः सदारः सवधूकः तस्य नलस्य उदारभावमौदार्यं शृण्वन्नत एव प्रमोदबाष्पैरानन्दाश्रुभिरावृत नेत्रमाल स्तिरोहितदृष्टिव्रजः सन् पुलोमजायाः शच्याः मुहुर्हृष्यन्नलानुरागादुल्लसल्लोमरोमाञ्चं पुण्येन शच्या भाग्येन नालोकत नापश्यत् अन्यथा मानसव्यभिचारापराधात् खण्डयेदित्यर्थः ॥ २८ ॥

सापीश्वरे शृण्वति तद्गुणौघान्
प्रसह्य चेतोहरतोऽर्द्धशम्भुः।
अभूदपर्णाङ्गुलिरुद्धकर्णा
कदा न कण्डूयनकैतवेन ॥ ६९ ॥

अलं सजन् धर्म्मविधौ विधाता
रुणद्धि मौनस्य मिषेण वाणीम्।
तत्कण्ठमालिङ्ग्य रसस्य तृप्तां
न वेद तां वेदजडः स वक्राम् ॥ ७० ॥

स्त्रियस्तदालिङ्गनभूर्न भूता
व्रतच्युतिः कापि पतिव्रतायाः।

सेति। ईश्वरे हरे प्रसह्यचेतो हरतो बलान्मनोहारिणस्तस्य नलस्य गुणौघान् शृण्वति सति सा प्रसिद्धा अर्धं शम्भोरर्धशम्भुः शम्भोरर्धाङ्गभूतेत्यर्थः। तथाचापसरणमशक्यमिति भावः। अपर्णा पार्वत्यपि कदा कण्डूयनकैतवेन कण्डूनोदनव्याजेन अङ्गुल्या रुद्धः पिहितः कर्णो यया सा नाभूत् अभूदेवेत्यर्थः। अन्यथा चित्तचलनादिति भावः ॥ ६९ ॥

अलमिति। विधाता ब्रह्मा अलमत्यन्तं धर्म्मविधौ सुकृताचरणे सजन् धर्म्मासक्तः सन्नित्यर्थः। वाणीं स्वभार्य्यां वाग्देवीं वर्णात्मिकाञ्च मौनस्य वाग्यमन व्रतस्य मिषेण रुणद्धि नलकथा प्रसङ्गान्निरुद्धे तस्या उभय्या अपि तदासङ्गभयादिति भावः। किन्तु वेदजडः छान्दसः विधाता तां उभयीमपि वाणीं तस्य नलस्य कण्ठं ग्रीवामालिङ्ग्य मुखमाश्रित्य च रसस्य तृप्तां तद्रागसन्तुष्टां अन्यत्र शृङ्गारादि रसपुष्टाञ्च सम्बन्धसामान्ये षष्ठीपूरणगुणेत्यादिना षष्ठीनिषेधादेव ज्ञापकादिति केचित्। वक्रां प्रतिकूलकारिणीं वक्रोक्त्यलङ्कारयुक्ताञ्च न वेद न वेत्ति विदो लटोवेति णलादेशः अशक्यरक्षाःस्त्रिय इति भावः। अत्र प्रस्तुत वाग्देवीकथनादप्रस्तुत वर्णात्मक वाणीवृत्तान्तप्रतीतेः प्रागुक्तरीत्या ध्वनिरेवेत्यनुसन्धेयम् ॥ ७० ॥

समस्तभूतात्मतया न भूतं
तद्भर्त्तुरीर्ष्याकलुषाणुनापि ॥ ३१ ॥
धिक् तं विधेः पाणिमजातलज्जं
निर्म्माति यः पर्व्वणि पूर्णमिन्दुम् ।
मन्ये सविज्ञः स्मृततन्मुखश्रीः
कृतार्द्धमौज्झद्भवमूर्द्ध्नि यस्तम् ॥ ३२ ॥
निलीयते ह्रीविधुरः स्वजैत्रं
श्रुत्वा विधुस्तस्य मुखं मुखान्नः ।

स्त्रियइति । पतिव्रतायाः स्त्रियः श्रीदेव्याः तद्भर्त्तुर्विष्णोः समस्तभूतात्मतया सर्व्वभूतात्मकत्वेन नलस्यापि विष्णुरूपत्वेनेत्यर्थः तदा लिङ्गनभूर्नलाश्लेषभवा कापि व्रतक्षतिः पातिव्रत्यभङ्गो न भूता नाभूत् अत एव तद्भर्त्तुर्विष्णोश्च ईर्ष्यया नलालिङ्गनभूवा अक्षमया यत्कलुषं कालुष्यं मनःक्षोभः दुःखादित्वेन अस्य धर्म्मधर्म्मिवचनत्वादतएव क्षीरस्वामी शस्तं चाथत्रिषु द्रव्ये पापपुण्य सुखादिचेत्यत्र आदिशब्दाज्ज्ञेयः कलुष शिवभद्राद्य इति उभय वचनेषु संजग्राह तस्याणुना लेशेनापि न भूतं नाभावि नपुंसके भावे क्तः अत्र शच्यादि चित्तचाञ्चल्योक्तेर्नलसौन्दर्य्ये तात्पर्य्यान्नानौचित्यदोषः ॥ ३१ ॥

धिगिति । तमजातलज्जन्निस्त्रपं विधेः पाणिं धिक् यः पाणिः स्मृततन्मुखश्रीरपि पर्व्वणि जातावेकवचनं पर्व्वस्वित्यर्थः । पूर्णमिन्दुं निर्म्माति अद्यापीति भावः सविज्ञ अभिज्ञ इति मन्ये यः पाणिःस्मृत तन्मुखश्रीः सन् तमिन्दुं कृत अर्द्धो एकदेशो यस्य तं कृतार्द्धमर्द्धनिर्म्मितमेव भवमूर्द्ध्नि हरशिरसि औज्झत् अतिसौन्दर्य्यमस्यास्यमिति भावः ॥ ३२ ॥

निलीयतइति । विधुश्चन्द्रः स्वस्य जैत्रं तृन्नन्तात्प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययः । तस्य नलस्य मुखं नोऽस्माकं मुखाच्छ्रुत्वा ह्रीविधुरः लज्जा विधुरः सन् कदापि दूरे सूर्य्ये दर्शेष्वित्यर्थः । कदापि समुद्रस्य पूरे प्रवाहे तद्-

सूरे समुद्रस्य कदापि पूरे
कदाचिदभ्रभ्रमदभ्रगर्भे ॥ २३ ॥
संज्ञाप्य नः स्वध्वजभृत्यवर्गान्
दैत्यारिरत्यञ्जनलास्यनुत्यै ।
तत्सङ्कुचन्नाभिसरोजपीता
द्धातुर्विलज्जं रमते रमायाम् ॥ २४ ॥
रेखाभिरास्ये गणनादिवास्य
द्वात्रिंशता दन्तमयीभिरन्तः ।

तदुत्पन्नत्वात् कदाचिदभ्रभ्रमदभ्रगर्भे आकाशे सञ्चरमाण मेघोदरे निलीयते अन्तर्धत्ते न कदाचिदपतः स्यात्तदत्यद्भुत इति भावः । अत्र विधोः स्वाभाविक सूर्यादिप्रवेशे पराजयप्रयुक्तं ह्रीनिलीनत्वोत्प्रेक्षा-व्यञ्जकाप्रयोगाद् गम्या ॥२३ ॥

संज्ञाप्येति । दैत्यारिः विष्णुः स्वध्वजस्य गरुडस्य पक्षिराजस्य भृत्यवर्गान्नोऽस्मान् अतिक्रान्तमञ्जं अत्यञ्जमञ्जनिजयीत्यर्थः । अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः । तस्य नलास्यस्य नुत्यैस्तोत्राय स्तवः स्तोत्रं स्तुतिर्नुतिरित्यमरः। संज्ञाप्य तत्सङ्कुचता तया द्रुतया निमीलता नाभिसरोजेन पीतात्तिरोहिताद्धातुर्ब्रह्मणो विलज्जं यथा तथा रमायां रमते अत्र विष्णोरुक्तव्यापारासम्बन्धेऽपि सम्बन्धोक्ते रतिशयोक्तिः ॥ २४ ॥

रेखाभिरिति । अस्य नलस्य आस्ये दन्तमयीभिर्दन्तरूपाभिर्द्वात्रिंशता रेखाभिर्गणनात्संख्यानाच्चतुर्दश चाष्टादश च विद्या द्वेधा अपि अत्र आस्ये सन्ति सम्भवन् न्यासेनेति वेधाः शशंसेवेत्युत्प्रेक्षा अङ्गानि वेदाश्चत्वारः मीमांसा न्यायविस्तरः पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात् । अर्थशास्त्रं परं तस्माद्विद्याह्यष्टादशस्मृता इति ॥ २५ ॥

चतुर्द शाष्टादश चात्र विद्या
द्विधापि सन्तीति शशंस वेधाः ॥ ३५ ॥
श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य
स्मरामरेन्द्रावपि न स्मरामः ।
वासेन सम्यक् क्षमयोश्च तस्मिन्
बुद्धौ न दध्मः खलु शेषबुद्धौ ॥ ३६ ॥
विना पतत्रं विनतातनूजैः
समीरणैरीक्षणलक्षणीयैः ।
मनाभिरासीदनणुप्रमाणै
र्न निर्जिता दिक्कतमा तदश्वैः ॥ ३७ ॥

श्रियाविति । तस्य नरेन्द्रस्य श्रियौ सौन्दर्यसम्पदौ निरीक्ष्य शोभासम्पत्ति पद्मासु श्रीरिति शाश्वतः । स्मरामरेन्द्रावपि न स्मरामः किं च तस्मिन्नरेन्द्रे क्षमयोः क्षितिक्षान्त्योः क्षिति क्षान्ती क्षमेत्यमरः । सम्यग्वासेन निर्बाधास्थित्या शेषबुद्धौ फणिपति बुद्धदेवौ चित्ते न दध्मः न धारयामः खलु अत्र द्वयोरपि श्रियोः द्वयोरपि क्षमयोः प्रकृतत्वात् केवल प्रकृतश्लेषः । एतेन सौन्दर्यादिगुणैःस्मरादिभ्योऽप्यधिक इति व्यतिरेको व्यज्यते । श्लेष यथा संख्ययोः सङ्करः ॥ ३६ ॥

विनेति । पतत्रं विना स्थितैरिति शेषः विनतातनूजैः वैनतेयैः अपक्षताक्ष्यैरित्यर्थः ईक्षण लक्षणीयैः समीरणैश्चाक्षुष वायुभिः अनणुप्रमाणैः अणुप्रमाणं मनइति तार्किकाः तद्विपरीतैर्महापरिमाणैर्मनोभिर्वैनतेयादि समानवेगैरित्यर्थः । एवम्विधैः तदश्वैःकतमा दिक् न लङ्घितासीत् सर्वापि लङ्घितैवासीदित्यर्थः अत्राश्वानां विशिष्टवैनतेयादित्वेन निरूपणाद्रूपकालङ्कारः ॥ ३७ ॥

संग्रामेति । अरीणामस्त्रै रसृग्भिर्नद्येव माता यासां तास्ता नदीमातृकता नद्यम्बुसम्पन्न शस्याढ्यता देशो नद्यम्बुवृष्ट्यम्बु सम्पन्न

संग्रामभूमीषु भवत्यरीणा-
मस्त्रैर्नदीमातृकतां गतासु ।
तद्बाणधारापवनाशनानां
राजव्रजीयैरसुभिः सुभिक्षम् ॥ ३८ ॥

यशो यदस्याजनि संयुगेषु
कण्डूलभावं भजता भुजेन ।
हेतोर्गुणादेव दिगापगाली
कूलङ्कषत्वं व्यसनं तदीयं ॥ ३९ ॥

यदि त्रिलोकी गणनापरा स्या-
त्तस्याः समाप्तिर्यदि नायुषः स्यात् ।

ब्रीहि पालितः । स्यान्नदीमातृको देवमातृकश्च यथा क्रममित्यमरः । नद्यृतश्चेति कप् त्वतलोर्गुणवचनस्येति पुंवद्भावः । तां गतासु संग्रामभूमीषु तस्य नलस्य बाणधारा बाणपरम्परास्ता एव पवनाशनास्तेषां राजव्रजीयैः राजसङ्घसम्बन्धिभिः वृद्धाच्छः । असुभिः प्राणवायुभिः सुभिक्षम् । भिक्षाणां समृद्धिर्भवति समृद्धावव्ययीभावः । नदी मातृकदेशेषु सुभिक्षं भवतीति भावः रूपकालङ्कारः ॥ ३८ ॥

यश इति । संयुगेषु समरेषु कण्डूलभावं कण्डूलत्वं सिध्मादिभ्यश्चेति मत्वर्थीयो लच् । भजता अस्य भुजेन यद्यश अजनि जनितं जनेर्ण्यन्तात्कर्मणि लुङ् । तदीयं तस्य यशः सम्बन्धि दिशः एव आपगाः नद्यः तासां आलिः राजिः तस्याः कूलङ्कषतीति कूलङ्कषं शिवभागवतवत्समासः सर्वकूलेत्यादिना खच्चिमुमागमः तस्य । भावस्तत्वं तत्र व्यसनमासक्तिः हेतोः कारणस्य भुजस्य गुणादेव कण्डूलत्वादागतमिति शेषः यशसो दिक्कूलं कषणाद्धुभितायाः कण्डूलतायाः तत्कारणकण्डूलभुजगुण पूर्वत्वमुत्प्रेक्ष्यते ॥ ३९ ॥

यदीति । किं बहुना त्रयाणां लोकानां समाहारस्त्रिलोकी तद्वि-

पारेपरार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात् ॥ ४० ॥
अवारितद्वारतया तिरश्चा
मन्तःपुरे तस्य निविश्य राज्ञः ।
गतेषु रम्येष्वधिकं विशेष
मध्यापयामः परमाणुमध्याः ॥ ४१ ॥
पीयूषधारानधराभिरन्त
स्तासां रसोदन्वति मज्जयामः ।

तार्थेत्यादिना समाहारे द्विगुः अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते द्विगोरिति ङीप् । गणनापरा नलगुणसंख्यान तत्परा स्याद्यदि तस्याः त्रिलोक्याः आयुषः समाप्तिर्न स्याद्यदि अमरत्वं यदि स्यादित्यर्थः । परार्द्धस्य चरमसंख्यायाः पारे पारेपरार्द्धं पारे मध्ये षष्ठ्या वेति अव्ययीभावः । गणितं स्यात्परार्द्धात्परतोऽपि यदि संख्या स्यादित्यर्थः । तदा स नलोऽपि गणेया गणितुं शक्याः निःशेषा निखिला गुणा यस्य स स्यात् गणेय इति औणादिक एयप्रत्ययः । अत्र गुणानां गणेयत्वसम्बन्धेऽपि असम्बन्धाभिधानादतिशयोक्तिः ॥३०॥

एवं नलगुणाननुवर्ण्य गूढाभिसन्धिरात्मनः स्वदन्तः पुरेऽपि परिचयं दर्शयति । अवारितेत्यादि । तिरश्चां पक्षिणां अवारित द्वारतया अप्रतिषिद्धप्रवेशतयेत्यर्थः । तस्य राज्ञो नलस्यान्तःपुरे । निविश्य अवस्थाय परमाणुमध्यास्तदङ्गनाः रम्येषु गतेषु अधिकमपूर्व्वं विशेषम् । भेद मध्यापयामः । अध्यापयामः दुहादित्वात्द्विकर्मकत्वम् ॥४१॥

पीयूषेति । किं च पीयूषधाराभ्य अनधराभि रन्यूनाभि रन्ततमानाभिः काव्यं सृजता स्वयं प्रबन्धकर्त्ता कवेरपत्यं पुमान् काव्यः तेन शुक्रोदैत्य गुरुः काव्य इत्यमरः । कुर्व्वादिभ्योण्य इति ण्य प्रत्ययः । आढ्यनाभिस्तस्यापि विस्मयकारीभिरित्यर्थः । रम्भादीनां दिव्यस्त्रीणां सौ-

रम्भादिसौभाग्यरहः कथाभिः
काव्येन काव्यं सृजताहताभिः ॥४२॥
काभिर्न तत्राभिनवस्मराज्ञा
विश्वासनिक्षेपवणिक्क्रियेऽहम् ।
जिह्रेति यन्नैव कुतोऽपि तिर्य्यक्
कश्चित्तिरश्चस्त्रपते न तेन ॥ ४३ ॥
वार्त्ता च सा सत्यपि नान्यमेति
योगादरन्ध्रे हृदि यां निरुन्धे ।

भाग्यं पतिवाल्लभ्यं तत्प्रयुक्ताभिः रहः कथाभि रहस्य वृत्तान्तवर्णनाभि स्तासां तत्रान्तःपुर स्त्रीणामन्तरन्तःकरणं रसोद्गते शृङ्गार सागरे मज्जयामः अवगाहयामः ॥ ४२ ॥

काभिरिति । किञ्च यद्यस्मात् तिर्य्यक् पक्षी कुतोऽपि जनान्न जिह्रेति न लज्जत एव ह्रीलज्जायामिति धातो र्लट् श्लाविति द्विर्भावः । तिरश्चोऽपि कश्चिज्जनो न त्रपते न लज्जते तेन कारणेन तत्रान्तःपुरे काभिः स्त्रीभि रहं अभिनवा अपूर्वा स्मराज्ञा रतिरहस्य वृत्तान्तः सैव विश्वासनिक्षेपो विश्वासेन गोप्यार्थः । तस्य वणिक् गोप्ता न क्रिये न कृतोऽस्मि सर्वासा मप्यहमेव विस्रम्भकथा पात्रमस्मीत्यर्थः ॥ ४३ ॥

अथ स्वस्य एवंविध विश्वासहेतुत्वमाह । वार्त्तेति । विरिञ्चे र्ब्रह्मणः नानाननै र्बहुमुखै र्वादेन व्याख्यानेन धौतस्य शोधितस्य समाधि शास्त्रस्य संयमविद्यायाः श्रुत्या श्रवणेन पूर्णकर्णः चतुर्मुखाभ्यस्तवाङ्नियमनविद्य इत्यर्थः । अहमिति शेषः योगात् अरन्ध्रे निरवकाशे पूर्णे हृदि हृदये यां वार्त्तां निरुन्धे सा वार्त्ता लोकवार्त्ता किमुतारहस्यवार्त्तेति भावः असत्यपि विनोदार्थं कथितापि किमुत सतीति भावः । असत्यपि अन्यपुरुषान्तरं नैति । न गच्छति । यथा स्रवती दुश्चरी नीरन्ध्रस्थाने निरुद्धा नान्यमेति तद्वदिति भावः । अतोऽह मासां विश्वासइति

विरिञ्चिनानाननवादधीत
समाधिशास्त्रश्रुतिपूर्णकर्णः ॥ ४४ ॥
नलाश्रयेण त्रिदिवोपभोगं
तवानवाप्यं लभते वतान्या ।
कुमुद्वतीवेन्दुपरिग्रहेण
ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्याः ॥ ४५ ॥
तन्नैषधानूढतया दुरापं
शर्म्म त्वयास्मत्कृतचाटुजन्म ।

पूर्वेणान्वयः । अत्र वार्त्तानिरोधस्य विरिञ्चीत्यादि पदार्थहेतुकत्वात् काव्यलिङ्ग भेदः ॥ ४४

अथ श्लोकद्वयेन अस्या नलानुरागमुद्दीपयति नलेत्यादि तवा न वाप्यं नलपरिग्रहाभावात्त्वयादुराप कृत्यानां कर्त्तरि वेति षष्ठी तृतीया। द्यौस्त्रिदिवः स्वर्गः पृषोदरादित्वात् साधुः । तस्य उपभोगं तादृक् भोगमित्यर्थः । तस्येन्द्र सदृशैश्वर्यत्वादिति भावः । अम्बुजिन्या दुर्लभं इन्दु परिग्रहाभावा त्तया दुरापं ज्योत्स्नोत्सवं चन्द्रिकाभोगं इन्दोः कर्त्तुःपरिग्रहेण कुमुदान्यस्यां सन्तीति कुमुद्वती कुमुदिनीव कुमुदनडवेतसेभ्योड्मतुप मादुपधायाश्चेत्यादिना मकारस्य वकारः । नलस्य कर्त्तुराश्रयेण नलस्वीकरणेन अन्या लभते बतेति खेदे ईदृग्भोगोपेक्षणीयात् त्वं बुद्धिमान्द्यात् नःशोच्यासि इति भावः ॥ ४५ ॥

तदिति । किञ्च तत्त्वस्मदस्माभिः कृतेभ्यः प्रयुक्तेभ्यश्चाटुभ्यः प्रियवाक्येभ्यो जन्म यस्य तज्जन्म इत्यर्थः । चाटुपदेन पूर्वोक्त निजपक्षवीजनाद्युपलक्षणं शर्म सुखं त्वया अप्राप्तो दृष्टो यया तया वसन्तानधिष्ठणीयकमिव नैषधेन नलेन अनूढतया अपरिणीतत्वेन हेतुना दुरापन्तस्माचे

रसालवल्ल्या मधुपानुविद्धं
सौभाग्यमप्राप्तवसन्तयेव ॥ ४६ ॥
तस्यैव वा यास्यसि किन्न हस्तं
दृष्टं मनः केन विधेः प्रविश्य।
अजातपाणिग्रहणासि ताव-
द्रूपस्वरूपातिशयाश्रयस्य ॥ ४७ ॥
निशा शशाङ्कं शिवया गिरीशं
श्रिया हरिं योजयतः प्रतीतः।
विधेरपि स्वारसिकः प्रयासः
परस्परं योग्यसमागमाय ॥ ४८ ॥

नलपरिग्रहाय यत्नः कार्य्य इति भावः ॥ ४६ ॥

अथ पुनरस्या नलप्राप्त्याशां जनयन्नाह। तस्येत्यादि। यद्वा तस्य नलस्यैव हस्तं किं न यास्यसि यास्यस्येवेत्यर्थः। केन विधेर्मन एव प्रविश्य दृष्टं विध्यानुकूल्यमपि सम्भावितमिति भावः। कुतस्तावदद्यापि अजातपाणिग्रहणा अकृत विवाहा असि तवायं विवाहविलम्बोऽपि नलपरिग्रहणार्थमेव किं न स्यादिति भावः। रूपं सौन्दर्यं स्वरूपं स्वभावः शीलमिति यावत्। तयोरतिशयः प्रकर्षस्तस्याश्रयस्यासि योग्यगुणाश्रयत्वाच्च तद्धस्तमेव गमिष्यसीति भावः ॥ ४७ ॥

सत्यं विधिसङ्कल्पस्तु दुर्ज्ञेय इत्यत आह। निशेति। निशा निशया पद्भित्यादिना निशादेशः। शशाङ्कं, शिवया गौर्या गिरीशं शिवं श्रिया लक्ष्म्या हरिं च योजयतो विधेः प्रयासो यत्नोऽपि परस्परं योग्यसमागमाय योग्यसङ्घटनायैव स्वारसिकः प्रयासः स्वरसप्रवृत्तः प्रतीतः प्रसिद्धः ज्ञातः निशाशशाङ्कादि दृष्टान्ताद्विधिसङ्कल्पोऽपि सुज्ञेय इति भावः ॥ ४८ ॥

वेलातिगस्त्रैणगुणाब्धिवेणी
न योगयोग्यासि नलेतरेण।
संदर्भ्यते दर्भगुणेन मल्ली-
माला न मृद्वी भृशकर्कशेन॥ ४९॥
विधिं वधूसृष्टिमपृच्छमेव
तद्यानयुग्यो नलकेलियोग्याम्।
त्वन्नामवर्णा इव कर्णपीता
मयास्य संक्रीड़ति चक्रचक्रे॥ ५०॥
अन्येन पत्या त्वयि योजितायां
विज्ञत्वकीर्त्या गतजन्मनो वा।

नलान्यसम्बन्धस्त्वयोग्य इत्याह। वेलातिगेति। वेलामतिगच्छन्तीति वेलातिगा निःसीमाः स्त्रीणामिमे स्त्रैणाः गुणाः स्त्रीपुंसाभ्यां नञ्स्नञाविति वचनात् नञ्प्रत्ययः त एवाब्धिस्तस्य वेणीप्रवाह भूता त्वमिति शेषः वेलाब्धिजलवन्धने काले सीम्नीच वेणीतु केशबन्धे जलस्रुतौ इति वैजयन्ती। नलादितरेण योगयोग्या योगार्हा नासि तथाहि मृद्वी मल्लीमाला भृशकर्कशेन दर्भगुणेन न संदर्भ्यते न सङ्गुम्फ्यते दृभ ग्रन्थ इति धातोः कर्मणि लट्। व्यतिरेकेण दृष्टान्तालङ्कारः॥ ४९॥

विधिमिति। किं च विधिं ब्रह्माणं नलस्य केलेः क्रीड़ायाः योग्यामर्हां वधूसृष्टिं स्त्रीनिर्म्माणं तस्य विधेर्यानस्य रथस्य युग्यो रथवोढा तत्र परिचित इत्यर्थः। तद्वहति रथयुगप्रासङ्गमिति यत्प्रत्ययः। अहमपृच्छमेव दुहादित्वाद्द्विकर्मकत्वं मया अस्य तद्यानस्य चक्रे चक्रे रथाङ्गव्रजे संक्रीड़ति कूजति सति समो कूजन इति वक्तव्योऽति कूजतेर्नात्मने पदं त्वन्नामवर्णा इव मया कर्णेन पीताः गृहीताः न केवलं लिङ्गात् किन्त्वागमादपि जातोऽयमर्थ इत्यर्थः॥ ५०॥

जनापवादार्णवमुत्तरीतुं
विधा विधातुः कतमा तरी स्यात् ॥ ५१ ॥
आस्तां तदप्रस्तुतचिन्तयालं
मयासि तन्वि ! श्रमितातिवेलम् ।
सोऽहं तदागः परिमार्ष्टुकाम
स्तवेप्सितं किं विदधेऽभिधेहि ॥ ५२ ॥
इतीरयित्वा विरराम पत्री
स राजपुत्रीहृदयं बुभुत्सुः ।

अन्येनेति । किं च अन्येन नलेतरेण पत्या त्वयि योजितायां घटितायां सत्यां विज्ञत्वकीर्त्या गतजन्मनः अभिज्ञत्वख्यात्यैव नीतायुषो विधातुर्वा जनापवादार्णवमुत्तरीतुं निस्तरीतुं वृतो वेति दीर्घः कतमा विधा कः प्रकारः तरी तरणिः स्यात् न कापीत्यर्थः स्त्रियां नौस्तरणिस्तरिः इत्यमरः । अतो दैवगत्यापि सएवते भर्तेति भावः ॥ ५१ ॥

इत्थमाशामुत्पाद्य अस्याश्चित्तवृत्तिपरिज्ञानाय प्रसङ्गान्तरेण निगमयति । आस्तामिति । तत्पूर्वोक्तमास्तां तिष्ठतु अप्रस्तुतचिन्तया अलं तया साध्यं नास्तीत्यर्थः । गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया अतएवाह न केवलं श्रूयमाणक्रियापेक्षया कारकोत्पत्तिः किन्तु गम्यमानक्रियापेक्षयापि इतिन्यासकारः । किन्तु हे तन्वि ! कृशाङ्गि ! मया अतिवेलं अत्यर्थं श्रमिता खेदितासि श्रमेर्ण्यन्तात् कर्मणि क्तः । तत् श्रमणरूपमागोऽपराधं परिमार्ष्टुकामो परिहर्तुकामः । तुं काममनसोरपीति मकारलोपः । सोऽहं किं त्वदीप्सितं तव मनोरथं विदधे कुर्वे अभिधेहि ब्रूहि ॥ ५२ ॥

इतीति । सः पत्री हंसः इति ईरयित्वा राजपुत्र्याः भैम्याः हृदयं बुभुत्सुः जिज्ञासुः विरराम तूष्णीं बभूव व्याङ्परिभ्यो रमइति परस्मैपदं तथाहि सन्तः कार्यज्ञाः गभीरे अगाधे हृदि हृदे च अवगाढे

सर्गः३

ह्रदे गभीरे हृदि चावगाढे
शंसन्ति कार्य्यावतरं हि सन्तः ॥ ५३ ॥
किञ्चित्तिरश्चीनविलोलमौलि
र्विचिन्त्य वाच्यं मनसा मुहूर्त्तम् ।
पतत्रिणं सा पृथिवीन्द्रपुत्री
जगाद वक्त्रेण तृणीकृतेन्दुः ॥ ५४
धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या
मयातटस्थस्त्वमुपद्रुतोऽसि ॥ ५५ ॥

प्रविश्य दृष्टे सति कार्यस्य ज्ञानादे रहस्योक्तेश्च अवतरं तीर्थं प्रस्तावं च शंसन्ति कथयन्ति अन्यथा अनर्थः स्यादिति भावः । अवतरो व्याख्यातः अर्थान्तरन्यासोऽलङ्कारः ॥५३ ॥

किञ्चिदिति । किञ्चित्तिरश्चीना स्वभावादीषत्प्राचीभूता विलोला छाया स्याद्विलुलिता मौलिः केशबन्धो यस्याः सा मौलयः संयताः कचा इत्यमरः । वक्त्रेण तृणीकृतेन्दुः अधः कृत चन्द्रा सा पृथिवीन्द्र पुत्री भैमी मुहूर्तमल्पकालं मनसा वाच्यं वचनीयं विचिन्त्य पर्यालोच्य पतत्रिणं जगाद ॥ ५४ ॥

धिगिति । चापले चपलकर्मणि युवादित्वादण् वत्सस्य भावः वत्सिमा शिशुत्वं पृथ्वादित्वादिमनिच् तेन निमित्तेन वत्सलत्वं वात्सल्यं बाल्यत्वप्रयुक्तं चापलमित्यर्थः । तद्धिक् कुतः यस्य चापलवात्सल्यस्य प्रेरणा उत्तरली भवन्त्या चपलायमानया समीरसङ्गाद्वाताद्धेतो उत्तरली भवन्त्या नीरभङ्ग्या जलवीच्येव तटस्थः उदासीनः कूलं गतश्च त्वमुपद्रुतः पीड़ितोऽसि अतः अधर्महेतुत्वाद्बाल चापलं सोढ़व्यमिति भावः ॥ ५५ ॥

आदर्शतां स्वच्छतया प्रयासि
सतां स तावत्खलु दर्शनीयः।
आगः पुरस्कुर्वति सागसं मां
यस्यात्मनीदं प्रतिबिम्बितं ते ॥ ५६ ॥
अनार्य्यमप्याचरितं कुमार्य्या
भवान्मम क्षाम्यतु सौम्य ! तावत्।
हंसोऽपि देवांशतयाभिवन्द्यः
श्रीवत्सलक्ष्मेव हि मत्स्यमूर्त्तिः ॥ ५७ ॥
मत्प्रीतिमाधित्ससि कां त्वदीक्षा
मुदं मदक्ष्णोरपि यातिशेतां।

आदर्शतामिति। स्वच्छतया नैर्मल्यगुणेन आदृश्यते पुरोगत वस्तुरूपमस्मिन्निति आदर्शो दर्पणस्तत्तां प्रयासि कुतः यस्य स्वच्छस्य ते तव सम्बन्धिनि सागसं सापराधां मां पुरस्कुर्वति पूजयति अग्रे कुर्वाणे च आत्मनि बुद्धौ स्वरूपे च पुरस्कृतः पूजिते स्यादभियुक्तोऽग्रतः कृते आत्मा यत्नो धृतिर्बुद्धि स्वभावो ब्रह्मवर्ष्मणीति चामरः। इदं मदीयमागोऽपराधः प्रतिबिम्बितं प्रतिफलितं पुरोवर्त्ति धर्म्माणामात्मनिसंक्रमणादादर्शोऽसीत्यर्थः। ततः किमत आह सः आदर्शः सतां साधूनां तावत्प्रथमं दर्शनीयः अथ वा पूज्यश्चेति तावच्छब्दार्थः खलु रोचनं चन्दनं हेममृदङ्गं दर्पणं मणिं गुरुमग्निं तथा सूर्यं प्रातः पश्येत् सदा बुध इति शास्त्रादिति भावः ॥ ५६ ॥

अनार्यमिति। हे सौम्य ! भवान् कुमार्याः शिशोर्मम सम्बन्धि अनार्यमप्या चरितं त्वदुपद्रवरूपं दुश्चेष्टितं क्षाम्यतु सहतां हंसोऽपि तिर्यगपीत्यर्थः। त्वमिति शेषः भवानितत्रनुषङ्गे असीति मध्यम पुरुषा योगात् देवांशतया मत्स्यमूर्तिः श्रीवत्सलक्ष्मा विष्णुरिव वन्द्योऽसि ॥ ५७ ॥

निजामृतैर्लोचनसेचनाद्वा
पृथक्किमिन्दुः सृजति प्रजानाम् ॥ ५८ ॥
मनस्तु यं नोज्झति जातु यातु
मनोरथः कण्ठपथं कथं सः ।
का नाम बाला द्विजराजपाणि
ग्रहाभिलाषं कथयेदभिज्ञा ॥ ५९ ॥
वाचन्तदीयां परिपीय मृद्वीं
मृद्वीकया तुल्यरसां स हंसः ।

अथ यदुक्तं त्वयेप्सितं किं विदधे । अभिधेहीति तत्रोत्तरमाह । मत्प्रीतिमिति । कां मत्प्रीतिं किं वा मदीप्सितमित्यर्थः । आधित्ससि आधातुं कर्त्तुमिच्छसि दधातेः सन्नन्ताल्लट् । या प्रीतिर्मदक्ष्णोः त्वदीयामुदं त्वदीयया प्रीतिमतिशेतां त्वद्दर्शनोत्सवादन्यत्किं ममेप्सितमित्यर्थः । तथाहि इन्दुः प्रजानां जनानां निजामृतै र्लोचन सेचनात् पृथक्अन्यत् पृथग्विनेत्यादिना पञ्चमी । किं वा सृजति करोति न किञ्चित् करोतीत्यर्थः । दृष्टान्तालङ्कारः ॥ ५८ ॥

अथ सर्वथा मनोरथः कथनीयः इत्यभिप्रेत्य तं न शक्यमित्याह । मनस्त्विति । मनो मच्चित्तं कर्त्तृ यं मनोरथं जातु कदापि नोज्झति न जहाति स मनोरथः कण्ठपथं वाग्विषयं उपकण्ठदेशं च कथं यातु सम्भावनायां लोट् सम्भावनापि नास्तीत्यर्थः । केनापि प्रतिबद्धस्य मनोरथस्य कथमन्तिकेऽपि सञ्चार इति भावः कुतः अभिज्ञा विवेकिनी का नाम बाला का वा स्त्री द्विजराजस्य इन्दोः पाणिना ग्रहे ग्रहणे अभिलाषं कथयेत् । तथापि द्विज ! पक्षिन् ! राजपाणिग्रहाभिलाषं नलपाणिग्रहणेच्छामिति च गम्यते तया च दुर्लभजनप्रार्थना द्विजराजपाणिग्रहणकल्पया परिहासास्पदीभूता कथं लज्जावत्या वक्तुं शक्या इत्यर्थः । पूर्व एवालङ्कारः ॥ ५९ ॥

तत्याज तोषं परपुष्टघुष्टे
घृणाञ्च वीणाक्वणिते वितेने ॥ ६० ॥
मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा
तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किञ्चन संशयालु-
र्गिरा मुखाम्भोजमयं युयोज ॥ ६१ ॥
करेण वाञ्छेव विधुं विधर्तुं
यमित्थमात्थादरिणी तमर्थम् ।
पातुं श्रुतिभ्यामपि नाधिकुर्वे
वर्णं श्रुतेर्वर्ण इवान्तिमः किं ॥ ६२ ॥

वाचमिति । स हंसः मृद्वीकया द्राक्षया मृद्वीका गोस्तनी द्राक्षेत्यमरः । तुल्यरसां समानस्वादां मधुरार्थामित्यर्थः । मृद्वीं मधुराक्षरां तदीयां वाचं परिपीय अत्यादरादाकर्ण्य परपुष्टघुष्टे कोकिलकूजिते तोषं प्रीतिं तत्याज वीणाक्वणिते च घृणां जुगुप्सां घृणा जुगुप्साकृपयोरिति विश्वः । वितेने ॥ ६० ॥

मन्दाक्षमिति । तस्यां भैम्यां मन्दाक्षेण ह्रिया मन्दा स्निग्धायां अक्षरमुद्रा द्विजराजपाणिग्रहेत्याद्यक्षरविन्यासो यस्मिन् तत्तथोक्तं मुक्ता समाकुञ्चितवाचि नियमितवचनायां सत्यामयं हंसस्तच्छंसिते भैमीभाषिते किञ्चन किञ्चित्संशयालुः सन्दिहानः सन् स्पृहि गृहीत्यादिना आलुच् प्रत्ययः । मुखाम्भोजं गिरा युयोज मुखेन गिरमुवाचेत्यर्थः ॥ ६१ ॥

करेणेति । हे भैमि! करेण विधुं चन्द्रं विधर्तुं गृहीतुं वाञ्छेव यमर्थमित्थं द्विजराजपाणिग्रहेत्याद्युक्तप्रकारेण आदरिणी आदरवती सती आत्थ ब्रवीषि ब्रुवः पञ्चानामिति ब्रुवो लटि सिपि थलादेशः ब्रुवश्चाहादेशः आहस्थ इति हकारस्य थकारः तस्यार्थमन्तेभवोऽन्तिमो वर्णः

अर्थाप्यते वा किमियद्भवत्या
चित्तैकपद्यामपि विद्यते यः ।
यत्रान्धकारः खलु चेतसोऽपि
जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ॥ ६३ ॥
ईशाणिमैश्वर्य्यविवर्त्तमध्ये !
लोकेशलोकेशयलोकमध्ये ।

सुडः अन्ताच्चेति वक्तव्यमिति डमच् । श्रुतेर्वर्त्म वेदाध्वरमिव श्रुतिभ्यां पातुं श्रोतुमपीत्यर्थः । नाधिकुर्वे नाधिकार्य्यस्मि किं ? अर्ह एवेत्यर्थः । अतः सोऽर्थो वक्तव्य इति तात्पर्यम् ॥६२॥

ननु तमर्थमत्यन्तदुर्लभत्वादवक्तुं जिह्रेमीत्याशङ्क्याह । अर्थाप्यत इति हे भैमि ! भवत्या किंवा इयदेतावद्यथा तथा अर्थाप्यते किमर्थमयमर्थो द्विजराजप्राणिभ्यश्चवदति दुर्लभत्वेनाख्यायत इत्यर्थः । अर्थशब्दात्तदाचष्ट इत्यर्थे णिच् अर्थवेदसत्यानामापुग्वक्तव्य इत्यपुगागमः । कुतस्तथा नाख्येय इत्यत आह योऽयमेकः पादो यस्यामित्येकपदी एकपादसञ्चारयोग्यमार्गः । वर्त्तन्येकपदीति चेत्यमरः । कुम्भपदीषु चेति निपातनात् साधुः । चित्तैकपद्यां मनोमार्गेऽपि वर्त्तते चक्षुराद्यविषयत्वेऽपीत्यपि शब्दार्थः स कथं दुर्लभ इति भावः । तथाहि यत्र यस्मिन् ब्रह्मणि विषये चेतसोऽप्यन्धकारः प्रतिबन्धः तद्ब्रह्म जिह्मेतरैरकुटिलैः कुशलधीभिरिति यावत् अवाप्यं सुप्रापं अमनोगम्यं ब्रह्मापि कैश्चिल्लभ्यते किमुत मनोगतोऽयमर्थः । अतएवार्थापत्तिरलङ्कारः । कैमुत्येनार्थान्तरापतनमर्थापत्तिरिति वचनात् ॥ ६२ ॥

अथ मयि स्टपावादित्वशङ्कया वक्तुं सङ्कोचस्तत्र न शङ्कितव्यमित्याह ईशेत्यादिना त्रयेण । ईशस्य यदणिमैश्वर्य्यं तस्य विवर्त्तो रूपान्तरं मध्यो यस्याः सा तयोक्ता हे कृशोदरीत्यर्थः । लोकेशलोके शेरत इति लोकेशयाः ब्रह्मलोकवासिनः अधिकरणे शेतेरित्यच् प्रत्ययः ।

तिर्य्यञ्चमप्यञ्च मृषानभिज्ञ
रसज्ञतोपज्ञसमज्ञमज्ञम् ॥ ६४ ॥
मध्ये श्रुतीनां प्रतिवेशिनीनां
सरस्वती वासवती मुखे नः ।
ह्रियेव ताभ्यः स्खलतीयमर्द्धा
पथान्न संसर्गगुणेन बद्धा ॥ ६५ ॥
पर्य्यङ्कतापन्नसरस्वदङ्कां
लङ्कापुरीमप्यभिलाषि चित्तम् ।

ञ्चयत्रासत्रासिम्बकालादित्यलुक् तेषां लोकानां जनानां मध्ये अज्ञं मूढं तिर्य्यञ्चं च पक्षिणमपि मामिति शेषः । मृषा अनृतं तस्य अनभिज्ञा रसज्ञा रसना यस्य तस्य भावस्तत्ता सत्यवादितेत्यर्थः । उपज्ञायत इति उपज्ञा आदावुपज्ञाता उपज्ञा ज्ञानमाद्यं स्यादित्यमरः । आतश्चोपसर्गे इत्यङ्प्रत्ययः बहुलग्रहणात् कर्मार्थत्वं तथात्वेन ज्ञातं तदुपज्ञं उपज्ञोपक्रमं तदाद्याचिख्यासायामिति नपुंसकत्वं समं साधारणं सर्वैर्ज्ञायत इति समज्ञा कीर्त्तिः पूर्ववदङ्प्रत्ययः तदुपज्ञं तथात्वेनादौ ज्ञाता समज्ञा कीर्त्तिर्येन तं तथोक्तं मां अञ्च सत्यवादिनं विद्धीत्यर्थः । अञ्चतेर्गत्यर्थत्वात् ज्ञानार्थत्वम् ॥ ६४

मध्य इति । किं च प्रतिवेशिनीनां प्रवेश्मानां श्रुतीनां वेदानां ब्रह्ममुखस्थानां श्रुतीनां मध्ये वासवती निवसन्ती इयं नोऽस्माकं मुखे सरस्वती वाग् संसर्ग एव गुणः श्लाघ्यधर्मः तन्तुश्च तेन बद्धा सती ताभ्यः श्रुतिभ्यो ह्रियेवेत्युत्प्रेक्षा अद्धापथात्सत्यमार्गान्न चलति संसर्गजा दोषा गुणा भवन्तीति भावः । सत्ये त्वद्धाञ्जसाद्वयमित्यमरः ॥ ६५ ॥

ततः किमित्यत आह पर्य्यङ्केति । कुत्रापि वस्तुनि द्वीपान्तरस्थेऽपीति भावः । अभिलाषि साभिलाषं ते तव चित्तं कर्त्तृ पर्य्यङ्कतां वासक्यिकात्वमापन्नः सरस्वान् सागरोऽङ्कश्चिह्नं यस्याः तामतिदुर्गमामित्यर्थः ।

कुत्रापि चेद्वस्तुनि ते प्रयाति
तदप्यवेहि स्वशये शयालु ॥ ६६ ॥
इतीरिता पत्त्ररथेन तेन
ह्रीणा च हृष्टा च बभाण भैमी ।
चेतोनलङ्कामयते मदीयं
नान्यत्र कुत्रापि च साभिलाषम् ॥ ६७ ॥
विचिन्त्य बालाजनशीलशैलं
लज्जानदीमज्जदनङ्गनागम् ।
आचष्ट विस्पष्टमभाषमाणा
मेनां स चक्राङ्गपतङ्गशक्रः ॥ ६८ ॥
नृपेण पाणिग्रहणस्पृहेति
नलं मनः कामयते ममेति ।

तां लङ्कापुरी मपि प्रयाति चेत्तदपि तद्दुर्गस्थमपि स्वशये स्वहस्ते शयालु स्थित मवेहि पर्य्यस्थमपि पर्य्यङ्कस्थमिव जानीहि ॥ ६६ ॥

इतीति । तेन पत्त्ररथेन पक्षिणा हंसेन इतीत्थमीरिता उक्ता भैमी ह्रीणा स्वयमेव स्वाकूत कथनसङ्कोचात् लज्जिता नुदत्रिदेत्यादिना विकल्पान्निषानत्वं । हृष्टा उपायलाभान्मुदिता च सती बभाण । किमिति मदीयं चेतो लङ्कां नायते किन्तु नलं राजानं कामयत इति श्लेषभङ्ग्या बभाणेत्यर्थः । अन्यत्र कुत्रापि वस्तुनि साभिलाषं न ॥ ६७॥

विचिन्त्येति । विस्पष्टमभाषमाणां श्लेषोक्तिवशात्संदिग्धमेव भाषमाणामित्यर्थः । एनां दमयन्तीं सः चक्राङ्ग पतङ्गशक्रः हंसपक्षिश्रेष्ठः बालाजनस्य मुग्धाङ्गना जनस्य शीलं स्वभावमेव शैलं लज्जायामेव नद्यां मज्जदनङ्गनागो यस्य तं विचिन्त्य विचार्य आचष्ट तस्य लज्जाविजितमन्मथत्वं ज्ञात्वा लज्जाविसर्जनार्थं वाक्यमुवाचेत्यर्थः ॥ ६८ ॥

नृपेणेति । श्लेषकवेः श्लेषभङ्ग्या कवयित्र्याः श्लिष्टशब्दप्रयोक्त्रि-

अश्लेषि न श्लेषकवेर्भवत्याः
श्लोकद्वयार्थः सुधिया मया किं ?। ६९ ॥
त्वच्चेतसः स्थैर्य्यविपर्य्ययन्तु
सम्भाव्य भाव्यस्मि तदज्ञ एव ।
लक्ष्ये हि बाला हृदि लोलशीले
दरापराद्धेषुरपि स्मरः स्यात् ॥ ७० ॥
महीमहेन्द्रः खलु नैषधेन्दु
स्तद्बोधनीयः कथमित्थमेव ।

रित्यर्थः कविवर्णन इति धातो रौणादिक इकार प्रत्ययः । भवत्यास्तव सम्बन्धि नृपेण कृता पाणिग्रहणं पाणिपीड़नं उभयप्राप्तौ कर्म्मणीति विहितायाः षष्ठ्याः कर्म्मणि चेति समास निषेधेऽपि शेषे षष्ठीसमासः तत्र स्पृहेति मम मनो द्विजराज पाणिग्रहेति चेतो नलं कामयत इति श्लोकद्वयार्थः सुधिया मया विदुषा नाश्लेषि नाग्राहि किं? गृहीत एवेत्यर्थः ॥ ६९ ॥

तर्हि किमर्थं करेण वाञ्छेत्यादिकं अज्ञवदुक्तमित्यत आह । त्वच्चेतस इति । किन्तु त्वच्चेतसः स्थैर्य्यविपर्य्ययमस्थिरत्वं संभाव्य आशङ्क्य तदज्ञः तस्य श्लोकद्वयार्थस्य अज्ञः अनभिज्ञः भावी भविष्यन् भविष्यति गम्यादय इति साधुः । अस्मि । त्वच्चित्तनिश्चय पर्य्यन्तमित्यर्थः । धातुसम्बन्धे प्रत्यया इति भविष्यत्ताया गुणत्वाद्वर्त्तमानतानुरोधः नन्वेवमनुरक्तायां मयि कुत इयं शङ्केत्याशङ्क्य स्त्रीणां चित्तचाञ्चल्य सम्भवादित्याह । लक्ष्य इति लोल शीले चञ्चलस्वभावे बाला हृदि चित्त एव स्मरोऽपि दरापराद्धेषु रीषच्च्युतसायकः स्यात् कुशलोऽपि धन्वी चललक्ष्यात्कदाचिदपराध्यत इति भावः । अपराद्ध पृषत्कोऽसौ लक्ष्याद्यश्च्युत सायकः अर्थान्तरन्यासोऽलङ्कारः ॥ ७० ॥

महीति । नैषधः इन्दुरिव नैषधेन्दु र्नल चन्द्रः मही महेन्द्रो भूदेवेन्द्रः खलु तस्मात् स नलपृथग्ः जनेन प्राकृतजनेनेव मद्विधेन मादृशा

प्रयोजनं सांशयिकम्प्रतीदृक्
पृथग्जनेनेव स मद्विधेन ॥ ७१ ॥
पितुर्नियोगेन निजेच्छया वा
युवानमन्यं यदि वा वृणीषे ।
त्वदर्थमर्थित्वकृति प्रतीतिः
कीदृङ्मयि स्यान्निषधेश्वरस्य ॥ ७२॥
त्वयापि किं शङ्कितविक्रियेऽस्मि
न्नधिक्रिये वा विषये विधातुम् ।
इतः पृथक्प्रार्थयसे तु यद्यत्
कुर्व्वे तदुर्व्वीपतिपुत्त्रि ! सर्व्वम् ॥ ७३ ॥

विदुषा ईदृक् सांशयिकं सन्देहदुःस्थं अस्थिरं प्रयोजनं प्रति इत्यमेवं मुग्धाकारेणैव कथं बोधनीयः अनर्हमितर्थः गति बुद्धीत्यादिना अणिकर्त्तुर्नलस्य कर्मत्वं ण्यन्ते कर्तुश्च कर्मण इति अभिधानाच्च ॥७१॥

अथेत्यमेव बोधने को दोषस्तत्राह । पितुरिति । पितुर्नियोगेन आज्ञया निजेच्छया स्वेच्छया वा अन्यं नलादन्यं युवानं यदि वृणीषे वृणोषि यदि तदा निषधेश्वरस्य नलस्य मयि विषये त्वदर्थं तुभ्यं चतुर्थी तदर्थेत्यादिना चतुर्थी समासः अर्थेन सह नित्य समासः सर्वलिङ्गता च वक्तव्या । तद्वत्तथा अर्थित्वकृतिः अर्थित्वभजनं तत्र प्रतीतिर्विश्वासः कीदृक् स्यान्नस्यादित्यर्थः तस्मादसन्दिग्धं वाच्यमिति भावः ॥७२॥

अन्यथा तथा वक्तुं न शक्यते तर्हि ततोऽन्यदीप्सितं करिष्ये प्रतिज्ञाभङ्गपरिहारायेत्याह । त्वयेति । हे उर्वीपति पुत्रि ! भैमि ! त्वयापि वा किं विधातुं किं कर्तुं शङ्कितविक्रिये सम्भावितविपर्यये अस्मिन् विषये राजपाणिग्रहण सङ्घटनकार्ये अहं अधिक्रिये विनियुज्ये अनियोज्य इत्यर्थः करोतेः कर्मणि लट् किन्तु इतः पृथगस्मादन्यत् यद्यत्प्रार्थयसे तत्सर्वं कुर्वे करोमीत्यर्थः ॥ ७३ ॥

श्रवःप्रविष्टा इव तद्गिरस्ता
विधूय वैमत्यधुतेन मूर्ध्ना ।
ऊचे ह्रियाविश्लथितानुरोधा
पुनर्धरित्रीपुरुहूतपुत्री ॥ ७४ ॥
मदन्यदानं प्रति कल्पनाया
वेदस्त्वदीये हृदि तावदेषा ।
निशोऽपि सोमेतरकान्तशङ्का
मोङ्कारमग्रेसरमस्य कुर्याः ॥ ७५ ॥
सरोजिनीमानसरागवृत्ते
रनर्कसम्पर्कमतर्कयित्वा ।

श्रव इति । धरित्री पुरुहूतपुत्री भूमीन्द्रसुता भैमी श्रवःप्रविष्टा इव न तु सम्यक् प्रविष्टा तद्गिरो हंसवाचः । वैमत्येन असम्मत्या धुतेन कम्पितेन मूर्ध्ना विधूय प्रतिषिध्य ह्रिया कर्त्र्या विश्लथितानुरोधा शिथिलितवृत्तिस्त्यक्तलज्जा सती पुनरप्यूचे उवाच ॥ ७४ ॥

मदिति । मम अन्यदानं अन्यस्मै दानं प्रतिदानमुद्दिश्य या कल्पना पितुर्नियोगेनेत्यादि श्लोकस्तर्कः । एषा कल्पना त्वदीये हृदि वेदस्तावत्सत्य एवेत्यर्थः । निशो निशाया अपि पद्दन्नित्यादिना निशायाः निशादेशः । सोमाच्चन्द्रादितरकान्तशङ्कां पुरुषान्तरकल्पनामेव ओङ्कारं प्रणवं अस्य वेदस्याग्रेसरं आद्यं कुर्याः कुरु सर्वस्यापि वेदस्य प्रणवपूर्वकत्वादिति भावः । यथा निशायाः निशाकरेतर प्रतिपक्षो न शङ्कनीयः । तथा ममापि नलेतर प्रतिपक्षो न शङ्कनीय इत्यर्थः रूपकालङ्कारः ॥ ७५ ॥

सरोजिनीति । सरोजिन्याः मानसरागवृत्तेर्मनोऽनुरागस्थिते रभ्यन्तरानुरागप्रवृत्तेश्च अनर्कसम्पर्कमर्केतरकान्तसंक्रान्तिमतर्कयित्वा अनूहित्वा तवेयं मम अन्यस्य नलेतरस्य पाणिग्रहं शङ्कत इति तच्छङ्कितस्य

मदन्यपाणिग्रहशङ्कितेय
महो! महीयस्तव साहसिक्यम् ॥ ७६॥
साधु त्वया तर्कि तदेकमेव
स्वेनानलं यत्किल संश्रयिष्ये।
विनामुना स्वात्मनि तु प्रहर्त्तुं
मृषागिरं त्वां नृपतौ न कर्त्तुम् ॥ ७७ ॥
मद्विप्रलभ्यं पुनराह यस्त्वां
तर्कः स किं तत्फलवाचि मूकः।
अशक्यशङ्कव्यभिचारहेतु
र्वाणी न वेदा यदि सन्तु के तु ॥ ७८ ॥

भावस्तत्ता महीयो महत्तरं साहसिक्यं साहसिकत्वं अहो असम्भावित सम्भावनादाश्चर्यम् ॥ ७६ ॥

साध्विति। किन्तु स्वेन:स्वेच्छया अनलं नलादन्यं अग्निं च संश्रयिष्ये प्राप्स्यामीति यत् त्वया अतर्कि ऊहितं तदेकमेव साधु अतर्कि किन्तु अमुना नलेन विना तदलाभ इत्यर्थः। स्वात्मनि प्रहर्त्तुं स्वात्मानं हिंसितुं कर्मणो अधिकरणत्वविवक्षायां सप्तमी। अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः सर्वदा सर्वताभावात् कचित् किञ्चिद्विवक्ष्यत इति वचनात् नलं संश्रयिष्ये इत्यनुषङ्गः नृपतौ नले विषये त्वां मृषागिरं असत्यवाचं कर्त्तुं अनल एव शरणं अन्यथा मरणमेव शरणमिति भावः ॥७७॥

मदिति। किञ्च यस्तर्क ऊहः मद्विप्रलभ्यं मया विप्रलम्भनीयं पोरदुपधादिति यत्प्रत्ययः। आह बोधयतीत्यर्थः स तर्कः तस्य विप्रलम्भस्य फलवाचि प्रयोजनाभिधाने मूकः अशक्तः किं अतो मय्यसत्यवादित्व शङ्का न कार्येत्यर्थः। कथमेतावता सत्यवाक्यत्वनिश्चय अत आह अशक्या शङ्का यस्य सः अशक्य शङ्कः शङ्कितुमशक्यः व्यभिचार हेतुर्विप्रलिप्सा लक्षणो यस्याः सा वाणी न वेदा यदि न प्रमाणं चेत्तर्हि केतु वेदाः इन्द

अनैषधायैव जुहोति तातः
किं मां कृशानौ न शरीरशेषाम् ।
ईष्टे तनूजन्मतनोः स नूनं
मत्प्राणनाथस्तु नलस्तथापि ॥ ७९ ॥
तदेकदासीत्वपदादुदग्रे
मदीप्सिते साधु विधित्सुता ते ।
अहेलिना किं नलिनीं विधत्ते
सुधाकरेणापि सुधाकरेण ॥ ८० ॥

न कोऽपीत्यर्थः सम्भावनायां लोट् वेद वाचामसत्यत्वे मद्वाचोऽप्य सत्यत्वं नान्यथेति भावः ॥ ७८ ॥

एवं निजेच्छया नलान्यशङ्कां निरस्य पित्राज्ञयापि तां निरस्यति । अनैषधायेति । तातो मम जनकः । तातस्तु जनकः पिता इत्यमरः । मामनैषधाय नैषधान्नलादन्यस्मै एव जुहोति ददातीति काकुः तदा शरीरशेषां मृतां तत्रापि कृशानौ न किं न तु जीवन्तीं नाग्नेरन्यत्र जुहोतीत्यर्थः । तदङ्गी कर्त्तव्यमेवेति भावः कुतः स जनकः तनूजन्मतनोः आत्मजशरीरस्य ईष्टे स्वामी भवतीत्यर्थः । अधीगर्थदयेशां कर्मणीति शेषे षष्ठी तथापि शरीरस्य पितृस्वामिकत्वेऽपीत्यर्थः । मत्प्राणनाथस्तु नल एव प्राणानामतज्जन्यत्वादिति भावः । अतो मय्य विश्वासं मा कुर्वित्यर्थः ॥ ७९ ॥

फलितमाह । तदेकेति । तस्य नलस्यैकस्यैव दासीत्वं तदेव पदमधिकारस्तस्मादुदग्रे अधिके मदीप्सिते पतीत्वरूपे विषये तव विधित्सुता चिकीर्षुतैव साधु साध्वी अविचारेण मन्मनोरथपूरणमेव ते युक्तमिति भावः । साध्विति सामान्योपक्रमान्नपुंसकत्वं शक्यं श्वमांसेनापि क्षुन्निवर्त्तयितुमिति भाष्यकारप्रयोगात् । ननु किमत्राभिनिवेशेन गुणवत्तरं चेद्वरान्तरस्वीकारे कोदोषस्तत्राह । अहेलिनेति नलिनी सुधाकरेण अमृतदीधितिनापि अहेलिना असूर्य्येण सुधाकरेण चन्द्रेण किं

तदेकलुब्धे हृदि मेऽस्ति लब्धुं
चिन्ता न चिन्तामणिमप्यनर्घ्यम् ।
वित्ते ममैकः सनलस्त्रिलोकी
सारो निधिः पद्ममुखः स एव ॥ ८१ ॥
श्रुतश्च दृष्टश्च हरित्सु मोहात्
ध्यातश्च नीरन्ध्रितबुद्धिधारम् ।
ममाद्य तत्प्राप्तिरसुव्ययो वा
हस्ते तवास्ते द्वयमेव शेषः ॥ ८२ ॥
सञ्जीयतामाश्रुतपालनोत्थं

विधत्ते किं तेन तस्यां इत्यर्थः । तद्वन्ममापि किं युवान्तरेणेति विषमः दृष्टान्तालङ्कारः ॥ ८० ॥

तदिति । तस्मिन्नेवैकस्मिन् लुब्धे लोलुपे मे हृदि अनर्घ्यं चिन्तामणिमपि लब्धुं चिन्ता विचारो नास्ति तथा वित्ते धनविषयेऽपि मम स नलस्त्रिलोकीसारस्त्रैलोक्यश्रेष्ठः पद्ममुखः पद्माननः एकः स नलएव त्रैलोक्यसारः पद्मनिधिश्च । नलादन्यत्र कुत्रापि मे स्पृहा नास्ति । किमुत युवान्तर इति भावः ॥ ८१ ॥

श्रुतस्येति । किं बहुना स नलः श्रुतः । दूतद्विजवन्द्यादि मुखादाकर्णितस्य मोहात्भ्रान्तिवशात् हरित्सु दृष्टः साक्षात्कृतश्च तथापि नीरन्ध्रितं बुद्धिधारं निरन्तरीकृतं तदेकविषयबुद्धिप्रवाहं यथा तथा ध्यातश्च । अथाद्य मम तत्प्राप्तिर्नलप्राप्तिरसुव्ययः प्राणत्यागो वा द्वयमेव द्वयोरन्यतर एवेत्यर्थः । शेषः कार्य्यशेषः स च तव हस्ते आस्ते त्वदायत्तः तिष्ठतीत्यर्थः । अत्र तत्पदार्थश्रवणमनननिदिध्यासनसम्पन्नस्य ब्रह्मप्राप्तिदुःखोच्छेदलक्षणमोक्षो गुर्वायत्त एवेत्यर्थान्तरप्रतीतिध्वनिरेव अभिधायाः प्रकृतार्थे नियन्त्रणादि सङ्क्षेपः ॥ ८२ ॥

सञ्जीयतामिति । हे हंस ! आश्रुतपालनोत्थं प्रतिज्ञातार्थनिर्वाह-

मत्प्राणविश्राणनजञ्च पुण्यम्।
निवार्यतामार्य! वृथा विशङ्का
भद्रेऽपि मुद्रेयमये! भृशं का ॥ ८३ ॥
अलं विलङ्घ्य प्रियविज्ञ! याच्ञां
कृत्वापि वाक्यं विविधं विधेये।
यशःपथादाश्रवतापदोत्थात्
खलु स्खलित्वाऽस्तखलोक्तिखेलात् ॥ ८४ ॥
स्वजीवमप्यार्त्तमुदे ददद्भ्य
स्तव त्वया नेष्टमवद्यमुष्टेः।

श्योत्पन्नं अङ्गीकृतमाश्रुतं प्रतिज्ञातमित्यमरः। मत्प्राणानां विश्राणनं दानं तज्जञ्च पुण्यं सुकृतं सञ्चीयतां संगृह्यतां हे आर्य! वृथा विशङ्का सन्देहो निवार्यतां। अये! अङ्ग! भद्रे पूर्वोक्तपुण्यरूपे श्रेयसि विषये भृशङ्केयं मुद्रा औदासीन्यं श्रेयसि नोदासितव्यमिति भावः॥ ८३॥

अलमिति। हे प्रिय! प्रियङ्करविज्ञ! विशेषज्ञ! उभयत्र इगुपधेत्यादिना कप्रत्ययः। याच्ञां प्रार्थनां विलङ्घ्य अलं याच्ञाभङ्गो न कार्य इत्यर्थः। विधेये विनीतजने विविधं वाक्यं वक्तृतां कृत्वापि अलं तच्च न कार्यमित्यर्थः। आश्रवो यथोक्तकारी वचने स्थित आश्रव इत्यमरः। तस्य भाव स्तत्ता सैव पदं पदक्षेपः तदुत्थात् अस्ता निरस्ता खलोक्ति खेला मिथ्यावादविनोदो येन तस्माद्यशः पथात् स्खलित्वा चलित्वा खलु न स्खलितव्यमित्यर्थः। अन्यथा हानिः स्यात् निषेध वाक्यालङ्कार जिज्ञासानुनये खलु इत्यमरः। अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वेति उभयत्रापि क्त्वाप्रत्ययः इह न पादादौ खल्वादय इति निषेधस्योद्वेजकत्वाभिप्रायत्वाच्च अर्थस्य खलुशब्दस्यानुद्वेजकत्वाच्च देवपादादौ प्रयोगो न दूष्यत इति अनुसन्धेयम्॥ ८४॥

स्वेति। ईदृशवद्यमुष्टेः ईदृक् कष्टलुब्धस्य तव आर्त्तानां मुदे प्रीत्यै-

मह्यं मदीयान् यदसूनदित्सो
धर्म्मः कराद्भ्रश्यति कीर्त्तिधौतः ॥ ८५ ॥

दत्त्वा त्मजीवं त्वयि जीवदेऽपि
शुद्ध्यामि जीवाधिकदे तु केन ।
विधेहि तन्मां त्वदृणेष्वशोढृं,
समुद्रदारिद्र्यसमुद्रमग्नाम् ॥ ८६ ॥

क्रीणीष्व मज्जीवितमेव पण्य
मन्यन्न चेदस्ति तदस्तु पुण्यम् ।
जीवेशदातर्य्यदि ते न दातुं
यशोऽपि तावत्प्रभवामि गातुम् ॥ ८७ ॥

स्वजीवं ददद्भ्यः स्वप्राणव्ययेन परत्राणं कुर्वद्भ्यो जीमूतवाहनादिभ्य इत्यर्थः जीवज्जीमूतवाहन इति प्रसिद्धं त्वया नेति काकुः त्वपाया मनः प्रत्यावृत्तिरूपत्वात्तदपेक्षया तेषामपादानत्वात् पञ्चमी यद्यस्मान्मदीयानेवात्मन् प्राणान्मह्यं मदित्सोः तव कीर्त्या धौतः शुभ्रो धर्मः. कराद्धस्तात्भ्रश्यति नचैतत्तवार्हमिति भावः ॥ ८५ ॥

दत्त्वेति । किं च जीवदे प्राणदे त्वयि विषये आत्मजीवं मत्प्राणं दत्त्वापि शुध्यामि आनृण्यं गमिष्यामीत्यर्थः । किन्तु जीवादधिकः प्रियः तद्दे त्वयि केन शुध्यामि न केनापि तत्तुल्यदेय वस्त्वभावादित्यर्थः । सम्प्रति प्राणैः समं तु न किञ्चिदस्तीति भावः । तत्तस्मादभावादेव मां त्वदृणेषु विषये अशोढृं अनृणमस्तां भवितुमेव असुद्रे अपरिमिते दारिद्र्यं त्वद्देयवस्त्वभावरूपं तस्मिन्नेव समुद्रे । मग्नां विधेहि ननसङ्घट्टनेन मानृणमस्तां कुर्वित्यर्थः । अशोढृं, मग्नामिति मग्नत्वानुवादेन अशुद्धिर्विधीयते दरिद्राणामृणमुक्तिर्नास्तीति भावः ॥ ८६ ॥

क्रीणीष्वेति । हे जीवेशदातः प्राणेश्वरद ! मज्जीवितमेव पण्य क्रेयं वस्तु क्रीणीष्व जीवेशरूपमूल्यदानेन स्वीकुरुष्वेत्यर्थः । अन्यदेत-

वराटिकोपक्रिययापि लभ्या
न्नेभ्याः कृतज्ञाननवाद्रियन्ते ।
प्राणैःपणैः स्वं निपुणं भणन्तः
क्रीणन्ति तानेव तु हन्त सन्तः ॥ ८८ ॥

स भूभृदष्टावपि लोकपाला
स्तैर्म्मे तदेकाग्रधियः प्रसेदे ।
न हीतरस्माद्घटते यदेत्य
स्वयं तदाप्तिप्रतिभूर्म्ममाभूः ॥ ८९ ॥

न्मूल्यानुरूपं वस्त्वन्तरं नास्ति चेत्तर्हि पुण्यं सुकृतमस्तु किञ्चिद्यदि ते तुभ्यं दातुं न प्रभवामि न शक्नोमि तावत्तर्हि यशोऽपि कीर्त्तिं गातुं प्रभवामि ख्याति सुकृतार्थमेवोपकुरुष्वेत्यर्थः ॥ ८७ ॥

अथवा साधुस्वभावेनापि परोपकारं कुर्व्वीत्याह । वराटिकेति । वराटिकोपक्रियया कपर्दिकादानेनापि लभ्यान् कृतज्ञान् तावदेव बहुकृन्यतानान् उपकारज्ञान् इभ्याः धनिकाः इभ्य आढ्यो धनी स्वामीत्यमरः । नाद्रियन्ते धनलोभान्नोपकुर्वन्तीत्यर्थः सन्तो विवेकिनस्तु स्वमात्मानं निपुणं भणन्तः सन्त एते वयं त्वदधीना इति साधु वदन्त इत्यर्थः । तानेव कृतज्ञान् प्राणैरेव पणैः क्रीणन्ति आत्मसात् कुर्व्वन्ति किमुत धनैरित्यर्थः अतस्त्वयापि सताकृतज्ञाहमुपकर्त्तव्येति भावः । हन्त हर्षे ॥ ८८ ॥

सेति । किञ्च स भूभृन्नलः अष्टावपि लोकपालाः तदात्मका इत्यर्थः । अष्टाभिर्लोकपालानां मात्राभिर्निर्म्मितो नृप इति स्मरणात् । अतएव तदेकाग्रधियो नलैकतानबुद्धेः मे मम तैर्लोकपालैः प्रसेदे प्रसन्नं भावे लिट् देवताध्यायन्तः प्रसीदन्तीति भावः कुत इतरस्माद् प्रसादान्यथेत्यर्थः । स्वयं स्वयमेवागत्य मम तदाप्ति प्रतिभूः नलप्राप्ति लग्नको भूरिति यत् तन्न घटते हि । तत्प्रसादाभावे कुतो ममेदं श्रेयइत्यर्थः ॥ ८९ ॥

अकाण्डमेवात्मभुवार्ज्जितस्य
भूत्वापि मूलं मयि वीरणस्य ।
भवान्न मे किं नलदत्वमेत्य
कर्त्ता रहश्चन्दनलेपकृत्यम् ॥ ९० ॥
अलं विलम्ब्य त्वरितुं हि वेला
कार्य्ये किल स्थैर्य्यसहे विचारः ॥

अकाण्डेति । हे हंस ! विः पक्षी वि विष्किरपतत्रिणः इत्यमरः । रोरीति रेफलोपे ढ्रलोपे पूर्वस्य दीर्घोऽणः भवान् अकाण्डमनवसर एव अत्यन्त संयोगे द्वितीया आत्मभुवा कामेन मयि विषये आर्जितस्य कृतस्य रणस्य गाढ़प्रहार लक्षणस्य मूलं हंसानामुद्दीपकत्वेन निदानं भूत्वापि अन्यत्र काण्डो दण्डः तद्वर्जितमकाण्डं यथा तथा आत्मभुवा ब्रह्मणा आर्जितस्य सृष्टस्य वीरणस्य तृणविशेषस्य मूलं मूलावयवो भूत्वा अत एव नलदत्वं नैषधदातृत्वं अन्यत्र उशीरत्वं चेत्यर्थः । रहः चन्दनलेप कृत्यं शैत्योत्पादनं न कर्त्ता करिष्यत्येव परोपकार शीलत्वादिति भावः । काण्डोऽस्त्रीदण्डबाणार्ववर्गावसरवारिषु । स्याद्वीरणं वीरतरं मूलस्योशीर- मस्त्रियां अभयं नलदं सेव्यमिति चामरः । वीरणस्येति शब्दस्य श्लेषः । अन्यत्रार्थ श्लेषः । तया च नलदत्वमेत्य इति प्रकृता प्रकृतयोरभेदाध्यवसायेन हंसे आरोप्यमाणस्योशीरस्य प्रकृत्या तादात्म्येन चन्दनकृत्य लक्षण प्रकृतकार्य्योपयोगात् परिणामालङ्कारः । आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात् स चोक्त श्लेष प्रतिबिम्बोत्थापित इति सङ्करः ॥ ९० ॥

अलमिति । हे हंस ! विलम्ब्यालं न विलम्बितव्यमित्यर्थः । अलङ्खल्वोरित्यादिनाक्त्वा प्रत्यये ल्यबादेशः । त्वरितुं वेलाहि त्वराकालः खल्वयमित्यर्थः कालसमये वेलासु तुमुन् कुतः स्थैर्यसहे विलम्बसहे कार्ये विचारो विमर्शः किलेति प्रसिद्धौ अन्यथा विपत्स्यत इति भावः ।

गुरूपदेशं प्रतिभेव तीक्ष्णा
प्रतीक्षते जातु न कालमार्त्तिः ॥ ९१ ॥
अभ्यर्थनीयः स गतेन राजा
त्वया न शुद्धान्तगतो मदर्थम् ।
प्रियास्यदाक्षिण्यबलात्कृतो हि
तदोदयेदन्यवधूनिषेधः ॥ ९२ ॥
शुद्धान्तसम्भोगनितान्ततुष्टे
न नैषधे कार्य्यमिदं निगाद्यम् ।

तथाहि तीक्ष्णा शीघ्रग्राहिणी प्रतिभा प्रज्ञा गुरूपदेशमिव आर्त्ति राधि जातु कदाचित् कालं न प्रतीक्षते कालक्षेपं न सहत इत्यर्थः । उपमार्थान्तरन्यासयोः संसृष्टिः ॥ ९१ ॥

अथानन्तरकृत्यं स विशेषमुपदिशति । अभ्यर्थनीय इत्यादि श्लोकपञ्चकेन । गतेन इतो यातेन त्वया स राजा नलः शुद्धान्तगतः । अन्तःपुरःस्थो मदर्थं मत्प्रयोजनं नाभ्यर्थनीयो न याच्यः दुहादित्वाद्द्विकर्मकत्वं अप्रधाने दुहादीनामिति राज्ञोऽभिहित कर्मत्वं कुतः हि यस्मात्तदा तस्मिन् काले प्रियाणामास्य दाक्षिण्यं मुखावलोकनोत्थापित छन्दानुवृत्ति बुद्धिरित्यर्थः । तेन बलात्कृतो बलात्प्रतिवर्त्तितो अन्यवधूनिषेधः उदयेत् उत्पद्येत ॥९२॥

शुद्धान्तेति । किञ्च शुद्धान्त सम्भोगेन अन्तःपुर स्त्रीसम्भोगेन नितान्ततुष्टे अत्यन्त सन्तुष्टे नैषधे नलविषये इदं कार्य्यं न निगाद्यं न निगदितव्यं ऋहलोर्ण्यत् गदमदेत्यादिना सोपसर्गाद्यतो निषेधात् । तथाहि अपां तृप्ताय अद्भिस्तृप्तायेत्यर्थः । पूरणगुणेत्यादिना षष्ठी समास प्रतिषेधादेव ज्ञापकात् षष्ठी रुच्यर्थानां प्रीयमाण इति सम्प्रदानत्वाच्चतुर्थी स्वादुर्मधुरा सुगन्धिः । कर्पूरादि वासनया शोभनगन्धा अत्र कवीनां निरङ्कुशत्वाद्गन्धस्येत्वेतदेकां तत्वनियमानादरः । तुषारा शीतला वारिधारा

अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ॥ ९३ ॥
विज्ञापनीया न गिरो मदर्थाः
क्रुधा कदुष्णे हृदि नैषधस्य ।
पित्तेन दूने रसने सितापि
तिक्तायते हंसकुलावतंस ! ॥ ९४ ॥
धरातुरासाहि मदर्थयाच्ञा
कार्या न कार्यान्तरचुम्बिचित्ते ।
तदार्थितस्यानवबोधनिद्रा
बिभर्त्यवज्ञाचरणस्य मुद्राम् ॥ ९५ ॥

न स्वदते न रोचते हि । दृष्टान्तालङ्कारः ॥ ९३ ॥

विज्ञापनीया इति । हे हंस कुलावतंस ! नैषधस्य नलस्य हृदि हृदये क्रुधा क्रोधेन कदुष्णे ईषदुष्णे चकारात्केः कदादेशः । मह्यमिमाः मदर्थाः अर्थेन सह नित्य समासः सर्वलिङ्गता च वक्तव्या गिरो वाचो न विज्ञापनीया न विधेयाः न विज्ञाप्या इत्यर्थः । तथाहि पित्तेन पित्तदोषेण दूने दूषिते रसने रसनेन्द्रिये सिता शर्करापि तिक्तायते तिक्तीभवति रोहितादित्वात् क्यषे वाक्यष इति आत्मनेपदं अत्रापि दृष्टान्तालङ्कारः ॥९४॥

धरेति । तुरं त्वरितं सहयत्यभिभवत्यरीनिति तुराषाडिन्द्रः सहते श्चौरादिकत्वात् क्विप् न हि इतित्यादिना पूर्वपदस्य दीर्घः प्रकृतिग्रहणेरार्थं तस्यापि ग्रहणात् मुग्धभोजस्तु तुराशब्दं टाबन्तमाह । तस्मिन् धरा तुरासाहि भूदेवेन्द्रे नले अजादिषु असाड्रूपत्वात् सहेः साडः स इति षत्वं नास्ति । कार्यान्तर चुम्बिचित्ते व्यासक्त चित्ते मदर्थ याच्ञा मत्प्रयोजन प्रार्थना न कार्या तथाहि तदा व्यासङ्गकाले अर्थितस्य अनवबोध अबोधः स एव निद्रा सा अवज्ञा चरणस्य अनादर करणस्य मुद्रां अभिज्ञानं बिभर्त्ति अनादर प्रतीतिं करोतीत्यर्थः । तच्चातिकष्टमिति भावः ॥९५॥

विज्ञेन विज्ञाप्यमिदं नरेन्द्रे
तस्मात्त्वयास्मिन् समयं समीक्ष्य ।
आत्यन्तिकासिद्धिविलम्बिसिद्ध्योः
कार्य्यस्य कार्य्यस्य शुभा विभाति ॥ ९६ ॥
इत्युक्तवत्या यदलोपि लज्जा
सानौचिती चेतसि नश्चकास्तु ।
स्मरस्तु साक्षी तददोषताया
मुन्माद्य यस्तत्तदवीवदत्ताम् ॥ ९७ ॥
उन्मत्तमासाद्य हरः स्मरश्च
द्वावप्यसीमां मुदमुद्वहेते ।

विज्ञेनेति । तस्मात्कारणाद्विज्ञेन विवेकिना त्वया समयं समीक्ष्य इदं कार्यमस्मिन् नले विषये विज्ञाप्यं विलम्बः स्यादित्याशङ्क्याह आत्यन्तिकेति । हे हंस ! कार्यस्य आत्यन्तिका सिद्धि विलम्बिसिद्ध्योर्मध्ये कार्यस्य विदुषस्ते का कतरा शुभा समीचीना विभाति अनवसर विज्ञापने कार्यविघाताद्वरं विलम्बनेनापि कार्यसाधनमिति भावः ॥ ९६ ॥

इतीति । इत्युक्तवत्या तया लज्जा अलोपि त्यक्तेति यत् सा विधेय प्राधान्यात् स्त्रीलिङ्गता अनौचिती अनौचित्यङ्गत मेतत् नोऽस्माकं शृण्वतां चेतसि चकास्तु किन्तु लज्जात्यागस्य अदोषतायां स्मरः साक्षी प्रमाणं यः स्मरः तां भैमीमुन्माद्य उन्मादावस्थां प्राप्य तत्तदनुचितं वचनमवीवदत् वादयति स्म वदतेर्णौ चङि गति बुद्धीत्यादिना वदेर्णिच कर्तुः कर्म्मत्वम् प्रकृतिस्थस्यायं दोषो न कामोपहत चेतस इति भावः ॥ ९७ ॥

कामो वा किमर्थमेवं कारयतीत्याशङ्क्य तस्यायं निसर्गो यदुन्मत्तेन क्रीडतीति सदृष्टान्तमाह । उन्मत्तमिति । हरः स्मरश्च द्वावपि उन्मत्तमासाद्य असीमां दुरन्तां मुदमुद्वहेते दधतुः । वहे स्वरितेत्त्वादात्मनेपदं किन्तु तत्र निर्देशक्रमात् पूर्वौ हरः स्मरस्पर्द्धितया स्मरहे-

पूर्वः स्मरस्पर्द्धितया प्रसूनं
नूनं द्वितीयो विरहाधिदूनं ॥ ९८ ॥
तथाभिधात्रीमथ राजपुत्रीं
निर्णीय तां नैषधबद्धरागाम्।
अमोचि चञ्चूपुटमौनमुद्रा
विहायसा तेन विहस्य भूयः ॥ ९९ ॥
इदं यदि क्ष्मापतिपुत्रि! तत्त्वं
पश्यामि तन्न स्वविधेयमस्मिन्।
त्वामुच्चकैस्तापयता नृपञ्च
पञ्चेषुणैवाजनि योजनेयम् ॥१०० ॥

द्धितया प्रसूनं धुत्तूरकुसुमं तस्यायुध तयेति भावः। अन्यस्तु द्वितीयः स्मरस्तु विरहाधि दूनं विरहव्यथादुस्थ मुन्मादावस्थापन्नमित्यर्थः। अन्यत्र विनोदलाभादित्यर्थः। उन्मत्त उन्मादवति धुत्तूर मुचुकुन्दयोरिति विश्वः। उभयोरभेदाध्यवसायात् समान धर्म्मत्व विशेषण मात्र श्लेषात्मकता प्रकृत गोचरत्वाच्च उभय श्लेषः। तेन हरवत् स्मरोऽप्युन्मत्त प्रिय इति उपमा गम्यते ॥ ९८ ॥

तथेति। तथाभिधात्रीं तां राजपुत्रीं भैमीं नैषधे नले बद्धरागां निर्णीय तेन विहायसा विहगेन विहस्य भूयः चञ्चूपुटस्य मौन मुद्रा निर्वचनत्वममोचि अवादीदित्यर्थः ॥९९॥

इदमिति। हे क्ष्मापतिपुत्रि! इदं त्वदुक्तं तत्त्वं यदि सत्यं यदि तर्हि अस्मिन् विषये स्वविधेयं मत्कृत्यं न पश्यामि किन्तु त्वां नृपं च उच्चैरत्यन्तं तापयता पञ्चेषुणैव इयं योजना युवयोः सङ्घटना अजनि जाता जनेः कर्मणि चिणो लुक् ॥ १०० ॥

त्वद्बद्धबुद्धेर्बहिरिन्द्रियाणां
तस्योपवासव्रतिनां तपोभिः ।
त्वामद्य लब्ध्वामृततृप्तिभाजां
स्वं देवभूयं चरितार्थमस्तु ॥ १०१ ॥
तुल्यावयोर्मूर्त्तिरभून्मदीया
दग्धा परं सास्य न ताप्यतेऽति ॥
इत्यभ्यसूयन्निव देहतापं
तस्यातनुस्त्वद्विरहाद्विधत्ते ॥ १०२ ॥

त्वदिति । किन्तु त्वद्बद्धबुद्धेः त्वदायत्तचित्तस्य त्वामेव ध्यायत इत्यर्थः । अतएव तस्योपवासव्रतिनां त्वदा सङ्गाद्विषयान्तरव्यावृत्तानां तपोभिरुक्तोपवासव्रतरूपैरद्य त्वां लब्ध्वा सम्मुखेन लब्धप्रायां निश्चित्य साक्षात्कृत्येति च गम्यते अतएव अमृतेन या तृप्तिस्तद्भाजांवहिरिन्द्रियाणां स्वं स्वकीयं देवभूयं देवत्वमिन्द्रियत्वं सुरत्वञ्च देवः सुरे राज्ञि देवमाख्यातमिन्द्रियमिति विश्वः । चरितार्थं सफलमस्तु अमृतपानैक फलत्वाद्देवत्वं स्यादिति भावः । अर्थान्तरप्रतीतेर्ध्वनिरेवेत्यनुसन्धेयम् ॥ १०१

यदुक्तं रूपं पञ्चेषुस्तापयतीति तदाह । तुल्येति । आवयोर्नलस्य मम चेत्यर्थः । त्यदादीनि सर्वैर्नित्यमिति सर्वग्रहणात्त्यदादिना नलेन सह त्यदाद्येकशेषः । मूर्तिस्तनुस्तुल्या तुल्यरूपाभूत् तत्र मदीया सा मूर्त्तिः परं निःशेषं दग्धा भस्मीकृता अस्य मूर्तिस्तनुर्न ताप्यते तापमपि न प्राप्यते इति हेतोरभ्यसूयन् ईर्ष्यन्निकेतुरात्मेवा अतनुरनङ्गस्त्वद्विरहात्त्वद्विरहमेव रन्ध्रमन्विष्येत्यर्थः । तस्य नलस्य देहतापं विधत्ते तस्मात्सिद्धिपदमुपतिष्ठते ते मनोरथ इति भावः ॥ १०२ ॥

लिपिं दृशा भित्तिविभूषणं त्वां
नृपः पिबन्नादरनिर्निमेषम् ।
चक्षुर्जलैरर्पितमात्मचक्षु
रागं स धत्ते रचितं त्वया नु ॥ १०३ ॥
पातुर्दृशालेख्यमयीं नृपस्य
त्वामादरादस्तनिमीलयास्ति ।
ममेदमित्यश्रुणि नेत्रवृत्तेः
प्रीतेर्निमेषच्छिदया विवादः ॥ १०४ ॥
त्वं हृद्गता भैमि ! बहिर्गतापि
प्राणायिता नासिकयास्यगत्या ।

अथास्य दशावस्थावर्णयन् चक्षुःप्रीतिं तावत् श्लोकद्वयेनाह । लिपिमित्यादि । हे भैमि ! स नृपो भित्तिविभूषणां कुड्यालङ्कारभूतां लिपिं चित्रमयीं त्वां दृशा आदरेणास्थयानिर्निमेषं पिबन् चक्षुर्जलैरश्रुभिरर्पितं त्वयानु त्वया वा रचितमात्मचक्षुषो रागं आरुण्यं अनुरागञ्च धत्ते अत्रोभयकारणसम्भवादुभयस्मिन्नपि रागे जाते श्लेषमहिम्नैकताभिधानात्कारणविशेषसन्देहः ॥ १०३ ॥

इममेवार्थं भङ्ग्यन्तरेणाह । पातुरिति । अस्तनिमीलया निर्निमेषया दृशा आलेख्यमयीं चित्रगतां त्वां आदरात्पातुर्द्रष्टुरित्यर्थः पिबतेस्तृन् प्रत्ययः । अतएव न लोकेत्यादिना षष्ठीप्रतिषेधात्त्वामिति द्वितीया नृपस्य नेत्रवृत्तेः प्रीतेस्त्वश्रु प्रीतेर्निमेषस्य च्छिदया च्छेदेन सह नेत्रवृत्त्येति शेषः । भिदादित्वादङ् प्रत्ययः । अस्मिन् विषये इदमश्रु ममेति मत्कृतमेवेति विवादः कलहो अस्ति भवतीत्यर्थः ॥ १०४ ॥

अथ मनःसङ्गमाह । त्वमिति हे भैमि ! त्वं बहिर्गतापि हृद्गता अन्तर्गता अपि विरोधे तेन चाभासाद्विरोधाभासोऽलङ्कारः । कया गत्या केन प्रकारेण अस्य नलस्य प्राणायिता प्राणवदाचरिता प्राणसमा.

न चित्तमाक्रामति तत्र चित्र-
मेतन्मनोयद्भवदेकवृत्ति ॥ १०५ ॥
अजस्रमारोहसि दूरदीर्घां
सङ्कल्पसोपानततिं तदीयाम् ।
श्वासान् स वर्षत्यधिकं पुनर्यत्
ध्यानात्तव त्वन्मयतां तदाप्य ॥ १०६ ॥
हृत्तस्य यां मन्त्रयते रहस्त्वां
तां व्यक्तमामन्त्रयते मुखं यत् ।

उपमानादाचारे कर्तुः क्यङ् प्रत्ययः नासि श्वसे वेत्यर्थः । यतः प्राणोऽपि नासिकया नासाद्वारेण आस्यगत्या मुखद्वारेण उच्छ्वाससनिश्वासरूपेण वहिर्गतोऽप्यन्तर्गतो भवतीति शब्दश्लेषः । अतएव प्राणायितेति श्लिष्टविशेषणेयमुपमा पूर्वोक्तविरोधेन सङ्कीर्णा किन्तु तव प्राणायितत्वे चित्रमाश्चर्यं रसः चित्तन्नाक्रामति न किञ्चिच्चित्रमित्यर्थः । कुतः यद्यस्माद् तन्मनो नलचित्तं भवति त्वमेवैका वृत्तिर्जीविका यस्य तद्भवदेकवृत्ति भवच्छब्दस्य सर्वनामत्वाद् वृत्तिमात्रे पुंवद्भावः जीवितभूतस्य प्राणायितत्वे किं चित्रं जीवितस्य प्राणधारणात्मकत्वादिति भावः ॥ १०५ ॥

अथ द्वाभ्यां सङ्कल्पावस्थामाह । अजस्रमिति । दूरदीर्घामत्यन्तायतां तदीयां सङ्कल्पा मनोरथा एव सोपानानि तेषाम् । ततिं पङ्क्तिमजस्रं त्वं आरोहसि श्वासान् पुनः स नलो अधिकं वर्षति मुञ्चतीति यत् तच्छ्वासवर्षं तव ध्यानात् त्वन्मयतां त्वदात्मकत्वमाप्य प्राप्य अप्नोतेराङ् समासे क्त्वो ल्यबादेशः अन्यथा कथमन्यायासादन्यस्य श्वासमोच इति भावः । अत्र श्वाससोपानारोहणयोः कार्यकारणयोर्वैयधिकरण्योक्तेरसङ्गत्यलङ्कारः कार्यकारणयोर्भिन्नदेशत्वं स्यादसङ्गतिरिति लक्षणात् तन्मूला चेयं नलस्य दमयन्ती । तादात्म्योत्प्रेक्षेति सङ्करः ॥१०६॥

तद्वैरिपुष्पायुधमित्रचन्द्र
सख्योचिती सा खलु तन्मुखस्य ॥ १०७ ॥
स्थितस्य रात्रावधिशय्य शय्यां
मोहे मनस्तस्य निमज्जयन्ती
आलिङ्ग्य या चुम्बति लोचने सा
निद्राधुना न त्वदृतेऽङ्गना वा ॥ १०८ ॥
स्मरेण निस्तक्ष्य वृथैव बाणै

हृदिति । तस्य नलस्य हृत् हृदयं कर्त्तृ यां त्वां रहः उपांशु रहस्योपांशु चालिङ्गे इत्यमरः । मन्त्रयते सम्भाषते तां त्वां तन्मुखं कर्त्तृ व्यक्तं प्रकाशमामन्त्रयते हे प्रिये ! कथय । मामनुयान्तं पश्य इत्युच्चैरुच्चरतीति यत् सा तद्रहस्य प्रकाशनं विधेय प्राधान्यात् स्त्रीलिङ्गता तन्मुखस्य तद्वैरिणो नलद्वेषिणः पुष्पायुधस्य मित्रं सखा शरच्चन्द्रः । तेन यत् सख्यं मैत्रीसादृश्यञ्च तस्य औचिती औचित्यं खलु अरि मित्रसाधारित्वादुचितमेव तद्रहस्यभेदनमित्यर्थः । अत्र मुखकर्त्तृक रहस्योद्भेदनस्य उक्तैरनिमित्तत्वमुत्प्रेक्ष्यते ॥ १०७ ॥

अथ एकेन जागरमरतिञ्चाह । स्थितस्येति रात्रौ शय्यामधिशय्य शय्यायां शयित्वा अधिशीङ्स्थासामिति अधिकरणस्य कर्म्मत्वम् । स्थितस्य तस्य मनो मोहे सुखपारवश्ये निमज्जयन्ती सती या आलिङ्ग्य लोचने चुम्बति सा निद्रा त्वदृते त्वत्तो विना अन्यारादितरर्ते इत्यादिना पञ्चमी त्वद्विरहार्द्दितोस्त्वदन्या चेति द्रष्टव्यं अङ्गना वा अधुना नास्ति निद्रानिषेधाज्जागरः अङ्गनान्तरनिषेधाद्विषयद्वेषलक्षणा अरतिश्चोक्ता अत्र निद्राङ्गनयोः प्रस्तुतयोरेवालिङ्गनादि चुम्बनादिधर्म्मसाम्यादौपम्यपतीतेः केवल प्रकृतगोचरात्तुल्ययोगितालङ्कारः प्रस्तुतानाञ्च केवलं तत्र धर्मतः औपम्यं गम्यते यत्र सा मता तुल्ययोगिता इति लक्षणात् ॥ १०८ ॥

लावण्यशेषां कृशतामनायि ।
अनङ्गतामप्ययमाप्यमानः
स्पर्द्धान्न सार्द्धं विजहाति तेन ॥ १०९ ॥
त्वत्तापकात्त्रस्यति नैनसोऽपि
त्वय्येवदास्येऽपि न लज्जते यत् ।
स्मरेण वाणैरतितक्ष्य तीक्ष्णै
र्लूनः स्वभावोऽपि कियान् किमस्य ॥ ११० ॥
स्मारं ज्वरं घोरमपत्रपिष्णोः
सिद्धागदङ्कारचये चिकित्सौ ।

अथ कार्श्यावस्थामाह । स्मरेणेति । अयं नलः स्मरेण बाणैर्निस्तक्ष्य निशाल्य ईर्ष्यैव लावण्यं कान्ति विशेषः मुक्ताफलेषु छायाया स्तरलत्वमिवान्तरा प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते इति भूपालः । तदेव शेषो यस्यां स्तांतनुतां कार्श्यमनायि नीतः नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि लुङ् प्रधान कर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वचनात् । ईर्ष्यात्वं व्यनक्ति अनङ्गतां कृशाङ्गतां अनुदरेति वदीषदर्थे नञ् समासः आप्यमानो अनीयमानोऽपि अत्र पूर्ववत्प्रधाने शानच् तेन स्मरेण सार्द्धं स्पर्द्धां न विजहाति तथापि तं जिगीषत्येवेत्यर्थः । अङ्गकार्श्येऽपि स्पर्द्धा बीज लावण्यस्याकार्श्यादङ्गकर्षनं ईर्ष्यैवेति भावः । अतएव विशेषोक्तिरलङ्कारः तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिरलङ्कृतिरिति लक्षणात् ॥१०९॥

अथ द्वाभ्यां लज्जात्यागमाह । त्वदित्यादि । स्मरेण तीक्ष्णैर्बाणैरतितक्ष्य शरीरमिति शेषः । अस्य नलस्य स्वभावोऽपि पापभीरुत्वनीचत्वगर्हताक्लीव्यमपि कियानल्पोऽपि लूनः किमित्युत्प्रेक्षा यद्यस्मात्त्वत्तापकात्त्वत्प्राप्ति साधनादेनसः पापादपि न त्रस्यति भीत्रार्थानां भयहेतुरिति अपादानत्वात् पञ्चमी त्वय्येव दास्येऽपि त्वदधिगतदास्य विषये न लज्जते ॥ ११० ॥

निदानमौनादविशद्विशाला
सांक्रामिकी तस्य रुजेव लज्जा॥१११
बिभेति रुष्टासि किलेत्यकस्मात्
स त्वां किलोपैति हसत्यकाण्डे।
यान्तीमिव त्वामनुयात्यहेतो
रुक्तस्त्वयेव प्रतिवक्ति मोघम्॥ ११२॥
भवद्वियोगाच्छिदुरार्त्तिधारा
यमस्वसुर्मज्जति निःशरणः।
मूर्च्छामयद्वीपमहान्ध्यपङ्के
हाहा महीभृद्भटकुञ्जरोऽयम्॥ ११३॥

स्मारमिति। घोरं दारुणं स्मारं ज्वरं कामसन्तापं चिकित्सौ प्रतिकर्त्तरि कित्तनिवास इति धातोः गुप्तिज्किद्भ्यः सनिति निन्दाक्षमाव्याधिप्रतीकारेषु इष्यत इति रोग प्रतीकारे सन् प्रत्ययः सनाशंसभिक्ष उः नलोकेत्यादिना षष्ठी प्रतिषेधः सिद्धागदङ्कार चये सिद्धवैद्यसङ्घे कर्मण्यणिकारे सत्यागदस्येति सुमागमः निदान मौनाद्रोग निदानानभिधानाद्धेतोरपत्रपिष्णोर्लज्जाशीलस्य अलङ्कृञित्यादिना इष्णुच् तस्य नलस्य विशाला महती लज्जा संक्रमादागता सांक्रामिकी रुजेव अक्षिरोगो ह्यपस्मारः क्षयः कुष्ठमसूरिका दर्शनात् स्पर्शनाद्दानात् संक्रमन्ति नरान्नर इति उक्ताक्ष्यादिरोगा इवेत्यर्थः भिदादित्वा दङ् प्रत्ययः अविशत्॥१११॥

अथ उन्मादावस्थामाह। बिभेतीति। स नलः अकस्माद काण्डे रुष्टा कुपितासीति बिभेति अकाण्डे अनवसरे उपेत्य किल प्रायेण हसति अहेतोरकस्माद्यान्तीं गच्छन्तीं किल त्वा अनु याति त्वया युक्त इव मोघं निर्विषयं प्रतिवक्ति सर्वोऽप्यय मुन्मादानुभावः। उन्मादश्चित्तविभ्रमः॥ ११२॥

अथ मूर्च्छावस्थामाह। भवदिति। भवत्या वियोगो भवद्वियोगः स

सव्यापसव्यव्यसनाद्द्विरुक्तैः
पञ्चेषुबाणैः पृथगर्जितासु ।
दशासु शेषा खलु तद्दशा या
तया नभः पुष्यतु कोरकेण ॥ ११४ ॥

त्वयि स्मराधेः सततास्मितेन
प्रस्थापितो भूमिभृतास्मि तेन ।
आगत्य भूतः सफलो भवत्या
भावप्रतीत्या गुणलोभवत्याः ॥ ११५ ॥

नाम्नो वृत्ति मात्रे पुंवद्भावः । तस्मिन्नच्छिद्रा अविच्छिन्ना विदिभिर्दिच्छिदेः कुरच् । आर्तिधारा दुःखपरम्परा तस्या एव यमस्वसुर्यमुनाया मूर्च्छामयं मूर्च्छावस्थारूपं यद्वीपं तत्र यन्महाम्बंत्र महामोहस्तस्मिन्नेव पङ्के महीभृद्भटो राज वीरः स एव कुञ्जरः निःशरणो निरालम्बः सन् मज्जति हाहेति खेदे रूपकालङ्कारः । आर्तिधारायास्तमो विकारत्वेन रूपसाम्याद्यमुना रूपणम् ॥ ११२ ॥

दशमावस्था तु तस्य कदापि माभूदित्यत आह । सव्येति । सव्यापसव्याभ्यां वामदक्षिणाभ्यां व्यसनाल्लोचनात् द्विरुक्तैर्द्विगुणीकृतैर्दशभिरित्यर्थः । पञ्चेषु बाणैः पृथगर्जितासु प्रत्येकमुत्पादितासु दशसु दृङ्मनः सङ्ग सङ्कल्पो जागरः कृशतारतिः ह्रीत्यागोन्माद मूर्च्छान्त इत्यनङ्गदशादश इत्युक्तासु चक्षुः प्रीत्यादि दशावस्थासु शेषा अवशिष्टा या तद्दशा दशमावस्थेत्यर्थः । तयैव कोरकेण कलिकयेति रूपकं । नभः पुष्यतु पुष्पितमस्तु अस्य सा दशा ख पुष्पकल्पास्तु कदापि माभूदित्यर्थः । तच्च त्वत्प्राप्तिलाभादिति भावः । पुष्पविकासन इति धातोर्लोट् ॥ ११४ ॥

त्वयीति । त्वयि विषये स्मराधेः स्मरपीडा दुःखाद्धेतोः सततसस्मितेन स्मितरहितेन खिन्नेन तेन भूमिभृता प्रस्थापितोऽस्मि । अथ आगत्य गुणलोभवत्याः भवत्यास्तव भावप्रतीत्या अभिप्रायज्ञानेन सफलो भूतः विज्ञार्थीऽस्मीत्यर्थः ॥ ११५ ॥

धन्यासि वैदर्भि ! गुणैरुदारै-
र्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया
यदब्धिमप्युत्तरलीकरोति ॥ ११६ ॥
नलेन भायाः शशिना निशेव
त्वया स भायान्निशया शशीव ।

धन्येति । हे वैदर्भि ! भैमि ! वैदर्भीरीतिरपि गम्यते । धनं लब्धा धन्यः असि कृतार्थासीत्यर्थः । धनगणं लब्धेति यत्प्रत्ययः कुतः यया त्वया उदारै रुत्कृष्टैर्गुणैर्लावण्यादिभिरन्यत्र श्लेषैः प्रसादादिभिः पाशैश्चेति गम्यते नैषधो नलोऽपि तादृक् धीरोऽपीति भावः । समाकृष्यत सम्यगाकृष्टो वशीकृत इति भावः । एतेन वैदर्भीत्यादिविशेषणाद् गुणैर्भाविकं इवेत्युपमालङ्कारो युज्यते तथाहि । चन्द्रिकाया अब्धिमपि गभीरमपीति भावः । उत्तरलीकरोति क्षोभयतीति यत् इतोऽपि अभ्यधिका स्तुतिर्वर्णना का खलु न कापीत्यर्थः । दृष्टान्तालङ्कारः । एतेन नलस्य समुद्रगाम्भीर्यं दमयन्त्याश्चन्द्रिकाया इव सौन्दर्यं व्यज्यते ॥११६॥

फलितमाह । नलेति । शशिना निशेव त्वं नलेन भायाः । भातेराशिषि लिङ् । सोऽपि निशया शशीव त्वया भायात् भातेः पूर्ववदाशिषि लिङ् । किं च अत्र दैवानुकूल्यमपि शुभाव्यमित्याह पुनः पुनस्तयोर्निशाशशिनोर्युगं युनक्ति योजयतीति तद्युगयुक् विधाता युवां नलन्त्वाञ्च त्यदादीनि सर्वैर्नित्यमिति एकशेषः योक्तुमिच्छतीति युयुक्षुर्युजेः सन्नन्ताद् उ प्रत्ययः स्वभ्यासं अभ्यासस्य समृद्धौ निरन्तराभ्यास इत्यर्थः । समृद्ध्यर्थेऽव्ययीभावः । ततः परस्याः सप्तम्या वैकल्पिकत्वाद् भावः । आस्ते नु तथाभ्यस्यति किमित्यर्थः । अत्र तादर्थ्ये चतुर्थ्या अभाव इति व्याख्याने अभ्यासार्थमभ्यस्यतीत्यर्थः स्यात् तदात्माश्रयत्वादित्युपेक्षणीयं अत्र दमयन्ती नलयोरन्योन्य शोभाजननोक्ते रन्योन्यालङ्कारः । पर-

पुनःपुनस्त्वद्युगयुग्विधाता
स्वभ्यासमास्ते नु युवां युयुक्षुः ॥ ११७ ॥
स्तनद्वये तन्वि ! परं तवैव
पृथौ यदि प्राप्स्यति नैषधस्य ।
अनल्पवैदग्ध्यविवर्द्धिनीनां
पत्रावलीनां रचना समाप्तिम् ॥ ११८ ॥
एकः सुधांशुर्न कथञ्चन स्या
त्तृप्तिक्षमस्त्वन्नयनद्वयस्य ।
त्वल्लोचनासेचनकस्तदस्तु
नलास्यशीतद्युतिसद्वितीयः ॥ ११९ ॥

स्वरक्रियाजननमन्योन्यमिति वचनात् । उपमाद्वयानुप्राणित इति सङ्कर तन्मूला चेयं विधातुः पुनर्निशा शशियोजनायां दमयन्ती नलयोजनाभ्यासत्वोत्प्रेक्षेति ॥ ११७ ॥

स्तनद्व इति । हे तन्वि ! किञ्च नैषधस्य नलस्य अनल्पेन महता वैदग्ध्येन नैपुण्येन विवर्धनीनामुज्जृम्भणीनां पत्रावलीनां रचनासमाप्तिं सम्पूर्णतां प्राप्स्यति यदि तर्हि पृथौ पृथुनि भाषित पुंस्कत्वाद्विकल्पेन पुंवद्भावः । तत्र स्तनद्वये परं प्राप्स्यति नान्यस्या इत्यर्थः । अन्यस्या अयोग्यत्वादिति भावः ॥ ११८ ॥

एक इति । एकः सुधांशु स्त्वन्नयनद्वयस्य कथञ्चन कथञ्चिदपि तृप्तौ प्रीणने क्षमो न स्यात्तत्तस्मात्तवास्य शीतद्युतिना नलमुखचन्द्रेण सद्वितीयः सन् त्वल्लोचनयोरासेचनक स्तृप्तिकरोऽस्तु तदा सेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनादित्यमरः । आसिच्यते अनेनेत्यासेचनकं करणे ल्युट् स्वार्थे कः ॥ ११९ ॥

अहो तपःकल्पतरुर्नलीय
स्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः।
तद्भ्रूयुगं यस्य खलु द्विपत्री
तवाधरो रज्यति यत्कलम्बः॥ १२०॥

यस्ते नवः पल्लवितः कराभ्यां
स्मितेन यः कोरकितस्तवास्त
अङ्गम्रदिम्ना तव पुष्पितो यः
स्तनश्रिया यः फलितस्तवैव॥ १२१॥

अथ द्वाभ्यां नलतपः साफल्यमाह। अहो इत्यादिना नलस्यायं नलीयः वा नामधेयस्येति वृद्धसंज्ञायां वृद्धात्छः। अतएव कल्पतरुः अभिनवः प्रसिद्ध कल्पतरु विलक्षण इत्यर्थः। अतएव अहो इत्याश्चर्यं वैलक्षण्यमेवाह त्वदित्यादि। अत्रापि यच्छब्दो द्रष्टव्यः यः कल्पतरुः तव पाणिजाग्रैः कररुहाग्रैः नित्यं स्फुरन्ती अङ्कुरश्रीर्यस्य सः अङ्कुरवानित्यर्थः यस्य तद्भ्रू युगमेव द्वयोः पत्रयोः समाहारो द्विपत्री प्रथमोत्पन्न पत्रद्वयं खलु तवाधरो यत्कलम्बो यस्य नासिकाकिसलयकाण्ड इत्यर्थः अस्य तु नासिका कलम्बस्येत्यमरः। रज्यति स्वयमेव रक्तो भवति कुषिरजोः प्राचां सन्परस्मै पदञ्चेति कर्मकर्तरि रूपम्॥१२०॥

यद्दति। य स्ते तव कराभ्यां पल्लवितः सञ्जात पल्लवः य स्तव स्मितेन कोरकितः सञ्जात कोरकः सन् आस्ते य स्तवाङ्गानां म्रदिम्ना मार्दवेन पुष्पितः सञ्जात पुष्पः य स्तवैव स्तन श्रिया स्तनसौन्दर्येण फलितः सञ्जात फलः सर्वत्र तारकादित्वादितच् प्रत्ययः। अत्र श्लोकद्वयेन सर्पाक्षि दमयन्ती नखादिषु च कल्पतरुतावयवत्वरूपणात्सावयवरूपकं तथा अवयविनि कल्पतरोरवयवानां नखाङ्कुरादीनाञ्च मिथः कार्य्यकारणभूतानां भिन्नदेशत्वादसङ्गत्या म्रितमिति सङ्करः कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिरिति लक्षणात्॥ १२१॥

कंसीकृतासीत् खलु मण्डलीन्दोः
संसक्तरश्मिप्रकरा स्मरेण ।
तुला च नाराचलता निजैव
मिथोऽनुरागस्य समीकृतौ वाम् ॥ १२२ ॥
सत्त्वस्नुतस्वेदमधूत्थसान्द्रे
तत्पाणिपद्मे मदनोत्सवेषु ।
लग्नोत्थितास्त्वत्कुचपत्त्ररेखा
स्तन्निर्गतास्तत् प्रविशन्तु भूयः ॥ १२३ ॥

किञ्च समानुरागत्वाच्च युवयोः समागमः श्लाघ्य इत्याशयेनाह । कंसीति । स्मरेण कर्त्रा वां युवयोर्मिथोऽनुरागस्य अन्योन्यरागस्य यस्तव तस्मिन् यश्च तस्य त्वयि तयोरनुरागयोरित्यर्थः । समीकृतौ समीकरणे निमित्ते तदर्थमित्यर्थः संसक्तः संयोजितः रश्मीनामंशूनां सूत्राणाञ्च प्रकरः समूहो यस्यां सा किरणप्रग्रहौ रश्मीत्यमरः । इन्दोर्मण्डलीबिम्बं कंसीकृता लोहपात्रीकृता आसीत् । कंसोऽस्त्री लोहभाजनमिति शाब्दिकः । मण्डले निजा नाराचलता बाणवल्ली सैव तुला तुलादण्डकृतेति शेषः । तत्रेन्दुमण्डलादौ कंसादिरूपणादेव स्मरस्य कार्यकारणरूपसिद्धेरेकदेशविवर्तिरूपकम् ॥ १२२ ॥

सत्वेति । किं च मदनोत्सवेषु रतिकेलिषु सत्वेन मनोविकारेण स्नुतो यः स्वेदःसात्विक विकार विशेषः तेनैव मधूत्थेन मधूच्छिष्टेन सान्द्रे निरन्तरे अतएव तस्य नलस्य पाणिपद्मे लग्नाः संक्रान्ताः । अतएव उत्थिताः त्वत्कुचतटाद्विश्लिष्टाः । मधूच्छिष्टे निकषस्य कनकरेखावदिति भावः । स्नातानुलिप्तवत्पूर्वकाल समासः तन्निर्गताः । तत्पाणिपद्मोत्पन्नास्त्वत्कुच पत्त्र रेखाः भूयः तत् पाणिपद्मं वा पुंसि पद्मं नलिनमित्यमरः । प्रविशन्तु कार्यस्य कारणे लयनियमादिति भावः । युवयोः समागमोऽस्तु इति तात्पर्यम् ॥ १२३ ॥

बन्धाढ्यनानारतमल्लयुद्ध
प्रमोदितैः केलिवने मरुद्भिः ।
प्रसूनवृष्टिं पुनरुक्तमुक्तां
प्रतीच्छतं भैमि ! युवां युवानौ ॥ १२४ ॥
अन्योऽन्यसङ्गमवशादधुना विभातां
तस्यापि तेऽपि मनसी विकसद्विलासे ।
स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्त
मादाविव द्व्यणुककृत्परमाणुयुग्मम् ॥ १२५ ॥
कामः कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनु
र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ ।

बन्धेति । किं च हे भैमि ! बन्धैरुत्तानादि करणैः । कामतन्त्रप्रसिद्धैराढ्यं समग्रं नानारतं उत्तानकादि विविध सुरतं तदेव मल्लयुद्धं तेन प्रमोदितैः सन्तोषितैः केलिवने मरुद्भिः वायुभिर्देवैश्च मरुतौ पवनामरौ इत्यमरः । पुनरुक्तं सान्द्रं यथा तथा मुक्तां प्रसूनवृष्टिं युवतिश्च युवा च युवानौ पुमान् स्त्रियेत्येक शेषः । युवां प्रतीच्छतं स्वीकुरुतं युद्धविक्रान्ता हि देवैः पुष्पवृष्ट्या सम्भाव्यत इति भावः ॥ १२४ ॥

अन्योन्येति । किं च अधुना अन्योन्य सङ्गमवशाद्विकसद्विलासे वर्धमानोल्लासे तस्यापि तेऽपि नलस्य तव च मनसी मनसिजस्य कामस्य तनुं शरीरं पुनः स्रष्टुमारब्धुं प्रवृत्ते अतएवादौ द्वाभ्यामारब्धं कार्यं द्व्यणुकं तत्करोतीति तत्कृत् तदारम्भकं करोतेः क्विप् । तत्परमाणुयुग्ममिवेत्युत्प्रेक्षा तार्किकमते मनसोऽणुत्वादिति भावः । विभातां कार्यारम्भकपरमाणुयुगलवदविक्षेपेण विराजतामित्यर्थः । भातेर्लोटि तस्येति तसः तामादेशः ॥ १२५ ॥

कामइति । असौ यो नलजिगीषुरिति भावः । कामः कौसुमेन चापेन दुर्जयं जितेन्द्रियत्वादिति भावः । अमुं नृपं नलं जेतुमव्रणवंश-

ग्रीवालङ्कृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
भ्राजिष्णुं कषलेखयेव विलसत्सिन्दूरसौन्दर्य्यया ॥ १२६ ॥
त्वद्गुच्छावलिमौक्तिकानि घुटिकास्तं राजहंसं विभो
र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम् ।
यन्नित्याङ्कनिवासलालिततमज्याभुज्यमानं लस
न्नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते ॥१२७॥

जां सत्कुलप्रसूतां दृढवेणुजन्याञ्च द्वौ वंशौ कुलमस्कराविति अमरः । अधिगुणाऽधिकलावण्यादि गुणामधिज्याञ्च नित्यसदनुवर्तमानं सिन्दूर-रङ्करावस्थायां नालान्तराले चित्रस्य सौन्दर्यं शोभा यस्यां तया कषरेखया कालान्तरे सिन्दूरसंक्रान्ति परीक्षार्थं कृत घर्षणरेखये वेत्युत्प्रेक्षा । पृष्ठे ग्रीवा पश्चाद्भागे कियत्किञ्चिद्यथा तथा लम्बया स्रस्तया ग्रीवालङ्कृतिः ग्रीवालङ्कारभूता या पट्टसूत्रलता तया भ्राजिष्णुं ताच्छील्ये भुवश्चेति चकारादिष्णुच् भ्राजमानां त्वामेव धनुर्वल्लीं चापलता मासाद्य माद्यति हृष्यति श्लेषोत्प्रेक्षाङ्गीणो रूपकालङ्कारः ॥ १२६ ॥

त्वदिति । विभोर्मनोभुवः कामस्य पत्रिवेद्धुरिति शेषः । तव गुच्छावलेर्मुक्ताहारविशेषस्य मुक्ता एव मौक्तिकानि विनयादित्वात् स्वार्थे ठगिति वामनः । घुटिकाः गुलिकाः विद्धि जानीहि तं राजहंसं राजश्रेष्ठं तमेव राजहंसं महाहंसं श्लिष्टरूपकम् । राजहंसो नृपश्रेष्ठे कादम्बकलहंसयोरिति विश्वः । वेधितुं प्रहर्तुमर्हं वेध्यं लक्ष्यं विध विधाने कहलोऽयं तु अनेकार्था धातवः एव माह वेधितच्छिद्रिताविश्यत्र स्वामी । अन्ये त्वाहुः स्वप्नेऽपि विधानार्थ एव प्रयोगाच्च विधवे धन इत्येवाकरस्थः पाठः पाठान्तरं तु प्रामादिकमव्य परम्परायातमिति विद्धि स्वमात्मानमपि स्वो ज्ञातावात्मनि स्वमित्यमरः । तां वक्ष्यमाणप्रकारां मञ्जुं मञ्जुलां धनुर्मञ्जरीं चापवल्लरीं विद्धि यस्याः धनुर्मञ्जर्याः नित्यमङ्कवासेन समीपस्थित्या लालिततमया अत्यादृतया ज्यया मौर्व्या भुज्यमानमनुभूयमानं अखिलं

पुष्पेषुश्चिकुरेषु ते शरचयं त्वद्भालमूले धनू
रौद्रे चक्षुषि यज्जितस्तनुमनुभ्राष्ट्रं च यश्चिक्षिपे।
निर्विद्याश्रयदाश्रमं स वितनुस्त्वां तज्जयायाधुना
पत्रालिस्त्वदुरोजशैलनिलया तत्पर्णशालायते ॥ १२८॥

विलासं शोभां ज्यारूपतामित्यर्थः। नाभ्येव मध्यविलङ्गुलिकास्थानं यस्याः सा रोमालिस्त्वद्रोमराजिरालम्बते भजति अत्र मौक्तिकादौ घुटिकाद्यवयवरूपणादवयविनि कामे वेद्धृत्वरूपणस्य गम्यमानत्वादेकदेशविवर्त्ति सावयवरूपकमलङ्कारः ॥ १२७ ॥

पुष्पेषुरिति। यः पुष्पेषुः कामो यज्जितो येन नलेन सौन्दर्यात्पराभूतः अतएव निर्विद्य ईर्ष्यया जीवनवैयर्थ्यं मत्वेत्यर्थः। तत्त्वज्ञानोदितेर्ष्यादेर्निर्विदो निष्फलत्वधीरिति लक्षणात् ते तव चिकुरेषु केशेषु स्वं स्वकीयं शरचयन्न्यधत्त कुसुमव्याजादिति भावः। भालमूले ललाटभागे धनुः भ्रूव्याजादिति भावः। तथा रौद्रे रुद्रसम्बन्धिनि चक्षुषि च अनुभ्राष्ट्रं अम्बरीषे विभक्त्यर्थेऽव्ययीभावः। क्लीबेऽम्बरीषं भ्राष्ट्रो ना इत्यमरः। तनुं शरीरं च चिक्षिपे क्षिप्तवान् पूर्वमेव दग्ध तनुव्याजादिति भावः। स्वरितेत्त्वात्तङ्। स पुष्पेषुर्वितनुरनङ्गः सन् अधुना तज्जयाय नलविजयार्थं त्वामेवाश्रमं तपोवनमाश्रयन् आश्रितवान् तपश्चर्यार्थमिति शेषः। अन्यथा कथं तं जेष्यतीति भावः। अतएव त्वदुरोज एव शैलो निलयो यस्याः सा तन्निलयेत्यर्थः। पत्रालिः पत्ररचनापर्णचयश्च तस्य कामस्य पर्णशालायते सेवाचरति उपमानात् कर्त्तुः क्यङ्। अत्र पूर्वार्द्धे शर चापादीनां पूर्वोक्त पुष्पादिविषयनिगरणेन तदभेदाध्यवसायाद्भेदे अभेद लक्षणातिशयोक्तिः तत्पर्णशालायत इत्युपमा चोत्थापितेन त्वामाश्रममिति रूपकेण सङ्कीर्णा व्यञ्जकाप्रयोगाद्गम्या कामस्याश्रमाश्रयणोत्प्रेक्षेति सङ्करः ॥ १२८॥

इत्यालपत्यथ पतत्त्रिणि तत्र भैमीं
सख्यश्चिरात्तदनुसन्धिपराः परीयुः।
शर्म्मास्तु ते विसृज मामिति सोऽप्युदीर्य्य
वेगाज्जगाम निषधाधिपराजधानीम् ॥ १२९ ॥
चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रयत्
प्रेयोदूतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात्।
स्वादं स्वादमसीममृष्टसुरभि प्राश्यापि तृप्तिं न सा
तापं प्राप नितान्तमन्तरतुलामानर्च्छ मूर्च्छामपि ॥१३०॥

इतीति। तत्र तस्मिन् पतत्त्रिणि हंसे भैमीं इति इत्थमालपति भाषमाणे सति अथास्मिन्नवसरे चिरात्प्रभृति तस्या भैम्या अनुसन्धिरन्वेषणं उपसर्गे घोः किरिति किः। तत्पराः सख्यः परीयुः परिवव्रुः। इणो लिट्। हंसोऽपि ते तव शर्मास्तु सुखमस्तु मां विसृज इत्युदीर्य उक्त्वा वेगान्निषधाधिप राजधानीं जगाम ॥ १२९ ॥

चेत इति। सा भैमी चेतोजन्मनः कामस्य शरप्रसूनानां शरभूतपुष्पाणां मधुभिस्तद्रसैः क्षौद्रैश्च मधु मद्ये पुष्परसे क्षौद्रे इत्यमरः। व्यामिश्रतामाश्रयत् तथा मिश्रं सदित्यर्थः। असीमं निःसीमं अपरिमितमित्यर्थः। नकारान्तोत्तरपदो बहुव्रीहिः। मृष्टं शुद्धं अत्यन्तामलं तच्च तत् सुरभि सुगन्धि च खञ्जकुब्जवद्विशेषण समासः। प्रेयसो नलस्य दूतः सन्देशहरो यः पतङ्गःपुङ्गव इव पतङ्गपुङ्गवो हंसश्रेष्ठः पुमान् गौः पुङ्गवः। गोरतद्धितलुकीति टच् तस्य गौः स्त्री तद्गवी पूर्ववत् टच्टिड्ढाणञित्यादिना ङीप्। सैव हैयङ्गवीनं ह्योगोदोहोद्भवं घृतमिति रूपकम्। हैयङ्गवीनं संज्ञायामिति निपातः। तद्गवी तद्धेनुः तस्या इति च गम्यते रसाद्रागात् स्वादं स्वादं पुनः पुनरास्वाद्य आभीक्ष्ण्ये णमुल् प्रत्ययः। पौनःपुन्यमाभीक्ष्ण्यं आभीक्ष्ण्ये द्वे भवत इति उपसं-

तस्या दृशो नृपतिबन्धुमनुव्रजन्त्या
स्तद्बाष्पवारि नचिरादवधिर्बभूव ।
पार्श्वेऽपि विप्रचकृषे यदनेन दृष्टे
रारादपि व्यवदधे न तु चित्तवृत्तेः ॥ १२१ ॥

अस्तित्वं कार्य्यसिद्धेः स्फुटमथ कथयन् पक्षयोः कम्पभेदै
राख्यातुं वृत्तमेतन्निषधनरपतौ सर्व्वमेकः प्रतस्थे ।

ख्यानात्वृद्धिरुक्तिः । तृप्तिं प्राप्तापि अपिर्विरोधे अन्तः नितान्तं तापं न प्राप अतुला मूर्च्छामपि नानर्छ न प्राप ऋच्छत्यृतामिति गुणः अत आदेरित्यभ्यासाकारस्य दीर्घः तस्मान्नुड् । द्विहलः मधुमिश्रघृतस्य विषत्वात्पाने तापाभावादिति विरोधः सः पूर्व्वोक्त रूपकोत्थापित इति सङ्करः । भजतो विषरूपत्वं तुल्यांशो मधुसर्पिषी इति वाहटः ॥१२०॥

तस्या इति । वियत्याकाशे नृपतिबन्धुमनुव्रजन्त्यास्तस्या दृशो भैमीदृष्टेः तद्बाष्पवारि बन्धुजन विप्रयोगजन्यं तद्दृग्जलं न चिरादचिरादवधिर्बभूव नोदकान्तं प्रियं पान्थमनु व्रजेदिति शास्त्रात्तद्दृक् सीमाभूदित्यर्थः । ततः तस्माद्बाष्पोपगमादेव हेतोरनेन हंसेन दृष्टेः पार्श्वे समीपे विप्रचकृषे विप्रकृष्टेनाभावि । बाष्पावरणात् समीपस्थोऽपि नालक्ष्यतेत्यर्थः चित्तवृत्तेस्तु आराद्दूरेऽपि न व्यवदधे व्यवहितेन नाभावि स्नेह बन्धान्मनसो नापेत इत्यर्थः । उभयत्रापि भावे लिट् समीपस्थस्य विप्रकृष्टत्वं दूरस्थस्य सन्निकृष्टत्वं चेति विरोधाभासः ॥१२१॥

अस्तित्वमिति । अथ एको अनयोरेकतरो हंसः पक्षयोः कम्पभेदैश्चेष्टा विशेषैः कार्य्यसिद्धेरस्तित्वं सत्तां अस्तीत्यव्ययं विद्यमानपर्य्यायं तस्मात्त्व प्रत्ययः। स्फुटं कथयन् वृत्तं निस्सन्नमेतत्सर्व्वं निषध नरपतौ नले विषये आख्यातुं तस्मै निवेदयितुमित्यर्थः प्रतस्थे अन्यां दमयन्तीं वयसा तुल्या वयस्याः सख्यः नौवय इति यत्प्रत्ययः । हे प्रिय सखि! मुग्धे ! कान्तारे विषमे निर्गतासि सङ्कटं प्रविष्टासि पद्वी विस्मृता किं ?

कान्तारे निर्गतासि प्रियसखि ! पदवीविस्मृताकिन्नुमुग्धे !
मारोदीरेहि यामित्युपहृतवचसो निन्युरन्यां वयस्याः ॥१३२॥

सरसि नृपमपश्यद्यत्र तत्तीरभाजः
स्मरतरलमशोकानोकहस्योपमूलम् ।
किसलयदलतल्पम्लापिनं प्राप तं स
ज्वलदसमशरेषुस्पर्द्धिपुष्पर्द्धिमौलेः ॥ १३३ ॥

परवति ! दमयन्ति ! त्वां न किञ्चिद्वदामि
द्रुतमुपनम किं मामाह सा शंस हंस ।
इति वदति नलेऽसौ तच्छशंसोपनम्र
प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः ॥१३४॥

मा रोदीः एहि यामः गच्छामः इत्युपहृतवचसो दत्त वचनाः सत्यः एनां निन्युः ॥ १३२ ॥

सर इति । हंसो यत्र सरसि नृपमपश्यत् दृष्टवान् तस्य सरसस्तीरभाजस्तटरुहस्य । ज्वलद्भिरसमशरस्य पञ्चेषोरिषुभिः स्पर्द्धत इति तत् स्पर्द्धिनी तत् सदृशी । पुष्पर्द्धिः पुष्पसमृद्धिः मौलिः शिखरं यस्य तस्याशोकानोकहस्य अशोकवृक्षस्य उपमूलं मूले विभक्त्यर्थे अव्ययीभावः । स्मरेण तरलं चञ्चलं किसलयदलतल्पं पल्लवपत्रशयनं म्लापयति स्वाङ्गदाहेन ग्लापयतीति तथोक्तं तं नृपं प्राप ॥ १३३ ॥

परवतीति । परवति ! पराधीने दमयन्ति ! त्वां न किञ्चिद्वदामि नोपालभे किन्तु हे हंस ! द्रुतं शीघ्रमुपनम आगच्छ सा दमयन्ती मां किमाह शंस कथयेति नले वदति भ्रान्त्या पुरोवर्त्तिनं इव सम्बोध्य आलपति सति । असौ हंसः उपनम्रः पुरोगतः सन् कार्यज्ञः शशंस कथयामास तथाहि सुकृतां साधुकारिणां सुकर्मपापपुण्येषु कृञ इति क्विप् । प्रियमनु इष्टार्थं प्रति स्वस्पृहायाः स्वेच्छाया एव विलम्बः । नत्विच्छा-

कथितमपि नरेन्द्रः शंसयामास हंसं
किमिति किमिति पृच्छन् भाषितं स प्रियायाः ।
अधिगतमथ सान्द्रानन्दमाध्वीकमत्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ॥१२५॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तार्त्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१२६॥

नन्तरन्तत्सिद्धेर्विलम्ब इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ १२४ ॥

कथितमिति । स नरेन्द्रः नलः कथितमपि प्रियायाः दमयन्त्याः भाषितं वचनं किमिति किमिति पृच्छन् हंसं शंसयामास पुनराख्यापयामास किं च अतिवेलो अतिमात्रो यः आनन्दः स एव माद्वीकं मृद्वीकाविकारो द्राक्षामद्यं मृद्वीका गोस्तनी द्राक्षेत्यमरः । तेन मत्तः सन् अधिगतं सम्यक् गृहीतं तदुक्तं स्वयमपि शतकृत्वः शतवारं संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् तया तदुक्तप्रकारेण अन्वाचचक्षे अनूदितवान् मत्तोऽप्युक्तमेव पुनः पुनर्वक्तीति भावः ॥ १२५ ॥

श्रीहर्षमित्यादि । तृतीय एव तार्तीयीकः । द्वितीय तृतीयाभ्यामीकक् स्वार्थे वक्तव्यः तस्य भावस्तत्ता तया मितस्तृतीय इत्यर्थः । शेषं सुगमम् । इति पदवाक्यप्रमाणपारावारपारीण श्री महोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातु समाख्याने तृतीयः सर्गः ॥ १२६ ॥

अथ नलस्य गुणं गुणमात्मभूः
सुरभि तस्य यशः कुसुमं धनुः ।
श्रुतिपथोपगतं सुमनस्तया
तमिषुमाशु विधाय जिगाय ताम् ॥ १ ॥
यदतनुज्वरभाक् तनुते स्म सा
प्रियकथासरसीरसमज्जनम् ।
सपदि तस्य चिरान्तरतापिनी
परिणतिर्विषमा समपद्यत ॥ २ ॥

अथ राज्ञः स्वयम्वरं प्रत्युपोद्घातत्वेनास्मिन् सर्गे भैम्या मदनावस्थां वर्णयितुमारभते अथेत्यादि । अत्र भैम्याः प्रियसन्देश श्रवणानन्तरं आत्मभूः कामः नलस्य गुणः आत्मोत्कर्ष हेतु शौर्य सौन्दर्यादिको धर्मः तमेव गुणां मौर्वीं विधाय सुरभि सुगन्धि मनोज्ञं च सुगन्धौ च मनोज्ञे च वाच्यवत् सुरभिः स्मृत इति विश्वः । तस्य नलस्य यद्यशः तदेव कुसुमं धनुर्विधाय तया सुमनस्तया सुमनस्कत्वेन पुष्पत्वेन च श्रुतिपथोपगतं कर्णपथङ्गतं पुनःपुनर्भैम्या श्रुतमित्यर्थः । आकर्णं आकृष्टञ्च तं नलमेवेषुं विधाय तां भैमीं जिगाय तदेकासक्तचित्तां चकारेत्यर्थः । श्लिष्टोर्जितेति कृत्वं रूपकालङ्कारः । अस्मिन् सर्गे द्रुत विलम्बितं वृत्तं द्रुत विलम्बितमाह नभौ भराविति लक्षणात् ॥ १ ॥

यदिति । सा भैमी अतनुज्वर मनङ्गज्वरं अधिक ज्वरं च भजतीति भाक् सती भजोखिवः । प्रियकथैव सरसी सरः तस्यां रसोरागः जलं च तत्र मज्जनमासक्तिं अवगाहं च तनुते स्म चकारेति यत् लट् स्म इति भूते लट् । तस्य मज्जनस्य सपदि चिरं दीर्घकालं अन्तरमभ्यन्तरं तापयतीति तत्तापिनी विषमा उद्दीपनात्मिका परिणतिः परिपाकः समपद्यत जाता अतएव ज्वरशान्त्यर्थाद्रस मज्जनात्तदुद्रेक रूपानर्थोत्पत्तेः विषमालङ्कार भेदः । विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत्

ध्रुवमधीतवतीयमधीरतां
दयितदूतपतङ्गतवेगतः ।
स्थितिविरोधकरीं द्व्यणुकोदरी
तदुदितः स हि यो यदनन्तरः ॥ ३ ॥
अतितमां समपादि जडाशयं
स्मितलवस्मरणेऽपि तदाननम् ।

विरूपघटना वा स्याद्विषमालङ्कृति स्त्रिधेवि लक्षणात्। एतेन द्वादशावस्थापक्षे नवमी संज्वरावस्थोक्ता तदुक्तं—

चक्षुःप्रीतिर्मनः सङ्गः सङ्कल्पोऽथ प्रलापिता ।
जागरः कार्श्यमरतिर्लज्जात्यागोऽथ संज्वर
उन्मादो मूर्च्छनं चैव मरणञ्चरमं विदुरिति ॥ २ ॥

ध्रुवमिति । द्व्यणुकोदरी सूक्ष्ममध्या इयं दमयन्ती स्थितिर्मर्यादा गति निवृत्तिश्च तद्विरोधकरीं तद्विरोध हेतुमित्यर्थः । मतुरत्यन्तं स्वस्थानगभाव विरोधित्वादिति भावः । कृञो हेत्वित्यादिना हेत्वर्थेऽचि ङीष् । अधीरतां चपलतां एकत्रा नवस्थान लक्षणां दयित दूतो यः पतन् पतत्री हंसः पतत्पत्ररथाण्डजा इत्यमरः । तस्य गतिवेगतः गमनवेगादधीतवती गृहीतवती प्राप्तवतीत्यर्थः । एतेन चापलाख्य सञ्चारी भाव उक्तः चापलं त्वनवस्थानं राग द्वेषादि सम्भवमिति लक्षणात् । तस्य हंसपक्षवेग जन्यत्वमुत्प्रेक्षते ध्रुवमिति । ननु कथमन्यवेगादन्यत्र क्रियोत्पत्तिरित्याशङ्क्य यदनन्तरन्यायेन समर्थयति योऽर्थो यस्यानन्तरः सन्निहितः स तस्मा दुदित उत्पन्न इत्युत्प्रेक्षार्थान्तरन्यासयोरङ्गाङ्गि भावेन सङ्करः ॥ ३ ॥

अतितमामिति । तस्या भैम्या आननं स्मितलवस्य हासलेशस्य स्मरणेऽपि किमुत करणे इति भावः । अतितमां अतिमात्रं किमेत्तिङ्-व्ययादाम् प्रत्ययः । जडाशयं मूढचित्तं समपादि सम्पन्नं

अजनि पङ्गुरपाङ्गनिजाङ्गण-
भ्रमिकणेऽपि तदीक्षणखञ्जनः ॥ ४ ॥
किमु तदन्तरुभौ भिषजौ दिवः
स्मरनलौ विशतः स्म विगाहितुम् ।
तदभिकेन चिकित्सितुमाशु तां
मखभुजामधिपेन नियोजितौ ॥ ५ ॥
कुसुमचापजतापसमाकुलं
कमलकोमलमैक्ष्यत तन्मुखम् ।

तदत्र जातमित्यर्थः । चिण् ते पद इति कर्त्तरि चिण् । तस्या ईक्षणमेव नयनमेव खञ्जनः खञ्जरीटः अपाङ्ग एव निजाङ्गणं तत्र भ्रमणं तस्याः कणे लेशेऽपि पङ्गुरसमर्थः अजनि जातः दीपजनेत्यादिना जनेः कर्म्मणि चिण् । ज्वरवेगात् स्तिमितवीक्षणे बभूवे इति भावः ॥४॥

अथास्याः स्मर नलयोर्निरन्तरान्तः प्रवेशमालक्ष्योत्प्रेक्ष्यते किम्विति । तदभिकेन भैमी कामुकेन अनुकोऽभीकः कं इतीति निपातितः मखभुजामधिपेन देवेन्द्रेण तां भैमीं आशु चिकित्सितुं अगदीकर्त्तुं नियोजितौ प्रेषितौ उभौ दिवो भिषजौ स्वर्वैद्यावश्विनौ स्मर नलौ सन्तौ विगाहितुं रोगनिदानं निश्चेतुं तस्याः दमयन्त्याः अन्तरन्तःशरीरं प्रविशतः स्म किमु ? प्रविष्टौ स्मितावश्विनावेव तौ किमित्युत्प्रेक्षा । तेनास्य मदनाश्विनसमानं सौन्दर्य्यं व्यज्यते अत्र चिन्ताख्यः सञ्चारी भावः सूचितः । ध्यानं चिन्तेप्सितानाप्तिः शून्यतादिकृदिति लक्षणात् ॥५॥

अथ चिन्तानुभावं सन्तापं वर्णयति कुसुमेत्यादि । कुसुमचापजेन स्मर सम्भवेन तापेन समाकुलं विह्वलं अतएवाहरहः अहन्यहनि अत्यन्त संयोगे वीप्सायां द्विर्वचनं रोऽसुपीत्यह्नो नकारस्य रेफादेशः अध्यधिकाधिकामत्यन्ताधिकां आभीक्ष्ण्ये द्विर्भावः रविरुचि ग्लपितस्यार्कांशुहतस्य विधोरिन्दोर्विधां प्रकारं तादृशीमवस्थामित्यर्थः । अतएव सादृश्या-

अहरहर्वहदभ्यधिकाधिकां
रविरुचिग्लपितस्य विधोर्विधाम् ॥ ६ ॥
तरुणतातरणिद्युतिनिर्मित
द्रढिम तत्कुचकुम्भयुगं तथा दा
अनलसङ्गतितापमुपैतु नो
कुसुमचापकुलालविलासजम् ॥ ७ ॥
अधृत यद्विरहोष्मणि मज्जितं
मनसिजेन तदूरुयुगं तदा ।

क्षेपादसम्भवद्वस्तुसम्बन्धान्निदर्शनालङ्कारः । वहतु प्राप्नुवतु कमलकोमलं तन्मुखमेवेति दृष्टं सखीजनेनेति शेषः । सकरुणमिति भावः ॥.॥

तरुणतेति । तस्याः कुचावेव कुम्भौ तयोर्युगं कर्तृ तरुणता तारुण्यमेव तरणिद्युतिरातपस्तया निर्मितः कृतो द्रढिमा काठिन्यं यस्य तत् तथा कुसुमचापो एव कुलालः कुम्भकारः तस्य विलासेन व्यापारेण जातं तज्जं अनलसङ्गतिः नलसङ्गत्य भावः क्वचित्प्रसज्य प्रतिषेधे नञ् समास इष्यते । अधृत यद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं स्पृशति तत्कदनङ्कदलि तरुर्यदि मरुज्वल दूषरदूषितः अर्थाभावेऽव्ययीभावे सा नपुंसकत्वं सैव अनलसङ्गतिरग्निसंयोग इति श्लिष्टरूपकं तया तापमुपैतु नो काकुः उपेया देवेत्यर्थः । प्राप्तकाले लोट् तथा हि आमो घटः कुलालेन दार्ढ्याय प्रथममातपेन पक्वा पश्चादग्निना पच्यते रूपकालङ्कारः ॥ ७ ॥

अधृतेति । तदा यत्तस्या ऊरुयुगं मनसिजेन विरहोष्मणि विरहदाहे मज्जितं अधृत अवस्थितं धृङ् अवस्थान इति धातोर्लुङि तङ् ह्रस्वादङ्गादिति सलोपः कदली तरुः मरौ मरुदेशे ज्वलता तप्यमानेन ऊषरेण ऊषरक्षेत्रेण दूषिता यदि दूषितश्चेत् तत्कदनं तेनोरुयुग्मेन कदनं कलहं काम्यमित्यर्थः । स्पृशति अत्रोपमानस्य कदली तरोरुपमे-

स्पृशति तत्कदनं कदलीतरु-
र्यदि मरुज्ज्वलदूषरदूषितः ॥ ८ ॥
स्मरशराहतिनिर्मितसंज्वरं
करयुगं हसति स्म दमस्वसुः ।
अनपिधानपतत्तपनातपं
तपनिपीतसरःसरसीरुहम् ॥ ९ ॥
मदनतापभरेण विदीर्य नो
यदुदपादि हृदा दमनस्वसुः ।
निबिड़पीनकुचद्वययन्त्रणा
तमपराधमधात् प्रतिबध्नती ॥ १० ॥

यत्वकल्पनात्प्रतीपालङ्कारभेदः । उपमानस्याक्षेपे उपमेयत्वकल्पनं प्रतीपमिति लक्षणात् जघन प्रकाण्डं कदली काण्डकल्पं तदासीदित्यर्थः ॥८॥

स्मरेति । स्मर शराहत्या निर्मित संज्वरं जनिततापं दमस्वसुः करयुगं कर्तृ अनपिधानादनावरणाद्धेतोः पतन् प्रविशन् तपनातपः सूर्यातपः यस्मिन् तत्तथा तपेन ग्रीष्मेण निपीते शोषिते सरसि यत् सरसीरुहं पद्मं तद्धसति स्म तत्सदृश मभूदित्यर्थः हसतीर्ष्यति असूयतीति दण्डिना सदृशपर्य्याय पठितत्वात् अतएव उपमालङ्कारः ॥ ९ ॥

मदनेति । दमनस्वसुः हृदा हृदयेन कर्त्रा मदनतापस्य भरेण औत्कट्येन हेतुना विदीर्य नो उदपादि नोत्पतितमिति यत् भावे लुङ् तमनुत्पन्नरूपमपराधं प्रतिबध्नती निरुन्धती निबिड़ पीन कुचद्वयेन यन्त्रणा बन्धः कर्त्री अधात् हृदयकृतापराधं स्वयमिवाहेत्यर्थः । अत्रातिदाहेप्यस्फुटनं हृदयस्यायुःशेषः निबन्धनं तस्य कुच यन्त्रणानिमित्तत्वमुत्प्रेक्ष्यते सा च व्यञ्जका प्रयोगाद्गम्या ॥१०॥

निविशते यदि शूकशिखा पदे
सृजति सा कियतीमिव न व्यथाम् ।
मृदुतनोर्वितनोतु कथन्न ता
मवनिभृत्तु निविश्य हृदि स्थितः ॥ ११ ॥
मनसि सन्तमिव प्रियमीक्षितुं
नयनयोः स्पृहयान्तरुपेतयोः ।
ग्रहणशक्तिरभूदिदमीययो
रपि न सम्मुखवास्तुनि वस्तुनि ॥ १२ ॥
हृदि दमस्वसुरश्रुभरप्लुते
प्रतिफलद्विरहात्तसुखानतेः ।

निविशत इति । शूकशिखा कण्टकाग्रं पदे चरणे निविशते प्रविशति यदि नेर्विश इत्यात्मनेपदं । सा प्रविष्टा शूकशिखा कियतीमिव व्यथां पीडां इवशब्दो वाक्यालङ्कारे कीदृशीं व्यथामित्यर्थः । न सृजति नोत्पादयति महतीमेव सृजतीत्यर्थः । अवनिभृद्राजा नलः पर्वतश्च स तु हृदि निविश्य स्थितः सन् मृदुतनोः कोमलाङ्ग्याः तां तथाविधां व्यथां न वितनोतु वितनोत्वेवेत्यर्थः । सम्भावनायां लोट् । अत्र पादे सूक्ष्मकण्टकप्रवेशे दुःसहा व्यथा किमुत मृदङ्ग्या हृदि महत्प्रवेशेनेति कैमुत्यन्यायेनार्थान्तरापत्तेरर्थापत्तिरलङ्कारः ॥ ११ ॥

मनसीति । मनसि सन्तं हृदि वर्त्तमानं प्रियमीक्षितुं स्पृहया अन्तरुपेतयोरन्तः प्रविष्टयोरिव इदमीययो रस्याः सम्बन्धिनो इदं शब्दात् त्यदादेर्वृद्धाच्छः । नयनयोः सम्मुखं पुरो देशो वास्तु स्थानं तस्य तस्मिन्नपि पुरोवर्त्तिन्यपि वस्तुनि ग्रहणशक्तिः साक्षात्कारस्य सामर्थ्यं नाभूत् नत्र व्यासङ्गाच्च किञ्चिदन्यदद्राक्षीदित्यर्थः । तद्व्यासङ्गनिमित्तस्य बाह्यदर्शने चक्षुषोरन्तःप्रवेशनिमित्तत्वमुत्प्रेक्षते चिन्तैव सञ्चारी भावः ॥ १२ ॥

हृदीति । विरहेणात्ता प्राप्ता सुखानतिर्यया सा तस्याः नम्रमुखाया

हृदयभाजमराजत चुम्बितुं
नलमुपेत्य किलागमि तन्मुखम् ॥ १३ ॥
सुहृदमग्निमुदञ्चयितुं स्मरं
मनसि गन्धवहेन मृगीदृशः ।
अकलि निःश्वसितेन विनिर्गमा
नुमितनिह्नुतवेशनमायिता ॥ १४ ॥
विरहपाण्डिमरागतमोमसी
शितिमतन्निजपीतिमवर्णकैः ।

दमस्वसुः मुखं अश्रुभरेण अश्रुप्रवाहेण स्नुते सिक्ते हृदि हृदये प्रतिफलत् प्रतिबिम्बितं सत् हृदयभाजं हृदयस्थितं नलं चुम्बितुमुपेत्य गत्वा अगमितं सञ्जातागमनं किल प्रत्यागतमित्युत्प्रेक्षा तारकादित्वादितच् । किलेति सम्भावनायां वार्त्ता सम्भाव्ययोः किलेत्यमरः । अराजत राज सम्भावनमुत्प्रेक्षा ॥ १३ ॥

सुहृदमिति । गन्धवहेन बाह्यवायुना सुहृदं सखायं रोहिताश्वो वायुसख इत्यमरः वायुसखत्वाभिधानात् मृगीदृशः दमयन्त्याः मनसि स्मरमेवाग्निं उदञ्चयितुं उद्दीपयितुं निश्वसितेन निश्वासवातव्याजेन विनिर्गमेण बहिर्निःसारणेन अनुमितं निह्नुतं प्रागज्ञातं यद्वेशनमन्तःप्रवेशः तत्र मायिता मायावित्वं तत्कल्पना पाटवं व्रीह्यादित्वादिनिः अकलितं प्राप्तं नूनमिति शेषः । अग्निदो हि गूढं प्रविश्य प्रकाशं निर्गच्छति तद्वद्वायुरपि तादृङ् निश्वासव्याजेन तया ज्ञात्वा निर्गत इत्युत्प्रेक्षा ॥ १४ ॥

विरहेति । तस्या दमयन्त्याः दृक् दृष्टिरेव लिपिकरी चित्रकरी विरहेण पाण्डिमा शरीरश्वैत्यं रागोऽनुरागः स एव रागो रक्तिमा श्लिष्टरूपकं तमो मोहः तदेव मसी तस्याः शितिमा नीलिमा तस्या भैम्याः निजो नैसर्गिकः पीतिमा कनकवर्णः चतुर्णां द्वन्द्वः तैरेव वर्णकैः चित्रसा-

दश दिशः खलु तद्दृगकल्पय
ल्लिपिकरी नलरूपकचित्रिताः ॥ १५ ॥
स्मरकृतां हृदयस्य दशां मुहु
र्बहु वदन्निव निश्वसितानिलः ।
व्यधित वाससि कम्पमदःश्रिते
त्रसति कः सति नाश्रयबाधने ॥ १६ ॥
करपदाननलोचननामभिः
शतदलैः सुतनोर्विरहज्वरे ।
रविमहो बहु पीतचिरं चिरा
दनिशतापमिषादुदसृज्यत ॥ १७ ॥

धनं दशदिशस्त एव भित्तिरिति शेषः । नलस्य रूपकैः प्रतिकृतिभिः चित्रिताः सञ्जातचित्राः तारकादित्वादितच्, अकल्पयदसृजत् खलु निरन्तर चिन्ता जनितया भ्रान्त्या प्रतिदिशं मिथ्या नलमद्राक्षीदित्यर्थः ॥१५॥

स्मरकृतामिति । निश्वसितानिलः स्मरकृतां मदनकर्तृक सृष्टिरूपां हृदयस्य हृत्पिण्डस्य दशामवस्थां बहु बहुवारं क्रियाविशेषणं वदन्निव एवम्वद इति कथयन्निवेत्युत्प्रेक्षा । अदो हृदयं श्रिते वाससि कम्पचलनं तत्कारणं त्रासं च मुहुः व्यधित विहितवान् दधाते र्लुङि तङ् स्थाघ्वोरिच्चेतीकारः ह्रस्वादङ्गादिति सिचो लोपः । तथाहि आश्रयबाधने सति कोनाम न त्रसति सर्वोऽपि त्रस्यत्येवेत्यर्थः । तद्बाधे तदाश्रितस्य स्वस्यापि बाधादिति भावः अर्थान्तरन्यासोऽलङ्कारः ॥१६॥

करेति । करौ पदे आननं लोचने इति नामानि येषान्तैः तदाकारपरिणामात्तन्नामधारिभिः शतदलैः कुशेशयैः कर्तृभिः चिराच्चिरात्प्रभृति पीतचिरं स वशात् पूर्वं पीतं भूतपूर्वे चरट् प्रत्ययः । बहु भूरि रविमहः सूर्यतेजः सुतनोर्दमयन्त्याः विरहज्वरे ज्वरावस्थायां अनिशतापमिषान्निरन्तरोष्म व्याजात् उदसृज्यत उत्सृष्टं नूनमिति शेषः । अत

उदयति स्म तदद्भुतमालिभि-
र्धरणिभृद्भुवि तत्र विमृश्य यत् ।
अनुमितोऽपि च बाष्पनिरीक्षणा-
द्व्यभिचचार न तापकरोऽनलः ॥ १८ ॥
हृदि विदर्भभुवं प्रहरञ्छरै-
रतिपतिर्निषधाधिपतेः क्षते ।

पञ्चानां भैमी करचरणादिभ्यो नाममात्रभेदः न रूपभेद इत्यभेदोक्ते रतिशयोक्तिः तदुत्थाचेयं पूर्वपीत तेजो वमनोत्प्रेक्षा सा च तापव्याजादित्यपह्नवानुप्राणितेति सङ्करः ॥ १७ ॥

उदयतीति । अलिभिः सखिभिः तत्र तस्यां धरणिभृतो भीमभूपाद्भवतीति तद्भूः भैमी तस्यां पर्वतभूमौ च विमृश्य व्याप्तिमनुसन्धाय बाष्पनिरीक्षणात् अस्रलिङ्गदर्शनात् अन्यत्र धूमदर्शनात् बाष्पोऽश्रुण्यूष्मणि धूमे चेति वैजयन्ती अनुमितः अभ्यूहितः अन्यत्र लिङ्गभाषा पधारितोऽपि तापकरः सन्तापजनकः नलो नैषधः अन्यत्र अनलोऽग्निः न व्यभिचचार । नान्यथा बभूवेति तदद्भुतमुदयति स्म उत्पन्नमित्यर्थः । अयगतावितिधातोर्भूते लट् नलचिन्तानुभावोऽयं सन्ताप इत्यश्रुदर्शनात् सखीभिरूहितं अह अहो इति परमार्थ अथ बाष्पलिङ्गदर्शनाद नलज्ञानं तच्चाव्यभिचारीति स्फुरतो विरोधस्यान्तर्लिङ्गात् सन्तापकरो नलो निश्चित इत्याश्चर्यकरणाद्विरोधाभासः स च श्लेषानुप्राणितः सन्तापकरो नल इति शब्दश्लेषः अन्यत्रार्थश्लेषः अपि विरोधे ॥१८॥

हृदीति । निषधाधिपतेः क्षते नलस्यार्थे तत्प्रहारार्थमित्यर्थः । अर्थे क्षतौ च शब्दौ द्वौ तादर्थ्येऽव्यय संज्ञिताविति वचनात् । विदर्भभुवं दमयन्तीं शरैर्हृदि प्रहरन् तस्य सदा तद्गतत्वादिति भावः । रतिपतिः कामः क्षता तदन्तरगस्य भैमीहृद्गतस्य स्वस्य दृढव्यथा येन सः स्वयमपि तद्गतत्वात् प्रहृतः सन्नित्यर्थः । फलन्ती अनीतिर्दुर्नीतिर्यस्य सोऽनमत्यन्तम-

कृततदन्तरगस्त्वदृढव्यथः
फलदभीतिरमूर्च्छदलं खलु ॥ १९ ॥

विधुरमानि तया यदि भानुमान्
कथमहो स तु तद्धृदयं तथा ।
अपि वियोगभरास्फुटनस्फुटी
कृतदृषत्त्वमजिज्वलदंशुभिः ॥ २० ॥

हृदयदत्तसरोरुहया तया
क सदृगस्तु वियोगनिमग्नया ।

मूर्च्छत् अवर्द्धत खलु अमुह्यदिति च गम्यते मूर्च्छा मोहसमुच्छ्राययो रित्यनुशासनात् तत्र भेदेन मूर्च्छा लक्षणकार्यदर्शनादप्रतिपत्ते स्तस्यापि प्रहार उत्प्रेक्ष्यते सा च लोपमूलातिशयोक्त्युत्थापितेति सङ्करः व्यञ्जकाप्रयोगाद्गम्या परप्रहारोद्यतस्य स्वप्रहाररूपावयोत्पत्ते र्विषमभेदश्च व्यज्यते ॥ १९ ॥

विधुरिति । तया दमयन्त्या विधुः चन्द्रः भानुमान् सूर्यः अमानि मेने पतिविरहिण्यास्तदुचितं किन्तु सः सूर्यत्वाभिमतो विधुः वियोग एव भरो भारस्तेनापि यदस्फुटनमविशरणं तेन स्फुटं स्फुटीकृतं दृषत्त्वं सूर्योपलत्वं यस्य तत् अन्यथातिभारात्स्फोटोपलवद्विशीर्येतेति भावः । तद्धृदयमपि भैम्याः हृदयरूपं सूर्यकान्तमपीत्यर्थः । कथं तथा सूर्यवत् अंशुभिः रश्मिभिः अजिज्वलत् ज्वलयति स्म ज्वलतेर्णौ चङ् अहो विधुर्विरहिणामुद्दीपकत्वात् सूर्यवत्तापकत् नाम तद्धृदयौपलज्वलयितृत्वं तु चित्रमित्यर्थः ॥ २० ॥

हृदयेति । वियोगनिमग्नया विरहाग्नि मग्नया अतएव हृदयदत्तसरोरुहया सन्तापशान्तये वक्षो निक्षिप्तपद्मया तया समाना दृश्यत इति सदृक् सदृशी स्त्रीसमानान्ययोश्चेत्युपसङ्ख्यानात् समानोपपदाद् दृशेः क्विप्प्रत्ययः दृग् दृश् वतुश्चेति समानशब्दस्य सभावः । कास्तु न कापी-

प्रियधनुः परिरभ्य हृदा रतिः
किमनुमर्त्तुमशेत चितार्चिषि ॥ २१ ॥
अनलभावमियं स्वनिवासिनो
न विरहस्य रहस्यमबुध्यत ।
प्रशमनाय विधाय तृणान्यसून्
ज्वलति तत्र यदुज्झितुमैहत ॥ २२ ॥
प्रकृतिरेतु गुणः स न योषितां
कथमिमां हृदयं मृदु नाम यत् ।
तदिषुभिः कुसुमैरपि धुन्वता
सुविवृतं विबुधेन मनोभुवा ॥ २३ ॥

त्यर्थः । यद्वा रतिः कामपत्नी हृदा वक्षसा प्रियस्य स्वभर्त्तुः धनुः पौष्पमित्यर्थः । परिरभ्य अनुमर्त्तुं अनुगमनं कर्त्तुं चितार्चिषि अशेत शयिता किं ? प्रियमनुमर्त्तुं अनुगमनं कर्त्तुं चितार्चिषि शयाना साक्षाद्रतिरेवेयमित्युत्प्रेक्षा तस्या ज्वराग्निः तथा प्रज्वलतीति भावः ॥ २१ ॥

अनलभावमिति । इयं दमयन्ती स्वनिवासिनः स्वनिष्ठस्य विरहस्य नलवियोगजस्य रहस्यं शमीवह्निवन्निगूढं अनलभावमग्नित्वं नलरहितत्वं च गम्यते । नाबुध्यत नाजानादित्यर्थः । कुतः यद्यस्मात्तत्र तस्मिन् विरहे ज्वलति सति प्रशमनाय प्रज्वलन प्रतीकारार्थं असून् प्राणान् तृणानि विधाय तृणप्रायं कृत्वा तृणात्मकानीति च गम्यते उज्झितुन्त्यक्तुं प्रक्षेप्तुं च ऐहत ऐच्छत् अग्नित्वज्ञाने कथं तच्छान्तये तत्र तृणप्रक्षेप इत्यर्थः । विरहदुःखान्मर्त्तुमैच्छदिति तात्पर्यार्थः ॥ २२ ॥

प्रकृतिरिति । योषितां हृदयं मृदु नामेति यत् नामेति प्रसिद्धौ स इति विधेयप्राधान्यात्पुंल्लिङ्गता प्रकृतिः सिद्धो गुणः मार्दवो गुणः इमां दमयन्तीं कथं नैतु प्राप्नोत्वेवेत्यर्थः । कुतस्तन्मृदुत्वं कुसुमैरपि इषुभिः धुन्व-

रिपुतरा भवनादविनिर्य्यतीं
विधुरुचिर्गृहजालविलैर्नु ताम् ।
इतरथात्मनिवारणशङ्कया
ज्वलयितुं विसवेशधराविशत् ॥ २४ ॥
हृदि विदर्भभुवोऽस्रुभृति स्फुटं
विनमदास्यतया प्रतिविम्बितम् ।
मुखदृगोष्ठमरोपि मनोभुवा
तदुपमाकुसुमान्यखिलाः शराः ॥ २५ ॥

……

सा विबुधेन देवेन विदुषा च मनोभुवा सुविवृतं सम्यग्व्याख्यातं विद्वधिकारत्वात्सन्दिग्धानिर्णयस्येत्यर्थः । कुसुमादपि सुकुमारमस्या हृदयमित्यर्थः ॥२३॥

रिपुतरेति । रिपु तरा अतिद्वेषिणी विधुरुचिश्चन्द्र प्रभा भवनादविनिर्यतीं अनिर्गच्छन्तीं इणः शतरि ङीप् । तां भैमीं ज्वलयितुं सन्तापयितुं इतरथा निजरूपेण प्रवेशे आत्मनिवारण शङ्कया स्वप्रवेश प्रतिषेधभिया विसवेषस्य धरा सती गृहस्य जालविलैर्गवाक्षरन्ध्रैः अविशत् प्रविष्टा किं ? शिरोपचार विसांशि निरन्तरान्तःस्थित भैमी बाधनाय प्रच्छन्नप्रविष्टेन्दुकरा इव प्रतिभान्ति स्मेत्युत्प्रेक्षा ॥ २४ ॥

हृदीति । विदर्भभुवो वैदर्भ्याः विनमदास्यतया नम्राननत्वेन हेतुना अस्रूणि बिभर्तीत्यस्रुभृत् क्विप् तस्मिन्नस्रुसिक्ता इत्यर्थः । हृदि वक्षसि वैमल्यात् स्फुटं यथा यथा प्रतिविम्बितं मुखं च दृशौ च ओष्ठं च मुखदृगोष्ठं प्राण्यङ्गत्वादेकवद्भावः मनोभुवा मन्मथेन अस्य मुखादेः उपमा कुसुमानि पद्मे उत्पले बन्धूके च पञ्चधा स्थितान्युपमान पुष्पाणि अन्ये च अखिलाः परिचायिशराः समारोपितं तस्याः तथा विधे वक्षसि प्रतिफलितं मुखाद्यवयव पञ्चशरनिखातं तदुपमान कुसुम शर मञ्जकमिव लक्ष्यतेत्युत्प्रेक्षार्थः॥ २५ ॥

विरहेति । विधुः भीमभुवः भैम्याः विरहेण पाण्डुनि कपोलतले गण्डस्थले प्रतिविम्बितः सन् अनुपलक्ष्य सितांशुतया वर्णाद्दुर्लक्ष्य शुभ्र-

विरहपाण्डुकपोलतले विधु-
र्व्यवित भीमभुवः प्रतिबिम्बितः ।
अनुपलक्ष्यसितांशुतया मुखं
निजसखं सुखमङ्कमृगार्पणात् ॥ २६ ॥
विरहतापिनि चन्दनपांशुभि-
र्वपुषि सार्पितपाण्डिममण्डना ।
विषधराभविसाभरणा दधे
रतिपतिं प्रति शम्भुविभीषिकाम् ॥ २७ ॥
विनिहितं परितापिनि चन्दनं
हृदि तया धृतबुद्बुदमावभौ ।

किरणतया सुखमनायासेन अङ्कमृगार्पणादसितकलङ्कमृगसमर्पणात् मुखं भैमीमुखं निजसखं स्वसदृशं व्यधित विहितवान् दोषिणो हि स्वदोषं निर्दोषेऽपि स्वसंसर्गिणि संक्रमय्य संकुर्वन्तीति भावः केचित् किञ्चिद्दानेनात्मिनं कुर्वन्तीति भावं वर्णयन्ति अत्र चन्द्रस्य कपोलसावर्ण्येन तदेकत्वकथनात्सामान्यालङ्कारः सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् ॥ २६ ॥

विरहेति । सा दमयन्ती विरहतापिनि वपुषि चन्दनपांशुभिः भस्मधवलैरिति भावः । अर्पितः सम्पादितः पाण्डिमैव मण्डनं यस्याः सा विषधराभं शेषाहिकल्पं विसमेवाभरणं यस्याः सा सती रतिपतिं स्मरमिति शम्भुरेवेयमिति विभीषिकां विशेषेण भयोत्पादनं भीषयतेर्धात्वर्थनिर्देशे ण्वुल् सुसुपेति समासः न तु शम्भोर्विभीषिकेति कर्तृषष्ठीसमासः तृजकाभ्यां कर्तरीतिनिषेधात् दधे दधार नूनमिति शेषः गम्योत्प्रेक्षा ॥ २७ ॥

विनिहितमिति । तया भैम्या परितापिनि हृदये वक्षसि विनि-

उपनमन् सुहृदं हृदये शयं
विधुरिवाङ्कगतोडुपरिग्रहः ॥ २८ ॥
स्मरहुताशनदीपितया तया
बहु मुहुः सरसं सरसीरुहम् ।
श्रयितुमर्धपथे कृतमन्तरा
श्वसितनिर्मितमर्मरमुज्झितम् ॥ २९ ॥
प्रियकरग्रहमेवमवाप्स्यति
स्तनयुगं तव ताम्यति किं न्विति ।
जगदतुर्निहिते हृदि नीरजे
दवथुकुड्मलनेन पृथुस्तनीम् ॥ ३० ॥

हितं धृतबुद्बुदं अतिकायकपीटकं चन्दनं सुहृदं सखायं हृदये शेत इति हृदयेशयं मन्मथं अधिकरणे शेतेरिति च प्रत्ययः शयवासवासिष्वकालादित्यलुक् उपनमन्नुपसर्पन् अङ्कगतोडुपरिग्रहः अन्तिकस्थतारकापरिजनः विधुरिवाबभावित्युत्प्रेक्षा ॥ २८ ॥

स्मरेति । स्मरहुताशनदीपितया कामाग्नितप्तया तया बहु भूरि सरसं सार्द्रं सरसीरुहं सरोजं मुहुः श्रयितुं शैत्याय सेवितुं अर्धे पथि अर्धपथे कृतं तत्पर्यन्तमानीतं सत् अन्तरा मध्ये श्वसितेन भैमीनिश्वासेन निर्मितं मर्मरं रवः शोषात्कृतमर्मरशब्दं सत् उज्झितं वैरस्यात्त्यक्तं तयोष्णः तन्निश्वास इति भावः । अथ मर्मरः स्वनिते वस्त्रपर्णानामित्यमरः । इह मर्मरासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदोऽलङ्कारः ॥ २९ ॥

प्रियेति । हृदि वक्षसि निहिते न्यस्ते नीरजे पद्मे दवथुः परितापः टुदुः ट्वित्वादथुच्प्रत्ययः तेन यत्कुड्मलनं मुकुलनं निपीड्य ग्रहणमिति यावत् । तेन पृथुस्तनीं दमयन्तीं तव स्तनयुगं कर्तृ एवमनेन प्रकारेण प्रियकरेण ग्रहं निपीड्य ग्रहणं अवाप्स्यति किं नु किमर्थं

त्वदितरो न हृदापि मया धृतः
पतिरितीव नलं हृदयेशयम् ।
स्मरहविर्भुजि बोधयति स्म सा
विरहपाण्डुतया निजशुद्धताम् ॥ ३१ ॥
विरहतप्ततदङ्गनिवेशिता
कमलिनी निमिषद्दलमुष्टिभिः ।
किमपनेतुमचेष्टत किं परा
भवितुमैहत तद्दवथुं पृथुम् ॥ ३२ ॥
इयमनङ्गशरावलिपन्नग
क्षतविसारिवियोगविषावशा ।

ताम्यति इति जगदतुल्यचतुः नूनमिति शेषः ॥ ३० ॥

त्वदिति । सा भैमी हृदये शयं हृदये स्थितं नलं त्वदितरस्त्वत्तोऽन्यः समानो वान्यो वा पतिः मया हृदापि न धृतः मनसापि न चिन्तितः इति निजशुद्धतां आत्मनिर्दोषतां पाण्डुत्वञ्च विरहपाण्डुतया तद्ध्यानेनेत्यर्थः स्मरहविर्भुजि बोधयति स्मेव मदनाग्निमग्ना सा अग्नि दिव्येन स्वशुद्धिं सीता राममिव नलं बोधयामासेवेत्युत्प्रेक्षा गतिबुद्धीत्यादिना अणिकर्तुर्नलस्य णौ कर्मत्वम् ॥ ३१ ॥

विरहेति । विरहतप्ते तदङ्गे भैमीशरीरे निवेशिता निहिता कमलिनी पद्मलता निमिषद्भिर्निमीलद्भिर्दलैः पत्रैरेव मुष्टिभिः मुष्टिबन्धैः करणैः पृथुं तद्दवथुं तस्यास्तापमपनेतुं दूरीकर्त्तुमचेष्टत व्याप्रियत किं ? पराभवितुं तिरस्कर्तुमैहत किं ? अचेष्टतकिमित्युत्प्रेक्षा वस्तुतस्तु न किञ्चित् कर्तुं शशाक प्रत्युत स्वयमेव दग्धेत्यर्थः अतएवानर्थोत्पत्तिलक्षणो विषमालङ्कारः तदुत्थापिता चेयमुत्प्रेक्षेति सङ्करः ॥ ३२ ॥

इयमिति । इयं भैमी अनङ्गशरावलिरेव पन्नगाः तैः क्षतं क्षतिः

शशिकलेव खरांशुकरार्दिता
करुणनीरनिधौ निदधौ न कम् ॥ ३३
ज्वलति मन्मथवेदनया निजे
हृदि तयार्द्रमृणाललतार्पिता ।
स्वजयिनोस्त्रपया सविधस्थयो
र्मलिनतामभजद्भुजयोर्भृशम् ॥ ३४ ॥
पिकरुतश्रुतिकम्पिनि शैवलं
हृदि तया निहितं विचलद्बभौ ।
सततत्तद्गतहृच्छयकेतुना
हतमिव स्वतनूघनघर्षिणा ॥ ३५ ॥

नपुंसके भावे क्तः तेन विसारिणा व्यापिना वियोगेनैव विशेष अवशा विवशा सती खरांशो स्तिग्मांशोः करैरर्दिता पीड़िता शशिकलेव कं जनं करुणनीरनिधौ करुणरसाब्धौ करुणस्तु रसे वृक्षे कृपायां करुणा मतेति विश्वः । नि निदधौ न दधावेव निमज्जयामासेवेत्यर्थः अत्र रूपकोपमयोरङ्गाङ्गि भावेन सङ्करः ॥ ३२ ॥

ज्वलतीति । तया भैम्या मन्मथवेदनया मदनज्वरदुःखेन ज्वलति प्रज्वलिते निजे वक्षसि अर्पिता आर्द्रा सरसा मृणाललता बिसवल्ली स्वजयिनोः स्वजैत्रोः जिदृक्षेत्यादिना इनि प्रत्ययः भुजयोस्तदीययोरेव सविधस्थयोः समीपस्थयोः सतोः त्रपया लज्जयेवेत्यर्थः गस्योत्प्रेक्षा भृशं मलिनता वैवर्ण्यं अभजत् जितो जेतुरग्रे लज्जया वैवर्ण्यं भजतीति भावः ॥२४॥

पिकेति । तया भैम्या पिकरुतश्रुत्या कोकिलकूजितश्रवणेन कम्पिनि वेपमाने हृदि वक्षसि निहितं शैत्यार्थं न्यस्तं विचलत् आधारचलनादिति भावः। शैवलं स्वतन्वा शैवलशरीरेण सह घनवर्षिणी स्पर्शसङ्घर्षिणा हृदये रपि जलचरत्वादिति भावः सततन्तद्गतस्य भैमीहृद्गतस्य हृच्छयस्य कामस्य केतुना चिह्नेन हतन्ताडितमिव बभावित्युत्प्रेक्षा ॥ ३५ ॥

न खलु मोहवशेन तदाननं
नलमनः शशिकान्तमबोधि तत् ।
इतरथाऽभ्युदयेशशिन स्ततः
कथमसुस्रुवदस्रुमयं पयः ॥ ३६ ॥
रतिपतेर्विजयास्त्रमिषुर्यथा
जयति भीमसुतापि तथैव सा ।
स्वविशिखानिव पञ्चतया ततो
नियतमैहत योजयितुं स ताम् ॥ ३७ ॥
शशिमयं दहनास्त्रमुदित्वरं
मनसिजस्य विसृश्य वियोगिनी ।

नेति । नलमनः कर्तृ मोहवशेन हृदय प्रयुक्ताज्ञानवलेन तदाननं भैमीमुखं कर्म शशिकान्तमिन्दुसुन्दरं इन्दूपलञ्च नाबोधि खलु नाबुद्धमिति काकुः बुद्धत एवेत्यर्थः तच्च सत्यमिति भावः दीपजनेत्यादिना कर्तरि चिङ् इतरथा तदसत्यत्वे शशिनोऽभ्युदये ततो भैमीमुखादस्रुमयमश्रुरूपमम्मयः असुस्रुवत् स्रुतञ्चन्द्रोदये पयस्रावात् चन्द्र कान्तत्वसत्यमित्यर्थः चन्द्रोदये दाहोद्रेकात् स्वरोदेति भावः । स्रवतेर्लुङि नि श्रीत्यादिनाचे स्रुधातोरुवङादेशः ॥ ३६ ॥

रतिपतेरिति । रतिपतेः कामस्य यथेषुः विजयस्यास्त्रं विजयास्त्रं विजयवात्रनमायुधं जयति तथैव सा भीमसुतापि विजयास्त्रं सति जयति तदस्त्रत्वात्हेतोः स कामः स्वस्य विशिखानिषूनिव तां भैमीं पञ्चतया पञ्चसंख्याकत्वेन मरणेन च "पञ्चता पञ्चभावे स्यात् पञ्चता मरणेऽपि चेति विश्वः" योजयितुमैहत स्वेषुधर्म विजयास्त्रत्वेन पञ्चत्वेनापि योजयितुमैच्छत् नियतं सत्यमित्युत्प्रेक्षार्थः अन्यथा किमर्थं मेन.मित्यमपीडयेदिति भावः उपमोत्प्रेक्षयोः सङ्करः ॥ ३७ ॥

झटिति वारुणमश्रुमिषादसौ
तदुचितं प्रतिशस्त्रमुपाददे ॥ ३८ ॥
अतनुना नवमम्बुदमाम्बुदं
सुतनुरस्त्रमुदस्तमवेक्ष्य सा ।
उचितमायतनिश्वसितच्छलात्
श्वसनमस्त्रममुञ्चदमुं प्रति ॥ ३९ ॥
रतिपतिप्रहितानिलहेतितां
प्रतियती सुदती मलयानिले ।
तदुरुतापभयात्तु मृणालिका
मयमियं भुजगास्त्रमिवादित ॥ ४० ॥

शशिमयमिति । वियोगिन्यसौ भैमी उदेति इति उदित्वरः उद्यन् इण्शिञ्जिसर्तिभ्यः क्वरप् शशिमयं मनसिजस्य दहनास्त्रं आग्नेयास्त्रं विमृश्यालोच्य झटिति द्राक् अश्रुमिषात् वारुणं वरुणदेवताकं सास्य देवतेत्यणप्रत्ययः तस्याग्नेयस्योचितं प्रतीकारक्षमं प्रतिशस्त्रमुपाददे प्रयुक्तवतीत्यर्थः चन्द्रातपासहिष्णुरश्रुणा केवलमरोदीदित्यर्थः सापह्नवोत्प्रेक्षा ॥३८॥

अतनुनेति । सा सुतनुः भैमी नवं नूतनमम्बुदं मेघमेव अतनुना अनङ्गेन उदस्तं उत्क्षिप्तं आम्बुदमम्बुदरूपमस्त्रं पार्जन्यास्त्रं अवेक्ष्य आयतनिश्वसितच्छलाद्दीर्घनिश्वासमिषादमुमम्बुदम्प्रति उचितप्रतीकारक्षमं श्वसनं श्वसनात्मकमस्त्रं वायव्यास्त्रममुञ्चत् प्रायुङ्क्त मेघदर्शनाद्दीप्तमदनज्वरा दीर्घमुष्णञ्च निशश्वासेत्यर्थः अत्रापि सापह्नवोत्प्रेक्षा ॥ ३९॥

रतिपतीति । सुदतीयं भैमी मलयानिले विषये रतिपतिप्रहितानिलहेतितां कामप्रयुक्तवायव्यास्त्रतां हेतिः शस्त्रं प्रहरणं ह्रस्वायुधं चास्त्रमेव चेति हलायुधः । प्रतियती जानती इणः शतरि ङीप् तेनास्त्रेण य उरुतापः ततो भयात् मृणालिकामयं बिसरूपं भुजगास्त्रं अदितेव

व्यधित तद्धृदि शल्यमिव द्वयं
विरहिताञ्च तथापि च जीवितम्।
किमथ तत्र निहत्य निखातवान्
रतिपतिः स्तनबिल्वयुगेन तत्॥ ४१॥
अतिशरव्ययता मदनेन तां
निखिलपुष्पमयस्वशरव्ययात्।
स्फुटमकारि फलान्यपि मुञ्चता
तदुरसि स्तनतालयुगार्पणा॥ ४२॥

आत्तवती किमित्युत्प्रेक्षा भुजगानां वाताहारत्वादिति भावः स्याध्वोरिच्चेतीकारः ह्रस्वादङ्गादिति सलोपः॥४०॥

व्यधितेति। रतिपतिः तद्धृदि भैमीहृदये विरहितां विरहित्वञ्च तथापि विरहित्वेऽपि जीवितञ्चेति द्वयं शल्यं शङ्कुमिव व्यधित निखातवानित्यर्थः। जीविनो विरहः विरहिणो जीवनञ्च द्वे अपि शल्यप्राये इत्यर्थः दधातेर्लुङि तङ् स्याध्वोरिच्चेतीकारः ह्रस्वादङ्गादिति सलोपः। अथ निखननानन्तरन्तच्छल्यद्वयं स्तनावेव बिल्वौ परिणतबिल्वफले तयोर्युगेन तत्र हृदि निहत्य आहत्य निखातवान् किं? यथा लोके निखातं शङ्कुं दार्ढ्याय पाषाणेन घ्नन्ति तद्वदिति भावः पूर्वार्द्धे शल्यनिखननोत्प्रेक्षा उत्तरार्धे निहत्य निहननोत्प्रेक्षा निखातवानित्यनुवादः॥ ४१॥

अतीति। तां दमयन्तीं अतितरां शरव्ययता शरव्यं लक्ष्यं कुर्वता शरव्यशब्दात् तत्करोतीति ण्यन्ता लटः शतरि णित्। अतएव निखिला ये पुष्पमयाः स्वशराः तेषां व्ययात् क्षयात् फलान्यपि मुञ्चता क्षिपता मदनेन तदुरसि भैमीवक्षसि स्तनावेव ताले तालफले तयोर्युगस्यार्पणा क्षेपः अकारि स्फुटमित्युत्प्रेक्षा शरक्षये पाषाणादिनापि प्रहरन्तीति भावः॥ ४२॥

अथ मुहुर्व्वहुनिन्दितचन्द्रया
स्तुतविधुन्तुदया च तया वहु ।
पतितया स्मरतापमये गदे
निजगदेऽश्रुविमिश्रमुखी सखी ॥ ४३ ॥
नरसुराब्जभुवामिव यावता
भवति यस्य युगं यदनेहसा ।
विरहिणामपि तद्रतवद्युव
क्षणमितं न कथं गणितागमे ॥ ४४ ॥

अथेति । अथानन्तरं स्मरतापमये कामज्वररूपे गदे रोगे रोगव्याधि गदा मया इत्यमरः । पतितया मग्नया अतएव मुहुः वहु वहुधा निन्दित चन्द्रया तस्योद्दीपकत्वादिति भावः। मुहुः स्तुतो विधुन्तुतदतीति विधुन्तुदः राहुः यया तया विधुन्तुदत्वादेवेति भावः तमस्तु राहुः स्वर्भानु सैंहिकेयो विधुन्तुद इत्यमरः । विध्वरुषोस्तुद इति खच्प्रत्ययः । अरुर्द्विषदज न्तस्य मुमिति मुमागमः । तया दमयन्त्या अश्रुविमिश्रं मुखं यस्याः सा अनिष्टाशङ्कया रुदती सखी निजगदे निगदिता विप्रकृतोह्यपकर्तारं निन्दति तदपकर्तारञ्च स्तौतीति भावः॥४३॥

नरेति । नरसुराब्जभुवां मनुष्यदेव ब्रह्मणामिव यावता अनेहसा कालेन यस्य जन्तोर्यद्युगं भवति गणितागमे ज्योतिःशास्त्रे तत्सर्वं वक्तव्यमेवेति शेषः । यथा ब्रह्मणो दिनं देवादीनां युगादिकमितुक्तं तद्वदन्यस्यापि गणितशास्त्रे वक्तव्यमिति भावः ततः किमित्याशङ्क्याह तर्हि विरहिणां तद्युगं कथं किमिति रतवतामवियुक्तानां यूनां क्षणेन मितं गणितं न अवियुक्तानां क्षणो वियुक्तानां युगमिति किमिति नोक्तं इत्यर्थः तया तस्या एकैव क्षणः एकैवयुगकल्पोऽभूदित्यर्थः ॥ ४३ ॥

जनुरधत्त सती स्मरतापिता
हिमवतो न तु तन्महिमादृता ।
ज्वलति भालतले लिखितः सती
विरह एव हरस्य न लोचनम् ॥ ४५ ॥
दहनजा न पृथुर्दवथुव्यथा
विरहजैव पृथुर्यदि नेदृशम् ।
दहनमाशु विशन्ति कथं स्त्रियः
प्रियमपासुमुपासितुमुद्धुराः ॥ ४६ ॥
हृदि लुठन्ति कलानितरामसू
र्विरहिणीवधपङ्ककलङ्किताः ।

जनुरिति । सती भवपूर्वपत्नी दक्षकन्या स्मरतापिता विरहाग्नितप्ता सती हिमवतो जनुः जन्माधत्त तस्य हिमवतो महिमा आदृतो यया सा तन्महिमादृता आदृत तन्महिमा सती नतु आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । विरहतापशान्त्यर्थं हिमाद्रेर्जाता नतु तत्तपःसामर्थ्यानुरोधादित्युत्प्रेक्षा हरस्य भालतले लिखितो ब्रह्मणा लिखितः सतीविरह एव ज्वलति लोचनं न इत्यारोप्यापह्नवालङ्कारः ॥४५॥

दहनेति । दहनजा अग्निदाहजन्या दवथुव्यथा तापदुःखं पृथुः अधिका न किन्तु विरहजैव पृथुः ईदृशं न यदि इदमित्थं न चेत् स्त्रियः अपासुमपगतप्राणं मृतं प्रियमुपासितुं प्राप्तुमुत्कण्ठा धूर्भारो यासां ता उद्धुराः अनर्गलाःसत्य इत्यर्थः ऋक्पुरित्यादिना समासान्तोऽकारः । कथमाशु दहनं विशन्ति अग्निदाहाद्विरहदाह एवाधिक इत्यर्थः तस्य तत्परिहारार्थेन स्त्रीणामग्निप्रवेशकार्येण समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४६ ॥

हृदीति । विरहिणी वधात् यः पङ्कः कलङ्कः पाप्मा असौ पङ्कं

कुमुदसख्यकृतस्तु बहिष्कृताः
सखि! विलोकय दुर्विनयं विधोः ॥ ४७ ॥
अयि! विधुं परिपृच्छ गुरोः कुतः
स्फुटमशिक्ष्यत दाहवदान्यता ।
ग्लपितशम्भुगलाद्गरलात्त्वया
किमुदधौ जड! वा वडवानलात् ॥ ४८ ॥
अयमयोगिवधूवधपातकै-
र्भ्रमिमवाप्य दिवः खलु पात्यते ।
शितिनिशादृषदि स्फुटमुत्पतत्
कणगणाधिकतारकिताम्बरः ॥ ४९ ॥

पुमान् पाप्मेत्यमरः । तेन कलङ्किताः सञ्जातकलङ्का अमूःकलाः हृदि अभ्यन्तरे नितरां लुठन्ति वर्तन्ते कुमुदैःसख्यं कुर्वन्ति तत्कृतः विशुद्धा इत्यर्थः तास्तु कलाः वहिष्कृताः हे सखि! विधोर्दुर्विनयं दौर्जन्यं विलोकय दुर्जनाः पापिष्ठानन्तः कुर्वन्ति विशुद्धान् वहिष्कुर्वन्तीति भावः ॥ ४७ ॥

अयीति । अयि सखि! विधुं परिपृच्छ हे जड़! मूढ! त्वया दाहवदान्यता दाहदातृत्वं दाहकत्वमित्यर्थः किं ग्लपितशम्भुगलाच्छोषितशम्भुकण्ठात् गरलात् कालकूटात् उदधौ बड़वानलाद्वा कुतः कस्माद्गुरोः स्फुटमशिक्षत शिक्षिता अभ्यस्तेत्यर्थः ॥ ४८ ॥

अयमिति । अयं विधुः अयोगिवधूवधपातकैः वियोगिस्त्रीहिंसापातकैः करणैः भ्रमिं भ्रमणं अवाप्य प्राप्य आप्नोतेर्ण्यन्तात् ल्यबोर्लबादेशः विभाषाप इति विकल्पादयादेशाभावः शितिनिशा कृष्णपत्तरात्वलक्षणामिव दृषदि शिलायां स्फुटन्तः पातनवेगाद्विदलन्तः तत उत्पतन्तः ये कणाः खण्डा तेषाङ्गणैरधिकं तारकिताम्बरः भूत्वा–

त्वमभिधेहि विधुं सखि ! मद्गिरा
किमिदमीदृगधिक्रियते त्वया ।
न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता ॥ ५० ॥
निपततापि न मन्दरभूभृता
त्वमुदधौ शशलाञ्छन ! चूर्णितः ।
अपि मुनेर्ज्जठरार्च्चिषि जीर्णतां
बत गतोऽसि न पीतपयोनिधेः ॥ ५१ ॥
किमसुभिर्गलितैर्जड ! मन्यसे
मयि निमज्जतु भीमसुतामनः ।

तारकवत्कृताकाशः सन् अतएव तस्य पक्षे तारकबाहुल्यमिति भावः तारकवच्छब्दात्तत्करोतीति ण्यन्तात्कर्मणि क्तः विन्मतोर्लुगिति मतुपो लुक् दिवोऽन्तरिक्षान्निपात्यन्ते खलु उत्कटपापकारिणः पुरे परिभ्राम्य शिलायां निपात्य हन्यन्त इति भावः ॥ ४९ ॥

त्वमिति । हे सखि ! त्वं मद्गिरा विधुमभिधेहि उपालभस्व तत्प्रकारमेवाह त्वया महात्मनेति भावः । किं किमर्थमिदमीदृक् स्त्रीवधात्मकं कर्म अधिक्रियते आचर्य्यते पयोनिधौ जन्म न गणितं यदि मास्तु हरशिर एव स्थितिर्निवास भूमिःसापि विस्मृता महाकुलप्रसूतस्य शम्भु शिरोधृतस्य तवेदमनुचितमित्यर्थः ॥ ५० ॥

निपततेति । हे शशलाञ्छन ! सकलङ्केत्यर्थः । त्वं उदधौ निपतता मथन समय इति शेषः । मन्दरभूभृता मन्दराद्रिणापि न चूर्णितः पीतपयोनिधेराचमित समुद्रस्य मुनेरगस्त्यस्य जठरार्चिषि जठरानलेऽपि जीर्णतां न गतोऽसि वातापिवदिति भावः । बतेति खेदे मद्भाग्य विपर्यय एवायमिति भावः ॥ ५१ ॥

किमिति । हे जड़ ! मूढ़ ! गलितैर्निष्क्रामितैः असुभिः प्राणैः स-

मम किल श्रुतिमाह तदर्थिकां
नलमुखेन्दुपरां विबुधः स्मरः ॥ ५२ ॥
मुखरयस्व यशोनवडिण्डिमं
जलनिधेः कुलमुज्ज्वलयाधुना ।
अपि गृहाण वधूवधपौरुषं
हरिणलाञ्छन ! मुञ्च कदर्थनाम् ॥ ५३ ॥

मारणेनेत्यर्थः भीमसुता मनो मयि चन्द्रे निमज्जतु निमज्जेत् सम्भावनायां लोट् इति मन्यसे किं । यत्रास्य पुरुषस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधी लोमानि वनस्पतीन्केशा अप्सुलोहितं च रेतश्च निधीयत इति श्रुतिप्रामाण्यादिति भावः । सोऽपि वृथाभिमान इत्याह । सः मृतमनश्चन्द्रमेतीत्येवं रूपोऽर्थोऽभिधा यस्याः तां तदर्थिकां शेषाद्विभाषेति कप्समासान्तः प्रत्ययस्थात्कात् पूर्वस्यात इदाप्यसुप इतीकारः श्रुतिं पूर्वोक्तवेदवाक्यं विबुधो देवो विद्वांश्च स्मरः नलस्य मुखेन्दुः मुखचन्द्रः परो मुख्योऽर्थो यस्याः तां तत्परां परं दूरान्यमुख्येष्विति वैजयन्ती । मम आह किल ब्रूते खलु विद्वदुक्त एवार्थो ग्राह्य इत्यर्थः परतोऽपि मे भर्ता नल एव नान्य इति भावः ॥ ५२ ॥

मुखरस्येति । हे हरिणलाञ्छन ! शशाङ्क ! यशसः नवडिण्डिमं कीर्तिप्रकाशकं नूतनवाद्यविशेषं मुखरयस्व मुखरं रवयुक्तं कुरु अधुना जलनिधेस्त्वज्जनकस्य कुलमुज्ज्वलय प्रकाशय वधूवधपौरुषमपि स्त्रीवधशौर्यञ्च गृहाण स्वीकुरु किन्तु कुत्सितोऽर्थः कदर्थः पीडाकरः कोः कत्तत्पुरुषे चेति कुशब्दस्य कदादेशः कदर्थीकरणं कदर्थना कदर्थशब्दात्तत्करोतीति ण्यन्ताद्युच् तां मुञ्च शीघ्रं मारय न तु पीडयेत्यर्थः । अत्र वधूवधस्यानिष्टत्वेनाविधेयस्य विधानात् विषम्भुङ्क्ष्वेतिवन्निषेधपरो विध्याभासः इष्टनिषेधाभासपराक्षेपालङ्कारभेदः तथा चालङ्कारसूत्रं अनिष्टविध्याभासश्चेति ॥ ५३ ॥

निशि शशिन्! भज कैतवभानुता
मसति भास्वति तापय पाप! माम्।
अहमहन्यवलोकयितास्मि ते
पुनरहर्पतिनिर्धुतदर्पताम् ॥ ५४ ॥
शशकलङ्क! भयङ्कर! मादृशां
ज्वलसि यन्निशि भूतपतिं श्रितः
तदस्तस्य तवेदृशभूतता
द्भुतकरी परमूर्द्धविधूननी ॥ ५५ ॥
श्रवणपूरतमालदलाङ्कुरं
शशिकुरङ्गमुखे सखि! निक्षिप।

निशीति। हे शशिन्! पाप! क्रूर! नृशंसो घातुकः क्रूर पाप इत्यमरः। निशि भास्वति असति कैतवभानुतां कपटसूर्यत्वं भज मां तापय किंत्वहन्याहनि अहर्पतिना सूर्येण अहरादीनां पत्यादिष्विति रेफादेशः। ते तव निर्धुतदर्पतां निरहङ्कारतां अवलोकयितास्मि द्रक्ष्यामीत्यर्थः लुटि तासिप्रत्ययः पापिष्ठाः स्वनाशमासन्नमपश्यन्तः परान् हिंसन्तीति भावः ॥ ५४ ॥

शशकलङ्केति। हे शशकलङ्क! शशाङ्क! मादृशां वियोगिनामित्यर्थः। भयङ्करोतीति भयङ्कर! उद्वेजक! मेघर्तिभयेषु कृञः इति खच्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः यद्यस्मात् भूतपतिं शिवं पिशाचपतिञ्च श्रितः सन् निशि ज्वलसि प्रदीप्यसे तत्तस्मादस्ततस्य अस्तभयस्य स्तेतरस्य च तव परेषां द्रष्टॄणां स्वाविष्टानाञ्च मूर्धविधूननी एकत्र विस्मयादन्यत्रावेशाच्च शिरःकम्पकरी हरशिरोमणेरस्ततस्य तव इत्थं प्रज्वलनात्मकमद्भुतमिति वाक्यार्थः। जीवत ईदृगलातपिशाचत्वमद्भुतमिति व्यङ्ग्यार्थः ॥ ५५ ॥

किमपि तुन्दिलितः स्थगयत्वमुं
स यदि तेन समुच्छ्वसिमि क्षणम् ॥ ५६
असमये मतिरुन्मिषति ध्रुवं
करगतैव गता यदियं कुहूः ।
पुनरुपैति निरुध्य निवास्यते
सखि ! मुखं न विधोः पुनरीक्ष्यते ॥ ५७ ॥
अयि ! ममैष चकोरशिशुर्मुने
र्व्रजति सिन्धु पिबस्य न शिष्यताम् ।

श्रवणेति । हे सखि ! श्रवणपूरः कर्णावतंसः य स्तमालदलाङ्कुरस्तमाल पल्लवस्तं शशिकुरङ्गस्य मुखे वक्त्रे निक्षिप तेन दलाङ्कुरेण स यदि किमपि कियदपि तुन्दिलितस्तुन्दिलीकृतः स्थूलीकृतः सन् अमुं शशिनं स्थगयतु च्छादयतु तत्तस्माद्धेतोः क्षणमुच्छ्वसिमि प्राणिमि रुदादिभ्यः सार्वधातुक इतीडागमः ॥ ५६ ॥

असमयइति । हे ! सखि ! असमये मतिः कार्यधीः उन्मिषति उदेति ध्रुवं नतु योग्यकाल इत्यर्थः । कुतः यद्यस्मादियं कुहूः नष्टचन्द्रामावस्या करगता स्वायत्तैव हस्तनक्षत्रगताच गता तदास्यां पुनरुपैति पुनरागच्छति चेदित्यर्थः निरुध्य निवास्यते स्थाप्यते तस्य फलमाह विधोर्मुखं पुनर्नेक्ष्यते तस्यास्तन्नाशकत्वादितिभावः पापिष्ठस्य तस्यादर्शन मेव फलमित्यर्थः ॥ ५७ ॥

अयीति । अयि सखि ! एष मम चकोरशिशुः विषपरीक्षार्थं गृहसंवर्धितो बालचकोरः यथाह कामन्दः चकोरस्य विरज्यते नयने विषदर्शनात् इति । पिबतीति पिबः पाघ्रेत्यादिना शप्रत्यये पिबादेशः । सिन्धोः पिबस्य समुद्रपायिनो मुनेरगस्त्यस्य शिष्यतां न व्रजतीति काकुः व्रजतीत्यर्थः । तथाच अयं चकोरः चन्द्रं निःशेषं पास्यतीत्याशयः नचैतदशक्यमित्याह अब्धिमशितुं पातुमधीतवतः अभ्यस्तवतः अतएव पिबतः अब्धिपानप्रवृत्तस्यास्य चकोरस्य शशिकराः कति वा शीकराः कतिचित्कणा इत्यर्थः अत्र समुद्रपा-

अशितुमब्धिमधीतवतोऽस्य वा
शशिकराः पिबतः कतिशीकराः ॥ ५८ ॥
कुरु करे गुरुमेकमयोघनं
बहिरितो मुकुरञ्च कुरुष्व मे ।
विशति तत्र यदैव विधुस्तदा
सखि ! सुखादहितं जहि तं द्रुतम् ॥ ५९॥
उदरएव धृतः किमुदन्वता
न विषमो वडवानलवद्विधुः ।
विषवदुज्झितमप्यमुना न स
स्मरहरः किममुं बुभुजे विभुः ॥ ६० ॥

शिनो दण्डापूपिकया शशिकरपानसिद्धेरर्थापत्तिरलङ्कारः ॥ ५८ ॥

कुर्विति । हे सखि ! एकं गुरुं महान्तं अयोघनन्तप्रायःपिण्डघनं अयोमुद्गरं करे कुरु विभृहीत्यर्थः इतोऽस्मात्साधनात् बहिः मे मम मुकुरं दर्पणञ्च कुरुष्व विधेहि तत्र मुकुरे यदा विधुर्विशति प्रतिफलति तदैव सुखादनायासादहितं शत्रुन्तं विधुन्द्रुतञ्जहि मारय हन्तेर्लोटि सिपि हिरादेशः हन्तेर्जः इति जादेशस्यासिद्धवदत्राभादित्यसिद्धत्वान्न हेर्लुक् अत्रचन्द्र प्रहारादिप्रलापा मेघसन्देशादिवन्मदनोन्माद विकार इत्यनुसन्धेयम् ॥ ५९॥

उदर इति । विषमः क्रूरकर्मा विधुः उदन्वता उदधिना उदन्वानुदधौचेतिनिपातः । वडवानलवत् वडवाग्निना तुल्यं तेनतुल्यंक्रियाचेद्वतिः। उदरे कुक्षावेव किं न धृतः ? अथवा अमुना उदन्वता उज्झितमप्यमुं विधुं विभुः समर्थः स्मरहरः विषवद्विषेण कालकूटेन तुल्यं पूर्ववद्वतिः किं न भुञ्जे ? न ग्रसतेस्म उभयथापि स्वयं जीवेम इति भावः ॥ ६० ॥

अशितमेकसुराशितमप्यभू
न्न पुनरेष पुनर्विशदं विषम् ।
अपि निपीय सुरैर्जनितक्षयं
स्वयमुदेति पुनर्नवमार्णवम् ॥ ६१ ॥
विरहिवर्गवधव्यसनाकुलं
कलय पापमशेषकलं विधुम् ॥
सुरनिपीतसुधाकमपापकं
ग्रहविदो विपरीतकथाः कथम् ॥ ६२ ॥
विरहिभिर्बहुमानमवापि यः
स बहुलः खलु पक्ष इहाजनि ।

अशितमिति । आर्णवमर्णवे जातं तत्रजात इत्यनुप्रत्ययः । अशितं मेचकं विषं कालकूटाख्यमेकेनैव सुरेण महादेवेन अशितं गिलितमपि पुनर्नाभूत् नाजनि एष चन्द्रो नामार्णवं विशदं विषं पुनः सितविषन्तु सुरैर्बहुभिः देवैः प्रथमां पिबते वह्निरित्याद्युक्तक्रमेण निपीय जनितक्षयं कृतनाशमपि स्वयं नवन्तद्रूपेणैव पुनरुदेत्यागच्छतीति व्यतिरेकः ॥ ६१ ॥

विरहीति । हे सखि ! विरहिवर्गवधे व्यसनेनासक्त्या आकुलं सङ्कुलं सव्यग्रं अशेषकलं पूर्णकलं विधुं पापं कलय क्रूरं विद्धि सुरैर्निपीता सुधा यस्य तं क्षीणमित्यर्थः शैषिकः कप्समासान्तः आपोऽन्यतरस्यामिति ह्रस्वाभावः अपाप एवापापकस्तं सौम्यं कलय तथा कार्यदर्शनादिति भावः किन्तु ग्रहविदो दैवज्ञास्तु कथं विपरीतकथाः क्षीणेन्दुर्कार्किभूपुत्राः पापास्तत्संयुतो बुधः । पूर्णचन्द्रबुधाचार्यशुक्रास्ते स्युः शुभग्रहा इत्येवं विरुद्धवाचः अनुभवविरोधादङ्गुलग्राम्यादिवाक्यवद्ग्राह्यं तद्वाक्यमिति भावः॥ २॥

विरहिभिरिति । यः पक्षो विरहिभिः बहुमानं सत्कारं अवापि प्रापितः क्षीयमाणचन्द्रत्वादिति भावः अवपूर्वादाप्नोतेर्ण्यन्तात्कर्मणि लुङ्

तदमितिः सकलैरपि यत्र तै
र्व्यरचि सा च तिथिः किममीकृता ॥ ६३ ॥
स्वरिपुतीक्ष्णसुदर्शनविभ्रमात्
किमु विधुं ग्रसते स विधुन्तुदः ।
निपतितं वदने कथमन्यथा
बलिकरम्भनिभं निजमुज्झति ॥ ६४ ॥
वदनगर्भगतं न निजेच्छया
शशिनमुज्झति राहुरसंशयम् ।

गति बुद्धीत्यादिना अणिकर्तुः कर्मत्वं ण्यन्ते कर्तुश्च कर्मणि इत्यभिधानं स विरहिभिर्बहुलतः पक्षः इहाखिल्लोके बहु बहुवारं लाति आदत्ते इति व्युत्पत्या बहुलः आतोऽनुपसर्गे कः नतु बहोर्लडिति भावः अजनि जातः खलित्युत्प्रेक्षा । किञ्च तत्रापि यत्र यस्यां तिथौ सकलैरपि तैर्विरहिभिस्तदमितिस्तस्य बहुमानस्यामिति रपरिमिति र्व्यरचि अकारि नष्टचन्द्रत्वादिति भावः । सा च तिथिः अमा अमिति बहुमानस्यास्यामितिव्युत्पत्त्या अमा अमानामिका कृता किं ? मातेर्भावार्थे संपदादिक्विपि नञ् समासे मत्वर्थीये चाकार प्रत्यये यस्येति लोपे अजाद्यतष्टाप् नत्वमा सह भातोऽस्यां सूर्याचन्द्रमसो रितिव्युत्पत्तेरत्र वा अमेति सहार्थे अव्ययं ततो भावप्रधानान्मत्वर्थीयाकाराट्टाप् ॥ ६३ ॥

स्वेति । विधुन्तुदो राहुः विधुं चन्द्रं स्वरिपोर्विष्णोस्तीक्ष्णं निशितं यत्सुदर्शनं तदिति विभ्रमात् सादृश्य मूलभ्रमात् ग्रसते किमु तालुच्छेदभयादितिभावः अन्यथा भयाभावे वदने निपतितं वक्त्रान्तर्गतं अतएव निजं स्वायत्तं बलिकरम्भनिभं उपहृतदध्युपसिक्त सक्तुसदृशं स्वाधिष्ठितमित्यर्थः करम्भादधिसक्तव इत्यमरः । एनमितिशेषः कथमुज्झति उद्गिरतीत्युत्प्रेक्षा ॥ ६४ ॥

वदनेति । हे सखि ! यद्वा राहुः वदनगर्भगत मास्यान्तः प्रविष्टं शशि-

अशित एव गलत्ययमत्ययं
सखि! विना गलनालबिलाध्वना ॥ ६५ ॥
ऋजुदृशः कथयन्ति पुराविदो
मधुभिदं किल राहुशिरश्छिदम् ।
विरहिमूर्द्धभिदं निगदन्ति न
क नु शशी यदि तज्जठरानलः ॥ ६६ ॥
स्मरसखौ रुचिभिः स्मरवैरिणा
मखमृगस्य यथा दलितं शिरः ।

न निजेच्छया स्वेच्छया नोज्झति असंशयं संशयो नास्ति अर्थाभावेऽव्ययीभावः किन्त्वयं शशी अशितो गिलित एव अत्ययं विना अकृच्छ्रेणेत्यर्थः 'अत्ययोऽतिक्रमे कृच्छ्रे इति वैजयन्ती।' गलनालबिलाध्वना कण्ठनालान्तः शुषिरमार्गेण गलति निःसरति राहोः शिरोमात्रत्वेन कण्ठनालनिःसृतस्याशितस्य जठराग्निसंयोगविरहादस्य पापिष्ठस्येन्दोः पुनरुदय इत्युत्प्रेक्षार्थः ॥ ६५ ॥

ऋजुदृश इति । ऋजुदृशः तादात्विककार्यमात्रदर्शिनः न त्वागामिकार्यदर्शिन इत्यर्थः पुराविदः पुराणज्ञाः पूर्वपुरुषाः मधुभिदं विष्णुं राहुशिरश्छिदं कथयन्ति किल । किलेति वार्तायां विरहिमूर्द्धभिदं वियोगिशिरश्छिदं न निगदन्तीति काकुः तथैव कथनीयमित्यर्थः । कुतः तस्य राहोर्जठरानलो यदि अस्तीति शेषः शशी क नु न क्वापि स्यादित्यर्थः राहुशिरश्छेदेन तदीयजठराग्निविच्छेदकत्वाद्विरहिमारकं शशिनं सुञ्जीवयन्नयं विष्णुर्विरहिशिरश्छेदीत्येवं व्यपदेश्यो न राहुशिरश्छेदीत्यर्थः ॥ ६६ ॥

स्मरसखेति । रुचिभिः कायकान्तिभिः स्मरसखौ स्मरसदृशौ तन्मिते च दिवो भिषजौ स्ववैद्यौ स्मरवैरिणा हरेण दलितं भिन्नं

सपदि संदधतुर्भिषजौ दिवः
सखि! तथा तमसोऽपि करोतु कः॥ ६७॥
नलविमस्तकितस्य रणे रिपो
र्मिलति किन्न कबन्धगलेन वा।
मृतिभिया भृशमुत्पततस्तमो
ग्रहशिरस्तदसृग्दृढबन्धनम्॥ ६८॥

सखि! जरां परिपृच्छ तमःशिरः
सममसौ दधतापि कबन्धताम्।
मगधराजवपुर्दलयुग्मवत्
किमिति न व्यतिसीव्यति केतुना॥ ६९॥

मुखएव मृगः तस्य मृगरूपधारिणो मुखस्येत्यर्थः शिरो यथा सपदि संदधतुः संयोजयामासतुः यो यस्य मित्रं स तस्य वैरं निर्यासयतीति युक्तं किन्तु हे सखि! कस्तमसो राहोरपि तथा शिरःसन्धानं करोतु न कोऽपीत्यर्थः हरस्य मखमृगशिरश्छेदे पुराणं प्रमाणं अश्विनोः तत्पुनःसन्धाने ततो वैतौ यज्ञस्य शिरः प्रत्यधत्तामिति श्रुतिः॥ ६७॥

नलेति। अथवा रणे नलेन विमस्तकितस्य तथापि मृतिभिया मरणभयेन भृशमुत्पतत उद्गच्छतो रिपोः कबन्धगलेन अपमूर्द्धकलेवरकण्ठेन सह तमोग्रहस्य शिरः तस्य गलस्यासृजा रक्तेन दृढबन्धनं निविड़संयोगं सक्तिं न मिलति न सङ्गच्छते तथा च तज्जठराग्निना चन्द्रो जीर्येदिति भावः॥ ६८॥

सखीति। अथवा हे सखि! जरां जराख्यां निशाचरीं परिपृच्छ असौ जरा कबन्धतां अशिरस्कतां दधतापि केतुना समं केतुग्रहेण सह तमसो राहोः शिरः मगधराजस्य जरासन्धस्य वपुर्दलयोः शरीरार्द्धभागयोः युग्मवद्युगलमिव किमिति न प्रतिसीव्यति न सन्धत्ते शिरोमात्रं

वद विधुन्तुदमालि! मदीरितै-
स्त्यजसि किं द्विजराजधिया विधुम्।
किमुदिवं पुनरेति यदीदृशः
पतित एष निषेव्य हि वारुणीम् ॥ ७० ॥
दहति कण्ठमयं खलु तेन किं
गरुडवद्द्विजवासनयोज्झितः।
प्रकृतिरस्य विधुन्तुद! दाहिका
मयि निरागसि का वद विप्रता ॥ ७१ ॥

राहोः शरीरमात्रं केतुस्तयोः सन्धाने पूर्ववत्तज्जठराग्निना चन्द्रो जीर्येदिति भावः जराकृताङ्गसन्धानो जरासन्ध इति भारती कथात्रानुसन्धेया ॥ ६९ ॥

वदेति। हे आलि! सखि! मदीरितैर्मद्वाक्यैः विधुन्तुदं राहुं वद रिपुं द्विजराजश्चन्द्रो ब्राह्मणश्रेष्ठश्च तद्धिया त्यजसि किं? तन्नास्तीत्याह यद्यस्मादेष चन्द्रः वारुणीं प्रतीचीं सुराञ्च वारुणी गन्धदूर्वायां प्रतीचीसुरयोरपीति विश्वः। निषेव्य गत्वा पीत्वा च पतितः पातकी च ईदृशः पतितोऽपि पुनर्दिवमन्तरिक्षं स्वर्गञ्च एति यदि किं द्वयोरपि पतितयोरधोगतिरेव नोर्द्ध्वगतिरित्यर्थः अतः पतितस्य कुतः श्रैष्ठ्यं कुतस्तरां तद्वधे दोषश्चेति भावः ॥ ७० ॥

दहतीति। हे विधुन्तुद! अयं विधुः द्विजवासनया द्विजत्वसाम्येनेत्यर्थः पातित्येऽपि जातेरनपायादिति भावः। गरुडवद्गरुडस्येव तत्र तस्येति वति प्रत्ययः। ते तव कण्ठं दहति खलु तेन दाहेनोज्झितः किं विप्रता का वद न कापीत्यर्थः तथाहि अस्य विधोः प्रकृतिः निरागसि निरपराधायां मयि दाहिका दग्ध्री अनपराधस्त्री घातकस्य कुतो ब्राह्मण्यमित्यर्थः आगोऽपराधो मन्तु चेत्यमरः। पुरा किल क्षुधितेन गरुत्मता पित्रादेशेन म्लेच्छान् भक्षयता तन्मिलित भ्रष्टद्विजः तद्गल;

सकलया कलया किल दंष्ट्रया
समवधाय यमाय विनिर्म्मितः ।
विरहिणीगणचर्व्वणसाधनं
विधुरितो द्विजराज इति स्मृतः ॥ ७२ ॥
स्मरमुखं हरनेत्रहुताशना
ज्ज्वलदिदं चक्षषे विधिना विधुः ।
बहुविधेन वियोगिवधागसा
शशमिषादथ कालिकयाङ्कितः ॥ ७३ ॥
इति विधोर्व्विविधोक्तिविगर्हणं
व्यवहितस्य वृथेति विमृश्य सा ।

गलेन सहस्रोद्गीर्ण इति पौराणिकी कथा तथा माघश्चाह विप्रं पुरापगतराडिव निर्जगामेति ॥ ७१ ॥

सकलयेति । विधुः सकलया कलया सकलाभिः कलाभिरेव दंष्ट्रया दंष्ट्राभिः दन्तविशेषैः प्रकृति द्रव्येण उभयत्र जात्येकवचनं यमाय अन्तकार्थं समवधाय सम्यगवहितीभूय विरहिणीगणस्य चर्व्वणसाधनं किञ्चिद्भक्षणसाधनं विनिर्म्मितः किल ब्रह्मणेति शेषः अतोऽस्य दंष्ट्राविशेषत्वात् द्विजराज इति स्मृतः न तु विप्रविशेषत्वादित्यर्थः दन्तविप्राण्डजा द्विजा इत्यमरः अतो नायमुपेक्ष्य इति भावः । ७२ ॥

स्मरमुखमिति । अथ विधुश्चन्द्रो नामेदं स्मरमुखं ज्वलत् प्रज्वलदेव विधिना दैवेन हरनेत्रहुताशनाच्चक्षषे मध्ये आकृष्टः अथवा बहुविधेन वियोगिवधेन यदेनः पापं तेनैव कालिकया श्यामिकया शशमिषादङ्कितः दाहकालिमा वा पापकालिमा वा शशमिषाद् दृश्यत इति वापह्नवोत्प्रेक्षाद्वयम् ॥ ७३ ॥

इतीति । अतितरां अतिमात्रं अव्ययादाम् प्रत्ययः विरहज्वर-

अतितरां दधती विरहज्वरं
हृदयभाजमुपालभत स्मरम् ॥ ७४ ॥
हृदयमाश्रयसे बत मामकं
ज्वलयसीत्यमनङ्ग ! तदेव किम् ।
स्वयमपि क्षणदग्धनिजेन्धनः
क्व भवितासि हताश ! हुताशवत् ॥ ७५ ॥
पुरभिदा गमितस्त्वमदृश्यतां
त्रिनयनत्वपरिप्लुतिशङ्कया ।

दधती सा दमयन्ती इतीयं व्यवहितस्य विप्रकृष्टस्य विधोर्विविधोक्तिभिः विगर्हणं निन्दा वृथेति विमृश्य अरण्यरुदित प्रायमिति विचार्य हृदयभाजं सन्निहितं स्मरं उपालभत निनिन्द पाक्षिक फलसम्भावनयेति भावः॥७४

हृदयमिति । हे अनङ्ग ! ममेदं मामकं तवकममकावेकवचने इत्यणि ममकादेशः हृदयमाश्रयसे तदेवेत्यं किं, ज्वलयसि दहसि बत हे हताश ! दुर्बुद्धे ! स्वयं त्वमपि हुतमश्नातीति हुताशोऽग्निः कर्मण्यण् प्रत्ययः तद्वत् क्षणदग्धनिजेन्धनो दग्धाश्रयः सन्नित्यर्थः क्व भवितासि क्व भविष्यसि न क्वापीत्यर्थः अनद्यतने लुट् परहिंसाव्यसनेनात्मनाशं न पश्यसीत्याशयेन हताशेत्यामन्त्रणम् ॥७५॥

पुरभिदेति । हे स्मर ! त्वं अक्षिगत इति शेषः अक्षि सन्निकृष्टस्याक्ष्णा दग्धुमशक्यत्वादद्वेष्यस्य च दाहायोगादिति भावः । पुरभिदा हरेण त्रिनयनत्वं त्र्यक्षत्वं चक्षुरादित्वात्सत्वा भावः। तस्य परिप्लुतिशङ्कया तृतीयाक्षिवैयर्थ्यभयेनेत्यर्थः अदृश्यतां गमितो नाशं प्रापितो गतिबुद्धीत्यादिना अणि कर्तुः कर्मत्वे तत्रैव क्तः ण्यन्ते कर्तुश्च कर्मण इति वचनात् किन्तु कस्य चनापि यस्य कस्यचिदपि जनस्याक्षिगते दृग्गोचरे द्वेष्ये च द्वेष्ये त्वक्षिगतो वध्य इत्यमरः। त्वयि त्रिभिर्नयनैः किं न निरैक्षत किमिति न निरीक्षितं अतोऽस्य

स्मर निरैक्ष्यत कस्यचनापि न
त्वयि किमक्षिगते नयनैस्त्रिभिः ॥ ७६ ॥
सहचरोऽसि रतेरिति विश्रुति
स्त्वयि वसत्यपि मे न रतिः कुतः ।
अथ न संप्रति सङ्गतिरस्ति वा
मनुमृता न भवन्तमियं किल ॥ ७७ ॥
रतिवियुक्तमनात्मपरज्ञ ! किं
स्वमपि मामिव तापितवानसि ।
कथमतापभृतस्तव सङ्गमा
दितरथा हृदयं मम दह्यते ॥ ७८ ॥

त्रिनयनत्वं व्यर्थ मेवेत्यर्थः स्वाक्षिगत इव मादृशाक्षि गतेऽपि त्वयि तृतीयाक्षि निरीक्षणभावाद परोपकारिणस्तस्य वैयर्थ्यं निरीक्षणं च देवस्य जितकामत्वादन्येषान्तु कामजितत्वादुत्प्रेक्ष्यत इति त्वयि निरैक्ष्यतेत्यत्र कर्मणोऽपि स्मरस्य अनेकशक्तियुक्तस्येति न्यायेन मातरि प्रहृत मित्यादि वदाधारविवक्षाया मविवक्षितकर्मकादीक्षतेर्भावेऽलङ्कारः प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति वचनात् ॥ ७६ ॥

सहचर इति । हे स्मर ! रतेः रति देव्याः सन्तुष्टेश्च सहचरोऽसीति विश्रुतिः प्रसिद्धिः त्वयि वसति हृदयस्थे सत्यपि मे कुतो रतिर्न अथवा सम्प्रति वां युवयोः सङ्गतिर्नास्ति कुतः इयं रतिः भवन्तं नानुसृता किल किलेति वार्त्तायां अनुसरणाभवादसङ्गति र्युक्तेत्यर्थः अत्र प्रीतिलक्षणाया रतेर्देव्या सहाभेदाध्यवसायादयमुपालम्भः अत एवातिशयोक्तिरलङ्कारः ॥ ७७ ॥

रतीति । आत्मानञ्च परञ्च न जानातीत्यनात्मपरज्ञ ! सर्वघातुक ! मार ! मामिव रतिं वियुक्तं स्वमात्मानमपि तापितवानसीत्युत्प्रेक्षा कुतः इतर-

अनुससार न मार ! कथं नु सा
रतिरतिप्रथितापि पतिव्रता ।
विरहिणीशतघातनपातकी
दयितयापि तयासि किमुज्झितः ॥ ७९ ॥
सुगतएव विजित्य जितेन्द्रिय
स्त्वदुरुकीर्त्तितनूं यदनाशयत् ।
तव तनूमवशिष्टवतीं ततः
समिति भूतमयीमहरद्धरः ॥ ८० ॥
फलमलभ्यत यत् कुसुमैस्त्वया

या स्वासन्तापने अतापस्ततस्तापरहितस्य तव सङ्गमात्सम्पर्कान्मम हृदयं कथं दह्यते तत्स्पर्शात्तापो नातत्स्पर्शादित्यर्थः सन्तापनादपि स्वयमतप्तेनापि परसन्तापः क्रियते तच्छीलैर्यथा तप्तमुखैः शिलीमुखैरिति भावः॥७८॥

अनुससारेति । हे मार ! मारक ! पतिव्रतेति प्रथितापि सा रतिः कथं नानुससार कथं नानुमृता । मृते म्रियेत या नारी सा स्त्री ज्ञेया पतिव्रतेत्यनुस्मरणादिति भावः; अथवा दूयङ्गिरेतावङ्गिरसंख्यैरित्यर्थः अनाथवधूनां वियोगिस्त्रीणां वधैः पातकित्वं तया दयितयापि विरहासहमानया पीति भावः । उज्झितः त्यक्तोऽसि किमित्यत्र चा अयुद्धैः सम्प्रतीच्छोऽहि महापातक दूषित इति स्मरणादिति भावः ॥ ७९ ॥

सुगत इति । जितेन्द्रियो वशी सुगतो बुद्ध एव विजित्य तव उरुं महतीं कीर्त्तिमेव तनुं शरीरं यद्यस्मादनाशयत् नाशितवान् ततः कारणादवशिष्टवतीमवशिष्टां भूतमयीं पाञ्चभौतिकीन्तव तनुं समिति युद्धे हरः शम्भुरहरत् भस्मीचकारेत्यर्थः तथापि निर्लज्जः कथमित्थमस्माद्दशानकरणं व्यथयसीति विस्मिताः स्म इति भावः ॥८०॥

फलमिति । हे अनङ्ग ! विषमनेत्रं त्र्यक्षं कुसुमैर्निगृह्णता कुसुमैर्निरस्यता प्रहरतेत्यर्थः त्वया यत्फलं मरणरूपमलभ्यत

विषमनेत्रमनङ्ग ! विरुद्धता ।
अहह ! नीतिरवाप्तभया ततो
न कुसुमैरपि विग्रहमिच्छति ॥ ८१ ॥
अपि धयन्नितरामरवत् सुधां
त्रिनयनात् कथमापिथ तां दशाम् ।
भण रतेरधरस्य रसादरा
दमृतमात्तघृणः खलु नापिबः ॥ ८२ ॥
भुवनमोहनजेन किमेनसा
तव परेत ! बभूव पिशाचता ।
यदधुना विरहाधिमलीमसा
मभिभवन् भ्रमसि स्मर ! मद्विधाम् ॥ ८३ ॥

ततस्तस्मात्फलादवाप्तभया प्राप्तभया नीतिः सर्वथा साधनान्तरेणापि वैरनिर्यातनं कार्यमित्येवं रूपा कर्त्री कुसुमैरपि विग्रहं नेच्छति अहहेत्यद्भुते किमुत साधनान्तरैः कुसुमैरपि न योद्धव्यं किं पुनर्निशितैः शरैरिति नीत्या कुसुमान्यपि मोक्तुं बिभेषीति भावः ॥ ८१ ॥

अपीति । हे स्मर ! इतरामरवद्दैवतान्तरवत् सुधां धयन् पिबन्नपि धेटः शतृप्रत्ययः त्रिनयनादीश्वरात् कथं तां दशां मरणावस्थां आपिथ प्राप्तोऽभूः आप्नोतेर्लिटि क्रादिनियमादिडागमः। भण वद अथवा रतेर्देव्या अधरस्योष्ठस्य रसे स्वादे आदरादास्थावशात् आत्तघृणः प्राप्तास्तजुगुप्सः सन् घृणा जुगुप्सा कृपयो रितिवैजयन्ती । अमृतं ना पिबः खलु अमृतपाने कथमन्येष्वमरेषु त्वमेको मृत इति भावः ॥ ८२ ॥

भुवनेति । परेत ! प्रेत ! तव भुवनानां मोहनमचेतनीकरणं तज्जेनैनसा पापेन पिशाचता बभूव किं ? कुतः स्मर ! यद्यस्मादधुना विरहाधिना वियोग व्यथया मलीमसां मलिनां मद्विधां मादृशीमबलामभिभवन् पीडयन् भ्रमसि

वत ददासि न मृत्युमपि स्मर !
स्खलति ते कृपया न धनुः करात् ।
अथ मृतोऽसि मृतेन च मुच्यते
न किल मुष्टिरुरीकृतबन्धनः ॥ ८४ ॥
दृगुपहत्यपमृत्युविरूपताः
शमयतेऽपरनिर्ज्जरसेविता ।
अतिशयान्ध्यवपुःक्षतिपाण्डुताः
स्मर ! भवन्ति भवन्तमुपासितुः ॥ ८५ ॥

पापिष्ठाः किल पिशाचताङ्गताः दुर्ब्बलस्त्री बालादीन् पीड़यन्ति त्वञ्च तादृक् कोऽपि पिशाच इत्युत्प्रेक्षा ॥८३ ॥

वतेति । हे स्मर ! मृत्युमपि न ददासि तेन दुःखान्तो भवेदिति भावः। अथवा कृपया ते करात् धनुरपि न स्खलति न भ्रश्यति पूर्ववद्भावः अथ मृतोऽसि तथापिनस्खलतीत्याह मृतेन च मृतेनापि उरीकृतबन्धनः अङ्गीकृतबन्धनः दृढ़बद्ध इत्यर्थः उर्यङ्गूर्युररीभ्यश्च करोति कुरुते पर इति भट्टमल्लः। मुष्टिर्न मुच्यते खलु वतेति खेदे ततः कृतान्तादपि क्रूरोऽसीति भावः ॥ ८४ ॥

दृगिति । हे स्मर ! अपरनिर्जरसेविता त्वत्तोऽन्यदेवतासेवको जनः तृच् प्रत्ययः। दृशोरुपहतिः आन्ध्यं अपमृत्युरकालमरणं विरूपता अङ्गवैवर्ण्यञ्च ताः शमयते निवर्तयति णिचश्चेत्यात्मने पदं मित्वार्थह्रस्वत्वं । भवन्तमुपासितुः त्वत्सेविनो जनस्य तु ताच्छील्ये तृच् नलोकेत्यादिना षष्ठीप्रतिषेधः अतिशयेनान्ध्यं दृष्ट्युपघातः वपुःक्षतिः शरीरविपत्तिः पाण्डुता वैवर्ण्यञ्च ता भवन्तीति देवतान्तरभक्तस्य उक्ता दोषशान्तिः फलं त्वद्भक्तस्य तदुद्रेक इत्यहो भक्तवात्सल्यं कामदेवस्येत्युपहासः अत्रानर्थोत्पत्तिलक्षणो विषमालङ्कारभेदः ॥ ८५ ॥

स्मर ! नृशंसतमस्त्वमतो विधिः
सुमनसः कृतवान् भवदायुधम् ।
यदि धनुर्दृढमाशुगमायसं
तव सृजेत् प्रलयन्त्रिजगद्व्रजेत् ॥ ८६ ॥
स्मररिपोरिव रोपशिखी पुरां
दहतु ते जगतामपि मा त्रयम् ।
इति विधिस्त्वदिषून् कुसुमानि किं
मधुभिरन्तरसिञ्चदनिर्वृतः ॥ ८७ ॥
विधिरनङ्गमभेद्यमवेत्य ते
जनमनः खलु लक्ष्यमकल्पयत् ।

स्मरेति । हे स्मर ! नॄन् शंसति हिंसतीति नृशंसो घातुकः शंसु हिंसायामितिधातोः पचाद्यच् । त्वमिति नृशंसः नृशंसतमः अतो हेतोः विधिः स्रष्टा सुमनसः पुष्पाणि भवतः आयुधं कृतवान् तव दृढं धनुरायसमयोमयं आशुगं शरञ्च सृजेद्यदि त्रयाणां जगतां समाहारः त्रिजगत् कर्तृ प्रलयं विनाशं व्रजेत् तव पापिष्ठतां दृष्ट्वा विदुषा परमेष्ठिना सम्यगनुष्ठितमिति भावः ॥ ८६ ॥

स्मरेति । स्मररिपोस्त्वदरेर्हरस्य रोपशिखी वाणाग्निः पत्री रोप इषुर्द्वयोरित्यमरः। पुरान्त्रयमिव ते तव रोपशिखी जगतान्त्रयं मा दहत्वितिमत्वेतिशेषः गम्यमानार्थत्वादप्रयोगः । विधिः स्रष्टा अनिर्वृतस्त्वां कुसुमेषुं कृत्वाप्यपरितुष्टः सन् त्वदिषून् कुसुमानि मधुभिर्मकरन्दैरन्तरसिञ्चत् अग्निशान्त्यर्थमौक्षत्किमित्युत्प्रेक्षा अन्यथा पापिष्ठस्य ते को वारयितेति भावः ॥ ८७ ॥

विधिरिति । विधिर्ब्रह्मा अनङ्गमनवयवं अङ्गं प्रतीकोऽवयव इत्यमरः। अतएवाभेद्यमवेत्य निरवयवद्रव्यत्वादविनाश्यं निश्चित्य जनमनः ते तव लक्ष्यमकल्पयदित्युत्प्रेक्षा नावयव लक्ष्यदानपक्षे स विधिः वज्रमदास्यत

अपि स वज्रमदास्यत चेत्तदा
त्वदिषुभिर्व्यदलिष्यदसावपि ॥ ८८ ॥

अपि विधिः कुसुमानि तवाशुगान्
स्मर ! विधाय न निर्वृतिमाप्तवान् ।
अदित पञ्च हि ते स नियम्य तां
स्तदपि तैर्व्वत जर्ज्जरितं जगत् ॥ ८९ ॥

उपहरन्ति न कस्य सुपर्व्वणः
सुमनसः कति पञ्च सुरद्रुमाः ।
तव तु हीनतया पृथगेकिकां
धिगियतापि न तेऽङ्गविदारणं ॥ ९० ॥

चेत् दद्याद्यदि तदा त्वदिषुभिः असौ वज्रोऽपि व्यदलिष्यद्विशीर्णो भवेत् अतो युक्तकारी स्रष्टेति भावः ॥ ८८ ॥

अपीति । हे स्मर ! विधिः कुसुमान्येव तवाशुगान्विधायापि निर्वृतिं कृतकृत्योऽस्मीति परितोषं नाप्तवान्नितिउत्प्रेक्षा कुतः हि यस्मात्सोऽनिर्वृतो विधिस्तान् कुसुमाशुगानपि नियम्य दूयन्त एवेति नियमं कृत्वा ते तव पञ्चैवादित दत्तवान् तदपि तथापि तैः पञ्चभिरेव जगत् जर्ज्जरितं जर्ज्जरीकृतं वतेति खेदे विश्वनियन्तापि एवं विफलयत्नः कोऽन्योऽस्ति नियन्तेति भावः ॥ ८९ ॥

उपहरन्तीति । हे स्मर ! पञ्च सुरद्रुमाः मन्दारादयः कस्य सुपर्वणः कति सुमनसः कियन्ति कुसुमानि नोपहरन्ति नोपायनीकुर्वन्ति सर्वस्याप्यमित मुपहरन्तीत्यर्थः उपायन मुपग्राह्य मुपहारस्तथोपधेत्यमरः। तव तु हीनतया नीचतया पृथक् प्रत्येक मेकिकामेकाकिनीमेकैकां सुमनोव्यक्तिं मुपहरन्तीत्यर्थः अतएव पञ्चबाणत्वं तवेतिभावः एकादाकिनीचासहाय इति चकारात् कन्प्रत्यये पूर्वस्येकारः इयता एतावद्वमानेनापि ते तवाङ्ग-

कुसुममप्यतिदुर्नयकारि ते
किमु वितीर्य्य विधिर्द्धनुरग्रहीत् ।
किमकृतैष तवैकतदास्पदे
द्वयमभूदधुना हि नलभ्रुवौ ॥ ९१ ॥
षडृतवः कृपया स्वकमेककं
कुसुममक्रमनन्दितनन्दनाः ।
ददति यद्भवते कुरुते भवान्
धनुरिवैकमिषूनिव पञ्च तैः ॥ ९२ ॥

विदारणं शरीरनिपत्तिर्नास्ति धिक् अनमतस्य जीवनान्मरणमेव वरमितिभावः ॥ ९० ॥

कुसुममिति । विधिः कुसुममपि दुर्बलमपीत्यर्थः अतिदुर्नयकारि अनर्थकारकं धनुः ते तव वितीर्य दत्वा अग्रहीत्किमु पुनर्जहार किमितुरत्वेचा पापीयसे दत्तं हर्तव्यमेवेति भावः । किं त्वेष विधिः किमकृत अकार्यमेव कृतवानित्यर्थः कुतः यद्वयस्मादेकस्य धनुष आस्पदे स्थाने अधुना नलभ्रुवोर्द्वयमभूद्धि तेनैकेन धनुषा नलभ्रुवौ द्वे निर्मितवता तेन कण्टकमुद्धृत्य शल्यमारोपितं यदेकासहिष्णोर्द्वयमसह्यं सम्पादितमिति भावः ॥ ९१ ॥

षडिति । अक्रमेण यौगपद्येन नन्दितनन्दनाः प्रकाशितसुरोद्यानाः युगपन्निजकुसुमदानसमर्था इत्यर्थः षडृतवो वसन्तादयः कृपया ननु प्रीत्येति भावः स्वकं स्वसम्बन्धिनं एककं एकैकमेव असहाये कन्प्रत्ययः कुसुमं ददाना इति शेषः तथाचोक्तरीत्या प्रत्येकमेकैकदानान्मिलित्वा षड् भवते तुभ्यं ददति तैः षड्भिःकुसुमैः एकन्धनुरिव एकेनेति शेषः पञ्चेषून् पञ्चभि रितिशेषः भवान् कुरुते अहो अवमानेऽपि निर्लज्जस्य ते परहिंसाव्यसनमिति भावः ॥ ९२ ॥

यदतनुत्वमिदं जगते हितं
क्व स मुनिस्तव यः सहते हतीः ।
विशिखमाश्रवणं परिपूर्य्य चे-
दविचलद्भुजमुज्झितुमीशिषे ॥ ९३ ॥

सह तया स्मर ! भस्म झगित्यभूः
पशुपतिं प्रति यामिषुमग्रहीः ।
ध्रुवमभूदधुना वितनोः शर-
स्तव पिकस्वर एव स पञ्चमः ॥ ९४ ॥

स्मर ! स मद्दुरितैर्विफलीकृतो
भगवतोऽपि भवद्दहनश्रयः ।

यदिति । हे मार ! त्वमतनुरशरीरीति यत्तदिदं अतनुत्वं जगते हितं हितयोगे चेति चतुर्थी वक्तव्या । तथाहि विशिखं बाणमविचलद्भुजमकम्पहस्तं यथा तथा आश्रवणं परिपूर्य कर्णमाक्रम्य उज्झितुं मोक्तुं ईशिषे शक्नोषि चेद् यस्तव हतीः प्रहारान् सहते स मुनिः क्व न क्वापीत्यर्थः अनङ्गत्वेऽप्येवं जगद्द्रोहिणः साच धानुष्कान्तरवत्कायव्यापारे जगति जितेन्द्रियकथैवास्तमियादित्यनङ्गत्वमेव जगद्धित मित्यर्थः॥९३॥

सहेति । हे स्मर ! पशुपतिं प्रति यामिषुमग्रहीस्तया सह झटिति सहसा भस्माभूः अधुना वितनोरनङ्गस्य तव पिकस्वरः कोकिलालाप एव पिकः कूजति पञ्चममित्यादौ पिकस्वरे पञ्चमसंज्ञाप्रवृत्तिश्चेति भावः पञ्चमो रागभेदे स्यात्पञ्चानामपि पूरणे इति विश्वः । शरकार्यकारित्वात्पिकस्वरस्य शरत्वोत्प्रेक्षा ॥ ९४ ॥

स्मरेति । हे स्मर ! भगवतो हरस्यापि दुरितैः समं भवत्पापैः सह भगवद्दृष्टिपातस्य पापहरत्वादिति भावः । भवद्दहनश्रमो विफलीकृतो निष्फलीकृतः सुरहिताय कृतात्मतद्धरकोपानले त्यक्तस्वदेहः सन् तत्क्षणं तस्मि-

सुरहिताय हुतात्मनः पुन
र्ननु जनुर्दिवि तत्क्षणमापिथ ॥ ९५ ॥
विरहिणो विमुखस्य विधूदये
शमनदिक्पवनः स न दक्षिणः ।
सुमनसो नमयन्नटनी धनु
स्तव तु बाहुरसौ यदि दक्षिणः ॥ ९६ ॥
किमु भवन्तमुमापतिरेककं
मदमुदान्धमयोगिजनान्तकम् ।

न्नेव क्षणे अत्यन्तसंयोगे द्वितीया दिवि द्युलोके पुनर्जनुः पुनरुत्पत्ति मापिथ नु प्राप्नोषि खलु सुरप्रार्थितात्तस्मादेवेति शेषः तच्चात्मतापफल मिति भावः ॥ ९५ ॥

विरहिण इति । हे स्मर ! तवासौ बाहुर्यदि विधूदये चन्द्रोदये सहायभावे सतीत्यर्थः सुमनसः पुष्पं नाम धनुः अटनौ कोटौ कोटिरस्याटनी गोधेत्यमरः । नमयन् दक्षिणो विरहिजनप्रहारदक्षः स्यात् प्रहर्तुं प्रवृत्तश्चेदित्यर्थः सव्येतरश्चेति ध्वनिः तदा विमुखस्य विह्वलमुखस्य चन्द्रोदयपराङ्मुखस्य विरहिणो वियोगिजनस्य स दक्षिणत्वेन प्रसिद्धः शमनदिक्पवनो याम्यदिङ्मारुतः दक्षिणो दाक्षिण्यवान् सव्येतरश्च न किन्तु सोऽपि त्वत्सहकारित्वान्निर्दयं प्रहर्तैवेत्यर्थः अतः सर्वानर्थमूलत्वात्त्वमेव पापिष्ठ इत्यर्थः प्रत्यङ्मुखस्य दक्षिणोऽपि वाम इति ध्वनिः शमनदिक्पवनोऽपि न दक्षिण इति स्फुरणाद्विरोधाभासोऽलङ्कारः ॥ ९६ ॥

किमु इति । हे मदन ! उमापतिः मदश्च मुच्च द्वन्द्वैकवद्भावः तेन मदमुदा मदानन्दाभ्यां अन्धयति व्यामोहयति कामिजनमित्यन्धं अन्धकं अन्ध दृष्टिप्रतिघात इति धातोश्चौरादिकात्पचाद्यच् अयोगिजनान्तकं वियोगिजनस्य हन्तारं एककमेकाकिनं भवन्तमिव अजयदिति यत्

यदजयत्ततएव न गीयते
स भगवान् मदनान्धकमृत्युजित् ॥ ९७ ॥
त्वमिव कोऽपि परापकृतौ कृती
न ददृशे न च मन्मथ! शुश्रुवे।
स्वमदहद्दहनाज्ज्वलतात्मना
ज्वलयितुं परिरभ्य जगन्ति यः ॥ ९८ ॥
त्वमुचितं नयनार्चिषि शम्भुना
भुवनशान्तिकहोमहविः कृतः।
तव वयस्य मपास्य मधुं मधुं
हतवता हरिणावत किं कृतम् ॥ ९९ ॥

ततएव भगवानुमापतिः मदनान्धकमृत्युजित् मदनजिदन्धकजिन्मृत्युजिदिति न गीयते किन्तु? गीयत एवेत्यर्थः मदनवदन्धकमृत्युरपि त्वत्तोऽन्योनास्ति इति भावः अत्र मदनादीनां मिथो भेदेऽप्यभेदोक्तेरतिशयोक्तिः ॥ ९७ ॥

त्वमिति। हे मन्मथ! त्वमिव परापकृतौ परापकारे कृती कुशलः कोऽपि न ददृशे न दृष्टः न शुश्रुवे न च श्रुतः योऽपकर्ता दहनादग्निसंयोगात् ज्वलता प्रज्वलता आत्मना स्वाङ्गेन जगन्ति परिरभ्याश्लिष्य ज्वलयितुं दग्धुं स्वमात्मान मदहत् परगात्रदूषणाय परिरब्धस्वगात्रे पङ्कलेपवत् परदाहव्यसनादेवात्मदाहाङ्गीकार स्तवेत्यहो दुर्व्यसनमिति भावः ॥ ९८ ॥

त्वमिति। हे मार! शम्भुना नयनार्चिषि नेत्राग्निशिखायां त्वं भुवनानां शान्तिके शान्तिप्रयोजके प्रयोजनमिति ठक् होमहविराहुतिः कृतः उचितं वध्यस्य वधादिति भावः तव वयस्यं सखायं मधुं वसन्तं अपास्योपेक्ष्य मधुं मध्वाख्यं दैत्यं हतवता हरिणा किं कृतं

इति कियद्वचसैव भृशं प्रिया
धरपिपासु तदाननमाशु तत् ।
अजनि पांशुलमप्रियवाग्ज्वल
न्मदनशोषणबाणहतेरिव ॥१००

प्रियसखीनिवहेन सहाथ सा
व्यरचयद्गिरमर्द्धसमस्यया ।
हृदयमर्म्मणि मन्मथसायकैः
क्षततमा बहु भाषितुमक्षमा ॥ १०१ ॥

अकरुणादव सूनशरादसून्
सहजयापदि धीरतयात्मनः ।

बतेति खेदे वध्यवधाद्धरः साधुकारी हरिस्तदुपेक्षणादसाधुकारीत्यर्थः स मित्रं स्मरोऽवध्य इति भावः ॥ ९९ ॥

इतीति । प्रियस्य नलस्याधरमोष्ठं पिपासु पातुमिच्छु मधुपिपासुप्रभृतीनां गमिगाम्यादिपाठात्समास इति वामनः । तत्प्रसिद्धं तस्या भैम्या आननं इतीत्थं कियद्वचसैव अप्रियवाग्भिर्निष्ठुरोक्तिभिः ज्वलतः क्रुध्यतो मदनस्य यः शोषणो बाणः तस्य हतेः प्रहारादेवेत्युत्प्रेक्षा आशु भृशं पांशुलं पांशुमद्द्रव्यं अजनि जातम् ॥ १०० ॥

प्रियसखीति । अथ सा दमयन्ती मन्मथसायकैः हृदयमर्म्मणि क्षततमा गाढं प्रहृता अतएव बहु भाषितुं प्रपञ्चं वक्तुमक्षमा सती प्रियसखीनिवहेन सह आप्तसखीसङ्घेन सार्द्धं अर्द्धरूपया समस्यया संग्रहकारिकया समस्या तु समासार्थेत्यमरः । संज्ञायां समजनि पदेत्यत्र संपूर्वादस्यतेर्बहुलकः क्यङिति क्षीरस्वामी । गिरं व्यरचयत् पूर्व्वार्धं सखीजनसमस्या तदुत्तरत्वेनोत्तरार्द्धं स्वयमरचयदित्यर्थः ॥ १०१ ॥

अकरुणादिति । हे भैमि ! आपदि सहजया धीरतया धैर्येण विपदि धैर्यमिति नीतेरिति भावः । अकरुणान्निर्दयात् सूनशरात् कुसुमेषोः आ

असवएव ममाद्य विरोधिनः
कथमरीन् सखि ! रक्षितुमात्थ माम् ॥१०२॥
हितगिरं न शृणोषि किमाश्रवे !
प्रसभमप्यव जीवनमात्मनः ।
सखि ! हिता यदि मे भवसीदृशी
मदरिमिच्छसि या मम जीवितम् ॥ १०३ ॥
अस्तदीधितिरेष विदर्भजे !
भजसि तापममुष्य किमंशुभिः ।

त्मनः स्वस्यासून् प्राणानव रक्ष अद्येदानीं असवएव मम विरोधिनः शत्रवः तन्मूलत्वाद्दुःखसंवेदनस्येति भावः । हे सखि ! मां कथमरीन् रक्षितुमात्थ ब्रवीषि ब्रुवः पञ्चानामिति साधुः । सम्प्रति मे प्राणरक्षणमाशीविषपोषणं पयोभिरिति भावः ॥१०२॥

हितगिरमिति । आशृणोति वाक्यमिति आश्रवा पचाद्यच् हे आश्रवे वाक्यकारिणि ! वचनेस्थित आश्रव इत्यमरः । प्रसभं बलादप्यात्मनो जीवितं प्राणमव रक्ष, एति जीवन्तमानन्दो नरं वर्षशतादपीति न्यायादिति भावः । हितगिरमाप्तवाक्यं किन्न शृणोषि हे सखि ! या त्वं मदरिं मम जीवितमिच्छसि अपेक्षसे ईदृशमित्थं शत्रुवृद्धिमीहमानापि मे हिता भवसि यदि न तु भवसि अतो न शृणोमीत्यर्थः ॥१०३॥

अस्तदीधितिरिति । हे विदर्भजे ! दमयन्ति ! एष इति पुरोवर्तिनो हस्तेन निर्देशः । अस्तदीधितिः सुधांशुः अमुष्य सुधांशोरंशुभिः किमिति तापं भजसि अत्रास्तशब्दस्यार्थान्तराश्रयेणोत्तरमाह यदीति हे सखि ! यद्यस्य चन्द्रिका स्तता भवन्ति यदि तदा क परिप्यते न कापीत्यर्थः । अस्यास्तदीधितित्वादेवेदं दुःखं स्तदीधिति चेत्सर्वारिष्टशान्तिः स्यादिति भावः । अत्र अस्तेति सुधाविवक्षया प्रयुक्तस्य स्ततेतरार्थत्वेन योजनाद्वक्रोक्तिरलङ्कारः । अन्ययोक्तस्य वाक्यस्य काका श्ले-

यदि भवन्ति मृताः सखि ! चन्द्रिकाः
शशभृतः क्व तदा परितप्यते ॥ १०४ ॥

भज धृतिं त्यज भीतिमहेतुका
मयमचण्डमरीचिरुदञ्चति ।
ज्वलयति स्फुटमातपमुर्म्मुरै
रनुभवं वचसा सखि ! लुम्पसि ॥ १०५॥

अयि ! शपे हृदयाय तवैव त
द्यदि विधोर्न रुचेरसि गोचरः ।
रुचिफलं सखि ! दृश्यतएव य
ज्ज्वलयति त्वचमुल्ललयत्यसून् ॥ १०६॥

पेण वा भवेत् । अन्यथा योजनं यत्र सा वक्रोक्तिर्निगद्यत इति॥१०४॥

भजेति । हे मुग्धे ! धृतिं भज धैर्यं व्रज अहेतुकां भीतिं त्यज अयमचण्डमरीचिः शीतांशुः उदञ्चति उदेति न चण्डांशुरित्यर्थः आतपैरेव मुर्मुरैः तुषानलैः मुर्मुरस्तु तुषानल इति वैजयन्ती । स्फुटं प्रत्यक्षं वचसा आगमेन लुम्पसि बाधसे तदयुक्तं ग्रावप्लवनवाक्यवत्प्रत्यक्षेणैवास्य बाधादित्यर्थः । अत्राचण्डकरे चण्डकरभ्रान्त्यां भ्रान्तिमदलङ्कारः ॥ १०५ ॥

यदुक्तमयमचण्डमरीचिरिति तद्विश्वासयति । अयीति । अयि ! मुग्धे ! भैमि ! विश्वसिहीति शेषः विधोश्चन्द्रस्य रुचेस्तेजसो गोचरो विषयो नासि यदि त्वदङ्गसङ्गीदं तेजश्चान्द्रं न चेदित्यर्थः तर्हि तवैव हृदयाय शपे त्वज्जीविताय द्रुह्यामीत्यर्थः श्लाघह्नुङित्यादिना सम्प्रदानत्वाच्चतुर्थी तर्हि सखि ! रुचिफलमेव तेजोमात्रकार्यमेव दृश्यते न तु चन्द्रकार्यं मद्भाग्यविपर्ययेणाभिभवन्निवृत्तेरिति भावः । कुतः यद्यस्मात्त्वचं ज्वलयति दहति असून् प्राणानुल्ललयति उन्मूलयति सर्वं तेजः

विधुविरोधितिथेरभिधायिनी
मयि न किं पुनरिच्छसि कोकिलाम् ।
सखि ! किमर्थगवेषणया गिरं
किरति सेयमनर्थमयीं मयि ॥ १०७ ॥
हृदय एव तवास्ति स वल्लभ
स्तदपि किं दमयन्ति ! विषीदसि ।
हृदि परं न वहिः खलु वर्त्तते
मम यतस्तत एव विषीद्यते ॥ १०८ ॥

उष्णत्वाद्दाहकमेव अभिभवात्तु विपर्यय इति पदार्थतत्त्ववादिनः ॥ १०६ ॥

विध्विति । अयि ! भैमि ! विधुविरोधितिथेः कुह्वाख्याया नष्टेन्दुतिथेरभिधायिनीं तदभिधायक कुहूशब्दोच्चारिणीं कुहू कुह्विति नामग्राहं तदाह्वयिनीमित्यर्थः कोकिलां पुनः किं नेच्छसि माभूच्चन्द्रस्तद्विरोधिनीमेनां तु किं नेच्छसीत्यर्थः । हे सखि ! अर्थगवेषणया कुहूशब्दस्य नष्टचन्द्रा तिथिरर्थ इति विचारेण किं तत्साध्यं किमपि नास्तीत्यर्थः गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया कुतः सेयं कोकिला मयि विषये गवादि शब्दमभिधेयवती न भवतीत्यनर्थमयीं रथघोषादिवदर्थशून्यत्वात् किं च अनर्थमयी अशनिघोषवदापद्रूपा च तां अनर्थशब्दात्मयट् प्रत्ययः गिरं किरति निक्षिपति ॥ १०७ ॥

हृदय इति । हे दमयन्ति ! स ते वल्लभः नलः तव हृदय एवास्ति वर्त्तते तदपि तथापि किं विषीदसि खिद्यसे हे सखि ! यतो हृदि परं हृद्येव वर्त्तते वहिर्न वर्त्तते खलु तत एव विषीद्यते खिद्यते षदे र्भावे लुक् यतः सर्वत एव न तु दृश्यते अतो मे विषाद इत्यर्थः ॥ १०८ ॥

स्फुटति हारमणौ मदनोष्मणा
हृदयमप्यनलङ्कृतमद्य ते।
सखि! हतास्मि तदा यदि हृद्यपि
प्रियतमः स मम व्यवधापितः॥ १०९॥
इदमुदीर्य तदैव मुमूर्च्छ सा
मनसि मूर्च्छितमन्मथपावका।
क्व सहतामवलम्बलवच्छिदा
मनुपपत्तिमतीमतिदुःखिता॥ ११०॥

स्फुटतीति। हे भैमि! मदनोष्मणा कामज्वरेण हारमणौ हृदयालङ्काररत्ने स्फुटति विदलति सति अद्य ते तव हृदयं वक्षोऽपि अलङ्कृतं न भवतीत्यनलङ्कृतं अपरिष्कृतं जातं। अथ हृदयमन्तरङ्गमपि अनलं नलरहितं जातमित्यर्थान्तरं मत्वोत्तरमाह हे सखि! स प्रियतमः मम हृद्यपि व्यवधापितो यदि दूरीकृतश्चेत् दधातेर्ण्यन्तात्कर्मणि क्तः आर्त्तिह्रीत्यादिना पुगागमः तदा हतास्मि वक्रोक्तिरलङ्कारः लक्षणमुक्तम्॥ १०९॥

इदमिति। सा भैमी इदं पूर्वोक्तं सखि! हतास्मीति वाक्यमुदीर्य उच्चार्य तदैव मनसि मूर्च्छितमन्मथपावका प्रवृद्धकामानला सती मुमूर्च्छ मुमोह मूर्च्छामोहनसमुच्छ्राययोरित्यर्थद्वयेऽपि धातोः स्मरणात् तथाहि अति दुःखिता सञ्जातदुःखा दुःखिनी सा अनुपपत्तिमतीं मनलङ्कृतमिति श्लेषशब्दश्रवणजन्यभ्रान्तिविषयत्वादनुपपन्नामपीत्यर्थः अवलम्बलवस्य हृदयसङ्गतिमात्रलक्षणस्य प्राणाधारलेशस्यापि छिदामुच्छेदं क्व सहतां कथं सहेदित्यर्थः दुःखोद्विग्नस्य भ्रान्तमभ्रान्तं वानिष्टसंवेदनमतिदुःसहमतो युक्तमस्या मूर्च्छनमिति भावः अर्थान्तरन्यासोऽलङ्कारः॥ ११०॥

अधित कापि मुखे सलिलं सखी
प्यधित कापि सरोजदलैः स्तनौ ।
व्यधित कापि हृदि व्यजनानिलं
न्यधित कापि हिमं सुतनोस्तनौ ॥ १११ ॥
उपचचार चिरं मृदुशीतलै
र्जलजजालमृणालदलादिभिः ।
प्रियसखीनिवहः स तथा क्रमा
दियमवाप यथा लघु चेतनाम् ॥ ११२ ॥
अथ कले ! कलय श्वसिति स्फुटं
चलति पक्ष्म चले ! परिभावय ।

अधितेति । कापि सखी सुतनोर्भैम्या मुखे सलिलं अधित आहितवतीत्यर्थः कापि स्तनौ सरोजदलैः प्यधित पिहितवती वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यपे रकार लोपः । कापि हृदि व्यजनानिलं व्यधित विहितवती तालवृन्तेन वीजयामासेत्यर्थः कापि तनौ शरीरे हिमं चन्दनं चन्दनेऽपि हिमं विदुरिति विश्वः । न्यधित निहितवती ॥ १११ ॥

उपचचारेति । स प्रियसखीनिवहः मृदुशीतलैर्जलजजालमृणालदलादिभिः जलजजालैः पद्मसमूहैः मृणालैर्जलैः आदिशब्दाद्व्यजनादि साधनविशेषैः क्रमाच्चिरं तथोपचचार यथेयं भैमी लघु क्षिप्रं चेतनां संज्ञामवाप ॥ ११२ ॥

अथ भैम्याः कलादयः सप्त सख्यस्तासां तद्दशा परीक्षाव्यग्राणां मिथः कलकलं श्लोकद्वयेनाह । अथेति । अथानन्तरं इति गिरः शुश्रुविर इति सम्बन्धः ता एवाह हे कले ! स्फुटं व्यक्तं श्वसिति प्राणितीति कलयाकलय हे चले ! पक्ष्म नेत्रलोम चलति चक्षुरुन्मिषती

अधरकम्पनमुन्नय मेनके !
किमपि जल्पति कल्पलते ! शृणु ॥ ११३ ॥
रचय चारुमति ! स्तनयोर्वृतिं
गणय केशिनि ! कैश्यमसंयतम् ।
अवगृहाण तरङ्गिणि ! नेत्रयो
र्जलझराविति शुश्रुविरे गिरः ॥ ११४ ॥ युग्मकम् ॥
कलकलः स तदालिजनानना
दुदलसद्विपुलस्त्वरितैरितैः
यमधिगम्य सुतालयमेतवान्
द्रुततरः स विदर्भपुरन्दरः ॥ ११५ ॥

कन्यान्तःपुरबोधनाय यदधीकारान्न दोषा नृपं
द्वौ मन्त्रिप्रवरश्च तुल्यमगदङ्कारश्च तावूचतुः ।

त्यर्थः परिभावय परास्था हे मेनके ! अधरकम्पनमोष्ठचलनमुन्नय तर्कय हे कल्पलते ! किमपि जल्पति शृणु ॥ ११३ ॥

रचयेति । हे चारुमते ! स्तनयोर्वृतिमावरणं रचय हे केशिनि ! असंयतं विस्रस्तं कैश्यं केशसमूहं केशाश्वाभ्यां यङ् चावन्यतरस्यामिति यङ् प्रत्ययः । गणय चिन्तय बधानेत्यर्थः हे तरङ्गिणि ! नेत्रयोर्जलझरावश्रुप्रवाहौ अवगृहाण प्रतिबधान इति गिरः शुश्रुविरे श्रुताः ॥ ११४ ॥

कलकल इति । तदा तस्मिन् सखीजनव्याकुलकाले आलिजनाननात् सखीमुखात्त्वरितैरितैः सम्भ्रमोक्तिभिः विपुलो महान् स कलकलः उदलसदुत्थितः यं कलकलमधिगम्याकर्ण्य स विदर्भपुरन्दरः भूपतिः द्रुततरोऽतित्वरितः सुतालयमेतवान् कन्यान्तःपुरं प्राप्तवान् ॥ ११५ ॥

देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः ॥११६॥
ताभ्यामभूद्युगपदप्यभिधीयमानं
भेदद्वयाकृतिमिथःप्रतिघातमेव ।

कन्येति । कन्यान्तःपुरस्य बोधनाय योगानुक्षेमसन्धानाय यदधीकारयोर्मन्त्रिवैद्ययोरधिकारान्नियोगात् उपसर्गस्य घञ्य बहुलमिति दीर्घः । दोषाः परपुरुषप्रवेशादयो वातादयश्च न सन्तीति शेषः अस्तिर्भवतिः पराप्रयुज्यमानोऽप्यस्तीति वचनात् तौ मन्त्रिप्रवरश्च अगदमपरोगं करोतीत्यगदङ्कारो वैद्यश्च रोगहार्यगदङ्कारो भिषग्वैद्यचिकित्सक इत्यमरः । कर्मण्यण् कारस्येत्यागदस्येति मुमागमः । द्वौ नृपं तुल्यमेकवाक्यमूचतुः देव ! राजन्नाकर्णय सुश्रुतेन सम्यक् श्रुतेन चर एव चरको गूढचारः तस्योक्तेन वाक्येन अन्यत्र सुश्रुतेन चरकस्योक्तेन चरकाचार्यप्रणीतग्रन्थेन अखिलं तापनिदानं जाने अस्यास्तापस्य दलने निवर्त्तने नलं राजानं ददातीति नलदं तद्घटकं विना आतोऽनुपसर्गे कः अन्यत्र नलदमुशीरं विना मूलेऽस्योशीरमस्त्रियां अभयं नलदं सेव्यमित्यमरः । कोऽपि क्षमो न स्यात् अत्र द्वयोरपि नलदयोः प्रकृतत्वात्केवल प्रकृत श्लेषोऽलङ्कारः ॥ ११६ ॥

ताभ्यामिति । ताभ्यां मन्त्रिभिषग्भ्यां भेदद्वयोर्नामाभेदः स एवाकृतिर्यस्य तद्भेदद्वयाकृति अभिन्नाकारमेकरूपं यथा तथा युगपदेकदा अभिधीयमानं नलदादिवाक्यमिति शेषः मिथोऽन्योन्यं प्रतिघातो विरोधो यस्य तन्मिथःप्रतिघातं मिथोभिन्नमेवाभूत् अभिमानयौगपद्यादेकशब्दाच्च भिन्नार्थैकवाक्यवत्प्रतीयमानमपि तद्भिन्नार्थं वाक्यद्वयमेवासीदित्यर्थः राज्ञस्तु न तत्र दृष्टिरित्याह । भैम्यां विषये अनिष्टशतशङ्कितया अनिष्टानेकशङ्कावत्त्वेन आकुलस्य विह्वलचित्तस्य प्रेम पश्यति भयान्यपदेऽपीति न्यायादिति भावः । तस्य नृपतेः भीमस्य श्रोत्रे

श्रोत्रे तु तस्य पपतुर्नृपतेर्न किञ्चित्
भैम्यामनिष्टशतशङ्कितयाकुलस्य ॥ ११७ ॥

द्रुतविगमितविप्रयोगचिह्ना
मपि तनयां नृपतिः पदप्रणम्राम् ।
अकलयदसमाशुगाधिमग्ना
ञ्झटिति पराशयवेदिनो हि विज्ञाः ॥ ११८ ॥

व्यतरदथ पिताशिषं सुतायै
नतशिरसे सहसोन्नमय्य मौलिम् ।
दयितमभिमतं स्वयम्वरे त्वं
गुणमयमाप्नुहि वासरैः कियद्भिः ॥ ११९ ॥

किञ्चिन्न पपतुः न किञ्चिदर्थं जगृहतुः व्याकुलान्तःकरणतया तद्वाक्येनातीव कर्णौ दत्तवानित्यर्थः ॥ ११७ ॥

द्रुतेति । नृपतिः द्रुतविगमितविप्रयोगचिह्नां द्रागपसारितशिशिरोपचारचिह्नामपि पदप्रणम्रां पादपतितां उपसर्गादसमासेऽपि णोपदेशस्येति णत्वं । तनयामसमाशुगाधिमग्नां मदनव्यथामग्नां अकलयन्निश्चिकाय तथाहि विज्ञाः प्रवीणाः प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता इत्यमरः । झटित्यविलम्बेन पराशयवेदिनो हि प्रकाशकलिङ्गमन्तरेण आकारमात्रेण परेङ्गितं निश्चिन्वन्तीत्यर्थः सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ११८ ॥

व्यतरदिति । अथ पिता भीमः नतशिरसे लज्जावनतमुखायै सुतायै दमयन्त्यै मौलिं मुखमुन्नमय्य हे वत्से ! कियद्भिः कतिपयैरेव वासरैः स्वयम्वरे त्वं गुणमयं गुणाढ्यमभिमतं दयितमाप्नुहीत्याशिषं मुहुर्व्यतरत् ॥ ११९ ॥

तदनु स तनुजासखीरवादी
त्तुहिनऋतौ गत एव हीदृशीनाम् ।
कुसुममपि शरायते शरीरे
तदुचितमाचरतोपचारमस्याम् ॥ १२० ॥

कतिपयदिवसैर्वयस्यया वः
स्वयमभिलष्य वरिष्यते वरीयान् ।
कृशिमशमनयानया तदाशु
रुचिरुचिताय भवद्विधाभिधाभिः ॥ १२१ ॥

एवंयद्वदता नृपेण तनया नाप्रच्छि लज्जापदं
यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः ।

तदन्विति । तदनु आशीर्दानान्तरं अनुरक्षण इति कर्मप्रवचनीय संज्ञा । स नृप स्तनुजासखीः सुतावयस्याः अवादीदूचे किं तत्तदाह हि यस्मात् तुहिन ऋतौ शिशिरकाले ऋत्यक इति प्रकृति भावः । ईदृशीनां कोमलाङ्गीनां यौवनप्रविष्टानां शरीरे कुसुममपि शरायते शरवदाचरति तद्दुःसहं भवति एकत्र गात्रमार्दवादन्यत्र मदनबाणत्वाच्चेति भावः तत्तस्मादस्यां कोमलाङ्ग्यां युवत्यां च उचितं योग्यमुपचारं प्रतीकारमाचरत ॥ १२० ॥

कतीति । किञ्च कतिपयदिवसैः अल्पदिनैरेव वो युष्माकं वयस्यया सख्या भैम्या वरीयान् श्रेष्ठः पुमान् स्वयमभिलष्य कामयित्वा वरिष्यते यं कामयते तं वरिष्यतीत्यर्थः तत्तस्मादद्येदानीं अनया दमयन्त्या कर्त्र्या भवतीनां विधेव विधा यासां भवद्विधानां सखीनां सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । अभिधाभिः उक्तिभिः कृशिमशमना कार्श्यनिवर्त्तना तया उपायभूतया रुचिः कान्तिः प्रीतिश्च आशु उचिता आप्तव्या स्वयम्वरपर्यन्तं भवदुपलालनावचनैः मोदं विधाय प्रसन्नया सन्तुष्टया च स्थातव्य मित्यर्थः इत्येतादि [illegible] मुखितात्माद्वचनम् ॥ १२१ ॥

यच्चाशीःकपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वालिजनो मनोऽभ्रिमतनोदानन्दमन्दाक्षयोः ॥ १२२ ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम् ।
तूर्य्यः स्थैर्य्यविचारणप्रकरणभ्रातर्य्ययं तन्महाकाव्ये
चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १२३ ॥

एवमिति । एवं वदता नृपेण तनया दमयन्ती लज्जापदं लज्जाहेतुं नापृच्छि नापृष्टेतियत् ज्ञातांशे प्रश्नायोगादिति भावः पृच्छेर्दुहादित्वाद प्रधाने कर्म्मणि लुङ् । मोहोमूर्च्छा च वपुषः पाण्डुत्वतापादिभिः लिङ्गैः स्मरभूः कामजोऽकल्पि निश्चित इति यत् तत्र तस्यां पुत्र्यां सदृशी अनुरूपा या सान्त्वना लालनोक्तिः स्यात् साचाशीःकपटाद्दयितमाप्नुहीत्याद्याशीर्वादव्याजादवादीति च यत् तत्सर्व्वं मत्वालोच्यालिवर्गः मनः स्वचित्तं आनन्दमन्दाक्षयोः अभ्रिमतनोत् लज्जानन्दभागरीचकारेत्यर्थः स्वेष्टसिद्धेरानन्दः स्वरहस्य प्रकाशनात् लज्जा ॥ १२२ ॥

श्रीहर्षमिति । श्रीहर्षमित्यादि सुगतं तुर्य्यश्चतुर्थश्चतुरश्च यतावाद्यक्षराद्यक्षरलोपश्चेति साधुः । स्थैर्य्यविचारणं नाम स्वप्रणीतं प्रकरणं तद्भ्रातरि तत्समानकर्त्तृक इत्यर्थः ॥

इति पदवाक्यप्रमाण पारावारपारीण श्रीमहोपाध्याय कोलाचलमल्लिनाथ सूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां चतुर्थः सर्गः समाप्तः ॥

पञ्चमः सर्गः ।

यावदागमयतेऽथ नरेन्द्रान्
स स्वयम्बरमहाय महीन्द्रः ।
तावदेव ऋषिरिन्द्रदिदृक्षु
र्नारदस्त्रिदशधाम जगाम ॥ १ ॥
नात्र चित्रमनु तं प्रययौ यत्
पर्व्वतः स खलु तस्य सपक्षः ।
नारदस्तु जगतोगुरुरुच्चै
र्विस्मयाय गगनं विललङ्घे ॥ २ ॥

अथ दमयन्तीस्वयम्बराय इन्द्राद्यागमनं वक्तुं तदुपयोगितया नारदस्येन्द्रलोकगमनमाह । यावदिति । अथ स महीन्द्रः भीमभूपतिः स्वयम्बरमहाय स्वयम्बरोत्सवाय नरेन्द्रान् यावदागमयते आगमनेनानयनेन अविलम्बत इत्यर्थः । आगमेः क्षमायां आत्मनेपदं वक्तव्यं क्षमापेक्षा कालहरणमिति काशिका । तावदेव ऋषिर्नारदः ऋत्यक इति प्रश्नति भावः इन्द्रदिदृक्षुः सन् मधुपिपासुवत् गमिगाम्यादिति पाठात् द्वितीया समासः त्रिदशधाम स्वर्गं प्रति जगाम अत्र सर्गे स्वागतावृत्तं स्वागतेति रनभाद्गुरुयुग्ममिति लक्षणात् ॥ १ ॥

अथ षड्भिस्तद्गमन प्रकारं वर्णयति नेत्यादि । पर्वतो नारदसखः मुनिः शैलस्य पर्वतौ शैलदेवर्षी इति विश्वः। तं नारदं अनु प्रययावितीति-यत् अत्र चित्रमाश्चर्यं न कुतः यः पर्वतः तस्य नारदस्य सपक्षः सखा खलु पक्षवांश्चेति गम्यते उभयथाप्यनुयानं युक्तमेवेति न चित्रमित्यर्थः किन्तु जगतो लोकस्य गुरुराचार्यस्तस्मादलघुश्च स नारदस्तु विस्मयाय गगनमुच्चै

गच्छता पथि विनैव विमानं
व्योम तेन मुनिना विजगाहे ।
साधने हि नियमोऽन्यजनानां
योगिनान्तु तपसाखिलसिद्धिः ॥ ३ ॥
खण्डितेन्द्रभवनाद्यभिमाना
लङ्घतेस्म मुनिरेष विमानान् ।
अर्थितोऽप्यतिथितामनुमेने
नैव तत्पतिभिरङ्घ्रिविनम्रैः ॥ ४ ॥
तस्य तापनभिया तपनः स्वं
तावदेव समकोचयदर्चिः ।

विललङ्घे लङ्घयामास तल्लङ्घनं विस्मयाय भवतीत्यर्थः गुरुद्रव्यस्य उत्पतनानर्हस्य उत्पतनं विरुद्धमिति श्लिष्टोत्थापितो विरोधाभासालङ्कारः ॥ २॥

गच्छतेति । पथि विमानं व्योमयानं विनैव गच्छता तेन मुनिना व्योम विगजाहे प्रविष्टं तथाहि साधने उपाये नियमः अवश्यम्भावः क्रियासिद्धौ नियमेन साधनान्तरापेक्षेत्यर्थः सोऽन्यजनानामस्मदादीनां,योगिनान्तु तपसा योगजधर्मेणैव अखिल सिद्धिर्हि सर्वकार्यसिद्धिः तस्मान्महायोगिनोऽस्य किम्विमानेनेति भावः सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३ ॥

खण्डितेति । खण्डितो निरस्तः इन्द्रभवनादीनामभिमानो दैस्तान् ततोऽपि समृद्धानित्यर्थः विमानान् देवगृहान् लङ्घतेस्म अतिचक्राम किं बहुना अङ्घ्रिविनम्रैः पादपतितैः तत्पतिभिः विमानाध्युषितैः देवैः अर्थितः प्रार्थितोऽपि अतिथितां आतिथ्यं नानुमेने एव तन्मात्रविलम्बञ्च न सहिष्टेत्यर्थः ॥ ४ ॥

तस्येति । तपनोऽर्कस्तस्य मुनेः कर्मणः तापनाद्भिया सन्तापोऽस्य भविष्य

यावदेष दिवसेन शशीव
द्रागतप्यत न तन्महसैव ॥ ५ ॥
पर्य्यभूद्दिनमणिर्द्विजराजं
यत्करैरहह ! तेन तदा तम् ।
पर्य्यभूत् खलु करैर्द्विजराज:
कर्म्म क: स्वकृतमत्र न भुङ्क्ते ॥ ६ ॥
विष्टरं तटकुशालिभिरद्भि:
पाद्यमर्घ्यमथ कच्छरुहाभि: ।

तीति भयात् स्वमात्मीयमर्चिस्तावदेव प्रागेव समकोचयत् सङ्कोचितवान् यावत् एष: तपन: दिवसेन दिवातपतेजसा शशीव तन्महसा मुनितेजसैव द्राक् झटिति स्वयमेव नातप्यत स्वतेजसा मुनितापनभिया आत्मसङ्कोच इति मत्वा मन्द प्रकाशस्थित इत्यर्थ: तथाच सूर्य्यादपि अतितेजिष्ठो मुनिरिति भाव: ॥ ५ ।

पर्यभूदिति । दिनमणि: सूर्य्यो द्विजराजञ्चन्द्रं ब्राह्मणोत्तमञ्च करैरंशुभिर्हस्तैश्च पर्यभूत् परिभूतवानिति यत् तेन परिभवेन हेतुना तदा गमनकाले नारदागमनकाले तन्दिनमणिन्द्विजराज: ब्राह्मणोत्तमश्चन्द्रश्च करै अंशुभि: हस्तैश्च पर्यभूत् अहह अद्भुतं स्वकृतपरिभवदोषात् स्वयमप्यनेन परिभूत इत्यर्थ: तथाहि अत्र जीवलोके क: स्वकृतं कर्म्म नभुङ्क्ते सर्व्वेणापि सर्व्वकर्म्मफलमनुभाव्यमेवेत्यर्थ: अर्थान्तरन्यास: अहहेत्यद्भुते-खेदे इत्यमर: ॥ ६ ॥

विष्टरमिति । अथ स्वर्गसिन्धुर्मन्दाकिनी अतिथये अस्मै नारदाय तटकुशानामालिभि: आवलिभिर्विष्टरमासनं वृक्षासनयोर्विष्टर इति षत्वनिपात: अद्भि: पाद्यं पादार्घ्यं जलं कच्छरुहाभिर्जलप्रायभूम्युत्पन्नाभिर्लताभिरर्घ्यं अर्घ्यार्थं पुष्पफलादि पादार्घ्याभ्याञ्चेति तादर्थ्ये य-

पद्मवृन्दमधुभिर्मधुपर्कं
स्वर्गसिन्धुरदितातिथयेऽस्मै ॥ ७ ॥
स व्यतीत्य वियदन्तरगाधं
नाकनायकनिकेतनमाप ।
सम्प्रतीर्य्य भवसिन्धुमनादिं
ब्रह्म शर्म्मभरचारु यतीव ॥ ८ ॥
अर्च्चनाभिरुचितोच्चतराभि
श्चारु तं सदकृतातिथिमिन्द्रः ।
यावदर्हकरणं किल साधोः
प्रत्यवायधुतये न गुणाय ॥ ९ ॥
नामधेयसमतासखमद्रे
रद्रिभिन्मुनिमथाद्रियत द्राक् ।

त्वत्ययः पद्मवृन्दानां मधुभिर्मकरन्दैर्मधुपर्कञ्च अदित दत्तवती ददाते र्लुङि तङ् ॥ ७ ॥

स इति । मुनिरगाधं वियदन्तः नभोऽभ्यन्तरं व्यतीत्य नाकनायकनिकेतनं यती योगी अनादिं भवसिन्धुं संसारार्णवं सम्प्रतीर्य शर्मभरचारु परमानन्दसुन्दरं ब्रह्म परमात्मानमिव आप प्राप ॥ ८ ॥

अर्च्चनाभिरिति । इन्द्रः अतिथिं तं नारदं उचितादुचितात् उच्चतराभिः अधिकाभिरर्चनाभिः पूजाभिः चारु यथा तथा सदकृत सत्कृतवान् आहृतवानित्यर्थः । आदरानादरयोः सदसदसतीति निपातनात् प्राक्प्रयोगः अधिकाचरणे हेतुमाह यावदर्हं यावद्युक्तं यावदवधारणे इत्यव्ययीभावः यावदर्हस्य करणमिति षष्ठीतत्पुरुषः साधोः सज्जनोः प्रत्यवायधुतये निवृत्तये अकरणे दोषनिवारणाय गुणायोत्कर्षाय न किल ? न खलु ? सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ९ ॥

पर्व्वतोऽपि लभतां कथमर्च्चां
न द्विजः स विबुधप्रभुलम्भी ॥ १० ॥
तद्भुजाददतिवितीर्णसपर्य्यात्
द्योद्रुमानपि विवेद मुनीन्द्रः।
स्वः सहस्थितिसुशिक्षितया ता
न्दानपारमितयैव वदान्यान् ॥ ११ ॥
मुद्रितान्यजनसंकथनः सन्
नारदं बलरिपुः समवादीत्।

अथ नारदसत्कारानन्तरमद्रिभिदिन्द्रो अद्रेः पर्वतस्य नामधेयसाम्येन सखायं तत्सखं मुनिं पर्वताख्यं मुनिं द्राक् द्रुतमाद्रियत सत्कृतवान् स पर्वतः पर्वतारेः स कथं सत्कारं लभेतेत्यत्राह पर्वतोऽपि स द्विजो विबुधप्रभुं देवेन्द्रं पण्डितोत्तमं च लभते प्राप्नोति इति तल्लम्भी विबुधः पण्डिते देव इति विश्वः। सः मुनिः कथमर्चां पूजां न लभतां लभत्वेवेत्यर्थः द्विजोऽभ्यागतो महतः प्रतिपक्षादपि विवेकिनः पूजां लभत इति भावः ॥ १० ॥

तदिति। स मुनीन्द्रो नारद स्तान् प्रसिद्धान् द्योद्रुमान् स्वर्गस्य द्रुमान् कल्पवृक्षानप्यति वितीर्णसपर्यादतिमात्रदत्तपूजात्तस्येन्द्रस्य भुजाद्धस्तादेव गुरोः स्वः स्वर्गे सहस्थित्या सहवासेन सुशिक्षितया स्वभ्यस्तया दानपारमितानां दानकर्त्तव्यताप्रतिपादकग्रन्थविशेषः तयैव कारणेन वदान्यान्विवेद इन्द्रहस्तएव कल्पवृक्षाणामपि दानविद्योपदेष्टृत्वमुत्प्रेक्षितवानित्यर्थः कल्पवृक्षातिशायि अस्यौदार्यमिति भावः ॥ ११ ॥

मुद्रितेति। बलरिपुरिन्द्रो मुद्रितान्यजनसंकथनो निवारितेतरजनालापः सन्नारदं समवादीत् तेन सह संलापमकार्षीदित्यर्थः। किं

आकरः स्वपरभूरिकथानां
प्रायशो हि सुहृदोः सहवासः ॥ १२ ॥

तं कथानुकथनप्रसृतायां
दूरमालपनकौतुकितायाम् ।
भूभृताञ्चिरमनागमहेतुं
ज्ञातुमिच्छुरवदच्छतमन्युः ॥ १३ ॥

प्रागिव प्रसुवते नृपवंशाः
किन्तु ? सम्प्रति न वीरकरीरान् ।
ये परप्रहरणैः परिणामे
विक्षताः क्षितितले निपतन्ति ॥ १४ ॥

सम्वाद्यं तदाह प्रायशः सुहृदोर्मित्रयोः सहवासः सङ्गमः स्वे आत्मानः परे च स्वपरे तेषां या भूरयः कथाः प्रसङ्गास्तासामाकरः खनिर्हि दृष्टालापानामियत्ताभावात् सम्वादसिद्धिरित्यर्थान्तरन्यासाभिप्रायः खनिः स्त्रियामाकरः स्यादित्यमरः ॥ १२ ॥

तमिति । शतमन्युः शतक्रतुः मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः । आलपनकौतुकितायामाभाषणोत्कण्ठायां दूरं कथानुकथनप्रसृतायां उत्तरप्रत्युत्तराभ्यां दूरं गतायां सत्यां प्रसक्तानुप्रसक्तया सङ्गत्येत्यर्थः चिरं चिरात् प्रभृति भूभुजा मनागमहेतुं ज्ञातुमिच्छुः स्वं नारदं अवददपृच्छदित्यर्थः ॥ १३ ॥

प्रागिति । नृपवंशाः नृपकुलानि नृपा एव वंशाः वेणवश्च वंशो वेणौ कुले वर्गे इति विश्वः । प्राक्पूर्वमिव सम्प्रति वीरकरीरान्वीरानेव करीरानङ्कुरान् वंशाङ्कुरे करीरोऽस्त्रीत्यमरः । न प्रसुवते न जनयन्ति किन्तु किं तैरतआह । ये वीरकरीराः परिणामे परिपक्वावस्थायां परेषां अरीणामन्येषां परं दूरान्यमुख्येषु परोऽरिपरमात्मनोरिति वैजयन्ती । प्रहरणैरायुधैर्शलादिभिश्च विक्षताः क्षितितले निपतन्ति ॥ १४ ॥

पार्थिवं हि निजमाजिषु वीरा
दूरमूर्द्ध्वगमनस्य विरोधि ।
गौरवाद्वपुरपास्य भजन्ते
मत्कृतामतिथिगौरवऋद्धिम् ॥ १५ ॥
साभिशापमिव नातिथयस्ते
मां यदद्य भगवन्नुपयन्ति ।
तेन न श्रियमिमां बहु मन्ये
स्वोदरैकभृतिकार्य्यकदर्य्याम् ॥ १६ ॥
पूर्व्वपुण्यविभवव्ययलब्धाः
श्रीभरा विपदएव विमृष्टाः ।

ततः किमत आह पार्थिवमिति । वीराः पूर्वोक्ताः रणपातिनः पार्थिवं पृथिवीविकारं अतएव गौरवात् गुरुत्वगुणयोगित्वादूर्ध्वगमनस्य उत्पतनकर्मणः पार्थिवत्वादूर्ध्वलोकप्राप्तेश्च दूरमत्यन्तविरोधि निजं वपुः आजिष्वपास्य मत्कृत मतिथिगौरवं अतिथिसत्कारः तस्य ऋद्धिं ऋत्यक इति प्रकृति भावः भजन्ते हि तादृग्वीरालाभे स्वस्य अतिथिलाभो न स्यादिति भावः ॥ १५ ॥

ननु तदलाभे तेषामेव सत्कारहानिः तव तु न काचित् क्षतिरित्यत आह । साभिशापमिति । हे भगवन्मुने ! ते वीराः अतिथयः अभिशापेन सह वर्त्तन्त इति साभिशापं मिथ्याभिशस्तमिव अथ मिथ्याभिशंसनं अभिशापः इत्यमरः । मामद्य नोपयान्ति इति यत्तेन हेतुना स्वोदरस्यैकस्यैव भृतिकार्य्येण पोषणकृत्येन कदर्य्यां कृपणां कदर्य्ये कृपणः क्षुद्र इत्यमरः । आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पीड़येत् । लोभाद्यः पितरौ भृत्यान् स कदर्य्य इति स्मृत इति । इमां श्रियं न बहु मन्ये अतिथिसत्कारशून्यस्य श्रीवैफल्यमेव क्षतिरिति भावः ॥ १६ ॥

पात्रपाणिकमलार्पणमेषां
तासु शान्तिकविधिर्विधिदृष्टः ॥ १७ ॥
तद्विसृज्य मम संशयशिल्पि
स्फीतमत्र विषये सहसाघम् ।
श्रूयतां भगवतः श्रुतिसारै
रद्य वाग्भिरघमर्षणऋग्भिः ॥ १८ ॥
इत्युदीर्य मघवा विनयर्द्धिं
वर्द्धयन्नवहितत्वभरेण ।

पूर्वेति । पूर्वपुण्यविभवस्य व्ययेन लब्धाः प्राप्ताः सम्पदो विमृष्टाः विचारिताः विपद एव सद्यः स्वोदयेन पुरातनकृत सुकृतराशिनाशकत्वादिति भावः । तासु विपत्सु आसां सम्पदां पात्राणां पाणिकमले अर्पणं दानमेव विधिदृष्टः शास्त्रदृष्टः शान्तिकर्मानुष्ठानं नष्टसुकृतादप्यत्युत्कृष्ट सुकृतोत्पादनमिति भावः ॥ १७ ॥

तदिति । तत्तस्मादत्र विषये अस्मिन्नर्थे मम संशयशिल्पि तज्जनकं स्फीतं प्रभूतमघमेनः अर्थमूलत्वान्मिथ्याभिज्ञानस्येति भावः । यद्वा संशयः शिल्पी जनको यस्य तदघं दुःखं दुःखहेतुत्वात् संशयस्येति भावः दुःखैनोव्यसनेष्वघमिति वैजयन्ती । सहसा विसृज्य निवृत्य भगवतो वाग्भिः अद्य श्रुतिसारैर्वेदसारैः कर्णामृतैश्च अघमर्षणीभिः ऋग्भिः स्त्रियाः पुंवदित्यादीनां पुंवद्भावः कृत्यक इति प्रकृति भावः । श्रूयतां भावे लोट् राज्ञामनागमनकारणं असन्दिग्धं ब्रूहीत्यर्थः अत्र मुनिवाक्यारोपणस्य अघमर्षणस्य प्रकृताघहरणोपयोगात्परिणामालङ्कारः आरोप्यमाणस्य प्रकृतयोगित्वे परिणाम इति लक्षणात् ॥ १८ ॥

इतीति । मघवा इन्द्रः इत्युदीर्य अवहितत्वभरेण एकाग्रतातिशयेन विनयर्द्धिं विनयातिशयं वर्द्धयन् अनिमेषां चक्षुषां दशशतीं

पश्यतो वहिरिवान्तरपीयं
दृष्टिसृष्टिरधिका तव कापि ॥ २३ ॥
आः स्वभावमधुरैरनुभावै
स्तावकैरतितरां तरलाः स्मः ।
द्यां प्रशाधि गलितावधिकालं
साधु साधु विजयस्व विडौजः ! ॥ २४ ॥
सङ्गरविक्षततनुस्रवदस्र-
क्षालिताखिलनिजाघलघूनाम् ।

जानतः प्रेक्षमाणस्य तव वहिरिव देह इव अन्तरमन्तरात्मन्यपि इयं कापि दृष्टिसृष्टिस्तु दृष्टिर्ज्ञानेऽक्ष्णिदर्शने इत्यमरः । अधिका असाधारणी द्वयानामपि दृष्टीनां श्लिष्टशब्दोपात्तानामभेदाध्यवसायेन वहिरिवेत्युपमा ॥ २३ ॥

आः इति । विड्भेदकं विड भेदने इगुपधलक्षणः कः तदोजो यस्य तस्य सम्बुद्धिः हे विडौजः ! स्वभाव मधुरैर्निसर्गरमणीयैः तवेमे तावकाः तवक ममकावेकवचन इत्यणि तवकादेशः । तैरनुभावैरैश्वर्यैरतितरामत्यन्तं अव्ययभावादाम्प्रत्ययः तरलाः लोलाः आनन्दलहरीमग्नाः स्मः अत्यानन्दाः स्माद्यनुकारः गलितावधिकालमनन्तकालमत्यन्तसंयोगे द्वितीया । द्यां स्वर्गं साधु प्रशाधि परिपालय साधु विजयस्व सर्वोत्कृष्टो भव विपराभ्यां जेरित्यात्मने पदम् ॥ २४ ॥

एवमिन्द्रमभिनन्द्य तत्प्रश्नस्योत्तरमाह । संख्येति । समरे विक्षताभ्यः प्रहताभ्यः तनुभ्यो गात्रेभ्यः स्रवद्भिरस्रैरसृग्भिः क्षालितानि निर्णिक्तान्यखिलान्यघानि येषामत एव लघूनां निर्भराणां राज्ञां यद्यस्मात्कारणात् इह स्वर्गे अनुपगमो नागमस्तत्कारणभूतं जगत्सु ये युवानस्तेषां क्षुद्रं क्षुद्रः करणमसाधारण्यार्थे भेदेनव्यपदेशः तं प्रविज्ञं उदन्तं

यस्त्विहानुपगमः शृणु राज्ञां
तज्जगद्युवसुदन्तमुदन्तम् ॥ २५ ॥
सा भुवः किमपि रत्नमनर्घं
भूषणं जयति तत्र कुमारी ।
भीमभूपतनया दमयन्ती
नाम या मदनशस्त्रममोघम् ॥ २६ ॥
संप्रति प्रतिमुहूर्त्तमपूर्वा
कापि यौवनभरेन भवन्ती ।
आशिखं सुकृतसारभृते सा
क्वापि यूनि भजते किल भावम् ॥ २७ ॥

वृत्तान्तं शृणु वार्ता प्रवृत्तिर्वृत्तान्तमुदन्त इत्यमरः । अत्र चालिताषपदार्थविशेषणगत्या लघुत्वहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २५ ॥

सेति । सा भुवो भूषणं किमप्यनर्घ्यममूल्यं रत्नमसाधारणं स्त्रीरत्नमित्यर्थः । कुमारी कन्या अनूढेत्यर्थः । सा दमयन्ती तत्र भीमनगरे जयति सर्वोत्कर्षेण जागर्ति भीमभूपतनया दमयन्ती नामामोघं मदनास्त्रम् ॥ २६ ॥

अथ । इन्द्रस्य मात्सर्योत्पादनाय तस्याः पुरुषान्तरासक्तिं च वदति । सम्प्रतीति । सा दमयन्ती सम्प्रति यौवनभरेण यौवनस्य जवेन उद्भेदवेगेन प्रतिमुहूर्तं काप्यपूर्वा लावण्यमयावयवपोषणविशेषादन्याभवन्ती आशिखं शिखापर्यन्तमभिविधावव्ययीभावः । सुकृतसारभृते उत्कृष्टपुण्यभरिते ईदृग्भाग्यसम्पन्न इत्यर्थः क्वापि कस्मिन् यूनि भावमनुरागं भजते किलेत्यैतिह्ये ॥ २७ ॥

कथ्यते न कतमः स इति त्वं
मां विवक्षुरसि किं चलदोष्ठः ।
अर्द्धवर्त्मनि रुणत्सि न पृच्छां
निर्गमेण न परिश्रमयैनाम् ॥ २८ ॥

यत्पथावधिरणुः परमः सा
योगिधीरपि न पश्यति यस्मात् ।
बालया निजमनःपरमाणौ
ह्रीदरीशयहरीकृतमेतम् ॥ २९ ॥

सा शरस्य कुसुमस्य शरव्यं
सूचिता विरहवाचिभिरङ्गैः ।

कथ्यतइति । किञ्च चलदोष्ठः त्वं युवा कतम इति मां विवक्षुर्वक्तुमिच्छुरसि किं तर्ह्यर्द्धे वर्त्मनि अर्द्धोक्तौ पृच्छां प्रश्नं भिदादित्वादङ् न रुणत्सि इति काकुः एनां पृच्छां निर्गमेणोच्चारणेन न परिश्रमय मा खेदय न कथ्यते, यतः पृष्टोऽपि न कथयामि न प्रष्टव्य इत्यर्थः ॥२८॥

किं कपटादकथनं नेत्याह । यत्पथेति । परमाणुः यस्या योगिधियः पन्थाः यत्पथः तस्यावधिः सीमा सा योगिधीरपि बालया निजमन एव परमाणुः तद्भावादणुमन इति स्मरणात् तस्मिन् ह्रीरेव दरी गुहा तच्छयहरीकृतं सिंहीकृतमेनं युवानं यस्मान्न पश्यति तस्मान्न कथ्यत इति पूर्वेणान्वयः योगिबुद्धेरपि परमाणुस्वरूपग्राहित्वमेव नान्तःप्रवेशशक्तिरित्यज्ञानादकथनं न कपटादिति सा तु मन्दाक्षमन्थरतया न कस्यापि कथयतीत्यर्थः ॥ २९ ॥

तर्हि कामुकत्वमात्रं वा कथमस्याः प्रतीतमत आह सेति । सा भैमी विरहवाचिभिः विरहव्यञ्जकैः अङ्गैः कार्श्यपाण्डिमादि प-

तातचित्तमपि धातुरधत्त
स्वस्वयम्वरमहाय सहायम् ॥ २० ॥
मन्मथाय यददादित राज्ञां
हूतिदूत्यविषये विधिराज्ञाम् ।
तेन तत्परवशाः पृथिवीशाः
सङ्गरं गरमिवाकलयन्ते ॥ २१ ॥
येषु येषु सरसा दमयन्ती
भूषणेषु यदिवापि गुणेषु ।

रिक्लिष्टैरिति भावः । कुसुमस्य शरस्य कामवाणस्य शरव्यं लक्ष्यं सूचिता कुत्रचिद्यूनि बद्धभावेत्येतावन्मात्र मवगतमित्यर्थः तर्हि तत्पित्रा वरविशेषज्ञानं विना विवाहोपायः कश्चिन्नित तत्राह । तातस्य चित्तमपि कर्म स्वस्वयम्वर महाय धातुः सहायमधत्त अकरोत् सहकारी चकारेति यत् । तत्पित्रा विधातुः प्रेरणया स्वयम्वरोपाय श्चिन्तितः इत्यर्थः ॥ २० ॥

अस्तु राज्ञामनागमे किं कारणं तत्राह मन्मथायेति । अथ विधिर्विधाता राज्ञां हूतिः स्वयम्वराह्वतं तदेव दूत्यं दूतकर्म दूतस्य भावः कर्मणीति यत्प्रत्ययः । तस्य विषये करणाय आज्ञामादेशं मन्मथाय अदित दत्तवानिति यत् तेन आज्ञादानेन तत्परवशाः मन्मथपरतन्त्राः शिवभागवत्वमाप्ताः । पृथिवीशाः सङ्गरं गरमिव आकलयन्ते । विषमिव मन्यन्ते विषं स्याद्गरलङ्गर इति हलायुधः ॥ २१ ॥

येष्विति । किन्तु दमयन्ती भूषणेषु हारादिषु अथ यदि गुणेषु वा दयादाक्षिण्यादिषु येषु येषु सरसा साभिलाषा तत्र तत्र तेषु तेषु गुणभूषणेषु च कलया मात्रयापि यो विशेषः क्षितिभृतां सहि स एव हि

तत्र तत्र कलयापि विशेषो
यः स हि क्षितिभृतां पुरुषार्थः ॥ ३२ ॥
शैशवव्ययदिनावधि तस्या
यौवनोदयिनि राजसमाजे ।
आदरादहरहः कुसुमेषो
रुल्ललास मृगयाभिनिवेशः ॥ ३३ ॥
इत्यमी वसुमतीं कमितारः
सादरास्तदतिथीभवितुं न ।

हेतावदवधारणे इत्यमरः । पुरुषार्थः प्रयोजनं यया कथञ्चिद्भैमी मनोरञ्जनमेव पुरुषार्थो न तु क्षत्रधर्मः सङ्गर इति भावः ॥ ३२ ॥

शैशवेति । कुसुमेषोः कामस्य यौवनोदयिनि यौवनप्रादुर्भाववति राजसमूहे विषये तस्याः भैम्याः शैशवव्ययदिनं बाल्यापगमतिथिरवधिः सीमा यस्मिन् तत्तथा तद्दिनमारभ्येत्यर्थः अहरहः प्रत्यहं वीप्सायां द्विर्भावः । अत्यन्तसंयोगे द्वितीया आदरात् मृगयाया मभिनिवेशः आग्रहः उल्ललास ववृधे सर्वेषामपि राजयूनां भैमी यौवनोद्भेदात्प्रभृति स्मरव्यसनमेव वर्त्तते न समरव्यसनमित्यर्थः ॥ ३३ ॥

इतीति । इतीत्थं अमी नृपाः वसुमत्यां कमितारः कामयितारः सन्तः तृच् वसुमतीं वा कमितारः ताच्छील्ये तृन् न लोकेत्यादिना षष्ठी निषेधः आर्धधातुके चेति विकल्पात् उभयत्रापि णिजभावः । तदतिथीभवितुं सादराः साकाङ्क्षा न तथाहि नृपतीनां भीमभूर्भैमी सुरभूर्द्यौस्तयोरभिलाषे तद्विषयानुरागे दूरमन्तरं महत्तारतम्यं अहो स्वर्गोऽप्यरुचिरित्याश्चर्यं एतेन सुराङ्गनातिशयं सौन्दर्यं दमयन्त्या व्यज्यते भीमदेश सुरदेशयोः महान् विप्रकर्ष इत्यर्थान्तरप्रतीतिः । अतोत्तरवाक्यार्थेन स्वर्गारुच्या पूर्ववाक्यार्थस्यातिथ्यनादरस्य समर्थनाद्वाक्यार्थ-

भीमभूसुरभुवोरभिलाषे
दूरमन्तरमहो नृपतीनाम् ॥ २४ ॥
तेन जाग्रदधृतिर्दिवमागां
सङ्गरसौख्यमनुसर्त्तुमनु त्वाम् ।
यन्मृधं क्षितिभुजां न विलोके
तन्निमग्नमनसां भुवि लोके ॥ २५ ॥
वेद यद्यपि न कोऽपि भवन्तं
हन्त हन्तकरणं विरुणद्धि ।
पृच्छ्यसे तदपि येन विवेक-
प्रोञ्छनाय विषये रससेकः ॥ २६ ॥

हेतुकं काव्यलिङ्गम् ॥ २४ ॥

एवं राज्ञां स्वर्गानागमे हेतुमुक्त्वा अथ स्वस्यागमनहेतुमाह तेनेति । यद्यस्माद्भुवि लोके भूलोके तस्यां दमयन्त्यां निमग्नमनसां आसक्तचेतसां क्षितिभृतां मृधं युद्धं न विलोके न पश्यामि तेन युद्धालाभेन जाग्रदधृतिः सन् मूर्छदसन्तोषः सन् संख्यसौख्यं युद्धसुखं मृधमास्कन्दनं संख्यमित्यमरः । अनुसर्तुमनुभवितुं त्वामनु त्वामुद्दिश्य दिवं स्वर्गमागाम् ॥ २५ ॥

वेदेति । हन्तृत्वकरणं समूलघातं हन्तारं भवन्तं कोऽपि न विरुणद्धि न विगृह्णाति हन्तेति हर्षे वेद यद्यपि एतावद्वेत्त्येव विदो लटो वेति विदो णलादेशः । यद्यपीत्यवधारणे तदपि तथापि पृच्छ्यसे अज्ञः पृच्छति न विद्वान् अतआह येन कारणेन विषयभोग्ये रससेको रागानुबन्धो जलसेकश्च विवेकज्ञानस्य चित्ताद्यङ्कुरस्य च प्रोञ्छनाय प्रमार्जनाय विषयतृष्णालुत्वविवेकः पृच्छामीत्यर्थः ॥ २६ ॥

एवमुक्तवति देवऋषीन्द्रे
द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां
कोऽपि मञ्जुलतमः क्रमवादः ॥ ३७ ॥
कानुजे मम निजे दनुजारौ
जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं
शर्म्मणा स्वपिमि वीतविशङ्कः ॥ ३८ ॥

एवमिति । देवऋषीन्द्रे नारदऋषौ इत्युक्त इति प्रश्नति भावः। एवमुक्तवती सती मघोनः आनने मुद्रा मौनं मघवा वक्तुमिति विकल्पादादेशा भावः द्राक् झटित्यभेदि स्वयमेव भिद्यते स्म कर्मवत्कर्मणा तुल्यक्रिय इति कर्तुः कर्मवद्भावात् कर्म कर्तरि लुङि तङादि कार्यं यगात्मनेपद-चिह्ना भावः प्रतीतमिति वचनात्क्रियमाणन्तु यत्कर्म स्वयमेव प्रसिध्यति। सुकरैः स्वगुणैर्यस्मात्कर्मकर्त्तेति तं विदुरिति । तथाहि विभूनां कोऽपि मञ्जुलतमो अतिहृद्यः क्रमवादः प्रश्नोत्तरक्रमोक्तिः उत्तरोत्तर शुभः उपर्युपरि शुभगो हि अर्थान्तरन्यासः ॥ ३७ ॥

केति । निजे स्वीये अनुजे दनुजारौ उपेन्द्रे स्वशरणे स्वरक्षके स्वगृहे वा शरणं गृहरक्षित्रोरित्यमरः जाग्रति जागरूके सति मम रणचर्चा रणचिन्ता का न कापीत्यर्थः । जयोऽङ्कं चिह्नं यस्य तं यद्भुजाङ्कं यस्यानुजस्य भुज उपधाय उपधानीकृत्य वीत विशङ्कः निरातङ्कः सन् शर्म्मणा सुखेन स्वपिमि शये यथा रक्षिजने जाग्रति राजा शय्यागारे सुखेन भुज उपधाय शेते तद्वदिति भावः इह निरातङ्कोक्तिः अस्वप्नत्वादमराणाम् ॥ ३८ ॥

विश्वरूपकलनादुपपन्नं
तस्य जैमिनिमुनित्वमुदीये ।
विग्रहं मखभुजामसहिष्णु
र्व्यर्थतां मदशनिं स निनाय ॥ ३९ ॥

ईदृशानि मुनये विनयाब्धि
स्तस्थिवान् स वचनान्युपहृत्य ।
प्रांशुनिश्वसितपृष्ठचरी वाक्
नारदस्य निरियाय निरोजाः ॥ ४० ॥

स्वारसातलभवाहवशङ्की
निर्जगामि न वसन् वसुमत्याम् ।

विश्वेति । तस्योपेन्द्रस्य विश्वरूपकलनात् सर्वार्थसाक्षात्करणादेकत्र मत्स्यकूर्माद्यनन्ततावधारणात् अन्यत्र विश्वार्थरूपणाद्विश्वरूपाणि सूत्राणि तत्प्रणयनाद्धेतोर्जैमिनिमुनित्वमुदीये उत्पन्नं इण् गतौ कर्तरि लिट् । उपपन्नं तत्तु युक्तमित्यर्थः । कुतः स उपेन्द्रः मखभुजां विग्रहं विरोधं अन्यत्र शरीरमसहिष्णुर्मदशनिं मम वज्रायुधं अन्यत्र वज्रहस्तः पुरन्दर इत्यादिवाक्यजातं व्यर्थतां स्वायुधेनैव तत्कार्यकारणात् निष्प्रयोजनत्वमन्यत्र विग्रहवद्देवतानिरसनार्थवादत्वान्निरभिधेयत्वञ्च निनाय अतो जैमिनिमुनित्वं युक्तमित्यर्थः । प्रकृताप्रकृतश्लेषः ॥ ३९ ॥

ईदृशानीति । विनयाब्धिः स इन्द्रो मुनये ईदृशानि युद्धनिराशानि वचनान्युपहृत्य समर्प्य तस्थिवान् तूष्णींस्थितः । अथ नारदस्य प्रांशुनिश्वसितस्य पृष्ठे चरतीति पृष्ठचरी पश्चाद्गामिनी दीर्घनिश्वासपूर्विकेत्यर्थः; चरेष्टः; निरोजा दीना वाक् निरियाय निर्जगाम ॥ ४० ॥

स्वरिति । वसुमत्यां भूलोके वसन् स्वश्च रसातलञ्च स्वारसातले

द्याङ्गतस्य हृदि मे दुरुदर्कः
क्ष्मातलद्वयभटाजिवितर्कः ॥ ४१ ॥
वीक्षितस्त्वमसि मामथ गन्तुं
तन्मनुष्यजगतेऽनुमनुष्व ।
किं भुवः परिवृढा न विवोढुं
तत्र तामुपनता विवदन्ते ॥ ४२ ॥
इत्युदीर्य्य स ययौ मुनिरुर्व्वीं
स्वर्पतिं प्रतिनिवर्त्य बलेन ।

स्वर्गपाताले दोरिति रेफलोपे दीर्घः तयोर्भवमाहवमाशङ्कत इति तच्छङ्की सन्न निर्वृणोमि न सन्तुष्यामि द्यां स्वर्गं गतस्य मे हृदि क्ष्मातले भूपाताले अधः स्वरूपयोरस्त्रीतलमित्यमरः । तयोर्द्वयोर्भटाना माजिवितर्को युद्धशङ्का दुरुदर्कः दुरन्तः उदर्कः फलमुत्तरमित्यमरः । एवं पातालगतस्य तस्येतरलोकाजिवितर्क इति शेषः ॥ ४१ ॥

वीक्षित इति । त्वं वीक्षितोऽसि एतदेवागमनफलमित्यर्थः । तत् तस्मात् अथातो मां मनुष्यजगते भूलोकाय गन्तुं अनुमनुष्व अनुजानीहि अनुज्ञार्थे लोट् इतो मर्त्यलोकगमने युद्धदर्शनं भविष्यत्याशयः तत्रैव किं प्रमाणमित्याशङ्क्याह । तत्र भूलोके विदर्भदेशे वा तां दमयन्तीं विवोढुं परिणेतुं उपनता भुवः परिवृढा भूमीश्वरा राजान इत्यर्थः । परिवृढोऽधिप इत्यनेनास्य निष्ठा प्रत्ययान्तस्य साधुत्वम् । किं न विवदन्ते कलहायन्ते अपि तु सर्व्व-एवविवादं कुर्व्वन्तीत्यर्थः । वदेरकर्म्मकत्वादात्मने पदम् । भैमीं परिणेतुमागतानां राज्ञां तत् सौन्दर्य्यमुग्धाना महमेवास्यानुरूप इत्यादि विवादो युक्त इति ॥ ४२ ॥

इतीति । स मुनि रित्युदीर्य्य स्वर्पति मिन्द्रं अहरादीनां पत्यादिषु । वैकल्पिको रेफादेशः प्रतिनिवृत्य जवेन उर्व्वीं ययौ स इन्द्रो वारितोऽपि निवारितोऽपि यान्तं गच्छन्तं लटः शतादेशः तं

वारितोऽप्यनुजगाम स यान्तं
तं कियन्त्यपि पदान्यपराणि ॥ ४३ ॥

पर्व्वतेन परिपीय गभीरं
नारदीयमुदितं प्रतिनेदे ।
स्वस्य कश्चिदपि पर्व्वतपक्ष-
च्छेदिनि स्वयमदर्शि न पक्षः ॥ ४४ ॥

पाणये बलरिपोरथ भैमी-
शीतकोमलकरग्रहमर्हम् ।

मुनिमपराण्यपि कियन्ति कतिचित् पदानि कतिपयपदन्यासामित्यर्थः अत्यन्तसंयोगे द्वितीया अनुजगाम ॥ ४३ ॥

पर्व्वतेनेति । पर्व्वतेन मुनिना गिरिणा च गभीरं गम्भीरं नारदीयमुदितं नारदवाक्यं परिपीय प्रतिनेदे प्रतिदध्वने तदेवानुकृतमित्यर्थः । पर्व्वते सन्निकृष्टे प्रतिनादो युक्त इति भावः नदेर्लिट् । अतएव अदेन्मध्ये नादेशादेर्लिटित्वाभ्यासलोपौ स्वयं तु न किञ्चिन्निवेदितवानित्याह पर्व्वतपक्षच्छेदिनि इन्द्रे स्वपक्षः साध्यः प्रयोजनं गरुच्च पक्षः- पार्श्वगरुत्साध्य सहाय बलभित्तिष्विति वैजयन्ती । स्वयन्नादर्शि न दर्शितः तत्साहचर्यमात्रलोभादागतस्य स्वस्य पृथक् साध्याभावात्तदुक्तमेवानुकृतं न तु पृथक्किञ्चिन्निवेदितमित्यर्थः पर्व्वतपक्षच्छेदित्वादिन्द्रस्याग्रे पर्व्वतेन स्वपक्षो न प्रकाशित इति ध्वनिः ॥ ४४ ॥

इन्द्रस्तु भैम्यामनुरक्तोऽभूदित्याह पाणय इति । अथ नारदनिर्गमनानन्तरं रतीशःकामः बलरिपोरिन्द्रस्य पाणये चिररचितानां चिराभ्यस्तानामशनिवासेन वज्रसम्पर्केण या व्यापदो विदाहास्तासां भैमीशीतकोमलकरस्य ग्रहः संग्रहणमेवार्हं योग्यं भेषजं औषधं उपदिदेश चिराभिभवेन शृङ्गारप्रवृत्त इति भावः । अत्र कामनिबन्धनस्य भैमीपाणिग्र-

भेषजं चिरचिताशनिवास-
व्यापदामुपदिदेश रतीशः ॥ ४५ ॥
नाकलोकभिषजोः सुषमा या
पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ त-
द्वारसंक्रमितवैद्यकविद्यः ॥ ४६ ॥
मानुषीमनुसरत्यथ पत्यौ
खर्व्वभावमवलम्ब्य मघोनी ।
खण्डितं निजमसूचयदुच्चै-
र्मानमाननसरोरुहनत्या ॥ ४७ ॥

हृणस्याशनितापशमनोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ४५ ॥

ननु कामस्य कुतो वैद्यत्वमित्याह नाकेति । नाकलोकभिषजोः अश्विन्योर्या सुषमा सौन्दर्यं सैव पुष्पचापमपि चुम्बति स्पृशति तस्मादपि तावदेव सुषमेति भावः । असौ कामः सुषमैव द्वारन्तेन सङ्क्रमितवैद्यकं वैद्यस्य कर्म भैषज्यं तदेव विद्या यस्मिन् सः अतएव तादृक् स्ववैद्यसदृशः सन् अभिषज्यत् चिकित्सितवान् भिषज्यतेः कण्ड्वादियगन्ताल्लङ् वैद्यत्वमेवात्रायां वाक्यार्थः कर्म ॥ ४६ ॥

अथेन्द्राण्या ईर्ष्यानुभावमाह मानुषीमिति । अथेन्द्रस्य भैमीरागानन्तरं मघोनः स्त्री मघोनी पुंयोगादाख्यायामिति ङीप् श्वयुवमघोनामतद्धित इति सम्प्रसारणगुणः । पत्यौ प्रिये खर्व्वभावं नीचत्वं अवलम्ब्य मानुषीं मानुषस्त्रियं जातेरस्त्रीत्यादिना ङीष् अनुसरत्यनुवर्त्तमाने सति आननसरोरुहनत्या शिरोनमनेनोच्चैरुन्नतं निजं मानं सर्वोत्तरत्वाहङ्कारं खण्डितं भग्नमसूचयत् आकारेणैव निर्वेदमवेदयत् नतु वाचा किञ्चिदूचे गम्भीरनायिकात्वादिति भावः ॥ ४७ ॥

यो मघोनि दिवमुच्चरमाणे
रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलमस्याः
शान्तमन्तरमभाषत भङ्ग्या ॥ ४८ ॥
जीवितेन क्षतमप्सरसान्तत्
प्राणमुक्तिरिह युक्तिमती नः ।
इत्यनक्षरमवाचि घृताच्या
दीर्घनिश्वसितनिर्गमणेन ॥ ४९ ॥
साधु नः पतनमेवमितः स्या
दित्यभण्यत तिलोत्तमयापि ।

अथान्यासामपि कासाञ्चिदप्सरसामीर्ष्यानुभावमाह । य इत्यादि । मघोनीन्द्रे श्वयुवेत्यादिना सम्प्रसारणे गुणः । दिवमाकाशमुच्चरमाणे उत्पतति सति उदश्चरः सकर्मकादित्यात्मनेपदं । रम्भया यो मलिनिमा मालिन्यं मलमत्यन्तमलम्भि अलाभि भाषाचिण्णमुलोरिति नुमागमः । स वर्णो मलिनिमा अस्या रम्भायाः अन्तरमन्तरङ्गमुज्ज्वलं रोषादत्युज्ज्वलं सत् भङ्ग्या भीत्या भवितव्यताप्राबल्यधियेत्यर्थः शान्तं शमितं निर्वापितमित्यर्थः वादान्तेत्यादिना निपातः । अभाषत खलु निर्वाणालातमलिनमित्याख्यदित्यर्थः अन्तःकरण वैवर्ण्यमूलत्वात् बाह्यवैवर्ण्यस्येति भावः ॥ ४८ ॥

जीवितेति । अप्सरसां नोऽस्माकं जीवितेन क्षतं कष्टत्वादिति भावः तत्तस्मादिहास्मिन् समये प्राणमुक्तिः प्राणत्याग एव युक्तिमती युक्तेति घृताच्या नाम देव्या दीर्घनिश्वसितस्य निर्गमनेन निष्क्रमणमुखेन अनक्षरमशब्दप्रयोगं यथा स्यात्तथा अवाचि वचो ब्रूञो वा कर्मणि लुङ् उक्तमिवेत्यर्थः अतएव व्यञ्जकाप्रयोगाद्गम्या ॥ ४९ ॥

साध्विति । तिलोत्तमयापि देव्या तस्य चामरस्य विलोकनेन स्या-

चामरस्य पतनेन कराब्जा
त्तद्विलोलनचलद्भुजनालात् ॥ ५० ॥
मेनका मनसि तापमुदीतं
यत्पिधित्सुरकरोदवहित्थाम् ।
तत् स्फुटं निजहृदः पुटपाके
पङ्कलिप्तिमसृजद्बहिरुत्थाम् ॥ ५१ ॥
उर्वशी गुणवशीकृतविश्वा
तत्क्षणस्तिमितभावनिभेन ।

न्दोलनेन चलं स्खलमानो भुजो बाहुरेव नालो यस्य तत्तस्माद्वलयते रात्मनेपदं नित्यं ज्ञापकादित्याह वामनः । कराब्जात् पाणिपद्मात् चामरस्य पतनेन अवयवपारवश्यादिति भावः । एवं चामरवदेव नोऽस्माकमपि इतः स्वर्गात्पतनमेव वरं साधु स्यादित्यमन्यत भणितमिवेत्युत्प्रेक्षा भुजनालात्कराब्जादिति सावयवरूपकेण संसृष्टिः ॥ ५० ॥

मेनकेति । मेनका नाम काचिद्देवी मनस्युदीतं उत्पन्नं तापमाधिं पिधित्सुः पिधातुमिच्छुः सती अवहित्थां आकारगुप्तिमकरोदिति यत् तदाकार गोपनमेव निजहृदः स्वमनसः पुटपाके गूढ़पाके बहिरुत्थां उत्थितां बाह्यामित्यर्थः आतश्चोपसर्ग इति कर्तरि कप्रत्ययः। पङ्कलिप्तिं कर्दमलेपं स्त्रियाङ्क्तिन् स्फुटमसृजत् पुटपाके बाह्यपङ्कलेपोऽन्तः पच्यमानद्रव्यस्यैवाकारगोपनमेव बलात् क्रियमाणं गोप्यस्यान्तस्तापस्य व्यञ्जकोऽभूदित्यर्थः ॥ ५१ ॥

उर्वशीति । गुणवशीकृतविश्वा गुणैः सौन्दर्यादिभिः वशीकृतविश्वा रञ्जिताखिलप्रपञ्चा उर्वशी नाम देवी तत्क्षणे तस्मिन् समये स्तिमितभावः स्तैमित्यं निश्चलाङ्गत्वलक्षणः स्तम्भननामसात्त्विकस्तस्य निभेन मिषेण मिषन्निभञ्च निर्दिष्टमिति हलायुधः । वपुष्येव हृद्दयस्यो

शक्रसौहृदसमापनसीम-
स्तम्भकार्य्यमपुषद्वपुषैव ॥ ५२ ॥
कापि कामपि बभाण बुभुत्सुं
शृण्वति त्रिदशभर्त्तरि किञ्चित् ।
एष कश्यपसुतामभिगन्ता
पश्य कश्यपसुतः शतयज्ञः ॥ ५३ ॥
आलिमात्मसुभगत्वसगर्व्वा
कापि शृण्वति मघोनि बभाषे ।

भावः सौहृदं प्रेम सुहृदयशब्दाद्युवादित्वादण्प्रत्यये हृद्भावान्नोभयपदवृद्धिः। अतएव सौहृदो हृदयशब्दादणि हृद्भावादिति वामनः। शक्रसौहृदस्य समापनसीम्नि समाप्तिस्थाने स्तम्भकार्यं जाड्यकृत्यञ्चापुषत् स्तम्भः स्थूणजड़त्वयोरिति विश्वः। स्तम्भोत्थानावधिकमेव शक्रसौहृदमिति निर्णयमकरोदित्यर्थः पुषादित्यादिना च्ले रङादेशः ॥ ५२ ॥

कासाञ्चिदधीराणां वागारम्भानाह कापीत्यादि। कापि देवी बुभुत्सु इन्द्राभिलषितन्देशं जिज्ञासमानां कामपि देवीं त्रिदशभर्तरि इन्द्रे शृण्वत्येव तच्छ्रवणार्थमेवेति भावः किञ्चिद्बभाण किं तदाह। कश्यपसुतः शतयज्ञो बहुयाजी एष इन्द्रः कश्यपसुतां काश्यपीं क्षितिमभिगन्ता अभिगमिष्यति गमेर्लुट्। पश्य दिवं विहाय भुवं गच्छतीत्याश्चर्यं पश्येत्यर्थः स्वयं कश्यपसुतः तत्सुतां भगिनीमेव गच्छतीत्याश्चर्यमिति व्यज्यते ॥ ५३ ॥

आलिमिति। आत्मनः सुभगत्वेन सगर्वा सुभगमानिनीत्यर्थः कापि मघोनि शृण्वति सत्येव आलिं सखीं बभाषे तदेवाह नृणां मनुष्याणां वीक्षणे किमुत सङ्गतावित्यर्थः। सघृणासि सजुगुप्सासि सा त्वमपि सार्थगुणेन सङ्घधर्मेण गतानुगतिकत्वरूपेण अविवेकेनेति यावत् न या

वीक्षणेऽपि सघृणासि नृणां किं
यासि न त्वमपि सार्थगुणेन ॥ ५४ ॥
अन्वयुर्द्युतिपयःपितृनाथा
स्तं मुदाथ हरिताङ्कमितारः ।
वर्त्म कर्षतु पुरः परमेक
स्तद्गतानुगतिको न महार्घः ॥ ५५ ॥
प्रेषिताः पृथगथो दमयन्त्यै
चित्तचौर्यचतुरा निजदूत्यः ।
तद्गुरुं प्रति च तैरुपहाराः
सङ्ख्यसौख्यकपटेन निगूढाः ॥ ५६ ॥
चित्रमत्र विबुधैरपि यत्तैः
स्वर्विहाय बत भूरनुसस्ने ।

सि किं ? यास्येव विवेकेनेति चेन्न यासीत्यर्थः ॥ ५४ ॥

अन्वयुरिति । अथेन्द्रयानानन्तरं हरितां कमितारो दिशां कामयितारः इन्द्रानुयानार्हा इत्यर्थः व्याख्यातमेतत् द्युतिपयःपितृनाथाः वह्नि वरुणयमाः तमिन्द्रं मुदा औत्सुक्येन अन्वयुः अनुयाताः लङ् शाकटायनस्येति सेर्जुसादेशः । तथाहि पुरो अग्रतः एकः परं वर्त्म कर्षतु मार्गं करोतु तस्य मार्गकर्तुः गतमनुगतिर्यस्य स महार्घः महामूल्यो दुर्लभ इति यावत् न भवति एष एव दुर्लभः । तत्पृष्ठानुधाविनस्तु सर्वत्र सुलभा इवेति न किञ्चिदत्र चित्रमित्यर्थः ॥ ५५ ॥

प्रेषिता इति । अथोऽनन्तरं तैरिन्द्रादिभिर्दमयन्त्यै चित्तचौर्ये चित्ताकर्षणे चतुराः निजदूत्यः पृथक् प्रेषिताः तद्गुरुं तत्पितरं भीमञ्च प्रति संख्यसौख्यकपटेन मैत्रीसुखव्याजेन निगूढाः गुप्ताः उपहाराः उपायनानि प्रेषिताः ॥ ५६ ॥

द्यौर्नकाचिदथवास्ति निरूढा
सैव सा चलति यत्र हि चित्तम् ॥ ५७
शीघ्रलङ्घितपथैरथ वाहै
र्लम्भिता भुवममी सुरसाराः ।
वक्रितोन्नमितकन्धरबन्धाः
शुश्रुवुर्ध्वनितमध्वनि दूरम् ॥ ५८ ॥
किं घनस्य जलधेरथवैवं
नव संशयितुमप्यलभन्त ।
स्यन्दनं परमदूरमपश्य
न्निस्वनश्रुतिसहोपगतं ते ॥ ५९ ॥

चित्रमिति । विबुधैर्देवैर्विद्वद्भिश्चापि तैरिन्द्रादिभिः स्वःस्वर्गं विहाय बत हन्त भूरनुसस्रे अनुसृतेति यत् अत्र चित्रं ? काकुः न चित्रमित्यर्थः । कुतः अथवा द्यौश्च स्वर्गश्च काचिदपि निरूढ़ा प्रसिद्धा नास्ति किन्तु यत्र चित्तं चलति रमते सैव सा द्यौर्हि ॥५७॥

शीघ्रेति । शीघ्रलङ्घितपथैरतिक्रान्ताध्वभिः रथवाहैः रथाश्वैर्भुवं लम्भिताः अमी सुरसाराः सुरश्रेष्ठाः इन्द्रादयः वक्रिता वलिता उन्नमिताश्च कन्धराः ग्रीवाः यस्मिन् सः बन्धः कायसंस्थानविशेषो येषां ते सन्तः अध्वनि दूरं ध्वनितं शुश्रुवुः ॥ ५८ ॥

किमिति । देवाः एतत् किं घनस्य ध्वनितं अथवा जलधेर्वेति संशयितुमपि नालभन्तेव एतावन्मात्रविलम्बोऽपि नास्तीत्यर्थः शकपदेत्यादिना तुमुन्प्रत्ययः । किन्तु निस्वनस्य पूर्वोक्तध्वनितस्य श्रुतया श्रवणेन सहोपनतं प्राप्तमदूरं आसन्नं स्यन्दनं परं रथमेवापश्यन्निति रथवेगोक्तिः अत्र सहोक्त्या संसृष्टिः स्पष्टा ॥ ५९ ॥

सूतविभ्रमदकौतुकिभावं
भावबोधचतुरं तुरगाणाम् ।
तत्र नेत्रजनुषः फलमेते
नैषधं बुबुधिरे विबुधेन्द्राः ॥ ६० ॥
वीक्ष्य तस्य वरुणस्तरुणत्वं
यत् बभार निविडं जडभूयम् ।
नौचिती जलपतेः किमु सास्य
प्राज्यविस्मयरसस्तिमितस्य ॥ ६१ ॥
रूपमस्य विनिरूप्य तथाति
ग्लानिमाप रविवंशवतंसः ।

सूतेति । एते विबुधेन्द्राः तत्र रथे सूतस्य सारथेः विभ्रमदो विश्रान्तिप्रदः कौतुकिभावो विनोदित्वं यस्य तं विनोदार्थं स्वयं प्रतिपन्नसारथ्यमित्यर्थः अत्र हेतुः तुरङ्गाणां भावबोधचतुरं अश्वहृदयवेदिनं नेत्रजनुषो नेत्रसत्तायाः फलं लोचनासेचनकमित्यर्थः नैषधं निषधानां राजानं नलं जनपदशब्दात् क्षत्रियादञ् बुबुधिरे ज्ञातवन्तः ॥ ६० ॥

वीक्ष्येति । वरुणस्तस्य नलस्य तरुणत्वं तारुण्यभूषितरूपमित्यर्थः वीक्ष्य यत् निविड़ं जड़भूयं जड़त्वं स्तम्भाख्यं सात्त्विकमित्यर्थः भुवो भावे यक् बभार । प्राज्येन प्रभूतेन विस्मयरसेन अद्भुतरसेन नलेन च स्तिमितस्य निश्चलस्य जलपतेः जडपतेश्च डलयोरभेदः । तस्य वरुणस्य सा जडभूयं विधेयप्राधान्यात् स्त्रीलिङ्गता औचिती उचितकर्म न किमु ? भवत्येवेत्यर्थः विस्मयरसाविष्टस्य स्तम्भसम्भवादिति भावः जलधिनाथस्य स्वयं जड़भावस्य जाड्यमुचितमिति व्यज्यते ॥ ६१ ॥

रूपमिति । रविवंशवतंसो यमोऽस्य नलस्य रूपं सौन्दर्यं विनिरूप्य

कीर्त्यते यदधुनापि स देवः
काल एव सकलेन जनेन ॥ ६२ ॥
यत् बभार दहनः खलु तापं
रूपधेयभरमस्य विमृश्य ।
तत्र भूदनलता जनिकर्त्री
सा तदप्यनलतैव तु हेतुः ॥ ६३ ॥
कामनीयकमधःकृतकामं
काममक्षिभिरवेक्ष्य तदीयम् ।

विभाव्य तथा तेन प्रकारेण अतिम्लानिं अत्यन्तवैवर्ण्यमतिकालिमानमित्यर्थः आप प्राप यत् यथा अधुनापि स देवः सकलेन जनेन कालएव कालइत्येव कीर्त्यते तथाम्लानि मापेति पूर्वेणान्वयः । नलेर्ष्यानुभाव कालिमायोगादयं कालः नतु प्राणायुःकलनादिति भावः । अत्र यच्छब्दस्य कारणपरत्वेन व्याख्यानेऽपेक्षितार्थः । अभिधान मनन्वयश्च स्यात् प्रकारार्थत्वे तु न कश्चिद्विरोधः प्रकारार्थत्वञ्च निपातानामनेकार्थत्वादविरुद्धमत्यलम् ॥ ६२ ॥

यद्बभारेति । दहनोऽग्निरस्य नलस्य रूपमेव रूपधेयं सौन्दर्यं नामरूपभागेभ्यः स्वार्थे धेयो वक्तव्यः इति धेयप्रत्ययः । तस्य भरं समृद्धिं विमृश्य विभाव्य तापं बभार खल्विति यत् तत्र तापभरेण अनलता अग्नित्वं जनिकर्त्री जन्मकरी उत्पादिका माभूत् नल रूपदर्शनजन्यतापे तस्याप्रयोजकत्वादिति भावः । किन्तु तदपि तथापि चित्रमनलतैव अग्नित्वमेव हेतुरिति विरोधः नलत्वाभाव एव हेतुरितिपरिहारः अत एव विरोधाभासालङ्कारः ॥६३ ॥

कामनीयकमिति । कौशिक इन्द्रः अधःकृतकामं तिरस्कृत मदनं तदीयं नलीयं कामनीयकं कमनीयत्वं सौन्दर्यं कपधाद्गुरूपोत्तमाद्वुञ् । कामं प्रकाममक्षिभिः सहस्रेणेति भावः । अवेक्ष्य अथ स्वमात्मान-

कौशिकः स्वमखिलं परिपश्य
न्मन्यते स्म खलु कौशिकमेव ॥ ६४ ॥

रामणीयकगुणाद्वयवादं
मूर्त्तमुत्थितममुं परिभाव्य ।
विस्मयाय हृदयानि वितेरुः
तेन तेषु न सुराः प्रबभूवुः ॥ ६५ ॥

प्रैयरूपकविशेषनिवेशैः
सम्वदद्भिरमराः श्रुतपूर्वैः ।
एष एव स नलः किमितीदं
मन्दमन्दमितरेतरमूचुः ॥ ६६ ॥

अखिलं यथा तथा साकल्येनेत्यर्थः परिपश्यन् कौशिक मुलूकमेव स-हेन्द्र गुग्गुलू लूकव्यालग्राहिषु कौशिक इत्यमरः । मन्यतेस्म खलु नलस्यात्मनश्चैतदन्तरमित्यमंस्तेत्यर्थः तथाचास्य भैमीनिराशं मनो बभूवेति भावः ॥ ६४ ॥

रामणीयकेति । सुरा इन्द्रादयः अमुं नलं मूर्तं मूर्तिमन्तं उत्थितं उत्पन्नं रामणीयकं सौन्दर्यं कामनीयकवत् सिद्धं तदेव गुणः तस्याद्वयमेकमेवेति वादं प्रवादं परिभाव्य जगदेकसुन्दरमवेतेत्यर्थः । हृदयानि स्वचित्तानि विस्मयायाद्भुतरसाय वितेरुर्ददुः तेन दानेन तेषु हृदयेषु विषये न प्रबभूवुः तेषान्नेशिरे दत्तद्रव्ये स्वत्वनिवृत्तिरिति भावः विस्मयाकृष्टचित्ता बभूवुरिति परमार्थः ॥ ६५ ॥

प्रैयरूपकमिति । अमरा इन्द्रादयः श्रुतपूर्वैः पूर्वं श्रुतैः सुसुपेति समासः । सम्प्रति सम्वदद्भिः प्रत्यक्षसम्वादं व्रजद्भिः प्रियरूपस्य भावः प्रैयरूपकं सौन्दर्यं मनोज्ञादित्वाद्वुञ् । तस्य विशेषेषु तत्तदवयवेषु विशेषोऽवयवे इत्यत्र तूपलमालायां । निवेशैः संस्थानैः चिह्नैः सः श्रुतपूर्व्वो नलः एष एव किमिति हृत्तनिर्देशः । इतीदं वाक्यं मन्दमन्दं मन्दप्रका

तेषु तद्विधवधूवरणार्हं
भूषणं स समयः स रथाध्वा ।
तस्य कुण्डिनपुरं प्रतिसर्पन्
भूपतेर्व्यवसितानि शशंसुः ॥ ६७ ॥
धर्मराजसलिलेशहुताशैः
प्राणतां श्रितममुं जगतस्तैः ।
प्राप्य हृष्टचलविस्मृततापै
श्चेतसा निभृतमेतदचिन्ति ॥ ६८ ॥

रं गुणवचनस्येतिद्विर्भावः । इतरेतर मूचुः ॥ ६६ ॥

तेष्विति । तस्य भूपतेर्नलस्य सा प्रसिद्धा विधा प्रकारं सौन्दर्याद्यसाधारणधर्मो यस्याः तस्याः वध्वाः वरणे अर्हमुचितं भूषणं स समयः स्वयम्वरकालः कुण्डिनपुरं प्रतिसर्पंस्तदभिमुखं स रथाध्वा च व्यवसितानि नलोद्योगान् तेषु तानधिकृत्य शशंसुस्तेभ्यः शशंसुरित्यर्थः । आधारत्वविवक्षायां सप्तमी एतैर्लिङ्गैस्तस्य स्वयम्वरयात्रेति निश्चिक्युरित्यर्थः ॥ ६७ ॥

धर्मेति । जगतः प्राणानां प्राणत्वं जगज्जीवनत्वं तद्वत् प्रियत्वं वा श्रितममुं नलं प्राप्यासाद्य हृष्टाः जगत्प्राणभूत पुरुषदर्शनात् सन्तुष्टाश्चलास्तल्लावण्यदर्शनादैर्ष्यां तथानुरागाः विस्मृततापाः रागशैथिल्यादेव विस्मृतविरहतापाश्च तैस्तथोक्तैः प्रकृतैर्धर्मराजसलिलेशहुताशैश्चेतसानिभृतं गूढमेतदनन्तरश्लोकत्रये वक्ष्यमाणमचिन्ति चिन्तितं । अत्र यमो हृष्टो वरुणश्चलोऽग्निर्विस्मृततापः क्रमात्तत्प्रतिपादनपरश्चोत्तरश्लोकत्रयमिति कैश्चिद्व्याख्यातं तदयुक्तं न ह्येतेषामेते धर्माः प्रतिनियताः किन्तु त्रयाणामप्येते साधारणाः अतएवोत्तर श्लोकत्रयमपि सर्वविषयमत एवानन्तरश्लोके त इति बहुवचनोपादानं यदपि तदनन्तरश्लोकद्वये-

नैव नः प्रियतमोभयथासौ
यद्यमुं न वृणुते वृणुते वा ।
एकतस्तु धिगमूमगुणज्ञा-
मन्यतः कथमदःप्रतिलम्भः ॥ ६९ ॥
मामुपैष्यति तदा यदि मत्तो
वेद नैयमिदमस्य महत्त्वम् ।
ईदृशी च कथमाकलयित्री
मद्विशेषमपरान्नृपपुत्री ॥ ७० ॥
नैषधे वत वृते दमयन्त्या
व्रीडितो न हि बहिर्भवितास्मि ।

कवचनोपादानं तदपि प्रत्येकाभिप्रायादविरुद्धं किञ्च इत्यवेत्य मनसेत्यादि उपसंहारश्लोकद्वये परस्परमुखदर्शनोक्त्या च त्रयाणामेकाभिप्रायावगमात् अस्मदुक्तमेव युक्तमुत्पश्यामः ॥ ६८ ॥

चिन्ताप्रकारमेवाह श्लोकत्रयेण नैवेति । असौ दमयन्ती अमुं नलं यदि वृणुते न वृणुते वा उभयथापि पक्षद्वयेऽपि नोऽस्माकं प्रियतमा न भवेदेव । कुतः हि यस्मादेकतः प्रथमपक्षेऽगुणज्ञाममुन्धिक् तत्सङ्गतेरसुखावहत्वादिति भावः अन्यतो नलवरणपक्षे कथमदःप्रतिलम्भो अमुष्याः परिग्रहः परदारत्वादिति भावः ॥ ६९ ॥

मामिति । इयं दमयन्ती इयदेतावदस्य नलस्य मत्तः मत्सकाशात् महत्त्वमाधिक्यं न वेद यदि तदा मामुपैष्यति तर्हि तद्गतदेयत्वादुत्कर्षज्ञा नत्वमेव वरिष्यतीत्यत आह । ईदृशी सर्व्वां परोक्षनलगतविशेषानभिज्ञा नृपपुत्री अपरादपरस्मान्नलादित्यर्थः पूर्व्वादिभ्यो वेति विकल्पान्नस्मादेशः । मद्विशेषं मदीयोत्कर्षञ्च कथमाकलयित्री ज्ञात्री तृजन्तादिकारः न लोकेत्यादिना षष्ठीप्रतिषेधः ॥ ७० ॥

नैषध इति । किं च दमयन्त्या नैषधे नले वृते सति व्रीडितः

स्वां गृहेऽपि वनितां कथमास्यं
ह्रीनिमीलि खलु दर्शयिताहे ॥ ७१ ॥
इत्यवेत्य मनसात्मविधेयं
किञ्चन त्रिविबुधी बुबुधे न ।
नाकनायकमपास्य तमेकं
सा स्म पश्यति परस्परमास्यम् ॥ ७२ ॥
किं विधेयमधुनेति विमुग्धं
स्वानुगत्रयमवेक्ष्य ऋभुक्षाः ।

सन् बहिस्तावन्नहि भवितास्मि बहिः क्वापि जनसमक्षे स्थातुं न शक्नोमीत्यर्थः भवतेर्लुट् । वतेति खेदे गृहेऽपि स्वां वनितां स्वां भार्यां ह्रिया निमीलति सङ्कुचतीति ह्रीनिमीलि णिनिप्रत्ययः आस्यं कथं खलु दर्शयिताहे दर्शयिष्यामि । दृशेर्ण्यन्तात् कर्तरि लुट् एतीति हकारः अभिवाददृशोरात्मनेपद उपसंख्यानमिति अणिकर्त्रं वनितायां वैकल्पिकं कर्मत्वं अत्र णेरणादि सूत्रस्य यत्प्रहणसामर्थ्यं तत्र श्रूयमाणकर्मत्वाभावेन तदविषयत्वात् णिचश्चेत्यात्मनेपदमिति केचित् । अणि कर्तुः कर्मश्रवणेऽपि तदतिरिक्तकर्माश्रवणादश्रूयमाण कर्मत्वमस्त्येवेति णेरणादि सूत्र विषयत्वमेवेति भाष्यकारः । तदेतत्सम्यग्विवेचितमस्माभिः किरातार्जुनीयव्याख्याने घण्टापथे स सन्त तं दर्शयते गतस्मयइत्यत्र ॥७१॥

इतीति । त्रयाणां विबुधानां समाहारः त्रिविबुधी यमादिदेवत्रयमिति पूर्वोक्तश्लोकत्रयेण प्रकारेण मनसा अवेत्यालोच्य किञ्चनात्मविधेयं स्वकर्तव्यं न बुबुधे न विवेद। किं च सा त्रिविबुधी तमेकन्नाकनायकमिन्द्रमपास्यापवार्य परस्परमास्यं पश्यतिस्म इतिकर्तव्यतामूढास्त्रयोऽपि केवलमन्योन्यं मुखान्यपश्यन्नित्यर्थः ॥ ७२ ॥

शंसति स्म कपटे पटु रुच्चै-
र्वञ्चनं समभिलष्य नलस्य ॥ ७३ ॥
सर्वतः कुशलभागसि कच्चित्
त्वं स नैषध इति प्रतिभा नः ।
स्वासनार्द्धसुहृदस्तव रेखां
वीरसेननृपतेरिव विद्मः ॥ ७४ ॥
क्व प्रयास्यसि नलेत्यलमुक्त्वा
यातयात शुभयाजनि यन्नः ।
तत्तयैव फलसत्वरया त्वं
नाध्वनोऽर्द्धमिदमागमितः किम् ॥ ७५ ॥

किमिति । कपटे परवञ्चने उच्चैः पटुरत्यन्तसमर्थः सभुत्वादिन्द्रः अधुना किं विधेयमिति विमुग्धमितिकर्त्तव्यता मूढं स्वस्य अनुगानामनुयायिनां यमादीनां आननमवेक्ष्य तेषान्दैन्यं दृष्ट्वेत्यर्थः नलस्य वञ्चनमभिलष्याभिसन्धाय शंसतिस्म जगाद ॥ ७३ ॥

सर्वत इति । हे सौम्य ! सर्वतः सप्तस्वङ्गेषु कुशलभागसि कच्चित् कच्चित्कामप्रवेदन इत्यमरः । त्वां न वेद्मीत्याह त्वं सः प्रसिद्धो नैषधो नल इति नोऽस्माकं प्रतिभा प्रतीतिः कुतः तव रेखामाकृतिं स्वासनार्द्धसुहृदः समार्द्धासनभाजः वीरसेननृपतेरिव तत्सदृशीं विद्मः तत्सादृश्यात् तत्पुत्रो नलस्त्वमिति प्रतीत इत्यर्थः ॥ ७४ ॥

क्वेति । हे नल ! क्व प्रयास्यसि इत्युक्त्वा पृष्ट्वा अलं न प्रष्टव्यमित्यर्थः अलंखल्वोरित्यादिना क्त्वाप्रत्ययः । कुतो यद्यस्मान्नोऽस्माकं अत्र यातया इहागमनेन शुभया त्वद्दर्शनेन सफलया अजनि अभावि भावे लुङ् । तत्तस्मात् फलेन त्वरया फलार्थिन्या तया यातयैव कर्त्र्या त्वमिदमध्वनोऽर्द्धमर्द्धमार्गमागमितो न किं? अस्मदर्थमेव इदन्तवागमनमित्यर्थः ॥ ७५ ॥

एष नैषध! स दण्डभृदेष
ज्वालजालजटिलः स हुताशः।
यादसां स पतिरेष च शेषं
शासितारमवगच्छ सुराणाम्॥ ७६॥
अर्थिनो वयममी समुपेम
स्त्वां किलेति फलितार्थमवेहि।
अध्वनः क्षणमपास्य च खेदं
कुर्महे भवति कार्य्यनिवेदम्॥ ७७॥
ईदृशीं गिरमुदीर्य्य विडौजा
जोषमाप न विशिष्य बभाषे।

के यूयमत आह एष इति। हे नैषध! नल! एष इति पुरोवर्त्तिनो हस्तनिर्देशः स प्रसिद्धो दण्डभृद्यम एष ज्वालजालैर्जटिलो जटावान् ज्वालामालाकुल इत्यर्थः वह्नेर्द्वयोर्ज्वालकीलावित्यमरः। पिच्छादित्वादिलच्। स हुताशोऽग्निः एष स यादसां पतिर्वरुणः शेषमवशिष्टं त्वमित्यर्थः सुराणां शासितारमवगच्छ देवेन्द्रं विद्धि॥ ७६॥

अर्थिन इति। हे नल! अमी वयं अर्थिनः सन्तः त्वां समुपेमः किल प्राप्नुमः खलु उपपूर्वादिणो लटोरूपं। इति फलितार्थं निष्कृष्टार्थं अवेहि विद्धि क्षणमध्वनः खेदमपास्याध्वनः श्रमं नीत्वा भवति त्वयि कार्य्यनिवेदं कार्यविशेषनिवेदनं विदेर्ण्यन्ताद्घञ्प्रत्ययः कुर्महे॥७७॥

ईदृशीमिति। विडौजाः इन्द्रः ईदृशीं सामान्यनिष्ठां गिरमुदीर्य जोषं मौनं आप तूष्णीं जोषं भवेन्मौनं इत्यव्ययेषु हलायुधः। विशिष्य विविच्य न बभाषे विशेषं नाचष्ट इत्यर्थः अत्राखिन्नभिधाकुशलत्वे उक्तिचातुर्ये चित्रं विस्मयो न। कुतः अस्येन्द्रस्य शैशवमवधिर्यस्मिन् कर्म्मणि तद्यथातथा तदारभ्येत्यर्थः गुरुराचार्यो गुरुर्बृहस्पतिः वाचस्पतिशिष्यस्य-

नात्र चित्रमभिधाकुशलत्वे
शैशवावधि गुरुर्गुरुरस्य ॥ ७८ ॥

अर्थिनामहृषिताखिलरोमा
स्वं नृपः स्फुटकदम्बकदम्बम् ।
अर्चनार्थमिव तच्चरणानां
स प्रणामकरणादुपनिन्ये ॥ ७९ ॥

दुर्लभं दिगधिपैः किममीभि
स्तादृशं कथमहो मदधीनम् ।
ईदृशं मनसिकृत्य विरोधं
नैषधेन समशायि चिराय ॥ ८० ॥

जीवितावधि वनीयकमात्रै
र्याच्यमानमखिलैः सुलभं यत् ।

वाग्मित्वं किं चित्रमित्यर्थः । गुरुर्गीष्पतिपित्राद्योरित्यमरः ॥ ७८ ॥

अर्थीति । अर्थिनाम्ना अर्थिनामश्रवणेन हृषिताखिलरोमा रोमाञ्चिततनुः हृषेर्लोमस्विति वैकल्पिक इडागमः । नृपः स्वमात्मानं तच्चरणानामर्चनाय अर्चनार्थं स्फुटकदम्बकदम्बं विकसितनीपकुसुमवृन्दमिवेत्युत्प्रेक्षा प्रणामकरणात्तद्व्याजादुपनिन्ये अर्पयामास ॥ ७९ ॥

दुर्लभमिति । दिगधिपैरमीभिरिन्द्रादिभिर्दुर्लभं किं तादृशं दुर्लभं वस्तु कथं मदधीनं मदायत्तमहो ईदृशं विरोधं मनसिकृत्य मनसि निधाय अनत्याधाने उरसि मनसि इति गतिसंज्ञायां कुगतिप्रादय इति समासे ल्यबादेशः नैषधेन नलेन चिराय चिरं समशायि संशयितं विचारितमित्यर्थः भावे लुङ् ॥ ८० ॥

विचारप्रकारमाह द्वादशश्लोक्या जीवितेत्यादि । यद्यावदखिलै र्वनीयकमात्रैः यैः कैश्चिद्याचकैः वनीयको याचनक इत्यमरः । जीविता-

अर्थिने परिदृढाय सुराणां
किं वितीर्य्य मम तुष्यतु चेतः ॥ ८१ ॥
भीमजा च हृदि मे परमास्ते
जीवनादपि धनादपि गुर्वी ।
न स्वमेव मम सार्हति यस्याः
षोडशीमपि कलां किल नोर्व्वी ॥ ८२ ॥
मीयतां कथमभीप्सितमेषां
दीयतां द्रुतमयाचितमेव ।

वधि प्राणान्तं याच्यमानं सुलभं। सुराणां परिदृढाय प्रभवे अर्थिने किं वस्तु वितीर्य दत्त्वा चेतः परितुष्यतु सन्तुष्येत् प्राणान्तं वस्तु सर्वसाधारणं ततोऽधिकमिन्द्राय देयं किमस्तीति विचार्यत इत्यर्थः; वितरणे चेतसः कर्तृत्वविवक्षाया वितरणपरितोषयोः समानकर्तृकत्वसिद्धिः ॥ ८१ ॥

नन्वस्ति लोकोत्तरवस्तु भैमी सा दीयतामत आह भीमजेति । उर्वी भूर्यस्याः भैम्याः षोडशीमपि कलां नार्हति षोडशांशमात्रमिति साम्यं न प्राप्नोति इत्यर्थः अतएव धनादपि किं बहुना जीवितादपि गुर्वी अधिका सा भीमजा भैमी च मे हृदि हृदये परमास्ते किल। किन्तु मम स्वमेव न भवति अद्याप्यस्वकरणादस्वस्य अदेयत्वात् स्वत्वेऽपि देयं दारसुताहते इति दाराणां दाननिषेधाच्च विचारस्तदवस्थ एवेति भावः ॥ ८२ ॥

मीयतामिति । एषामभीप्सितं वस्तु कथं मीयतां ज्ञायेत ज्ञानस्योपयोगमाह । अयाचितं यथा तथा द्रुतं दीयतां दातव्यमित्यर्थः तर्हि अर्थिना चैव विज्ञाय दीयतामत आह यो दाता वाञ्छासर्थ्याकाङ्क्षां कलयन् जानन्नपि अर्थिवागवसरं सहते याच्ञाकालं प्रतीक्षते तं दातारं धिगस्तु स गर्ह्य इत्यर्थः ॥ ८३ ॥

तं धिगस्तु कलयन्नपि वाञ्छा
मर्थिवागवसरं सहते यः ॥ ८३ ॥
प्रापितेन चटुकाकुविडम्बं
लम्भितेन बहुयाचनलज्जाम् ।
अर्थिना यदघमर्ज्जति दाता
तन्न लुम्पति विलम्ब्य ददानः ॥ ८४ ।
यत्प्रदेयमुपनीय वदान्यै
र्दीयते सलिलमर्थिजनाय ।
याचनोक्तिविफलत्वविशङ्का–
त्रासमूर्च्छनचिकित्सितमेतत् ॥ ८५ ॥
अर्थिने न तृणवद्धनमात्रं
किन्तु जीवनमपि प्रतिपाद्यम् ।

शीघ्राप्रदाने दोषमाह प्रापितेनेति । चटुकाकुभ्यां चटूक्तिकाकुप्रयोगाभ्यां विडम्बं हास्यत्वं प्रापितेन दात्रेति शेषः । बह्वधिकं यथा तथा याचनेन देहीति वादनेन लज्जां लम्भितेनापि दात्रेति शेषः अर्थिना करणभूतेन उक्तरूपेण अर्थिपीड़नेनेत्यर्थः । दाता यदघं अर्जति सम्पादयति विलम्ब्य ददानो दाता तदघं न लुम्पति न निहन्ति तस्य पापस्य प्रायश्चित्तमपि नास्तीत्यर्थः ॥ ८४ ॥

यदिति । वदान्यैर्दातृभिः प्रदेयं यत् द्रव्यं उपनीय अर्थिजनाय सलिलं दीयत इति यत् एतत् सलिलदानं याचनोक्तिविफलत्वशङ्कया देहीति वादवैफल्यशङ्कया त्रासो भयं तेन यन्मूर्च्छनं तस्य चिकित्सितमिवोत्प्रेक्षा अन्यथा किमर्थं तत्सलिलदानमिति भावः ॥ ८५ ॥

अर्थिन इति । कुशवतो जलस्य दायो दानं ददातेर्घञ् युगागमः । सम्प्रति प्रतिपाद्यतया अस्मिन्विधावस्तीति कुशवज्जलदायी स कुश

एवमाह कुशवज्जलदायी
द्रव्यदानविधिरुक्तिविदग्धः ॥ ८६ ॥
पङ्कसङ्करविगर्हितमर्हं
न श्रियः कमलमाश्रयणाय ।
अर्थिपाणिकमलं विमलन्त
द्वासवेश्म विदधीत सुधीस्तत् ॥ ८७ ॥
याचमानजनमानसवृत्तेः
पूरणाय वत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं
न द्रुमैर्नगिरिभिर्न समुद्रैः ॥ ८८ ॥

जलदानप्रतिपादक इत्यर्थः । अतएवोक्तिविदग्धः अभिधाव्यापारमन्तरेण अर्थादेव अर्थान्तरप्रतिपादनचतुर इत्यर्थः द्रव्यदानविधिः द्रव्यदानविधायकशास्त्रमेवमाह किमिति अर्थिने धनमात्रं धनमेव मात्रं मात्रं कार्त्स्न्येऽवधारणे इत्यमरः । तृणमेव प्रतिपाद्यं न देयं किन्तु जीवनं जीवितमपि तथा देयमिति सकुशं जलञ्च देयमिति गम्यते अर्थ्यनपेक्षित जलकुशदानं विदधतो द्रव्यदानविधेरयमेवाभिप्राय इति भावः ॥ ८६ ॥

पङ्केति । पङ्कः पापं कर्दमञ्च पङ्कोऽस्त्री कर्दमैनसोरिति वैजयन्ती । तत्सङ्करेण विगर्हितं कमलं श्रियः आश्रयणाय नार्हं तस्मात् सुधीः विमलं निर्मलं निष्पङ्कं अर्थिपाणिकमलं तद्वासवेश्म लक्ष्मीनिवासस्थानं विदधीत सर्वथा धनं पात्रपाणिष्वेव निक्षेप्तव्यं नतु भूमाविति भावः ॥ ८७ ॥

याचमानेति । यस्य धनिनो जन्म याचमानजनमानसवृत्तेरर्थिजनमनोरथस्य पूरणाय न भवति वतेति खेदे तेनैकेन पापीयसा इयं भूरति भारवती न द्रुमादिभिः बहुभिरित्यर्थः तेभ्यः प्रजानां बहूपकारलाभादिति भावः ॥ ८८ ॥

मा धनानि कृपणः खलु जीवन्
तृष्णयार्पयतु जातु परस्मै ।
तत्र नैष कुरुते मम चित्रं
यत्तु, नार्पयति तानि मृतोऽपि ॥ ८९ ॥
मामभीभिरिह याचितवद्भि
र्दातृजातमवमत्य जगत्याम् ।
यद्यशोमयि निवेशितमेत
न्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥ ९० ॥
लोकएषपरलोकमुपेता
हा विहाय निधने धनमेकः ।

मेति । कृपणः कष्टलुब्धो जीवन् प्राणन् तृष्णया अतिगर्द्धेन जातु कदापि परस्मै याचमानाय धनानि मार्पयतु न प्रयच्छतु एष कृपणः तत्र अप्रदाने मम चित्रं विस्मयं न कुरुते किन्तु मृतोऽपि तानि धनानि नार्पयति न प्रतीच्छतीति यत् तत्र चित्रं कुरुते मार्पणानि नृपसम्बन्धीनि कुरुते इति तदाभासीकरणाद्विरोधाभासालङ्कारः ॥ ८९ ॥

मामिति । इह जगत्यां भुवि भुवने जगती भुवने भूम्यामिति वैजयन्ती । दातृजातमवमत्य अवधीर्य मामभीभिर्याचितवद्भिः देवैः यद्यशो मयि निवेशितं स्थापितं एतन्निष्क्रयः एतस्य यशसः निष्क्रयः प्रतिनिधिभूतः कतमस्तु पदार्थः तदीयोऽस्तु इन्द्रादिसम्बन्धी स्यात् किं वितीर्य अनृणो भविष्यामीत्यर्थः ॥ ९० ॥

लोक इति । लोको जनः हा कष्टं निधने अन्तकाले धनं विहाय एकः एकाकी परलोकमुपेता उपैष्यति इणो लुट् । इति हेतोः उदयहृदयं उद्यत्करुणं चित्तं यस्य सः अर्थ्येव बन्धुः अस्य लोकस्य तद्धनं अनु परलोकं निनीषति नेतुमिच्छति अन्ये तु बन्धवः स्वयमेव सर्वस्वं गृह्णन्ति नैनं प्रापयन्तीत्ययमेवापद्बन्धुः संग्राह्य इति भावः ॥ ९१ ॥

इत्यमुं खलु तदस्य निनीष-
त्यर्थिबन्धुरुदयद्द्वयचित्तः ॥ ९१ ॥
दानपात्रमधमर्णमिहैक-
ग्राहि कोटिगुणितं दिवि दायि ।
साधुरेति सुकृतैर्यदि कर्त्तुं
पारलौकिककुसीदमसीदत् ॥ ९२ ॥
एवमादि स विचिन्त्य मुहूर्त्तं
तानवोचत पतिर्निषधानाम् ।
अर्थिदुर्लभमवाप्य च हर्षात्

दानेति । साधुः सज्जनो वार्धुषिकश्च साधुः स्त्रीषु हिते रम्ये सज्जने वार्धुषी पुमान् इति वैजयन्ती । इहास्मिन् लोके एकं गृह्णातीति एकग्राहि दिवि परलोके कोटिगुणितं कोटिश आदत्तं दायि दातृ वस्त्रधान्ये हिरण्यानां चतुस्त्रिद्विगुणाः परे इति । लोके वृद्धेः परिमितिरस्ति इदं त्व परिमितदायीत्यर्थः अव एकाधमर्णयोर्णिनिरिति अधमर्णे णिनिप्रत्ययः । अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधात् द्वितीया । दानपात्रं नासाधमर्णं धनग्राहीतिरूपकं उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकावुभौ इत्यमरः । सुकृतैर्यदि तदानीमसीददविनश्यत्परलोकेभवं पारलौकिकं परलोकाच्चेति वक्तव्यमिति भावार्थे ठञ्प्रत्ययः । कुसीदं वृद्धिजीवनं कर्तुमलं समर्थ इति शेषः कुसीदं वृद्धिजीविकेत्यमरः । नादत्तमुपतिष्ठतीतिन्यायाद्दातुर्न किञ्चिदामुष्मिकं सुखं दातुः पुनरनन्तमिति सर्वथार्थिने दातव्यमिति भावः ॥ ९२ ॥

एवमिति । निषधानां पतिर्नलः एवमादि मुहूर्त्तं अल्पकालं विचिन्त्य अर्थिभिरर्थिनां वा दुर्लभं हर्षादुल्लसितम्पि वर्धमानश्रीकं प्रसन्नमित्यर्थः शैषिकस्य कपो वैभाषिकत्वान्नपुंसकह्रस्वत्वं । याच्यमानसुखं दातृसुखञ्चावाप्य प्रसन्नमुखो भूत्वेत्यर्थः तानिन्द्रादीनवोचत् ॥ ९३ ॥

याचमानमुखमुल्लसितश्रि ॥ ८३ ॥

नास्ति जन्यजनकव्यतिभेदः
सत्यमन्नजनितो जनदेहः ।
वीक्ष्य वः खलु तनूममृतादां
दृङ्निमज्जनमुपैति सुधायाम् ॥ ८४ ॥

मत्तपः क्व नु तनु क्व फलं यत्
यूयमीक्षणपथं व्रजथेति ।
ईदृशान्यपि दधन्ति पुनर्नः
पूर्व्वपूरुषतपांसि जयन्ति ॥ ८५ ॥

प्रत्यतिष्ठिपदिलां खलु देवीं
कर्म्म सर्व्वसहनव्रतजन्म ।

नास्तीति । जन्यजनकयोः कार्यकारणयोर्व्यतिभेदो व्यतिक्रमो नास्ति न कार्यं स्वोपादानादभिन्नमित्यर्थः जनदेहो अन्नजनितो भुक्ताहारपरिणामश्चेत्तदयं सत्यमित्यर्थः अमृतमदन्तीत्यमृतादः अदोऽनन्न इति प्रत्ययः तेषाममृतादाममृतभुजां वो युष्माकं तनूं मूर्तिं वीक्ष्य मद्दृष्टिः सुधायां निमज्जनं उपैति खलु सुधामज्जनसुखमनुभवतीत्यर्थः जनदेहानामन्नाज्जन्यत्वं तद्वदे युष्मद्देहानामपि तथात्वे कथमेतत्सुधाकार्यकारित्वं स्यादित्यर्थः युष्मद्दर्शनादेव तावत् कृतार्थोऽस्मीति भावः ॥ ८४ ॥

मदिति । तनु स्वल्पं मत्तपः क्व यूयमीक्षणपथं व्रजथेति यत् एतत्फलं युष्मद्दर्शनरूपं महाफलं क्व वैरूप्यादिति भावः अतएव विरूपघटनारूपो विषमालङ्कारः । अथवा ईदृशानि ईदृङ्महाफलान्यपि दधन्ति पुनः शब्दो वाक्यालङ्कारे पुष्णन्ति वा नपुंसकस्येति नुमागमः । नोऽस्माकं पूर्वपुरुषतपांसि जयन्ति तानीदानीं फलन्तीत्यर्थः पुत्रपूतत्वादिवत्तेषामेवेदं फलमिति भावः ॥ ८५ ॥

यूयमप्यहह पूजनमस्या
यन्निजैः सृजथ पादपयोजैः ॥ ९६
जीवितावधि किमप्यधिकं वा
यन्मनीषितमितो नरडिम्भात्
तेन वश्चरणमर्चतु सोऽयं
ब्रूत वस्तु पुनरस्तु किमीदृक् ॥ ९७ ॥
एवमुक्तवति वीतविशङ्के
वीरसेनतनये विनयेन ।
वक्रभावविषमामथ शक्रः
कार्य्यकैतवगुरुर्गिरमूचे ॥ ९८

प्रतीति । इलां देवीं भूदेवतां सर्वसहनं विश्वावमाननसहनमेव व्रतं येन सा सर्वंसहेत्याख्यायते तस्याज्जन्म यस्य तत्तज्जन्म तज्जन्ममित्यर्थः । क्रियत इति कर्म सुकृतं कर्तृ प्रत्यतिष्ठिपत् प्रतिष्ठापयामास खलु तिष्ठतेरिदिति णौ चङ् उपधाया इकारः। यद्यस्माद्यूयं निजैः पादैरेव पयोजैरिति रूपकं अस्या इलाया पूजनं पूजां सृजथ कुरुध्वमित्यर्थः अहह ! अहहेत्यद्भुते खेदे हि हेतावधारणे इत्यमरः॥९६॥

जीवितेति । इतो नरडिम्भान्मानुषशिशोर्जीवितावधि प्राणान्तं ततोऽधिकं वा किमपि मनीषितमीप्सितं यद्वस्तु सोऽयं नर स्तेन वस्तुना वश्चरणमर्चतु पूजयतु ईदृक् मत्तस्थं वस्तु पुनः किमस्तु किं स्यात् ब्रूत ॥ ९७ ॥

एवमिति । वीरसेनतनये नले विनयेन अकपटेन वीतविशङ्के मुक्तविशङ्के विस्रब्धे उक्तवति सति अथ कार्येषु कर्तव्यार्थेषु यानि कैतवानि कपटानि तेषां गुरुः उपदेष्टा शक्रः वक्रभावः प्रतिकूलाभिप्रायः तेन विषमां प्रतिकूलां गिरमूचे ॥ ९८ ॥

पाणिपीडनमहं दमयन्त्याः
कामयेमहि महीमहिकांशो!।
दूत्यमत्र कुरु नः स्मरभीतिं
निर्जितस्मर! निरस्य चिरस्य॥ ९९॥
आसते शतमधिक्षिति भूपा
स्तोयराशिरसि ते खलु कूपाः।
किं ग्रहा दिवि न जाग्रति ते ते
भास्वतस्तु कतमस्तुलयास्ते॥ १००॥
विश्वदृश्वनयना वयमेव
त्वद्गुणाम्बुधिमगाधमवेमः।

पाणीति। हे महीमहिकांशो! भूतलहिमांशो! प्रालेयं मिहिका चाथेत्यमरः। वयं दमयन्त्याः पाणिपीडनमहं विवाहमहोत्सवं कामयेमहि अभिलषामहे, निर्जितस्मर! स्मरभीतिं चिरस्य निरस्य दूरतो निरस्येत्यर्थः चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यमरः। अत्रोद्वाहे दूतकर्म दूत्यं तस्य भावकर्मणीति यत्प्रत्ययः। अस्माकं कुरु॥ ९९॥

आसत इति! अधिक्षिति क्षितौ विभक्त्यर्थेऽव्ययीभावः। शतं भूपाः आसते अपरिमिताः सन्तीत्यर्थः तत्र त्वं तोयराशिरसि ते कूपाः खलु भूपत्वसाम्येऽपि तेषां तव च समुद्रकूपयोरिव महदन्तरमित्यर्थः। तथाहि दिव्याकाशे ते ते ग्रहाः चन्द्रादयः न जाग्रति न प्रकाशन्ते किं? किन्तु कतमो ग्रहः भास्वत स्तुलया साम्येन आस्ते न कोऽपीत्यर्थः तद्वत्तवापि न कोऽपि भूपस्तुल्य इति दृष्टान्तालङ्कारः॥ १००॥

विश्वेति। विश्वं पश्यन्तीति विश्वदृश्वानि सर्वदर्शीनि दृशेः क्वनिप्। तानि नयनानि येषां ते वयमेवागाधं गभीरं तव गुणा दानदयादा-

त्वामिहैवविनिवेश्य रहस्ये
निर्वृतिं न हि लभेमहि सर्वे ॥१०१॥
शुद्धवंशजनितोऽपि गुणस्य
स्थानतामनुभवन्नपि शक्रः ।
क्षेप्तुमेनमृजुमाशु सपक्षं
सायकन्धनुरिवाजनि वक्रः ॥ १०२ ॥
तेन तेन वचसैव मघोनः
स स्म वेद कपटं पटुरुच्चैः ।

स्थैर्यवशित्वसत्यसन्धत्वादयः तानेवाम्बुधिमवेमः अवगच्छामः इणोलोटि-रूपं । यस्मादिह अस्मिन् रहस्ये कृत्ये त्वामेव विनिवेश्य नियुज्य सर्वे वयं निर्वृतिं सुखं न लभेमहीति काकुः लभेमह्येव प्रागुक्तगुणाढ्यस्त्वमेवेति भावः ॥ १०१

शुद्धेति । शक्र इन्द्रः शुद्धवंशजनितोऽपि कश्यप गोत्रोद्भवोऽपि गुणस्य शौर्य्यवीर्य्यवशित्व सत्यसन्धत्वादेः स्थानतां आश्रयतां अनुभवन् जानन्नपि नलगुणवत्त्वा मवगच्छन्नपि सपक्षं राज्ञां दिक्पालांशभूतत्वेन सतत सत्वाहुत हवि रादिसमर्पकत्वेनच सहाय भूतवान्त्वं ऋजुं अकुटिलस्वभावं च एनं पुरोवर्त्तिनं नलं आशु झटिति क्षेप्तुं वञ्चयितुं धनुरिव यथा धनुः उक्तविशेषण विशिष्ट इत्यर्थः । सायकं वाणं क्षेप्तुं गुणस्य शिञ्जिन्याः मौर्वीज्या शिञ्जिनीगुण इत्यमरः स्थानतां अधिष्ठानत्वमनुभवात तद्वादिति योजना । वाणमपि सपक्षं पक्ष सहितम् । पक्षं वाहन पक्षयोरित्यमरः । धनुः शब्दस्यापि पुंलिङ्गत्व ममरेण प्रति पादितम् अत्र प्रकृताप्रकृतश्लेषः स चोपमया संकीर्य्यत इति॥१०२॥

तेनेति । उच्चैःपटुरतिकुशलः स नलः तेन तेन वचसैव मघोनः कपटं वेद स्म विवेद । अथ वेदनानन्तरं तदुचितां तस्य कपटस्योचितामनुरूपां वाणीमाचरत् स्वयमपि कपटोक्तिमेवाकरोदित्यर्थः तथाहि

आचरत्तदुचितामथ वाणी
मार्ज्जवं हि कुटिलेषु न नीतिः ॥ १०३ ॥
सेयमुच्चतरता दुरिताना
मन्यजन्मनि मयैव कृतानाम् ।
युष्मदीयमपि या महिमानं
जेतुमिच्छति कथापथपारम् ॥ १०४ ॥
वित्त चित्तमखिलस्य न कुर्य्यां
धुर्य्यकार्य्यपरिपन्थि तु मौनम् ।
ह्रीर्गिरास्तु वरमस्तु पुनर्म्मा
स्वीकृतैव परवागपरास्ता ॥ १०५ ॥
यन्मतौ विमलदर्पणिकायां

कुटिलेषु विषये आर्जवमकौटिल्यं नीतिर्नहि । ततः कुटिलेन भवितव्यं अन्यथा महान्तमनर्थ मृच्छेदिति भावः ॥ १०३ ॥

सेयमिति । सेयमन्यजन्मनि जन्मान्तरे मयैव कृतानां दुरितानां उच्चतरता महत्ता तया किमपराद्धं तथाहि या पापमहत्ता कथापथस्य वाग्वृत्तेः पारं दूरमवाच्यमित्यर्थः युष्मदीयमपि महिमानं प्रभावमाहात्म्यं जेतुमुल्लङ्घयितुमिच्छति पापातिरेकाद्युष्मदाज्ञोल्लङ्घनेच्छा मे जायत इति विनयोक्तिः सर्वथा युष्मन्नियोगो न क्रियत इति परमार्थ इत्यर्थः ॥ १०४ ॥

ननु कुटिलोक्तेर्वरं मौनमाह वित्तेति । हे देवाः ! अखिलजनस्य चित्तं वित्त विदित्वा ब्रूतेत्यर्थः। तर्हि कीदृक् ते चित्तं तदाह धुर्यस्य इष्टसाधनसमर्थस्य कार्यस्य उपायप्रयोगस्य परिपन्थि विरोधि मौनं न कुर्यां गिरा परिहारोक्त्या ह्रीरस्तु वरं कार्यविरोधिनो मौनं लज्जावहमपि परिहारवचनमेव साध्वित्यर्थः । तर्हि मौनादेव परिहारे

संमुखस्थमखिलं खलु तत्त्वम् ।
तेऽपि किं वितरथेदृशमाज्ञां
या न यस्य सदृशी वितरीतुम् ॥ १०६ ॥
यामि यामिह वरीतुमहो त
द्दूततान्तु करवाणि कथं वः ।
ईदृशां न महतां वत जाता
वञ्चने मम तृणस्य घृणापि ॥ १०७ ॥
उद्भ्रमामि विरहान्मुहुरस्या
मोहमेमि च मुहूर्त्तमहं यः ।

किं प्रतिषेधकार्येण तत्राह । परस्य वाक्प्रार्थनोक्तिरपरास्या अप्रतिषिद्धा सती स्वीकृतैव पुनः अप्रतिषिद्धमनुमतमिति न्यायादङ्गीकृतैव मास्तु ॥ १०५ ॥

अत तानुपालभते यदिति । येषां वो मतावेव विमलदर्पणिकायां निर्मलादर्शे अखिलं तत्वं वस्तु सम्मुखस्थं प्रत्यक्षं खलु तेन सर्वज्ञा अपि यूयमीदृशं उक्तप्रकारं त्यदादिष्वित्यादिना दृशेः क्विन्प्रत्ययः । आज्ञां किं वितरथ कीदृशी अत आह । या यस्य मे वितरीतुं दातुं सदृशी योग्या न तस्माद्यूयं ममोपालभ्या इत्यर्थः ॥ १०६ ॥

अथाष्टभिरयोग्यतामेवाह यामीत्यादिना । इहास्मिन् समये यां भैमीं वरीतुं वृतोवेति दीर्घः । यामि गच्छामि तद्दूततां तस्यामेव विषये दूत्यन्तु कथं वः करवाणि अहो ईदृशां महतां वः तृणस्य तृणकल्पस्य मम वञ्चने प्रतारणे घृणा करुणा जुगुप्सा वापि न जाता वतेति खेदे॥१०७॥

उद्भ्रमामीति । योऽहमस्याः भैम्याः विरहात् मुहुः उद्भ्रमामि उन्माद्यामि मुहूर्तमीषत्कालं मोहं मूर्च्छाञ्च एमि प्राप्नोमि ईदृगवस्थः सोऽहं वो युष्माकं रहस्यं रक्षितुं गोप्तुं कथं प्रभवितास्मि प्रभवि–

ब्रूत वः प्रभवितास्मि रहस्यं
रक्षितुं स कथमीदृगवस्थः ॥ १०८॥
यां मनोरथमयीं हृदि कृत्वा
यः श्वसिम्यथ कथं स तदग्रे ।
भावगुप्तिमवलम्बितुमीशे
दुर्ज्जया हि विषया विदुषापि ॥ १०९ ॥
यामिकाननुपलक्ष्य च मादृक्
तां निरीक्षितुमपि क्षमते कः ।
रक्षिलक्षजयचण्डचरित्रे
पुंसि विश्वसिति कुत्र कुमारी ॥ ११० ॥
आदधीचि किल दातृकृतार्घ्यं
प्राणमात्रपणसीम यशो यत् ।

ष्यामि शक्ष्यामीत्यर्थः भुवो लुटि तिप् ब्रूत ॥ १०८ ॥

यामिति । योऽहं मनोरथमयीं सङ्कल्परूपां यां भैमीं हृदि कृत्वा श्वसिमि प्राणिमि अथ कथं सोऽहं तदग्रे तस्याः भैम्याः पुरः भावगुप्तिं कामविकारगोपनमवलम्बितुं कथमीशे शक्नोमि तथाहि विदुषापि विवेकिनापि विषयाः शब्दादयः दुर्ज्जया इत्यर्थान्तरन्यासः॥१०९॥

यामिकानिति । किञ्चेति मादृक् मद्विधः क्षत्रिय इत्यर्थः यामान् रक्षन्तीति यामिकाः प्रहररक्षकाः रक्षन्तीति ठक् । ताननुपलक्ष्य अहत्वा तां भैमीं निरीक्षितुमपि कः क्षमते किं पुनराभाषितुमिति भावः तथैव क्रियतां तत्राह रक्षिणां लक्षाणि तेषां जयेन मर्द्दनेन चण्डचरित्रे क्रूरकर्मणि पुंसि कुमारी कन्या कुत्र विश्वसिति न कुत्रापीत्यर्थः कौदाहृकथाप्रसङ्गः क्व चान्तःपुरजनमर्द्दन इति भावः ॥ ११० ॥

आदधीचीति । प्राणमात्रं जीवितमेव पणसीम मूल्यावधिर्य-

आददे कथमहं प्रियया तत्
प्राणतः शतगुणेन पणेन ॥ १११ ॥
अर्थना मयि भवद्भिरिवास्यै
कर्त्तुमर्हति मयापि भवत्सु ।
भीमजार्थपरयाचनचाटौ
यूयमेव गुरवः करणीयाः ॥ ११२ ॥
अर्थिताः प्रथमतो दमयन्तीं
यूयमन्वहमुपास्य मया यत् ।

स्मिन् कर्मणि तद्यथा तथा पणो मूल्ये ग्रहे मान इति वैजयन्ती । आदधीचि दधीचिमारभ्य अभिविधावव्ययीभावः। क्रीतेति प्रसिद्धौ दातृभिर्द्दान्यैः कृतार्घं निश्चितं मूल्यं मूल्ये पूजाविधावर्घ इत्यमरः । यद्यश स्तद्यशः प्राणतः प्राणाच्छतगुणेन प्रिययैव पणेन मूल्येन वा कथमाददे क्रीणामि न्यूनक्रयस्य परावर्त्यत्वादिति भावः । अत्र परिवृत्तिरलङ्कारः समन्यूनाधिकानाञ्च यथा विनिमयो भवेत् । साकं समाधिकैर्न्यूनैः परिवृत्तिरसौ मतेति लक्षणात् । तत्र प्राणैर्यशसः न्यूनपरिवृत्तिः हीनमूल्यत्वात् प्रियया यशसो अधिकपरिवृत्तिरधिकमूल्यत्वादिति भावः ॥ १११

अर्थनेति । अस्यै दमयन्त्यै तादर्थ्ये चतुर्थी मयि विषये भवद्भिरिव मयापि भवत्सु विषये अर्थना प्रार्थना कर्तुमर्हति कर्तव्येत्यर्थः । अथ कथं कामुकमुखात् कामिनीविषयेति चेत् यथा भवतां तथेत्याह भीमजार्थाय परयाचनचाटुः परप्रार्थनारूपा प्रियोक्तिः तस्यां यूयमेव नः गुरवः उपदेष्टारः करणीयाः करोमि चेति भावः ॥ ११२ ॥

अथ चेत् प्रथमप्रार्थनाकर्तृत्वाभिमानस्तर्हि स्वयमेव प्रथम इत्याह अर्थिता इति । मया अन्वहमनुदिनमनश्चेत्यव्ययीभावः समासान्तष्टच् । यूयमुपास्य प्रथमतो दमयन्ती अर्थिताः अर्थयतेर्दुहादित्वादप्रधाने कर्मणि क्तः । इति यत्तत्प्रथमप्रार्थनं व्यतियतां व्यतिक्रम्यतां इणो लटः

ह्रीर्नचेद्व्रतियतामपि तद्वः
सा ममापि सुतरां न तदस्तु ॥ ११३ ॥
कुण्डिनेन्द्रसुतया किल पूर्व्वं
मां वरीतुमुररीकृतमास्ते ।
व्रीडमेष्यति परं मयि दृष्टे
स्वीकरिष्यति न सा खलु युष्मान् ॥ ११४ ॥
तत्प्रसीदत विधत्त न खेदं
दूत्यमत्यसदृशं हि ममेदम् ।
हास्यतैव सुलभा न तु साध्यं
तद्विधित्सुभिरनौपयिकेन ॥ ११५ ॥
ईदृशानि गदितानि तदानी
माकलय्य स नलस्य बलारिः ।

अत्रादेशः । वो युष्माकं ह्रीर्नचेत्तर्हि सा ह्रीर्ममापि सुतरां नास्तु माभूत् ॥ ११३ ॥

कुण्डिनेति । कुण्डिनेन्द्रसुतया दमयन्त्या न लोकेत्यादिना निष्ठायोगे षष्ठीप्रतिषेधात्कर्त्तरि तृतीया। मां वरीतुमुररीकृतमङ्गीकृतमास्ते तया मद्वरणमङ्गीकृतं किलेति वार्तायां कर्म्मणि क्तः । अङ्गीकृतस्य कथञ्चिदिच्छार्थत्वमङ्गीकृत्य समानकर्तृकेषु तुमुनिति तुमुन्प्रत्ययः । ततो मयि दृष्टे परं व्रीडमेष्यति एवं च सा युष्मान् न स्वीकरिष्यति नेच्छति खलु॥११४॥

तदिति । तत्तस्मात्प्रसीदत प्रसन्ना भवत खेदं क्लेशं न विधत्त न कुरुत ममेदमेतद्दूतकृत्यं अत्यसदृशमत्यन्तायोग्यं हि । कुतः अनौपयिकेन अनुपायेन उपायं विनेत्यर्थः उपायात् ह्रस्वत्वं चेति स्वार्थे ठक् ह्रस्वश्च । तद्दूत्यं विधित्सुभिः विधातुमिच्छुभिः हास्यतैव सुलभा साध्यं प्रयोजनन्तु न सुलभं अनुचितकर्मारम्भो ऽनर्थाय भवेन्न फलायेत्यर्थः ॥ ११५ ॥

शंसति स्म किमपि स्मयमानः
स्वानुगाननविलोकनलोलः ॥ ११६ ॥

नाभ्यधायि नृपते ! भवतेदं
रोहिणीरमणवंशभवेन ।
लज्जते न रसना तव वाम्या
दर्थिषु स्वयमुरीकृतकाम्या ॥ ११७ ॥

भङ्गुरं न वितथं न कथं वा
जीवलोकमवलोकयसीमम् ।
येन धर्म्मयशसी परिहातुं
धीरहो चलति धीर ! तवापि ॥ ११८ ॥

ईदृशानीति । स बलारिरिन्द्रस्तदानीं नलस्य ईदृशानि गदितानि वाक्यान्याकलय्य आकर्ण्य स्मयमानो मन्दं हसन् स्वानुगानां यमादीनामाननविलोकने लोलः लोलुपः सन् स्ववाक्यानुमोदनार्थमिति भावः । किमपि किञ्चिद्वाक्यं शंसति स्म शशंस ॥ ११६ ॥

नेति । हे नृपते ! भवता इदं सेयमुच्चतरतेतिप्रतिषेधवाक्यं रोहिणीरमणवंशभवेन सोमवंश्येन नाभ्यधायि किंत्वसोमवंश्येनैवाभिहितमित्यर्थः । परिस्रुत परित्यागादिति भावः । कुतः अर्थिषु विषये स्वयमुरीकृतकाम्याङ्गीकृतमनोरथपूरणा तव रसना वाम्यात्प्रति कुलान्न लज्जते अतो न सोमवंश्य इव प्रतिभासीत्यर्थः ॥ ११७ ॥

भङ्गुरमिति । हे धीर ! विद्वन् ! इमं जीवलोकं प्राणिजातं भङ्गुरं विनश्वरं भञ्जभासमिदः घुरच् । वितथं दुःखमयत्वाद्विफलञ्च कथं वा नावलोकयसि पश्यसि न जानासीत्यर्थः । येनाज्ञानेन तत्रापि धीः धर्मयशसी अभङ्गुरे अवितथे अपीति भावः परिहातुं चलति अहो अस्थिरविषये लौल्यात् स्थिरकीर्तिसुकृतपरित्यागो भवादृशा मनुचित इत्यर्थः ॥ ११८ ॥

कः कुलेऽजनि जगन्मुकुटे वः
प्रार्थकेप्सितमपूरि न येन ।
इन्दुरादिरजनिष्ट कलङ्की
कष्टमत्र स भवानपि माभूत् ॥ ११९ ॥
यापदृष्टिरपि या मुखमुद्रा
याचमानमनु या च न तुष्टिः ।
त्वादृशस्य सकलः सकलङ्कः
शीतभासि शशकः परमङ्कः ॥ १२० ॥
नाक्षराणि पठता किमपाठि
विस्मृतः किमथवा पठितोऽपि ।

क इति । जगन्मुकुटे जगद्भूषणे वः कुले येन प्रार्थकेप्सितमर्थिमनोरथो नापूरि न पूरितं स कोऽजनिष्ट जातः न कोऽपीत्यर्थः । दीपजनेत्यादिना कर्तरि लुङ् चिण्प्रत्ययः । आदिः युष्माकं कूटस्थः इन्दुः कलङ्की अजनिष्ट जातः कष्टं अत्र लोके भवानपि स कलङ्की माभूत् अपकीर्तिं मा कुरुष्वेत्यर्थः ॥ ११९ ॥

अथ विचार्यमाणे त्वमेव कलङ्की न शशाङ्क इत्याह येति । त्वादृशस्य याचमानमनु अर्थिनं प्रति या अपदृष्टिः विकृतदर्शनं या च मुखमुद्रा मौनं या न तुष्टिः असन्तोषश्च सकलो विकारः स कलङ्कः शीतभासि चन्द्रे शशकः परं केवलमङ्कः श्वेतत्वादिव चिह्नं न तु कलङ्क इत्यर्थः ॥ १२० ॥

नेति किं च पूर्वोऽयमर्थिषु तेषां स्तवाद इत्याह । अक्षराणि पठता शैशवे मातृकाक्षराण्यभ्यस्यता त्वया नकारो निषेधवाची नशब्दो नापाठि किं ? पठितोऽपि विस्मृतः किं ? इत्यमर्थिजनस्य संशय एव दोला तया खेलनं क्रीडां नकार सकार खलु अत्रार्थिनामीदृक् संशयास्पदत्वेऽपि

इत्यमर्थिजनसंशयदोला
खेलनं खलु चकार नकारः ॥ १२१ ॥
अब्रवीत्तमनलः क्व नलेदं
लब्धमुज्झसि यशः शशिकल्पम् ।
कल्पवृक्षपतिमर्थिनमेनं
नाप कोऽपि शतमन्युमिहान्यः ॥ १२२ ॥
न व्यहन्यत कदापि मुदं यः
स्वःसदामुपनयन्नभिलाषः ।
तत्पदे त्वदभिषेककृतान्नः
स त्यजत्वसमतामदमद्य ॥ १२३ ॥

सम्बन्धोक्तेरतिशयोक्तिः स चोक्तसंशयोत्थापित इति सङ्करः ॥ १२१ ॥

अब्रवीदिति । अथ अनलोऽग्निस्तं नलमब्रवीत् हे नल ! इदं वक्ष्यमाणं लब्धं हस्तप्राप्तं शशिकल्पं चन्द्रप्रतिमं यशः क्व उज्झसि कुत्र त्यजसि किं तद्यशस्तदाह इह लोके जनः त्वदतिरिक्तः कोऽपि कल्पवृक्षपति मनन्यार्थिनमित्यर्थः एनं शतमन्युमिन्द्रमर्थिनन्नाप नाधत्त तद्धस्तगतमिन्द्रयाच्यत्वयशो वृथा मा विनाशीरित्यर्थः ॥ १२२ ॥

नेति । स्वःसदः स्वर्वासिनः सत्सूद्विषेति क्विप् । तेषां नः सम्बन्धी योऽभिलाषः मनोरथो मुदमुपनयन् स्वसिद्ध्या सन्तोषमावहन् कदापि न व्यहन्यत न विहितः अद्य तत्पदे तद्व्यवसिते तत्सम्पादनाधिकार इत्यर्थः । पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु इत्यमरः । अभिषेककृतां त्वां प्रापयतान्नः सम्बन्धी सोऽभिलाषः असमता असाधारणं स्वसिद्धौ अनन्यापेक्षत्वमिति यावत् तन्मदन्त्यजतु अद्य प्रभृति स्वार्थसाधने स्वयमेव समर्थाः सुरा इत्यहङ्कार मुवाच इत्यर्थः ॥ १२३ ॥

अब्रवीदथ यमस्तमहृष्टं
वीरसेनकुलदीप ! तमस्त्वाम् ।
यत्किमप्यभिबुभूषति तत् किं
चन्द्रवंशवसतेः सदृशन्ते ॥ १२४ ॥

रोहणः किमपि यः कठिनानां
कामधेनुरपि या पशुरेव ।
नैनयोरपि वृथाऽभवदर्थी
हा विधित्सुरसि वत्स ! किमेतत् ॥ १२५ ॥

याचितश्चिरयति क नु धीरः
प्राणने क्षणमपि प्रतिभूः कः ।

अब्रवीदिति । अथ यमः अहृष्टमसन्तुष्टं तं नलमब्रवीत् हे वीरसेनकुलदीप ! किमपि किञ्चिद्यत्तमो मोहोऽन्धकारश्च त्वामभिबुभूषति अभिभवितुमिच्छति तच्चन्द्रवंशो वसतिः प्रतिष्ठा यस्य तस्य ते सदृशं किं ? चन्द्रतेजसस्तमसा अभिभवोऽयुक्त इत्यर्थः ॥ १२४ ॥

रोहण इति । यो रोहणो मणीनामाकरो अद्रिः सोऽपि कठिनानां मध्ये किमपि कठिनः, या कामधेनुः सा पशुरेव, एनयोः पशुपाषाणयोरपि सम्बन्धी द्वितीयाटौस्स्वेन इति इदम्शब्दस्यैतच्छब्दस्य वा अन्वादेशे एनादेशः । अर्थी वृथा विफलितो नाभवत् हे वत्स ! किमेतद्विधित्सुर्विधातुमिच्छुरसि हेति विषादे हा कष्टं पशुपाषाणाभ्यामपि तुच्छवृत्तिरसि ॥ १२५ ॥

याचित इति । क नु कुत्र धीरः याचितः सन् चिरयति विलम्बते न कुत्रापि विलम्बत इत्यर्थः । कुतः क्षणमपि प्राणने जीवने प्रतिभूर्लग्नकः कः न कोऽपीत्यर्थः द्राङ्निमेषमिषेण शीघ्रपक्ष्मपातव्याजेन घूर्णनेन कनीनिकाभ्रमणेन पूर्णौ द्विनयनी नयनद्वयमेव दृढनिद्रां मरणं शंसति

शंसति द्विनयनी दृढ़निद्रां
द्राङ्‌निमेषमिषघूर्णनपूर्णा ॥ १२६ ॥
अभ्रपुष्पमपि दित्सति शीतं
सार्थिना विमुखता यदभाजि ।
स्तोककस्य खलु चञ्चुपुटेन
म्लानिरुल्लसति तद्घनसंघे ॥ १२७ ॥
ऊचिवानुचितमक्षरमेनं
पाशपाणिरपि पाणिमुदस्य ।
कीर्त्तिरेव भवतः प्रियदारा-
दाननीरझरमौक्तिकहारा ॥ १२८ ॥

नयनघूर्णनवत् क्षणिकं जीवनमित्यर्थः ॥ १२६ ॥

अभ्रेति । शीतं शीतलं अभ्रपुष्पं उदकं मेघपुष्पं घनरस इत्यमरः । तत्पुष्पं दुर्लभं वस्त्विति च गम्यते दित्सत्यपि दातुमिच्छत्यपि परिजिहीर्षतीत्यर्थः । घनसङ्घे मेघवृन्दे अर्थिना याचकेन स्तोककस्य चातकस्य दार्वाघाटोऽथ सारङ्गस्तोककश्चातकः समावित्यमरः । चञ्चुपुटेन साप्रतिज्ञा विमुखता पक्षिमुखत्वं पराङ्मुखत्वं च अभाजीति यत् तत्स्वावैमुख्यभजनात् म्लानिः जलधरमलिनत्वं वैवर्ण्यं च उल्लसति स्फुरति तत्र अर्थिन एव वैमुख्ये दातरियं म्लानिः किमु?दातृवैमुख्ये तस्मात्तादृशस्य तव इदमर्थिवैमुख्यं मनुचितमिति भावः ॥ १२७ ॥

ऊचिवानिति । अथ पाशपाणिर्वरुणः पाणिमुदस्य उद्यम्य एनं नलमुचितं युक्तमक्षरं वाक्यमूचिवानुवाच किमिति दाननीरझरा दानाम्बुधारा मौक्तिकहारा मुक्ताहारा यस्याः सा कीर्तिरेव भवतः प्रियदाराः प्रियकलत्रं पुंभूम्नि दारा इत्यमरः । अतो दमयन्तीलोभान्न कीर्तिं जहीहीत्यर्थः ॥ १२८ ॥

चर्म्म वर्म्म किल यस्य न भेद्यं
यस्य वज्रमयमस्थि च तौ चेत्।
स्थायिनाविह न कर्णदधीचौ
तन्न धर्म्ममवधीरय धीर! ॥ १२९॥
अद्य यावदपि येन निबद्धौ
न प्रभू विचलितुं बलिविन्ध्यौ।
आस्थितावितथतागुणपाशः
स्वादृशा स विदुषा दुरपासः ॥ १३०॥
प्रेयसी जितसुधांशुमुखश्री
र्या न मुञ्चति दिगन्तगतापि।

चर्म्मेति। यस्य चर्म वर्म कवचवदिति प्रतीयमानोत्प्रेक्षा। न भेद्यं दुष्करं तस्य छेदनमित्यर्थः। यस्य च अस्थि वज्रमयं वज्रात्मकं किलेति प्रसिद्धौ। तौ महासत्त्वशालिनौ कर्णदधीची इह लोके चेद् यदि न स्थायिनौ न स्थितिशीलौ प्रत्युत मरणशीला वेत्यर्थः। कर्णस्य दधीचेश्च उद्भविष्यन् काल उद्भूतश्च कालो नास्ति कालस्य प्रतिक्षणं भिन्नत्वादित्यर्थः। हे धीर! हे विद्वन्! तत् तस्मात् हेतोः धर्मं यं कञ्चनापीति भावः। नावधीरय नावमन्यस्व, अस्मिन् प्रत्यक्षपरिदृश्यमाने नश्वरे जगति धर्मादन्यत् स्थायिवस्तु नास्तीति त्वयापि अस्माद्दौत्यकरणरूपो धर्मो मा परिहार्य इत्यर्थः। अत्र प्रकरणोत्थकर्णदधीचिशब्दश्रवणाद श्रुतस्यापि धर्मस्य प्रकृतस्य सम्बन्धोपदेशात् केवला प्रकृतयोगिता॥ १२९॥

अद्येति। येन सत्यसम्बन्धपाशेन निबद्धौ बलिर्वैरोचनिः विन्ध्यश्च अद्य यावत् एतर्हिपर्यन्तं विचलितुमपि प्रभू समर्थौ न विदुषा जानता त्वादृशेन स्वाश्रुतस्य प्रतिज्ञातार्थस्य अवितथता सैव गुणः उत्कृष्टधर्मः स एव पाशो बन्धः सः दुरपासः दुरुच्छेदः बलिविन्ध्ययोर्दृष्टान्तेन यावज्जीवं निर्बन्धेनापि प्रतिश्रुतार्थकार्यनिर्वाहः कार्य इत्यर्थः॥ १३०॥

भङ्गिसङ्गमकुरङ्गदृगर्थे
कः कदर्थयति तामपि कीर्त्तिम् ॥ १३१ ॥
यान् परं प्रति परेऽर्थयितार
स्तेऽपि यं वयमहो स पुनस्त्वम्।
नैव नः खलु मनोरथमात्रं
शूर ! पूरय दिशोऽपि यशोभिः ॥ १३२ ॥
अर्थितां त्वयि गतेषु सुरेषु
म्लानदानजनितोरुयशःश्रीः।

प्रेयसीति। प्रेयसी प्रियतमा जिता सुधांशुसुखानां चन्द्रादीनां श्रीर्यया सा अन्यत्र जितसुधांशुमुखश्रीर्यस्याः सा तथोक्ता या कीर्तिर्दिगन्तगता देशान्तरगतापि न मुञ्चति तामपि कीर्तिं भङ्गिसङ्गेऽभङ्गुरसङ्गतिर्यस्याः तस्याः कुरङ्गदृश एणाक्ष्याः अर्थे तदर्थन्तादर्थ्येऽव्ययीभावः कुत्सितोऽर्थः कदर्थः कोस्तत्पुरुषेऽचि कुशब्दस्य कदादेशः तं करोतीति कदर्थयति को नाम अस्थिरार्थे स्थिरञ्जह्यादिति भावः॥ १३१ ॥

यानिति। परे अन्यजनाः वरं प्रतिष्ठालाभं प्रति उद्दिश्य यानस्मानर्थयितारः ताच्छीले तृन् न लोकेत्यादिना षष्ठीप्रतिषेधात् द्वितीया ते वयमपि यं त्वामर्थयितारः स्म अहो स त्वं पुनर्नोऽस्माकं मनोरथमात्रं मनोरथमेव नैव पूरय किन्तु हे शूर ! यशोभिर्दिशोऽपि पूरय खलु तस्मादस्मन्मनोरथपूरणेन ते दिगन्तविश्रान्ता कीर्तिर्भविष्यतीति भावः॥ १३२

अर्थितामिति। सुरशाखी कल्पवृक्षः सुरेष्वमीषु त्वयि विषये अर्थितां गतेषु सत्सु म्लाना अर्थ्यभावात् क्षीणा दानजनिता दानजन्या उरुर्महती यशःश्रीः कीर्तिसम्पत्तिर्यस्य सः तथा सन् केवलेन कुसुमेन गगनं पाण्डुशुभ्रं विधत्तां ननु वितरणयशसां स्वार्थिनामन्यार्थित्वेन त-

अद्य पाण्डु, गगनं सुरशाखी
केवलेन कुसुमेन विधत्ताम् ॥ १३३ ॥
प्रवसते भरतार्ज्जुनवैण्यवत्
स्मृतिधृतोऽपि नल ! त्वमभीष्टदः ।
स्वगमनाफलतां यदि शङ्कसे
तदफलं निखिलं खलु मङ्गलम् ॥ १३४ ॥
इष्टिं नः प्रति ते प्रतिश्रुतिरभूद्याद्या सुराह्लादिनी
धर्म्मार्थी सृज तां श्रुतिप्रतिभटीकृत्यान्विताख्यापदाम् ।

न्निदानकथास्तमयादिति भावः ॥ १३३ ॥

अत्र यात्रावैफल्यशङ्कया ते सङ्कोचस्तन्नाशङ्कनीयमेवेत्याह प्रवसत इति । हे नल ! प्रवसते प्रयाणं कुर्वते भरतः शाकुन्तलेयः अर्जुनः हैहयः वैण्यः पृथुः तैस्तुल्यं तद्वत् तेन तुल्यं क्रिया चेद्वतिरिति वतिः । स्मृत्या धृतः स्मृतिधृतः स्मर्यमाणोऽप्यभीष्टदः इष्टार्थप्रदः त्वं स्वगमनस्य स्वयात्रायाः अफलतां वैफल्यं शङ्कसे यदि तत्तर्हि लोके निखिलं सर्वमपि मङ्गलं यात्राकालीनं त्वत्स्मरणलक्षणं मङ्गलाचरणमफलं खलु तथा च वैण्यं पृथुञ्चार्जुनं हैहयञ्च शाकुन्तलेयं भरतं नलञ्च । एतान् भुवं यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्चेति शास्त्रं प्रमाणं स्यादित्यर्थः । तथा च यस्य स्मरणादन्येषामर्थसिद्धिस्तस्य तवार्थसिद्धौ कः सन्देह इति भावः ॥ १३४ ॥

इष्टिमिति । अद्य नोऽस्माकं इष्टिं इज्यां यागञ्च प्रति इष्टियागेच्छयोः इष्टिरित्यमरः । यजेरिष्टेश्च स्त्रियां क्तिन् वचिस्वपीत्यादिना यजेः सम्प्रसारणं व्रश्चादिना षत्वं शेषं समानं इच्छेति इष्टेः क्तिन् प्रत्ययापवाद इति काशिका तथापि प्रयोगबाहुल्यात् साधुत्वं द्रष्टव्यं । स्वः स्वर्गमन्यत्र स्वरैरुदात्तादिभिः आह्लादयति इति स्वराह्लादिनी धर्मोऽर्थः प्रयोजनमभिधेयञ्च यस्याः सा धर्म्मार्थी या प्रतिश्रुतिः जीवितावधि

त्वत्कीर्त्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशना
द्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥१३५॥
यं प्रासूत सहस्रपादुदभवत्पादेन खञ्जः कथं
स च्छायातनयः सुतः किल पितुः सादृश्यमन्विष्यति ।

किमप्यधिकं वेति श्लोकोक्ता स्वमनोरथपूरणे प्रतिज्ञा अभूत् तां प्रतिश्रुतिं श्रुतिप्रतिभटीकृत्य वेदप्रतिनिधीकृत्य सत्यापयित्वेत्यर्थः अन्विताख्यापदां व्रज सत्यत्वेन श्रुतिप्रतिनिधित्वात् प्रतिश्रुतिरित्यन्वर्थनामाक्षरां कुरु सत्यप्रतिज्ञो भवेत्यर्थः तस्य फलमाशीर्मुखेनाह त्वदिति । त्वत्कीर्तिः पुनः त्वद्यशस्तत् त्रिभुवनं भुवनत्रयं समाहार द्विगोरेकवचनं पात्रादित्वात् नपुंसकत्वं। पुनती पावयन्ती पुनातेः शतरि ङीप् द्रव्याणां नीलपीतादिद्रव्याणां शुभ्रः शुक्लगुणः गुणे शुक्लादयः पुंसि इत्यमरः । तेनाद्वयादेशनाद्भेदापादनात् शितिपीतादिनामभिः वाचकशब्दैरन्वयं वाच्यत्वलक्षणं सम्बन्धं लुम्पतु निवर्तयतु अर्थिमनोरथपूर्त्या कीर्तिं सम्पादयेत्यर्थः अत्र नीलादिवस्तूनां स्वगुणत्यागेन तत् कीर्तिग्रहणात् तद्गुणालङ्कारः । तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिरिति लक्षणात् ॥ १३५ ॥

यमिति। यं शनैश्चरं सहस्रं पादा रश्मयोऽङ्घ्रयश्च यस्य स सहस्रपात् पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः।संख्यासुपूर्वस्येति समासान्तो अन्तलोपः प्रासूत प्रसूतवान् स च्छायातनयः शनैश्चरः मन्दः शनिः पङ्गुकालौ छायापुत्रो सितश्च स इत्यमरः । कथं वा पादेन खञ्जः विकलः सन् येनाङ्गविकार इति तृतीया उदभवदुत्पन्नः सुतः पितुः सादृश्यमन्विष्यति किल प्राप्नोति खलु एतस्य प्रश्नस्याद्य त्वत्तेजसां लङ्घने सहस्रैः सहस्रसंख्यैरपि अखिलतिमत्वघीयोऽण् प्रत्ययः अङ्घ्रिभिः पङ्गुः खञ्जः पूर्ववत्तृतीया अभिव्यक्तीभवन् भानुमान् सूर्यो नोऽस्माकमुत्तरं समजनि सञ्जातः जनेः कर्तरि लुङ् दीपजनेत्यादिना चिणि इणो लुक्। अत्रार्कस्य पङ्गोः पङ्गुत्वोक्तिरतिशयोक्तिभेदः तद्धेतुत्वञ्च शनैश्चरे पङ्गुत्वस्योत्प्रेक्ष्यन इति सङ्करः ॥ १३६ ॥

एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लङ्घने
साहस्रैरपि पङ्‌क्तिभिरभिव्यक्तीभवन् भानुमान् ॥ १३६ ॥
इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दौत्यभारं वभार।
अङ्गीकारङ्गतेऽस्मिन्नमरपरिवृढः सम्भृतानन्दमूचे
भूयादन्तर्द्धिसिद्धेरनुविहितभवच्चित्तता यत्र कुत्र ॥ १३७ ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम्।
तस्य श्रीविजयप्रशस्तिरचनाततस्य नव्ये महा
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः ॥ १३८ ॥

इतीति। क्षितीशो नलः त्रिदशपरिषदः सुरसङ्घस्य एवं चाटुगर्भाः प्रियप्रायास्ता गिरः आकर्ण्य वैदर्भीकामुकः सन्नपि लषपतेत्यादिना कमेरुकप्रत्ययः। अतएव न लोकेत्यादिना षष्ठीप्रतिषेधान्नभुपिपासुवद्द्वितीया समासः। प्रसभविनिहितं बलादारोपितं दूतत्वभारम्बभार अस्मिन्नलेऽङ्गीकारं गते सति अमरपरिवृढो देवेन्द्रः हे नल! यत्र कुत्रान्तर्धिसिद्धेरन्तर्धानशक्तेः अनुविहितभवच्चितता अनुसृतत्वन्मनस्कता भूयात् भवच्चित्तानुसारेण सर्वत्र तवान्तर्धानाविर्भावशक्तिरस्त्विति संभृतानन्दं सहर्षमूचे तिरस्कारिणीं विद्यां प्रादादित्यर्थः ॥ १३७ ॥

श्रीहर्षमित्यादि सुगमं, श्रीमयीभिः विजय प्रशस्तिभिः ग्रन्थविशेषस्य रचना तातस्य निर्माणकर्तुरित्यर्थः ॥ १३८ ॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्यायकोलाचल-
मल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने
पञ्चमः सर्गः।

नैषधचरितम्।

षष्ठः सर्गः।

दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषधप्रधानः।
स भीमभूमीपतिराजधानीं लक्ष्यीचकाराथ रयस्यदस्य ॥ १ ॥
भैम्या समं नाजगणद्वियोगं स दूतधर्म्मे स्थिरधीरधीशः।
पयोधिपाने मुनिरन्तरायं दुर्व्वारमप्यौर्व्वमिवौर्व्वशेयः ॥ २ ॥

दूत्यायेति। अथ दूत्याकारानन्तरं द्विषां निषेद्धा निवारयिता निषधानां जनपदानां प्रधानः मुख्यो ऽधिपतिरित्यर्थः। स नलो दैत्यारिपतेरिन्द्रस्य दूत्याय दूतस्य भावकर्मणीति यप्रत्ययः। भीमभूपतिराजधानीं कुण्डिननगरं रयस्य स्ववेगस्य लक्ष्यीचकार लक्ष्यमकरोत् ॥ १ ॥

भैम्येति। अधीशो मनोनियमनसमर्थः। अतएव दूतधर्म्मे दूतकृत्ये स्थिरधीरक्षुब्धः सन्नविचलन् नलो भैम्या समं सह वियोगं साकंसत्रासमंसहेत्यमरः। और्व्वशेयः। उर्वशीपुत्त्रो मुनिरगस्त्य और्व्वशेयः कुम्भयोनिरगस्त्यो विन्ध्यकुट्टन इति हलायुधः। पयोधिपाने दुर्व्वारमपि उर्व्वश्याः अपत्य मौर्व्वशेयः वरुणभयान्मातागुप्त इति स्वनिहित मौर्व्वं वडवाग्निमिव अन्तरायं नाजगणत्। अन्तरायत्वेन नामन्यत। भैमीवियोगमपि विषह्यप्रतिज्ञाभङ्गभयात् दूत्यमेव दृढमवलम्बितवानित्यर्थः ॥ २ ॥

नलप्रणालीमिलदम्बुजाक्षीसंवादपीयूषपिपासवस्ते ।
तदध्ववीक्षार्थमिवानिमेषा देशस्य तस्याभरणीबभूवुः ॥ ३ ॥
तां कुण्डिनाख्यापदमात्रगुप्तामिन्द्रस्य भूमेरमरावतीं सः ।
मनोरथः सिद्धिमिव क्षणेन रथस्तदीयः पुरमाससाद ॥ ४ ॥
भैमीपदस्पर्शकृतार्थरथ्या सेयं पुरीत्युत्कलिकाकुलस्ताम् ।
नृपो निपीय क्षणमीक्षणाभ्यां भृशं निशश्वास सुरैः क्षताशः ॥ ५ ॥
स्विद्यत्प्रमोदाश्रुलवेन वामं रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः ।

नलेति । ते देवाः नल एव प्रणाली जलनिर्गममार्गः । तया मिलत् प्रसरदम्बुजाक्षीसंवादपीयूषं भैमीसल्लापामृतं पिपासवः पातुमिच्छवः सन्तः मधुपिपासव इतिवत् द्वितीयासमासः । तदध्ववीक्षार्थं नलमार्गप्रतीक्षणार्थमिव अनिमेषाः सन्तः इत्युत्प्रेक्षा । तस्य देशस्य आभरणीबभूवुः । तदागमनपर्य्यन्तं तत्रैव तस्थुरित्यर्थः ॥ ३ ॥

तामिति । तस्यायं तदीयो नलस्य स रथस्तां कुण्डिनमिति यदाख्यापदं नामपदं तन्मात्रेण गुप्तां छन्नाममरावतीं तत्कल्पामित्यर्थः । भूमेरिन्द्रस्य भीमभूपतेः पुरं मनोरथः सिद्धिमिव क्षणेन आससाद ॥ ४ ॥

भैमीति । नृपो नलः इयं भैमीपदस्पर्शनकृतार्थरथ्या सफलमार्गा सा श्रूयमाणा पुरीत्युत्कलिकया उत्कण्ठया आकुलः क्षुभितः सन् क्षणमीक्षणाभ्यां तां पुरीं निपीय सतृष्णं दृष्ट्वा सुरैः क्षताशः छिन्नाशः सन् भृशं निशश्वास ॥ ५ ॥

अथ एवं खिद्यमानस्य तस्य इष्टसिद्धिसूचकं दक्षिणाक्षिस्पन्दनं जातमित्याह स्विद्यदिति । अस्य तत् वामं चक्षुः प्रमोदाश्रुलवेन आनन्दवाष्पकणेन स्विद्यत् स्विन्नं सत् पक्ष्मभिरुन्मिषद्भिरिति शेषः । रोमाञ्चभृत् रोमाञ्चितं सत् तस्याः पुरो नगर्याः स्फुरत् स्फुरन्तं प्रकाशमानं नवोपभोगं अपूर्वदर्शनमन्यस्त्रीसङ्गमं च प्राप । अन्यत् पुनः दक्षिणन्तु कम्पं चलनं तत्राप । वामाक्ष्याः स्वेदरोमाञ्चाविव दक्षिणस्य तु वेपथुरप्यधिकः

अन्यत्पुनः कम्प्रमपि स्फुरत् तत्तस्याः पुरः प्राप नवोपभोगम्॥६॥
रथादसौ सारथिना सनाथाद्राजावतीर्य्याशु पुरं विवेश।
निर्गत्य बिम्बादिव भानवीयात् सौधाकरं मण्डलमंशुसङ्घः॥७॥
चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्त्तिर्ववृते न दृश्या।
बभूव तच्चित्रतरन्तथापि विश्वैकदृश्यैव यदस्य मूर्त्तिः॥ ८ ॥
जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम्।
विगाहमाना पुरमस्य दृष्टि रथाददे राजकुलातिथित्वम् ॥ ९ ॥

सात्त्विकः संवृत्तं इति भावः। आनन्दाश्रुपक्ष्माविस्पन्देषु स्वेदादिसात्त्विकरूपणाद्रूपकं तदुल्लासितभोगव्यवहारसमारोपात् पुरीचक्षुषोः स्त्रीपुंस्त्वप्रतीतेः रूपकसङ्कीर्णसमासोक्ति रलङ्कारः॥ ६ ॥

रथादिति। अथानन्तरं राजा नलः सारथिना सनाथात् सहिता द्रथादवतीर्य्य अंशुसङ्घोऽर्कांशुसमूहो भानवीयाद्बिम्बान्निर्गत्य सौधाकरं चान्द्रमण्डलमिवाशु पुरं कुण्डिनं विवेश। सन्ध्यासमये शशिनि रवेर्दीधितयो मूर्च्छिता स्तमोनैशं क्षपयन्ति॥ ७॥

चित्रमिति। तदा कुण्डिनवेशिनः कुण्डिन नगरं प्रविष्टस्य नलस्य सा मूर्त्ति स्तनुर्यद्दृश्या चक्षुर्ग्राह्य न ववृते न संवृत्ता तत् चित्रं आश्चर्य्यम्। एतावत्कालपर्य्यन्तं या चक्षुर्ग्राह्या आसीत् सा अधुना प्रच्छन्ना भवति इति आश्चर्य्यम्। रमणीयत्वेन प्रसिद्धा सा नलस्य मूर्त्ति र्यद्दृश्या रमणीया न संवृत्ता इति आश्चर्य्यमेव। यद्यपि दृश्या न ववृते तथापि नलस्य मूर्त्ति र्यत्विश्वेषां सकलजनानां एका मुख्या दृश्यैव चक्षुर्ग्राह्यैव अथच रमणीयैव बभूव तच्चित्रतरम्। अदृश्याया मूर्त्तेः सकलजनदृश्यत्वमाश्चर्य्याय भवति॥ ८ ॥

राजभवनदर्शनमाह। अथ अनन्तरं विदग्धै रभिज्ञै र्जनैः। मुग्धैः सुन्दरै र्भवनैः प्रासादैश्च पदे पदे विस्मयस्य आश्चर्य्यस्य कल्पवल्लीं कल्पलतां

हेलां दधौ रक्षिजनेऽस्त्रसज्जे लीनश्चरामीति हृदा ललज्जे।
द्रक्ष्यामि भैमीमिति सन्तुतोष दूत्यं विचिन्त्य स्वमसौ शुशोच ॥१०
अथोपकार्य्याममरेन्द्रकार्य्यात् कक्षासु रक्षाधिकृतैरदृष्टः।
भैमीन्दिदृक्षुर्बहु दिक्षु चक्षुर्दिशन्नसौ तामविशद्विशङ्कः ॥ ११ ॥
अयंक इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्य कण्ठम्।
दृशन्दधौ विस्मयनिस्तरङ्गां स लङ्घितायामपि राजसिंहः ॥ १२॥

आश्चर्यवहामितियावत्। पुरं कुण्डिननगरीम् विगाहमाना अस्य नलस्य दृष्टिः राजकुलातिथित्वं आददे। राजसदनं ददर्शेत्यर्थः ॥ ९ ॥

हेलामिति। असौ नलः अस्त्रसज्जे सन्नद्धे रक्षिजने राजकुलरक्षकवीरवर्गे सत्यपि हेलामवज्ञां दधौ इति गर्वोक्तिः। लीनः कष्टं चरामीति शूरोऽपि गूढश्चरामीति हेतो र्हृदा ललज्जे। भैमीं द्रक्ष्यामीति सन्तुतोष। स्वं स्वकीयं दूत्यं विचिन्त्य शुशोचेति निर्वेदोक्तिः। अत्र गर्वलज्जाहर्षनिर्वेदानां बहूनां भावानां परस्परोपमर्द्देन समावेशाद्भावशबलतोक्ता ॥ १० ॥

अथेति। असौ नलः कक्षासु गृहप्रकोष्ठेषु कक्षा प्रकोष्ठे हर्म्यादेरित्यमरः। रक्षायामधिकृतैः रक्षिजनैरदृष्टः सन् भैमीं दिदृक्षुः। द्रष्टुमिच्छुरतएव दिक्षु चक्षुर्भूयिष्ठं दिशन् प्रेरयन् विशङ्को निर्भयः स तां पूर्वनिर्दिष्टामुपकार्य्यां राजसद्म उपकार्य्या राजसद्म इति विश्वः। अमरेन्द्रकार्य्याद्धेतो रविशत् ॥ ११ ॥

अयमिति। विभुः समर्थः राजा सिंह इव राजश्रेष्ठः उपमितसमासः। स नलः अयं क इति अन्यस्य जनान्तरस्य निवारकाणां रक्षिणाङ्गिरा वाक्येनैव हेतुना कण्ठं विभुज्य किं दृष्टोऽस्मीति शङ्कया ग्रीवां त्रिकलय्य वक्रीकृत्येत्यर्थः विलङ्घिताया अतीतायामपि द्वारि द्वारे विस्मयेन किमेते मामद्राक्षुरित्याश्चर्य्येण निस्तरङ्गां निर्निमेषां दृशन्दधौ सिं-

अन्तःपुरान्तः स विलोक्य बालां काञ्चित्समालब्धुमसंवृतोरुम् ।
निमीलिताक्षः परया भ्रमन्त्या सङ्घट्टमासाद्य चमच्चकार ॥ १३ ॥
अनादिसर्गस्रजि वानुभूता चित्रेषु वा भीमसुता नलेन ।
जातैव किम्वा जितशम्बरस्य सा शाम्बरीशिल्पमलक्षि दिक्षु ॥१४॥
अलीकभैमीशतदर्शनान्न तस्यान्यकन्याप्सरसो रसाय ।
भैमीभ्रमस्यैव ततः प्रसादाद्भैमीभ्रमस्तेन न तास्वलम्भि ॥ १५ ॥

हस्य ग्रीवाभङ्गेन लङ्घिताध्वदर्शनं युक्तमितिभावः। स्वभावोक्तिरलङ्कारः ॥१२॥

अन्तरिति। स नलोऽन्तःपुरस्यान्तः अभ्यन्तरे अव्ययमेतत्। समालब्धुमुद्वर्त्तयितु मसंवृतोरुमच्छन्नोरुदेशां काञ्चिद्बालां विलोक्य निमीलिताक्षः सन् पराङ्गनादर्शनपापभीत्येतिभावः। भ्रमन्त्या तत्र सञ्चरन्त्या परया स्त्र्यन्तरेण सङ्घट्टमभिघातमासाद्य द्वयोरपि दृष्टेः प्रतिबन्धादिति भावः। चमच्चकार चमदित्यनुकार शब्दोऽयम् ॥ १३ ॥

अनादीति। अनादौ सर्गस्रजि सृष्टिपरम्परयां वा कचिज्जन्मान्तर इत्यर्थः। चित्रेष्वालेख्येषु वा अनुभूता अत्यन्तानुभूते भ्रमासम्भवादितिभावः। किम्वा जितशम्बरस्य मायिनो मायाविनः कामस्य शाम्बरीशिल्पं मायासृष्टिः। स्यान्माया शाम्बरीत्यमरः। जातैव सा भीमसुता नलेन दिक्षु अलक्षि प्रतिदिश मलक्ष्यत लक्षेः कर्मणि लुङ्। अत्रालीकभैमीसाक्षात्कारो जन्मान्तरानुभवाद्वा चित्रानुभवाद्वा केवलं मदनमायाबलाद्वेति हेतूत्प्रेक्षा ॥ १४ ॥

अलीकेति। अन्याः कन्याप्सरसः कन्याः अप्सरस इव उपमित समासः। कन्या अप्यन्या स्तत्रत्याः स्त्रियः। अलीकभैम्या सह दर्शनाद्धेतो स्तस्य नलस्य रसाय रागाय नाभवत्। ततोऽपि तासामपकृष्टत्वादिति भावः। किं सादृश्यात् तासु अपि तस्य भैमीभ्रमो न बभूवेत्यत आह भैमीति। तत इति। सार्वविभक्तिकस्तसिः। तस्य भैमीभ्रमस्येव प्रसादात् सामर्थ्यात्तेन नलेन तास्वन्तःपुरस्त्रीषु भैमीभ्रमोनालम्भि न प्राप्तः। अत्यन्त वैसादृश्यादिति भावः ॥ १५ ॥

भैमीनिराशे हृदि मन्मथेन दत्तस्वहस्ताद्विरहाद्विहस्तः।
स तामलीकामवलोक्य तत्र क्षणादपश्यन् व्यषदद्विबुद्धः ॥ १६ ॥
प्रियां विकल्पोपहृतां स यावद्दिगीशसन्देशमजल्पदल्पम्।
अदृश्यवाग्भीषितभूरिभीरुभवो रवस्तावदचेतयत्तम् ॥ १७ ॥
पश्यन् स तस्मिन् मरुतापि तन्व्याः स्तनौ परिस्प्रष्टुमिवात्तवस्त्रौ।
अक्षान्तपक्षान्तमृगाङ्कमास्यं दधार तिर्य्यग्बलितं विलक्षः ॥ १८ ॥
अन्तःपुरे विस्तृतवागुरेऽपि बालावलीनां बलितैर्गुणौघैः।
न कालसारं हरिणान्तदक्षिद्वयं प्रभुर्बद्धुमभून्मनोभूः ॥ १९ ॥

भैमीति। भैम्यां निराशे सुरैः हताशे हृदि मन्मथेन दत्तस्वहस्ताद्दत्तस्वहस्तावलम्बाज्जीवितादित्यर्थः। विरहाद्विहस्तो विह्वलः स नलः। अलीकां तां मिथ्याभैमीमवलोक्य क्षणाद्विबुद्धो निवृत्तभ्रमस्तत्र तामपश्यन् व्यषदत्। विषण्णोऽभूत्। सदेर्लुङि ङित्वाल्लेरङादेशः ॥ १६ ॥

प्रियामिति। स नलो विकल्पोपहृतां विभ्रमोपमितां प्रियां यावद्दिगीशसन्देशं इन्द्रादिवाचिकमल्पमजल्पत् अकथयत्। तावदृश्यया अलक्ष्यवक्त्राया वाचा हेतुकर्त्र्या भीषितास्त्रासिताश्शङ्किताः भूरयोऽनेका भीरवो भयशीलास्त्रियः ताभ्यो भवति तद्भवो रवः कलकलस्तं नलमचेतयत्। अबोधयत्। चेतनेर्भौवादिकाद्धेतुमण्णिच् ॥ १७ ॥

पश्यन्निति। स नलस्तत्रान्तःपुरे मरुताऽप्यचेतनेनापीति भावः। परिस्प्रष्टुं सस्प्रष्टुमिव आत्तवस्त्रौ अपनीतांशुकौ तन्व्याः स्तनौ पश्यन्विलक्षोलज्जितः सन् अक्षान्तपक्षान्तमृगाङ्कमसोढ़पूर्णिमाचन्द्रमास्यन्तिर्य्यग्वलितं साचीकृतं बभार। यत्र अचेतनस्य वायोरपि चपलता तत्रायं निर्विकार इवेत्यहो जितेन्द्रियत्वमस्येति भावः ॥ १८ ॥

अन्तरिति। अन्तःपुरे बालावलीनां स्त्रीसमूहानां बवयोरभेदात् समूहानां मृगाणाञ्च। वलितैः सविलासैः गुणौघैर्विस्तृतवागुरः प्रसारितमृगबन्धनिकेऽपि वागुरा मृगबन्धनीत्यमरः मनोभूरेव मृगयुरिति शेषः।

दोर्मूलमालोक्य कचं रुरुत्सो स्ततः कुचौ तावनुलेपयन्त्याः ।
नाभीमथैष श्लथवाससोऽनु मिमील दिक्षु क्रमकृष्टचक्षुः ॥ २० ॥
मीलन्न शेकेऽभिमुखागताभ्यां धर्त्तुन्निपीड्य स्तनसान्तराभ्याम् ।
स्वाङ्गान्यपेतो विजगौ स पश्यन् पुमङ्गसङ्गोत्पुलके ततस्ते ॥२१॥
निमीलनस्पष्टविलोकनाभ्यां कदर्थितस्ताः कलयन् कटाक्षैः ।
स रागदर्शीव भृशं ललज्जे स्वतः सतां ह्रीः परतोऽपि गुर्वी॥२२

तस्य नलस्य अक्षिद्वयमेव कालसारं कृष्णसारम् अक्षिद्वयं तु कालेन कनीनिकार्द्धेन सारं श्रेष्ठं हरिणं बद्धुमाकृष्टुं संयन्तुं च प्रभुः शक्तो नाभूत्। जितेन्द्रियत्वादस्येति भावः। अत्र अक्ष्यादिषु हरिणत्वादिरूपणान्मनोभुवो मृगयुत्वं गम्यत इत्येकदेशविवर्त्तिरूपकम् ॥ १९ ॥

दोरिति। एष नलः। कचं केशपाशं रुरुत्सोः रोद्धुं बन्धुमिच्छोः कस्याश्चिद्दोर्मूलमालोक्य ततोऽनन्तरं कुचावनुलेयपन्त्या स्तौ कुचावालोक्य अथ श्लथवाससः स्रस्तांशुकाया नाभीमालोक्य अनु अनन्तरं दिक्षु पुरःपार्श्वभागेषु क्रमेण कृष्टचक्षुः सन् मिमील मीलिताक्षोऽभूत्। तत्र तदास्त्रीमण्डलं तस्याः पापभीरोर्नेत्रनिमीलनमेव प्राप्तमित्यर्थः ॥ २० ॥

मीलन्निति। मीलन्निमीलिताक्षः स नलः। अभिमुखमन्योन्याभिमुखमागताभ्यां तथापि स्तनाभ्यां निमित्तेन सान्तराभ्यां काभ्याञ्चित् स्त्रीभ्यां मध्ये निपीड्य निरुध्य धर्त्तुं गृहीतुं न शेके शक्यो नाभूत्। स नलः पश्चादपेतोऽपसृतः स्वाङ्गानि विजगौ अन्तःपुरस्त्रीसंस्पर्शदोषाद्विजगर्हेति। स्त्रियौ पुनः पुंसः अङ्गसङ्गेन उत्पुलके जाते ॥ २१ ॥

निमीलनेति। निमीलनं च स्पष्टविलोकनं च ताभ्यां कदर्थितः विरक्तीकृतः। निषिद्धस्पर्शनदोषोद्वेजितः स नलस्ताः स्त्रियः कटाक्षैः कलयन् निर्व्विकल्पेन गृह्णन् रागेन पश्यतीति रागदर्शीस इव भृशं ललज्जे कष्टं कामुकदृष्ट्या पश्यामीति भृशंपरितप्तोऽभूदित्यर्थः। नन्वप्रकाशेऽर्थे का लज्जा तत्राह। सतां परतोऽपि स्वतो ह्रीर्गुर्वी अकामादप्यकार्य्यकरणे परस्मादपि स्वस्मादेव लज्जते सज्जन इत्यर्थान्तरन्यासोऽलङ्कारः ॥ २२॥

रोमाञ्चिताङ्गीमनु तत्कटाक्षै र्भ्रान्तेन कान्तेन रतेर्विसृष्टः।
मोघः शरौघः कुसुमानि नाभू त्तद्धैर्य्यपूजां प्रतिपर्य्यवस्यन् ॥२३॥
छित्त्वैकवर्त्मैवमिह भ्रमन्त्याः स्पर्शः स्त्रियाः सुत्यज इत्यवेत्य।
चतुष्पथस्याभरणं बभूव लोकावलोकाय सतां स दीपः॥ २४॥
उद्वर्त्तयन्त्या हृदये निपत्य नृपस्य दृष्टिर्न्यपतद् द्रुतैव।
वियोगिवैरात् कुचयोर्नखाङ्कैरर्द्धेन्दुलीलैर्गलहस्तितेव ॥ २५॥

रोमाञ्चितेति। रोमाञ्चिताङ्गी मनु पुमङ्गात् पुलकितगात्री सुद्दिश्य नलस्य कटाक्षैः कटाक्षवीक्षणैः भ्रान्तेन अयमस्यामनुरक्त इति मन्वानेन रतेः कान्तेन कामेन निर्दिष्टः प्रयुक्तः कुसुमान्येव शरौघः तस्य नलस्य धैर्य्यस्य निर्विकारचित्तस्य पूजां प्रति पूजायां पर्य्यवस्यन् पूजात्वेन परिणमन् मोघोऽव्यर्थो नाभूत्। शत्रोरपि गुणः पूज्यो भवेदितिभावः। अत्र नलधैर्य्यभङ्गायुक्तकुसुमशरजालस्य न केवलं तद्भङ्गकत्वं प्रत्युत तत्पूजकत्वमापन्नमित्यनर्थोक्तिरूपो विषमालङ्कारः॥ २३॥

छित्त्वेति। सतां दीपः सुजनश्रेष्ठः सतां भावानां प्रकाशकः प्रथितश्च स नलः इहान्तःपुरे भ्रमन्त्याःसञ्चरन्त्या स्त्रियाः स्पर्शः एकमभिन्नं वर्त्म छित्त्वैव सुत्यज इत्यवेत्य निश्चित्य लोकावलोकाय सञ्चारजनसन्दर्शनाय अन्यत्र लोकानां जनानां व्यवहाराय चतुर्णां पथां समाहारश्चतुष्पथं तद्धितार्थेत्यादिना समाहारे द्विगुः। ऋक्पूरित्यादिना समासान्तः पथः सङ्ख्याव्ययादिति नपुंसकत्वम्। तस्याभरणं बभूव। तत्र स्थित इत्यर्थः। क्लिष्टमार्गे स्त्रीसम्बाधादक्लिष्टे चतुष्पथे स्थित्वा समन्तादवलोकितवान् इत्यर्थः। चतुष्पथस्थितो दीपो लोकावलोकाय कल्पत इति ध्वनिः॥ २४॥

उद्वर्त्तयन्त्या इति। नृपस्य दृष्टिः। उद्वर्त्तयन्त्याः गात्रमुन्मार्जयन्त्या हृदये वक्षसि निपत्यार्द्धेन्दुलीलैरर्द्धचन्द्राख्यैः कुचयोर्नखाङ्कैः कर्तृभिर्वियोगिषु वैरादिन्दुत्वप्रयुक्तविरोधो गले हस्तो गलहस्तः। तद्वत् कृता गलहस्तिता। हस्तेन गले गृहीत्वा नुन्नेवेत्युत्प्रेक्षार्थः। मत्वन्त्यात् तत्करोतीति णिचि णाविष्टवद्भावे विन्मतो र्लुकि ततः कर्मणि क्तः अर्द्धेन्दु-

तन्वीमुखं द्रागधिगत्य चन्द्रं वियोगिनस्तस्य निमीलिताभ्याम् ।
द्वयं द्रढीयः कृतमीक्षणाभ्यां तदिन्दुता च स्वसरोजता च ॥२६॥
चतुष्पथे तं विनिमीलिताक्षं चतुर्दिगेताः सुखमग्रहीष्यन्।
संघट्य तस्मिन् भृशभीनिवृत्तास्ता एव तद्वर्त्म न चेददास्यन् ॥२७॥
संघट्टयन्त्यास्तरसात्मभूषाहीराङ्कुरप्रोतदुकूलहारी ।
दिशा नितम्बंपरिधाप्य तन्व्यास्तत्पापसन्तापमवाप भूपः ॥२८॥
हतः कयाचित् पथि कन्दुकेन संघट्य भिन्नकरजः कयापि ।
कयाचनाक्तः कुचकुङ्कुमेन सम्भुक्तकल्पः स बभूव ताभिः ॥ २९ ॥

श्चन्द्रशकले गले गलहस्तनखाङ्कयोरिति विश्वः। द्रुता त्वरितैव न्यवृतत्। न्यवर्तिष्ट। पापभयादिति भावः॥ २५॥

तन्वीति। तन्वीमुखमेव चन्द्रं व्यस्तरूपकं द्रागधिगत्य हठाद्दृष्ट्वा निमीलिताभ्यां पापभयादिति भावः। वियोगिन स्तस्येक्षणाभ्यां तस्य तन्वीमुखस्येन्दुता। सरोजताचेतिस्व नयनयोः द्वयं द्रढीयो दृढतरं कृतमिति उत्प्रेक्षा। अन्यथा कथं तत्सन्निधौ तयोर्मीलनमिति भावः॥ २६॥

नन्वङ्गसङ्घट्टनानन्तरं तास्तं किमिति न गृह्णन्तीत्यत आह। चतुष्पथ इति। चतुष्पथविनिमीलिताक्षं तं नलं चतसृभ्यो दिग्भ्यःएता आगताः आङ्पूर्वादिणः कर्त्तरि क्तः उत्तरपदस्य समासः। ताः सुखं अक्लेशेनाग्रहीष्यन्। गृह्णीयुः। तस्मिन्नले सङ्घट्टाभिहत्य आधारत्वविवक्षया सप्तमी। भृशया गाढया भिया निवृत्तास्ता एव तस्य नलस्य वर्त्म नादास्यन्नदधुश्चेत्। किन्तु स्वयमेवास्य भूतशङ्कया मार्गं दत्वा भयात् पलायितानां तासां तद्ग्रहणधार्ष्ट्यमित्यर्थः। क्रियाऽनिष्पत्तौ लृङ्॥ २७॥

सङ्घट्टयन्त्या इति। तरसा वेगेन सङ्घट्टयन्त्या अभिघ्नन्त्या स्तन्व्याः आत्मनो भूषासु आभरणेषु ये हीरा स्तेषां अङ्कुरेषु कोटिषु प्रोतं सम्बद्धं दुकूलं पट्टाम्बरं हरति आकर्षतीति तादृशः सन् नितम्ब कटिं दिशा परिधाप्य संवस्त्य दिगम्बरं कृत्वा तत्पापमवलोक्य स भूपो वस्त्राहरणपापेन सन्तापमवाप॥ २८॥

हत इति। स नलः पथि कयाचित् कन्दकेन हतः कयापि सङ्घट्टा-

छायामयः प्रैक्षि कयापि हारे निजे स गच्छन्नथ नेक्ष्यमाणः।
तच्चित्तयान्तर्निरचायि चारु स्वस्यैव तन्व्या हृदयं प्रविष्टः॥३०॥
तच्छायसौन्दर्य्यनिपीतधैर्य्याः प्रत्येकमालिङ्गदमूरतीशः।
रतिप्रतिद्वन्द्वितमासु नूनंनामूषु निर्णीतरतिः कथञ्चित्॥३१॥
तस्माददृश्यादपि नातिविभ्यु स्तच्छायरूपाहितमोहलोलाः।
मन्यन्तएवादृतमन्मथाज्ञाः प्राणानपि स्वान् सुदृशस्तृणानि॥३२॥

भिहत्य करजैर्नखैर्भिन्नः कयाचन कुचकुङ्कुमेनाक्तः लिप्तः। एवं ताभिः सम्भुक्तकल्पः सम्भुक्तप्रायो वभूव ॥ २९ ॥

छायामय इति। कयापि स्त्रिया निजे हारे छायामयः प्रतिविम्बभूतः स नलः प्रैक्षि प्रेक्षितः। ईक्षतेः कर्मणि लुङ्। अथ गच्छन्नपसरन् अतएव नेक्ष्यमाणोऽवीक्ष्यमाणः सन् स चित्ते यस्या स्तया तद्गर्भितचित्तया तन्व्या स्वस्यैव हृदयं प्रविष्ट इत्यन्तः अन्तकरणे चारु सम्यक् निरचायि निश्चितः स छायानलः तद्देशातिक्रमात्तस्या हारादेवापेतो न चित्तादिति सौन्दर्य्यातिशयोक्तिः ॥ ३० ॥

तच्छायेति। रतीशः कामः। तस्य नलस्य छाया तच्छायम्। मणिकुट्टिमादिगत-तत्प्रतिविम्बं विभाषासेनासुरेत्यादिना नपुंसकत्वम्। तस्य सौन्दर्य्येण निपीतधैर्य्याः हृतधैर्य्याः अमूः स्त्रीः प्रत्येकमेकैकामेवालिङ्गत्। अत्रोत्प्रेक्षते रतेर्देव्याः प्रतिद्वन्द्वितमास्वतिसदृशीष्वमूषु मध्ये कथञ्चिदपि केनापि प्रकारेण निर्णीतरतिरेष एव रतिः निश्चितनिजपत्नीको नाभूत्। नूनम्। अन्यथा न प्रत्येकमालिङ्गेदित्यर्थः। सर्वास्वपि मन्मथविकारः प्रादुर्भूत इत्यर्थः ॥ ३१ ॥

तस्मादिति। सुदृशः स्त्रियः तच्छायारूपेण तत्प्रतिविम्बसौन्दर्य्येणाहितः उत्पादितो मोहः चित्तविभ्रमो यासान्ताः अतएव लोलाः आसक्ताः सत्यः अदृश्यादपीतिभयहेतूक्तिः। तस्मान्नलान्नातिविभ्युः किञ्चिदपि न विभ्युः। शृङ्गारेण भयानकस्तिरस्कृत इत्यर्थः। तथा हि आदृतमन्मथाज्ञा मन्मथपरतन्त्राः सत्यः स्वान् स्वकीयान् प्राणानपि

जागर्त्ति तच्छायदृशां पुरा यः स्पृष्टे च तस्मिन्विससर्प कम्पः।
द्रुतं द्रुते तत्पदशब्दभीत्या स्वहस्तितश्चारुदृशां परं सः॥ ३३॥
उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिबापि दृष्टिः।
अश्मैव रत्यास्तदनर्त्ति पत्या च्छेदेऽप्यबोधं यदहर्षि लोम॥३४॥
यस्मिन्नलस्पृष्टकमेत्य हृष्टाभूयोऽपि तद्देशमगान्मृगाक्षी।

तृणानि मन्यन्ते। एवं मन्यकर्मण्यनादरचतुर्थ्यांवैभाषिकत्वात् द्वितीया। प्राणान् तृणीकृत्य तदा तत्सङ्गमकातराणां तासां तद्भयं कुत इति भावः॥ ३२॥

जागर्त्तीति। पुरा पूर्वं तच्छायदृशां तत्प्रतिबिम्बदर्शिनीनाम्। क्विप् चेति क्विप्। चारुदृशां यः कम्पो जागर्त्ति स्फुरति ततस्तस्मिन् स्पृष्टे सति यश्च प्रससर्प प्रससार। स कम्पः द्रुतं शीघ्रं द्रुतेऽपगते सति तस्य पदशब्दाद्भीत्या-कातर्यं परं स्वहस्तवान् कृतः। स्वहस्तितो दत्तस्वहस्तः प्रबलः कृत इत्यर्थः। मत्वन्तात्तत्करोतीति णिचि णाविष्ठवद्भावे विन्मतोर्लुकि ततः कर्मणि क्तः॥ ३३॥

उल्लास्यतामिति॥ रत्याः पत्या कामेन स्पृष्टं नलाङ्गं येन तासां अङ्गमुल्लास्यताम् उल्लासं प्राप्यताम् उल्लासयतेः कर्मणि लोट्। नलच्छायस्य नलप्रतिबिम्बस्यापिबा तद्दर्शिनीत्यर्थः। प्राघ्रादिना शप्रत्ययः। पिबादेशश्च। तासां दृष्टिरप्युल्लास्यतान्नयोश्चेतनत्वादिति भावः। छेदे कर्त्तनेऽपि अबोधं बोधरहितम् अचेतनं लोम अहर्षि हर्षितम्। इति यत् हृषेर्ण्यन्तात्कर्मणि लुङ्। तदश्मैव पाषाणएव अनर्त्ति नर्त्तितः। अश्मनर्त्तनप्रायं रोमहर्षणं कुर्वाणस्य किमसाध्यमिति भावः। अत्र रोमहर्षणाश्मनर्त्तनवाक्यार्थयोर्यत्तच्छब्दावगतसामानाधिकरण्यानुपपत्त्या सादृश्याक्षेपाद्वाक्यार्थवृत्ति निदर्शनालङ्कारः॥ ३४॥

यस्मिन्निति। मृगाक्षी यस्मिन् देशे नलस्य स्पृष्टकमालिङ्गनविशेषं यद्योषितः संमुखमागताया अन्यापदेशाद्व्रजतो नरस्य। गात्रेण गात्रं घटते तदेतदालिङ्गनं स्पृष्टकमाहुरार्याः। इति रतिरहस्येऽभिधानात्।

निपत्य तत्रास्य धरारजःस्थे पदे प्रसीदेति शनैरवादीत् ॥३५॥
भ्रमन्नमुष्यामुपकारिकायां व्यायस्य भैमीविरहात् कृशीयान्।
असौ मुहुः सौधपरम्पराणामाधत्त विश्रान्तिमुपत्यकासु ॥३६॥
उल्लिख्य हंसेन दले नलिन्यास्तस्मै यथादर्शि तथैव भैमी।
तेनाभिलिख्योपहृतस्वहारा कस्या न दृष्टाजनि विस्मयाय॥३७॥
कौमारगन्धीनि निवारयन्तीवृत्तानि रोमावलिवेत्रचिह्ना।

एत्य प्राप्य हृष्टा तं देशं भूयोऽप्यगात्। तत्स्पर्शलोभादिति भावः। किन्तु तत्र देशे धरारजःस्थे भूपराग-निष्ठेऽस्य नलस्य पदे पदप्रतिकृतौ निपत्य प्रणिपत्य प्रसीद मां पुनः स्पर्शेनानुगृहाणेति शनैरवादीत्। न तु स्पर्शं लेभे। तस्यापगमादिति भावः ॥ ३५ ॥

भ्रमन्निति। भैमीविरहात् कृशीयानतिकृशोऽसौ नलोऽमुष्यामुपकारिकायां उपकार्य्यायाम्। राजसद्मनीत्यर्थः। भ्रमन् व्यायस्य परिश्रमं प्राप्य मुहुः सौधपरम्पराणां उपत्यकास्वासन्नभूमिषु। अत्र सौधानां पर्वतसाधर्म्याद्गौणोऽयं प्रयोगः। उपाधिभ्यान्त्यकन्नासन्नारूढयोरितित्यकन् प्रत्ययस्य पर्वतासन्नभूसञ्ज्ञात्वेन विधानात्। उपत्यकाद्रेरासन्नेत्यभिधानात्तथैव प्रयोगाच्च सञ्ज्ञात्वादेव कात् पूर्वस्येकाराभावः। विश्रान्तिं व्यधत्त विश्रान्तोऽभूदित्यर्थः ॥ ३६ ॥

किञ्च तत्र तत्र विश्रान्तो विनोदाय भैमीप्रतिकृतिमालिख्याद्राक्षीदित्याह श्लोकद्वयेन॥ उल्लिख्येत्यादिना। नन्वदृष्टपूर्वान्तां कथं व्यालिखदिति शङ्कां निरस्यन्नाह पूर्वं हंसेन नलिन्या दले भैमी यथा येन प्रकारेणोल्लिख्य तस्मै नलायादर्शि दर्शिता तथैव तेन नलेनाभिलिख्योपहृतस्वहारा कण्ठार्पितनिजमुक्ताहारा। तथा लिखितेत्यर्थः। दृष्टा सती कस्य विस्मयाय नाजनि। न जाता सर्वस्या अपि जातेत्यर्थः ॥ ३७ ॥

कौमारेति। तेन नलेन यौवनस्येयं यौवनीया वृद्धाच्छः। तस्यां द्वारि द्वारे प्रमुखे च तिष्ठतीति यौवनीयद्वाःस्था। खरवसानयोरिति

सालिख्य तेनैक्ष्यत यौवनीय-द्वाःस्थामवस्थाम्परिचेतुकामा ॥३८॥
पश्याः पुरन्ध्रीः प्रति सान्द्रचन्द्ररजःकृतक्रीडकुमारचक्रे ।
चित्राणि चक्रेऽध्वनि चक्रवर्त्तिचिह्नन्तदङ्घ्रिप्रतिमासु चक्रम् ॥३९॥
तारुण्यपुण्यामवलोकयन्त्यो रन्योन्यमेणेक्षणयोरभिख्याम् ।
मध्ये मुहूर्त्तं स बभूव गच्छन्नाकस्मिकाच्छादनविस्मयाय ॥४०॥
पुरःस्थितस्य क्वचिदस्य भूषारत्नेषु नार्य्यः प्रतिबिम्बितानि ।

रेफस्य विसर्जनीये तस्य सत्वं तामवस्थां दौवारिकदशां यौवनप्रवेशदशां च परिचेतुकामा अभ्यसितुकामा। अतएव रोमावलिरेव वेत्रदण्डः तच्चिह्नं यस्याः कौमारगन्धो येषामस्तीति कौमारगन्धि तानि शैशवसंस्पर्शानि वृत्तानि चापलानि निवारयन्ती सा भैमी आलिख्यैक्ष्यत ईक्षतेः कर्मणि लङ् वयः-सन्धौ वर्त्तमानान्तां आलिख्य द्राक्षीदित्यर्थः। रूपकमलङ्कारः ॥ ३८ ॥

पश्या इति। सान्द्राणि चन्द्ररजांसि कर्पूरपांशवः अथ कर्पूरमस्त्रियाम्। घनसारश्चन्द्रसञ्ज्ञ इत्यमरः। तैः कृतक्रीडं कुमारचक्रम्वालसङ्घो यस्मिन् तस्मिन्नध्वनि चक्रवर्त्तिचिह्नं सार्वभौमलक्षणं तस्य नलस्याङ्घ्रिप्रतिमासु पदन्यासेषु चक्रं चक्ररेखा कर्तृ पश्यन्तीति पश्याः पिवतेः पाघ्रेत्यादिना शप्रत्ययः। पश्यादेशश्च पुरन्ध्रीःप्रति स्त्रियः उद्दिश्य चित्राणि चक्रे। तासामाश्चर्य्याणि जनयामासेत्यर्थः ॥ ३९ ॥

तारुण्येति। तारुण्यपुण्यां यौवनमनोज्ञां पुण्यं मनोज्ञ इति विश्वः। अन्योन्यमभिख्यां शोभामवलोकयन्त्यो रेणेक्षणयो र्मृगाक्ष्योर्मध्ये गच्छन् सः मुहूर्त्तं मुहूर्त्तकालमाकस्मिकाच्छादनेन निर्हेतुकव्यवधानेन विस्मयाय वभूव तयोरिति शेषः। अत्र व्यवधानकारणं विना व्यवधानोक्तेरकारणकार्य्योत्पत्तिलक्षणो विभावनालङ्कारः ॥ ४० ॥

पुर इति। क्वचिद्देशे नार्य्यः। पुरःस्थितस्यास्य नलस्यादृश्येषु भूषारत्नेषु निजानि प्रतिबिम्बितानि प्रतिबिम्बानि व्योमनि शून्ये विस्मित्यविस्मित्य आभीक्ष्ण्ये द्वित्वं। पुनः पुनर्विस्मिताभूत्वा सहस्रकृत्वः सहस्रवारं

व्योमन्यदृश्येषु निजान्यपश्यन् विस्मित्य विस्मित्य सहस्रकृत्वः ॥४१॥
तस्मिन् विषज्यार्द्धपथान्निवृत्तं तदङ्गरागच्छुरितं निरीक्ष्य ।
विस्मेरतामापुरपि स्मरन्त्यः क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः ॥४२॥
पुंसि स्वभर्तृव्यतिरिक्तभूते भूत्वाप्यनीचानियमव्रतिन्यः ।
छायासु रूपं भुवि वीक्ष्य तस्य फलं दृशोरानशिरे महिष्यः ॥४३॥
विलोक्य तच्छायमतर्कि ताभिः पतिं प्रति स्वं वसुधापि धत्ते ।
यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम् ॥ ४४ ॥

अपश्यन् । अत्रापि निरालम्बनप्रतिबिम्बदर्शनोक्तेरकारणकार्योत्पत्तिलक्षणो विभावनैवालङ्कारः ॥ ४१ ॥

तस्मिन्निति । इन्दुमुख्यः स्त्रियः मिथः क्षिप्तमन्योन्यं प्रति प्रेरितं किन्तु तस्मिन्नले विषज्य लगित्वा अर्द्धः पन्था अर्द्धपथः । विशेषणसमासे समासान्तः । अर्द्धं नपुंसकमित्येकदेशि समास इति केचित् । तत्र समांशनिर्बन्धः । तस्मान्निवृत्तमायान्तं प्रत्यागच्छन्तं तस्य नलस्याङ्गरागेण छुरितं दूषितं कन्दुकं निरीक्ष्य स्मरन्त्यः कुत एतदिति पुनःपुनः सन्दधानाः विस्मेरतां विस्मितत्वमापुः । नमिकम्पीत्यादिना रप्रत्ययः ॥ ४२ ॥

पुंसीति । महिष्यो राजदाराः स्वभर्तृव्यतिरिक्तभूते पुंसि परपुरुषे विषयेऽनीचानियमेनाऽनीचणसङ्कल्पेन व्रतिन्यो व्रतवत्यो भूत्वापि तस्य नलस्य भुवि कुट्टिमभूमौ छायासु प्रतिबिम्बेषु रूपं सौन्दर्यं वीक्ष्य दृशोः फलं आनशिरे प्रापुः । अत आदेरित्यभ्यासदीर्घः । अश्नोतेश्चेति नुडागमः ॥ ४३ ॥

विलोक्येति । ताभिः राजमहिषीभिस्तस्य नलस्य छायाऽनातपरेखा तच्छायं नीलमिति शेषः विलोक्य यथा वयं स्वं स्वकीयं पतिं भीमं प्रति उद्बुद्धमदनं दध्महे । तथा वसुधापि स्वं पतिं भीममेव प्रत्युद्बुद्धं किन्तु त्रिनेत्रस्यानलकीलैर्नेत्राग्निज्वालै नीलं कृष्णवर्णं एनं मदनं धत्ते किमिति अतर्कि उत्प्रेक्षितम् । नलच्छाये वसुधागते तन्मदनोत्प्रेक्षणादुत्प्रेक्षालंकारः ॥ नलच्छायेऽपि स्त्रीणां मदनविभ्रमः । नले तु किमु वक्तव्यमिति भावः ॥ ४४ ॥

रूपं प्रतिच्छायिकयोपनीत मालोकि ताभिर्यदि नाम कामम् ।
तथापि नालोकि तदस्य रूपं हारिद्रभङ्गाय वितीर्णभङ्गम् ॥४५॥
भवन्नदृश्यः प्रतिविम्बदेह-व्यूहं वितन्वन् मणिकुट्टिमेषु ।
पुरं परस्य प्रविशन् वियोगी योगीव चित्रं स रराज राजा॥४६॥
पुमानिवास्पर्शि मया भ्रमन्त्या छाया मया पुंस इव व्यलोकि।
व्रुवन्निवातर्कि मयापि कश्चिदिति स्म स स्त्रैणगिरः शृणोति॥४७

नन्वेवं नलविलोकिनीनां आसां कथं न परपुरुषानिरीक्षण व्रतलोपस्तत्राह रूपमिति। प्रतिच्छायैव प्रतिच्छायिका स्वार्थे कः कात्पूर्वस्येकारः। तयैव नीतं रूपं छायात्मकं स्वरूपं ताभिः स्त्रीभि रालोकि यदि आलोकितम्। चेत्कामं यथेच्छं आलोक्यताम् नाम। तथापि हारिद्रभङ्गाय हारिद्रखण्डाय वितीर्णभङ्गं दत्तपराजयं तत्स्वरूपमित्यर्थः। अस्य तत्प्रसिद्धं रूपं नालोकि नावलोकितम्। साक्षाद्रूपदर्शने दोषो, न प्रतिच्छायादर्शने इत्यर्थः ॥ ४५ ॥

भवन्निति। वियोगी विरही अयोगी च स राजा नलोऽदृश्यो भवन् स्वयमदृश्यः सन् मणिकुट्टिमेषु मणिवद्धभूमिषु प्रतिविम्बदेहानां व्यूहं समूहं वितन्वन् सम्पादयन् योगिपक्षे वहूनि भोगशरीराणि कल्पयन् तथा परस्य राजान्तरस्य पुरं नगरं अन्यत्र जीवान्तरस्य शरीरं परकायं प्रविशन् पुरं पुरि शरीरेऽपीति विश्वः। योगी अणिमादिसिद्धिमान् विचित्रं रराज॥ ४६ ॥

पुमानिति। भ्रमन्त्या मया पुमानिवास्पर्शि स्पृष्टः। मया पुंसः छायेव व्यलोकि विलोकिता। मया कश्चिद्व्रुवन्निवातर्कि तर्कितः। सर्वत्र कर्मणि लुङ्। इत्येवं रूपाः स्त्रैणस्य स्त्रीसमूहस्य गिरः यद्वा स्त्रीषु भवाः स्त्रैणीः गिरः स्त्रीपुंसाभ्यां नञ् रभसौनवनादिभवाद्यर्थेषु नञ् प्रत्ययः। स नलः शृणोति स्म। लट् स्मे इति भूते लट् ॥ ४७ ॥

अम्बां प्रणत्योपनता नताङ्गी नलेन भैमी पथि योगमाप ।
स भ्रान्तिभैमीं विविचे न तां च सा तं च नादृश्यतया ददर्श॥ ८॥
प्रसूप्रसादाधिगता प्रसूनमाला नलस्योद्भ्रमवीक्षितस्य ।
क्षिप्तापि कण्ठाय तयोपकण्ठस्थितं तमालम्बत सत्यमेव ॥ ४९ ॥
स्रग्वासनादृष्टजनप्रसादः सत्येयमित्यद्भुतमाप भूपः ।
क्षिप्तामदृश्यत्वमिताञ्च माला मालोक्य तां विस्मयते स्म बाला॥५०
अन्योन्यमन्यत्ववदीक्षमाणौ परस्परेणाध्युषितेऽपि देशे ।
आलिङ्गितालीकपरस्परान्त स्तथ्यं मिथस्तौ परिषस्वजाते ५१

अम्बामिति । नताङ्गी व्यानतगात्री सा भैमी अम्बां मातरम् । अम्बा सवित्री जननी च । मातेति हलायुधः । प्रणम्योपनता प्रतिनिवृत्ता सती नलेन पथि योगमाप । किन्तु स नलो भ्रान्तभैमीष्वलीकभैमीषु मध्ये तां न विविचे विविच्य नाज्ञासीत् । सा च तं नलं अदृश्यतया न ददर्श ॥ ४८ ॥

प्रस्विति । प्रसूप्रसादाधिगता मातृप्रसादलब्धा जनयित्री प्रसूर्मातेत्यमरः । प्रसूनमाला पुष्पमालिका तया भैम्या उद्भ्रमवीक्षितस्य भ्रान्तिदृष्टस्य नलस्य कण्ठाय क्षिप्ताप्युपकण्ठे समीपे स्थितं सत्यं तथ्यं नलमेवालम्बत । प्राप । मणिप्रभायाः मणिबुद्धिः स्यादिति भावः ॥ ४९ ॥

स्रगिति । भूपो नलः वासनया निरन्तरभावनया दृष्टस्य जनस्यालीकभैम्याः प्रसादोऽनुग्रहभूतेयं स्रक् सत्या सत्यभूतेति हेतो रद्भुतमाप । बाला भैमी च क्षिप्तामात्मना न्यस्ताम् अथादृश्यत्वमितां प्राप्तां मालां विलोक्यालोक्य विस्मयते स्म विस्मिताऽभूत् ॥ ५० ॥

अन्योन्यमिति । तौ भैमी-नलौ परस्परेणाध्युषिते तत्वतोऽधिष्ठिते देशेऽपि । अन्योन्यमिति कर्मनिर्देशः । नलो भैमीं सा च नलमित्यर्थः । अन्यत्ववद्देशान्तर इवेक्षमाणौ । अन्यत्वस्याविद्यारोपिताविव पश्यन्तावित्यर्थः । आलिङ्गितमालिङ्गनं अलीकं यस्य तदालिङ्गितालीकमलक्षितालिङ्गनमित्यभिमानम् । परस्परस्यान्तः अन्तःकरणं यस्मिन् कर्मणि

स्पर्शन्तमस्याधिगतापि भैमी मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपः स पश्यन्नपि तामुदीत-स्तम्भो न धर्तुं सहसा शशाक ॥५२॥
स्पर्शातिहर्षादृतसत्यमत्या प्रवृत्त्य मिथ्यामतिलब्धबाधौ ।
पुनर्म्मिथस्तथ्यमपि स्पृशन्तौ न श्रद्दधाते पथि तौ विमुग्धौ॥५३॥
सर्व्वत्र संवाद्यमबाधमानौ रूपश्रियातिथ्यकरं परन्तौ ।
न शेकतुः केलिरसाद्विरन्तु मलीकमालोक्य परस्परन्तु ॥५४॥

तद्यथा तथा। अव्ययोत्तरपरो बहुव्रीहि रव्ययम्। क्रियाविशेषणं वा मिथोऽन्योन्यं तथ्यं पार्थमेव परिषस्वजाते आश्लिष्यतः। उपसर्गात् सुनोतीत्यादिना षत्वम्। पूर्ववासनया परस्परस्वरूपं परस्परचेष्टां च मिथ्येति मन्यमानावेवातिष्टतामित्यर्थः ॥ ५१ ॥

स्पर्शमिति। भैमी तं तथ्यं स्पर्शमधिगता प्राप्तापि पुनरस्य नलस्यादर्शनेनादृश्यत्वेन भ्रान्तिं मेने। अतो नलं धर्तुं न शशाकेति शेषः। नृपस्तु पश्यन्नपि उदीतस्तम्भो निष्क्रियाङ्गत्वलक्षणः सात्विको यस्य स सन् तां भैमीं सहसा धर्तुं गृहीतुं न शशाक। अन्यथा धरेदिति भावः। उदीतेति ईगताविति दीर्घेनेधातुना निष्पन्नम्। अत्र स्तम्भपदार्थस्य विशेषणगत्या धरणाशक्तिहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ ५२ ॥

स्पर्शेति। विमुग्धौ तौ दम्पती नलौ पथि स्पर्शेनातिहर्षोऽति मात्रानन्दस्तस्माद्धेतोस्तदन्यथानुपपत्त्याऽऽदृतया दृढीकृतया सत्यमत्या सत्योऽयं स्पर्श इति बुद्ध्या प्रवृत्य पुनर्व्यावृत्य मिथ्यामतिलब्ध-बाधौ प्रवृत्तावपि स्पर्शनान्मिथ्येति निश्चितबाधौ मिथ्येति बुद्धिमन्तावित्यर्थः पुनरुभयदर्शनानन्तरं मिथोऽन्योन्यं तथ्यं यथार्थमेव स्पृशन्तावपि न श्रद्दधाते न विश्वसतः श्रद्धातेर्लिटि तङ् श्रच्छब्दस्य अदन्तरोरुपसङ्ख्यान मित्युपसर्गत्वाद्धातोः प्राक् प्रयोगः ॥ ५३ ॥

सर्वत्रेति। तौ भैमीनलौ रूपश्रिया सौन्दर्यसम्पदा सर्वत्र सर्वावयवेषु सम्वाद्यं मिथः सम्वादार्हं परस्परानुरूपमित्यर्थः। अतएव परमत्यन्तम् आतिथ्यकरं मिथः सत्कारशालि। अलीकमसत्यं परस्परन्तु कस्मालोक्या-

परस्परस्पर्शरसोर्म्मिसेका त्तयोः क्षणञ्चेतसि विप्रलम्भः।
स्नेहातिदानादिव दीपिकार्च्चिर्निमिष्य किञ्चिद्द्विगुणन्दिदीपे॥५५॥
वेश्माप सा धैर्य्यवियोगयोगा द्बोधञ्च मोहञ्च मुहुर्दधाना।
पुनः पुनस्तत्र पुरः स पश्यन् बभ्राम तां सुभ्रुवमुद्भ्रमेण ॥५६॥
पद्यां नृपः सञ्चरमाण एष चिरं परिभ्रम्य कथङ्कथञ्चित्।
विदर्भराजप्रभवानिवासं प्रासादमभ्रङ्कषमाससाद ॥ ५७ ॥
सखीशतानां सरसैर्व्विलासैः स्मरावरोधभ्रममावहन्तीम्।

बाधमानौ मिथ्येत्यमन्यमानौ केलिरसात्क्रीड़ारागाद्विरन्तुं निवर्त्तितुं न शेकतुः किन्त्वलीकेनापि परस्परेण क्रीड़ितुमाचकाङ्क्षतुरित्यर्थः ॥ ५४ ॥

परस्परेति। तयोर्भैमीनलयोश्चेतसि विप्रलम्भो विरहः परस्परस्य स्पर्शरसस्य स्पर्शसुखस्योर्मिभिः सेकात् क्षणं स्नेहस्य तैलादे रतिदानाद्दीपार्चिर्दीपज्वालेव किञ्चिदीर्षन्निमिष्य इव द्वौ गुणावावृत्ती यस्मिन् कर्मणि तद्द्विगुणमधिकन्दिदीपे प्रजज्वाल। सोऽप्युद्दीपक एवाभूदित्यर्थः। ५५ ॥

वेश्मेति। सा भैमी धैर्य्यवियोगयोर्योगाद्यथासङ्ख्यं मुहुर्बोधञ्च मोहञ्च दधानेति यथासङ्ख्यालङ्कारः वेश्म निजसदनम् आप। स नलस्तत्र तां सुभ्रूवम्भैमीं उद्भ्रमेण भ्रान्त्या पुनः पुनः पुरःपश्यन् बभ्राम। प्राप्नप्राशयेति भावः। एतेन चापल्याख्यः सञ्चारिभाव उक्तः। चापलन्त्वनवस्थानमिति लक्षणात् ॥ ५६ ॥

पद्यामिति। एष नृपः पद्यां सञ्चरमाणो गच्छन् समस्तृतीयायुक्तादिति तृतीयायोगे आत्मनेपदम्। चिरं परिभ्रम्य कथञ्चित्पादचारक्लेशादतिकृच्छ्रेण विदर्भराजः प्रभवः कारणं यस्या तस्याः वैदर्भ्या निवासमभ्रङ्कषतीत्यभ्रङ्कषम् अत्युन्नत सर्वकूलाभ्रकरीषेषु कष इति खच् प्रत्ययः। मुमागमः। प्रासादं सौधमाससाद ॥ ५७ ॥

सखीति। स नलस्तस्य प्रासादस्य प्रतोल्यां प्राङ्गणे या मणिवेदिका तस्यां सखीशतानां सरसैः सानुरागैर्विलासैर्लीलाभिः स्मरावरोधभ्रमका-

विलोकयामास सभां स भैम्या स्तस्य प्रतोलीमणिवेदिकायां ५८
कण्ठः किमस्याः पिकवेणुवीणा स्तिस्रो जिताः सूचयति त्रिरेखः ।
इत्यन्तरस्तूयत यत्र काचि न्नलेन बाला कलमालपन्ती ॥ ५९ ॥
एतं नलं तं दमयन्ति ! पश्य त्यजार्त्तिमित्यालिकुलप्रबोधान् ।
श्रुत्वा स नारीकरवर्त्तिशारी-मुखात् स्वमाशङ्कत यत्र दृष्टम् ॥६०
यत्रैकयालीकनलीकृताली-कण्ठे स्रषाभीमभवाभवन्त्या ।

वहन्तीं कामान्तःपुरभ्रान्तिकरीं भैम्याः सभाम् आस्थानं विलोकयामास ॥ ५८ ॥

इतःपरं चतुर्दशभिस्तां सभां वर्णयति । कण्ठ इत्यादि । यत्र सभायां कलं मधुरमालपन्ती कापि बाला नलेन तिस्रो रेखा अस्य सन्तीति त्रिरेखोऽस्याः कण्ठः पिकवेणुवीणास्तिस्रोऽपि जिता इति सूचयति । किमित्यन्तः अन्तःकरणे अस्तूयत स्तुता । अत्र कण्ठरेखात्रयस्य विशेषणगत्या निजपिकादित्रयविजयसूचकत्वोत्प्रेक्षाहेतुत्वात् काव्यलिङ्गसङ्कीर्णेयमुत्प्रेक्षा ॥ ५९ ॥

एतमिति । स नलो यत्र सभायां नारीकरवर्त्तिशारीमुखात् कान्ताकरगतशारिकामुखात् "हे दमयन्ति ! तमेतं नलं पश्य आर्त्तिं पीडां त्यज" इत्येवं रूपमालिकुलस्य सखीजनस्य प्रबोध्यते एभिरिति प्रबोधानाश्वसनोक्तीः करणे घञ् प्रत्ययः । श्रुत्वा स्वमात्मानं दृष्टमाशङ्कत । नलं पश्येति निर्देशादेताभिर्दृष्टोऽस्मीति शङ्कितवानित्यर्थः । शारीवाक्ये नारीवाक्यभ्रमादिति भावः । अतएव भ्रान्तिमदलङ्कारो व्यज्यत इति वस्तुनालङ्कारध्वनिः ॥ ६० ।

यत्रेति । यत्र सभायां तद्दृक्पथे नलदृष्टिपथे स्रषा भीमभवा आरोपितभैमी अतया तया भवन्त्या सख्या ऽलीकनलः आरोपितनलः असत्कृतालीकनलीकृता तस्या आल्याः सख्याः कण्ठे दौहिदकया धात्र्या उपनीता मधूकमाला शालीनं लज्जामन्थरं यथा तथा आधायि स्थापिता । दधातेः कर्मणि लुङ् आतो युक् चिण्कृतोरिति युगागमः

तद्दृक्पथे दौहृदिकोपनीता शालीनमाधायि मधूकमाला ॥६१॥
चन्द्राभमाभ्रन्तिलकं दधाना तद्वन्निजास्येन्दुकृतानुबिम्बम्।
सखीमुखे चन्द्रसखे ससर्ज्ज चन्द्रानवस्थामिव कापि यत्र ६२।
दलोदरे काञ्चनकेतकस्य क्षणान्मसीभावुकवर्णलेखम्।
तस्यैव यत्र स्वमनङ्गलेखं लिलेख भैमी नखलेखनीभिः ॥ ६३॥
विलेखितुं भीमभुवो लिपीषु सख्यातिविख्यातिभृतापि यत्र।
अशाकि लीलाकमलं न पाणि रपारि कर्णोत्पलमक्षि नैव ॥६४॥

एतेन भैम्याः सत्यैव वरत्वरा नलैकतानत्वं च व्यक्तमिति भावः ॥ ६१॥

चन्द्राभमिति। यत्र सभायां कापि कान्ता चन्द्राभं चन्द्रनिभमाभ्रं अभ्रकविकारं तिलकं चन्द्रसखे सखीमुखे तद्वदाभ्रतिलकवत् निजास्येन्दुना कृतमनुबिम्बं यस्मिन् कर्म्मणि तद्यथा तथा दधाना रचयन्ती चन्द्रानवस्थां ससर्जेवेत्युत्प्रेक्षा। अत्र तिलकनिष्पत्तौ स्वच्छद्रव्यतया परस्पराभिमुखावस्थितदर्पणवदितरेतराभ्रतिलकसंक्रान्तेतरेतरतिलकचन्द्रपरम्परानन्त्यादनवस्था तथा तिलकक्रियानिष्पत्तिश्चेति चित्रमिति भावः ॥ ६२ ॥

दलेति। यत्र सभायां भैमी काञ्चनकेतकस्य सुवर्णकेतकीकुसुमस्य दलोदरे दलमध्ये क्षणात् झटिति मसीभावुकाः श्यामीभवन्त्यो वर्णरेखा अक्षरविन्यासो यस्मिन्त तस्य नलस्यैव कृते स्वं स्वकीयमनङ्गलेखं कामसन्देशं नखैरेव लेखनीभिः लेखनिकाभि र्लिलेख ॥ ६३ ॥

विलेखितुमिति। यत्र सभायां लिपीषु चित्रकर्मसु। कृदिकारादक्तिन इति वा ङीष् वक्तव्यः। अतिविख्यातिभृता अतिचतुरयापीत्यर्थः। सख्या भीमभुवो भैम्याः लीलाकमलं विलेखितुमशाकि कर्मणि लुङ्। पाणि र्नाशाकि तदपेक्षयोत्कृष्टत्वात् पर्य्याप्तिवचनेष्वलमर्थेषु इति तुमुन् प्रत्ययः। कर्णोत्पलमपारि अक्षि तु नापार्य्येव। सर्वोपमानातीतत्वात्तल्लावण्यस्येति भावः ॥ ६४ ॥

भैमीति। यत्र सभायां गन्धर्व्ववध्वः गन्धर्वाङ्गना एव कलिप्रियस्य प्रियकलहस्य नारदस्य,वा प्रियस्येति वज्ञब्रीहौ प्रियस्य परनिपातः। प्रियः शिष्यवर्गः

भैमीमुपावीणयदेत्य यत्र कलिप्रियस्य प्रियशिष्यवर्गः ।
गन्धर्व्व बध्वः स्वरमध्वरीण-तत्कण्ठनालैकधुरीणवीणः ॥ ६५ ॥
नावा स्मरः किं हरभीतिगुप्तेः पयोधरे खेलति कुम्भएव ।
इत्यर्द्धचन्द्राभनखाङ्कचुम्बि-कुचा सखी यत्र सखीभिरूचे ॥६६॥
स्मराशुगीभूय विदर्भसुभ्रू-वक्षो यदक्षोभि खलु प्रसूनैः ।
स्रजं सृजन्त्या तदशोधि तेषु यत्रैकया सूचिशिखां निखाय६७
यत्रावदत्तामतिभीय भैमी त्यज त्यजेदं सखि ! साहसिक्यम् ।

स्वर एव मधु क्षौद्रं तेनारीणमक्षीणकं पूर्णमिति यावत् । खादिभ्यश्चेति निष्ठानत्वेणत्वम् । तेन तस्याः भैम्याः कण्ठनालेन सहैकधुरं वहन्तीत्येकधुरीणाः समा इत्यर्थः । एकधुराल्लुक्चेति खप्रत्ययः । ता वीणायस्य स सन् एत्यागत्यभैमीमुपावीणयत् । वीणयोपगायति स्म । सत्यापपाशेत्यादिनां णिचि लङ् । गानविद्यायां गन्धर्व्वाणामप्युपास्या भैमीत्यर्थः ॥ ६५ ॥

नावेति । यत्र सभायाम् अर्द्धचन्द्राभनखाङ्कचुम्बी अर्द्धचन्द्राकारनखक्षताभः कुचो यस्याः सा सखी स्मरो हरभीत्या गुप्तेर्गुप्त्यर्थमित्यर्थः । सुखं वस्तु मित्यर्थः । सामान्ये षष्ठी । पयसां क्षीराणाञ्च धरः पयोधरः कुचः पयः स्यात् क्षीरनीरयोरिति । अस्मिन्नेव कुम्भ इति व्यस्तरूपकम् । नावा नौकया नखाङ्केनैवेति शेषः । खेलति । दाहपरिहाराय विहरति किमिति । रूपकसङ्कीर्णोत्प्रेक्षा इति सखीभिरूचे ॥ ६६ ॥

स्मरेति । प्रसूनैः कुसुमैः स्मराशुगीभूय कामबाणो भूत्वा विदर्भसुभ्रुवो वैदर्भ्या वक्षो हृदयम् अक्षोभि क्षोभितं खल्विति यत्तत्क्षोभणवैरं यत्र सभायां तेषु प्रसूनेषु सूचिशिखां सूच्यग्रं निखाय निकुच्य स्रजं मालां सृजन्त्या रचयन्त्या एकया कयाचित्कान्तया अशोधि निर्यातितम् । हृदयच्छेदिनां हृदयच्छेदएव प्रतीकार इति भावः ॥ ६७ ॥

यत्रेति । यत्र सभायां तां स्रक् कारिणीं सखीं भैमी अतिभीय अत्यन्तं भीत्वा भीधातोः क्त्वोल्यबादेशः अवदत् । किमिति । हे सखि ! इदं सहसा वर्त्तत इति साहसिकोऽविमृश्यकारी । ओजः सहोम्भसा वर्त्तत

त्वमेव कृत्वा मदनाय दत्से वाणान् प्रसूनानि गुणेन सज्जान्॥६८
आलिख्य सख्याः कुचपत्रभङ्गी-मध्ये सुमध्या मकरीं करेण।
यत्रालपत्तामिदमालि ! यानं मन्ये त्वदेकावलिनाकनद्याः॥६९॥
तामेव सा यत्र जगाद भूयः पयोधियादः कुचकुम्भयोस्ते।
सेयं स्थिता तावकहृच्छयाङ्क-प्रियाऽस्तु विस्तारयशःप्रशस्तिः॥७०॥
शारीश्चरन्तीं सखि ! मारयैता मित्यक्षदाये कथिते कयापि।

इति ठक्। तस्य कर्मसाहसिक्यम्॥ ब्राह्मणादित्वात् ष्यञ् प्रत्ययः। त्यज-त्यज कुतः त्वमेव प्रसूनान्येव वाणान् गुणेन तन्तुना ज्यया सज्जान् आसक्तान् कृत्वा मदनाय दत्से ददासि। तदेतत् स्वत एव दहतोवह्नेर्वायुना सन्धुक्षण-मिति भावः। ६८॥

आलिख्येति। यत्र सभायां सुमध्या कापि कान्ता सख्याः कुचयोः पत्रभङ्गीनां पत्ररचनानां मध्ये मकरीं करेणालिख्य तां सखीमालपत्॥ किमिति। हे आलि ! इयं मकरी त्वदेकावलेरेव हारविशेषस्य एव एकावल्येकयष्टिकेत्यमरः। नाकनद्यां मन्दाकिन्याः इति रूपकं। यानं वाहनम्। मकरवाहनागङ्गेति प्रसिद्धः। मन्ये इति उत्प्रेक्षायाम्। तस्याश्चोक्तरूपकेण सङ्करः॥ ६९॥

तामिति। यत्र सा पूर्वोक्ता प्रसाधिका तामेव सखीं भूयो जगाद किमिति। पयोधेर्यादो जलग्रहः समुद्रसम्भव इत्यर्थः। किञ्च तावकस्य हृच्छयस्य मकरध्वजस्याङ्को मकरस्तस्य प्रिया दयिता ते तव कुचकुम्भयोः स्थिता सेयं मकरी विस्तारयशस स्तयोरेव परिणाहकीर्त्तेः प्रशस्तिः स्तुतिवर्णावलिरस्तु॥ ७०॥

शारीमिति। यत्र स नलः कयापि सुमध्ययेति शेषः। हे सखि ! एतां चरन्तीं शारीमक्षोपकरणं दारुविकारं शारिकाख्यां शकुन्तिकाश्च शारिरक्षोपकरणे तथा शकुनिकान्तर इति विश्वः। मारय प्रहरेति। अक्षदाये अक्षाः पाशकाः अक्षास्तु देवनाः पाशकाश्च त इत्यमरः। तेषां सम्बन्धि दायो दानं प्रक्षेप विशेषः। दायोदाने यौतुकादिधने

यत्र स्वघातभ्रमभीरुशारी काक्वुत्थसाकूतहसः स जज्ञे॥ ७१॥
भैमीसमीपे स निरीक्ष्य यत्र ताम्बूलजाम्बूनदहंसलक्ष्मीम्।
कृतप्रियादूत्यमहोपकार-मरालमोहद्रढिमानमूहे॥ ७२॥
तस्मिन्नियं सेति सखीसमाजे नलस्य सन्देहमथ व्युदस्यन्।
अदृष्ट एव स्फुटमाचचक्षे स एव रूपातिशयः स्वयन्ताम्॥ ७३॥
भैमीविनोदाय मुदा सखीभिस्तदाकृतीनां भुवि कल्पितानाम्
नातर्कि मध्ये स्फुटमप्युदीतं तस्यानुबिम्बं मणिवेदिकायाम्॥७४

दत्ते च पैतृक इति वैजयन्ती। अस्मिन् कथिते स्वघाते आत्ममारणे भ्रमेण भ्रान्त्या भीरोर्भीतायाः शार्याः शारिकायाः काक्वा विकृतस्वरेणोत्थः उत्थितः साकूतो भावगर्भो हसो हासो यस्य सः। स्वनहसोर्वेति विकल्पादप्प्रत्ययः। जज्ञे जातः॥ ७१॥

भैमीति। यत्र सभायां स नलो भैमीसमीपे ताम्बूलस्य जाम्बूनदहंसो हिरण्मयहंसो हंसाकारः करकस्तस्य लक्ष्मीं निरीक्ष्य कृतः प्रियाया भैम्या दूत्यमेव महोपकारो येन तस्मिन्मराले हंसे मोहस्य भ्रमस्य द्रढिमानं दार्ढ्यं रऋतो हलादेर्लघोरित्यृकारस्य रेफादेशः। ऊहे ऊढवान्। वहेः कर्त्तरि लिटि तङ्। वचिस्वपीत्यादिना संप्रसारणम्॥ ७२॥

तस्मिन्निति। अथ सभावलोकनानन्तरं तस्मिन् सखीसमाजे नलस्य सन्देहं काऽत्र भैमीति संशयं व्युदस्यन् स प्रसिद्धः कोऽपि रूपातिशयः सौन्दर्यविशेषः स्वयमदृष्टएव तां भैमीसेयमिति स्फुटमाचचक्षे। आचख्यौ। विश्वातिशायिसौन्दर्यसाक्षात्कारादेवेयं दमयन्तीति निश्चिकायेत्यर्थः॥ ७३॥

भैमीति। भैम्या विनोदायौत्सुक्यापनोदाय मुदा कौतुकेन सखीभिर्भुवि भूतले कल्पितानां निर्मितानां तस्य नलस्याकृतीनां प्रतिकृतीनां मध्ये मणिवेदिकायां स्फुटमुदीतमपि तस्य नलस्यानुबिम्बं नातर्कि। न तर्कितम्। तत्रापि स्वकल्पिताकृतिसाम्यादिति भावः। अतएव सामान्यालङ्कारः। तेन च भ्रान्तिमान् व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः॥ ७४॥

हुताशकीनाशजलेशदूती र्निराकरिष्णोः कृतकाकुयाच्ञाः।
भैम्या वचोभिः स निजां तदाशां न्यवर्त्तयद्दूरमपि प्रयाताम्॥७५॥
विज्ञप्तिमन्तः सभयः स भैम्यां मध्येसभं वासवसम्भलीयाम्।
सम्भावयामास भृशं कृशाशः सदालिवृन्दैरभिनन्द्यमानाम्॥७६॥
लिपिर्न दैवी सुपठा भुवीति तुभ्यं मयि प्रेषितवाचिकस्य।
इन्द्रस्य दूत्यां रचय प्रसादं विज्ञापयन्त्यामवधानदानम् ॥७७॥

हुताशेति। कृताः काकुयाच्ञा प्रार्थना याभिस्ताश्चित्तचालनचतुरोक्तिरित्यर्थः। हुताशकीनाशजलेशदूतीः अलङ्करिष्णोः अलङ्कृञित्यादिना इष्णुच्। न लोकेत्यादिना षष्ठीनिषेधा द्वितीया। भैम्या वचोभिः स नलो दूरप्रयातामिन्द्रादिकपटेन लुप्तप्रायामपि निजां स्वकीयां तदाशां भैमीतृष्णां न्यवर्तयत्। निवर्तितवान्। पुनस्तत्प्राप्त्याऽऽशामकार्षीदित्यर्थः॥७५॥

विज्ञप्तिमिति। स नलो मध्ये सभाया-मध्ये सभम्। सभामध्ये पारे मध्याषष्ठ्यावेति अव्ययीभावे नपुंसकह्रस्वत्वम्। तदालिवृन्दैर्भैमीसखीसङ्घैरभिनन्द्यमानां श्लाघ्यमानां वासवसम्भलीयामिन्द्रदूतीसम्बन्धिनीं कामिनोः सम्भालीशम्भलीकुट्टिनीशम्भलीत्यमरः भैम्यां विषये विज्ञप्तिं वक्ष्यमाणां विज्ञापनामन्तः अन्तःकरणे सभयः इन्द्रगौरवात् अङ्गीकरिष्यतीति बिभ्यदेवेत्यर्थः। अतएव कृशाशः शिथिलभैमीप्राप्त्याशश्च सन् भृशं सम्भावयामास अत्यवधानेन शुश्रावेत्यर्थः विज्ञप्तिमिति। क्तिन्प्रत्ययान्तश्चिन्त्यः। ण्यासश्रन्थोयुजिति तदपवादेन युजो विधानात्। अतएव ज्ञप्तिविज्ञप्तिरिति क्तिन्प्रत्ययान्तं पश्यन् इति भट्टपादैश्चापशब्देषु परिगणितम्। तथाप्यभियुक्तप्रयोगो दुर्वार इति सिद्धम्॥ ७६॥

लिपिरिति। दैवी लिपिर्दैवलिपिः। भुवि भूतले सुपठा पठितुं शक्या। ईषद्दुरित्यादिना खल् प्रत्ययः। नेति हेतोस्तुभ्यं व्याहृतार्थावाक्वाचिकं सन्देशवाक्यम्। सन्देशवाग्वाचिकं स्यादित्यमरः। वाचो व्याहृतार्थायामिति ठक्। तत्प्रेषितं येन तस्येन्द्रस्य दूत्यां मयि विज्ञापयन्त्यां सत्याम् अवधानस्यैकान्त्यस्य दानमेव प्रसादं रचयानुग्रहङ्कुरु॥७७॥

सलीलमालिङ्गनयोपपीड मनामयं पृच्छति वासवस्त्वाम् ।
शेषस्त्वदाश्लेषकथापनिद्रै स्तद्रोमभिः सन्दिदिशे भवत्यै ॥७८॥
यः प्रेर्य्यमाणोऽपि हृदा मघोन स्त्वदर्थनायां ह्रियमापदागः ।
स्वयम्बरस्थानजुषस्त्वमस्य बधान कण्ठं वरणस्रजातु ॥७९॥
नैनं त्यज क्षीरधिमन्थनाद्यै रस्यानुजायोद्भ्रमितामरैः श्रीः ।

सलीलमिति। हे भैमि ! वासवः त्वां सलीलं सविलासम् आलिङ्गनया आलिङ्गनेन। आङ् पूर्व्वाल्लिङ्ग्यते श्चौरादिकात् ण्यासश्रन्थो युच्। उपपीड मुपपीड्य गाढमालिङ्ग्य। सप्तम्याञ्चोपपीडमित्यत्र चकारात् तृतीयोपपदे णमुल् प्रत्ययः। तृतीयाप्रभृतीन् अन्यतरस्या मिति विकल्पादसमासः। अनामयं पृच्छति। क्षत्रबन्धुमनामय मिति स्मरणादिति भावः। [मनु २ अ० १२] शेषः कार्य्यशेषस्तु त्वदाश्लेष-कथया पूर्व्वोक्त-त्वदालिङ्गन-प्रसङ्गेन विनिद्रैः हृषितैस्तस्येन्द्रस्य रोमभि र्भवत्यै सन्दिदिशे सन्दिष्टम्। कर्म्मणि लिट्। त्वदालिङ्गनप्रार्थनैवानन्तरं वक्तव्यः कार्य्यशेषोऽपीति भावः॥ ७८॥

य इति। हे भैमि ! मघोन इन्द्रस्य यः कण्ठ स्त्वदर्थनायां विषये हृदा प्रेर्य्यमाणोऽपि ह्रियमेवाऽऽगोऽपराधमापत् प्राप्तवान्। हीनस्याधिकं प्रति याच्ञा-सङ्कोचोऽप्यपराध एवेति भावः। स्वयम्बरस्थानजुषः स्वयम्बरमागतस्य। क्विप्। अस्येन्द्रस्यागतमपराधिनं कण्ठं वरणस्रजातु वरणमालिकयैव बधान ईदृशापराधिना मीदृग्वध एव दण्ड इति भावः। सर्व्वथा लज्जां विहाय प्रार्थनां कुर्व्वतो महेन्द्रस्य मनोरथपूरणं कार्य्यमिति तु शब्दतात्पर्य्यार्थः॥ ७९॥

नेति। हे भैमि! एनमिन्द्रं न त्यज तथा हि। यैरमरैः अस्येन्द्रस्यानुजायोपेन्द्राय नारायणाय तादर्थ्ये चतुर्थी। क्षीराणि धीयन्ते ऽस्मिन्निति क्षीरधिः क्षीरे कर्म्मण्यधिकरणे चेति कि प्रत्ययः। तस्य मन्थनान्मथनादुपायात् मन्थेर्भ्वादिकस्येदित्वान्नु मागमः। श्रीरमा उद्भ्रमितोत्थापिता

अस्मै विमथ्येक्षुरसोदमन्यां श्राम्यन्तु नोत्थापयितुं श्रियन्ते ॥८०॥
लोकस्रजि द्यौर्दिवि आदितेया अप्यादितेयेषु महान्महेन्द्रः ।
किङ्कर्त्तुमर्थी यदि सोऽपि रागाज्जागर्त्ति कक्षा किमतःपरापि
पदं शतेनाप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः ।
कुरु प्रसादं तदलंकुरुष्व स्वीकारकृद्भ्रूनटनश्रमेण ॥ ८२ ॥

ते अमरा अस्मै इन्द्राय पूर्व्ववच्चतुर्थी । इक्षुरस एवोदकं यस्य तमिक्षुरसोदं नामाब्धिम् । उदकस्योदः संज्ञायामित्युदादेशः विमथ्य मथित्वा अन्यां श्रियमुत्थापयितुं न श्राम्यन्तु न प्रयस्यन्तु । द्वितीयश्रिया त्वया चोपेन्द्रवत् इन्द्रस्यापि लक्ष्मीपतित्वे तयो रवैषम्याय देवानां लक्ष्म्यन्तरसम्पादनं न स्यादिति भावः । अत्रामराणां लक्ष्म्यन्तरोत्पादन प्रयत्ना ऽसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्ति भेदः ॥ ८० ॥

लोकेति । लोकस्रजि स्वर्गादिलोकत्रयपङ्क्तौ द्यौः स्वर्गो महान् महति दिवि च आदित्याः अपत्यानि पुमांसः आदितेयाः देवा महान्तः । कृदिकारात् अक्तिन् ङीषन्तात् स्त्रीभ्यो ढक् । आदितेयेष्वपि महेन्द्रो महान् स महेन्द्रोऽपि रागात् अनुरागात् किंकर्त्तुं सेवितुमर्थी यदीति । किं शब्दस्यास्य च आदिषु पतितस्य निपातत्वाद्धेतोः प्राक् प्रयोगः । अर्थयतेरिच्छार्थत्वात् समानकर्त्तृकेषु तुमुन् । अतोऽस्मादिन्द्रसेव्यत्वात् परा कक्षापि उत्कृष्टावस्था च जागर्त्ति स्फुरति किम् ?। न जागर्त्तीत्यर्थः । अत्र लोकादिषु पूर्व्वपूर्व्वापेक्षयोत्तरोत्तरस्योत्कर्षोक्तिः अतः सारालङ्कारः । उत्तरोत्तरमुत्कर्षः सार इति तल्लक्षणात् ॥ ८१ ॥

पदमिति । इन्द्रः शतेन मखैर्मखशतेन यत्पदं इन्द्रत्वलक्षणं स्थानमाप स इन्द्रः तस्मै पदाय तत्पदस्वीकारायेत्यर्थः । ते तव याचने प्रार्थनायां चाटुकारः । प्रियम्वदो जात इति शेषः । नशब्दश्लोकेत्यादिना टच् प्रत्यय निषेधात् कर्मण्यण् । प्रसादमनुग्रहं कुरु । तदैन्द्रपदं स्वीकारकृताऽङ्गीकारव्यञ्जकेन भ्रूनटनश्रमेण विक्षेपव्यापारेणालङ्कुरुष्व ॥ ८२ ॥

मन्दाकिनीनन्दनयोर्विहारे देवे भवेद्देवरि माधवे वा ।
श्रेयः स्त्रियां यातरि यच्च सख्यां तच्चेतसा भाविनि! भावयस्व ८३
रज्यस्व राज्ये जगतामितीन्द्राद् याच्ञाप्रतिष्ठां लभसे त्वमेव ।
लघूकृतस्त्वं वलियाचनेन यत्प्राप्तये वामनमामनन्ति ॥ ८४ ।
यानेव देवान्नमसि त्रिकालं न तत्कृतघ्नीकृतिरौचिती ते ।

मन्दाकिनीति। भावयतीति भाविनी तत्सम्बोधने। हे भाविनि! विचारचतुरे भैमि! मन्दाकिनीनन्दनयो र्विहारे क्रीडायां माधवे देवे उपेन्द्रे। दीव्यतीति देवरी देवरे भर्तृभ्रातरि सति। श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरावित्यमरः। देवे ऋन्निति ऋन् प्रत्ययः। स्त्रियां स्त्रीदेव्यां ङिति ह्रस्वश्चेति वा नदीत्वादामागमः। यतत इति यातरि देवरभार्य्यायां भार्य्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परमित्यमरः। यातेर्वृद्धिश्चेति ऋन् प्रत्ययः। सख्यां सत्यां च यच्छ्रेयो महोत्कर्षो भवेत् तत् त्वं चेतसा विभावय विचारय। अयाचितोपनतं महच्छ्रेयो न हातव्यमित्यर्थः। अत्र मन्दाकिनी नन्दनविहारक्रियायां माधव-देवृकत्व-स्त्रीयातृत्वगुणयोश्च सामस्त्ये यौगपद्यात् समुच्चयालङ्कारः। गुणक्रिया यौगपद्यं समुच्चय इति लक्षणात्॥ ८३ ॥

रज्यस्वेति। हे भैमि! जगतां राज्ये त्रैलोक्याधिपत्ये रज्यस्वानुरज्यस्व। प्रार्थनायां लोट्। रञ्जेः स्वरितत्वादात्मनेपदम्। इत्येवं रूपां याच्ञां प्रार्थनामेव प्रतिष्ठां गौरवं इन्द्रात् त्वमेव लभसे। तथा हि। तस्य त्रैलोक्यराज्यस्य प्राप्तये लाभाय बलेः वैरोचने र्याचनेन लघूकृतं स्वं आत्मा येन तं विष्णुमपीति शेषः। तं वामनं ह्रस्वं लघुञ्च आमनन्ति। यदर्थं विष्णुना याचनालाघवं प्राप्तं प्रार्थनां विना तदेव दीयते देवेन्द्रेणेत्यहो ते भागधेय मित्यर्थः। व्यतिरेकेण दृष्टान्तालङ्कारः॥ ८४ ॥

यानिति। हे भैमि! यान् एव देवा निन्द्रादीन् त्रयः काला यस्मिन् कर्मणि तत् त्रिकालं यथा तथा नमसि त्रिसन्ध्यं नमस्करोषीत्यर्थः। तेषां देवानां कृतघ्नी कृतिः कृतघ्नीकरणं ते तव औचित्यं न। त्वया देवा

प्रसीद तानप्यनृणान् विधातुं पतिष्यतस्त्वत्पदयोस्त्रिसन्ध्यम् ८५
इत्युक्तवत्या निहितादरेण भैम्या गृहीता मघवत्प्रसादः ।
स्रक् पारिजातस्य ऋते नलाशां वासैरशेषामपुपूरदाशाम् ॥८६
आर्य्ये विचार्य्यालमिहेति कापि योग्यं सखि स्यादिति काचनादि
ओङ्कार एवोत्तरमस्तु वस्तु मङ्गल्यमत्रेति च काप्यवोचत् ॥८७।

अकृतघ्ना न क्रियन्तामिति भावः । तिसृणां सन्ध्यानां समाहारः । त्रिसन्ध्यं सन्ध्यात्रयेऽपीत्यर्थः अत्यन्तसंयोगे द्वियीया । वाटावन्त इति नपुंसकत्वं । त्वत्पदयोः पतिष्यतः नमस्करिष्यतः तान् देवानपि अनृणान् विधातुं प्रतिप्रणामस्वीकारेणानृणान् कर्तुं प्रसीद । अत स्तं वृणीष्वेत्यर्थः ॥ ८५ ॥

इतीति । इतीत्थ मुक्तवत्या शक्रदूत्या आदरेण निहिता समर्पिता भैम्या गृहीता स्वीकृता मघवतः प्रसादोऽनुग्रहभूता नत्ववतंसत्वेनाभिमतेति शेषः । पारिजातस्य स्रक् माला नलस्याशां तृष्णां दिशं च ऋते विना तस्यां तस्य विपरीतशङ्काकरत्वादिति भावः । आशातृष्णादिशोरपीति विश्वः । यद्यप्यन्यारादितरर्त्ते इति ऋते शब्दप्रयोगात्पञ्चम्येव युक्ता तथापि मतान्तरे द्वितीयाऽप्यस्तीत्याहुः । तथा फलति पुरुषाराधनमृत इत्यादि प्रयोगस्य । अशेषां आशान्दिशं सर्व्वा दिशोऽपीत्यर्थः । जातावेकवचनम् । वासैर्निजवासनाभिः । अपुपूरत् । पूरितवती । पूरपूरणे इति चौरादिको धातुः । तस्याग्लोपित्वान्नाग्लोपिशास्वृदिता मित्युपधा ह्रस्वनिषेधः । अभ्यास ह्रस्वत्वम् । द्वयोरप्याशययो रभेदाध्यवसायाद्विनोक्तिनिर्वाहः ॥ ८६ ॥

आर्य्ये इति । आर्य्ये भैमि ! इह इन्द्रवरणे विचार्य्यालं विचारो न कर्त्तव्यः इति कापि सखी अवोचत् । सखि ! भैमि ! योग्यमिदं युक्तं स्यादिति काचनाप्यवोचत् अत्रोङ्कारोऽङ्गीकार एव माङ्गल्यमुत्तरं उत्तररूपं वस्तु अस्त्विति च काप्यवोचत् ॥ ८७ ॥

अनास्रवा वः किमहङ्कदापि वक्तुं विशेषः ? परमस्ति शेषः ।
इतीरिते भीमजया न दूती मालिङ्गदालीश्च मुदामियत्ता ॥८८॥
भैमीञ्च दूत्यञ्च न किञ्चिदाप मिति स्वयं भावयतो नलस्य ।
आलोकमात्राद्यदि तन्मुखेन्दो रभून्न भिन्नं हृदयारविन्दम्॥८९
ईषत्स्मितक्षालितसृक्कभागा दृक्संज्ञया वारिततत्तदालिः ।
स्रजा नमस्कृत्य तयैव शक्रं तां भीमभूरुत्तरयाम्बभूव ॥ ९० ॥

अनास्रवेति। हे सख्यः ! अहं कदापि वो युष्माकं अनास्रवा वचना-कारिणी किम् ?। परं किन्तु वक्तुं विशेषः। शेषोऽस्ति। किन्तु वक्तव्यशेषः कश्चिदस्तीत्यर्थः। इति भीमजया भैम्या ईरिते उक्ते सति। दूतीं इन्द्रशम्भलीं आली भैमीसखीश्च मुदां इयत्ता नालिङ्गत्। न प्राप। स्वोक्त मङ्गीकृत्य तत्र किञ्चिद्वरदानमपेक्षत इति भ्रान्त्या महान्तमानन्दमविन्दतेत्यर्थः ॥ ८८ ॥

भैमीति। भैमीं दूत्यं च तयोः किञ्चिदेकञ्च न आप। आप्नोते र्लुङि लिप्। स्त्रीरत्नलाभो माभूत् परोपकारोऽपि न सिद्ध इत्यर्थः। इति स्वयमात्मनि। भावयतो भैमीं चित्तचलनभ्रान्त्या चिन्तयतो नलस्य हृदयमेवारविन्दं तन्मुखेन्दो भैमीमुखचन्द्रस्य आलोकमात्रात् दर्शनमात्रात् प्रकाशमात्रात् आलोको दर्शनोद्योतावित्यमरः। भिन्नं विदीर्णं विकसितं च नाभूत्, यदिनाभूत् किं तदा तन्मुखदर्शनादनया विश्वास्य हतोऽस्मीति विदीर्णं हृदयोभवेदेवेत्यर्थः। इन्दुप्रकाशात् कथमरविन्दविकास इति विरोधश्च ध्वन्यते ॥ ८९ ॥

ईषदिति। भीमभू भैमी ईषत् स्मितेन मन्दहासेन क्षालितौ धौतौ सृक्कणी। ओष्ठप्रान्तावेव भागौ यया सा सती। प्रान्ता वोष्ठस्य सृक्कणी इत्यमरः। दृक्-संज्ञयैव वारिता स्तास्ता पूर्वोक्तं विरुद्धं प्रवर्त्तयन्त्यः आलयः सख्यो यया सा च सती। तयेन्द्रदूती-दत्तया स्रजा सहैव वृद्धो यूनेति सूत्रकारप्रयोगादेवज्ञापकात् सहार्थाप्रयोगेऽपि सहार्थे द्योत्ये

स्तुतौ मघोनस्त्यज साहसिक्यं वक्तुं कियत्तं यदि वेद वेदः।
वृथोत्तरं साक्षिणि हृत्सु नृणामज्ञातृविज्ञापि ममापि तस्मिन्॥९१
आज्ञान्तदीयामनु कस्य नाम नकारपारुष्यमुपैति जिह्वा।
मह्वा तु तां मूर्द्ध्नि निधाय मालां बालापराध्यामि विशेषवाग्भिः॥९२
तपःफलत्वेन हरेः कृपेयमिमन्तपस्येव जनं नियुङ्क्ते।
भवत्युपायं प्रति हि प्रवृत्ता वुपेयमाधुर्य्यमधैर्य्यसज्जि ॥ ९३ ॥

तृतीया। शक्रं नमस्कृत्य स्रजं शक्रञ्च नमस्कृत्येत्यर्थः। ननु तामवतंसीकृत्य तस्य नलस्य जीवनार्थमिति भावः। तामिन्द्रदूतीं उत्तरयाम्बभूव उत्तरवामाचष्टे। तदाचष्ट इति णिच् ॥ ९० ॥

स्तुताविति। हे दूति! मघोन इन्द्रस्य स्तुतौ विषये साहसिक्यं त्यज। अविमृश्यकारित्वं त्यज न स्तुहीत्यर्थः। कुतः अशक्यत्वादित्याह। तं शक्रं कियदल्पं वेद यदि वेदः श्रुतिरेव वेद वेत्ति। नान्यः। अतः स्तुतेर्विरमेति भावः। तर्हि किमस्योत्तरं तत्राह। नृणां हृत्सु विषये साक्षिणि साक्षाद् द्रष्टरि संज्ञायामिति इनि प्रत्ययः। तस्मिन् मघोनि इन्द्रे अज्ञातॄन् विज्ञापयतीति तथोक्तम्। मम सम्बन्ध्युत्तरमपि वृथा। अज्ञस्योत्तरा-काङ्क्षा न सर्वज्ञस्येत्यर्थः ॥ ९१ ॥

तथाप्यविनयपरिहाराय किञ्चित् विज्ञापयामीत्याह आज्ञामिति। तदीया मैन्द्री-माज्ञा मनु तामुद्दिश्य कस्य नाम जिह्वा नकारो नञुच्चारणमेव पारुष्यमुपैति। प्रतिषेधकाक्षरं भजेत्। न कोऽपि तदाज्ञोल्लङ्घनसाहसिकोऽस्तीत्यर्थः। किन्तु बाला शिशुरहं मह्वा सती तदाज्ञामेव मालां मूर्ध्नि निधाय वाग्भि रतिवादैरपराध्यामि अपराधं करोमि। तच्च बालत्वात् सोढव्य इति भावः ॥ ९२ ॥

तप इति। तपःफलत्वेन इन्द्रोपासनारूपस्य तपसः फलत्वेनोपलक्षिता फलभूतेत्यर्थः। इयं मत्परिजिघृक्षा रूपा कृपा इमं जनं मां तपस्येव पुनरपि इन्द्रोपासनायामेव नियुङ्क्ते प्रेरयति। स्वराद्यन्तोपसृष्टादिति

शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसम्पदेऽपि ।
विशेषलेशोऽयमदेवदेह मंशागतन्तु क्षितिभृत्तयेह ॥ ९४ ॥
अश्रौषमिन्द्रादरिणीर्गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः ।
स्वं प्रागहं प्रादिषि नामराय किन्नाम तस्मै मनसा नराय॥९५॥

वक्तव्यादात्मनेपदम्। ननु मदुपासनायाः पूर्णत्वात् फलं प्राप्तं किं तपसेत्याशङ्क्य सत्यं तदेव स्वादूकर्त्तुमित्याह। भवतीति॥ हि यस्मादुपायं प्रति प्रवृत्तौ साधनगोचरप्रवृत्तौ विषये उपेयस्य उपायस्य माधुर्य्यं स्वादुत्वमेव अधैर्य्यं अस्थैर्य्यं सञ्जयति कारयतीत्यधैर्य्यसञ्जि भवति। पुनः साधनप्रवृत्तिं चापलङ्कारयतीत्यर्थः॥ ९३॥

फलितमाह शुश्रूषिताह इति। तत्तस्मादधिकत्वादहन्तमिन्द्रमेव पतिं शुश्रूषिताहे सेविष्ये। शुश्रूषा श्रोतुमिच्छायां परिचर्य्याविधानयोरिति विश्वः। ज्ञाश्रुस्मृदृशां सन इति शृणोतेः सन्नन्तात्तङि लुटि टे रेत्वे ह एतीति तासः सकारस्य हकारः। किन्तु मुदेऽपि सन्तोषाय च व्रत-सम्पदेऽपि पातिव्रत्य-सम्पत्त्यर्थं चक्षितिभृत्तया राजत्वेनेह कस्मिंश्चिन्नरेन्द्रे अंशागतं मात्रया आगतम्। अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृप इति स्मरणात्। अतएव अदेवदेहं देवदेहरहितं मानुषविग्रहं सन्तं नतु साक्षादिति शेषः। अयं विशेषलेशोऽल्पीयान् भेदः सच सोढव्यः अन्यथा मे व्रतलोपः स्यादिति भावः॥ ९४॥

कथं व्रतलोपस्तदाह। अश्रौषमिति। हे इन्द्रदूति! व्रतस्य पतिव्रताधर्मस्य अतिप्रतिलोमा अत्यन्तप्रतिकूला अतएव तीव्रा दुःश्रवाश्च ते तव गिर इन्द्रे आदरिणी रादरवतीः अश्रौषम्। इन्द्रो महती देवतेति भयभक्तिभ्या मश्रौषं नतु रागादित्यर्थः। शृणोते र्लुङि मिप्। कथं तर्हि तमेव पतिं भजिष्यामीत्युक्तं तत्राह। प्राक् पूर्व्वमहं स्वमात्मानममराय देवात्मकाय तस्मै इन्द्राय न प्रादिषि न प्रादां किन्नाम किन्तु

तस्मिन् विमृश्यैव हृते हृदैषा मैन्द्री दया मामनुतापिकाऽभूत्
निर्वातुकामम्भवसम्भवानां धीरं सुखानामवधीरणेव ॥ ९६॥

वर्षेषु यद्भारतमार्य्यधुर्य्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु।
तत्रास्मि पत्युर्वरिवस्ययेह शर्म्मोर्म्मिकिर्म्मीरितधर्म्मलिप्सुः ९७

नराय नररूपिणे रलयोरभेदान्नलरूपाय तस्मै मनसा प्रादिषि। ददातेर्लुङि तङ्। स्थाघ्वोरिच्चेति इकारः। अतः साक्षादिन्द्रभजने मम व्रतलोपः स्यादेवेत्यर्थः ॥ ९५ ॥

तस्मिन्निति। तस्मिन्नरे हृदा हृदयेन विमृश्यैव हृते सतीदमेव साध्विति सम्यङ् निश्चित्यैव प्रवृत्तेरित्यर्थः। एषा ऐन्द्री दया मत्परिजिघृक्षालक्षणा कृपा निर्वातुकाममिदं मे साध्विति निश्चित्य मोक्षे प्रवृत्तमित्यर्थः। मुक्तिः कैवल्य निर्वाणेत्याद्यमरः। धीरं निर्विकारचित्तं विद्वांसं भवसम्भवानां सुखानां अवधीरणा सांसारिकसुखनामवज्ञा इव मा-मनुतापिका हाकष्ट मसाधु कृतं इति मम पश्चात्तापिनी नाभूत्। अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीनिषेधात् कर्मणि द्वितीया ॥ ९६ ॥

विमृश्य कृतमित्युक्तम् अथैनं विमर्शप्रकारमेव श्लोकचतुष्टयेनाह। वर्षेष्वित्यादि। आर्य्यधुर्य्या आर्य्यश्रेष्ठाः आश्रमेषु ब्रह्मचर्य्यादिषु चतुर्षु गार्हस्थ्यं गृहस्थाश्रममिव वर्षेष्विलावृतादिषु नवसु यद्भारतं वर्षं स्तुवन्ति प्रशंसन्ति। तत्र भारतवर्षे अहं पत्युर्वरिवस्यया शुश्रूषया। वरिवस्या तु शुश्रूषेत्यमरः वरिवस्यतेः क्यजन्तादप्रत्ययादित्यकारप्रत्ययः। इह विषये शर्म्मोर्मिभिः सुखपरम्पराभिः किर्मीरितं चित्रितं तत्सहचरं धर्मं लिप्सुः लब्धुमिच्छुरस्मि। शर्म शात सुखानि च। चित्रं किर्मीर कल्माष शबलैताश्च कर्वुर इति चामरः ॥ ९७ ॥

स्वर्गे सतां शर्म्म परं न धर्म्मा भवन्ति भूमाविह तच्च ते च ।
शक्या मखेनापि मुदोऽमराणां कथं विहाय द्वयमेकमीहे ॥ ९८
साधोरपि स्वः खलु गामिताधो गामी स तु स्वर्गमितः प्रयाणे ।
इत्यायती चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करे न ॥ ९९ ॥
प्रक्षीण एवायुषि कर्म्म-कृष्टे नरान्न तिष्ठत्युपतिष्ठते यः ।
बुभुक्षते नाकमपथ्यकल्पं धीरस्तमापातसुखोन्मुखं कः ॥ १०० ॥

ननु स्वर्गेऽपि सुखधर्म्मौ स्त इत्यत आह । स्वर्ग इति । स्वर्गे सतां स्वर्गवासिनामित्यर्थः शर्म्म परं सुखमेव । धर्माः सुकृतानि न सन्ति । इहास्यां भूमौ तच्छर्मच ते धर्म्माश्च भवन्ति सम्भवन्ति किञ्च इह मखेनेष्ट्या यागेन सुराणां मुदः प्रीतयः शक्याः सुसम्पाद्याः । एवं सति कथं अहं शर्म धर्मेष्टिरूपं द्वयं विहायैकं सुखमीहे । न चैतत् प्रेक्षावत्कृत्यमिति भावः । तस्मात् स्वर्गादपि भूलोक एव श्लाघ्य इत्यर्थः ॥ ९८ ॥

इतोऽपि भूलोक एव श्रेयानित्याह । साधोरिति । किञ्च साधोः सुकृतिनोऽपि स्वः स्वर्गादधोगामिता अधःपातिता खलु स साधुरितोऽस्माद्भूलोकात् प्रयाणेतु स्वर्गं गामी गमिष्यन् ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्तीति गीतावाक्यात् । भविष्यति गम्यादय इति गामिशब्दस्य भविष्यदर्थता । अकेनोरिति षष्ठीनिषेधात् कर्मणि द्वितीया । इतीत्थमायती उत्तरकालं उत्तरकाल आयतिरित्यमरः । हृदि चिन्तयतो विवेकिनः द्वयोः स्वर्गभूलोकयोः उदर्कः उत्तरफलं उदर्कः फलमुत्तरमित्यमरः। द्वे शर्करे न किमु ? शर्करे एवेत्यर्थः ॥ ९९ ॥

प्रक्षीण इति । किञ्च यो नाकः कर्मकृष्टे कर्मार्जिते आयुषि प्रक्षीणे सत्येव नरान् मनुष्यानुपतिष्ठते । सङ्गच्छते । आयुषि तिष्ठति विद्यमाने सति नोपतिष्ठते । उपाद्देवपूजेत्यादिना सङ्गतिकरणे तङ् । आपाते प्रारम्भे सुखोन्मुखं सुखकारणं नतु परिणामे इत्यर्थः । अतएवापथ्यकल्पं अपथ्यान्नसदृशं तं नाकं स्वर्गं धीरो धीमान् को बुभुक्षते । भोक्तुमि

इतीन्द्रदूत्यां प्रतिवाचमर्द्धे प्रत्युह्य सैषाभिदधे वयस्याः।
किञ्चिद्विवक्षोल्लसदोष्ठलक्ष्मी जितापनिद्रद्दलपङ्कजास्याः ॥१०१॥
अनादि-धाविस्वपरम्पराया हेतुस्रजः स्रोतसि वेश्वरे वा।
आयत्तधीरेषजनस्तदार्य्याः! किमीदृशः पर्य्यनुयुज्य कार्य्यः॥१०२॥
नित्यं नियत्या परवत्यशेषे कः संविदानोऽप्यनुयोगयोग्यः।
अचेतना सा च न वाचमर्हेद्वक्ता तु वक्त्रभ्रमकर्म्म भुङ्क्ते ॥१०३॥

च्छति। अपथ्यान्नभोजनवदासन्नमरणाधिकारं नाकभोगं कोनर इच्छतीत्यर्थः ॥१००॥

इतीति। सैषा भैमी इतीन्द्रदूत्यां विषये प्रतिवाचं प्रत्युत्तरं अर्द्धे प्रत्युह्य मध्ये निरुध्यासमाप्यैवेत्यर्थः। उपसर्गात् ह्रस्व ऊहतेरिति ह्रस्वः किञ्चिद्विवक्षया यत्किञ्चिद्वक्तुमिच्छयोल्लसतोः स्फुरतोः ओष्ठयोः लक्ष्म्या शोभया जितं अपनिद्रद्दलं विकसत्पत्रं येन तत्। अपनि पूर्वाद्द्रातेः शतृ प्रत्ययः। तच्च तत्पङ्कजञ्च तदिवास्यं यासान्ताः सखीः अभिदधे उवाच। अभिपूर्व्वाद्धा धातोः कर्त्तरि लिट् स्तङ् ॥१०१॥

अनादीति। एष जन अनादि यथा तथा धाविन्याः प्रवहन्त्याः स्वपरम्परायाः स्वदेह परम्परायाः हेतुनामदृष्टादीनां स्रजः श्रेण्याः। स्रोतसि प्रवाहे वा। बुद्धिः कर्मानुसारिणीति वचनादीश्वरे वा एष एव कारयितेति श्रुतेः। आयत्तधी र्न तु स्वाधीनबुद्धिरित्यर्थः। निरीश्वरसेश्वरभेदात् पक्षद्वयोक्तिः। तत्तस्माद्धेतो रार्य्याः! हेज्यायस्यः!। ईदृशः परतन्त्रो जनःपर्यनुयुज्यः उपालभ्यः किं कार्य्यः कारयितुं शक्यः। कारयते रचो यत्। अतः स्वयमपि दैवपरतन्त्रा न पर्यनुयोज्येति भावः ॥१०२॥

ननु दैवपारतन्त्र्येऽपि न मूढः पर्य्यनुयोज्यः विद्वांस्तु पर्य्यनुयोज्य इत्याशङ्क्याह। नित्यमिति। अशेषे जने नित्यं सर्वदा नियत्या दैवेन परवति परतन्त्रे सति संविदानो विद्वानपि समो गम्यृच्छीत्यादिना विदेरात्मनेपदम्। कोऽनुयोगयोग्यः पर्य्यनुयोगार्हः विदुषापि नियते

क्रमेलकं निन्दति कोमलेक्षुः क्रमेलकः कण्टकलम्पटस्तम् ।
प्रीतौ तयोरिष्टभुजोः समायां मध्यस्थता नैकतरोपहासः॥१०४॥
गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहारयन्ति ।
न लोक मालोकयथा पवर्गा त्त्रिवर्ग मर्वाञ्चमसुञ्चमानम् ?॥१०५॥
आकीटमाकैटभवैरि तुल्यः स्वाभीष्टलाभात् कृतकृत्यभावः ।

रलङ्घ्यत्वादितिभावः। तथाप्युपालम्भेदोषमाह। सा नियतिः चेतनाशून्येति वाचं नार्हेदिति युक्तं वक्ता अचेतनोपालम्भात्तु वक्तास्य श्रमः श्रान्तिरेव क्रियते इति कर्म व्यापारफलं तद्भुङ्क्ते। वाग्विलासादन्यत्फलं न किञ्चिदस्तीत्यर्थः ॥ १०३ ॥

ननु सुरेन्द्रं विहाय नलस्वीकारे जगत्युपहास्या तत्राह। क्रमेलकमिति। कोमलं इक्षुः कोमलेक्षुः तद्वाहारी गजाश्वादि र्न लोकेत्यादिना षष्ठी निषेधात् मधुपिपासुवद्द्वितीया समासः। क्रमेलकमुष्ट्रं निन्दति। उष्ट्रः क्रमेलकः यमहाङ्गा इत्यमरः। कण्टकेषु लम्पटः लोलुपः क्रमेलकः लोलुपं लोलुभं लोलं लालसं लम्पटं विदुरिति हलायुधः। तं कोमलेक्षुं गजादिं निन्दतीति शेषः इष्टभुजोस्तयोर्द्वयोः प्रीतौ तुष्टौ समायां तत्रैकतरस्योपहासो मध्यस्थता माध्यस्थ्यं न। यस्य यदिष्टं तुष्टिकरञ्च तस्य तत्र प्रवृत्तौ ये उपहसन्ति ते स्वयमेवोपहास्या भवन्तीति भावः ॥ १०४ ॥

ननु नलादपि गुणाधिके कथमरुचिस्तत्राह। गुणा इति। सत्यं हरन्तो मनोहरन्तोऽपि हरेरिन्द्रस्य गुणा मे मह्यं रुच्यर्थानां प्रीयमाण इति चतुर्थी। रोचमानं मनोहरन्तं नरं नलं न परिहारयन्ति न त्याजयन्ति। कुतः अपवर्गात् मोक्षादर्वाञ्चमपकृष्टं त्रिवर्गं धर्मकामार्थान् अमुञ्चमानं अत्यजन्तं लोकं नालोकयथ नपश्यथेति काकुः। न गुणमपेक्षते रागवृत्तिरिति दृष्टान्तालङ्कारः॥ १०५।

ननु महेन्द्रं प्राप्य कृतकृत्या भव किं नलप्रार्थनया दुःखायसे अत आह। आकीटमिति। आकीटं कीटादारभ्याकैटभवैरि पर्यन्तं विष्णुपर्यन्तं

भिन्नस्पृहाणां प्रति चार्थमर्थं द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥१०६॥
अध्वाग्रजाग्रन्निभृतापदन्धुर्बन्धुर्यदि स्यात् प्रतिबन्धुमर्हः।
जोषं जनः कार्य्यविदस्तु वस्तु पृच्छ्या निजेच्छा पदवीं मुदस्तु॥१०७
इत्थं प्रतीपोक्तिमतिं सखीनां विलुप्य पाण्डित्यबलेन बाला।
अपि श्रुतस्वर्पतिमन्त्रिसूक्तिं दूतीं बभाषेऽद्भुतलोलमौलिः॥१०८

स्वाभीष्टलाभात् कृतकृत्यभावः। कृतार्थत्वाभिमानः। तुल्यः साधारणः। ममाप्यभीष्टलाभात् कृतकृत्यता नेन्द्रलाभादित्यर्थः। तर्हीन्द्र एवेष्यतामित्यत आह। भिन्नस्पृहाणां भिन्नरुचीनां जनानामर्थमर्थं प्रत्येवं द्विष्टत्वमनिष्टत्वं तच्चेष्टत्वं चेति द्वयमपगता व्यवस्था घटत्वपटत्ववत् इति नियमो यस्य तदपव्यवस्थं अव्यवस्थम्। अपितु आपेक्षिकम्। तस्मादिन्द्रोऽपि मया नेष्यते को दोष इत्यर्थः॥१०६॥

किं बहुना ममात्र हितकार्य्ये कार्य्यज्ञोऽपि नान्यो जनः कश्चिन्नियामकः। किन्तु स्वेच्छैवेत्याह। अध्वाग्रेति। अग्रश्चासौ अध्वा चेति समानाधिकरण समासः। अतएव हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदादिति वामनः। अस्मिन्नग्राध्वनि पुरोऽग्रे जाग्रत् स्फुरन् आसन्न इति यावत् स चासौ निभृता नियता पदेवान्धुः कूपः। पुंस्येवान्धुः प्रहिः कूप इत्यमरः। तं प्रतिबन्धुमर्हो निवारयितुं शक्तो बन्धुः स्याद्यदि स जनो बन्धुजनः। कार्य्यवित् कार्य्यज्ञोऽपि जोषमस्तु तूष्णीमास्तां नतु मां निवारयेदित्यर्थः। कुतः ते तर्हि कार्य्यविज्ञानं स्यात्तदाह। मुदः श्रेयसः पदवीं तु निजेच्छैव पृच्छ्या प्रष्टव्या सैव मे प्रवर्त्तिका नान्यः कश्चिदित्यर्थः। वस्तु सत्यं अयमेव परमार्थ इत्यर्थः। प्रच्छेर्द्विकर्मकत्वादप्रधाने कर्मणि ऋहलोर्ण्यत्॥१०७॥

इत्थमिति। बाला भैमीत्थं सखीनां प्रतीपोक्तिमतिं प्रतिकूलोक्तिबुद्धिं पाण्डित्य-बलेन प्रागल्भ्यावलम्बेन विलुप्य निषिध्य श्रुताः स्वर्पतिमन्त्रिणः शक्रसचिवस्य बृहस्पतेः सूक्तयो यया तामपि। अहरादीनां

परेतभर्त्तुर्मनसेव दूतीं नभस्वतेवानिलसख्यभाजः ।
त्रिस्रोतसेवाम्बुपतेस्तदाशु स्थिरास्थमायातवतीं निरास्थम् ॥१०९॥
भूयोऽर्थमेनं यदि मां त्वमात्थ तदा पदावालभसे मघोनः ।
सतीव्रतैस्तीव्रमिमन्तु मन्तु मन्तर्वरं वज्रिणि मार्जितास्मि ॥११०॥
इत्थं पुनर्वागवकाशनाशान्महेन्द्रदूत्यामपयातवत्याम् ।
विवेश लोलं हृदयं नलस्य जीवः पुनः क्षीवमिव प्रबोधः ॥ १११ ॥

पत्यादिष्विति रेफादेशः । अद्भुतेन अहो इहसतेरपि प्रागल्भ्यमित्याश्चर्य्येण लोलमौलिं कम्प्रशिरसं शिरः कम्पयन्तीमित्यर्थः । दूतीं बभाषे ॥१०८॥

परेतेति । मनसैवाकर्षकेणेति शेषः । एवं वायुगङ्गयोरपि द्रष्टव्यम् । परेतभर्तुर्यमस्य दूतीं, नभस्वता वायुनैवानिलस्य सख्यभाजोऽग्नेर्दूतीं, त्रिस्रोतसा गङ्गयैवाम्बुपतेर्वरुणस्य दूतीं, स्थिरा दृढाऽऽस्थाऽभिनिवेशो यथा तथाशु शीघ्रमायातवतीं तदाऽगमनक्षण एव निरास्थं पर्य्यहार्षम् । अस्यतिख्यातिवक्तिभ्यो ङिति अस्यते र्लुङि च्लेरङादेशः । अस्यतेः स्थुगिति थुगागमः । यथा हि दूत्यो दूरादेव निरस्ताः इन्द्रगौरवात्तथेयन्तं कालं समभाषीत्यर्थः । यत्र मनोवायुगङ्गानदीनाञ्च विधेयत्वेन तत्प्रियार्थन्ताभिरेवातिवेगवतीभिरेता आनीता इत्युत्प्रेक्षार्थः ॥ १०९ ॥

भूय इति । हे शक्रदूति ! त्वं भूयः पुनरेवैनमर्थं इन्द्रं वृणीष्वेत्येनमर्थं मां आत्थ । ब्रवीषि यदि । ब्रुवः पञ्चानामादित आह ब्रुव इति । सिपः थलादेशः हकारस्य थकारादेशः । तदा मघोनः इन्द्रस्य पदावङ्घ्री पदङ्घ्रिरित्यमरः । आलभसे छिनत्सि स्पृशसि वा । वज्रिणीन्द्रे विषये अन्तः अन्तरङ्गे वरं श्रेष्ठं सन्तं गुरुत्वेन गृह्यमाणमित्यर्थः । इमं तीव्रं दुःसहं मन्तुं निजाज्ञोल्लङ्घनापराधं आगोऽपराधो मन्तुश्चेत्यमरः । सतीव्रतैः पतिव्रतानियमैर्मार्जितास्मि मार्जिष्यामि मृजेर्लुटि उदित्वाद्विकल्पादिड्भावः । पतिव्रताधर्माभिज्ञः सर्वज्ञो भगवान् मघवा मामस्मादपराधात् त्रास्यतीत्यर्थः ॥ ११० ॥

इत्थमिति । इत्थमुक्तप्रकारेण पुनर्वागवकाशनाशाद्वयोवचनावकाश

श्रवणपुटयुगेन स्वेन साधूपनीतं
दिगधिपकृपयात्मादीदृशः सन्निधानात्।
अलभत मधु बाला रागवागुत्थमित्थं
निषधजनपदेन्द्रः पातुमानन्दसान्द्रः ॥ ११२ ॥

श्रीहर्षङ्कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम्।
षष्ठः खण्डनखण्डतोऽपि सहजात् क्षोदक्षमे तन्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥११३॥

निवृत्ते रिन्द्रदूत्यां अपयातवत्यां गतायां नलस्य जीवोऽन्तरात्मा लोलं चलाचलं हृदयं क्षीबमिव। मत्ते शौण्डोत्कटक्षीबा इत्यमरः। क्षीबृ मदे इति धातोः कर्त्तरि क्तः अनुपसर्गात् फुल्ल क्षीब कृशोल्लाघा इति निपातनात् साधुः। प्रबोधो विवेक इव पुनर्विवेश पुनर्जात इवाभूत्। विश्वासोच्छ्वास चेत्यर्थः॥ १११ ॥

श्रवणेति। निषधानां जनपदानां इन्द्रो नलः दिगधिपानां इन्द्रादीनां कृपया तिरोधानशक्त्यनुग्रहरूपया आत्मादीदृशः सन्निधानात् प्रकाशसान्निध्यात् स्वेन स्वकीयेन श्रवणपुटयुगेन साधूपनीत समर्पित मित्यमुक्तरीत्या बालाया भैम्या रागवाग्भ्योऽनुरागवचनेभ्य उत्था यस्य तत्तदुत्थं मधु क्षौद्रं रसामृतमित्यर्थः आनन्दसान्द्रः सुखमयः सन् पातु मलभत तत्पानं लब्धवानित्यर्थः। शकधृषेत्यादिना तुमुन् प्रत्ययः॥ ११२ ॥

श्रीहर्षमिति। सहजात् सहोदरात् समानकर्तृकादित्यर्थः। खण्डनखण्डतः खण्डनखण्डाख्याद् ग्रन्थात्। यद्वा खण्डननामग्रन्थः। तदेव खण्ड इक्षुविकारः स्यात् खण्डः शकले चेक्षुविकारमणिदोषयोरिति विश्वः। तत्तस्मादपि क्षोदक्षमे सङ्घर्षसहे षष्ठः सर्गो व्यगलत् समाप्तः ॥११३॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां जीवातुनामाख्यायां नैषधव्याख्यायां षष्ठः सर्गः समाप्तः ॥ ६ ॥

नैषधचरितम् ।

सप्तमः सर्गः ।

अथ प्रियासादनशीलनादौ मनोरथः पल्लवितश्चिरं यः ।
विलोकनेनैव स राजपुत्र्याः पत्या भुवः पूर्णवदभ्यमानि ॥१॥
प्रतिप्रतीकं प्रथमं प्रियाया मथान्तरानन्दसुधासमुद्रे ।
ततः प्रमोदाश्रुपरम्परायां ममज्जतुस्तस्य दृशौ नृपस्य ॥ २ ॥

अथेति। अथेन्द्रदूती-निगमनानन्तरं भुवः पत्या नलेन पतिः समास एवेति नियमात् असमासेऽपि संज्ञाभावात् तत्कार्य्याभावः। प्रियाया दमयन्त्या आसादनं प्राप्तिः शीलनं परिचयः तदादौ विषये आदिशब्दात् आश्लेषादिसङ्ग्रहः यो मनोरथः चिरं चिरात्प्रभृति पल्लवितः सञ्जातपल्लवः स मनोरथो राजपुत्र्या विलोकनेनैव पूर्णवत् फलित वदभ्यमानि मेने तदा ननन्देत्यर्थः। मन्यतेः कर्मणि लुङ् ॥ १ ॥

प्रतीति। तस्य नृपस्य दृशौ नेत्रे प्रथमं प्रियायां भैम्यां तत्रापि प्रतिप्रतीकं प्रत्यवयवं ममज्जतुः तामवयवशो ददर्शेत्यर्थः। अथ तदनन्तरं अन्तः अन्तरात्मनि य आनन्दसुधासमुद्रः तस्मिन् ममज्जतुः दर्शनफलमानन्दं अनुबभूवतुरित्यर्थः। करणे कर्तृत्वोपचारः। ततः प्रमोदाश्रुपरम्परायां आनन्दबाष्पप्रवाहे ममज्जतुः। अत्र दृग्रूपस्यैकस्याधेयस्य प्रियावयवाद्यनेकाधारवृत्तित्वभेदकथनात् . पर्य्यायालङ्कारभेदः क्रमेणैकमनेकस्मिन् आधारे वर्त्तते यदि। एकस्मिन्नथवानेकं पर्य्यायालङ्कृतिर्द्विधेति लक्षणात् ॥ २ ॥

ब्रह्माद्वयस्यान्वभवत् प्रमोदं रोमाग्रएवाग्रनिरीक्षितेऽस्याः ।
यथौचितीत्थं तदशेषदृष्टा वथ स्मराद्वैतमुदन्तथासौ ॥ ३ ॥
वेलामतिक्रम्य पृथुं मुखेन्दोरालोकपीयूष-रसेन तस्याः ।
नलस्य रागाम्बुनिधौ विवृद्धे तुङ्गौ कुचावाश्रयति स्म दृष्टिः॥४॥
मग्ना सुधायां किमु तन्मुखेन्दोर्लग्ना स्थिता तत्कुचयोः किमन्तः।

ब्रह्मेति । असौ नलोऽस्या भैम्या रोमाग्र एव रोमाग्रमात्रे अग्रे प्रथमं निरीक्षिते दृष्टे सति यथा ब्रह्मैवाद्वयमद्वितीयं वस्तु तस्य प्रमोदं ह्यानन्दं अन्वभवत् अनुभूतवान् । आनन्दस्य ब्रह्माभेदेऽपि उपचाराद्भेदव्यपदेशः। अथाग्रदर्शनानन्तरं तस्य रोम्णः अशेषदृष्टौ कृत्स्नदर्शने सति द्वयोर्भावो-द्विता द्वितैव द्वैतं प्रज्ञादित्वात् स्वार्थेऽण् प्रत्ययः । तद्रहितमद्वैतम् । स्मर एव अद्वैतमद्वितीयं वस्तु तस्य मुदं तथा अन्वभवत् । अत्र तु ब्रह्मानन्दात् स्मरानन्दोऽधिक इति विवक्षितम् । तथा रोमापि रोमाग्रादधिकम् । तत्र यथाऽल्पदर्शनादल्पानन्दः तथाधिकदर्शनादधिकइति यथा तथा शब्दार्थः इत्थमौचितकारणानुरूपं कार्य्यजन्मौचितमेवेत्यर्थः । अत्र ब्रह्मानन्द-स्मरानन्दयोरेकस्मिन् नले क्रमेण वृत्तिकथनादेकस्मिन् अथवानेकमित्युक्त-लक्षणो द्वितीयः पर्य्यायालङ्कारभेदः ॥ ३ ॥

वेलामिति । नलस्य दृष्टिस्तस्या मुखेन्दो रालोकः दर्शनं प्रकाशश्च आलोकौ दर्शनोद्योतावित्यमरः । स एव पीयूष ममृतं तस्य रसेन स्वादेन रागाम्बुनिधौ अनुरागसमुद्रे पृथुं महतीं वेलां कालं मर्य्यादाञ्च अब्ध्यम्बुविकृतौ वेला कालमर्य्यादयो रपीत्यमरः । अतिक्रम्य विवृद्धे प्रवृद्धे सति तुङ्गौ कुचावाश्रयति स्म सुखलग्ना दृष्टिः रागवशात् कुचयोः पपातेत्यर्थः । अत्र दृष्टिविशेषणसाम्याच्चन्द्रोदये समुद्रवृद्धौ तन्मज्जनभया दुत्सेधाश्रयिजन प्रतीतेः समासोक्तिरलङ्कारः । तेनचाब्धिमज्जनभयादिवे-त्युत्प्रेक्षा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४ ॥

मग्नेति । अस्य नलस्य दृष्टिः तस्या भैम्या मुखेन्दोः सुधायां मग्ना किमु ? तत्कुचयोरन्तरभ्यन्तरे च लग्ना स्थिता किम् ? उभयत्रापि अन्यथा कथं

चिरेण तन्मध्यममुञ्चतास्य दृष्टिः कृशीयः स्खलनाद्भिया नु ॥५॥
प्रियाङ्गपान्था कुचयोर्निपत्य विहृत्य लोला नलदृग्भ्रमन्ती ।
बभौतमां तन्मृगनाभिलेप तमःसमासादितदिग्भ्रमेव ॥ ६ ॥
विभ्रम्य तच्चारुनितम्बचक्रे दूतस्य दृक् तस्य खलु स्खलन्ती ।
स्थिरा चिरादास्त तदूरुरम्भा स्तम्भावुपश्लिष्य करेण गाढम् ॥७॥
वासः परं नेत्रमहं न नेत्रं किमु ? त्वमालिङ्ग्य तन्मयापि ।

तावान् विलम्ब इति भावः । किं च कृशीयः कृशतरं तन्मध्यं कर्म्म स्खलनाद्भिया नु भयेन किं चिरेणामुञ्चतः ? रज्जुसञ्चारवदिति भावः । उत्प्रेक्षात्रयस्य सजातीयसंसृष्टिः ॥ ५ ॥

प्रियेति । प्रियाया अङ्गेषु पन्थानं गच्छतीति पान्था नित्यपथिका । पथो णो नित्यमिति पथो णप्रत्ययः पन्थादेशश्च । लोला सतृष्णा नलस्य दृक् दृष्टिः कुचयोः निपत्य विहृत्य आहृत्य भ्रमन्ती कुचयोर्मृगनाभिलेपः कस्तूरिका लेपनमेव तमस्तेन समासादितः प्राप्तो दिक्भ्रमो यया सेवेत्युत्प्रेक्षा बभौतमां अतिशयेन बभौ ॥ ६ ॥

विभ्रम्येति । तस्य नलस्य दृक् दृष्टिः तस्या भैम्या चारुनितम्ब एव चक्रे तस्मिन् विभ्रम्य भ्रान्त्वा स्खलन्ती चलन्ती तस्या ऊरू एव रम्भास्तम्भौ करेणांशुना हस्तेन च गाढमुपश्लिष्य स्थिरा निश्चला सती चिरादास्त उपविष्टा । आसेर्लङ् अत्र दृष्टिविशेषणसाम्यात् भ्रमणक्रीड़ाकारिबालकप्रतीतेः समासोक्तिः । तस्या चारुस्तम्भाविति रूपकेण सङ्करः ॥ ७ ॥

वास इति । वासः परं वस्त्रमेव परं नेत्रं आच्छादनं अहं नेत्रं न ? इति काकुः ? नास्मि किमु ? अस्म्येवेत्यर्थः । नेत्रमस्ति गुणेवस्त्रे तरुमूले विमोचने इति विश्वः । तस्मान्नेत्रत्वाविशेषात्त्वं मयापि उरश्च नितम्बश्च ऊरू च उरोनितम्बोरु प्राण्यङ्गत्वात् द्वन्द्वैकवद्भावः तदालिङ्ग्य आश्लेषय प्रसीद

उरोनितम्बोरु कुरु प्रसाद मितीव सा तत्पदयोः पपात॥८॥
दृशोर्यथाकाममथोपहृत्य स प्रेयसीमालिकुलञ्च तस्याः।
इदं प्रमोदाद्भुतसम्भृतेन महीमहेन्द्रो मनसा जगाद॥९॥
पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा।
तदा घटेतापि न वा तदेतत् प्रतिप्रतीकाद्भुतरूपशिल्पम्॥१०॥
तरङ्गिणी भूमिभृतः प्रभूता जानामि शृङ्गाररसस्य सेयम्।
लावण्यपूरोऽजनि यौवनेन यस्यान्तथोच्चैस्तनता घनेन॥११॥

आलिङ्गनानुग्रहं कुरु इतीवेति मनीषयेवेत्युत्प्रेक्षा सा नलदृष्टिस्तस्याः भैम्याः पादयोः पपात पदे अपि ददर्शेत्यर्थः ॥ ८ ॥

दृशोरिति। अथ स महीमहेन्द्रो नलो दृशोः स्वाक्ष्णोः प्रेयसीं भैमीं तस्या आलिकुलं सखीवर्गं च यथाकाममुपहृत्य उपायनीकृत्य यथेच्छं दृष्ट्वेत्यर्थः। प्रमोदाद्भुताभ्यां आनन्दविस्मयाभ्यां सम्भृतेन पूर्णेन मनसा इदं वक्ष्यमाणं जगाद स्थगितवागुवाचेत्यर्थः ॥ ९ ॥

पद इति। विधातुः पदे ब्रह्मणः स्थाने मन्मथो वा मन्मनोरथो वा अभिषिच्येत यदि तदा तत्कश्चिद्व मेतत्पुरोवर्त्ति प्रतिप्रतीकं प्रत्यवयवमद्भुतं रूपशिल्पमाकारनिर्माणं घटेताऽपि न वा घटेत तन्मनसापि निर्मातुमशक्यं किमुत ब्रह्मणेत्यर्थः। अत्र भैमीरूपशिल्पस्य प्रसिद्धब्रह्मसम्बन्धेऽपि असम्बन्धोक्ते स्तथा मन्मथाद्यसम्बन्धेऽपि सम्भावनया तत्सम्बन्धोक्तेश्च तद्रूपकातिशयोक्तिभेदौ ॥ १० ॥

तरङ्गिणीति। सेयं दमयन्ती भूमिभृतो भीममहीभर्त्तुः एव भूधरादिति श्लिष्टरूपकं। भुवः प्रभव इत्यपादानात् पञ्चमी। प्रभूता सम्भूता शृङ्गाररसस्य तरङ्गिणी नदी जानामीति वाक्यार्थे उत्प्रेक्षा। तथा हि यस्यां भैम्यां तथा तेन प्रकारेण या उच्चैस्तनता उन्नतकुचत्वं तथा घनेन सान्द्रेण सम्पूर्णेन यौवनेनैव उच्चै स्तारं स्तनता गर्जता स्तन शब्द इति धातो र्भौवादिकाल्लटः शत्रादेशः। घनेन मेघेन। घने मेघे मूर्त्ति-

अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवामवाप्ताम्?।
प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ॥ १२ ॥
जम्बालजालात् किमकर्षि? जम्बू-नद्या न हारिद्रनिभप्रभेयम्।
अप्यङ्गयुग्मस्य न सङ्गचिह्नमुन्नीयते दन्तुरता यदत्र ॥ १३ ॥
सत्येव साम्ये सदृशादशेषाद् गुणान्तरेणोच्चकृषे यदङ्गैः।

गुणे त्रिषु मूर्त्ते निरन्तर इति अमरः। लावण्यपूरोऽजनि जनितः यौवनेन लावण्यं वर्द्धत इति प्रसिद्धमेघवर्द्धितपूरत्वं तरङ्गिण्यां युक्तमिति भावः। यौवनेन घनेनेति व्यस्तरूपकम्। उच्चैस्तनता घनेनेति शब्दे श्लेषः तदुत्थापिता च भैम्याः शृङ्गारतरङ्गिण्यामुत्प्रेक्षेति सङ्करः॥ ११ ॥

अस्यामिति। अत्र सामर्थ्यात् ब्रह्मणः कर्तुरध्याहारः। ब्रह्मा अवाप्तां स्वभ्यस्तां नवामसाधारणीं वपुर्व्यूहविधानविद्यां शरीरसंस्थानविशेषनिर्माणविज्ञानमस्यां दमयन्त्यामेव द्योतयामास। किं नूनं विधातुरात्मनः सृष्टिकौशलप्रकाशनार्थां सृष्टिरेषैवेत्युत्प्रेक्षा। यद्यस्मात्प्रत्यङ्गसङ्गेन प्रत्यवयवव्याप्त्या स्फुटं लब्धो भूमा विस्तारो यया सा लावण्यसीमा सौन्दर्यसर्वस्वं इमां दमयन्तीमुपास्ते सेवते अस्यामुपावर्त्तत इत्यर्थः॥ १२ ॥

जम्बालेति। हरिद्रया रक्तं वस्तु हारिद्रं सुवर्णं तेन सदृशी तत् सन्निभा प्रभा यस्याः सेयं दमयन्ती जम्बूनद्याः मेरुपार्श्ववर्त्तिवाहिन्याः जम्बालजालात् पङ्कराशे र्जाम्बुनदत्वात् तस्येति भावः। निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमावित्यमरः। नाकर्षि न कृष्टा किं श्लिष्टाङ्गत्वात् सर्वाङ्गेषु हेमकर्दमेन प्रलिप्ता किमित्यर्थः। कुतः यद्यस्मात् अत्रास्यां भैम्यां अङ्गयुग्मस्य अवयवद्वयस्य सङ्गचिह्नं सन्धानचिह्नं दन्तुरता चौनत्यमपि दन्त उन्नत उरच् नोन्नीयते नाभ्युन्नीयते॥ १३ ॥

सतीति। यद्यस्मादस्या भैम्या अङ्गैः कर्तृभिः साम्ये सत्येवाशेषात् सदृशात् चन्द्रादेः पञ्चमी विभक्ते इति पञ्चमी। गुणान्तरेण केनापि

अस्यास्ततः स्यात्तुलनापि नाम वस्तु त्वमीषामुपमावमानः ॥१४॥
पुराकृतिस्त्रैणमिमां विधातु मभूद्विधातुः खलु हस्तलेखः ।
येयं भवद्भाविपुरन्ध्रिसृष्टिः सास्यै यशस्तज्जयजम्प्रदातुम् ॥१५॥
भव्यानि हानीरगुरेतदङ्गाद् ययायथानर्च्छि तथा तथा तैः ।
तस्याधिकस्योपमयोपमाता दाता प्रतिष्ठां खलु तेभ्य एव ॥१६॥

गुणविशेषेणोत्कर्षे समानादिषूत्कृष्टैरभावीत्यर्थः । भावे लिट् । तत उत्कृष्टत्वाद्धेतो स्तुलना समीकरण मपि स्यान्नाम ? काकुः । स्यात् किं ? न स्यादेवेत्यर्थः । तथा हि वस्तुतः परमार्थतस्तु अमीषामङ्गानां उपमा तुलना तस्या अवमानः उत्कृष्टानामसमाने समतोपादान मवमान एवेत्यर्थः ॥ १४ ॥

पुरेति । विधातुः स्रष्टुः पुराकृतिः पूर्वसृष्टिस्तत्र स्त्रैणं स्त्रीसमूहः पूर्वा स्त्रीसृष्टिरित्यर्थः । इमां भैमीं विधातुं स्रष्टुं हस्तलेखः खलु लेखनाभ्यासः इति हस्तकौशलार्थमेव यल्लिख्यते स हस्तलेखः । तादृगियमिति निदर्शनानुप्राणिता पूर्वस्त्रीसृष्टिः भैमीनिर्माणाभ्यासार्थमेवोत्प्रेक्षा किञ्च येयं भवन्तीनां भाविनीनां च पुरन्ध्रीणां स्त्रीणां सृष्टिः सास्यै भैम्यै यासां पुरन्ध्रीणां जयेन जातं तज्जयजं यशोदातु मिति फलोत्प्रेक्षा ॥ १५ ॥

भव्यानीति । भव्यानि रम्याणि चन्द्राद्युपमानवस्तूनि एतस्या भैम्या अङ्गान्मुखादेर्यया यथा हानीरपकर्षान् ग्लाम्लाहातेर्निवक्तव्य इति जहातेः स्त्रियां निप्रत्ययः । क्तिनोऽपवादः । अगुः । इणो गा लुङीति गादेशे गातिस्थेत्यादिना सिचो लुक् आत इति झेर्जुसादेशः । तथा तथा तैः उपमानवस्तुभिरनर्च्छि हर्षान्नृत्यं कृत मित्यर्थः । नन्वपकर्षे हर्षः कथं तत्राह । उपमाता उपमाकृत् कविः मातेर्माङोवा सिद्धम् । अधिकस्योत्कृष्टस्य भैम्यङ्गस्य उपमया उपमानीकरणेन अथवा गत्यन्तराभावात् तैरेव तुलनया तेषामेव उपमानीकरणेनेत्यर्थः । तेभ्य श्चन्द्रादिभ्य एव । चतुर्थी । प्रतिष्ठां दाता दास्यति ददाते लुट् यथाकथञ्चित् प्रतिष्ठादान-

नास्पर्शि दृष्टापि विमोहिकेयं दोषैरशेषैः स्वभियेति मन्ये ।
अन्येषु तैराकुलितस्तदस्यां वसत्यसापत्न्यसुखी गुणौघः ॥१७॥
औज्झि प्रियाङ्गैर्घृणयेव रूक्षा न वारिदुर्गात्तु वराटकस्य
न कण्टकैरावरणाच्च कान्तिर्धूलीभृता काञ्चनकेतकस्य ॥१८॥
प्रत्यङ्गमस्यामभिकेन रक्षां कर्त्तुं मघोनेव निजास्त्रमस्ति ।
वज्रञ्च भूषामणिमूर्त्तिधारि नियोजितन्तद्द्युतिकार्मुकञ्च ॥१९॥

काले उपमेयत्वेन वा उपमाया उपमानत्वेन वा कविमुखादाश्चन्द्रादीनां पुनः प्रतिष्ठा भविष्यतीत्यनर्थ इत्यर्थः ॥ १६ ॥

नेति। दृष्टापि विमोहिका दर्शनमात्रेणापि व्यामोहिकेयं दमयन्ती अशेषैर्दोषैः आकुलितः पीड़ितः स्वभिया अस्मानपि मोहयिष्यतीत्यात्मीयभयेनैव नास्पर्शि न स्पृष्टेति मन्ये उत्प्रेक्षा। भीरवो हि भयहेतून् स्प्रष्टुमेव बिभ्यतीति भावः। तस्माद्दोषस्पर्शाभावात् अन्येषु स्त्र्यन्तरेषु तैर्दोषैः आकुलितः पीड़ितो गुणौघोऽस्यां भैम्यां असापत्न्येन अकण्टकत्वेन सुखी सन् वसति। प्रायेण सामग्र्यविधौ गुणानामित्यस्य अपवादोऽस्यामेव दृष्ट इति भावः ॥ १७ ॥

औज्झीति। प्रियाङ्गैः भैमीगात्रैः वराटकस्य बीजकोशस्य कमलकर्णिकाया इत्यर्थः। बीजकोशो वराटक इत्यमरः। रूक्षा परुषा कान्तिर्घृणयेव रौक्ष्यजुगुप्सयैव औज्झि निरस्ता। उज्झ विसर्गे कर्मणि लुङ्। वारिदुर्गाद्वारिदुर्गस्थत्वात् तु न किञ्चन। काञ्चनकेतकस्य धूलिभिर्भृता पूर्णा कान्ति रौज्झि वा। रजः कीर्णत्वादेवौज्झि। न कण्टकैरावरणात्तु। रौक्ष्यादिदोषदूषितत्वान्न भैमीकायकान्तिसाम्य मर्हति। महती तत्कायकान्तिरित्यर्थः ॥ १८ ॥

प्रत्यङ्गमिति। अस्यां भैम्यां अभिकामयत इत्यभिकेन कमः कामनोऽभिक इत्यमरः। अनुकाभिकाभीकः कमितेति निपातनात् साधुः। मघोना इन्द्रेण प्रत्यङ्गं रक्षां कर्त्तुं नियोजितं नियमितं भूषामणीनां वज्र-

अस्याः सपक्षैकविधोः कचौघः स्थाने मुखस्योपरि वासमाप।
पक्षस्यतावद्बहुचन्द्रकोऽपि कलापिनां येन जितः कलापः ॥२०॥
अस्या यदास्येन पुरस्तिरश्च तिरस्कृतं शीतरुचान्धकारम्।
स्फुटं स्फुरद्भङ्गकचच्छलेन तदेव पश्चादिदमस्ति बद्धम् ॥२१॥
अस्याः कचानां शिखिनश्च किन्नु विधिङ्कलापौ विमतेरगातां।

मणीनां मूर्त्तिमाकारं धारयतीति तद्धारि निजास्त्रं वज्रञ्च तेषां मणीनां द्युतय एव कार्मुकं मणिधनुः आस्ते इन्द्रनियोगात् भूषामणि तत्र भाव्याजेन अवरोधरक्षार्थं वज्रायुधमिन्द्रधनुश्च प्रत्यङ्गमाहृत्य तिष्ठतीवेत्युत्प्रेक्षा ॥ १९ ॥

अथासर्गसमाप्तेर्दयमन्त्याश्चिकुरादिपादनखान्तवर्णनं आरभते अस्याः सपक्षैकेति। अस्याः भैम्याः कचौघः केशपाशः सपक्षः सदृशः सुहृद्भूतश्चैक एव विधुश्चन्द्रो यस्य तस्य सपक्षैकविधोस्तृतीयादिषु भाषितपुंस्कं पुंवद्गावस्येति वैकल्पिकः पुंवद्भावः। मुखस्योपरि वासं स्थिति माप स्थाने युक्तम्। कुतः येन कचौघेन पक्षस्याः गरुत्स्थिताः सवर्गाश्च तावन्तो बहवः चन्द्रका मेचकाश्च यस्य सोऽपि। समौ चन्द्रकमेचकावित्यमरः। चन्द्रपक्षे शेषाद्विभाषेति कप्। कलापिनां बर्हिणां कलापो बर्हिः पिच्छ इत्यर्थः जितः अनेकचन्द्रसहायविजयिन एकचन्द्रविजयस्तदुपर्य्यवस्थानं च किञ्चित्त मित्यर्थः ॥ २० ॥

अस्या इति। अस्या भैम्या आस्येनेव शीतरुचा मुखचन्द्रेण यदन्धकारं तमः अन्धकारोऽस्त्रियान्ध्वान्तमित्यमरः। पुरोऽग्रे तिरश्च पार्श्वयोश्च तिरस्कृतं तदन्धकारमेवेदं स्फुटं स्फुरन् भङ्गः कौटिल्यं पराजयश्च येषां तेषां कचानांछलेन पश्चाद्बद्धमस्तीत्युत्प्रेक्षा तिरस्कृतो हि भग्नोत्साहः कश्चित् पृष्ठभागे बद्ध स्तिष्ठतीति भावः ॥ २१ ॥

अस्या इति। अस्याः भैम्याः कचानां केशानां शिखिनः बर्हिणश्च कलापौ केशपाशबर्हभारौ कलापो भूषणे बर्हे तूणीरे संहते कच

तेनायमेभिः किमपूजि पुष्पै रभर्त्सि दत्त्वा स किमर्द्धचन्द्रम्२२

केशान्धकारादथ दृश्यभाल स्थलार्द्धचन्द्रा स्फुटमष्टमीयम् ।
एतां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधु ॥२३॥
पुष्पन्धनुः पुष्पशरस्य दाहे श्यामीभवत्केशरशेषमासीत् ।
व्यधाद्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत्त ॥२४॥

इत्यमरः । विमतेः मिथो विरोधविवादाद्विधिमगातां स्वतारतम्यं प्रष्टुं अगमतां किं नु ? इणोगा लुङीति साधुः । तेन विधिना केशपाशेभिः पुष्पैरिति च हस्तेन पुरोवर्त्तिनिर्देशः अपूजि किम् ? महतः पूज्यत्वादिति भावः । स शिखिकलापः अर्द्धचन्द्रं चन्द्रकं गलहस्तञ्च दत्त्वा अभर्त्सि भर्त्सितः किं ? महाजनद्वेषिणो नीचस्य शास्यत्वादिति भावः । अर्द्धचन्द्रस्तु चन्द्रके गलहस्ते बाणभेदे इति विश्वः । शिखिकलापस्य चन्द्रकवत् केशपाशस्यापि तत् कुसुमं ब्रह्मदत्तं शाश्वतमिति भावः । अत्रोत्तरोत्प्रेक्षयोः प्रथमोत्प्रेक्षासापेक्षत्वात् सङ्करः ॥ २२ ॥

केशेति । केश एवान्धकारः तस्मादथानन्तरं दृश्यो दर्शनार्हः भालस्थले ललाटभाग एव अर्द्धचन्द्रो यस्याः सा इयं दमयन्ती अष्टमी । तत्रापि अन्धकारानन्तरं दृश्यार्द्धचन्द्रत्वात् कृष्णाष्टमी । शुक्लपक्षेऽपि विपर्य्ययात् स्फुटमित्युत्प्रेक्षा । कुतः यद्यस्मात् मनोभुवा जगज्जयाय एतामासाद्य साधुसिद्धिः जयसिद्धिरसाधि साधिता । कृष्णाष्टम्यां उैत्रः यात्रासिद्धिं करोतीति सिद्धिविदः । यथाह पितामहः । जयदा विजिगीषूणां यात्रायामसिताष्टमी । श्रवणेनापि रोहिण्या जययोगो युता यदि इति ॥ २३ ॥

पुष्पमिति । मदनस्य दाहे दाहकाले पुष्पमेव धनुः श्यामीभवन्तः केसराः किञ्जल्का एव शेषो यस्य तदासीत् । किं किञ्च ईशो हरः तदपि क्रुधा क्रोधेन द्विधा द्वेधा किं व्यधात् व्यभजत् किं? येन द्विधा विभक्तेन पुष्पेण विधिर्वेधा भैम्या भ्रुवौ व्यधत्त असृजदित्युत्प्रेक्षा ॥ २४ ॥

भ्रूभ्यां प्रियाया भवता मनोभू चापेन चापे घनसारभावः।
निजां यदाप्लोषदशामपेक्ष्य सम्प्रत्यनेनाधिकवीर्य्यतार्जि ॥२५॥
स्मारन्धनुर्यद्विधुनोज्झितास्या मास्येन भूतेन च लक्ष्मलेखा।
एतद्भ्रुवौ जन्म तदाप युग्मं लीलाचलत्वोचितबालभावम् ॥२६॥
इषुत्रयेणैव जगत्त्रयस्य विनिर्जयात् पुष्पमयाशुगेन।
शेषा द्विबाणी सफलीकृतेयं प्रियादृगम्भोजपदेऽभिषिच्य ॥२७॥

भ्रूभ्यामिति। किञ्च प्रियाया भैम्या भ्रूभ्यां भवता मनोभुवश्चापेन घनसारभावो दृढस्थिरांशत्वं कर्पूरत्वं च सारो बले स्थिरांशे च अथ कर्पूरमस्त्रियां घनसार इति चामरः। आपे प्राप्तः। आप्नोतेः कर्मणि लिट्। यद्यस्मान्निजामाप्लोषदशां अपेक्ष्य दाहावस्थामित्यर्थः। सम्प्रत्यनेन मनोभुवा अधिकवीर्यता अधिकपराक्रमत्वमपि प्राप्तं कर्मणि लुङ्। वीर्यं पराक्रमे रेतसीति वैजयन्ती। दग्धस्यापि स्मरचापस्यैतत् भ्रूभूतस्य पूर्वाभ्यधिकपराक्रमदर्शनात् न्यूनं घनसारत्वं प्राप्तमित्युत्प्रेक्षा ॥ २५॥

स्मारमिति। यत् स्मरस्येदं स्मारं धनुश्च अस्या भैम्या आस्येन भूतेनास्यभावङ्गतेन विधुना चन्द्रेण उज्झिता या लक्ष्मरेखा कलङ्करेखा च तद्युग्मं तदुभयं कर्तृ लीलाचलत्वयोर्विलासचाञ्चल्ययो उचितो बालभावः केशत्वं बवयोरभेदात् शिशुत्वं च यस्मिन् जन्मनि तत्तथोक्तं एतस्या भैम्या भ्रुवौ जन्म भ्रूरूपेण उत्पत्तिमाप एतस्या मुखमकलङ्कचन्द्रः भ्रुवौ च स्मरधनुश्चन्द्रलक्ष्मणो रपरावतार इत्युत्प्रेक्षा ॥ २६ ॥

इष्विति। पुष्पमयाशुगेन कामेन कर्त्रा इषुत्रयेणैव करणेन जगत्त्रयस्य उभयप्राप्तौ कर्मणीति षष्ठी। विनिर्जयात् शेषा शिष्टा त्रिष्वन्यस्मिन् उपयुक्त इति वैजयन्त्यां शेषशब्दस्य विशेष्यलिङ्गता इयं द्विबाणी बाणद्वयं समाहारो द्विगो ङीप्। इयमिति हस्तेन निर्देशः प्रियायाः दृशोरेवाम्भोजयोः पदेस्थाने अभिषिच्य सफलीकृतेत्युत्प्रेक्षा कुसुमबाणपरिणतिरेव अस्या दृष्टिसृष्टिः अन्यथा कथमेतत् सकलयुवलोकक्षोभकत्वमिति भावः ॥ २७ ॥

सेयं मृदुः कौसुमचापयष्टिः स्मरस्य मुष्टिग्रहणार्हमध्या।
तनोति नः श्रीमदपाङ्गमुक्तां मोहाय या दृष्टिशरौघवृष्टिम्॥२८॥
आघूर्णितं पक्ष्मलमक्षिपद्मं प्रान्तद्युति-श्वैत्यजितामृतांशु।
अस्या इवास्याश्चलदिन्द्रनील गोलामलश्यामलतारतारम् ॥२९॥
कर्णोत्पलेनापि मुखं सनाथं लभेत नेत्रद्युतिनिर्ज्जितेन।
यद्येतदीयेन तदा कृतार्था स्वचक्षुषी किं कुरुते कुरङ्गी ॥३०॥

सेयमिति। मृदुः कोमला मुष्टिग्रहणार्हं हस्तेन ग्राह्यं मध्यमवलग्नं यस्याः सा इयं दमयन्ती स्मरस्य कौसुमी कुसुममयी चापयष्टिः धनुर्दण्ड इत्युत्प्रेक्षा। कुतः या नः अस्माकं मोहाय मूर्च्छनाय श्रीमतः शोभनादपाङ्गात् मुक्तां दृष्टीनामेव शराणा मोघस्य वृष्टिं तनोति। कथं सा कामचाप यष्टिर्नेतिभावः ॥ २८ ॥

आघूर्णितमिति। आघूर्णितं प्रचलितं पक्ष्मलं पक्ष्मवत् सिध्मादिभ्य श्चेति अलच्। प्रान्तद्युतेः कनीनिकाप्रान्तकान्तेः श्वैत्येन धावल्येन जितोऽमृतांशुर्येन तत्तथोक्तं चलत इन्द्रनीलस्य गोलं मण्डलमिव अमला श्यामला तारा स्थूला तारा कनीनिका यस्य तदस्या अक्षिपद्म मस्या अक्षिपद्ममिव असदृशमित्यर्थः। अनन्वयालङ्कारः। एकस्यैवोपमानोपमेयत्वेन अनन्वयो मत इति लक्षणात् ॥ २९ ॥

कर्णेति। नेत्रद्युत्या नेत्रकान्त्या निर्जितेन एतदीयेन भैमीसम्बन्धिना कर्णोत्पलेनापि सनाथं सहकृतं मुखं लभेत यदि ततः कृतार्था कुरङ्गी स्वचक्षुषी किंकुरुते कदर्थें करोतीत्यर्थः। स्वमुखस्य तादृशनेत्र सानाथ्यं तावदास्तां नेत्राभिभूतकर्णोत्पलसानाथ्येऽपि तावत्यैव द्युत्या स्वचक्षुषी उपेक्षिते। तदपि दुर्लभमित्यर्थः ॥ ३० ॥

त्वच इति। विधिर्विधाता मोचात्वचः रम्भात्वचः रम्भामोचांशु मत्फला इत्यमरः। पञ्चषड्वा पञ्चषाणि सङ्ख्ययाऽव्ययेत्यादिना बहुव्रीहिः। बहुव्रीहौ सङ्ख्येय इति समासान्तो डच्। तेषां पाटनानां विदलनानां

त्वचः समुत्तार्य्य दलानि रीत्या मोचात्वचः पञ्चषपाटनानाम्।
सारैर्गृहीतैर्विधिरुत्पलौघा दस्यामभूदीक्षणरूपशिल्पी ॥३१॥
चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण किमेष कृष्टः।
सारः सुधोद्गारमयः प्रयत्नैर्विधातुमेतन्नयने विधातुः ॥ ३२ ॥
ऋणीकृता किं हरिणीभिरासीदस्याः सकाशान्नयनद्वयश्रीः।
भूयोगुणेयं सकला बलाद्यत्ताभ्योऽनयाऽलभ्यत बिभ्यतीभ्यः॥३३॥
दृशौ किमस्याश्चपलस्वभावे न दूरमाक्रम्य मिथो मिलेताम्।

रीत्या प्रकारेण तावद्वा पाटयित्वेत्यर्थः। त्वच एव दलानि समुत्तार्य्य पञ्चषाणि बाह्यावरणान्यपनीयेत्यर्थः। ततो गृहीतै स्तथा उत्पलौघाच्च गृहीतैः सारैः सितासितवर्णै र्लावण्यद्रव्यै रस्यां दमयन्त्यां ईक्षण रूपशिल्पी अक्षि सौंदर्य्यनिर्म्माताऽभूदित्युत्प्रेक्षा ॥ ३१ ॥

चकोरेति। विधातु रेतन्नयने विधातुं प्रयत्नैः कर्तृभिः चकोर नेत्रयोरेणदृशो रुत्पलानां च सुधोद्गारमयः अमृतनिःष्यन्दमय एषोऽग्रे दृश्यमानः सारो रसः निमेषः निमीलनं तेनैव यन्त्रेण निष्पीड़नसाधनेन कृष्ट आकृष्टः किं? इत्युत्प्रेक्षा ॥ ३२ ॥

ऋणीकृतेति। हरिणीभिरस्या भैम्या उत्तमर्णाया इति भावः। सकाशान्नयनद्वयस्य श्रीः शोभा ऋणीकृता ऋणत्वेन गृहीता आसीत् किमित्युत्प्रेक्षा। यद्यस्मादनया भैम्या बिभ्यतीभ्य स्त्रस्यन्तीभ्यः त्रासावस्थायां शोभातिशयः तथा भीरुभिरशेष मृणन्दीयत इति भावः। ताभ्यो हरिणीभ्यो भूयोगुणा द्वित्रिगुणेयं नयनशोभा सकला निःशेषा बलाद लभ्यत लब्धा ॥ ३२ ॥

दृशाविति। चपलस्वभावे चलशीले अस्या भैम्या दृशौ दूरमाक्रम्याऽवटुपर्य्यन्तं गत्वेत्यर्थः। मिथो मिलेतां सङ्गच्छेयातां नेति काकुः मिलेतामेवेत्यर्थः मिलते लिङ् तस्तामादेशः। किन्तु अनयोः दृशोः प्रयाणे दूरगमने अवशो श्रोत्रे एव कूपाविति रूपकं तयोर्निपातात्

न चेत् क्षतः स्यादनयोः प्रयाणे विघ्नः श्रवःकूपनिपातभीत्या ॥३४॥

केदारभाजा शिशिरप्रवेशात् पुण्याय मन्ये कृतमुत्पलिन्या ।
जाता यतस्तत्कुसुमेक्षणेयं यतश्च तत्कोरकदृक् चकोरः ॥३५॥

नासाऽदसीया तिलपुष्पतूणं जगत्त्रयन्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां दधद्द्विबाणीं कुसुमायुधस्य ॥३६॥

भीत्या कर्त्र्या विघ्नः क्षतो न स्याच्चेत् अत्र दृशौ कर्णान्तविश्रान्तौ कर्णकूपपातभयहेतुकत्वोत्प्रेक्षा रूपकोज्जीवितेति सङ्करः ॥ ३४ ॥

केदारेति। केदारः क्षेत्रविशेषः पर्वतविशेषश्च तं भजतीति तद्भाक् केदारः पर्व्वतः क्षेत्रे भवक्षेत्रालवालयोरिति विश्वः। तयोत्पलिन्या शिशिरप्रवेशात् शिशिरर्तुप्रवेशात् हेतोः पुण्याय धर्माय कृतं मन्ये भावे क्तः मन्ये इत्युत्प्रेक्षायाम्। यतो यस्मात् केदारमरणात् इयं भैमी तस्याः उत्पलिन्याः पुष्पे इवेक्षणे यस्याः सा जाता यतश्चकोरश्च तत्कोरकाविव दृशौ यस्य स जातः केदारक्षेत्र मरणे उत्तमजन्मेत्यागमः ॥ २५ ॥

नासेति। अमुष्या इयं अदसीया नासा नासिका। जगत्त्रये न्यस्तं प्रयुक्तं शरत्रयं यस्य तस्य कुसुमायुधस्य सम्बन्धिनीं श्वासानिलस्य निश्वासमारुतस्यामोदभरेण सौरभातिशयेनानुमेयां द्विवाणीं शिष्टं वाणद्वयं समाहारे द्विगोरिति ङीप्। दधत् दधती तिलपुष्पमेव तूणमिषुधिरित्युत्प्रेक्षा ॥ ३६ ॥

बन्धूकेति। अस्या भैम्या अधरोष्ठरेखा अनेन मुखेन्दुना सहोज्जिहानमुद्यत् बन्धूकवन्धूभवत् बन्धुजीवकुसुमसमीभवत् एतत् पुरोवर्त्तिसमात्मानं स्वो ज्ञाता नात्मनि स्व मित्यमरः। रागश्रिया आरुण्यसम्पदा यौवनशैशवीयां तत्सम्बन्धिनीं सन्ध्यामाह। अहोरात्र

बन्धूकबन्धूभवदेतदस्या मुखेन्दुनाऽनेन सहोज्जिहानम्।
रागश्रिया शैशवयौवनीयां स्वमाह सन्ध्यामधरोष्ठलेखा ॥३७॥
अस्या मुखेन्दोरधरः सुधाभूर्विम्बस्य युक्तः प्रतिविम्ब एषः।
तस्याथ वा श्रीर्द्रुमभाजि देशे सम्भाव्यमानास्य तु विद्रुमे सा ॥३८॥
जानेऽतिरागादिदमेव विम्बं विम्बस्य च व्यक्तमितोऽधरत्वम्।
द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्ज्जनानाम् ३९
मध्योपकण्ठावधरोष्ठभागौ भातः किमप्युच्छ्वसितौ यदस्याः।
तत्स्वप्नसम्भोगवितीर्णदन्तदंशेन किम्वा न मयापराद्धम् ॥४०॥

सन्धाविव वयःसन्धौ भवा सन्ध्या स्वयमेवेति स्व रागसम्पदा कथयन्तीवेत्युत्प्रेक्षा व्यञ्जनाप्रयोगाद्गम्या ॥ ३७ ॥

अस्या इति। अस्या भैम्या एषोऽधरः अधरोष्ठो मुखेन्दोः सुधायां अमृते भवत्याविर्भवतीति सुधाभूः विम्बस्य विम्बफलस्य प्रतिविम्बो युक्तः न तु विम्बफलात् कश्चिद्विशेषोऽस्तीत्यर्थः। अथवा तस्य विम्बफलस्य श्रीः शोभा द्रुमभाजि द्रुमवति देशे सम्भाव्यमाना अस्य अधरस्य तु असौ श्रीर्विद्रुमे प्रवाले विगतद्रुमे च सम्भाव्यत इत्यर्थः। मुक्ताथ विद्रुमे पुंसि प्रवालं पुंनपुंसकमित्यमरः। विद्रुम समश्रीरित्यर्थः ॥ ३८ ॥

जान इति। अतिरागादतिलौहित्याद्धेतोरिदं पुरोवर्त्त्येव विम्बं विम्बनामार्हं विम्बस्य च इतोऽस्मादधरत्वम् अपकृष्टत्वम् ओष्ठत्वञ्च व्यक्तं तदपि अधरनामार्हं प्रतीयत इत्यर्थः। एवं स्थिते द्वयोरनयोरधरविम्बयोर्नाम्नि विषये विशेषावगमे इदमस्य नामेति निर्धारणे अक्षमाणा मशक्तानां जनानां भ्रमोऽभूत् जाने जानामीत्युत्प्रेक्षा ॥ ३९ ॥

मध्येति। यद्यस्मादस्याः सम्बन्धिनौ मध्यस्य अधरमध्यप्रदेशस्य उपकण्ठौ समीपस्थितावधरोष्ठभागौ तदुभयपार्श्वौ इत्यर्थः। किमप्युच्छ्वसितौ किञ्चिदभ्युच्छूनौ भातः स्फुरतः तत्तस्मात् स्वप्नसम्भोगे वितीर्णः दत्तः दन्तदंशो दन्तक्षतं येन तेन मया नापराद्धं किम्वा स्वप्ने स्वकृतदन्तक्षतमेतदित्युत्प्रेक्षा ॥ ४० ॥

विद्या विदर्भेन्द्रसुताधरौष्ठे नृत्यन्ति कत्यन्तरभेदभाजः ।
इतीव रेखाभिरपश्रमस्ताः संख्यातवान् कौतुकवान्विधाता ॥४१॥
सम्भुज्यमानाऽद्य मया निशान्ते स्वप्नेऽनुभूता मधुराधरेयम् ।
निःसीमलावण्यरदच्छदेत्थं कथम्मयैव प्रतिपद्यते वा ॥ ४२ ॥
यदि प्रसादीकुरुते सुधांशो रेषा सहस्रांशमपि स्मितस्य ।
तत्कौमुदीनां कुरुते तमेव निमित्य देवः सफलं स्वजन्म ॥४३॥

विद्या इति। कौतुकवान् विनोदी विधाता विदर्भेन्द्रसुतायाः अधरोष्ठे कति विद्या अन्तरेऽभ्यन्तरे अभेदभाजः भेदरहिताः सत्यो नृत्यन्ति विहरन्तीति बभुत्सयेति शेषः। इतिना गम्यमानार्थत्वादप्रयोगः अपश्रमः श्रमरहितः सन् ता विद्या रेखाभिः सह सङ्ख्यातवानिव गणितवान् किमित्युत्प्रेक्षा। अन्यथा वृथारेखासृष्टिः स्यादिति भावः ॥ ४१ ॥

सम्भुज्यमानेति। इयं भैमी अद्य मया निशान्ते निशावसाने अपरात्र इत्यर्थः तत्कालस्वप्नस्य सत्यत्वादिति भावः। स्वप्ने सम्भुज्यमाना मधुराधरा मनोज्ञाधरा सत्यनुभूता दृष्टा मयैवेत्यमनेन स्वप्नदृष्टप्रकारेण निःसीमलावण्योरदच्छदोऽधरो यस्याः सा सती कथं वा प्रतिपद्यते दृश्यते चित्रमित्यर्थः। स्वप्नदृष्टस्यार्थस्य जागरे सत्यसंवादादाश्चर्यम् ॥ ४२ ॥

यदीति। एषा भैमी स्मितस्य निजमन्दहासस्य सहस्रांशं सहस्रतमांशमपि वृत्तिविषये सङ्ख्याशब्दस्य पूरणार्थत्वं त्रिभागवत्। सुधांशोः प्रसादीकुरुते यदि दद्याच्चेदित्यर्थः। तर्हि स देवः सुधांशुः कौमुदीनां चन्द्रिकाणां तमेव स्मितलेशमेव निमित्य स्वकौमुदीषु प्रक्षिप्य डुमिञ्प्रक्षेपण इति धातोर्ल्यबादेशः स्वजन्म सफलं कुरुते यथा विन्दुमात्रगङ्गाजलमिश्रेण अन्यज्जलं सफलं भवति तद्वदिति भावः। अत्र कौमुदीनां सम्भावनमात्रेण स्मितांशासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ४३ ॥

चन्द्रेति। तस्य चन्द्रस्य किरणात् रश्मेः चन्द्रकान्तेः घनानां सान्द्राणान्तसुखस्य चन्द्राधिकत्वात् तच्चन्द्रिकाणामपि ततोऽधिकत्वमिति भावः।

चन्द्राधिकैतन्मुखचन्द्रिकाणां दरायतन्तत्किरणाङ्कुराणाम्।
पुरःपरिस्रस्तपृषद्द्वितीयं रदावलिद्वन्द्वति विन्दुवृन्दम् ॥ ४४ ॥
सेयं ममैतद्विरहार्त्तिमूर्च्छा तमीविभातस्य विभाति सन्ध्या।
महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना ॥ ४५ ॥
राजौ द्विजानामिह राजदन्ताः सम्बिभ्रति श्रोत्रियविभ्रमं यत्।
उद्वेगरागादिमृजावदाता श्चत्वार एते तदवैमि मुक्ताः ॥ ४६ ॥

अतएवाह चन्द्राधिकस्यैतन्मुखस्य चन्द्रिकाणां सम्बन्धि दरायतमीषद्दीर्घं पुरःपरिस्रस्तानि प्रथमं सृतानि पृषन्तो विन्दवो यस्य तत् द्वितीयं विन्दुवृन्दं रदावलिद्वन्द्वति तमिवाचरति। सर्वप्रातिपदिकेभ्यः क्विबाचार इति क्विबन्ताल्लट्। प्रथमनिःसृतविन्दुपङ्क्तिः, रुत्तराऽन्तरा जातेत्युत्प्रेक्षा ॥ ४४ ॥

सेति। महेन्द्रस्य काष्ठां उत्कर्षङ्गतो रागः प्रकृष्टोऽनुरागः अन्यत्र पूर्वदिग्गतोरागः लौहित्यं काष्ठोत्कर्षे स्थितौ दिशीत्यमरः। रागोऽनुरागे लौहित्ये इति विश्वः। तस्य कर्त्री जनयित्री अमीभिर्द्विजैर्दन्तैश्च विप्रैश्च दन्तविप्राण्डजाद्विजा इत्यमरः। समुपास्यमाना सेव्यमाना सेयन्दमयन्ती मम एतया भैम्या विरहार्त्त्या वियोगपीडया या मूर्च्छा सैव तमी रजनी यामिनीतमीत्यमरः। तस्या विभातस्य निर्गमस्य सम्बन्धिनी सन्ध्या प्रातःसन्ध्या विभाति। सन्ध्याधर्मसम्बन्धात् सन्ध्यात्वमुत्प्रेक्ष्यते ॥ ४५ ॥

अथोच्चैश्चत्वारो ये दन्तास्तान् वर्णयति। राजाविति। यद्यस्मादिहास्ये द्विजानां दन्तानां विप्राणाञ्च राजौ पङ्क्तौ उद्वेगं पूगफलं घोण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु फलमुद्वेग इत्यमरः। तस्य रागो रक्तता अपि शब्दात् खादिर्यादपि संग्रहः। अन्यत्र उद्वेग आग्रहः रागो विषयाभिलाषः आदिशब्दात् द्वेषादिसंग्रहः। तेषां उद्वेगरागादीनां मृजया मार्जनेन अवदाताः शुद्धाश्चत्वारो राजदन्ता दन्तानां राजानो दन्तश्रेष्ठा राजदन्तादिषु परमिति दन्तशब्दस्योपसर्जनस्य

शिरीषकोषादपि कोमलाया वेधा विधायाङ्गमशेषमस्याः ।
प्राप्तप्रकर्षः सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम् ॥ ४७ ॥
प्रसूनबाणाद्वयवादिनी सा कापि द्विजेनोपनिषत्पिकेन ।
अस्याः किमास्यद्विजराजतो वा नाधीयते भैक्षभुजा तरुभ्यः ॥४८॥
पद्माङ्कसद्मानमवेत्य लक्ष्मी मेकस्य विष्णोः श्रयणात् सपत्नीम् ।

परनिपातः। श्रोत्रियाःच्छन्दांस्यधीतवन्तो वेदपारगाः श्रोत्रियच्छान्दसौ समावित्यमरः श्रोत्रियाच्छन्दोऽधीत इति निपातः । तेषां विभ्रमं शोभां संबिभ्रति तस्मात् मुक्ता मौक्तिकानि आप्रवृत्ताश्च मुक्ता तु मौक्तिके मुक्ता प्राप्तमुक्ता तु मोचित इति विश्वः । अवैमि जानामि इति वाक्यार्थः कर्म उत्प्रेक्षा ॥ ४६ ॥

शिरीषेति। वेधा विधाता शिरीषस्य कोशात् कुट्मलादपि कोमलाया अस्या भैम्या अशेषमङ्गं विधाय सुकुमारसर्गे कोमलसृष्टौ प्राप्तप्रकर्षः लोके लब्धोत्कर्षः सन् मृदुत्वमुद्रां मार्दवभङ्गीं वाचि भैमीवाण्यां समापयत् समापितवान् सर्वातिशाय्यस्या वाङ्माधुर्यमित्यर्थः ॥ ४७ ॥

ननु इतोऽपि कोकिलवाङ् मधुरा नेत्याह प्रसूनेति । प्रसूनबाणमेवाद्वयमद्वितीयं वस्तु तद्वदतीति तद्वादिनी तत्प्रतिपादिका कापि उपनिषन् पिकवाग्रूपा सा तरुभ्यः सकाशात् भिक्षाणां समूहो भैक्षं भिक्षाकदम्बकमित्यमरः। भिक्षादिभ्योऽण्। तद्भुजा तद्भोजिना ब्रह्मचारिणो भिक्षाशित्वस्मरणात् इति भावः। पिकेन पिकाख्येन द्विजेन पक्षिणा विप्रेण च अस्या भैम्या आस्यमेव द्विजराजः चन्द्रो ब्राह्मणोत्तमश्च तस्मान्नाधीयते वा किम्? अधीयतएवेत्यर्थः अस्यामेवाधिक्योपलम्भादिति भावः उत्प्रेक्षा ॥ ४८ ॥

पद्माङ्केति। सरस्वती वाग्देवता एकस्य विष्णोः पत्युरिति शेषः। श्रयणादाश्रयणाद्धेतोः समान एकः पति र्यस्याः सा सपत्नी नित्यं सपत्न्यादि-

आस्येन्दुमस्या भजते जिताब्जं सरस्वती तद्विजिगीषया किम् ॥४९॥
कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम् ।
तदेव वाग्भूय मुखे स्रगाव्याः श्रोतुः श्रुतौ याति सुधारसत्वम् ॥५०॥
विलोकिता स्यान्मुखमुन्नमय्य किं वेधसेयं सुषमासमाप्तौ ।
धृत्युद्भवा यच्चिवुके चकास्ति निम्ने मनागङ्गुलियन्त्रणेव ॥ ५१ ॥

ष्विति ङीप् नकारश्च एतस्मादेव निर्देशात् समानशब्दस्य नित्यं सभावः। तां लक्ष्मीं पद्माङ्कसद्मानं पद्मोत्सङ्गनिकेतनामवेक्ष्य तस्या लक्ष्म्या विजिगीषया जिताब्जं पद्मविजयिनमस्याः आस्येन्दुमाननेन्दुं किं भजत इत्युत्प्रेक्षा। दुर्बलोऽपि वैरनिर्यातनार्थी प्रबलमाश्रयत इति भावः। सरस्वत्याः विष्णुपत्नीत्वं पुराणप्रसिद्धम्। तथाचार्चास्वपि दृश्यते यथा पुरुषोत्तमस्य जगन्नाथस्य पार्श्वे लक्ष्मी सरस्वत्यौ तयोः सुरतवादोपचारश्च ॥ ४९ ॥

कण्ठ इति। स्रगाव्या अस्या भैम्याः कण्ठे वसन्ती नित्यसन्निहिता चतुरा सरस्वती विपञ्चीं वीणां यद्वादयते वादयति तद्वादनमेव स वीणाध्वनिरेवेत्यर्थः। मुखे वाग्भूय वाग्भूत्वा अभूततद्भावे च्विः ऊर्यादिच्विडाचश्चेति गतित्वात् समासे ल्यबादेशः। श्रोतुः श्रुतौ श्रोत्रे सुधारसत्वं याति व्यञ्जकाद्गम्योत्प्रेक्षा ॥ ५० ॥

विलोकितेति। इयं दमयन्ती सुषमायाः परमशोभानिर्माणस्य समाप्तौ वेधसा अस्या मुखम् उन्नमय्य विलोकिता। अस्याः सौष्ठवपरीक्षार्थं अवलोकितं मुखं किमित्युत्प्रेक्षा। विलोकिताख्या मुखमुन्नमय्य कुतः। यद्यस्मात् मनाक् निम्ने ईषन्नते चिवुके अधरोष्ठस्थले मुखावयवे ओष्ठस्याधश्च चिवुकमिति हलायुधः। धृत्युद्भवा निपीड्य ग्रहणसम्भवा अङ्गुलेर्यन्त्रणेव मुद्रणेव चकास्ति अङ्गुष्ठ पदमिव भातीत्यर्थः। अङ्गुष्ठाग्रं चिवुकाग्रे विधाय इतराङ्गुलिभिरधो निवेशिताभि रुन्नमय्य मुखमपश्यदिवेति भावः ॥ ५१ ॥

प्रियेति। असौ सुधांशुः प्रियामुखीभूय भैमीमुखं भूत्वा राहोर्विधुन्तुदात् भयव्ययेन भयनिवृत्त्या सुखी वसति तस्य सुधांशोरेवत्रालं प्रत्यय

प्रियामुखीभूय सुखी सुधांशुर्वसत्यसौ राहुभय-व्ययेन ।
इमां दधाराधरबिम्बलीलां तस्यैव बालङ्करचक्रवालम् ॥ ५२ ॥
अस्यामुखस्यास्तु न पूर्णिमास्यं पूर्णस्य जित्वा महिमा हिमांशुम् ।
भ्रूलक्ष्मखण्डन्दधदर्द्धमिन्दुर्भालस्तृतीयः खलु यस्य भागः ॥५३॥
व्यधत्त धाता मुखपद्ममस्याः सम्राजमम्भोजकुलेऽखिलेऽपि ।
सरोजराजौ सृजतोऽदसीयां नेत्राभिधेया वतएव सेवाम् ॥५४॥

करचक्रवालमंशुमण्डलमिमां दृश्यमानामधरबिम्बलीलान्दधार । अधरबिम्बं भूत्वा तिष्ठति इत्युत्प्रेक्षयोः संसृष्टिः ॥ ५२ ॥

अस्या इति । पूर्णिमायाः पौर्णमास्या आस्यं मुखीभूतं हिमांशुं जित्वा पूर्णस्य समग्रस्यास्या भैम्या मुखस्य महतो भावः महिमा महत्वन्नास्तु न स्यात्काकुरियम् । स्यादेव जेतुर्महिमेत्यर्थः । यस्य मुखस्य तृतीयो भागः तृतीयांशभूतो भालो ललाटं भ्रूरेव लक्ष्मखण्डो लाञ्छनैकदेशः तं दधद्दधानः अर्धमिन्दुरर्द्धेन्दुः खलु युक्तमर्द्धचन्द्रात् पूर्णचन्द्रस्य महत्वमिति भावः । अत्र मुखस्य पूर्णेन्दुत्वं भालस्य अर्द्धचन्द्रत्वं च क्रमात् पूर्णिमास्यं हिमांशुं भ्रूलक्ष्मखण्डमिति च रूपकाभ्यामनुप्राणितमुत्प्रेक्ष्यत इति रूपकसङ्कीर्णयोरुत्प्रेक्षयोः परस्परमुपकार्य्योपकारकभावादङ्गाङ्गिभावेन सङ्करः ॥ ५३ ॥

व्यधत्तेति । धाता अस्या मुखमेव पद्मं वा पुंसिपद्ममिति पुंलिङ्गता । सम्राजमिति विशेषणात् अखिलेऽप्यम्भोजकुले पद्मजाते विषये सम्राजं राजराजं व्यधत्त अतएव राजराजत्वादेव नेत्राभिधेयौ नेत्रशब्दवाच्यौ सरोजानां राजानौ सरोजराजौ अमुष्य मुखपद्मस्य सम्बन्धिनीमदसीयां सेवां सृजतः कुरुतः । येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरः । अत्र नेत्राख्यसरोजराजसेव्यत्वेन भैमीमुखपद्मस्य सम्राड्त्वोत्प्रेक्षा चेति सङ्करः ॥ ५४ ॥

दिवारजन्योरविसोमभीते चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम्।
अस्या यदास्ये न तदा तयोः श्रीरेकश्रियेदन्तु कदा न कान्तम्॥५५॥
अस्यामुखश्रीप्रतिविम्बमेव जलाच्च तातान्मुकुराच्च मित्रात्।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित्॥५६॥
अर्काय पत्ये खलु तिष्ठमाना भृङ्गैर्मितामक्षिभिरम्बुकेलौ।
भैमीमुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महस्ताः॥५७॥

दिवेति। चन्द्रश्चाम्बुजञ्च ते दिवारजन्योर्दिनरात्र्योः यथासङ्ख्यं रविसोमाभ्यां भीते अपहारशङ्किनी सती स्वलक्ष्मीं यदा अस्या भैम्या आस्ये निक्षिपतः तदा तयोर्दिवा चन्द्रस्य रात्रावम्बुजस्य च श्रीः शोभा न भवति इदमस्या आस्यन्तु कदा कस्मिन् काले दिवा नक्तं वा एकश्रिया चन्द्राम्बुजयोरन्यतरश्रिया न कान्तं अपि तु सर्वदा कान्तमेव। अत्रोक्त यथासङ्ख्यसङ्कीर्णया भैमीमुखचन्द्राम्बुजलक्ष्मीनिक्षेपोत्प्रेक्षया ताभ्यां कदाचिच्छोभाभ्यां मुखस्य अकदाचित्कश्रीकत्वेन व्यतिरेको व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः॥ ५५ ॥

अस्या इति। पद्मचन्द्रौ [विभूषणभूते] तातात् जनकात् जलान्मित्राच्च। आकारसाम्यात् सुहृदो मुकुराच्चास्यामुखश्रियः प्रतिबिम्बमेव याचितकं याच्ञा निर्वृत्तं याच्ञा प्राप्तं याचितकमित्यमरः। आप्तमित्ययाचिताभ्याङ्कक्तनाविति कन् प्रत्ययः। विभूषणं कदाचिदभ्यर्थ्य धत्तो दधाते खलु एतदीयमेव सुहृत्स्वमनयोर्याचितं मण्डनं न स्वाभाविकमित्युत्प्रेक्षा॥ ५६ ॥

अर्कायेति। पत्ये भर्त्रे अर्काय तिष्ठमानाः साभिलाषं कामुक्यः सत्य इत्यर्थः श्लाघह्नुङ् इत्यादिना चतुर्थी। प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदम्। अम्बुजिन्यः पद्मिन्योऽम्बुकेलौ जलक्रीड़ाकाले भृङ्गैरेवाक्षिभिः मितामुपलब्धां मुखस्य श्रियं मुखशोभां विस्तारिताः प्रसारिताः पद्माएव हस्ता यासान्ताः सत्यो भैमीं याचन्ति स्वरितेत्याद्याचिरुभयपदी। दुहादित्वाद्वि-

अस्या मुखेनैव विजित्य नित्य स्पर्द्धी मिलत्कुङ्कुमरोषभासा ।
प्रसह्य चन्द्रः खलु नह्यमानः स्यादेव तिष्ठन् परिवेशपाशः ॥५८॥
विधोर्विधिर्विम्बशतानि लोपं लोपं कुहूरात्रिषु मासिमासि ।
अभङ्गुरश्रीकममुं किमस्या मुखेन्दुमस्थापयदेकशेषम् ॥ ५९ ॥
कपोलपत्रान्मकरात्सकेतु र्भ्रूभ्यां जिगीषुर्धनुषा जगन्ति ।
रूढावलम्ब्यास्ति रतिं मनोभूरज्यद्वयस्यो मधुनाऽधरेण ॥ ६० ॥

कर्मकः । अत्र पद्मिनीनां भैमीमुखश्रीयाच्ञोक्त्या मुखपद्माधिक्यलक्षणो व्यतिरेकः प्रतीयते ॥ ५७ ॥

अस्या इति । नित्यं स्पर्धत इति नित्यस्पर्धी चन्द्रः मिलन्ती व्याप्नुवन्ती कुङ्कुम एव रोषभाः क्रोधभा यस्य तेनास्या मुखेनैव विजित्य प्रसह्य बलात् कृत्य नह्यमानो बध्यमानस्तिष्ठन् परिवेष एव पाशो बन्धनप्रग्रहो यस्य स स्यादेवेत्युत्प्रेक्षा ॥ ५८ ॥

विधोरिति । विधिर्विधाता विधोश्चन्द्रस्य बिम्बशतानि मासि मासि मासेमासे पद्दित्यादिनामास शब्दस्य मासित्ययमादेशः कुहूरात्रिषु नष्टचन्द्ररात्रिषु लोपं लोपं लुप्त्वा लुप्त्वा आभीक्ष्ण्ये णमुलिति णमुल् प्रत्ययः। आभीक्ष्ण्ये द्वे भवत इति वक्तव्यं आभीक्ष्ण्यं पौनःपुन्यमिति काशिका। अभङ्गुर श्रीकमनश्वरशोभं शेषाद्विभाषेति कप् अमुमस्या मुखेन्दुं एकशेषं एकमेव शिष्यमाणमस्थापयत् स्थापितवान्। किमित्युत्प्रेक्षा व्याकरणे सरूपाणामेक शेषवदिति भावः ॥ ५९ ॥

कपोलेति । मनोभूः कामः कपोलपत्रात् पत्रभङ्गादेव मकराङ्केतोः सकेतुः केतुमान्मकरध्वज इत्यर्थः । भ्रूभ्यामेव धनुषा जगन्ति जिगीषुः जेतुमिच्छुः अधरेणैव मधुना क्षौद्रेण वसन्तेन च रज्यद्वयस्योऽनुरक्तसख रूढाख्यां रतिमनुरागं देवीं चावलम्ब्यास्ति जगज्जिगीषोः कामस्य सर्वापि साधन सम्पत्तिरस्यामेवास्तीति भावः । पत्रभङ्गादावारोप्यमाणस्य केत्वादेः

वियोगवाष्पाञ्चितनेत्रपद्म च्छद्मार्पितोत्सर्गपयः प्रसूनौ ॥
कर्णौ किमस्या रतितत्पतिभ्यां निवेद्यपूपौ विधिशिल्पमीदृक् ॥६१॥
इहाविशद्येन पथातिवक्रः शास्त्रौघनिष्यन्दरसप्रवाहः ।
सोऽस्याः श्रवःपत्रयुगे प्रणाली रेखेव धावत्यभिकर्णकूपम् ॥६२॥
अस्या यदष्टादश संविभज्य विद्याः श्रुती दध्रतुरर्द्धमर्द्धम् ।
कर्णान्तरुत्कीर्णगभीररेखः किन्तस्य संख्यैव न वा नवाङ्कः ॥६३

तादात्म्येन प्रकृतजगज्जयोपयोगित्वात् परिणामालङ्कारः आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात् ॥ ६० ॥

वियोग इति । ईदृगपूर्वं विधिशिल्पं ब्रह्मनिर्माणं अस्याः कर्णौ वियोगेन हेतुना वाष्पाञ्चितयोरश्रुयुक्तयोर्नेत्रपद्मयोः छद्मेत्यपह्नव भेदः । तेन छद्मनान्विते मिलिते उत्सर्गपयः प्रसूने दानोदक मिश्रकुसुमे ययोस्तौ रतितत्पतिभ्यां सम्प्रदाने चतुर्थी । निवेद्यौ चर्वणीयौ पूपा वपूपौ किं ? पूपोऽपूपः पिष्टकः स्यादित्यमरः । नैवेद्यसमर्पणेन पुष्पाञ्जलि मुत्सृजन्ती साश्रुनेत्रयोगात् सत्कर्णयोः तादृक् पुष्पप्रयुक्तरतिस्मरनैवेद्यापूपोत्प्रेक्षया सापह्नवया कर्णान्त विश्रान्त विलोचनत्वं वस्तु व्यज्यते इति ॥ ६१ ॥

इहेति । अतिवक्रः शास्त्राणामोघः समूहः तस्य निष्यन्दः सारः स एव सुधाप्रवाहो येन पथा वर्त्मना यया प्रणाल्या इहास्यां भैम्यां अविशत् प्रविष्टः अस्याः श्रवसी पत्रे दले इव श्रवःपत्रे तयोर्युगे युग्मे या रेखा सैव वक्रप्रणाली सुधाप्रवाहपदवी द्वयोः प्रणाली पयसः पदव्यामित्यमरः । अभिकर्णकूपं धावति कर्णरन्ध्रमभिगच्छति यथा कुतश्चित् निःसृतं जलं वक्रगत्या कयाचित् प्रणाल्या किञ्चिन्निम्नदेशे गच्छति तद्वदिति भावः । अत्र कर्णस्य रेखायां सुधाप्रणालीत्व मुत्प्रेक्ष्यते ॥ ६२ ॥

अस्या इति । अस्याः श्रुती कर्णौ अष्टादश वेदवेदाङ्गादीनि विद्यास्थानानि विभज्य द्विधाकृत्य यदर्द्धमर्द्धं दध्रतुः विभ्रतः कर्णान्तर्गर्भे उत्कीर्णः उत्पादितो गभीरो दूरगतो लेखोऽवयवविन्यास स्तस्य

मन्येऽमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण ।
एकाकिपाशं वरुणं विजिग्ये ऽनङ्गीकृतायासततीरतीशः ॥ ६४ ॥
आत्मैव तातस्य चतुर्भुजस्य जातश्चतुर्दोर्रुचितः स्मरोऽपि ।
तच्चापयोः कर्णलते भ्रुवोर्ज्ये वंशत्वगंशौ चिपिटे किमस्याः ॥ ६५ ॥
ग्रीवाद्भुतैवावटुशोभितापि प्रसाधिता माणवकेन सेयम् ।

अर्थस्य सङ्ख्यैव न किं ? यद्वा नवानामङ्कः नवसङ्ख्या चिह्नं वा न भवति किं? भवत्येवेत्यर्थः उत्प्रेक्षा ॥ ६३ ॥

मन्य इति । रतीशो रतिपतिरमुना कर्णलतामयेन कर्णपाशरूपेण च्छिदुरेतरेण विदिभिदिच्छिदेः कुरजिति कर्मकर्त्तरि कुरच् । पाशद्वयेन पाशायुधयुग्मेन पाशोबन्धनशस्त्रयो रित्यमरः । एकाकी अद्वितीयः पाशो यस्य स तमेकपाशं वरुणमनङ्गीकृता परिहृता आयासततिः प्रयासपरम्परा येन सोऽनायासः सन् विजिग्ये जिगाय मन्ये इत्युत्प्रेक्षायां विपराभ्यां जेरित्यात्मनेपदम् । अधिकसाधनेनाल्पसाधनः सुजय इति भावः ॥ ६४ ॥

आत्मेति । चतुर्भुजस्य चतुर्बाहोस्तातस्य स्वजनकस्य विष्णोरात्मा स्वरूपमिव जातः आत्मा वै पुत्रनामासीति श्रुतेः । स्मरोऽपि चतुर्दोर्भिश्चतुर्बाहुभि रुचितः । तस्य चतुर्बाहोः स्मरस्य चापयोरस्या भ्रुवोरस्या एव कर्णलते वंशस्य त्वक्सारस्य त्वगंशौ त्वग्भागमयौ चिपिटे अनते ऋजू इत्यर्थः । इनच् पिटच् चिकचिचेति पिटच् प्रत्ययोनेश्चिरादेशश्च नासान्तवाचिना तत्समानं लक्ष्यते । ज्ये मौर्व्यौ किं ? मौर्वीज्याशिञ्जिनीगुण इत्यमरः । अतः स्मरस्य चतुर्भुजत्वं ततोभैमीभ्रुवो स्तच्चापयुगत्वं तत्कर्णयोरेव ज्यात्वञ्चोत्प्रेक्ष्यते ॥ ६५ ॥

ग्रीवेति । या ग्रीवा वटुना माणवकेन शोभिता अलङ्कृता न भवतीत्यवटुशोभिता तथापि माणवकेन वटुना प्रसाधितेति विरोधः । अपि विरोधे अवटुशोभिता कृकाटिकालङ्कृता अवटुर्घाटा कृकाटिके-

आलिङ्ग्यतामप्यवलम्बमाना सरूपताभागखिलोर्द्धकाया ॥ ६६ ॥
कवित्वगानप्रियवादसत्या न्यस्या विधाता न्यधिताधिकण्ठम्।
रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः ॥६७
बाहू प्रियाया जयतां मृणालं द्वन्द्वे जयोनाम न विस्मयोऽस्मिन्

त्यमरः। माणवकेन विंशतिसरेण मुक्ताहारेण प्रसाधितेत्यविरोधः। विंशतिसरो माणवकोऽल्पत्वादिति क्षीरस्वामी। भवेन्माणवको हारभेदे भारे कुपूरुष इत्यभिधेयः। किञ्चालिङ्ग्यतां आलिङ्ग्यवाद्यत्वमवलम्बमानाप्याश्रयन्त्यपि सरूपताभाग् सारूप्ययोगी अखिलोऽन्यून ऊर्द्धकः ऊर्द्धकवाद्यत्वमिति भावप्रधानो निर्देशः तद्यस्याः सा त्वङ्क्यालिङ्ग्योर्द्धकास्त्रयः इत्यमरः। हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्द्धकः। आलिङ्ग्यश्चैव गोपुच्छो मध्यदक्षिणवामगा इति च आलिङ्ग्योप्यूर्द्धक इति विरोधः। आलिङ्ग्यता मालिङ्ग्यत्वं ऊर्द्धकः ऊर्द्धभाग इत्यविरोधः। सैवं ग्रीवाद्भुतैव उक्तविरोधादुक्तलक्षणयोगित्वाच्चेति भावः। अत्र विरोधाभासयोः संसर्गात् सजातीय संसृष्टिः ॥ ६६ ॥

कवित्वेति। विधाता अस्या अधिकण्ठं विभक्त्यर्थेऽव्ययीभावः। कवित्वञ्च गानञ्च प्रियवादश्च सत्यञ्च तानि चत्वारि न्यधित निहितवान् सोऽयं विधाता अमीषां कवित्वादीनां चतुर्णां वासाय अधिकण्ठं सङ्कीर्ण स्थितये रेखात्रयन्यासमिषात् कम्बुग्रीवा त्रिरेखासेति लक्षणसम्पत्तेरिति भावः। सीमाः मर्य्यादाः विबभाज मध्यरेखात्रयविन्यासेन चतुर्द्धा विभक्तवान् अविवादायेति भावः। अत्र ग्रीवागतभाग्यरेखात्रये सीमाविभागचिह्नत्वमुत्प्रेक्ष्यते ॥ ६७ ॥

बाहू इति। प्रियाया बाहू मृणालं जयतां नाम जयते र्लोटि तसस्तामादेशः। अस्मिन् द्वन्द्वे युग्मे कलहे च द्वन्द्वं कलहयुग्मयोरित्यमरः। जयोनाम विस्मयोऽद्भुतो न किन्तु भग्नस्य जितस्य अमुष्य मृणालस्य अन्तर्गर्भेऽन्तःकरणे च व्यथनस्याभावो निर्व्यथनं अव्यथं छिद्रं च छिद्रं निर्व्यथनं रोक मित्यमरः। अर्थाभावेऽव्ययीभावः। यद्यालोक्यते तदुच्चैः

उच्चैस्तु तच्छिद्रममुष्य भग्नस्यालोक्यते निर्व्यथनं यदन्तः ॥६८॥
अजीयतावर्त्तशुभंयुनाभ्या दोर्भ्यां मृणालं किमु कोमलाभ्याम्।
निःसूत्रमास्ते घनपङ्कमृत्सु मूर्त्तासु नाकीर्त्तिषु तन्निमग्नम् ॥६९
रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषादसौ हैङ्गुलपद्मतूणे।
हैमैकपुङ्खास्ति विशुद्धपर्व्वा प्रियाकरे पञ्चशरी स्मरस्य ॥ ७० ॥
अस्याः करस्पर्शनगर्द्धिऋद्धि र्बालत्वमापत् खलु पल्लवो यः।

महच्छिद्रं भग्नोऽप्यव्यथ इति विरोधात् छिद्रं विलोकयत इत्यविरोधः। मृणालस्यान्तश्छिद्रत्वात् विरोधाभासोऽलङ्कारः ॥ ६८ ॥

अजीयतेति। आवर्त्तोऽम्भसाम्भ्रमः स इव शुभंयुः शुभवती नाभिर्यस्यास्तस्याः भैम्याः शुभंयुस्तु शुभान्वित इत्यमरः। अहं शुभमोर्युसिति शुभमिति मकारान्तादव्ययात्मत्वर्थीयो युस् प्रत्ययः। कोमलाभ्यां मृदुभ्यां भुजाभ्यां मृणालं अजीयत किमु? मार्दवगुणेन जितं किमित्युत्प्रेक्षा। कुतः घनासु सान्द्रासु पङ्करूपासु मृत्स्वेव मूर्त्तासु मूर्त्तिमतीष्वकीर्त्तिषु तन्मृणालं निमग्नं सन्निःसूत्रं निर्व्यवस्थं निर्मर्यादं आस्ते अपराजितत्वे कथमकीर्त्तिपङ्के पात इति भावः ॥ ६९ ॥

रज्यदिति। रज्यन्तः स्वभावरक्ता नखा यस्य तस्य कुषिरञ्जोः प्राचां श्ये परस्मैपदं च। अङ्गुलिपञ्चकस्य मिषादसौ पुरोवर्त्तिनी हैमाः सौवर्णा एके केवलं असाधारणाः पुङ्खाः कर्त्तर्य्याख्या मूलप्रदेशा यस्याः सा कर्त्तरी पुङ्ख इति यादवः। विशुद्धपर्वा निर्वृत्तग्रन्थिः सरलग्रन्थिरित्यर्थः। स्मरस्य पञ्चशरी शरपञ्चकं समाहारे द्विगो ङीप्। प्रियाकरे भैमीपाणावेव हिङ्गुलेन रक्तं हैङ्गुलं पद्मं तस्मिन्नेव तूणे अस्ति वर्त्तत इत्युत्प्रेक्षा ॥ ७० ॥

अस्या इति। यः पल्लवः किसलयोऽस्याः करेण स्पर्शनं गृध्नातीति तद्गर्द्धिनी ऋद्धिः कान्तिर्यस्य सः कृतस्पर्द्धः सन्नित्यर्थः। ऋत्यक इति प्रकृति भावः। बालत्वं शिशुत्वं प्रत्ययत्वं मूर्खत्वञ्चापत् किल मूर्खेऽर्भकेऽपि बालः स्यादित्यमरः। अल्पो अधिकस्पर्धी मूर्खो भवतीतिभावः। भूयोऽपि

भूयोऽपि नामाधरसाम्यगर्वं कुर्व्वन् कथं वाऽस्तु न स प्रवालः ॥७१
अस्यैव सर्गाय भवत्करस्य सरोजसृष्टिर्म्मम हस्तलेखः ।
इत्याह धाता हरिणेक्षणायां किं हस्तलेखीकृतया तयास्याम् ॥७२
किं नर्म्मदाया मम सेयमस्या दृश्याऽभितो बाहुलतामृणाली ।
कुचौ किमुत्तस्थतुरन्तरीपे स्मरोष्मशुष्यत्तरबाल्यवारः ॥ ७३ ॥

नाम पुनरपि किल मूर्खत्वं प्राप्यापीत्यर्थः। अधर साम्येन गर्वं कुर्वन् अधरसाम्याभिमानं कुर्वन् स पल्लवः कथं वा प्रवालः प्रवालशब्दवाच्यः ववयोरभेदात् प्रकर्षेण बालश्च कथं वा नास्तु न स्यात् स्यादेवेत्यर्थः। अल्पी अधिकस्पर्द्धी मूर्खः अधिकतरः। चकारादधरस्य रतिसर्वस्वत्वात् तथा चाधरसाम्यं तावदास्तां पल्लवस्य करसाम्यं दूरापास्तमित्यर्थः ततश्च प्रवालशब्दस्य प्रवृत्तमप्येतदेवेति भावः ॥ ७१ ॥

अस्येति। अस्य भवत्करस्य भवत्याः पाणेः सर्गायैव सरोजसृष्टिः मम हस्तलेखो रेखाभ्यास इति विधाता अस्यां हरिणेक्षणायां भैम्यां हस्तलेखीकृतया हस्तकृतपद्मरेखीकृतया च तया सरोजसृष्ट्या करणेनाह किं? भैम्यै कथयति किमित्युत्प्रेक्षा ॥ ७२ ॥

किमिति। स्मरोष्मणा स्मरसन्तापेन शुष्यत्तरमति शुष्यद्बाल्यमेव वा वारि यस्या अस्या भैम्या एव मम नर्मदायाः क्रीड़ाप्रदायाः रेवायाश्च सम्बन्धिनी रेवा तु नर्मदेत्यमरः। अभित उभयतो दृश्या सेयं बाहुलता मृणाली बिसलता किं ? अत्र नर्मदाया विधेयप्राधान्यात् मृणाल्याः साक्षात् सम्बन्धात् अभितः परित इत्यादिना द्वितीया नास्ति। कुचावेवान्तरीपे अपामन्तस्तटे द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटमित्यमरः। सुप्सुपेति समासः। ऋक् पूरित्यादिना समासान्तो द्व्यन्तरुपसर्गेभ्योऽपदितीकारः। उत्तस्थतु रुत्थितौ किमूर्द्ध्वं कर्मत्वात् परस्मैपदं रूपकोज्जीविते उत्प्रेक्षे ॥ ७३ ॥

तालमिति। तावत्पतितं च्युतं तालफलं काष्ठं उत्थानेन उच्चाव-

तालं प्रभु स्यादनुकर्त्तुमेता वुत्थानसुस्थौ पतितं न तावत् ।
परञ्च नाश्रित्य तरुं महान्तं कुचौ कृशाङ्ग्याः स्वतएव तुङ्गौ ॥७४
एतत्कुचस्पर्द्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम् ।
तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः॥७५
निःशङ्कसङ्कोचितपङ्कजोऽय मस्यामुदीतो मुखमिन्दुविम्बः ।
चित्रन्तथापि स्तनकोकयुग्मं न स्तोकमप्यञ्चति विप्रयोगम् ॥७६॥
आभ्यां कुचाभ्यामिभकुम्भयोः श्री रादीयतेऽसावनयोः क्व ताभ्याम्

चस्थानेन सुस्थौ सुप्रतिष्ठौ अपतितावित्यर्थः । एतौ कुचौ अनुकर्त्तुञ्च प्रभु समर्थं न स्यात् पतिताऽपतितयो कुतः साम्यमिति भावः । परं पतितं च महान्तमति तुङ्गन्तरु माश्रित्य तुङ्गं सदिति शेषः । स्वत एव तुङ्गौ कृशाङ्ग्याः कुचौ अनुकर्तुं न प्रभु कुतः स्वाभाविकौ यदित्यर्थः । अस्वाभाविक स्वाभाविकौन्नत्ययोः कथं साम्यमिति भावः ॥ ७४ ॥

एतदिति । एतत्कुचस्पर्द्धितया ख्यातस्य लोके प्रसिद्धस्य घटस्य कुम्भस्य शास्त्रेषु निदर्शनत्वं तत्तत्र दृष्टान्तत्वं अजनि । किञ्च मणिकादिकारी अलिञ्जरादि महाभाण्ड निर्माता कुलालः अलिञ्जरः स्यान्मणिक इत्यमरः । तस्मादेव शिल्पात् घटनिर्माणात् कुम्भकार इत्येव प्रसिद्ध नामाऽजनि महत् संसर्ग इव तत्संसर्गोऽपि ख्यातिकर इतिभावः ॥ ७५ ॥

निःशङ्केति । निःशङ्कं यथा तथा सङ्कोचितानि मुकुलितानि पङ्कजानि येन सोऽयं मुखमेवेन्दु विम्बोऽस्यां भैम्यां उदीत उदितस्तथापीन्दूदयेऽपि स्तनावेव कोकौ चक्रवाकौ कोकश्चक्रश्चक्रवाक इत्यमरः । तयोर्युग्मं स्तोकं अल्पमपि विप्रयोगं नाञ्चति न गच्छति चित्रं मुखेन्दूदयेऽपि कोकयो रवियोग इति रूपकोत्थापितो विरोधाभास इति सङ्करः ॥ ७६ ॥

आभ्यामिति । आभ्यां कुचाभ्यां इभ कुम्भयोः श्रीः शोभा सम्यगादीयते गृह्यते ताभ्यामिभ कुम्भाभ्या मनयोः कुचयोः असौ श्रीः क्वादीयते न क्वापि इत्यर्थः । यद्यस्मात् ताविभकुम्भौ भयेन कुचभीत्या गोपायित

भयेन गोपायितमौक्तिकौ तौ प्रव्यक्तमुक्ताभरणाविमौ यत् ॥७७॥
कराग्रजाग्रच्छतकोटिरर्थी ययोरिमौ तौ तुलयेत् कुचौ चेत् ।
सर्व्वं तदा श्रीफलमुन्मदिष्णु जातं वटीमप्यधुना न लब्धुम् ॥७८॥
स्तनातटे चन्दनपङ्किलेऽस्या जातस्य यावद्युवमानसानाम् ।
हारावलीरत्नमयूखधाराकाराः स्फुरन्ति स्खलनस्य रेखाः ॥७९॥

मौक्तिकावन्तर्गुप्त मुक्ताफलौ गोपायतेः कर्मणि क्तः । इमौ कुचकुम्भौ प्रव्यक्तं प्रकाशितं मुक्ताभरणं याभ्यान्तौ । यथा राज्ञा हृतधनो भयाद्धनशेषं गोपायति राजा तु प्रकाशयति तद्वदित्यर्थः । इभ कुम्भश्रिय आदानाद् खण्डितस्वश्रीकत्वाच्च ताभ्यामप्यधिकौ कुचकुम्भाविति भावः ॥ ७७॥

कराग्रेति । कराग्रे हस्ताग्रे जाग्रत् प्रकाशमानः शतकोटिः वज्रं तत् स्वम् धनं च यस्य स महेन्द्रो ययोः कुचयोः कर्मणोरर्थी ताविमौ महेन्द्रास्यर्थितौ कुचौ कर्म वटीं क्षुद्रकपर्दिकामपि वटः कपर्देन्यग्रोध इति विश्वः । अपचय विवक्षायां स्त्रीलिङ्गप्रयोगः । स्त्री स्यात् काचमणौ स्यादि विवक्षापचये यदीत्यमराभिधानात् । लब्धुं न जातं न शक्तं निस्वमित्यर्थः । सर्वं श्रीफलं विल्वफलं कर्तृ विल्वे शाण्डिल्य शैलूषौ मालूर श्रीफलावपीत्यमरः । तुलयेदात्मनोपमितुयाच्चेत् तदा उन्मदिष्णु उन्मादि स्यादित्यर्थः अलङ्कृञित्यादिना इष्णुचि उपमातीते वस्तुनि उपमात्वाभिमानः । तथा धनिकैकलभ्ये वस्तुनि निस्वस्य लिप्सा चोन्माद एवेत्यर्थः ॥ ७८ ॥

स्तनेति । चन्दनेन पङ्किले पङ्कवति पिच्छादित्वादिलच् । अस्याः स्तनयोः अतटे प्रपाते प्रपातस्त्वतटो भृगुरित्यमरः । जातस्य यावन्ति युवमानसानि तेषां सर्वेषां सम्बन्धिनः साकल्यार्थस्य यावच्छब्दस्य विशेषण समासः । स्खलनस्य रेखा गमनमार्गा हारावलीरत्नानां मयूखधारा रश्मिपङ्क्तयः एवाकारा यासान्ताः स्फुरन्तीषु रत्नमयूख धारासु युवमानस स्खलनरेखात्वमुत्प्रेक्ष्यते ॥ ७९ ॥

क्षीणेनेति । इहास्यां भीमभुवि [illegible] भयङ्करस्थाने च क्षीणेन कृशेन दुर्बलेन च मध्ये अवलग्ने प्रबलशत्रुमध्ये च सता वसतापि उदरेण लिव-

क्षीणेन मध्येऽपि सतोदरेण यत् प्राप्यते नाक्रमणं वलिभ्यः ।
सर्वाङ्गशुद्धौ तदनङ्गराज्ये विजृम्भितं भीमभुवीह चित्रम् ॥८०॥
मध्यं तनूकृत्य यदीदमीयं वेधा न दध्यात् कमनीयमंशम् ।
केन स्तनौ सम्प्रति यौवनेऽस्याः सृजेदनन्यप्रतिमाङ्गदीप्तेः ॥८१॥
गौरीव पत्या सुभगा कदाचित् कर्त्री यमप्यर्द्धतनूसमस्याम् ।
दूतीव मध्ये निदधे विधाता रोमावलीमेचकसूत्रमस्याः ॥८२
रोमावलीरज्जुमुरोजकुम्भौ गम्भीरमासाद्य च नाभिकूपम् ।

ल्यधोभागेन अतएव वलिभ्यः बवयोरभेदात् बलिभ्यो बलवद्भ्यश्च सकाशादाक्रमणमभिव्याप्तिरभिभवश्च न प्राप्यते यत् तदनाक्रमणं चित्रं बलिसमीपे दुर्बलस्य नाक्रमणं चित्रमित्यर्थः । किञ्च सर्वेषामङ्गानां करचरणादीनां स्वामात्यादीनां च शुद्धौ सत्यामनङ्गस्याङ्गहीनस्य कामस्य च राज्ये विजृम्भितं तदिदमन्यच्चित्रमित्यर्थः । अत्र वाच्यप्रतीयमानयोरभेदाध्यवसायाद्विरोधाभासः ॥ ८० ॥

मध्यमिति । वेधा इदमीयमेतदीयं मध्यमवलग्नं तनूकृत्य निर्माणकाले ह्रासयित्वा कमनीयमंशमुद्धृतभागं न दध्याद् यदि क्वचिन्न स्थापयेद्यदि सम्प्रति यौवने अनन्यप्रतिमाऽनन्योपमाङ्गदीप्तिर्यस्यास्तस्या भैम्याः स्तनौ केन सृजेन्नू नमुदरोद्धृतसारेण अस्याः स्तनौ निर्मितवानित्युत्प्रेक्षा ॥ ८१ ॥

गौरीति । सुभगा भर्तृवल्लभा इयं दमयन्ती कदाचिद् गौरीव पत्या भर्त्रा सह अर्द्धतनूसमस्यामर्द्धाङ्गसङ्घट्टनां कर्त्री करिष्यतीति मत्वेति शेषः । विधाता अस्या मध्ये अर्द्धाङ्गमध्ये रोमावलीमेव मेचकसूत्रं निर्णयार्थं नीलसूत्रं निदध इव निहितवान् किमित्युत्प्रेक्षा ॥ ८२ ॥

रोमावलीति । मद्दृष्टेस्तृष्णा पिपासाऽपि रोमावलीमेव रज्जुमुरोजावेव कुम्भौ तथा गभीरं नाभिमेव कूपञ्चासाद्य लब्ध्वा तदा विरमेत् शाम्येत् यदि अमीभिरुपायैः लावण्यामृतमुद्धृत्य सुष्ठु पीत्वेत्यर्थः किन्तु

मद्दृष्टिदृश्या विरमेद्यदि स्यान्नैषां वतैषा सिचयेन गुप्तिः ॥८३॥
उन्मूलितालानविलाभनाभिश्छिन्नस्खलच्छृङ्खलरोमदाम्ना ।
मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥ ८४ ॥
रोमावलिभ्रूकुसुमैः स्वमौर्वीचापेषुभिर्मध्यललाटमूर्ध्नि ।
व्यस्तैरपि स्थास्नुभिरेतदीयैर्जैत्रः स चित्रं रतिजानिवीरः ॥८५॥
अस्याः खलु ग्रन्थिनिबद्धकेश मल्लीकदम्बप्रतिविम्बवेशात् ।
स्मरप्रशस्तीरजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ॥ ८६ ॥

एषां साधनानां एषा सिचयेन वस्त्रेण वस्त्रन्तु सिचयः पट इति हलायुधः । गुप्तिश्छादनं न स्यादिति वतेति खेदे रूपकालङ्कारः ॥ ८३॥

उन्मूलितेति । उन्मूलित मुत्पाटित मालानं स्तम्भो यस्मात् विलात् तदाभा तन्निभा नाभिर्यस्याः सा छिन्नं त्रुटितं स्खलच्छृङ्खलमिव रोमदाम रोमावलि र्यस्याः सा प्रस्वापस्य वप्रौ निद्रार्थं कृतकृताविव उच्चौ कुचौ यस्याः सेयं दमयन्ती मत्तस्य मदनद्विपस्य वास्तु वसति रस्तु स्यादौपम्य गर्भविशेषणं रूपकम् ॥ ८४ ॥

रोमावलीति । रतिर्जाया यस्य स रतिजानिः कामः स एव वीरः जायाया निङ् । मध्ये ललाटे मूर्ध्नि च मध्य ललाट मूर्ध्नि प्राण्यङ्गत्वात् द्वन्द्वे नपुंसकता । तस्मिन् व्यस्तैरसंहितैः स्थास्नुभिः स्थायिभिः । ग्लाजिस्थश्च क्स्नुः । एतदीयै रोमावली च भ्रुवौ च कुसुमानि च तैरेव स्वस्य मौर्वीचाप मिषवस्त तैः जेतैव जैत्रो जयशीलः प्रज्ञादित्वात् स्वार्थेऽण् प्रत्ययः । चित्रं भिन्न देशस्थैरपि चापादिभिर्विजयत इत्याश्चर्यमित्यर्थः । अतएव विरूप घटनारूपो विषमालङ्कारः ॥ ८५ ॥

अस्या इति । अस्याः भैम्याः पृष्ठस्थली काय पश्चाद्भागः पृष्ठं तु चरमन्तनोरित्यमरः । सैव हाटक पट्टिका हैमफलकं तस्यां ग्रन्थिना बन्धेन निबद्धेषु संयतेषु केशेषु यन्मल्लीकदम्बं मल्लीकुसुम निकुरम्बं तत्प्रतिविम्बस्य देशात् प्रदेशाद्धेतो रियं रजताक्षरा रजतमयवर्णा स्मरप्रशस्तिः

चक्रेण विश्वं युधि मत्स्यकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन।
जगज्जिगीषत्यमुना नितम्बद्वयेन किं दुर्लभदर्शनेन ॥ ८७ ॥
रोमावलीदण्डनितम्बचक्रे गुणञ्च लावण्यजलञ्च बाला।
तारुण्यमूर्त्तेः कुचकुम्भकर्त्तुर्बिभर्त्ति शङ्के सहकारि चक्रम् ॥ ८८ ॥
अङ्गेन केनापि विजेतुमस्या गवेष्यते किञ्चलपत्रपत्रम्।
न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ॥ ८९ ॥

स्मरवर्णना खलु नैर्मल्यात् पृष्ठफलक प्रतिबिम्बितानि धम्मिल्लमल्लिका कुसुमानि हेमफलकविन्यस्ता राजती मदनप्रशस्ति वर्णावलीव भातीत्युत्प्रेक्षा ॥ ८६ ॥

चक्रेणेति। मत्स्य केतुः कामः सुदर्शनेन सुदर्शनाख्येन सुलभदर्शनेन च पितुर्विष्णोश्चक्रेण विश्वं जितं वीक्ष्य यदि वीक्ष्य किल अमुना दुर्लभदर्शनेन नितम्बद्वयेन कटीफलकद्वयेनेव चक्रेण जगज्जिगीर्षति जेतुमिच्छति किमित्युत्प्रेक्षा ॥ ८७ ॥

रोमावलीति। बाला दमयन्ती तारुण्यमेव मूर्त्तिः स्वरूपं यस्य तस्य यौवनाख्यस्येत्यर्थः। कुचावेव कुम्भौ तयोः कर्त्तुर्निर्मातुः कुम्भकारस्य रोमावल्येव दण्डः स च नितम्ब एव चक्रञ्च ते गुणः सौन्दर्यादिः तमेव गुणं सूत्रञ्चेति श्लिष्टरूपकं लावण्यमेव जलञ्च सहकारिचक्रं सहकारिकारणकलापं विभर्ति किमिति रूपकोत्थापितेयमुत्प्रेक्षा चेति सङ्करः ॥ ८८ ॥

अङ्गेनेति। अस्याः सम्बन्धिना केनाप्यवाच्येनाङ्गेन मदनमन्दिरेणेत्यर्थः। चलपत्रपत्रमश्वत्थदलं बोधिद्रुमश्चलदल इत्यमरः। जेतुङ्गवेष्यते किमित्युत्प्रेक्षा। मार्गत्यन्विष्यति गवेषयत्यन्विष्यति चेति मल्लभट्टः। न चेन्नान्विष्यते चेत् तस्याश्वत्थपत्रस्य कुतः कस्मादन्यस्मात् भयेनेतरच्छदेभ्यः वृक्षान्तरपत्रेभ्यः पञ्चमी विभक्तिः। विशेषादतिशयात् कम्पस्तु अस्तु, स्यात् नान्यत्कम्पकारणं विद्म इत्यर्थः। बलिना न्विष्यमाणो दुर्बलो कम्पत इति च प्रसिद्धम् अत्र सामुद्रिकाः अश्वत्थदलसङ्काशं गुह्यं गूढमणिस्थितम्। यस्याः सा सुभगा नारी पुण्यैरेवमवाप्यते ॥ ८९ ॥

भ्रूश्चित्ररेखा च तिलोत्तमास्या नासा च रम्भा च यदूरुसृष्टिः।
दृष्टा ततः पूरयतीयमेकाऽनेकाप्सरः-प्रेक्षणकौतुकानि॥ ९०॥
रम्भापि किं चिह्नयति प्रकाण्डं न चात्मनः स्वेन न चैतदूरू।
स्वस्यैव येनोपरि सा दधाना पत्राणि जागर्त्यनयोर्भ्रमेण॥९१॥
विधाय मूर्द्धानमधश्चरञ्चे न्मुञ्चेत्तपोभिः स्वमसारभावम्।
जाड्यञ्च नाञ्चेत् कदली बलीय स्तदा यदि स्यादिदमूरुचारुः॥९२

भ्रूरिति। यद्यस्मादस्या भैम्या भ्रूश्चित्रलेखा अद्भुतविन्यासा अप्सराश्च नासा नासिका तिलात्तिलकुसुमात् उत्तमा तिलोत्तमानामाप्सराश्च तथा ऊरुसृष्टिः रम्भा कदली अप्सराश्च रम्भाकदल्यप्सरसोरिति विश्वः। तस्मादियमेकैव दृष्टा सती अनेकासामप्सरसां प्रेक्षणात्कौतुकानि पूरयति तादृशान् मानसोल्लासान् जनयतीत्यर्थः अत्रैकस्यानेकात्मकताविरोधाभासनात् विरोधाभासालङ्कारः स च श्लेषमूल इति सङ्करः॥ ९०॥

रम्भेति। रम्भा कदल्यपि आत्मनः प्रकाण्डं स्कन्धं स्वेन स्वात्मना स्वयमित्यर्थः प्रकृत्यादिभ्य उपसङ्ख्यानात् तृतीया। न चिह्नयति किमेतस्याऊरूच न चिह्नयति किं मिथो व्यत्यासपरिहाराय द्वयोरन्यतरस्यापि चिह्नं न चकार किमित्युत्प्रेक्षा। कुतः येन कारणेन सा रम्भा अनयोरूर्वोर्भ्रमेणोरुभ्रान्त्येत्यर्थः। स्वस्यैव स्वकीयस्कन्धस्यैव उपरि पत्राणि दलानि प्रतिपक्षोपरिधेयानि साक्षरपत्राणि च दधाना जागर्ति। अत्र सौन्दर्ये सङ्घर्षिणी रम्भापि स्वस्मिन्नेव ऊरुभ्रान्त्या पत्रावलम्बनकरणात् भ्रान्तिमदलङ्कारः तन्मूला चोत्प्रेक्षेति तयोरङ्गाङ्गीभावेन सङ्करः॥ ९१॥

विधायेति। कदली रम्भा तपोभिस्तपश्चर्याभिर्मूर्द्धानमधश्चरमधोवर्त्तिनं विधाय शिरोऽङ्घ्र्योरुत्तराधरभाववैपरीत्यञ्च लब्ध्वेत्यर्थः। स्वं स्वकीयम् असारभावं निःसारत्वञ्च मुञ्चेच्चेत् बलीयो जाड्यमेकान्तशैत्यञ्च नाञ्चेन्नगच्छेत्तदानीम् इदमूरुचारुः अस्या ऊरू इव चारुः शोभना स्याद्यदि स्यादेवेत्यर्थः। अत्र कदल्या अधः शिरस्त्वादिधर्मसम्बन्धेऽपि सम्बन्धभावनया सम्बन्धोक्तेरतिशयोक्तिभेद इति सर्वस्वकारः॥ ९२॥

ऊरुप्रकाण्डद्वितयेन तस्याः करः पराजीयत वारणीयः ।
युक्तं ह्रिया कुण्डलनच्छलेन गोपायति स्वं मुखपुष्करं सः ॥९३॥
अस्यां मुनीनामपि मोहमूहे भृगुर्महान् यत्कुचशैलशीली ।
नानारदाह्लादि मुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः ॥९४॥
क्रमोद्गता पीवरताधिजङ्घं वृक्षाधिरूढिं विदुषी किमस्याः ।

ऊर्व्विति । तस्या दमयन्त्या ऊरुप्रकाण्डयोरूरुश्रेष्ठयोरूरुस्तम्भयोर्वा द्वितयेन वारणीयो वारणसम्बन्धी करो हस्तः पराजीयत पराजितः स करः ह्रिया स्वं मुखं मुखभूतं पुष्करं अग्रं वक्त्रं पङ्कजञ्च मुखं निःसरणे वक्त्रप्रारम्भोपाययोरपि । पुष्करं पङ्कजे व्योम्नि पयः करिकराग्रयोरिति विश्वः । कुण्डलनस्य भङ्गीकरणस्य छलेन गोपायति पिधत्ते युक्तं सापह्नवोत्प्रेक्षा ॥ ९३ ॥

अस्यामिति । अस्यां दमयन्त्यां मुनीनामपि मोहं भ्रान्तिमासक्तिमिति यावत् । ऊहे तर्कयामि । उत्प्रेक्षा कुतः यद्यस्मान्महानधिको भृगुः प्रपातो मुनिविशेषश्च यस्याः कुचावेव शैलौ शीलयति परिचिनोतीति तच्छीली मुखं नानाप्रकारैरदैर्दन्तैराह्लादयतीति तत्तथोक्तम् अन्यत्र नारदमुनिम् आह्लादयतीति नारदाह्लादि तन्नभवतीति अनारदाह्लादि तन्नेति नानारदाह्लादि इत्यर्थः । महाभाः महाप्रभः रतसर्गयोग्यः सुरतसम्पादनार्हः अन्यत्र महाभारतस्य इतिहासस्य सर्गे निर्माणे योग्यः समो व्यासो विस्तारो द्वैपायनश्च श्रिता ऊरुसक्थिनी येन सः श्रितोरुः सक्थि क्लीबे पुमानूरुरित्यमरः । अत्र श्लेषमूलया मुनिमोहोत्प्रेक्षया मुनयस्तस्यां मुह्यन्ति किमुतान्ये इति वस्तु व्यज्यते ॥ ९४ ॥

क्रमेति । अस्या भैम्या अधिजङ्घं जङ्घयोः विभक्त्यर्थेऽव्ययीभावः । क्रमेणानुपूर्व्यात् उद्गता उदिता पीवरता पीनत्वं वृक्षादिरूढिमारोहविशेषं विदुषी किं ? ज्ञात्री किं ? न लोकेत्यादिना षष्ठीप्रतिषेधः । किञ्च असौ भङ्गीभिर्वेष्टनविन्यासैरावृताङ्गमाच्छादितगात्रं वासो वस्त्रमपि लतावेष्टि-

अपि भ्रमीभङ्गिभिरावृताङ्गं वासो लतावेष्टितकप्रवीणम् ॥९५॥
अरुन्धतीकामपुरन्ध्रिलक्ष्मी जम्भद्विषद्दारनवाम्बिकानाम्।
चतुर्दशीयं तदिहोचितैव गुल्फद्वयाप्ता यददृश्यसिद्धिः ॥९६॥
अस्याः पदौ चारुतया महान्ता वपेक्ष्य सौक्ष्म्याल्लवभावभाजः।
जाता प्रवालस्य महीरुहाणां जानीमहे पल्लवशब्दलब्धिः ॥९७॥

तके आलिङ्गनविशेषे प्रवीणं किम्? उभयताप्यन्यथा कथम् इत्यमाश्लिष्येदिति भावः। अनयोर्लक्षणमुक्तं रतिरहस्ये रमणचरणमेकेनाङ्घ्रिणाक्रम्य भिन्नं श्वसितमपरपादेनाश्रयन्तीतदूरुम्। निजमथभुजमेकं पृष्ठतोऽस्यार्पयन्ती पुनरपरभुजेन प्राञ्चयन्ती तदङ्गम्। तरुमिव कमितारं चुम्बनार्थाधिरूढा यदभिलषितरागात्तच्च वृक्षादिरूढम्। अयमनुकृतवल्ली विभ्रमावेष्टयन्ती द्रुममिव सरलाङ्गीमन्दसीत्का तदीयम्। वदनमुचितखेदाकम्पमाचुम्बनार्थं न भवति विनदन्तीतल्लतावेष्टितं स्यात् इति ॥ ९६ ॥

अरुन्धतीति। इयं दमयन्ती अरुन्धतीवशिष्ठपत्नी च कामपुरन्ध्री रतिश्च लक्ष्मीः पद्माच जम्भद्विषद्दाराः शची च नवाम्बिका ब्राह्मी प्रभृतयो नवमातरश्च यासामदृश्यत्वसिद्धिरस्तीति प्रसिद्धिरिति भावः। तासां त्रयोदशानां चतुर्दशी इयमपि तदन्तःपातिनीत्युत्प्रेक्षा। तत्तस्मात्तदन्तःपातित्वादिहास्यां दमयन्त्यां गुल्फौ पादग्रन्थी तद्ग्रन्थिघुटिके गुल्फावित्यमरः। तयोर्द्वयेनाप्या प्राप्या या च सा अदृश्यसिद्धिश्च यददृश्यसिद्धिः येयं गुल्फयोरदृश्यत्वसिद्धिरित्यर्थः। सति शेषं यत्तदोर्नित्यसम्बन्धात्सा उचितैव तत्सम्बन्धिनोऽपि तद्वत् सिद्धिर्युक्तैवेत्यर्थः। गूढगुल्फत्वं स्त्रीलक्षणं तदस्यामस्तीति भावः ॥ ९६ ॥

अस्या इति। चारुतया सौन्दर्यगुणेन महान्तौ अस्याः पादौ पदौ अवेक्ष्य पादः पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः। सौक्ष्म्यात् तदपेक्षयाल्पत्वादिति भावः। लवभावभाजोऽल्पत्वभाजो महीरुहाणां प्रवालस्य किसलयस्य पल्लवशब्दलब्धिः पद्भ्यां लवोऽस्य इति व्युत्पत्त्या पल्लवसंज्ञाप्राप्तिर्जाता जानीमहे इत्युत्प्रेक्षामहे इत्यर्थः। अस्मदो द्वयोश्चेति विकल्पादेकस्मिन्नेव बहुवचनम् ॥ ९७ ॥

जगद्वधूमूर्द्धसु रूपदर्पाद् यदेतया ऽधायि पदारविन्दम् ।
तत्सान्द्रसिन्दूरपरागरागैः ध्रुवं प्रवालप्रबलारुणं तत् ॥ ९८ ॥
रुषारुणा सर्वगुणैर्जयन्त्याः भैम्याः पदं श्रीः स्म विधेर्वृणीते ।
ध्रुवं स तामच्छलयद्यतः सा भृशारुणैतत्पदभाग्विभाति ॥ ९९ ॥
यानेन तन्व्या जितदन्तिनाथौ पदाब्जराजौ परिशुद्धपार्ष्णी ।
जाने न शुश्रूषयितुं स्वमिच्छू नतेन मूर्ध्ना कतरस्य राज्ञः ॥ १०० ॥

जगदिति। यद्यस्मादेतया देव्या भैम्या रूपदर्पात् सौन्दर्यगर्वात् द्वयमुभयं पदारविन्दं द्वे अपि पदारविन्दे इत्यर्थः। जगद्वधूमूर्द्धसु अधायि निहितं धाञः कर्मणि लुङ्। अतो युक्चिण्कृतोरिति युगागमः। तत्तस्मात् तेषु मूर्द्धसु ये सान्द्राः सिन्दूरपरागरागास्तैः प्रवालाद्विद्रुमादपि प्रबलारुणमधिकारुणं ध्रुवमित्युत्प्रेक्षा ॥ ९८ ॥

रुषेति। श्रीः लक्ष्मीः रुषा पराजयक्रोधेन अरुणा सती सर्वगुणैर्जयन्त्या आत्मानमतिक्रामन्त्या भैम्याः पदं स्थानं विधेः सकाशात् वृणीते स्म वव्रे स विधिस्तां श्रियमच्छलयत्प्रतारितवान् ध्रुवं स्थानार्थविवक्षया पदप्रार्थनायामङ्घ्रिदानादिति भावः। पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः। यतः सा श्रीरेतत्पदभागे तस्या भैम्या अङ्घ्रिभाक् सती शोभारूपेणेति भावः। भृशारुणा विभाति आरुण्यप्रत्यभिज्ञानात् तदङ्घ्रिरेवैतत्स्थानमिति जानीम इत्यर्थः ॥ ९९ ॥

यानेनेति। यानेन गत्या दण्डयात्रया च जितो दन्तिनाथो गजश्रेष्ठो गजपतिश्च याभ्यां तौ परिशुद्धः निर्दोषो वशीकृतश्च पार्ष्णिः पश्चाद्भागः पार्ष्णिग्राहश्च ययोस्तौ तन्व्याः पदाब्जे एव राजानौ पदाब्जराजौ कतरस्य राज्ञः पत्युः परिपन्थिनश्च नतेन मानशान्तये रौद्रशान्तये च नम्रेण मूर्ध्ना स्वमात्मानं सेव्यं शुश्रूषयितुं सेवयितुमिच्छू अभिलाषुकौ न जाने अत्र पदाब्जराजाविति रूपकस्य श्लेषेणाङ्गाङ्गीभावेन सङ्करः ॥ १०० ॥

कर्णाक्षिदन्तच्छदबाहुपाणि पदादिनः स्वाखिलतुल्यजेतुः।
उद्वेगभागद्वयताभिमानादिहैव वेधा व्यधित द्वितीयम् ॥१०१॥
तुषारनिःशेषितमब्जसर्गं विधातु कामस्य पुनर्विधातुः।
पञ्चस्विहास्याङ्घ्रिकरेष्वभिख्याभिक्षाऽधुना माधुकरीसदृक्षा ॥१०२॥
एष्यन्ति यावद्गणनादिगन्तान् नृपाः स्मरार्त्ताः शरणे प्रवेष्टुम्।
इमे पदाब्जे विधिनापि सृष्टा स्तावत्य एवाङ्गुलयोऽत्र रेखाः ॥१०३॥

कर्णेति। स्वस्य यान्यखिलानि तुल्यानि शष्कुली कमलाद्युपमानवस्तूनि तेषां जेतुः भाषित पुंस्कत्वात् पुंवद्भावः। कर्णश्चाक्षि च दन्तच्छदश्च बाहुश्च पाणिश्च पदञ्च कर्णाक्षि दन्तच्छद बाहुपाणिपदं प्राण्यङ्गत्वादेकवद्भावः। तदादिर्यस्य तदादिशब्दात् कचादिसङ्ग्रहः। तदादिनोऽवयवजातस्य अद्वयताभिमानात् अद्वितीयत्वगर्व्वात् उद्वेगभाक् रोषभाक् वेधा इहास्यामेव भैम्यां द्वितीयं कर्णादिकं व्यधित विहितवान् तदवयवानामप्रतिमतया परस्परमेवौपम्यमासीत् यथा कर्णस्येतर कर्णेन करस्येतर करेणेत्यर्थः ॥ १०१ ॥

तुषारेति। तुषारेण निःशेषितं नाशितमब्जसर्गं पद्मसृष्टिं पुनर्विधातु कामस्य स्रष्टुकामस्य विधातुरधुना इहास्यां भैम्यां पञ्चसु आस्यं चाङ्घ्री च करौ च तेषु अधिकरणैतावत्त्वे चेत्येकवद्भावप्रतिषेधः इहाधिकरणं समाहारत्वात् तस्यैतावत्त्व पञ्चत्व मभिख्याभिक्षा शोभायाच्ञा अभिख्यानाम शोभयोरित्यमरः। माधुकरी नाम पञ्चभिक्षा तया सदृक्षा सदृशी दृशेः क्सश्च वक्तव्य इति क्स प्रत्ययः। वर्त्तत इति शेषः। एतदास्यादि पञ्चके यावल्लावण्यं तावत् पद्मेषु नास्तीत्यर्थः ॥ १०२ ॥

एष्यन्तीति। स्मरार्त्ता नृपा इमे पदाब्जे शरणे प्रवेष्टुं यावन्ती गणना यस्य तस्माद्यावद्गणनात् यावत्सङ्ख्यकात् दिगन्तात् यावत्सङ्ख्यकेभ्यो दिगन्तेभ्य इत्यर्थः। जातावेकवचनं, एष्यन्ति अतानयोरमि

प्रियासखीभूतवतो मुदेदं व्यधाद्विधिः साधुदशत्वमिन्दोः ।
एतत्पदच्छद्मसरागपद्म सौभाग्यभाग्यं कथमन्यथा स्यात् ॥१०४॥
यशः पदाङ्गुष्ठनखौ मुखञ्च बिभर्त्ति पूर्णेन्दु चतुष्टयं या ।
कला चतुःषष्टिरुपैतु वासं तस्यां कथं सुभ्रुवि नाम नास्याम्॥१०५
सृष्टातिविश्वा विधिनैव तावत्तस्यापि नीतोपरि यौवनेन ।
वैदग्ध्यमध्याप्य मनोभुवेय मवापिता वाक्पथपारमेव ॥१०६॥

पदाब्जयोः तावत्य एव तत्सङ्ख्या एवाङ्गुलय एव रेखाः सृष्टाः स्वयम्वरार्थमागामिनां राज्ञां सुपादानदिक् सङ्ख्यासूचकरेखा इव दशाङ्गुलयः सृष्टा इत्युत्प्रेक्षा ॥ १०३ ॥

प्रियेति। विधिर्विधाता प्रियायाः भैम्याः सखीभूतवतः सुहृद्भूतस्य अभूततद्भावे च्विः भवतेः क्तवतु प्रत्ययश्च। इन्दोरिदं साधुदशत्वं समीचीनावस्थत्वं सम्यक् दशानां परिपाकं मुदा सन्तोषेण व्यधात् विहितवानित्यर्थः। अन्यथाऽस्येन्दोः एतस्याः पदस्य छद्म छलं यस्य तस्य सरागपद्मस्य सौभाग्ये सौन्दर्ये भाग्यं कथं, एतच्चरण शोणसरोज सादृश्यं कथमित्यर्थः ॥ १०४॥

यश इति। या सुभ्रूः यशः कीर्त्तिः पदाङ्गुष्ठयो र्नखौ मुखञ्चेति पूर्णेन्दु चतुष्टयं बिभर्त्ति तस्या अस्यां सुभ्रुवि सुन्दर्यां कलानां षोड़शभागानां विद्यानां च चतुरुत्तरा षष्टिः चतुःषष्टि र्वासं निवासं नाम नोपैतु उपैत्येवेत्यर्थः। चन्द्र चतुष्टये प्रतिचन्द्रं षोड़शकलत्वा च्चतुःषष्टि कला सम्पत्ति रित्यर्थः। द्वयीनामपि कलानां अभेदाध्यवसायेन अयं निर्देशः ॥ १०५ ॥

सृष्टेति। इयन्तावद्विधिनैवातिविश्वा विश्वमतिक्रान्ता विश्वातिशायिनीत्यर्थः। अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः। सृष्टा निर्मिता अथ यौवनेन तस्य विधिकृतातिशयस्याप्युपरि नीता ततोऽप्यतिशयं प्रापितेत्यर्थः। अथ मनोभुवा वैदग्ध्यं प्रागल्भ्यं अध्याप्य वाक्पथस्य वाङ्मार्गस्य पारम्परतरं अवाङ्मनसगोचरत्वमेवावापिता। अत

इति स चिकुरादारभ्यैतां नखावधि वर्णयन्
हरिणरमणीनेत्रां चिन्ताम्बुधौ तरदन्तरः।
हृदयभरणोद्वेलानन्दः सखीकृतभीमजा-
नयनविषयीभावे भावं दधार धराधिपः ॥ १०७ ॥
श्रीहर्षं कविराजिराजमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम्।
गौडोर्व्वीशकुलप्रशस्तिभणितिभ्रातर्य्ययं तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्सप्तमः ॥ १०८ ॥

क्रमेणैकस्यानेकधर्मसम्बन्धकथनात् एकस्मिन् कथं वा अनेक मित्युक्तलक्षणपर्य्यायभेदः ॥ १०६ ॥

इतीति। इतीत्थं स धराधिपो नलो हरिणरमणी नेत्रा मेतां भैमीं चिकुरात् केशापाशादारभ्य नखावधि पदाङ्गुष्ठ नखान्तं वर्णयं श्चिन्ताम्बुधा वाश्चर्य्यसागरे तरदन्तरः प्लवमानान्तरङ्गस्तथा हृदये भरणात् पूरणात् उद्वेलो निःसीमः आनन्दो यस्य स सन् सखीकृतया भीमजाया भैम्या नयनविषयीभावे दृग्गोचरत्वे भाव मभिप्रायं दधार तस्याः प्रत्यक्षीभवितु मैच्छदित्यर्थः ॥ १०७ ॥

श्रीहर्षमित्यादि। गौड़ोर्वीश-कुल-प्रशस्ति-भणितिर्नामास्य कृतः प्रबन्धः तद्भ्रातरि तत् समान कर्तृक इत्यर्थः ॥ १०८ ॥

इति पदवाक्य प्रमाण पारावार पारीण महा महोपाध्याय कोलाचलमल्लिनाथ विरचिते नैषध व्याख्याने जीवातु समाख्याने सप्तमः सर्गः ॥७॥

नैषधचरितम् ।

अष्टमः सर्गः ।

अथाद्भुतेनास्तनिमेषमुद्रमुन्निद्ररोमाणममुं युवानम् ।
दृष्ट्वा पपुस्ताः सुदृशः समस्ताः सुता च भीमस्य मही-मघोनः ॥१॥
कियच्चिरं दैवतभाषितानि निह्नोतु मेनं प्रभवन्तु नाम ।
पलालजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भः ॥२॥

अथेति । अथ नलप्रादुर्भावानन्तरम् अद्भुतेन दमयन्तीसाक्षात्कारजन्यविस्मयवशेन अस्ता निमेषमुद्रा निमीलनबन्धो यस्य तं निर्निमेषमित्यर्थः । उन्निद्ररोमाणं हृष्टरोमाणमिति च विस्मयानुभावोक्तिः । युवानममुं नलमन्यत्वाद्भुतेन नलरूपसाक्षात्कारविस्मयेन अस्तनिमेषमुद्राः उन्निद्ररोमाणो युवतय इति परिणामः कार्य्यः । भैमी सभासदाः समस्ताः सुदृशः स्त्रियः दृष्ट्वा पपु रतितृष्णया ददृशुरित्यर्थः । तथा महीमघोनो भूदेवेन्द्रस्य भीमस्य सुता भैमी च पूर्वोक्तविस्मयानुभववती युवतिश्चेति भावः । तं दृष्ट्वा पपावित्यर्थः । भैम्याः पृथगुपादानं दर्शनस्यानुरागपूर्वकत्वलक्षणविशेषद्योतनार्थः ॥ १ ॥

नन्वयमिन्द्रादिवाक्यातिक्रमेण कथमासां प्रादुरासीदित्यत्रोत्तरमाह । कियदिति । दैवतभाषितानि आहत्य एवं दूत्यमाचरत्वेवं रूपाणीन्द्रवाक्यानि कियच्चिरं कियन्तं बहुकालमित्यर्थः । अत्यन्तसंयोगे द्वितीया अव्ययविशेषणत्वात् किमिति नपुंसकलिङ्गनिर्देशः । क्रियाव्ययानां भेदकान्येकत्वेऽपीति नपुंसकलिङ्गशेषेष्वमरः । एनं नलन्निह्नोतु माच्छादयितुं प्रभवन्तु शक्नुवन्तु नाम न शक्नुवन्तु खल्वित्यर्थः । सम्भावनायां लोट् । तथाहि पलालजालैः व्रीह्यादितृणपूगैः पिहितः संरक्षणार्थं माच्छा-

अपाङ्गमप्याप दृशोर्न रश्मि र्नलस्य भैमीमभिलष्य यावत्।
स्मराशुगः सुभ्रुवि तावदस्यां प्रत्यङ्गमापुङ्खशिखं ममज्ज ॥३॥
यदक्रमं विक्रमशक्तिसाम्या दुपाचरद्द्वावपि पञ्चबाणः।
चक्रे न वैमत्यममुष्य कस्मात् बाणैरनर्द्धार्द्धविभागभाग्भिः ॥४॥
तस्मिन्नलोऽसाविति साऽन्वरज्यत् क्षणं क्षणं को ह स इत्युदास्त।

दितः इक्षु डिम्भ इक्षु प्ररोहः स्वयं स्वत एव प्रकाशं प्रादुर्भावमासादयति इक्ष्वङ्कुरस्येव कामिनोऽप्यति प्रौढरागस्य दुर्विचारो विकार इति भावः। अत्र नलेक्षुडिम्भयो र्बिम्बप्रतिबिम्बभावेन समानधर्मनिर्देशाद्दृष्टान्तालङ्कारः ॥ २ ॥

अपाङ्गमिति। अस्य नलस्य दृशो रश्मिः भैमीमभिलष्य कामयित्वा यावदपाङ्गन्तस्या अपाङ्गदेशमपि नाप भैमीन्तु नापेति किमुवक्तव्यन्तावदेव स्मराशुगेऽस्यां सुभ्रुवि भैम्यां प्रत्यङ्गम् आपुङ्खशिखं समूलायमित्यर्थः। अभिविधावव्ययीभावः। ममज्जेत्यन्योन्यानुरागोक्तिः। अत्र दृष्टिपातस्मरपातयोः कारणयोः पौर्वापर्य्यभङ्गोक्तिरित्यतिशयोक्ति भेदः ॥३॥

पुनरप्यन्योन्यानुरागमेवाह यदिति। पञ्चबाणो विषमेषुः द्वावपि भैमीनलौ अक्रममविद्यमानक्रमं युगपदित्यर्थः। विक्रमेण या शक्तिस्तस्याः साम्यात् साम्यमालम्ब्य ल्यब्लोपे पञ्चमी। उपाचरदुपचचार विषमैः बाणैर्युगपत् उभावप्यवैषम्येण प्रहृतवानिति अमुष्य समोपचरणस्य अर्द्धार्द्धशो विभागभाजो न भवन्तीति तथोक्ताः विषमसङ्ख्यत्वादशक्यसमविभागैरित्यर्थः। बाणैः शरैः कर्तृभिः पञ्चभिरिति भावः। वैमत्यमसम्मतिः कस्मात् कथं न चक्रे कृतं महच्चित्रमिति भावः। अत्र विषमैर्युगपदुभयत्र समप्रहारविरोधस्य स्मरमहिम्ना समाधानाद्विरोधाभासोऽलङ्कारः ॥ ४ ॥

तस्मिन्निति। सा भैमी तस्मिन् पुंसि असौ नल इति हंसादिमुखश्रुतरूपसम्वादान्नल इति मत्वा क्षणं क्षणमल्पकालमत्यन्तसंयोगे द्वितीया। अन्वरज्यदनुरक्ताभवत् एतेन हर्षः सूचितः। पुरे स नलः कोहेत्यसम्भावितमिति

पुरः स्म तस्यां वलतेऽस्य चित्तं दूत्यादनेनाथ पुनर्न्यवर्त्ति ॥५॥
कयाचिदालोक्य नलं ललज्जे कयापि तद्भासि हृदा ममज्जे।
तं कापि मेने स्मरमेव कन्या भेजे मनोभूवशभूयमन्या ॥६॥
कस्त्वं कुतोवेति न जातु शेकु स्तं प्रष्टुमप्यप्रतिभातिभारात्।
उत्तस्थुरभ्युत्थितिवाञ्छयेव निजासनान्नैकरसाः क्षणाक्ष्यः ॥७॥

मत्वेत्यर्थः। इतिनैवोक्ताशत्वादप्रयोगः। क्षणमुदास्त उदासीना स्थिता आसिः कर्त्तरि लङ् तङ्। एतेन विषादः सूचितः,तथा चास्या भावसन्धिरासीदित्यर्थः। अथ नलस्य तस्यां भावसन्धिमाह, अस्य नलस्य चेतः पुरः प्रथमं तस्यां दमयन्त्यां वलतेस्म चचालेति हर्षोक्तिः, पुनः दूत्यादनेन कर्त्रा नलेन न्यवर्त्ति नीच कृत्ये स्थितस्य इदमनुचितमिति वलात्कारेण निवर्त्तितमिति विषादोक्तिः रागस्तु समप्ररूढ एवानयोरिति भावः॥ ५ ॥

अथ तत्सखीनामपि तदा शृङ्गारभावा वभूवुरित्याह कयेति। कयाचित्कन्यया नलमालोक्य ललज्जे लज्जितं भावे लिट्। कयापि तद्भासि तल्लावण्ये हृदा ममज्जे हृदि तन्मयत्वं जातमित्यर्थः। एतेन तत्प्राप्तिसङ्कल्पो गम्यते भावे लिट्। कापि कन्या तं नलं स्मरमेव मेने इति विस्मयोक्तिः अन्या कन्या मनोभुवो वशभूयं वशत्वम्भुवो भाव इति क्यप्। भेजे एतेनौत्सुक्यं गम्यते॥ ६ ॥

कस्त्वमिति। क्षणाक्ष्यः स्त्रियः एकरसा आनन्दरसपरवशाः सत्य इत्यर्थः। अतएवाप्रतिभाया अप्रतिपत्तेरतिभारादति महत्त्वादिति कर्त्तव्यतामोहातिरेकादित्यर्थः। नलं कस्त्वं कुतो वा आगत इति प्रष्टुमपि जातु कदापि न शेकुः। किञ्च अभ्युत्थिति वाञ्छया प्रत्युत्थानेच्छयेवोत्तस्थुः निजासनात्तु नोत्तस्थुः, तस्य तेजो विशेषाद्धठान्मनसैवोत्तस्थुः। तु न वपुषा रसपारवश्यादिति भावः॥ ७ ॥

स्वाच्छन्द्यमिति। भैमी तं नलमालोक्य किमप्यनिर्वाच्यमानन्दपरम्पराणां स्वाच्छन्द्यमुच्छृङ्खलत्वं स्वच्छन्दो निरवग्रह इत्यमरः। निर्झरिणी

स्वाच्छन्द्यमानन्दपरम्पराणां भैमी तमालोक्य किमप्यवाप।
महारयं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम् ॥८॥
तत्रैव मग्ना यदपश्यदग्रे नास्या दृगस्याङ्गमयास्यदन्यत्।
नादास्यदस्यै यदि बुद्धिधारां विच्छिद्य विच्छिद्य चिरान्निमेषः९
दृशापि सालिङ्गितमङ्गमस्य जग्राह नाग्रावगताङ्गहर्षैः।
अङ्गान्तरेऽनन्तरमीक्षिते तु निवृत्य सस्मार न पूर्व्वदृष्टम् ॥१०॥
हित्वैकमस्यापघनं विशन्ती तद्दृष्टिरङ्गान्तरभुक्तिसीमाम्।
चिरं चकारोभयलाभलोभात् स्वभावलोला गतमागतञ्च ॥११॥

गिरिनदी धाराधरकेलिकालं मेघविहारकालं वर्षाकालमासाद्य वारां वारिणाम् आपः स्त्रीभूम्नि वार्वारीत्यमरः। महारय मिवाप ॥ ८ ॥

तत्रेति। अस्या भैम्या दृक् दृष्टिरस्य यत् अङ्गमग्रे प्रथममपश्यत् तत्रैव मग्ना सती अन्यदस्याङ्गं नायास्यत् नागमिष्यत्, यदि निमेषः पक्ष्मपातः चिराद्विच्छिद्य विच्छिद्य विरमय्य बुद्धिधारां ज्ञानपरम्पराम् अस्यै दृशे नादास्यत् न दद्यात् क्रियातिपत्तौ लृङ्। निमेषकृतबुद्धिविच्छेदादङ्गान्तरप्राप्तिः न तु तृष्णयेति भावः ॥ ९ ॥

दृशेति। सा भैमी दृशा आलिङ्गितं प्राप्तमस्य नलस्याङ्ग मङ्गान्तरं अग्रावगताङ्गहर्षैः पूर्व्वगृहीताङ्गजनितानन्दैः तत्पारवश्येनेत्यर्थः। न जग्राह नाज्ञासीत्, अथ कथञ्चिदनन्तरं अङ्गान्तरे ईक्षिते गृहीते तु निवृत्य पूर्व्वदृष्टमङ्गं न सस्मार तस्य तस्य लोकोत्तरत्वादिति भावः ॥ १० ॥

हित्वेति। स्वभावलोला अभिमतविषयलाभे किमु वक्तव्यमिति भावः। तद्दृष्टि भैमी दृष्टिरस्य नलस्य एकमपघन मवयवं अपघनोऽङ्गमित्ययान्तो निपातः। हित्वा अङ्गान्तर भुक्तिसीमा मवयवान्तरदेशं विशन्ती चिरमुभयोः लाभे लोभाद्गर्धनात् उभावुदात्तो नित्यमित्यत्र पृथक् सूत्रकरणादेव नित्यमयजादेशे सिद्धे पुनर्नित्यग्रहणमुभयशब्दस्य वृत्तावप्यय-

निरीक्षितञ्चाङ्गमवीक्षितञ्च दृशा पिवन्ती रभसेन तस्य ।
समानमानन्दमियं दधाना विवेद भेदं न विदर्भसुभ्रूः ॥१२॥
सूक्ष्मे घने नैषधकेशपाशे निपत्य निष्पन्दतरीभवद्भ्याम् ।
तस्यानुवन्धं न विमोच्य गन्तु मपारि तल्लोचनखञ्जनाभ्याम् ॥१३॥
भूलोकभर्त्तुर्मुखपाणिपाद पद्मैः परीरम्भमवाप्य तस्य ।
दमस्वसु र्दृष्टिसरोजराजि श्चिरं न तत्याज सवन्धुवन्धम् ॥१४॥

नर्थमिति कैयटः । गतमागतञ्च चकार उभयोरपि तथा रमणीयत्वादिति भावः ॥ ११ ॥

निरीक्षितमिति । इयं विदर्भसुभ्रू र्वैदर्भी तस्य नलस्य सम्वन्धि निरीक्षितं च अवीक्षितं चाङ्गं दृशा रभसेन पिवन्ती तृष्णया पश्यन्ती समानमानन्दं दधाना भेदं इदं दृष्ट पूर्वमिदमदृष्टपूर्वमिति विवेकं न विवेद उभे अप्यनवतया अपूर्ववदेव प्रीते इत्यर्थः ॥ ११ ॥

सूक्ष्म इति । सूक्ष्मे तनीयसि घने सान्द्रे दृढे च नैषधस्य नलस्य केशपाशे केशकलापे केशापवन्धने च घनं सान्द्रे दृढे ह्यार्थे पाशः पक्ष्यादिवन्धने इति विश्वः । निपत्य निष्पन्दतरीभवद्भ्यां एकत्र विस्मयादन्यत्र यन्त्रलगनाच्च निश्चलीभवद्भ्यान्तस्या भैम्या लोचने एव खञ्जनौ नेत्रोपमान पक्षिणौ खञ्जरीटस्तु खञ्जन इत्यमरः । ताभ्यान्तस्य केशपाशस्य सम्वन्धिनमनुवन्धं तत्र सक्तिं वन्धनञ्च विमोच्य मोचयित्वा गन्तुं नापारि न शेके पारयते र्भावे लुङ् श्लिष्टविशेषणं रूपकम् ॥१२ ॥

भूलोकेति । दमस्वसु र्दृष्टय एव सरोजानि क्रियाभेदाद्बहुत्वं तेषां राजिः भूलोकभर्त्तुस्तस्य नलस्य मुखं च पाणी च पादौ च मुखपाणिपादं प्राण्यङ्गत्वादेकवद्भावः । तदेव पद्मानि तैः सह परीरम्भमाश्लेष मवाप्य समाना वन्धवः सवन्धवः जातिजनपदेत्यादिना समानशब्दस्य स-भावः । तेषु वन्धमासक्तिं चिरं न तत्याज स्निग्धा हि वन्धवः चिरमनाश्लिष्य न मुञ्चन्तीति भावः । पद्मत्व-साजात्यात् सवन्धुत्वम् ॥ १४ ॥

तत्कालमानन्दमयी भवन्ती भवत्तरानिर्व्वचनीयमोहा।
सा मुक्तसंसारिदशारसाभ्यां द्विस्वादमुल्लासमभुङ्क्त सृष्टम् ॥१५॥
दूते नलश्रीभृति भाविभावा कलङ्किनीयं जनितेति नूनम्।
न सं व्यधान्नैषधकायमायं विधिः स्वयं दूतमिमां प्रतीन्द्रम् ॥१६॥
पुण्ये मनः कस्य मुनेरपि स्यात् प्रमाणमास्ते यदघेऽपि धावत्।

तत्कालमिति। तस्मिन् काले तत्कालं अत्यन्तसंयोगे द्वितीया। आनन्दमयी भवन्ती आनन्दात्मिका सती टित्वादुभयत्र ङीप्। तथा च भवत्तरोऽतिशयेन भवन् अनिर्वचनीयो निर्वक्तुमशक्यो मोहः अप्रतिपत्ति र्यस्याः सा आनन्दमग्नेत्यर्थः। सा भैमी विमुक्त संसारिणोर्दशे अवस्थे तयो र्यौ रसौ स्वादौ ताभ्यां द्वौ स्वादौ यस्य तद्विस्वादन्तादृक् स्वादमित्यर्थः। सृष्टं शुद्धमुल्लासं उल्लासतामभुङ्क्त भुक्तवती भुजोऽनवन इति लुङ् तङ्। आनन्दपारवश्यान्नैव किञ्चिद्विवेदेत्यर्थः ॥ १५ ॥

अथ भैमी दूतसम्भाषणं विवक्षु र्नलैकबद्धप्राणाया स्तस्यास्तदमनौचित्यं द्वाभ्यां परिहरति दूत इत्यादि। नलस्य श्रियमिव श्रियं बिभर्त्तीति नलश्रीभृत्तत्सदृश इत्यर्थः निदर्शनालङ्कारः। तस्मिन् दूते भाविभावा भविष्यदनुरागा इयं भैमी कलङ्किनी भग्नव्रता जनिता भविष्यतीति मत्वा जनिधातो र्लुट्। विधिर्विधाता इमां भैमीं प्रति नैषधस्य काय एव माया कपटं यस्य तं नलरूपधारिणं स्वयं साक्षादिन्द्रमेव दूतं न संव्यधात् न कल्पितवान् उक्तदोषपरिहारायैवेन्द्रस्य तादृशीं बुद्धिन्नाजीजनदित्यर्थः। नूनमिति वितर्के, वस्तुविचारत्वान्नायमुत्प्रेक्षालङ्कारः। दूतभावतिरोहितस्यापि तस्य वस्तुनो नलत्वान्नाय कलङ्क इति भावः ॥ १६ ॥ नन्विन्द्रेऽपि समागते तदनभिलाषेनोक्तदोषावकाशः कुत इत्याशङ्क्य चित्तवृत्तीनां क्षणिकत्वान्न तथा अज्ञेयमित्याह।

पुण्य इति। मुनेर्यतेरपि किमुतान्यस्येति भावः। कस्य मनः पुण्ये स्यात् पुण्यएव प्रमाणं न कस्यापीत्यर्थः। कुतः यद्यस्मादघे पापेऽपि धाव-

तच्छिन्ति चित्तं परमेश्वरस्तु भक्तस्य हृष्यत्करुणो रुणद्धि ॥१७॥

सालीकदृष्टे मदनोन्मदिष्णु र्यथाप शालीनतया न मौनः ।
तथैव तथ्येऽपि नले न लेभे मुग्धेषु कः सत्यमृषाविवेकः ॥१८॥

व्यर्थीभवद्भावपिधानयत्ना स्वरेण साथ श्लथगद्गदेन ।
सखीजने साध्वससन्नवाचि स्वयं तमूचे नमदाननेन्दुः ॥ १९ ॥

नत्वा शिरोरत्नरुचापि पाद्यं सम्पाद्यमाचारविदातिथिभ्यः ।

दुच्छृङ्खलं प्रवर्त्तमानं तन्मन एव प्रमाणं निश्चायकमास्ते किन्तु हृष्यत्करुण उद्यत्कृपः परमेश्वर एव तच्छिन्ति पापचिन्तकं भक्तस्य चित्तं रुणद्धि निवारयति तस्माद्विधेर्विलसितमेवैतदिन्द्रचेष्टितमिति भावः ॥ १७ ॥

सम्प्रति धार्ष्ट्यदोषं परिहरति सेति। मदनोन्मदिष्णुः उन्मदशीला अलङ्कृञित्यादिना इष्णुच्। सा भैमी यथा अलीकदृष्टे मिथ्यादृष्टे शालीनतया अधृष्टतया शालीनकौलीने अधृष्टाकार्य्यकारिणीति निपातः। मौनं नाप तथैव तथ्येऽपि नले न लेभे एतत्सत्येऽनुचितमित्याशङ्क्य अर्थान्तरन्यासेन परिहरति। मुग्धेषु मदनोन्मादेषु सत्यमृषा सत्यासत्ययोर्विवेको विवेचना नास्तीत्यर्थः। अतएव न धार्ष्ट्यदोषोऽपीति भावः ॥ १८ ॥

व्यर्थीभवदिति। अथ द्विखादभागानन्तरं व्यर्थीभवन् भावपिधाने आकारगोपने यत्नो यस्याः सा गोप्तुमशक्येत्यर्थः। सा भैमी सखीजने साध्वसेन सन्नवाचि कुण्ठितमुखे कुण्ठिते सति अन्यथा सखीमुखेनैव ब्रूयादिति भावः। नमदाननेन्दुर्लज्जा नम्रमुखी सती श्लथगद्गदेन स्खलितेन स्वरेण तं नलं स्वयमूचे कर्त्तरि लिड् ब्रुवोवचिः ॥ १९॥

अथास्यातिथ्यं चिकीर्षु स्त्रिभिस्तत्कर्त्तव्यतामाह नत्वेत्यादि। आचारविदा गृहस्थेन अतिथिभ्यो नत्वा पदयोर्निपत्य शिरोरत्नस्य रुचा कान्त्यापि पाद्यं पादार्थजलं पादाभ्यां चेति यत् प्रत्ययः। सम्पाद्यं किञ्च प्रियाक्षराल्या प्रियवाक्यकदम्बकेन या रसधारा आनन्दलहरी तयापि वैधा विधिप्राप्तमधुपर्केण या तृप्तिः सा विधेया सम्पाद्या मुख्यानुकल्पोऽप्यनुष्ठेय इति भावः ॥ २० ॥

प्रियाक्षरालीरसधारयापि वैधी विधेया मधुपर्कतृप्तिः ॥ २० ॥
स्वात्मापि शीलेन तृणं विधेयं देया विहायासनभूर्निजापि।
आनन्दवाष्पैरपि कल्प्यमम्भः पृच्छा विधेया मधुभिर्वचोभिः॥२१॥
पद्योपहारेऽनुपपन्नतापि सम्भाव्यतेऽपां त्वरयापराधः।
तत्कर्त्तुमर्हाञ्जलिसज्जनेन स्वसंभृतिप्राञ्जलतापि तावत् ॥ २२ ॥
पुरा परित्यज्य मयात्यसर्ज्जि स्वमासनं तत्किमिति क्षणं न।
अनर्हमप्येतदलङ्क्रियेत प्रयातुमीहा यदि चान्यतोऽपि ॥ २३ ॥

स्वात्मापीति। किञ्च शीलेनाचारप्रमाणेन स्वात्मा स्वदेहोऽपि आत्माजीवधृतौ देह इति वैजयन्ती। तृणं विधेयं तृणवदर्पणीयम्, निजापि आसनभूरुपवेशनस्थानं विहाय स्वयं तत उत्थाय देया, आनन्दवाष्पैरम्भः पादोदकं कल्प्यं, मधुभिर्मधुप्रायैर्वचोभिः पृच्छा कुशलप्रश्नः प्रश्नोऽनुयोगः पृच्छा चेत्यमरः। भिदादित्वादङ् प्रत्ययः। विधेया कर्त्तव्या तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता। अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैरिति स्मरणात्। तृणाद्यसम्भवे तत्स्थाने स्वशरीरादिकमपि देयम् अशक्तस्यानुकल्पेनापि शास्त्रार्थसिद्धेरिति भावः ॥ २१ ॥

पद्येति। पद्योपहारे पादोपचारप्रस्तावे त्वरया वेगेनापामुदकानां अनुपपन्नता असन्निहितत्वमपराधः अपचारः सम्भाव्यते अपराधत्वेन ऊह्यत इत्यर्थः। तत्तस्मादञ्जलिसज्जनेनाञ्जलिबन्धेन तत्पूर्वकत्वमित्यर्थः। स्वस्यात्मनः संभृत्या सम्भरणेन सन्निधानेन प्राञ्जलता आर्जवम्विधेयमिति यावत् सापि तावत्कर्त्तुमर्हा आतिथ्यक्रियासामर्थ्यौ विनयाचरणेनापि तच्चित्तोपार्जनं कर्त्तव्यम् अन्यथा प्रत्यवायादिति भावः ॥ २२ ॥

पुरेति। मया स्वमात्मीयम् आसनं पुरा पूर्वं त्वद्दर्शनक्षण एव परित्यज्य तत उत्थायेत्यर्थः। अत्यसर्जि अदायि तदेतदासनमनर्हमत्यश्लाघ्यमपि यदि वा अन्यतः कुतः प्रयातुमीहा वा तथापि किमिति क्षणं नालङ्क्रियेत भक्तजनानुकम्पया क्षणमात्रमत्रोपवेष्टव्यमिति भावः ॥ २३ ॥

निवेद्यतां हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम् ।
पदौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥२४॥
अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य ।
त्वदाप्तसङ्केततया कृतार्था अव्यापि नानेन जनेन संज्ञा ॥२५॥
तीर्णः किमर्णोनिधिरेव नैष सुरक्षितेऽभूदिह यत्प्रवेशः ।
फलं किमेतस्य तु साहसस्य न तावदद्यापि विनिश्चिनोमि ॥२६॥

निवेद्यतामिति । शिरीषकोषस्य म्रदिमाभिमानं मार्दवगर्वं समापयन्तौ निर्वर्त्तयन्तौ इमौ पदौ पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः । तुच्छदयं निष्कृपन्ते मनः कियद्दूरं कियच्चिरमित्यर्थः । प्रयासे निधित्सते निधातुमिच्छति दधातेरसन्नन्ताल्लटि तङ् सनि मीमेत्यादिना इसादेशः अत्र लोपोऽभ्यासस्येति अभ्यासलोपः । निवेद्यतां ज्ञाप्यतां वाक्यार्थः कर्म हन्तेत्यनुकम्पायाम् ॥ २४ ॥

अनायीति । अद्य त्वया कतमो देशो वसन्तमुक्तस्य वनस्य दशामनायि नीतो रिक्तीकृत इत्यर्थः । नयते र्द्विकर्म्मकत्वात् प्रधाने कर्मणि लुङ् । किञ्च त्वदाप्तसङ्केततया त्वयि लब्धसङ्गतिकतया कृतार्था सफला संज्ञा नामानेन जनेन आत्मना अव्यापि नः श्रोतुमर्हापि न किमिति काकुः । कस्य अचोदयत् कुतः आगतः किञ्च ते नामधेयं तन्निवेदनेनाप्यनुग्राह्योऽयं जन इति भावः ॥ २५ ॥

तीर्ण इति । सुरक्षिते साधुगुप्ते अत्यन्तदुःप्रवेश इत्यर्थः । इहान्तःपुरे प्रवेशोऽभूदिति यत् दुःप्रवेशः अर्णोनिधिरर्णव एव तीर्णो न किम्? अर्णवतः प्रवेशः न किमित्यर्थः । किन्तु एतस्य साहसस्य फलं किम् अद्यापि चिरं विमृश्यापीत्यर्थः । तावन्न विनिश्चिनोमि निश्चेतुं न शक्नोमीत्यर्थः । अत्रान्तःपुरप्रवेशार्णवतरणलक्षणवाक्यार्थयोर्निर्दिष्टसामानाधिकरण्यान्यथाऽनुपपत्त्या तत्तुल्यमिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धो वाक्यार्थनिष्ठनिदर्शनाभेदः ॥ २६ ॥

तव प्रवेशे सुकृतानि हेतुं मन्ये मदक्ष्णोरपि तावदत्र।
न लक्षितोरक्षिभटैर्यदाभ्यां पीतोऽसि तन्वा जितपुष्पधन्वा॥२७॥
यथाकृतिः काचन ते यथा वा दौवारिकान्धङ्करणी च शक्तिः।
रुच्योरुचीभिर्जितकाञ्चनीभि स्त्वयासि पीयुषभुजां सनाभिः॥२८
न मन्मथस्त्वं स हि नास्तिमूर्त्तिर्न वाश्विनेयः स हि नाद्वितीयः।

तवेति। अथ वा अत्रान्तःपुरे तव प्रवेशे मदक्ष्णोः सुकृतान्यपि तावत् यावदन्योऽपि हेतुः श्रोतव्य इति भावः। हेतुं कारणं मन्ये कुतः यद्यस्मात् तन्वा मूर्त्त्या जितपुष्पधन्वा जितकामः त्वं रक्षिभटैरक्षकयोधैर्नलक्षितः अलक्षितः सन् नञर्थस्य नशब्दस्य सुप् सुपेति समासः। आभ्यां मदक्षिभ्याम्पीतोऽतितृष्णया दृष्टोऽसि सुकृतविशेषं विना कथमीदृगभूतरूपसाक्षात्कारलाभ इति भावः॥ २७॥

यथेति। यथा यतस्ते तव आकृतिर्मूर्त्तिः काचन अमानुषीत्यर्थः। यथा वा यतश्च द्वारि नियुक्ता दौवारिकाः तत्र नियुक्त इति ठक् द्वारादीनां चेत्यैजागमः। तेषाम् अन्धीक्रियन्ते अनयेति अन्धङ्करणी दृष्टिप्रतिबन्धका आढ्यसुभगेत्यादिना कृत् करणार्थे ख्युन्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः ख्युन्नन्तत्वात् ङीप्। शक्तिश्च काचनेत्यनुषज्यते, किञ्च जितकाञ्चनीभिर्जितहरिद्राभिः निशाख्या काञ्चनी पीता हरिद्रावरवर्णिनीत्यमरः। समासान्तविधेरनित्यत्वान्नद्यृतश्चेति कबभावः टाबन्तपाठे जितकनकाभिरित्यर्थः। रुचीभिर्दीप्तिभिः कृदिकारादक्तिनो वा वक्तव्यः, रोचत इति रुच्यो देदीप्यमानोऽसि राजसूयेत्यादिना कर्त्तरि क्यबन्तो निपातः। तथा ततो मूर्त्तिप्रभावतेजोभिः पीयूषभुजां देवानां समाना नाभिर्मूलं यस्य स समाननाभिर्बन्धुरसि कश्चिद्दिव्यपुरुष उत्प्रेक्ष इत्यर्थः। ज्योतिर्जनपदेत्यादिना समानशब्दस्य सभावः॥ २८॥

नेति। त्वं मन्मथः कन्दर्पोऽपिनेति शेषः। अस्तिमूर्त्तिर्विद्यमानमूर्त्तिर्न भवतीति नास्ति मूर्त्तिः अनङ्गः। सुबधिकारो अस्तिक्षीरादिवचनमिति बहुव्रीहौ न समासः। आश्विनेयोऽश्विनीपुत्रः नहि यस्मात् सोऽ-

चिह्नैः किमन्यैरथवा तवेयं श्रीरेव ताभ्यामधिका विशेषः ॥२९॥
आलोकतृप्तीकृतलोक ! यस्त्वामसूत पीयूषमयूखमेतम्।
कः स्पर्द्धितुं धावति साधु सार्द्ध मुदन्वता नन्वयमन्ववायः ॥३०॥
भूयोऽपि बाला नलसुन्दरं तं मत्वाऽमरं रक्षिजनाक्षिबन्धात् ।
आतिथ्यचाटून्यपदिश्य तत्स्थां श्रियं प्रियस्यास्तुत वस्तुतःसा ॥३१

द्वितीय एकाकी न अथ वा अन्यैश्चिह्नैरभिज्ञानैः किं ? किन्तु तवेयं श्रीः शोभैव ताभ्यां द्वाभ्यामधिकाऽसाधारणी विशेषो व्यावर्त्तकधर्म्मः । तस्मादन्यः कोऽपि लोकोत्तरस्त्वमिति तत्त्वं किन्तु नलश्चेदसि धन्या भवामीति भावः ॥ २९ ॥

आलोकेति । आलोकेन दर्शनेन तत्कर्मकेण उद्योतेन च आलोकौ दर्शनोद्योतावित्यमरः । तृप्तीकृतलोक ! सन्तर्पित लोकेति सम्बुद्धिः । एवं त्वामेव पीयूषमयूखं चन्द्रमिति रूपकं असूताजनयत् अतएवोदन्वता उदधिना सार्द्धम् उदन्वानुदधिश्चेति निपातनात् साधुः । स तु साधु सम्यक् स्पर्द्धितुं धावति ननु अयमन्ववायः कः उदधितुल्यस्ते वंशश्च क इति वक्तव्य इत्यर्थः । रूपकसङ्कीर्णोऽयमुपमालङ्कारः नन्विति सम्बोधने ॥ ३० ॥

इत्थं नलमेव मत्वैतावदुक्त्वा पुनर्नल सदृशमन्यं मत्वाऽन्यथा व्याहरतीत्याह । भूयोऽपीति । भूयः पुनरपि सा बाला भैमी तं पुरुषं रक्षिजनस्याक्षिबन्धादस्वीकरणादमानुषत्वाद्धेतो र्नलं सुन्दरममरं कञ्चिद्देवं मत्वा आतिथ्यान्यतिथ्यर्थानि अतिथेर्ञ्यः, चाटूनि प्रियवाक्यानि अपदिश्य व्याजीकृत्य तस्मिन् पुरुषे तिष्ठतीति तत्स्थां तन्निष्ठां सुप्स्य इति कः, प्रियस्य नलस्य श्रियं शोभां वस्तुतः परमार्थतो दृष्ट्वैव अस्तुत स्तुतवती स्तौते र्लुङि तङ् । अत्रान्यधर्मस्यान्य सम्बन्धासम्भवेन प्रियमिति सादृश्याक्षेपान्निदर्शनाभेदः । न चैवं परपुरुषगुणस्तुतिप्रसङ्गः वस्तुतस्तथात्वेऽपि तस्यास्तथा विमानाभावादिति ॥ ३१ ॥

वाग्जन्मवैफल्यमसह्यशल्यं गुणाधिके वस्तुनि मौनिता चेत्।
खलत्वमल्पीयसि जल्पितेऽपि तदस्तु, वन्दिभ्रमभूमितैव ॥३२॥
कन्दर्प एवेदमविन्दत त्वां पुण्येन मन्ये पुनरन्यजन्म।
चण्डीशचण्डत्रिहुताशकुण्डे जुहाव यन्मन्दिरमिन्द्रियाणाम् ॥३३॥
शोभायशोभिर्जितशैवशैलं करोषि लज्जागुरुमौलिमैलम्।
दस्रौ हठात् श्रीहरणादुदस्रौ कन्दर्पमप्युज्झितरूपदर्पम् ॥३४॥

अथ सर्वथापि स्तुतिकरणकारणमाह वागिति। गुणै रद्भुतैः अधिके स्तुत्यर्ह इत्यर्थः। वस्तुनि विषये मौनिता तूष्णीम्भावश्चेत् असह्यशल्यं दुःसहशल्यप्रायं वाग्जन्मनो वाकृत्त्या वैफल्यं स्यात्। अथैतत्परिहारायाह अल्पीयसि जल्पिते अत्यल्पवचनेऽपि भावे क्तः। खलत्वं दौर्जन्यमसहिष्णुत्वं स्यादित्यर्थः। तत्तस्माद्वन्दी स्तुतिपाठकोऽयमिति भ्रमस्य भूमिता विषयित्वमेवास्तु वन्दिनः स्तुतिपाठका इत्यमरः। अवन्दि वन्दित्वतः श्रोतृदोषेण वाग्वैफल्यं खलत्वे एव श्रोतृदोषः। प्रत्युत सुगुणस्तुतिस्तस्य गुण एवेति तदङ्गीकरणमिति भावः ॥ ३२ ॥

अथ स्तौति कन्दर्प इत्यादि। कन्दर्प एव पुण्येन सुकृतवशेन इदन्त्वद्रूपस्य यज्जन्म जन्मान्तरं पुनरविन्दतेति मन्ये इत्युत्प्रेक्षा। अन्यथा कथमीदृग्रूपमिति भावः। किं तत्पुण्यं तदाह चण्डीशस्य हरस्य चण्डं क्रूरमक्षि तृतीयनेत्रं तदेव हुताशस्तस्य कुण्डमग्न्यायतनं तस्मिन्निन्द्रियाणां मन्दिरमिन्द्रियाणां आश्रयः शरीरमिति यावत् यज्जुहाव तेन पुण्येनेति पूर्वेण सम्बन्धः ॥ ३३ ॥

शोभेति। किञ्च हठात् प्रसह्य श्रियः सौन्दर्यस्य हरणाद्धेतोः शोभायशोभिः सौन्दर्यकीर्त्तिभिः जितशैव शैलं निर्जितकैलासमैलम् इलाया अपत्यं पुरूरवसन्तस्येदमित्यण्प्रत्यये पर्य्यवसानाद्विशेषलाभः। लज्जया गुरुमौलिन्दुर्भरशिरसङ्करोषि दस्रावश्विनौ सुतावुदस्रा उद्गतवाष्पौ करोषि रोदयसीत्यर्थः। कन्दर्पमप्युज्झितरूपदर्पं करोषि कायकान्त्या सर्व्वानतिशय्य खेलसीत्यर्थः ॥ ३४ ॥

अवैमि हंसावलयो वलक्षास्त्वत्कान्तिकीर्त्तेश्चपलाः पुलाकाः ।
उड्डीय युक्तं पतिताः स्रवन्तीवेशन्तपूरं परितः प्लवन्ते ॥३५॥
भवत्पदाङ्गुष्ठमपि श्रिता श्रीर्ध्रुवं न लब्धा कुसुमायुधेन ।
जेतुस्तमेतत् खलु चिह्नमस्मिन्नर्द्धेन्दुरास्ते नखवेशधारि ॥३६॥
राजा द्विजानामनुमासभिन्नः पूर्णां तनूकृत्य तनुं तपोभिः ।
कुहूषु दृश्येतरतां किमेत्य सायुज्यमाप्नोति भवन्मुखस्य ॥ ३७ ॥

अवैमीति । वलक्षा धवलाः पिकाक्षा इति क्वचित्पाठः । हंसावलयस्तव कान्तिकीर्त्तेः सौन्दर्य्यकीर्त्तेश्चपला स्खलिताः पुलाकास्तुच्छधान्यानीत्यवैमि जानामीत्युत्प्रेक्षा । स्यात् पुलाकस्तुच्छधान्ये वलक्षो धवलोऽर्जुन इति चामरः । अतएवोड्डीयोत्पत्य पतिताः स्रवन्तीनां निम्नगानां वेशन्तानां पल्वलानां च पूरं प्रवाहं परितः समन्ततः । अभितःपरितइत्यादिना द्वितीया प्लवन्ते इति युक्तं पुलाकानां जलोपरि प्लवनमुचितमेवेत्यर्थः ॥ ३५ ॥

भवदिति । कुसुमायुधेन कामेन भवतः पदाङ्गुष्ठं श्रिता श्रीरपि न लब्धा न प्राप्ता ध्रुवं ? । भवच्छ्रिता श्रीस्तु दूरापास्तेति भावः । तथाहि तं कामं जेतुः स्मरहरस्य तृन्नन्तत्वात् न लोकेत्यादिना प्रतिषेधः तज्जेतुरिति समासपाठे तृजन्तेन षष्ठी समासः साधुश्चायमेव पाठः । तृन्नर्थस्य अलोपस्यानुपयोगात् स्मरजेतुरिति देशान्तरपाठस्त्वयुक्त एव प्रस्तुतार्थस्य सर्वनाम्नोपादेयस्य स्वशब्दोपादाने पौनरुक्त्यदोषादिति हस्तेन निर्दिशन्नाह । एतदर्द्धेन्दुरूपं चिह्नं अस्मिन्नङ्गुष्ठे नखकैतवेनास्ते खल्वित्यपह्नवभेदः । अर्द्धेन्दुधारस्य चिह्नधारणादिदमपि कामजेता यद्वा तच्चिह्नधारणात् तस्यापि स्मरस्य जेतेत्युभयथापि कथमेतच्छ्रीलाभः कामदेवस्येति भावः ॥ ३६ ॥

राजेति । द्विजानां राजा चन्द्रो ब्राह्मणोत्तमश्च प्रतिमासभिन्नोऽन्यः सन् अर्द्धेन्दुरन्यथैकस्य प्रतिकुहूषु सुखसायुज्याभावादिति भावः । पूर्णां राकास्थिति भावः । तनुं शरीरं तपोभिः प्रत्यहं देवताभ्यः कला-

कृत्वा दृशौ ते बहुवर्णचित्रे किं कृष्णसारस्य तयोर्मृगस्य।
अदूरजाग्रद्विदरप्रणाली रेखामयच्छद्विधिरर्द्धचन्द्रम् ॥ ३८ ॥
मुग्धः स मोहात् सुभगान्न देहाद्ददद्भवद्भ्रूरचनाय चापम्।
भ्रूभङ्गजेयस्तव यन्मनोभूरनेन रूपेण यदातदाभूत् ॥ ३९ ॥
मृगस्य नेत्रद्वितयं त्वदास्ये विधौ विधुत्वानुमितस्य दृश्यम्।

समर्पणरूपैरिति भावः। तनूकृत्य कुहूषु अमावास्यासु दृश्येतरतामेत्य भवन्मुखस्य सायुज्यमैक्यं प्राप्नोति किमित्युत्प्रेक्षा, यथा कश्चिद्ब्राह्मणः तीव्रेण तपसा ब्रह्मसायुज्यमाप्नोति तद्वदित्यर्थः अन्यथा कथं कुहूषु नश्यत इति भावः ॥ २७ ॥

कृत्वेति। विधिर्विधाता बहुभिर्वर्णैः सितासितरूपैश्चित्रे सुदृश्ये तल्लक्षणत्वादिति भावः। ते तव दृशौ कृत्वा निर्माय कृष्णसारस्य मृगस्य सम्बन्धिन्योस्तयोर्दृशोरदूरे समीपे जाग्रत्या विदरप्रणाल्याः स्फुटनमार्गस्य नेत्रप्रान्तवर्त्त्यर्द्धचन्द्ररेखाविशेषस्य छलात् विदरः स्फुटनं भिदेत्यमरः। अर्द्धचन्द्रं गलहस्तिकामयच्छत् तत्समकक्षानर्हत्वादिति भावः। अर्द्धचन्द्रस्तु चन्द्रके गलहस्ते बाणभेदेऽपीति विश्वः। छलादयच्छदिति सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ३८ ॥

मुग्ध इति। भवद्भ्रुवो रचनाय निर्माणाय चापमुपादानत्वेन ददत् ब्रह्मण इति शेषः। नाभ्यस्ताच्छतुरिति नुम् प्रतिषेधः। स मनोभूर्मोहादविमृश्यकारित्वलक्षणात्प्रवृत्तिनिमित्तान्मुग्धोमुग्ध शब्दवाच्योऽभूत् सुभगात् सुन्दराद्देहात्तु न। पूर्वं कायः सौन्दर्य्यमुग्ध इत्युच्यते सम्प्रति मौढ्यादित्यर्थः। मुग्धः सुन्दरमूढयोरिति विश्वः। कुतः यद्यस्मात् तवानेनेति हस्तेन निर्देशः रूपेण सौन्दर्य्येण करणेन यदातदा सर्वदेत्यर्थः। भ्रूभङ्गेन भ्रूक्षेपमात्रेण जेयो जेतुं शक्योऽभूत्। कामस्त्वां रूपेण जेतुमुक्तोऽपि चापेनापि न शक्नुयात् सम्प्रति चापदानादुभयथापि भ्रष्टोऽभूदिति भावः॥३९

मृगस्येति। त्वदास्ये विधौ तन्मुखचन्द्रे दृश्यं दृग्गोचरीभूतं नेत्र

तस्यैव च त्वत्कचपाशवेशः पुच्छः स्फुरच्चामरगुच्छ एषः ॥४०॥

आस्तामनङ्गीकरणाद्भवेन दृश्यः स्मरो नेति पुराणवाणी ।
तवैव देहं श्रितया श्रियेति नवस्तु वस्तु प्रतिभाति वादः ॥४१॥

त्वया जगत्युञ्छितकान्तिसारे यदिन्दुनाऽशीलि शिलोञ्छवृत्तिः ।
आरोपि तन्माणवकोऽपि मौलौ स द्वन्द्वराज्येऽपि महेश्वरेण ॥४२॥

द्वितयं विधुत्वेन चन्द्रत्वेनानुमितस्य चन्द्रस्य मृगंविनाभावादिति भावः । मृगस्यैव त्वदीयस्यैवेत्यर्थः । किञ्च एषः तव कचपाशवेशः तस्यैव मृगस्य पुच्छे वालधौ स्फुरच्चामरगुच्छ इत्युत्प्रेक्षा अन्यथा कथमनयोरीदृशी शोभेति भावः ॥ ४० ॥

आस्तामिति । स्मरो भवेनेश्वरेणानङ्गीकरणादशरीरिकरणाद्धेतोर्दृश्यो नेति पुराणवाणी पुरातनवादस्तावदास्तान्तवैव देहं श्रितयाद्वितीया श्रितातीतेत्यादिना समासः । श्रिया सौन्दर्य्येण न दृश्य इति नवो नूतनोवादस्तु वस्तु परमार्थः प्रतिभाति तदैतिह्यमात्रमिदन्तु प्रत्यक्षमित्यर्थः । अतः पराजयलज्जानिमित्तमस्यादृश्यत्वमित्युत्प्रेक्षा ॥ ४१ ॥

त्वयेति । त्वया जगति उञ्छितकान्तिसारे गृहीतलावण्यसर्वस्वे सति इन्दुना शिलोञ्छ इव वृत्तिः जीविका उञ्छो धान्यकणादानं कणिकाद्यार्जनं शिलमिति यादवः । अशीलि शीलितेति यत् तस्माद्धेतोः मनोरपत्यं पुमान्मानवः तस्यापत्यमित्यण् प्रत्यये णत्वम् अपत्ये कुत्सिते गूढमनोरौत्सर्गिकः स्मृतः । नकारस्य तु मूर्द्धन्यस्तेन सिध्यति माणवः । तेन सोऽसौ माणवकः । बालोऽपि स इन्दुर्महेश्वरेण महादेवेन महाराजेन च मौलौ शिरसि तथा यज्वराज्ये द्विजराजत्वेऽप्यारोपि आरोपित इत्युत्प्रेक्षा, प्रकृष्टधर्मः कस्मै फलाय न भवतीति भावः । त्रैलोक्याह्लादक चन्द्रोऽपि तल्लावण्यलेश एवेति तात्पर्य्यार्थः ॥ ४२ ॥

आदेहेति । ईश्वरेण शम्भुना कुसुमायुधस्य कामस्य देहदाहादारभ्य आदेहदेहं मर्य्यादायामव्ययीभावः । जगल्लोकं सौन्दर्य्यकथा दरिद्रं सौन्दर्य्य-

आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्य्यकथादरिद्रम्।
त्वदङ्गशिल्पात्पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ॥४३॥
मही कृतार्था यदि मानवोऽसि जितं दिवा यद्यमरेषु कोऽपि।
कुलं त्वयालङ्कृतमौरगञ्चेन्नाधोऽपि कस्योपरि नागलोकः ॥४४॥
सेयं न धत्तेऽनुपपत्तिमुच्चैर्मच्चित्तवृत्तिस्त्वयि चिन्त्यमाने।
ममौ स भद्रं चुलुके समुद्रस्त्वयात्तगाम्भीर्य्यमहत्त्वमुद्रः ॥४५॥

वार्त्ताशून्यं विधाय चिरेण त्वदङ्गस्य शिल्पान्निर्माणात् विश्वं पुनरन्वकम्पि अनुकम्पितं त्वया पुनः सौन्दर्य्यभरितं कृतमिति जान इत्युत्प्रेक्षा तव मूर्त्तिमतः कामात्कोभेद इति भावः ॥ ४३ ॥

महीति। मनोरयं मानवो मनुष्योऽसि यदि तस्येदमित्यण्प्रत्ययः। मही कृतार्था अमरेषु कोऽप्यसि यदि दिवा द्युलोकेन जितं सर्वोत्कर्षेण स्थितं नपुंसके भावे क्तः। त्वया औरगं कुलं नागकुलमलङ्कृतं चेत् नागोऽसि चेदित्यर्थः। अधः सर्वथा स्थितोऽपि नागलोकः कस्य लोकस्योपरि न। सर्वस्याप्यु परिवर्त्तेत इत्यर्थः। उपर्युपरिष्टादिति निपातः ॥ ४४ ॥

सेयमिति। त्वयि चिन्त्यमाने स्वरूपतो गुणतश्च विभाव्यमाने सति सेयं विभावयन्ती मच्चित्तवृत्तिः उच्चैर्महतो मनुपपत्तिं न धत्ते समुद्रस्यागस्त्यचुलुके अनुपपन्नताबुद्धिं करोतीत्यर्थः। तत्र हेतुमुत्प्रेक्षते समुद्रः त्वया आत्ता गृहीता महत्त्वगाम्भीर्य्ये इव मुद्रा चिह्नं यस्य अतएव भद्रं चुलुके मुनिमुष्टिगर्भे ममौ गर्भे युक्त इत्यर्थः। अन्यथा कथं तथा महतो गम्भीरस्य तस्य मुनि चुलुकितेति भावः। अत्र मानहेतोरात्तेत्यादिविशेषणगत्या निर्देशात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः तत्सकीर्णेयमुत्प्रेक्षा भद्रमिति व्यञ्जकप्रयोगाद्वाच्या ॥ ४५ ॥

संसारसिन्धावनुविम्बमत्र जागर्त्ति जाने तव वैरसेनिः ।
विम्बानुविम्बौ हि विहाय धातुर्न जातु दृष्टातिसरूपसृष्टिः॥४६॥
इयत्कृतं केन महीजगत्या महो महीयः सुकृतं जनेन ।
पादौ यमुद्दिश्य तवापि पद्यारजःसु पद्मस्रजमारभेते ॥ ४७ ॥
ब्रवीति मे किं किमियं न जाने सन्देहदोलामवलम्ब्य सम्वित् ।
कस्यापि धन्यस्य गृहातिथिस्त्वमलीकसम्भावनयाथ वालम् ॥४८॥
प्राप्तैव तावत् तव रूपसृष्टिं निपीय दृष्टिर्जनुषः फलं मे ।

संसारेति। किञ्चात्रास्मिन् संसारसिन्धौ वैरसेनिः नलस्तवानुविम्बं जागर्त्ति स्फुरतीति जाने तर्कयामीत्यर्थः। कुतः हि यस्माद्बिम्बानुविम्बौ विहाय वर्जयित्वा धातुः अतिसरूपसृष्टिः जातु कदाचिदपि न दृष्टा अन्यथा कथमेतदत्यन्तसादृश्यमित्यर्थः। भवान् नल एवेति प्रतिभातीति भावः ॥ ४६ ॥

इयदिति। महीजगत्यां भूलोके केन जनेन इयदेव तावन्महीयो महत्तरं सुकृतम् कृतं अहो यं जनमुद्दिश्य तवापि पदौ पद्यारजःसु मार्गधूलिषु पद्मस्रजं पद्ममण्डितम् आरभेते कुर्वाते अहो यं जनमुद्दिश्यागतस्त्वमसौ धन्यो वक्तव्य इति तात्पर्य्यम् ॥ ४७ ॥

ब्रवीतीति। इयं मे सम्वित् बुद्धिः सन्देहमेव दोलामस्मदुद्देशेन वा अन्योद्देशेन वा आगतस्त्वमित्येवं रूपाम् अवलम्ब्य आरुह्य किं किं ब्रवीति किमपि तर्कयतीत्यर्थः। अतो न जाने न निश्चिनोमि अथ वा अलीकसम्भावनया मिथ्यावितर्केणालन्तत्साध्यं नास्तीत्यर्थः। अतएव गम्यमानसाधनत्वापेक्षया करणत्वात् तृतीया इति न्यासद्योतकारः, किन्तु कस्य धन्यस्य मान्यस्य वा गृहातिथिरसि त्वमेवानुकम्पस्वेत्यर्थः ॥४८॥

प्राप्तैवेति। तावन्मे दृष्टिः तव रूपेणाकारेण सृष्टमास्वादितम् अ-

अपि श्रुती नामृतमाद्रियेतां तयोः प्रसादीकुरुषे गिरश्चेत्॥४९
इत्थं मधूत्थं रसमुद्गिरन्ती तदोष्ठबन्धूकधनुर्विसृष्टा।
कर्णात् प्रसूनाशुगपञ्चवाणी वाणीमिषेणास्य मनोविवेश ॥५०॥
अमज्जदामज्जमसौ सुधासु प्रियं प्रियाया वदनात् निपीय।
द्विषन्मुखेऽपि स्वदते स्तुतिर्या यन्मिष्टता नेष्टमुखे प्रमेया ॥५१॥

मृतं निपीय जनुषो जन्मनः फलं प्राप्यैव अथ श्रुती श्रोत्रे अप्यमृतन्नाद्रियेतान्न पिबेतां किमिति काकुः पास्यत एवेत्यर्थः चेद् यदि तयोः श्रोत्रयोः सम्बन्धि गिरं वाक्यं प्रसादीकुरुषे किमपि वदसीत्यर्थः। सर्वथा प्रश्नदानं उचितं एवेत्यर्थः ॥ ४९ ॥

इत्थमिति। इत्थं मधुनः क्षौद्रादुत्थमुत्पन्नम् आतश्चोपसर्ग इति कप्रत्ययः। रसं तत्सदृशं रसमुद्गिरन्ती स्रवन्ती तस्या ओष्ठौ एव बन्धूकं बन्धुजीवकुसुमं बन्धूको बन्धुजीव इत्यमरः। तदेव धनुः तेन विसृष्टा त्यक्ता प्रसूनाशुगस्य कुसुमेषोः पञ्चानां वाणानां समाहारः पञ्चवाणी तद्धितार्थेत्यादिना समाहारे द्विगुः। अकारान्तोत्तरपदत्वात् स्त्रियान्द्विगोरिति ङीप्। वाणीमिषेण वाग्व्याजेनास्य कर्णात् कर्णं प्रविश्य ल्यब्लोपे पञ्चमी, अस्य नलस्य मनोविवेश कर्णद्वारा प्रविवेशेत्यर्थः ॥ ५० ॥

अमज्जदिति। असौ नलः प्रियाया वदनात् प्रियं प्रियवाक्यं निपीय सुधासु आमज्जं मज्जानं धातुमभिव्याप्येत्यर्थः। अभिविधावव्ययीभावः अनश्चेति समासान्तष्टच्। अमज्जदमृतास्वादमन्वभूदित्यर्थः। तथा हि द्विषन्मुखेऽपि तन्मुखतश्चेत्यर्थः या स्तुतिः स्वदते स्वादुभवति इष्टमुखे प्रियजनमुखे तु तस्याः स्तुतेर्मिष्टता स्वादुता प्रमेया न परिच्छेद्या किमपि तु बहुलैवेति काकुः ? इष्टमुखस्तुतं द्विषन्मुखस्तुत्यपेक्षया कैमुत्येन स्वादुत्वोत्कर्षप्रतिपादनादर्थापत्त्यलङ्कारः तस्य वाक्यभूतस्य आमज्जं सुधामज्जनहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमिति सङ्करः ॥ ५१ ॥

पौरस्त्यशैलं जनतोपनीतां गृह्णन् यथाह्नः पतिरर्घ्यपूजाम् ।
तथातिथेयीमथ सम्प्रतीच्छन्नस्या वयस्यासनमाससाद ॥ ५२ ॥
अयोधि तद्धैर्य्यमनोभवाभ्यां तामेव भूमीमवलम्ब्य भैमीम् ।
आह स्म यत्र स्मरचापमन्तश्छिन्नं भ्रुवौ तज्जयभङ्गवार्त्ताम्॥५३
अथ स्मराज्ञामवधीर्य्य धैर्य्या दूचे स तद्वागुपवीणितोऽपि ।
विवेकधाराशतधौतमन्तः सतां न कामः कलुषीकरोति ॥५४॥

पौरस्त्येति । अथ नलः अह्नाम्पतिः सूर्य्यः अहरादिना पत्यादिषु परव्यानमिति रेफादेशः । यथा जनानां समूहो जनता ग्रामजनबन्धुसहायेभ्यस्तल् । तया उपनीतां समर्पिताम् अर्घार्थजलमर्घ्यं पादार्घाभ्याञ्चेति यत्प्रत्यय. । तदेव पूजा तां गृह्णन् स्वीकुर्वन् पुरोभवः पौरस्त्यः दक्षिणादिभ्यस्त्यन् पुरस्कृतं शैलमुदयाद्रिमासीददिति इति शेषः । तथा अतिथिषु साधुमातिथेयीं पूजां पथ्यतिथिवसति स्वपतेर्ढञ् । सम्प्रतीच्छन् प्रतिगृह्णन् अस्य भैम्या वयसा तुल्या वयस्या सखीनौवयोधर्मेत्यादिना यत्प्रत्ययः । तस्या आसनमाससाद नतु भैम्याः दूत्यावस्थायामनौचित्यादिति भावः । उपमालङ्कारः ॥ ५२ ॥

अयोधीति । तस्य नलस्य धैर्य्यमनोभवाभ्यां कर्तृभ्यान्तां भैमीमेव रणभूमिमिति व्यस्तरूपकम् अवलम्ब्य प्राप्य अयोधि भावे लुङ् । यत्र यद्धे युद्धभूमौ वा अन्तर्मध्ये छिन्नं भ्रुवौ भैमीभ्रुवावेव स्मरचापं पूर्ववद्रूपकन्तयोर्धैर्य्यमनोभवयोर्जयभङ्गवार्त्तामाहस्म स्मरचापभङ्गात् स एव भग्न इति भावः । कथञ्चित्कामं निरुध्य धैर्य्यमेवावलम्बितवानित्यर्थः ॥ ५३ ॥

अथेति । अथ स नलस्तस्या भैम्या वाचा उपवीणितो वीणया उपगीतोऽपि तद्वाग्वीणाकृष्टचित्तोऽपीत्यर्थः । सत्यापपाशेत्यादिना वीणाशब्दादुपगानेऽपि च कर्मणि क्तः । धैर्य्याद्धैर्य्यं विधाय ल्यब्लोपे पञ्चमी स्मर-

हरित्पतीनां सदसः प्रतीहि त्वदीयमेवातिथिमागतं माम्।
वहन्तमन्तर्गुरुणादरेण प्राणानिव स्वःप्रभुवाचिकानि ॥ ५५ ॥
विरम्यतां भूतवती सपर्य्या निविश्यतामासनमुज्झितं किम्।
या दूतता नः फलिनी विधेया सैवातिथेयी पृथुरुद्भविनी ॥५६॥

स्वाज्ञामवधीर्य्य अवज्ञाय ऊचे उवाच तथा हि विवेकानां धाराभिर्धौतं क्षालितं सतां विदुषामन्तरन्तःकरणं कामो न कलुषीकरोति न शक्नोतीत्यर्थः। अत्र पूर्वार्द्धे स्मरधैर्य्ययोर्धावितचित्तस्य धैर्य्येनियमनात्परिसंख्यालङ्कारः। एकस्य वस्तुनो भावादनेकत्रैकदा यदा। एकत्र नियमस्यादि परिसंख्या निगद्यत इति लक्षणात्। तस्योत्तरार्द्धे सामान्येन न समर्थनात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास इति सङ्करः ॥ ५४ ॥

हरिदिति। मां गुरुणा आदरेण अतिप्रयत्नेन स्वःप्रभूणामिन्द्रादीनां व्याहृतार्थवाचो वाचिकानि सन्देशवाक्यानि सन्देशवाग्वाचिकं स्यादित्यमरः। वाचो व्याहृतार्थायामिति ठक्। प्राणानिव तदीयान्येवेत्यर्थः। अन्तरात्मनि वहन्तं हरित्पतीनामिन्द्रादिदिक्पालानां सदस आस्थानादागतं त्वदीयमेवातिथिं प्रतीहि त्वामेवोद्दिश्यागतं विद्धीत्यर्थः ॥ ५५ ॥

विरम्यतामिति। सपर्य्या पूजा भूतवती भूतैव भवतः वत्प्रत्यये ङीप्। विरम्यतामवसीयतां भावे लोट्, निविश्यतां उपविश्यतां किञ्चिमर्थमासन मुज्झितं त्यक्तं फलिनी फलवती फलबर्हाभ्यामिनन्वक्तव्यः। विधेया कर्त्तव्या नोऽस्माकं या दूतता दूत्यं सैव पृथुर्महती आतिथेयी अतिथिपूजा उद्भविनी भाविनी ॥ ५६ ॥

कल्याणीति। हे कल्याणि! भद्रे! नवाङ्गकानि कोमलान्यङ्गानि कल्यानि पटूनि कच्चित्तमां? कच्चिदिति प्रश्नार्थमव्ययं कच्चित्कामप्रवेदन इत्यमरः। तस्मादतिशायिने तमबिष्ठनाविति तमप् किमेत्तिङव्ययघा-

कल्याणि! कल्यानि तवाङ्गकानि कच्चित्तमां चित्तमनाविलं ते।
अलं विलम्बेन गिरं मदीया माकर्णयाकर्णतटायताक्षि! ॥५७॥

कौमारमारभ्य गणा गुणानां हरन्ति ते दिक्षु धृताधिपत्यान्।
सुराधिराजं सलिलाधिपञ्च हुताशनञ्चार्य्यमनन्दनञ्च ॥५८॥

चरच्चिरं शैशवयौवनीय द्वैराज्यभाजि त्वयि खेदमेति।
तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुण्ठितधैर्य्यवित्तम् ॥५९॥

दिना आम्प्रत्ययः। किञ्च ते चित्तमनाविलमकलुषं कच्चित्तमाम्? आकर्णतटात्कर्णतटपर्य्यन्तं मर्य्यादायामव्ययीभावः ततः सुप्सुपेति समासे आकर्णतटायते अक्षिणी यस्याः सेति बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् षिद्गौरादिभ्यश्चेति ङीप्। अम्बार्थनद्योर्ह्रस्वः, हे आकर्णतटायताक्षि! विलम्बेनालं मदीयाङ्गिरमाकर्ण्य॥ ५७॥

कौमारमिति। हे भैमि! कौमारन्तव कुमारवय आरभ्य प्राणभृज्जातिवयो वचनादादिभ्योऽञ्। ते तव गुणानाङ्गणाः दिक्षु धृताधिपत्यान् दिशामधीशान् सुरराजं इन्द्रं सलिलाधिपं वरुणञ्च हुताशनं अग्निञ्च अर्यमनन्दनं सूर्य्यतनयं यमञ्च हरन्ति॥ ५८॥

चरदिति। शैशवयौवनयोरिदं शैशवयौवनीयं वृद्धाच्छः तच्च तत् द्वैराज्यं द्वयोराज्ञोः न ब्राह्मणादित्वात् ष्यङ् प्रत्ययः। तद्भाजि यौवनशैशवाख्यराज्यद्वयाक्रान्तायामित्यर्थः। एतेनास्या वयःसन्धिरुक्तः तस्यान्त्वयि चरद्वर्त्तमानन्तेषाम् इन्द्रादीनां चित्तं कर्त्तृ रुचः कान्तेश्चौर तरेण विरहि तेजोहारिणेत्यर्थः। पञ्चेषुणा लुण्ठितधैर्य्यवित्तम् अपहृतधैर्य्यधनं सत् खेदमेति द्वैराज्ये प्रजानाञ्चोरबाधा जायत इति भावः। अत्र पञ्चेषु चोरेण तेषां धैर्य्यवित्तं हृतमिति रूपकं तद्धेतुकत्वात् खेदस्य वाक्यार्थहेतुकं काव्यलिङ्गमिति सङ्करः॥ ५९॥

तेषामिति। तेषां इन्द्रादीनां हृदि सा प्रसिद्धा त्वदाशा केवलं त्वय्यतितृष्णा एव आशा दिक् च आशादिगतितृष्णयोरिति वैजयन्ती।

तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम्।
आशास्तु नासाद्य तनूरुदाराः पूर्व्वादयः पूर्व्ववदात्मदाराः।६०।
अनेन सार्द्धं तव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत्।
प्रेमापि तन्वि! त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ६१

अजस्रं विलसति किल विजृम्भते खलु। आत्मदाराः स्वभार्याः पूर्वादयः प्राच्यादयः आशा दिशस्तु उदारा दक्षिणा महतीश्च तनूरासाद्य पूर्ववत्हृदि न विलसति उदारो महति ख्याते दक्षिणे दानशौण्डके वैजयन्ती। अपूर्वनायिकानुरक्ते हृदि पूर्वनायिकाश्चतुरा अपि न लगन्ति तथा महीयो दिशः परमाणौ हृदि न लगतीति च भावः। त्वदाशापरवशास्ते स्वकीयं प्राच्याद्याशापरिपालनाधिकारमपि विस्मृत्य ताः स्थिता इति तात्पर्यार्थः। अतोभयोराशयोरेकत्र हृदि प्राप्तौ एकस्या भैम्याशाया एव तन्नियमनात्परिसंख्या। यद्यप्येकस्य उभयत्र प्राप्ता वेकत्र नियमनं परिसंख्येत्यालङ्कारिकाणां लक्षणं तथापि मीमांसकैरुभयोरेकत्र प्राप्तावेकस्यैव नियमनमित्यस्याप्यङ्गीकाराच्चमत्कारादित्वाविशेषाच्च अपलक्षणत्वेनोभयाङ्गीकारेण विरोधः अथ वा एकस्य हृदयस्य आशाद्वयप्राप्तावेकत्रैव नियमनात्सापि लभ्यत इति सर्वथा परिसंख्यानमस्तिसा श्लिष्टशब्दोपात्तयोराशयोरभेदाध्यवसाया च्छ्लेषाभित्ति लाभे रूपातिशयोक्तिरुत्थापितेति सङ्करः॥ ६०॥

अनेनेति। हे भैमि! वासवस्य त्वय्यसीमा निरवधिः प्रेमा अनुरागोऽपि तवानेन यौवनेन सार्द्धम् अच्छिदुरोऽविच्छिन्नः सन् विदिभिदिच्छिदेः कुरच्, परां कोटिमुत्कर्षमध्यरोहत् तथा सुमनःशरस्य पुष्पेषोश्चापे गुणो मौर्व्यपि परामुत्तमां कोटिमटनिमध्यरोहत् अत्युत्कर्षाश्रयः कोटिरित्यमरः। अत्र प्रेमगुणयोः प्रकृतयोरेव विशेषणसाम्येनौपम्योपगमात् केवलप्रकृतविषया तुल्ययोगिता तयोरेव परां कोटिमिति श्लेषभित्तिकाभेदाध्यवसायरूपादतिशयोक्तिमूला यौवनेन सार्द्धमिति सहार्थसम्बन्धोक्तेः सहोक्तिरित्यनयोः सङ्करः॥ ६१॥

प्राचीं प्रयाते विरहं दधत्ते तापाच्च रूपाच्च शशाङ्कशङ्की ।
परापराधैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ॥६२॥
त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता सकामः खलु कामवस्थाम् ६३
पिकस्य वाङ्मात्रकृताद्व्यलीकान्न स प्रभुर्नन्दति नन्दनेऽपि ।
बालस्य चूडाशशिनोऽपराधान्नाराधनं शीलति शूलिनोऽपि ६४

प्राचीमिति । इन्द्रस्ते विरहन्दधत् दधानः सन् अत एव प्राचीन्दिशं प्रयाते प्राप्ते भावमाधिकरणे तापाच्चन्द्रस्यापि विरहितापकारकत्वादिति भावः । रूपाच्च उदयकाले उभयोरपि रक्तत्वादिति भावः । शशाङ्कशङ्की चन्द्र इति भ्रान्त्या परापराधैश्चन्द्रदोषैस्तापादिभिः हेतुभिः रुषारुणं लोचनवृन्दं निदधाति क्रोधाद्दहन्निव अक्षिसहस्रेणापी क्षत इत्यर्थः । क्रोधान्धस्य कुतः सापराधानपराधविवेक इति भावः । अत्र कविसम्मतसादृश्येन भानौ शशाङ्कभ्रमाद्भ्रान्तिमदलङ्कारः ॥ ६२ ॥

त्रिनेत्रेति । त्रिनेत्र एव मात्रः मात्रं कार्त्स्न्येऽव धारणे इत्यमरः । तेन तन्मात्रेण रुषा यत्कृतम् अनङ्गत्वमिति भावः । तदेव यः कामोऽद्यापि न संवृणोति नाच्छादयितुं शक्नोतीत्यर्थः । स कामोऽद्य सहस्रनेत्रे इन्द्रे रुष्टे सति कामवस्थां दशाङ्गन्ता गमिष्यति गमेर्लुट् । न वेद न जाने खलु ? वाक्यार्थः कर्म, विदोलटो वेति मिपा णलादेशः । त्रिनेत्रमात्रान्नष्टः कामः कथं नेष्यतीत्यर्थः कामस्त्वत्कृते निःशङ्कमिन्द्रन्दुःखाकरोतीति तात्पर्य्यार्थः ॥ ६३ ॥

पिकस्येति । सः प्रभुरिन्द्रः पिकस्य कोकिलस्य वाङ्मात्रकृतात् न तु कामवत् कायकृतादिति भावः । व्यलीकादप्रियाच्चन्दने नन्दनाख्ये आनन्दकरेऽपीति गम्यते, वने न नन्दति कि सुतान्यत्रेति भावः । बालस्य चूडाशशिनोऽपराधात् शूलिनः शिवस्याप्याराधनं पूजां न शीलति नाचरति शीलसमाधाविति भौवादिकाल्लट् । इन्द्रो विरहपारवश्या

तमोमयीकृत्य दिशः परागैः स्मरेषवः शक्रदृशां सृजन्ति ।
कुहूगिरं चञ्चुपुटं द्विजस्य राकारजन्यामपि सत्यवाचम् ॥६५॥
शरैः प्रसूनैस्तुदतः स्मरस्य स्मर्त्तुं स किं नाशनिना करोति ।
अभेद्यमस्य.हह ! वर्म न स्यादनङ्गता चेद्गिरिशप्रसादः ॥६६॥

टावश्यकं किमपि कर्म न करोतीत्यर्थः। अत्रानन्दशिवाराधनसम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ६४ ॥

तमोमयीति। स्मरेषवः कुसुमेषुवाणाः परागैः रजोभिः करणैर्दिशः शक्रदृशां सम्बन्धे तमोमयीकृत्य तत्प्रकृतवचने मयडन्तादभूततद्भावे च्विः अतएवातिशयोक्तिः। कुहूः कुह्वाख्या गीः कूजितं यस्य अन्यत्र कुहूरमावस्येति गीर्वचनं यस्य कुहूः स्यात्कोकिलालाप नष्टेन्दुकलयोरपीति विश्वः। तस्य द्विजस्याण्डजस्य कोकिलस्येत्यर्थः। अन्यत्र विप्रस्य दन्त विप्राण्डजा द्विजा इत्यमरः। चञ्चुपुटं मुखं राकारजन्यां पूर्णिमायामपि सत्यवाचं दिशन्त्यादिशन्ति कथयन्तीत्यर्थः। राकायामपि कुह्वामिव समर्थयन्तीत्यर्थः। अत्र श्लिष्टोपात्तयोर्द्वयोरपि कुह्वोर्दुर्जययोश्चाभेदाध्यवसाय मुक्त्वा कुहूत्व सत्यवादित्वस्य विरुद्धस्यापि पूर्वोक्तातिशयोक्तिहेतुना सिद्धेर्वाक्यार्थहेतुकं काव्यलिङ्गं सश्लेषातिशयोक्तिविरोधै रङ्गैः सङ्कीर्य्यते तेन शक्रस्य राकायां भ्रान्तिमदलङ्कारो व्यज्यत इत्यूह्यम् ॥ ६५ ॥

शरैरिति। स इन्द्रः प्रसूनैरेव शरैस्तुदत आत्मानं विध्यतः स्मरस्य स्मरमित्यर्थः। अधिगर्थेत्यादिना कर्मणि शेषे वा षष्ठी। अशनिना वज्रेण स्मर्तुं न करोति किं स्मृतिमात्रशेषं कुर्य्यादेव। किन्तु तस्य स्मरस्य गिरिशस्य प्रसादः प्रसादलब्धमित्यर्थः। कार्य्यकारणयोरभेदोपचारः सेत्नुष्ठश्चैतत् अनङ्गता अभेद्यं वर्मेति रूपकं न स्याच्चेत् अहहेत्यद्भुते खेदे वा साङ्गत्वे पुनर्वज्रलक्ष्यलाभादेनं हन्यादेवेत्यर्थः। तथा पीडयत्येनमनङ्गोऽपीति भावः ॥ ६६ ॥

धृताधृतेस्तस्य भवद्वियोगान्नानार्द्रशय्यारचनाय लूनैः ।
अप्यन्यदारिद्र्यहराः प्रवालैर्जातादरिद्रास्तरवोऽमराणाम् ॥६७
रवैर्गुणास्फालभवैः स्मरस्य स्वर्णाथकर्णौ बधिरावभूताम् ।
गुरोः शृणोतु स्मरमोहनिद्राप्रबोधदक्षाणि किमक्षराणि ॥६८॥
अनङ्गतापप्रशमाय तस्य कदर्थ्यमाना मुकुलान्मृणालम्।
मधौ मधौ नाकनदीनलिन्यो वरं वहन्तां शिशिरेऽनुरागम् ६९

धृतेति। अन्येषां दारिद्र्यं हरन्तीत्यन्यदारिद्र्यहरा अपि हरतेरनुद्यमनेऽच्। अमराणान्तरवः कल्पद्रुमा भवत्या वियोगात् सर्वनाम्नस्तद्वृत्तिमात्रे पूर्वपदस्य पुंवद्भावो वक्तव्यः। धृताऽधृतिररतिर्येन तस्येन्द्रस्य नानाविधानामार्द्रशय्यानां शिशिरशयनानां रचनाय लूनैः प्रवालैर्दरिद्रा रिक्ता जाताः तावत् तथापि न त्वं सुलभेति भावः। सुरद्रुमाणां प्रवाल दारिद्र्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ६७ ॥

रवैरिति। स्वर्णाथस्य स्वर्गनाथस्येन्द्रस्य पूर्वपदात् संज्ञायामग इति णत्वम्। कर्णौ स्मरस्य गुणास्फालभवैः ज्याघट्टनप्रभवैः रवैः वधिरावभूतां एवं बाधिर्ये सति गुरोर्बृहस्पतेः सकाशात् स्मरमोह एव निद्रा तस्याः प्रबोधे दक्षाण्यक्षराणि विवेकज्ञानोपदेशवाक्यानि शृणोतु शृणुयात् किं? न शृणोत्येवेत्यर्थः। त्वद्विरहमोहान्धमेनं बृहस्पतिरपि बोधयितुं न प्रभवतीति भावः ॥ ६८ ॥

अनङ्गेति। नाकनद्याः स्वर्नद्या नलिन्यो मधौ मधौ वसन्ते तस्येन्द्रस्यानङ्गतापप्रशमाय मुकुलान्मृणालं मृणालपर्यन्तं अभिविधावव्ययीभावः। कदर्थाः कुत्सितवस्तूनि कोः तत्पुरुषेऽचीति कोः कदादेशः। कदर्थीक्रियमाणाः कदर्थ्यमानाः उत्पीड्यमानाः सत्य इत्यर्थः। तत्करोत्यन्ताल्लटः शानजादेशः। शिशिरेऽनुरागं वरं वरमिति मनाक् प्रिये वहन्तां वासन्तिकोपचाराणां तासां तत्र पूर्वोक्तोपद्रवभयादिति भावः। वहेः स्वरितत्वादात्मनेपदम् ॥ ६९ ॥

दमस्वसः ! सेयमुपैति तृष्णा जिष्णोर्जगत्यग्रिमलेख्यलक्ष्मीम्।
इष्टां यदब्धिस्तव नाम इष्टि त्रिभागोलोभार्त्तिमसौ बिभर्त्ति ७०
अग्न्याहितानित्यमुपासते या देदीप्यमानां तनुमष्टमूर्त्तेः।
आशापतिस्ते दमयन्ति! सोऽपि स्मरेण दासीभवितुं न्यदेशि ७१
त्वद्गोचरस्तं खलु पञ्चबाणः करोति सन्ताप्य तथा विनीतम्।
स्वयं यथास्वादिततप्तभूयः परं न सन्तापयिता स भूयः ॥७२॥

दमेति। हे दमस्वसः ! दमयन्ति ! जिष्णोः शक्रस्य जिष्णु र्लेखर्षभः शक्र इत्यमरः। सेयं तृष्णा आशा जगति अग्रेभवमग्रिमं अग्रपश्चादिमन् वक्तव्यः। तच्च तल्लेख्यं च तस्य लक्ष्मीं अपगणयतामुपैति अपूर्वत्वादिति भावः। कुतः यद्यस्मादिष्टामब्धिराकरोऽसाविन्द्रस्तव इष्टे स्त्रिभाग स्तृतीयांशः सङ्ख्याशब्दस्य वृत्तिविषये पुरणार्थत्वाङ्गीकारात्। तत्र लोभेन तृष्णाया आर्त्तिमाधिम्बिभर्त्ति नाम धत्ते खलु। तल्लेशलाभ एव स्वइष्टिसम्पत्तेः फलमित्यभिमानस्तस्येति भावः ॥ ७० ॥

अथ भगवतोऽग्नेरवस्थां वर्णयति। अग्नीति, अग्नयाहिता आहिताग्नयः वाहिताग्न्यादिष्विति निष्ठयापरनिपातः। यान्देदीप्यमानां जाज्वल्यमानां दीप्यमानां दीप्यते र्यङन्तात् कर्त्तरि लट् शानजादेशः, अष्टमूर्त्तेरीश्वरस्य तनुं नित्यमुपासते हे दमयन्ति ! आशापतिर्दिक्पतिः सोऽग्निरपि स्मरेण कर्त्रा तव दासीभवितुं न्यदेशि दासीभवेत्यादिष्ट इत्यर्थः ॥ ७१ ॥

त्वदेति। पञ्चबाणः कामस्त्वद्गोचरस्त्वामेव लक्षीकृत्य इत्यर्थः। तमग्निं सन्ताप्य तथा तेन प्रकारेण विनीतं शिक्षितङ्करोति खलु। यथा येन प्रकारेण स्वयं स्वादितं अनुभूतं तप्तभूय अनुभूत तप्तत्वं येन स सन् भुवो भावे इति भावे क्यप्। भूयः पुनः परमन्यं न सन्तापयिता न सन्तापयिष्यति स्वयमनुभूत दुःखस्यात्म दृष्टान्तेन परं तथा न दुःखाकरोतीति भावः ॥ ७२ ॥

अदाहि यस्तेन दशार्द्धवाणः पुरा पुरारेर्नयनालयेन ।
स निर्दहंस्त्वं भवदर्चिवासी न वैरशुद्धेरधुनाधमर्णः ।७३॥
सोमाय कुप्यन्निव विप्रयुक्तः स सोममाचामति हूयमानम् ।
नामापि जागर्त्ति हि यत्र शत्रोस्तेजस्विनस्तं कतमे सहन्ते ७४
शरैरजस्रं कुसुमायुधस्य कदर्थ्यमानस्तव कारणाय ।
अभ्यर्चयद्भिर्विनिवेद्यमानाद्प्येष मन्ये कुसुमाद्बिभेति ॥७५॥

अदाहीति। यो दशार्द्धवाणः पञ्चेषुः पुरा पुरारे र्नयनालयेन नयनाश्रयेन नेत्राग्निना अदाहि दग्धः स पञ्चेषु रधुना भवदर्चिवासी-त्वन्नेत्रनिष्ठः सन् तमग्निं निर्दहन् वैरशुद्धे वैंरनिर्यातनाधमर्णः ऋणी न अनृणोऽभूदित्यर्थः। यो यथा यस्यापकरोति स तस्य तथैव प्रतिकृत्य निर्विण्णोभवतीति भावः ॥ ७३ ॥

सोमायेति। विप्रयुक्त स्त्वद्वियुक्तोऽग्निः सोमाय चन्द्राय कुप्यन्निव जिघांसन्निवेत्यर्थः। क्रुध द्रुहेत्यादिना सम्प्रदानत्वाच्चतुर्थी, हूयमानं यज्ञे-दीयमानं सोमं सोमरसमाचामति पिबति तथा हि यत्र पुरुषे शत्रोर्नामापि जागर्त्ति प्रकाशते तं शत्रुनामधारिणं तेजस्विनः पराव-मानासहिष्णवः अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपीति लक्षणात् कतमे सहन्ते न केऽपीत्यर्थः। तेजस्विनां शत्रुनामाप्यसह्यमिति भावः। सामान्येन विशेष समर्थन रूपार्थान्तर न्यासः ॥ ७४ ॥

शरैरिति। हे तरुणि ! तव कारणाय त्वदर्थे त्वत्कृते तादर्थ्ये चतुर्थी, कुसुमायुधस्य शरैः कुसुमवाणै रजस्रं कदर्थ्यमानः पीड्यमान एवाग्निः अभ्यर्चयद्भिः पूजयद्भि र्विनिवेद्यमानात् समर्च्यमाणादपि कुसुमाद्बिभेति मन्ये उत्प्रेक्षा ॥ ७५ ॥

स्मरेन्धनेति। तेनाग्निना स्मरेन्धने कामाग्निदाह्ये वक्षसि दत्ता ताप-शान्तये न्यस्ता शैवलवल्लिभिश्चिता कर्बुरा सम्वर्त्तिका नवदलं सम्वर्त्तिका

स्मरेन्धने वक्षसि तेन दत्ता सम्वर्त्तिका शैवलवल्लिचिता ।
चकास्ति चेतोभवपावकस्य धूमाविला कीलपरम्परेव ॥७६॥
पुत्री सुहृद्येन सरोरुहाणां यत्प्रेयसी चन्दनवासिता दिक् ।
धैर्यं विभुः सोऽपि तवैव हेतोः स्मरप्रतापज्वलने जुहाव ॥७७॥
तं दह्यमानैरपि मन्मथैधं हस्तैरुपास्ते मलयः प्रवालैः ।
कष्टेऽप्यसौ नोज्झति तस्य सेवां सदा यदाशामवलम्बते यः ॥७८॥
स्मरस्य कीर्त्त्येव सितीकृतानि तद्दोःप्रतापैरिव तापितानि ।
अङ्गानि धत्ते स भवद्वियोगात् पाण्डूनि चण्डज्वरजर्जराणि ॥९

नवदलम्बीज कोशो वराटक इत्यमरः । चेतोभवपावकस्य कामाग्नेः धूमाविला कीलपरम्परा ज्वालावलिरिव चकास्ति दीप्यते वह्नेर्द्वयोर्ज्वालकीलावित्यमरः ॥ ७६ ॥

अथ यमस्य विरहावस्थां वर्णयति पुत्रीति । येन सरोरुहाणां सुहृत्-सूर्यः पुत्री पुत्रवान् एतेनाभिजन्य उक्तः, चन्दनैर्मलयजैः द्रुमैर्वासिता-सुरभिता दिक् दक्षिणा यत्प्रेयसी यस्य प्रियतमा एतेन भोगसम्पत्तिरुक्ता, स विभुर्वैवस्वतोऽपि तवैव हेतोस्त्वन्निमित्तादेव षष्ठीहेतुप्रयोग इति षष्ठी, धैर्यं स्मरस्य प्रतापज्वलने प्रतापाग्नौ जुहाव परवशोऽभूत इत्यर्थः ॥ ७७ ॥

तमिति । मलयो मलयाद्रिः मन्मथैधं कामाग्नीन्धनं काष्ठन्दार्विन्धनन्त्वेध इत्यमरः । तं यमं दह्यमानैस्तदङ्गसङ्गात्म्लवाणैरपि प्रवालैः पल्लवैरेव हस्तैरुपास्ते तस्य शीतोपचारमाचरतीति भावः । युक्तञ्चैतदित्याह, यो जनः सदा यस्याशां देशम् अनुरागञ्चावलम्बते असौ जनः कष्टे आपद्यपि तस्य सेवां नोज्झति न त्यजति यो यदुपजीवी तस्य तत्सेवा विपत्स्वपि कर्त्तुमुचितेत्यर्थः अर्थान्तरन्यासः ॥ ७८ ॥

स्मरस्येति । स यमो भवद्वियोगात्पाण्डूनि चण्डेन तीव्रेण ज्वरेण जर्जराणि अतएव क्रमात् स्मरस्य कीर्त्त्या सितीकृतानि धवलीकृतानीव

यस्तन्वि ! भर्त्ता घुसृणेन सायं दिशः समालम्भनकौतुकिन्याः ।
तदा स्वचेतः प्रजिघाय तुभ्यं यदा गतो नैति निवृत्य पान्थः ॥८०॥
तथा न तापाय पयोनिधीनामश्वामुखोत्थः क्षुधितः शिखावान्
निजः पतिः सम्प्रति वारिपोऽपि यथा हृदिस्थः स्मरतापदुःस्थः ८१

स्मरस्य दोःप्रतापैस्तापितानीव स्थितानीत्युभयत्राप्युत्प्रेक्षा अङ्गानि धत्ते अत्र यथासङ्ख्योत्प्रेक्षयोः सङ्करः ॥ ७९ ॥

अथ वरुणस्य विरहं वर्णयति । य इत्यादि, हे तन्वि ! कृशाङ्गि ! यो देवः सायं घुसृणेन कुङ्कुमेन समालम्भने अनुलेपने कौतुकिन्याः कुतूहलवत्याः आतपारुण्यात् कुङ्कुमलिप्तवद्भासमानाया इत्यर्थः । दिशः प्रतीच्या भर्त्ता प्रातः प्राच्या अपि तथात्वाद्व्यावृत्त्यर्थं सायं ग्रहणं । स वरुणः तदा तस्मिन् काले तुभ्यं स्वचेतः प्रजिघाय प्रहितवान् हेरचङीति कुत्वम् । यदा यस्मिन् काले गतः प्रयातः नित्यं पन्थानं गच्छतीति पान्थो निवृत्य नैति नायाति अपुनरावृत्तिलिङ्गान्नूनं चितास्वात्योः प्रहितवानित्युत्प्रेक्षा नन्दन्ति न निवर्त्तन्ते चितास्वात्योर्गता नरा इति वचनात् । अत एवात्र कवेः पान्थशब्दप्रयोगः पथोऽण्नित्यमिति, नित्याध्वगमने विधिशब्दात् णप्रत्ययपान्थादेशयोर्विधानात्, अतएव नित्यग्रहणं प्रत्ययार्थविशेषणमिति काशिकायां त्वच्चिन्त्यं त्वय्येव नन्दवनं विहरति न निवर्त्तत इति तात्पर्यम् ॥ ८० ॥

तथेति । तथा क्षुधितः बुभुक्षितः वसतिक्षुधोरिति निष्ठाया इडागमः । अश्वामुखोत्थः शिखावान् वडवाग्निः पयोनिधीनान्तापाय न भवति यथा स्मरदाहेन दुःखं तिष्ठतीति दुःस्थोऽस्वस्थो निजः पतिर्वरुणः हृदि तिष्ठतीति हृदिस्थः स्मर्यमाण एव वारीणि पातीति वारिरक्षकोऽपि सन् तापाय भवति तथा साक्षात् स्थितोऽपि वडवाऽग्नीन् तापयतीत्यर्थः ईदृक् तापासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ८१ ॥

यत्प्रत्युत त्वन्मृदुबाहुवल्ली स्मृतिस्रजं गुम्फति दुर्विनीता।
तताविधत्तेऽधिकमेव तापं तेन श्रिता शैत्यगुणा मृणाली ॥८२॥
न्यस्तं ततस्तेन मृणालदण्डखण्डं बभासे हृदि तापभाजि।
तच्चित्तमग्नैर्मदनस्य बाणैः क्षतं शतच्छिद्रमिव क्षणेन ॥८३॥
इति त्रिलोकीतिलकेषु तेषु मनोभुवोविक्रमकामचारः।
अमोघमस्त्रं भवतीमवाप्य मदान्धतानर्गलचापकस्य ॥८४॥

यदिति। तेन वरुणेन श्रिता सन्तापशान्तये सेविता शैत्यमेव गुणो यस्याः सा शैत्यगुणा शीतलैकस्वभावेत्यर्थः। तथापि दुर्विनीता प्रतिकूलचारिणी मृणाली बालमृणालं अल्पत्वविवक्षायां स्त्रीलिङ्गता स्त्रीस्यात्काचिन्मृणाल्यादिविवक्षापचये स्त्रियामित्यमरः। जातेरस्त्रीविषयादयोपधादिति ङीप्। यद्यस्मात्तव मृदुबाहुवल्ल्याविव तयोः स्मृतीनां स्रजं मालाङ्गुम्फति रचयति अजस्रं स्मारयतीत्यर्थः। ततस्त्वद्बाहुस्मारकत्वाद्धेतोः प्रत्युत वैपरीत्येन प्रत्युते युक्तवैपरीत्य इति गणव्याख्यानम्। अधिकं तापमेव विधत्ते वितन्यतेऽस्य ज्वरावस्थोक्ता अत्र मृणाल्याः कविसम्मतसादृश्याद्बाहुवल्लीस्मारकत्वोक्तेः स्मरणालङ्कारः तदुपजीवनेन तस्यास्तापशान्तिहेतोस्तद्विपरीततापकार्योत्पत्तिकथनाद्विरुद्धकार्य्य लक्षणो विषमभेद इत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ८२ ॥

न्यस्तमिति। ततस्तदनन्तरमपि तेन वरुणेन तापभाजि हृदये न्यस्तं मृणालदण्डस्य बिसकाण्डस्य खण्डं शकलन्तस्य वरुणस्य चित्ते मग्नैर्मदनस्य बाणैः क्षणेन शतं छिद्राणि यस्य तत्तथा क्षतमिव प्रतिकूलाचरणरोषाच्छतधा प्रणीतमिव बभासे उत्प्रेक्षा ॥ ८३ ॥

इतीति। हे भैमि! भवतीमेवामोघमस्त्रम् अवाप्य मदान्धतया अनर्गलचापलस्य उत्शृङ्खलचेष्टितस्य मनोभुवः कामस्य त्रिलोकीतिलकेषु त्रिभुवनभूषणेषु तेष्विन्द्रादिषु विषये इतीत्थं विक्रमस्य कामचारः स्वाच्छन्द्यप्रवृत्तिर्वर्त्तत इति शेषः ॥ ८४ ॥

सारोत्थधारेव सुधारसस्य स्वयम्वरः श्वोभविता तवेति ।
सन्तर्पयन्ती दमयन्ति! तेषां श्रुतिः श्रुती नाकसदामयासीत्॥८५
समं सपत्नीभवदुःखतीक्ष्णैः स्वदारनासापथिकैर्मरुद्भिः ।
अनङ्गशौर्य्यानलतापदुःस्थै रथ प्रतस्थे हरितां मरुद्भिः॥८६॥
अपास्तपाथेयसुधोपयोगैस्त्वद्बुद्धिनेव स्वमनोरथेन ।
क्षुधञ्च निर्व्वापयता तृषञ्च स्वादीयसाध्वा गमितः सुखं तैः॥८७

सार इति। अथानन्तरसमये हे दमयन्ति! तव स्वयंवरः श्वः परेऽह्नि भविता भविष्यतीति श्रुतिर्वार्त्ता श्रुतीः श्रोत्रे तथाम्नाये वार्त्तायां श्रोत्रकर्म्मणीति विश्वः। सुधारसस्य सारोत्था सारभूता धारेव सन्तर्पयन्ती नाकजुषामिन्द्रादीनां श्रुती श्रोत्रे अयासीत् प्राप्तसारोत्थेति पाठे सारप्रभवेत्यर्थः॥ ८५॥

सममिति। अथ स्वयम्वरवार्त्ताश्रवणानन्तरमनङ्गस्य शौर्य्यानलेन प्रतापाग्निना यस्तापस्तेन दुःस्थैरस्वस्थैर्हरितान्दिशां सम्बन्धिभिर्मरुद्भिर्देवैरिन्द्रादिभिः स्वस्वामिभावसम्बन्धे षष्ठी समासः। समानः पतिर्यस्या सा सपत्नी नित्यं सापत्न्यादिष्विति ङीप् नकारश्च। तद्भवेन दुःखेन तीक्ष्णैर्दुःसहैः स्वदाराणां नासासु पन्थानं गच्छन्तीति पथिकैः पान्थैर्मरुद्भिः समं वायुभिः सह मरुतौ पवनामरावित्यमरः। प्रतस्थे प्रस्थितं भावे लिट्। शच्यादिभिरिन्द्रकलत्रै रागाभिसापत्न्यदुःखाद्दीर्घमुष्णञ्च निःश्वसितमित्यर्थः। अत्र पवनामरप्रस्थानयोः कार्य्यकारणभावात्तदङ्गलक्षणातिशयोक्त्युत्थापितः सहोक्त्यलङ्कारः सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः। कल्पितौपम्यपर्य्यन्ता सा सहोक्तिरिहोच्यत इति लक्षणात्॥८६॥

अपास्तेति। पथि साधु पाथेयं पाथेयं सम्बलं स्मृतमिति यादवः। पथ्यतिथिवसति सपतेर्ढञ्। तच्चासौ सुधा च तस्या उपयोगोऽपास्तो यैरिन्द्रादिभिः क्षुधं बुभुक्षां तृषं तृष्णां पिपासां निर्वापयता शमता स्वादीयसा अमृतादपि स्वादुतरेण त्वद्बुद्धिना भवद्गोचरेण स्वयं मनोरथेनैवाध्वा सुखं गमितो नीतः अमृतमप्युत्सृज्य त्वद्ध्यानमात्र सम्बलाः प्राप्ता इत्यर्थः ८७

प्रिया मनोभूशरदावदाहे देवीस्त्वदर्थेन निमज्जयद्भिः।
सुरेषु सारैः क्रियतेऽधुना तैः पादार्पणानुग्रहभूरियं भूः ॥८८॥
अलङ्कृतासन्नमहीविभागै रयं जनस्तै रमरैर्भवत्याम्।
अत्रापितोजङ्गमलेख्यलक्ष्मीं निक्षिप्य सन्देशमयाक्षराणि ॥८९॥
एकैकमेते परिरभ्य पीनं स्तनोपपीडं त्वयि सन्दिशन्ति।
त्वं मूर्च्छतान्नः स्मरभिल्लशल्यैर्मुदे विशल्यौषधिवल्लिरेधि ॥९०॥

प्रिया इति। त्वमेवार्थः प्रयोजनं तेन निमित्तेन प्रिया दयिताः देवीः शच्यादिदाराः मनोभुवः कामस्य शरा एव दावो दवाग्नि स्तस्य दाहे विरहानले निमज्जयद्भिः सद्भिः सुरेषु सारैः श्रेष्ठै रिन्द्रादिभिरधुना इयं भूविदर्भदेशः पदार्पण मेवानुग्रहस्तस्य भूस्थानं क्रियते कुण्डिनोपकण्ठ एव तिष्ठन्तीत्यर्थः ॥ ८८ ॥

अलङ्कृतेति। अलङ्कृत आसन्नमही विभागो भूप्रदेशो यैस्तैः समीपं गतैस्तै रमरै रयं जनः स्वयमित्यर्थः। भवत्यां विषये त्वां प्रतीत्यर्थः। सन्देशमया क्षराणि सन्देश रूपाणि वाक्यानि निक्षिप्य अर्पयित्वा जङ्गमलेख्यस्य चललेख्यस्य लक्ष्मीमवापित स्तेषामहं सन्देश हर इत्यर्थः ॥ ८९ ॥

एकैकमिति। एते देवाः एकैकं प्रत्येकमेवेत्यर्थः वीप्सायां द्विरुक्तिः एकं बहुव्रीहि वदिति बहुव्रीहि वद्भावात् सुलोपः क्रियाविशेषणं चैतत् अन्यथैकत्व नपुंसकत्वानुपपत्तेः केषु चित् पुस्तकेषु प्रत्येकमित्येवपाठः पीनस्तनयो रुपपीड्य पीनस्तनोप पीडं सप्तम्या चोपपीड रुधकर्ष इति णमुल् प्रत्ययः परिरभ्यआलिङ्ग्य सन्दिशन्ति वाचिकं कथयन्ति किमिति स्मर एवभिल्लोऽन्त्यजभेदः मूला श्लेषादयोभिल्लाः कथ्यन्ते ह्यन्त्यजातय इति हलायुधः। तस्य शल्यैः शरैर्मूर्च्छितां मुह्यतां नोऽस्माकं मुदे त्वं विशल्या उद्धृतशल्या सा च साऔषधिर्वल्ली विशल्यकरणीलता एधिभव

त्वत्कान्तिमस्माभिरयं पिपासन्मनोरथाश्वासनयैकयैव।
निजः कटाक्षः खलु विप्रलभ्यः कियन्ति यावद्गण वासराणि ९१

निजे सृजास्मासु भुजे भजन्त्यावादित्यवर्गे परिवेशवेशम्।
प्रसीद निर्व्वापय तापमङ्गै रनङ्गलीलालहरीतुषारैः ॥ ९२ ॥

दयस्व नो घातय नैवमस्माननङ्गचाण्डालशरैरदृश्यैः।

आस्तेर्लोपमध्यमैकवचनं भ्रसोरेत्यभ्यासलोपश्चेत्येकारः हुझल्भ्यो हेर्धिः धिचेति सकारलोपः ॥ ९० ॥

अथ षोड़शभिः श्लोकैः सन्देशमेवाह त्वदित्यादि। हे भैमि! त्वत्कान्तिं त्वल्लावण्यामृतं पिपासन् पातुमिच्छन् पिबतेः सनन्ताल्लटः शत्रादेशः। अयं निजोऽस्मदीयः कटाक्षोऽस्माभिः कियन्ति वासराणि यावत् कियद्दिनपर्य्यन्तमित्यर्थः। अत्यन्त संयोगे द्वितीया अवधौ यावच्छब्दः। एकया मनोरथेन मनोरथप्राप्त्या या आश्वासना तयैव अयं ते मनोरथ इदानीमेव प्राप्स्यत इत्येवमुपसान्त्वनयैव विप्रलभ्यः प्रतार्य्यः खलु? भण मधिकैस्तृषित इवेति भावः। अलं कालयापनया दिदृक्षवो वयमनुकम्पनीया इति ॥ ९१ ॥

निजे इति। हे भैमि! निजे स्वीये भुजे बाहू आदित्यवर्गे सौरवर्गे सूर्य्यवर्गे चास्मासु परिवेशस्य वेष्टनस्य सूर्य्यपरिधेश्च वेशमाकारं भजन्तौ सृज कुरु आलिङ्गेत्यर्थः। परिवेशो रवेः पार्श्वे मण्डले वेष्टने तयेत्यजपालः। प्रसीद प्रसन्ना भव अनङ्गलीलालहरीभिर्मदनविहारोर्मिभिः तुषारैः शीतलैरङ्गैस्तापं निर्वापय शमय ॥ ९२ ॥

दयस्वेति। हे भैमि! नोऽस्माकं दयस्व अस्माननुकम्पयस्वेत्यर्थः। अधिगर्थदयेशां कर्मणीति षष्ठी। अदृश्यैरलक्ष्यैरनङ्ग एव चाण्डालस्तस्य शरैरेवमस्मान् न घातय न मारय किन्तु प्रेमैव रसोऽनुरागो जलं च तस्मात् पवित्रैः शुद्धैस्तव तीक्ष्णैः कटाक्षैरेव बाणैर्भिन्ना विदारिताः सन्तः

भिन्ना वरं तीक्ष्णकटाक्षबाणैः प्रेमस्तव प्रेमरसात् पवित्रैः ॥ ९३ ॥
त्वदर्थिनः सन्तु परःसहस्राः प्राणास्तु नस्त्वच्चरणप्रसादः ।
विशङ्कसे कैतवनर्तितञ्चेदन्तश्चरः पञ्चशरः प्रमाणम् ॥ ९४ ॥
अस्माकमध्यासितमेतदन्तस्तावद्भवत्या हृदयं चिराय ।
बहिस्त्वयालङ्घ्यतामिदानीं मुरो मुरं विद्विषतः श्रियेव ॥ ९५ ॥
दयोदयश्चेतसि चेत्तवाभूदलङ्कुरु द्यां विफलो विलम्बः ।

प्रेमः । म्रियामहे प्रपूर्वाद्दृणो लङुत्तमबहुवचनम् । वरं मनाक्प्रिय जीवनासम्भवे वरं चण्डालहस्तमरणात्तीर्थमरणमिति भावः ॥ ९३ ॥

त्वदिति । हे भैमि ! त्वामर्थयन्त इति त्वदर्थिनः त्वत्कामुकाः सहस्रात् परे परःसहस्राः सहस्राधिकसंख्याका इत्यर्थः । परःशताद्यास्ते येषां परा संख्याः शताधिकेत्यमरः । पञ्चमी न योगविभागात् समासः राजदन्तादित्वादुपसर्जनस्य सहस्रशब्दस्य परनिपातः पारस्करादित्वात् सुडागमः । नोऽस्माकं प्राणास्तु त्वच्चरणयोः प्रसादोऽनुग्रहः वयं त्वदेकायत्त जीविता इत्यर्थः । अथ कैतवनर्त्तितं कपटनाटकं विशङ्कसे चेत् अन्तश्चरो हृदयान्तर्वर्त्ती पञ्चशरः प्रमाणं काम एवात्र साक्षी स हि देवतेति भावः ॥ ९४ ॥

अस्माकमिति । भवत्या पूज्यया भवतेर्डवतुप्रत्ययः उगितश्चेति ङीप् । त्वयाऽस्माकमेतदन्तरन्तर्वर्त्ति हृदयं स्वान्तं चिराय चिरात् प्रभृति अध्यासितं तावदधिष्ठितमेव अवधारणे तावच्छब्दः निरन्तरं चिन्तयेति भावः । किन्त्विदानीं बहिर्बाह्यमपि हृदयं वक्षः 'हृदयं वक्षसि स्वान्तमिति' विश्वः । मुरं मुरस्य विद्विषतो विष्णोरुरो हृदयं द्विषोऽमित्र इति शतृप्रत्ययः द्विषः शतुर्वा वचनमिति विकल्पान्न लोकेत्यादिना षष्ठीप्रतिषेधः । श्रियेवालङ्घ्यताम् ॥ ९५ ॥

दयेति । तव चेतसि दयोदयः दयाविर्भावः अभूच्चेत् द्यां स्वर्गमलङ्कुरु विलम्बो विफल इत्यर्थः । शुभस्य शीघ्रमिति न्यायादित

भुवः स्वरादेशमथाचरामो भूमौ धृतिं यासि यदि स्वभूमौ॥९६॥
धिनोति नास्मान् जलजेन पूजा त्वयान्वहं तन्वि! वितन्यमाना।
तव प्रसादाय नते तु मौलौ पूजास्तु नस्त्वत्पदपङ्कजाभ्याम्॥९७॥
स्वर्णैर्वितीर्णैः करवाम वामनेत्रे! भवत्या किमुपासनासु।
अङ्ग! त्वदङ्गानि निपीतपीतदर्पाणि पाणिः खलु याचते नः ९८

भावः। अथवा स्वभूमौ जन्मस्थाने भूमौ भूलोके धृतिं सन्तोषं यासि यदि तर्हि भुवो भूमेः स्वरादेशं स्वर्गसंज्ञामाचरामः वयं चात्रैव स्थास्याम इत्यर्थः स्वाधिष्ठित एव स्वर्ग इति भावः ॥ ९६ ॥

धिनोतीति। हे तन्वि! त्वया अन्वहमनुदिनं वीप्सायामव्ययीभावे अनश्च नपुंसकादन्यतरस्यामिति समासान्तः अन्वष्टघोरेवेति टिलोपः। वितन्यमाना क्रियमाणा जलजेन जातावेकवचनं। जलजैः पूजा अस्मान् न धिनोति न प्रीणयति किन्तु, तव प्रसादाय प्रसादार्थं नते नम्रे मौलौ मूर्ध्नि त्वत्पदपङ्कजाभ्यां नोऽस्माकं पूजास्तु प्रणयापराधेषु त्वत्पादताड़नार्थिनो वयमिति भावः ॥ ९७ ॥

स्वर्णैरिति। हे वामनेत्रे! चारुलोचने! भवत्या त्वया निजोपासनासु पूजासु वितीर्णैः समर्पितैः स्वर्णैः कनककमलादिभिः किं करवाम न किमपीत्यर्थः। यतः स्वर्णाचलवासिनो वयमिति भावः। किन्तु अङ्गेत्यामन्त्रणे निपीतो गृहीतः पीतस्य हरिद्राया दर्पः कान्तिगर्वो यैस्तानि शाङ्का काञ्चनी पीता हरिद्रा वरवर्णिनीत्यमरः। त्वदङ्गानि नोऽस्माकं पाणिर्याचते खलु? पीतदर्पाणीति पुंलिङ्गपाठे पीतानां स्वर्णादिद्रव्याणां दर्पमिति व्याख्येयं स्वर्णादुत्कृष्टवस्तुसम्भवे अपकृष्टस्वर्णस्वीकारो न युक्त इति भावः। साधुश्चायमेव पाठः। अन्यथा स्वर्णसञ्चारिणां त्वदङ्गेषु स्वर्णादुत्कर्षे वक्तव्ये हरिद्रामात्रादुत्कर्षोक्तेरनौचित्यादिति ॥ ९८ ॥

वयं कलादाइव दुर्विदग्धं त्वद्गौरिमस्पर्द्धि दहेम हेम ।
प्रसूननाराचशरासनेन सहैकवंशप्रभवभ्रु ! वभ्रु ॥ ९९ ॥
सुधासरःसु त्वदनङ्गतापः शान्तो न नः किं पुनरप्सरःसु ।
निर्व्वाति तु त्वन्ममताक्षरेण सूनाशुगेषोर्म्मधुशीकरेण ॥ १०० ॥

वयमिति । प्रसूननाराचशरासनेन कामचापेन सह एकवंशप्रभवे एककारणोत्पन्ने अत्यन्ततत्सदृशे इति यावत् । भ्रुवौ यस्याः सा तद्भ्रूरित्यूङ् नोत्तरपदो वहुव्रीहिः। अन्यथा अनूङन्तस्य भ्रूशव्दस्यानङ्स्यानस्थानदीत्वात् संवुद्धावम्बार्थेत्यादिना नदीह्रस्वो न स्यात् ननु ऊङन इत्युक्तं कथमूकारादिति चेत् सत्यं अप्राणिजातेश्चारज्ज्वादीनामित्यत्रालाभः कर्कन्धूरितिभाष्यकारेणोदाहरणादूकारादप्यङस्त्वेवेति ज्ञायते अतएव वामनः ऊकारादप्यूङ्प्रवृत्तेरिति तदेतत् सम्यग्विवेचितमस्माभिः कुमारसम्भवसञ्जीवन्यां विमानना सुभ्रु ! कुतः पितुर्गृह इत्यत्र । तस्याः संवुद्धिः एकवंशप्रभवभ्रु ! वयं कलाः स्वर्णखण्डान् द्यन्ति खण्डयन्तीति कलादाः स्वर्णकारा इव कलादा रुक्मकारका इत्यमरः। तव गौरिम स्पर्द्धत इति तत् स्पर्द्धि अतएव प्रवलविरोधितया दुर्विदग्धमविदग्धं वुद्धिशून्यं च वभ्रु पिङ्गलं वभ्रु स्यात् पिङ्गलेऽपीत्यमरः । हेम सुवर्णं दहेम त्वदङ्गस्पर्द्धापराधे यावदशुद्धेश्चास्माकं दाहः स्वर्णसमर्पणात् सर्वांनयद्राङ्गसमर्पणमेव सन्तर्पणमिति भावः ॥ ९९ ॥

सुधेति । हे भैमि ! सुधासरःसु अमृतसरसीषु नोऽस्माकं त्वत्कृतानङ्गतापो न शान्तः अप्सरःस्वपां सरःसु उर्वश्यादिवेश्यासु वा किंपुनः किमुत ? किन्तु सूनाशुगेषोः कामवाणस्य मधुशीकरेण मकरन्दविन्दुना नत्वारम्भेनेत्यर्थः । तव ममताक्षरेण ममताव्यञ्जकवाक्येन मदीया यूयमित्येवंरूपेण निर्व्वाति यद्विरहोदयस्तापः स त्वत्कृतैकसाध्यो नोपायान्तरसाध्य इत्यर्थः ॥ १०० ॥

खण्डः किमु त्वद्गिरएव खण्डः किं शर्करा तत्पथशर्करैव ।
शयाङ्गि ! तद्भङ्गिरसोत्थकच्छतृणन्नु दिक्षु प्रथितं तदिक्षुः ॥१०१॥
ददाम किन्ते सुधयाधरेण त्वदास्यएव स्वयमास्यते यतः ।
वधुं विजित्य स्वयमेव भावि त्वदाननं तन्मखभागभोजि ॥१०२॥

खण्ड इति । हे कृशाङ्गि ! खण्डः खण्डशर्करा त्वद्गिर एव त्वद्वा-
चस्तस्याएव खण्डः शकलः किमु ? तथा शर्करा सिताख्यशर्करा
तस्या गिरः पन्थास्तत्पथः तस्मिन् तदनुमार्गे शर्करा शिलाशकलप्रचुरमृ-
देव किं ? दिक्षु प्रथितं प्रख्यातं इक्षुरिक्ष्वाख्यं तत् तृणं तस्या गिरः त्वद्गिरः
भङ्गी भङ्गवान् तरङ्गितो रसः शृङ्गारादिरुदकं च तदुत्थं कच्छे अनूपे तृणं
तु ? उत्सेति पाठे रसोत्सो रसप्रवाहः तस्य कच्छतृणं किमित्यर्थः । जल-
प्रायमनूपं स्यात् पुंसि कच्छस्तथाविध इत्यमरः । सर्वत्रान्यथा कथं ख-
ण्डादीनामीदृक् माधुर्यमिति भावः। किम्वादयस्तूत्प्रेक्षायां अतोत्प्रेक्षाल
यस्य संसृष्टत्वात् सजातीय संसृष्टिः अत्र द्रव्ये वैशेषिककारः। मत्स्यण्डिकाः
खण्डसिताः क्रमेण गुणवत्तमाः । यथा यथा हि नैर्मल्यं मधुरत्वं तथा
तथा । धौतत्वान्निर्मलत्वाच्च तथा सितत्वमक्रमात् । वालुकेव भृशं सूक्ष्मा
सुस्निग्धा सितपिङ्गला । मत्स्याण्डाकृतिसादृश्ययोगान्मत्स्यण्डिका स्मृता ।
स्फटिकोपलखण्डाभः खण्डस्तच्छर्करा समा । शर्करा निर्मला सैव सिता
तु सितशर्करा । निर्मलेव सिता सा तु राजराज इतीरितेति ॥ १०१ ॥

किञ्च नेष्टदानेन त्वदाराधने शक्ता वयं किन्तु त्वत्करुणैकशरणा
इत्याशयेनाह ददामेति । ते तुभ्यं किं ददाम किं वितराम दातव्यं
किमपि नास्तीत्यर्थः। अमृतमस्तीति चेत् तवैवास्तीत्याह । कुतः यतो य-
स्मात् कारणात् सुधया अधरेणाधररूपेण त्वदास्य एव स्वयं साक्षा-
दास्यते स्थीयते भावे लट् । यज्ञभागोऽस्तीति चेत् सोऽपि ते जयलभ्य इ-
त्याह । त्वदाननं कर्तृ विधुं चन्द्रं स्वयमेव परानपेक्षं विजित्य तस्य

प्रिये ! वृणीष्वामरभावमस्मदिति त्रपोदञ्चि वचो न किन्नः ।
त्वत्पादपद्मे शरणं प्रविश्य स्वयं वयं येन जिजीविषामः ॥१०३॥
अस्माकमस्मान्मदनापमृत्योस्त्राणाय पीयूषरसोऽपि नासौ ।
प्रसीद तस्मादधिकं निजन्तु प्रयच्छ पातुं रदनच्छदन्नः ॥१०४॥
प्लुष्टश्चापेन रोपैरपि सह मकरेणात्मभूः केतुनाभू-
द्भर्त्ता नस्त्वत्प्रसादादथ मनसिजतां मानसोनन्दनः सः ।

विष्णोर्मखे यागे भागमंशम्भोक्तुं शीलमस्येति तद्भोजि भावि भविष्यत् तत्स्थानाधिपत्यादत्र धर्मलाभ इति भावः ॥ १०२ ॥

त्वदायत्तमेवेत्याह प्रिय इति । हे प्रिये ! दमयन्ति ! अस्मदस्मत्तः अमरभावममरत्वं अविनाशित्वं च वृणीष्वेत्येवं रूपं नोऽस्माकं वचः त्रपामुदञ्चतीति त्रपोदञ्चि लज्जावहं न भवति किं ? भवत्येवेत्यर्थः । कुतः येन कारणेन तव पादावेव पद्मे ते एव शरणं प्रविश्य रक्षकं प्राप्य वयं स्वयमनामयं जिजीविषामो जीवितुमिच्छामः यद् स्वयं क्षुधितस्यान्नार्थिनस्तद्दातुः क्षुद्भैषज्यप्रतिज्ञावत् परिहारास्पदमेवेति भावः॥१०३॥

न चामृतसेविनां वः कुतो मरणप्रसक्तिरिति वाच्यमित्याह अस्माकमिति । हे दमयन्ति ! अस्मान्मदनादेवापमृत्योः सकाशादस्माकं त्राणाय रक्षणाय असौ पीयूषरसोऽपि नासौ नालं किन्तु तस्मात् पीयूषरसादधिकं निजं त्वदीयं रदनच्छदमोष्ठं पातुं नोऽस्मभ्यं प्रयच्छ देहि प्रसीद प्रसन्ना भव ॥ १०४ ॥

प्लुष्ट इति । हे तन्वि ! दमयन्ति ! आत्मना स्वयमेव भवतीत्यात्मभूः कामः स्वैः स्वकीयैः चापेन रोपैर्बाणैः पत्री रोपइषू द्वयोरित्यमरः । मकरेणैव केतुना च सह प्लुष्टो दग्धोऽभूत् स आत्मभूरथेदानीं तव प्रसादाद्धेतोः नोऽस्माकं तव च सम्भूयेत्यर्थः । त्यदादीनि सर्वैर्नित्यमिति युष्मदस्मदोरेकशेषे परशेषः । मानसो मनःसम्बन्धी नन्दनः पुत्रः

भ्रूभ्यान्ते तन्वि ! धन्वी भवतु तव सितैर्जैत्रभल्लः स्मितैस्ता-
दस्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाङ्कः ॥ १०५ ॥
स्वप्नेन प्रापितायाः प्रतिरजनि तव श्रीषु मग्नः कटाक्षः
श्रोत्रे गीतामृताब्धौ त्वगपि ननु तनूमञ्जरीसौकुमार्ये ।
नासा श्वासाधिवासेऽधरमधुनि रसज्ञा चरित्रेषु चित्तं
तन्न स्तन्वङ्गि ! कैश्चिन्न करणहरिणैर्वागुरा लम्भितासि ॥१०६॥

आनन्दयिता च सतु नन्दनो हर्षके सुत इति विश्वः। मनसिजातो मनसिजस्तस्य भावस्तत्ता तां सप्तम्यां जने डः हलदन्ताः सप्तम्याः संज्ञायामित्यलुक्। धत्तान्दधातु तुह्योस्तातङाशिष्यन्यतरस्याम्। नष्टः दग्ध आत्मभूर्भवत्वस्तु मनसोऽप्यात्मत्वादित्यर्थः; "आत्मा देह मनो ब्रह्म स्वभाव धृतिबुद्धिष्विति" विश्वः। त्वय्यस्मासु च कामस्तुल्यदृष्टिरस्त्विति भावः। किञ्च ते तव भ्रूभ्यां धन्वी चापवान् भवतु धन्वन्शब्दाद्व्रीह्यादिति पाठादिनिः। तव सितैर्निर्मलैः स्मितैर्हसितैः जैत्रा भल्ला यस्य सः जित्वरेषुः स्ताद्भवतु अस्तेर्लोटि तेस्तातङादेशः। तव नेत्रे एव चञ्चत्तरावतिचञ्चलौ शफरौ तयोर्युगं तदधीनस्तल्लभ्यो मीनरूपौ ध्वज एवाऽङ्को लाञ्छनं यस्य सोऽस्तु त्वन्नेत्राभ्यां मीनध्वजवानस्त्वित्यर्थः। अत्र मनोभूस्त्वभूत् स च नेत्रेषु यथासंख्यमात्मभूत्वरूपणाद्यथासंख्यसङ्कीर्णो रूपकालङ्कारः॥ स्रग्धरावृत्तम् ॥१०५॥

स्वप्नेनेति। हे तन्वङ्गि ! कृशाङ्गि ! प्रतिरजनि रजन्यां वीप्सायामव्ययीभावः। स्वप्नेन कर्त्रा प्रापितायाः स्वप्नदृष्टायाः तव श्रीषु सौन्दर्यलहरीषु नोऽस्माकं कटाक्षो मग्नः गीत एवामृताब्धौ सुधासमुद्रे श्रोत्रे मग्ने, तनूः मूर्त्तिरेव मञ्जरी कुसुमगुच्छाः तस्याः सौकुमार्ये मार्दवे त्वगपि मग्ना। ननु श्वासाधिवासे निश्वासमारुतसौरभे नासा मग्ना अधरमधुन्यधरामृते रसज्ञा रसना मग्ना चरित्रेषु चेष्टासु चित्तं मग्नं तत् तस्मात्कैश्चित् करणैरिन्द्रियैरेव हरिणैस्त्वं वागुरा मृगबन्धिनी रज्जुः

इति धृतसुरसार्थवाचिकस्रक् निजरसनानलपत्रहारकस्य।
सफलय मम दूततां वृणीष्व स्वयमवधार्य्य दिगीशमेकमेषु १०७

आनन्दयेन्द्रमथ मन्मथमग्नमग्निं
केलीभिरुद्धर तनूदरि ! नूतनाभिः।
आसादयोदितदयं शमने मनो वा
नो वा यदीत्थमथ तद्वरुणं वृणीथाः ॥ १०८ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम्।

न लम्भिता न प्रापासि सर्वैरपि प्रापितेत्यर्थः। अस्माकं सर्वेन्द्रियसम्मोहनं ते रूपशिल्पमिति भावः। अत्र चतुर्थपादार्थस्य पूर्वपद्वाक्यार्थहेतुकत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गं तच्च करणहरिणैरित्यादिरूपकेण सङ्कीर्य्यते पूर्वोक्तमेव वृत्तम् ॥ १०६ ॥

इतीति। इतीत्थं धृता सुरसार्थस्येन्द्रादिवृन्दस्य वाचिकस्रक् सन्देशवाक्यपरम्परा येन तस्य निजस्य रसना नलस्येव पत्रलेख्यस्य यो हारकस्तस्य मम दूततां सफलय साफल्यतां कुरु एषु मध्ये एकं दिगीशं स्वयमात्मनैवावधार्य्य निश्चित्य वृणीष्व वाचिको व्याख्यातः। अत्र नलदूत्यसाफल्यस्य वरणवाक्यार्थहेतुकत्वात् पूर्ववदलङ्कारः स च रसनानलपत्रेति रूपकेण पत्रलेख्यस्य यो हारकस्तस्य न सङ्कीर्य्यते पुष्पिताग्रावृत्तम् ॥ १०७ ॥

आनन्दयेति। हे तनूदरि! कृशोदरि! नूतनाभिरभिनवाभिः केलीभिः क्रीड़ाभिः मन्मथमग्नमिन्द्रं आनन्दय अथवा तादृशमेव अग्निम् ताभिरुद्धर अथवा शमने यमे उदितदयं जातानुकम्पं मनः आसादय निवेशय इत्थं नो वा यदि अथ तत्तर्हि मन्मथमग्नं वरुणं वृणीथाः वृणीष्व ॥ १०८ ॥

श्रीहर्षमित्यादि। कवीनां कुलेन समूहेन अदृष्टे अध्वनि यत्पाथ

तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
काव्ये चारुणि वैरसेनिचरिते सर्गो निसर्गोज्ज्वलः ॥१०८॥

……

नित्यपथिकं तस्मिन् चारुणि शोभने वैरसेनेर्नलस्य चरिते तस्य श्रीहर्षस्य महाकाव्ये निसर्गोज्ज्वलोऽयमष्टमः सर्गः अगात् सम्पूर्ण इति शेषः ॥ १०८ ॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्याय-
कोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां
जीवातुसमाख्यायां अष्टमः सर्गः ।

नवमः सर्गः ।

इतीयमक्षिभ्रुवविभ्रमेङ्गितैः स्फुटामनिच्छां विवरीतुमुत्सुका ।
तदुक्तिमात्रश्रवणेच्छयाऽशृणोद्दिगीशसन्देशगिरो न गौरवात् ॥१

अथ दमयन्तीवृत्तान्तं वक्तुं विरतवक्तृतरवाक्यश्रवणजनितामिन्द्राद्यनुरागशङ्कां तावद्वारयति । इतीति । इयं दमयन्ती अक्षिणी च भ्रुवौ च अक्षिभ्रुवं द्वन्द्वैकवद्भावः । अचतुरेत्यादिना समासान्तादिनिपातनात् साधुः। तस्य विभ्रमो विकारः स एव इङ्गितं चेष्टा तैरेव स्फुटां व्यक्तामनिच्छामिन्द्रादिविषयामिति शेषः । तथा विवरीतुं वाचा निषेद्धुं उत्सुका उद्युक्ता सती इष्टार्थोद्युक्त उत्सुक इत्यमरः । निषेधस्य ज्ञानपूर्वकत्वात् तद्ज्ञानार्थमशृणोदित्यर्थः । किन्तु तदुक्तिमात्रश्रवणेच्छया नलवागमृतपिपासया चेत्यर्थः । दिगीशसन्देशगिरः [illegible] अत्र मात्रपदव्यावर्त्यमाह । गौरवादिति । न तु दिगीशादीनां च गौरवात् अस्मिन् सर्गे वंशस्थवृत्तं लक्षणन्तूक्तमादिमसर्गे ॥ १ ॥

तदर्पितामश्रुतवद्विधाय तां दिगीशसन्देशमयीं सरस्वतीम्।
इदं तमुर्वीतलशीतलद्युतिं जगाद वैदर्भनरेन्द्रनन्दिनी ॥ २॥
मयाङ्ग ! पृष्टः कुलनामनी भवानमू विमुच्यैव किमन्यदुक्तवान्।
न मह्यमत्रोत्तरधारयस्य किं ह्रियेऽपि सेयं भवतोऽधमर्णता ॥३॥
अदृश्यमाना क्वचिदीक्षिता क्वचिन्ममानुयोगे भवतः सरस्वती।
क्वचित्प्रकाशां क्वचिदस्फुटार्णसं सरस्वतीं जेतुमनाः सरस्वतीम् ४

तदिति। वैदर्भनरेन्द्रनन्दिनी दमयन्ती तेन नलेनार्पितां प्रयुक्तां दिगीशसन्देशमयीं तद्रूपां सरस्वतीं वाचमश्रुतवद्विधायाश्रुतमिव कृत्वा तेन तुल्यं क्रियाचेद्वतिः। उर्वीतलशीतलद्युतिं भूलोकचन्द्रं तं नलमिदं वक्ष्यमाणं जगाद गदितवती ॥ २ ॥

मयेति। हे अङ्ग! भोः! श्रीमन्! मया भवान् कुलनामनी पृष्टः सन् पृच्छतेर्दुहादित्वादप्रधाने कर्मणि क्तः अप्रधाने दुहादीनामिति वचनात्। किं किमर्थममू कुलनामनी विमुच्य अन्यदुक्तवान् किमप्यसङ्गतमिव प्रलपसीति भावः। तदकथने को दोषस्तत्राह नेति। अत्र कुलनामप्रश्ने मह्यमुत्तमर्णाय इति शेषः। धारेरुत्तमर्ण इति सम्प्रदानत्वाच्चतुर्थी धारयन्तीति धारयः अनुपसर्गाल्लिम्पविन्दधारीत्यादिना शप्रत्ययः। उत्तरस्य धारयः तस्य भवतः तव सेयमधम ऋणेन अधमर्णः। मयूरव्यंसकादित्वात् तत्पुरुषः। तस्य भावस्तत्ता सा ह्रियेऽपि न किं ? लोके उत्तमर्णेन याच्यमानस्याधमर्णस्यातत्प्रदानं लज्जायै भवत्येव भवतस्तु सापि नास्तीति भावः ॥ ३ ॥

अदृश्यमानेति। ममानुयोगे प्रश्ने विषये। प्रश्नोऽनुयोगः पृच्छा चेत्यमरः। क्वचित् कुलनामविषये अदृश्यमाना अप्रकाशितेत्यर्थः। क्वचित् कुतः आगतः कस्य त्वमित्यत्र ईक्षिता दृष्टा प्रकाशितार्थेति यावत् ईदृशी भवतः सरस्वती क्वचित् प्रकाशां प्रकाशोदकां क्वचिदस्फुटार्णसं अप्रकाशो-

गिरः श्रुता एव तव श्रवःसुधाः श्लथाभवन्नाम्नि तु न श्रुतिस्पृहा।
पिपासुता शान्तिमुपैति वारिणा न जातु दुग्धान्मधुनोऽधिकादपि
बिभर्त्ति वंशः कतमस्तमोऽपहं भवादृशं नायकरत्नमीदृशम्।
तमन्यसामान्यधियावमानितं त्वया महान्तं बहु मन्तुमुत्सहे ॥६॥
इतीरयित्वा विरतां पुनः स तां गिरानुजग्राहतरां नराधिपः।

दक्षां सरस्वतीं वाचं सरस्वतीं नदीं च, सरस्वती नदीभेदे गो वाक्देव-तयोर्गिरि। स्त्रीरत्ने चापगायाञ्चेति विश्वः। जेतुं मनो यस्याः सा जेतुमना तु काममनसोरपीति मकारलोपः। अत्र नलवाचः सरस्वतीनदीधर्मसम्बन्धाज्जिगीषोत्प्रेक्षा व्यञ्जकाप्रयोगात् गम्या तया चोपमा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४ ॥

गिर इति। श्रवःसुधाः कर्णामृतानि तव गिरः। श्रुता एव किन्तु भवन्नाम्नि विषये श्रुतिस्पृहा श्रवणेच्छा न श्लथा न निवृत्ता सुरसन्देशश्रवणेच्छा तन्न निवृत्तेत्यर्थः। तथा हि पिपासुता पिपासेत्यर्थः। वारिणा वारिपानेनैव शान्तिमुपैति अधिकादनल्पादपि दुग्धात् क्षीरात् मधुनः क्षौद्रात् जातु कदापि न शाम्यति तद्वदत्रापीति दृष्टान्तालङ्कारः ॥ ५ ॥

बिभर्त्तीति। तमोऽपहं भवादृशमीदृशं नायकरत्नं राजश्रेष्ठं मध्यमणिं च। नायको नेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः। कतमो वंशः कुलं वेणुश्च। वंशो वेणौ कुले वर्ग इति विश्वः। बिभर्त्ति तथा हि अन्यसामान्यधिया पूर्वं सर्वसाधारणबुद्ध्या अवमानितं दृष्टं तथाप्यद्य त्वया महान्तं तत्तत्कथ्यमानं वंशं बहु मन्तुं बहु कर्तुमुत्सहे सर्वोऽपि हि वंशो वंश्यैः पुरुषधौरेयैरेव प्रकाश्यते न स्वरूपत इति भावः। अत्र मध्यमणिरूपार्थान्तरप्रतीतिध्वनिरेव अत्र वेणोर्मुक्तायोनित्वे प्रमाणम्। करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि। मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरीति ॥ ६ ॥

इतीति। इतीरयित्वा व्याहृत्य विरतां तूष्णीम्भूतां भैमीं स नरा-

विरुत्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ॥७॥
अये ! ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने ।
गरौ गिरः पल्लवनार्थलाघवे मितञ्च सारञ्च वचो हि वाग्मिता ॥८॥
वृथा कथेयं मयि वर्णपद्धतिः कयानुपूर्व्या समकेति कीर्त च ।
उभे समक्षव्यवहारमावयोः पदे विधातुं खलु युष्मदस्मदी ॥९॥

धिपः तपात्यये ग्रीष्मान्ते विरुत्य पिपासया आक्रन्द्य विश्रान्तवतीं विरतां चातकानां मण्डलीं समूहं घनाघनो वर्षुकाब्द इव । वर्षुकाब्दो घनाघन इत्यमरः । पुनर्गिरा वचनेन गर्जितेन चानुजग्राहतरामतिशयेनानुगृहीतवान् । आदरात् प्रत्युवाचेत्यर्थः । किमेत्तिङित्यादिना आम्प्रत्ययः ॥ ७ ॥

अये इति । अये ! दमयन्ति ! न विद्यते अतिप्रयोजनं अधिकप्रयोजनं यस्मिन् तस्मिन् द्वयेऽपि कुलनाम्नोर्युगलेऽपि मम जिह्वया उदासितं माध्यस्थ्येन स्थितं नपुंसके भावे क्तः। तथा हि पल्लवनं विस्तरणं तच्चार्थलाघवञ्च वक्तव्यार्थसङ्कोचनञ्च गिरः वाचः गराविव विषप्रायावित्यर्थः । मितमल्पाक्षरं सारं महार्थञ्च वचो वाक्यं वाग्मिता वक्तृत्वं अन्यथा वाचालता स्यादिति भावः । वाचो ग्मिनिः सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । कुलनामकथनं वृथेत्युक्तं तत्र नामकथनस्य वैयर्थ्यमाह ॥ ८ ॥

वृथेति । का वर्णपद्धतिरक्षरपङ्क्तिः । कयानुपूर्व्यानुक्रमेण मयि समकेति । संज्ञात्वेन सङ्केतितेतीयं कथा प्रश्नोक्तिश्च वृथा किन्तूत्तरमिति भावः । नामरूपापरिज्ञाने कथमावयोर्मिथः संवादस्तत्राह आवयोस्तव मम चेत्यर्थः । त्यदाद्येकशेषे यत्परं तदिति वचनादस्मदः शेषता । अक्ष्णोः समीपे समक्षं सम्मुखेन समीपार्थेऽव्ययीभावे शरत्प्रभृतित्वात् समासान्तः । व्यवहारं मिथःसंकथां विधातुं युष्मच्चास्मच्च पदे त्वमहमित्येतौ शब्दावित्यर्थः उभे समर्थे ॥ ९ ॥

यदि स्वभावान्मम नोज्ज्वलं कुलं ततस्तदुद्भावनमौचिती कुतः ।
अथावदातं तदहो विडम्बना यथा तथा प्रेष्यतयोपसेदुषः ॥ १०॥
इति प्रतीत्यैव मयावधीरिते तवापि निर्बन्धरसो न शोभते ।
हरित्पतीनां प्रतिवाचिकं प्रति श्रमो गिरां ते घटते हि संप्रति॥११
तथापि निर्बध्नति!तेऽथवा स्पृहा मिहानुरुन्धे मितया न किं गिरा
हिमांशुवंशस्य करीरमेव मां निशम्य किं नासि फलेग्रहिग्रहा१२

अकथने च कारणमाह । यदीति । मम कुलं स्वभावादुज्ज्वलं अकलङ्कं न यदि, ततस्तर्हि तस्य कुलस्योद्भावनं प्रकटनं कुत औचिती औचित्यं नोचितमित्यर्थः । धर्मधर्मिणोरभेदोपचारात् औचिती व्याख्याता । अथावदातमुज्ज्वलं तथापि यथातथा कथञ्चिदपि प्रेष्यतया किङ्करतया उपसेदुषः प्राप्तस्य मम तत् कुलोद्भावनं विडम्बना परिहासे अहो ॥ १० ॥

इतीति । इतीत्थं प्रतीत्य कुलनामाकथनं निश्चित्यैव मयाऽवधीरिते उपेक्षिते सति तवापि निर्बन्धरसोनिर्बन्धेच्छा न शोभते किन्तु सम्प्रति हरित्पतीनामिन्द्रादीनां प्रतिवाचिकं प्रत्यादेशं प्रत्युत्तरं प्रतीत्यर्थः । ते तव गिरां श्रमः प्रयत्नव्यापारो घटते युज्यते हि ॥ ११ ॥

तथापीति । तथापि वैयर्थ्येऽपि निर्बध्नति ! निर्बन्धनकारिणि ! बध्नातेः शत्रन्तादुगितश्चेति ङीबन्तात् संबुद्धिः । इहार्थे ते तव स्पृहां वाञ्छां मितया गिरा नानुरुन्धे नानुवर्त्ते किं ? अनुरोत्स्याम्येवेत्यर्थः । कुलस्वरूपमात्रं कथयामीत्यर्थः । रुधेर्लटितङ् । माम् हिमांशुवंशस्य करीरं सोमकुलाङ्कुरमेव निशम्य फलं गृह्णातीति फलेग्रहिः सफलः ग्रहः आग्रहो यस्याः सा सफलाभिनिवेशा नासि किं ? तावता न तुष्यसि किमित्यर्थः । फलेग्रहिरात्मम्भरिश्चेति निपातनात् साधुः ॥ १२ ॥

महाजनाचारपरम्परेदृशी स्वनाम नामाददते न साधवः ।
ततोऽभिधातुं न तदुत्सहे पुनर्जनः किलाचारमुचं विगायति॥१३॥
अदोऽयमालप्य शिखीव शारदो बभूव तूष्णीमहितापकारकः ।
अथास्य रागस्य दधा पदे पदे वचांसि हंसीव विदर्भजाददे॥१४॥
सुधांशुवंशाभरणं भवानिति श्रुतेऽपि नापैति विशेषसंशयः ।

कुलमुक्तं नाम तु न वाच्यमित्याह । महाजनेति । महाजनानां सतां आचारस्य परम्परा सम्प्रदायः ईदृशी । तामेवाह साधवः सन्तः स्वनाम नाददते न गृह्णन्ति नाम नामेति प्रसिद्धौ । नामानुकीर्त्तनं पुंसामात्मनश्च गुरोः स्त्रियाः । दिनमेकं हरत्यायुरिति निषेधादिति भावः । अतो निषेधात् तत् पुनस्तन्नाम तु अभिधातुं नोत्सहे न शक्नोमि शकधृषेत्यादिना तुमुन्प्रत्ययः । तथा हि जनो लोक आचारमुचमाचारत्यजं विगायति किल ? गर्हते खलु ? ॥ १३ ॥

अद इति । अहितानामरीणामपकारकः अपकर्त्ता अन्यत्राहीनां तदपकारकोऽतिहिंसाकरः । अयं नलः शरदि भवः शारदः सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् । शिखी केकीव अदः इदं वचनमालप्य व्याहृत्य तूष्णीम्बभूव । अथानन्तरमस्य वाक्यस्य सम्बन्धिनि पदे सुप्तिङन्तरूपे पदे विषये रागस्य श्रवणेच्छाया दधातीति दधा धरित्री प्रत्यक्षरं सुधास्वादित्वादविच्छिन्नतृष्णेत्यर्थः । दधातिदधात्योर्विभाषेति दधातेरप्रत्यये श्लाविति द्विर्भावः अजाद्यतष्टाप् । अन्यत्र पदे पदे चरणद्वये अस्य चञ्चुपुटे रागस्य लौहित्यस्य दधा । राजहंसास्तु ते चञ्चूचरणैर्लोहितैः सिता इत्यमरः । विदर्भजा वैदर्भी हंसीव वचांस्याददे उवाचेत्यर्थः । शरदि निःशब्दाः शिखिनः राजहंसाः शब्दायन्ते तद्वदिति भावः ॥ १४ ॥

सुधांश्विति । भवान् सुधांशुवंशाभरणमिति श्रुतेऽपि विशेषे विषये संशयस्तत्रापि क इति सन्देहो नापैति अतो विशेषो वक्तव्य इति भावः ।

कियत्सु मौनं विस्मृता कियत्सु वाग्मितेत्यहो वञ्चनचातुरी तव॥१५॥
मयापि देयं प्रतिवाचिकं न ते स्वनाम मत्कर्णसुधामकुर्वते।
परेण पुंसा हि ममापि सङ्कथा कुलाबलाचारसहासनासहा॥१६॥
हृदाभिनन्द्य प्रतिबन्ध्यनुत्तरः प्रियागिरः सस्मितमाह स स्म ताम्
वदासि वामाक्षि! परेषु मा क्षिप स्वमीदृशं माक्षिकमाक्षिपद्वचः॥१७॥
करोषि नेमं फलिनं मम श्रमं द्विषोऽनुगृह्णासि न कञ्चन प्रभुम्।

अथावाच्यत्वान्नोच्यते तर्हि कियद्वाच्यं तदेव विविच्यतामित्याह कियत्स्वर्थेषु मौनं वा कियद्विषयेषु वाक् वाग्मिता विस्मृता न किञ्चिदत्र नियामकमस्तीति भावः। किन्तु तव वञ्चनचातुरी प्रतारणाचातुर्यं महती अहो! औचितीवच्चातुरी व्याख्येया॥१५॥

अथ यदुक्तं नामकथनं निषिद्धमिति तत्र प्रतिबन्धीं गृह्णाति। ममापीति। स्वनाम मम कर्णसुधां कर्णामृतमकुर्वते अश्रावयते इत्यर्थः। ते तुभ्यं प्रतिवचनं प्रतिसन्देशनं न देयं कुतः हि यस्मान्ममापि परेण पुंसा सङ्कथा सम्भाषणं कुलाबलानां कुलाङ्गनानामाचारस्य सहासनं सहासस्तस्य न सहत इत्यसहा अक्षमापचारो विरुध्येतेत्यर्थः॥१६॥

हृदेति। स नलः प्रियाया गिरो वाक्यानि हृदा हृदयेन अभिनन्द्यानुमोद्य प्रतिबन्ध्या पूर्वश्लोकोक्तया अनुत्तरः सन्तां प्रियां सस्मितमाह स्म उक्तवान्। लट् स्म इति भूते लट्। हे वामाक्षि! चारुलोचने! वदासि मक्षिकाभिः कृतं माक्षिकम्। मधुभेदो मधु क्षौद्रं माक्षिकादित्यमरः। तेन वर्णक्रियं संज्ञायामित्यण्प्रत्ययः। तदाक्षिपत् निराकुर्वत् तत्सदृशमित्यर्थः। ईदृशं लोकोत्तरं स्वं वचः परेषु परपुरुषेषु माक्षिप मा निधेहि सत्यं कुलस्त्रीणां परपुरुषसम्भाषणमनुचितमङ्गीकृतं च स्वयं तु न परपुरुष इति भावः॥१७॥

करोषीति। हे भैमि! भीमजे! मम इमं श्रमं दूतकार्यप्रयासं फलिनं

त्वमित्थमर्हसि सुरानुपासितुं रसामृतस्नानपवित्रया गिरा॥१८॥
सुरेषु सन्देशयसीदृशीं बहुं रसस्रवेण स्तिमितां न भारतीम्।
मदर्पिता दर्पकतापितेषु या प्रयातु दावार्दितदाववृष्टिताम्॥१९॥
यथायथेह त्वदपेक्षयानया निमेषमप्येष जनो विलम्बते।
कृषा शरव्यीकरणे दिवौकसां तथातथाद्य त्वरते रतेः पतिः॥२०॥
इयच्चिरस्यावदधन्ति मत्पथे किमिन्द्रनेत्राण्यशनिर्न निर्ममौ।

फलवन्तं फलवान् फलिनः फलीत्यमरः। फलवद्भिरस्माभिरन्वयः न करोषि कथं, कञ्चनैकमपि दिशः प्रभुं दिगीशं मानुगृह्णासि त्वमित्थं रसो माधुर्यमेवामृतं तत्र स्नानेनावगाहेन पवित्रया पूतया गिरा सुरानुपासितुमर्हसि स्नाताधिकारवत्त्वाद्देवपूजाया इति भावः॥ १८॥

सुरेष्विति। ईदृशीं लोकोत्तरां बहुं प्रभूतां रसस्रवेण रसप्रवाहेन स्तिमितां परितां भारतीं सुरेषु न सन्देशयसि सन्देशं न करोषि सन्देशशब्दात् तत्करोतीति ण्यन्ताल्लटि सिप्। या भारती दर्पकेण कन्दर्पेण तापितेषु मयार्पिता सती दावार्दिता दावाग्निदग्धाऽरण्ये या वृष्टिः तत्तां प्रयातु सन्तापसंहरणात् तत्सदृशी भवेदिति निदर्शनालङ्कारः। दवदावौ वनारण्यवह्नी इत्यमरः॥ १९॥

यथा यथेति। हे भैमि! एष अयं जनः स्वयमित्यर्थः। यथा यथा यावद्यावदित्यर्थः। इह त्वत्समीपे त्वदपेक्षया त्वदनुरोधेन निमेषमपि विलम्बते रतेःपतिः कामो कृषा दिवौकसां देवानां शरव्यीकरणे लक्ष्यीकरणे तथा तथाद्य त्वरते अतः क्षिप्रमेव प्रतिवाचं देहीत्यर्थः॥२०॥

इयदिति। मत्पथे मदागमनमार्गे इयच्चिरस्य इयच्चिरमित्यर्थः। अत्यन्तसंयोगे द्वितीयार्थेऽव्ययम्। चिराय चिररात्राय चिरस्यार्थाश्चिरार्थका इत्यव्ययेष्वमरः। अवदधन्ति अवहितानि सन्ति वा नपुंसकस्येति शतुर्नुमागमः। इन्द्रनेत्राणि कर्म अशनिर्वज्रो निर्ममौ किं? नूनं

धिगस्तु मां सत्वरकार्य्यमन्थरं स्थितः परप्रेष्यगुणोऽपि यत्र न॥२१॥

इदं निगद्य क्षितिभर्त्तरि स्थिते तयाऽभ्यधायि स्वगतं विदग्धया ।
अधिक्षि तं दूतयतां भुवः स्मरं मनोदधत्या नयनैपुणव्यये ॥२२॥

जलाधिपस्त्वामदिशन्मयि ध्रुवं परेतराजः प्रजिघाय स स्फुटम् ।
मरुत्वतैव प्रहितोऽसि निश्चितं नियोजितश्चोर्द्ध्वमुखेन तेजसा॥२३॥

वन्मयानीत्यर्थः । अन्यथा कथमिदृग्विलम्बित्वमिति भावः । सत्वरकार्य्ये क्षिप्रकर्त्तव्ये मन्थरं मन्दं मां धिगस्तु ममेयं निन्दा प्राप्नोत्वित्यर्थः । कुतो यत्र मयि परेषां प्रेष्यः कर्म्मकरः तस्य यो गुणः क्षिप्रकारित्वलक्षणः सोऽपि न स्थितः। त्वदीयप्रत्युत्तरविलम्बान्ममेयमदक्षता प्राप्नोत्यहो कष्टं परप्रेष्यभाव इति भावः ॥ २१ ॥

इदमिति । क्षितिभर्त्तरि भूपे इदं निगद्य स्थिते तूष्णीम्भूते सति भुवः स्मरं भूलोकस्योर्व्यधिक्षि विभक्त्यर्थेऽव्ययीभावे नपुंसकह्रस्वः । भुवः स्मरं भूलोकमन्मथं तं पुरुषं दूतयतां दूतकृत्ये निषिद्धमत्यतिसुन्दरं एनं दूतं कुर्वतामित्यर्थः । यथा भरतः नोज्ज्वलं रूपवन्तं तथा दूतीत्वा बुधः कुर्य्यात्कदाचनेति । नयनैपुणव्यये नीतिशून्यत्वे मनोदधत्या निदधत्या एते नीतिशून्या इति जानन्त्येत्यर्थः । अतएव विदग्धया कुशलया दमयन्त्या स्वगतमप्रकाश्यं यथातथा आत्मन्येवाभ्यधायि अभिहितं सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतमिति दशरूपके लक्षणात् । अहो बुद्धिमान्द्यमेषां यदेनं कामं दूत्ये नियुक्तवन्त इति भावः ॥२२॥

स्वगतवाक्यमेवाह जलेति । जलाधिपो वरुणः लडयोरभेदात् जडाधिपोऽस्मि मयि विषये मां प्रतीत्यर्थः । त्वामदिशदतिसृष्टवान् ध्रुवं ? स प्रसिद्धः परेतराजो यमः प्रेतमुख्यस्त्वां प्रजिघाय प्रहितवान् स्फुटमसन्दिग्धं मरुतो देवाः तद्वता मरुत्वता इन्द्रेण वातुलेन च मरुतौ पवनामरावित्यमरः । प्रहितोऽसि निश्चितमूर्ध्वमुखेन तेजसा अग्निना

अथ प्रकामं निभृतस्मिता सती सतीकुलस्याभरणं किमप्यसौ।
पुनस्तदाभाषणविभ्रमोन्मुखं मुखं विदर्भाधिपसम्भवादधे॥२४॥
वृथापरीहास इति प्रगल्भता ननेति च त्वादृशि वाग्विगर्हणा।
भवत्यवज्ञा च भवत्यनुत्तरा दतः प्रदित्सुः प्रतिवाचमस्मि ते॥२५॥
कथं नु तेषां कृपयापि वागसा वसावि मानुष्यकलाञ्छने जने।
स्वभावभक्तिप्रवणं प्रतीश्वराः कया न वाचा मुदमुद्गिरन्ति वा॥२६

स्थूलदर्शां च नियोजितः प्रेषितोऽस्मि। ते च प्रेषितवन्तः त्वञ्च प्रेषितः सत्यमेवैतत् निष्फलोऽयं मारम्भ इति स्वगतमुवाचेत्यर्थः॥ २३॥

अथेति। अथ स्वगतोक्तेरनन्तरं सतीकुलस्य पतिव्रतावर्गस्य किमप्यनिर्वाच्यमाभरणमलङ्कारभूता असौ विदर्भाधिपसम्भवा वैदर्भी निभृतस्मिताऽगम्भीरस्मिता सती प्रकामं यथातथा पुनस्तेन सहाभाषणमेव विभ्रमो विनोदः तत्रोन्मुखमुत्सुकं मुखमास्यमादधे आवभाषे इत्यर्थः॥ २४॥

वृथेति। भवति पूज्ये त्वादृशि विषये वृथा परीहास इति वाक्। उपसर्गस्य घञ्यमनुष्ये बहुलमिति परे दीर्घः। प्रगल्भता प्रागल्भ्यं दोषावहेत्यर्थः। कार्यकारणयोरभेदोपचारः। ननेति च वागत्यन्तनिषेधोक्तिश्च आभीक्ष्ण्ये द्विर्भावः। विगर्हणा गर्ह्योक्तिः स्यादित्यर्थः। अनुत्तरात् उत्तराप्रदानात् अवज्ञा अनादरदोषो भवति अतो हेतोस्ते तुभ्यं प्रतिवाचं प्रत्युत्तरं प्रदित्सुः प्रदातुमिच्छुरस्मि परमार्थतस्तु प्रत्युत्तरानर्हमेव दाक्षिण्यात्तु वदामीति तात्पर्य्यम्॥ २५॥

कथमिति। तेषामिन्द्रादीनां कृपयापि कर्त्र्या मनुष्यस्य भावो मानुष्यकम्। योपधाद्गुरूपोत्तमाद्वुञ्। तदेव लाञ्छनं कलङ्को यस्य तस्मिन्निर्दोषजनविषयेऽस्मिन्नित्यर्थः। असौ वागस्मान् वृणीध्वेति वचनं कथमसावि सूता अनुचितमित्यर्थः। सूतेः कर्मणि लुङ्। वा अथवा ईश्वराः

अहो महेन्द्रस्य कथं मयौचिती सुराङ्गनासङ्गमशोभिताभृतः ।
ह्रदस्य हंसावलिमांसलश्रियो बलाकयेव प्रबला विडम्बना ॥२७॥
पुरः सुरीणां भण केव मानवी न यत्र तास्तत्र तु सापि शोभिका ।
अकाञ्चनेऽकिञ्चननायिकाङ्के किमारकूटाभरणेन न श्रियः ॥२८॥

स्वामिनः स्वभावभक्तिप्रवणं जनं प्रति कया वाचा मुदं नोद्गिरन्ति भक्तवात्सल्यात् नीचमपि भक्तजनं अत्युच्चयापि वाचा बहु कुर्वन्ति कृपालवः स्वामिन इत्यर्थः । तथा च तद्वचनमुपचारत्वेन गृह्यते न तु कर्त्तव्यतयेति भावः ॥ २६॥

अहो इति । सुराङ्गनासङ्गमेन शोभत इति तच्छोभि तस्य भावस्तत्ता तां बिभर्तीति तद्भृतो महेन्द्रस्य हंसावल्या मांसला मांसवती सान्द्रतरेति यावत् । सिध्मादित्वाल्लच । सा श्रीर्यस्य तस्य ह्रदस्य सरसो बलाकयेव मया निमित्तेन प्रबला महती विडम्बनापहासः कथमौचिती न कथञ्चिदित्यर्थः । अहो सति सुरस्त्रीजने मानुषीमनुसरतो महेन्द्रस्यामृतमप्यवधीर्योदकपानप्रवृत्तिरपि सम्भाव्यत एवेति भावः ॥ २७ ॥

पुर इति । सुरीणां सुरस्त्रीणां जातेरस्त्रीविषयादित्यादिना ङीप् । पुरोऽग्रे मानवी मानुषी केव न कापि तुच्छेत्यर्थः । एव शब्दो वाक्यालङ्कारे भण वद । किन्तु यत्र लोके ताः सुरस्त्रियो न सन्ति तत्र सा मानव्यपि शोभत इति शोभिका शोभमाना प्रत्ययस्थात् कापूर्वस्येतीकारः । अकाञ्चने काञ्चनाभरणरहिते विकारान्तोत्तरपदो बहुव्रीहिः। नास्ति किञ्चनास्येत्यकिञ्चनो निस्वः । उच्चावचाकिञ्चनाऽकुतोभयानीति । मयूरव्यंसकादिषु निपातनात् तत्पुरुषः । तस्य नायिका भार्या तस्या अङ्के देहे आरकूटस्य रीतेर्विकार आरकूटं रीतिः स्त्रियामारकूटमित्यमरः । तेनाभरणेन श्रियः शोभा न, किं सुरस्त्रीविहारिणो महेन्द्रस्य मानुषीति भावः ॥ २८ ॥

यथातथा नाम गिरः किरन्तु ते श्रुती पुनर्मे बधिरे तदुच्चरे ।
पृषत्किशोरी कुरुतामसङ्गतां कथं मनोवृत्तिमपि द्विपाधिपे ॥२९॥
अदो निगद्यैव नतास्यया तया श्रुतौ लगित्वाभिहितालिरालपत् ।
प्रविश्य यन्मे हृदयं ह्रियाहृताद्विनिर्य्यदाकर्णय मन्मुखाध्वना ॥३०॥
बिभेति चिन्तामपि कर्त्तुमीदृशीं चिराय चित्तार्पितनैषधेश्वरा ।
मृणालतन्तुच्छिदुरा सतीस्थितिर्लवादपि त्रुट्यति चापलात् किल
ममाशयः स्वप्नदशाज्ञयापि वा नलं विलङ्घ्यतरमस्पृशद्यदि !

यथातथेति । यथातथा येन तेन प्रकारेण गिरः किरन्तु वर्षन्तु नाम, किन्तु ते श्रुती श्रोत्रे पुनस्तदुच्चरे तासां गिरां वर्णमात्रेऽपि विषये बधिरे अश्रुतप्रायवत्ती इत्यर्थः । तथा हि पृषत्किशोरी कुरङ्गयुवतिः पृषश्च पृषते बिन्दौ कुरङ्गेऽपि च कीर्त्तित इत्यजपालः । द्विपाधिपेऽपि श्रेष्ठगजेऽपि असङ्गतामयुक्तां मनोवृत्तिमभिलाषं कथं कुरुतां कुर्य्यात् तत्प्रायमिदं वो मनीषितमिति भावः । अत्रापि दृष्टान्तालङ्कारः ॥ २९ ॥

अद इति । अदः इदं वचो निगद्योक्त्वैव नतास्यया च नतमुख्या तया दमयन्त्या श्रुतौ श्रोत्रे लगित्वा आसन्ना भूत्वाभिहिता कथिता आलिः सखी आलपत् आलपितवती किमित्यत आह । इयं दमयन्ती ह्रिया लज्जया मे मम हृदयं प्रविश्य यद्वच आह ब्रूते मम मुखेनैवाध्वना विनिर्यद्विनिर्गच्छत् तद्वचः आकर्णय शृणु ॥ ३० ॥

विभेतीति । चिराय चित्तेऽर्पितः नैषधेश्वरो नलो यया सा स्त्री ईदृशीं परविषयाश्चिन्तामपि कर्त्तुं विभेति कुत इत्यत आह । मृणालस्य तन्तुरिव छिदुरा छेदशीला कर्मकर्त्तरि कुरच् । सत्याः पतिव्रतायाः या स्थितिः मर्य्यादा सा लवादल्पादपि चापलाल्लौल्याद्धेतोः त्रुट्यति किल ॥३१॥

ममेति । अथवा ममाशयोऽभिप्रायः स्वप्नदशायाः आज्ञयापि

कुतः पुनस्तत्र समस्तसाक्षिणी निजैव बुद्धिर्विबुधैर्न पृच्छ्यते॥३२॥
अपि स्वमस्वप्नमसूषुपन्नमी परस्य दाराननवैतुमेव माम्।
स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय हृदापि तादृशीम्३
अनुग्रहः केवलएष मादृशे मनुष्यजन्मन्यपि यन्मनो जने।
स चेद्विधेयस्तदमी तमेव मे प्रसद्य भिक्षां वितरीतुमीशताम्॥३४
अपि द्रढीयः शृणु मे प्रतिश्रुतं स पीडयेत् पाणिमिमं न चेन्नृपः।
हुताशनोद्बन्धनवारिवारितां निजायुषस्तत् करवै स्ववैरिताम्३५

वा नलं विलङ्घ्य इतरं पुरुषं यदि अस्पृशत् प्राप्तवान्। तर्हि समस्तस्य साक्षिणी निजा स्वकीया बुद्धिरेव तत्र विषये कुतः पुनर्विबुधैः इन्द्रादिभिः न पृच्छ्यते नानुयुज्यते ॥ ३२ ॥

अपीति। अमी इन्द्रादयः देवा अस्वप्नं स्वप्नवर्जितं स्वमात्मानं परस्य दाराननवैतुं असूषुपत् स्वापितवन्तः स्वपेर्ण्यन्तात् द्युतिस्वाप्योः संप्रसारणं तदेवोपपादयति। स्वयं दुरध्वस्य दुर्मार्गस्यैवार्णवस्य नाविकाः कर्णधाराः सन्तः तथा तादृशीमपि मां हृदा विज्ञाय कथं स्पृशन्तु धर्मधना हि बुद्धिपूर्वकं परस्त्रियं न स्पृशन्ति ॥ ३३ ॥

अनुग्रह इति मनुष्येषु जन्म यस्य तस्मिन्नपि मादृशे जने यन्मनश्चित्तं वर्त्तते एष केवलोऽनुग्रहः सोऽनुग्रहो विधेयः कर्त्तव्यश्चेत्तर्हि अमी इन्द्रादयो देवाः प्रसद्य प्रसन्ना भूत्वा मे मह्यं नलमेव भिक्षां वितरीतुं ऋतो वेति दीर्घः। ईशतां ईश्वरा एव भवन्तु ॥ ३४ ॥

अपीति। हे धीर! द्रढीयः दृढतरं ऋतो हलादेर्लघोरिति रादेशः। मम प्रतिश्रुतं प्रतिज्ञामपि शृणु तामेव प्रतिज्ञामाह। स नृपो नलः इमं मदीयं पाणिं न पीडयेत् न गृह्णीयाच्चेत्तर्हि निजस्यायुषः स्वेनात्मना वैरितां शात्रवं हुताशनस्य उद्बन्धनस्य वारि च तैः वारितां निवृत्तिं करवै करवाणि ॥ ३५ ॥

निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा ।
घनाम्बुना राजपथे हि पिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते ॥३६॥
स्त्रिया मया वाग्मिषु तेषु शक्यते न जातु सम्यग्विवरीतुमुत्तरम् ।
तदत्र मद्भाषितसूत्रपद्धतौ प्रबन्धृतास्तु प्रतिबन्धृता न ते ॥ ३७ ॥
निरस्य दूतः स्म तथा विसर्ज्जितः प्रियोक्तिरप्याह कटुष्णमक्षरम् ।
कुतूहलेनेव मुहुः कुहूरवं विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥३८॥
अहो मनस्त्वामनु तेऽपि तन्वते त्वमप्यमीभ्यो विमुखीति कौतुकम्

न चात्मनो व्यापादनमयुक्तमित्यत्राह निषिद्धमिति । यत्रापदि यदि सती धर्म्या क्रिया सर्वथा सर्वप्रकारेण नावति न रक्षति तत्र निषिद्धमप्याचरणीयम् । तथा हि राजपथे राजवीथ्यामपि घनाम्बुना सान्द्रोदकेन मेघजलेनापि पिच्छिले पङ्किले सति बुधैः विद्वद्भिः अपथेनामार्गेणापि क्वचित् प्रदेशे गम्यते ॥ ३६ ॥

स्त्रियेति । वाग्मिषु वावदूकेषु तेष्विन्द्रादिषु विषयेषु स्त्रिया मया उत्तरं यथा भवति तथा विवरीतुं प्रपञ्चयितुं जातु कदाचिदपि न शक्यते तत् तस्मात् कारणात् अत्र मद्भाषितानां वचनानामेव सूत्राणां पद्धतौ मार्गे विषये तव प्रबन्धृता प्रबन्धकर्तृत्वमस्तु प्रतिबन्धृता प्रतिबन्धकर्तृत्वं नास्तु तृजन्ताद्बन्धेस्तल् ॥ २७ ॥

निरस्येति । स दूतः तथा तेन प्रकारेण निरस्य न्यक्कृत्य विसर्जितः सन् कुतूहलेन हेतुना डिम्भेन शिशुना मुहुः कुहूरवं विडम्ब्य अनुकृत्य प्रकोपितः पिकः कोकिल इव प्रिया उक्तिः वचनं यस्य स च कटुष्णमक्षरमाह स्म ॥ २८ ॥

अहो इति । ते इन्द्रादयोऽपि त्वामनु त्वामुद्दिश्य मनस्तन्वते कुर्वन्ति अहो आश्चर्यं त्वमपि अमीभ्यो इन्द्रादिभ्यः विमुखी पराङ्मुखीति । यत् कौतुकं चित्रमित्यर्थः । किञ्च क्वचा लोके निर्धनिर्धनंनेति कथा

वा निधिर्निर्धनमेति किन्नु तं स वाक्कवाटं घटयन्निरस्यति॥३९॥

महाखिलस्त्रीषु वहेऽवहेलया महेन्द्ररागाद्गुरुमादरं त्वयि ।
त्वमीदृशि श्रेयसि संमुखेऽपि तं पराङ्मुखी चन्द्रमुखि ! न्यवीवृतः ॥ ४० ॥

दिवौकसं कामयते न मानवी नवीनमश्रावि तवाननादिदं ।
कथं न वा दुर्ग्रहदोष एष ते हितेन सम्यग्गुरुणापि शाम्यते॥ ४१ ॥

स निर्धनः । तं विधिं वाक्कवाटं घटयन् निरस्यति द्वारं पिधाय निरस्यतीत्यर्थः । ईदृशं यस्त्वेष्टितमिति दृष्टान्तालङ्कारः ॥ ३९ ॥

महेति । हे चन्द्रमुखि ! महेन्द्रस्य रागाद्धेतोः । त्वयि गुरुं महान्तमादरमखिलस्त्रीषु विषये अवहेलया अनादरेण सह वहे त्वय्यादरमन्यास्वनादरं च वहामि त्वामेव भाग्यवतीं मन्य इत्यर्थः । वहेः स्वरितेत्त्वादात्मनेपदं सहोक्तिरलङ्कारः । ईदृशि श्रेयसि सम्मुखे अभिमुखे सत्यपि त्वं पराङ्मुखी सती तं पूर्वोक्तमादरं न्यवीवृतः निवर्त्तितवत्यसि वृतेर्णौ चङि सिचिरूपं उरदित्यकारे सन्वद्भावे चाभ्यासेकारः ॥ ४० ॥

दिवौकसमिति । मानवी मानुषी दिवौकसं देवं न कामयते नापेक्षत इति इदं नवीनं अश्रुतपूर्वं वचस्तवाननादश्रावि श्रुतं हन्त एष ते तव दुर्ग्रहदोषः सूर्यादिग्रहदोषश्च अथार्कादि नवग्रहा इति वैजयन्ती । हितेनाप्तेनानुकूलेन च गुरुणा पित्रादिना गीष्पतिना च गुरुर्गीष्पतिपित्राद्योरित्यमरः। कथं वा सम्यङ्न शाम्यते न निवर्त्त्यते शमेर्ण्यन्तात् कर्मणि लट् । गुरुरात्मवतां शास्ता किं कुर्वन्ति ग्रहाः सर्वे केन्द्रस्थाने बृहस्पतौ इति वचनादपत्यथासमे ग्रहान्तरनिरासे च गुर्वोरेवाधिकारादिति भावः । अत्राभिधायाः प्रकृतार्थनियन्त्रणादप्रकृतार्थप्रतीतिर्ध्वनिरेव न श्लेषः ॥ ४१ ॥

अनुग्रहादेव दिवौकसां नरो निरस्य मानुष्यकमेति दिव्यतां।
अयोऽधिकारे स्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि॥४२
हरिं परित्यज्य नलाभिलाषुका न लज्जसे वा विदुषीब्रुवा कथं
उपेक्षितेक्षोः करभाच्छमीरतादुरु वदे त्वां करभोरु! भीइति॥४३

अथ मानुषीं देवा न ग्रहीष्यन्तीति यदि नदपि नेत्याह । अनुग्रहादिति । दिवमोको येषां द्यौरोको येषामिति वा पृषोदरादित्वात् साधुः । तेषां दिवौकसां देवानामनुग्रहादेव नरो मानुष्यकं मनुष्यभावं निरस्य योपधाद्गुरूपोत्तमाद्वुञिति वुञि यस्येति लोपे प्रकृत्या के राजन्यमनुष्ययुवान इति प्रकृतिभावादपत्यस्य च तद्धितेनातीति यलोपाभावः । दिव्यतामेति तत्परिग्रहाद्देवभूयमपि ते भवितेति भावः । तथा हि रसः पारदः । देहधात्वम्बुपारद इति रसशब्दार्थेषु विश्वः । स हि संस्कारबलाल्लोहान्तरसुवर्णीकरणे समर्थः सिद्धरस उच्यते । तत्स्पृशामयसामपि तत्स्पर्शात् स्वर्णीभूतायसामपीत्यर्थः । अयोऽधिकारे अयः प्रस्तावे स्वरितत्वमधिकृतत्वं तेषु परिगणनेति यावत् स्वरितेनाधिकार इति वैयाकरणपरिभाषाश्रयणादेवं व्यपदेशः । स्वृ शब्दोपतापयोरिति धातोर्दैवादिकात् क्तः । कुत इष्यते नेष्यत इवेत्यर्थः । रसस्पृष्टायसः स्वर्णीभाव इव तवापि तत्स्पृष्टाया देवत्वमेव न मानुष्यत्वमित्यर्थः । तद्दृष्टान्तालङ्कारः स्पष्टः ॥ ४२ ॥

हरिमिति । हरिमिन्द्रं देवं परित्यज्य नलं नरमभिलाषुका ताच्छील्ये नाभिलषन्ती लषपतेत्यादित्याना उकञ् । न लोकेत्यादिना षष्ठीप्रतिषेधात् कर्मणि द्वितीयायां गमिगाम्यादिपाठात् समासः । अतएव विदुषी ज्ञात्री विदेः शतुर्वसुः उगितश्चेति ङीप् । ब्रवीतीति ब्रुवा विदुष्या ब्रुवा विदुषीब्रुवेति कर्मणि षष्ठीसमासः । विदुषीमात्मानं ख्यापयन्ती पण्डितंमन्येत्यर्थः । घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्व इति ह्रस्वः । ब्रुञः पचाद्यच् एतस्मादेव निपातनादुवङादेश-

विहाय हा सर्वसुपर्वनायकं त्वयाहृतः किं नरसाधिमभ्रमः ।
मुखं विमुच्य श्वसितस्य धारया वृथैव नासापथधावनश्रमः ॥४४॥

योरभावः । ईदृशी त्वं कथं न लज्जसे मणिं विहाय काचग्रहणवत् कथं न लज्जाकरमित्यर्थः । अतएवाद्य त्वा महमेवं व्याकरिष्यामीत्याह उपेक्षितेति । उपेक्षितेक्षोः परिहृतेक्षुकाण्डात् गभीरताच्छमीभक्षणलालसात् करभादुष्ट्रात् उरु मौढ्येनाधिकान्त्वाम्भोः ! करभोरु ! हे करभोर्विति सम्बोध्य वदे वक्ष्यामि भासनादिसूत्रेण ज्ञानार्थे तङ् । न तु करभः करभागविशेषः तद्वदूरू यस्या इति व्युत्पत्त्येत्यर्थः । करभो मणिबन्धादि कनिष्ठान्त उष्ट्रक इति उभयत्रापि विश्वः । अथ सम्बोधनार्थकाः स्युः प्याट् पाडङ्ग । हे है भोरित्यव्ययेषु अमरः । चादिपाठान्निपातसंज्ञायामोदिति प्रगृह्यत्वात् प्रकृतिसन्धिः । अनव्ययपक्षेऽपि भवच्छब्द तकारस्य रुत्वादिकार्ये यलोपस्यासिद्धत्वादयादेशनिवृत्तौ भो इत्येव सन्धिः । किन्त्वत्र स्त्रीसम्बोधने स्त्रियामुगितश्चेति ङीप्प्रत्यये भवतीति संबुद्धिः स्यात् । न तु भो इति । करभोर्वित्यत्र करभ इवोरू यस्या इति ऊरूत्तरपदादौपम्य इत्यूङ्प्रत्ययः । करभादूरुः करभोरुः इति पक्षे तु मनुष्यजातिविवक्षायां ब्रह्मबन्धूरित्यादिवत् ऊङ् तदन्तत्वादूङ्प्रत्यये नदीह्रस्वः । यथाह वामनः मनुष्यजातेर्विवक्षापक्षे इति । अहो कष्टमुष्ट्रचेष्टितवत् त्वच्चेष्टितं हास्यास्पदं जातमिति भावः ॥ ४३ ॥

विहायेति । किञ्च त्वया सर्वसुपर्वनायकं देवेन्द्रं विहाय नरे मनुष्ये साधिमभ्रमः । साधुत्वभ्रान्तिः पृथ्वादिपाठात् साधोरिमनिच्प्रत्ययः । किं किमर्थं आहृतः अथवा नियतिः केन लुप्यत इत्याशयेनाहेति । श्वसितस्य धारया निश्वासपरम्परया कर्त्र्या मुखं मुखद्वारं विपुलं विमुच्य वृथैव नासापथेन नासारन्ध्रेणातिक्लिष्टेन धावनश्रम आहृतः खल्विति शेषः । तद्वत्तवापि ईदृशी भवितव्यतेति भावः दृष्टान्तालङ्कारः ॥ ४४ ॥

तपोऽनले जुह्वति सूरयस्तनूर्दिवे फलायान्यजनुर्भविष्णवे।
करे पुनः कर्षति सैव विह्वला बलादिव त्वां वलसे न वालिशे! ४५
यदि स्वमुद्बन्धुमना विना नलं भवेर्भवन्तीं हरिरन्तरिक्षगाम्।
दिविस्थितानां प्रथितः पतिस्ततो हरिष्यति न्याय्यमुपेक्षते हि कः।
निवेक्ष्यसे यद्यनले नलोज्झिता सुरे तदस्मिन्नहतो दया हता।

तप इति। किञ्च सूरयः सन्तः अन्यस्मिन् जनुषि जन्मान्तरे भविष्णवे भाविन्यै। भूष्णुर्भविष्णुर्भवितेत्यमरः। भुवश्चेति इष्णुच्प्रत्ययः। भाषायामपीष्यते भाषितपुंस्कत्वात् पुंवद्भावः। दिवे स्वर्गायैव फलाय तनूः शरीराणि तपोऽनले जुह्वति त्यजन्ति अदभ्यस्तादित्यदादेशः। त्वां पुनः सा प्राणान्तिकतपःसाध्या द्यौरेव विह्वला उत्सुका सती बलाद्बलात्कारादिव करे कर्षति हे वालिशे! मूढे! शिशावज्ञे च वालिश इत्यमरः। न वलसे न चलसि नेच्छसीत्यर्थः। अहो दुर्बुद्धिरिति भावः॥४५॥

अथ यदुक्तं नलालाभे हुताशनोद्बन्धनादिना मरिष्यामीति तत्रोत्तरमाह यदीत्यादिना चतुष्टयेन। हे मुग्धे! नलं विना नलालाभे स्वमात्मानमुद्बन्धुं मनो यस्याः सा उद्बन्धुमनाः पाशेन मर्तुकामा तुं काममनसोरपीति मकारलोपः। भवेर्यदि स्याश्चेत् ततोऽन्तरिक्षगां भवन्तीं दुर्मरणदोषादन्तरिक्षगतां सतीं त्वामिति शेषः दिविस्थितानामन्तरिक्षगतानां स्वर्गतानां च प्रथितः पतिः प्रसिद्धः स्वामी हरिरिन्द्रो हरिष्यति ग्रहीष्यति जन्मान्तरेऽपि त्वां न त्यक्ष्यतीत्यर्थः। तथा हि न्याय्यं न्यायप्राप्तं वस्तु क उपेक्षते न कोऽपीत्यर्थोऽर्थान्तरन्यासः। अस्वामिकद्रव्यस्य राजगामित्वं न्याय्यं इति भावः॥ ४६॥

निवेक्ष्यस इति। हे मुग्धे! नलेनोज्झिता सती अनले निवेक्ष्यसे यदि जीवननैःस्पृह्यादग्निं प्रवेक्ष्यसि चेदित्यर्थः। आधारत्वविवक्षया सप्तमी नेर्विश इत्यात्मनेपदम्। तर्हि अस्मिन्ननले अनलाख्ये सुरेऽपि तद-

चिरादनेनार्थनयापि दुर्लभं स्वयं त्वयैवाङ्ग! यदङ्गमर्प्यते ॥४७॥
जितं जितं तत्खलु पाशपाणिना विना नलं वारि यदि प्रवेक्ष्यसि
तदा त्वदाख्यान् वहिरप्यसूनसौ पयःपतिर्वक्षसि वक्ष्यतेतराम् ४८
करिष्यसे यद्यत एव दूषणा दुपायमन्यं विदुषी स्वमृत्यवे ।
प्रियातिथिः स्वेन गता गृहान् कथं न धर्मराजं चरितार्थयिष्यसि

धिष्ठातरि देवे च न भूतमात्र इति भावः । महती दया आदृता कृता स्वीकृतेत्यर्थः । कुतः यद्यस्मादनेनानलेन चिरादर्थनया याच्ञयापि दुर्लभमङ्गं शरीरं अङ्ग ! अयि ! त्वयैव स्वयं आत्मनैव अर्प्यते दीयते तथा स स्फुटतममेव जीवग्राह्यं ग्रहीष्यतीति भावः । अत्र नलालाभे जीवितजिहासोरनलबुद्धिग्रहणरूपानर्थोक्तेर्विषमप्रभेदः । विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना चासौ विषमालङ्कृतिस्त्रिधेति लक्षणात् ॥ ४७ ॥

जितमिति । हे मुग्धे ! नलं विना वारि प्रवेक्ष्यसि यदि मरणार्थमिति शेषः । अथेदानीं पाशः पाणौ यस्य तेन पाशपाणिना वरुणेन प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः । जितं जितमभीक्ष्णं जितं खलु । भावे क्तः । नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः । नित्यमाभीक्ष्ण्ये च इति काशिका । तदा वारिप्रवेशकाले असौ पयःपतिर्वरुणोऽपि त्वदाख्यान् त्वन्नामकान् । बहिरप्यसून् बहिर्वर्त्तिनः प्राणान् वक्षसि वक्ष्यतेतरां वहेः स्वरितत्वात् लृटि तङि तरबामुप्रत्ययः । सोऽपि त्वां जीवग्राहं ग्रहीष्यतीत्यर्थः । अतएव पूर्व एवालङ्कारः ॥ ४८ ॥

करिष्यस इति । अथ विदुषी पण्डिता विदग्धा त्वं यदि तु अतएव दूषणादेतस्मादेवोद्बन्धनादिना स्वमृत्यवे स्वमरणाय अन्यमुपायमनशनादिकं करिष्यसे तदा प्रियातिथिरतिथिप्रिया त्वं स्वेन स्वतएव गृहान् धर्मराजगेहं गता सती धर्मराजं वैवस्वतमतिथिसत्कर्मभिः

निषेधवेशोविधिरेष तेऽथवा तवैव युक्ता खलु वाचि वक्रता।
विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः ५०
भ्रमामि ते भैमि! सरस्वतीरस प्रवाहचक्रेषु निपत्य कत्यदः।
त्रपामनादृत्य मनाक् कुरु स्फुटं कृतार्थनीयः कतमः सुरोत्तमः ५१

भावः। कथं न चरितार्थयिष्यसि न कृतार्थं करिष्यसि कर्त्तव्यमेवेदं कृतयुगधर्मत्वात्। स्वयं गत्वार्थिमनोरथपूरणस्येति भावः ॥ ४९ ॥

निषेधेति। हे विदग्धे! अथवा तव एषः इन्द्रादिनिषेधो निषेधवेषो निषेधाकारो विधिरङ्गीकार एव तथा हि वाचि वचने वक्रता वक्रोक्तिः चातुरी व्यङ्ग्योक्तिचातुरी यावत् सा तवैव युक्ता खलु?। कुतः इदं वक्रवाक्यं वञ्चनाचातुर्यं यस्य ध्वनेर्व्यञ्जकशक्तेर्विजृम्भितं विजृम्भणं नपुंसके भावे क्तः। विदग्धनारीवदनं सूक्तिचतुरस्त्रीमुखं तदाकरस्तस्य ध्वनेरुत्पत्तिस्थानमित्यर्थान्तरन्यासः। ततः स्थूणानिखनन न्यायेन विधिमेव दृढयितुमेतन्निषेधनादिकमिति निषेधेन विधिरेव व्यज्यत इति भावः ॥५०॥

एवं सुरस्वीकारपक्षमेव सिद्धवत्कृत्य निर्बध्य पृच्छति भ्रमामीति। हे भैमि! ते तव सरस्वती वाक् नदीभेदश्च तस्या रसः शृङ्गारो जलञ्च तस्य प्रवाहस्तस्य चक्रेषु पुटभेदाख्यावर्त्तेषु वक्रोक्तिष्वित्यर्थः। वक्रेष्विति पाठेऽप्ययमेवार्थः। वक्राणि पुटभेदाः स्युरित्यत्र वक्राणीति पाठस्यापि स्वामिनाङ्गीकारात् कति कियन्त्यमूनि चक्राणि यस्मिन् कर्मणि तद्यथा तथा निपत्य भ्रमामि सुहाख्यावर्त्ते च अत्र वाच्य प्रतीयमानयोरभेदाध्यवसायान्निपतनादिक्रियानिर्वाहः। अलं वक्रोक्त्येति तात्पर्यं किन्तु कतमः सुरोत्तमः कृतार्थनीयो वरणीयः एतदेव त्रपां मनागपाकृत्य शिथिलीकृत्य स्फुटं कुरु व्यक्तं ब्रूहीत्यर्थः। नात्र लज्जितव्यं आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेदिति न्यायादिति भावः ॥ ५१ ॥

मतः किमैरावतकुम्भकैतव प्रगल्भपीनस्तनदिग्धवस्तव ।
सहस्रनेत्रान्न पृथक् मते मम त्वदङ्गलक्ष्मीमवगाहितुं क्षमः ॥ ५२ ॥
प्रसीद तस्मिन् दमयन्ति ! सन्ततं त्वदङ्गसङ्गप्रभवैर्जगत्प्रभुः ।
पुलोमजालोचनतीक्ष्णकण्टकैस्तनुं घनामातनुतां स कण्टकैः ॥ ५३ ॥
अबोधितत्वं दहनेऽनुरज्यसे स्वयं खलु क्षत्रियगोत्रजन्मनः ।

अथैकस्मिन्नेव नामग्राहमनुरागमष्टभिः पृच्छति मत इत्यादि । हे भैमि ! ऐरावतकुम्भयोः कैतवेन मिषेणेत्यपह्नवभेदः । प्रगल्भौ कठोरौ पीनौ च स्तनौ यस्यास्तस्या दिशः प्राच्याः पतिरिन्द्रस्तव मतः सम्मतः किं ? किंशब्दः प्रश्ने मतिबुद्धीत्यादिना वर्त्तमाने क्तः । क्तस्य च वर्त्तमान इति तद्योगात्तवेति षष्ठी । युक्तञ्चैतदित्याह । मम मते मत्पक्षे त्वदङ्गस्य लक्ष्मीं लावण्यसम्पदं अवगाहितुं सम्यग्गृहीतुं सहस्रनेत्रात् सहस्राक्षात् पृथगन्योऽपि नेत्यर्थः । पृथग्विनेत्यादिना पक्षे पञ्चमी क्षमो न । अत्रोत्तरवाक्यार्थेन पूर्ववाक्यार्थसमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गं हेतोर्वाक्यार्थहेतुत्वे काव्यलिङ्गमुदाहृतमिति लक्षणात् तस्य पूर्वोक्तापह्नवेन संसृष्टिः ॥ ५२ ॥

प्रसीदेति । हे दमयन्ति ! तस्मै इन्द्राय प्रसीद प्रसन्ना भव क्रियाग्रहणाच्चतुर्थी । जगत्प्रभुः स इन्द्रः सततं तनुं निजाङ्गं त्वदङ्गसङ्गप्रभवैरतएव पुलोमजायाः शच्याः लोचनयोस्तीक्ष्णकण्टकैर्निशितवर्तुलाग्रादिद्रुमावयवविशेषैस्तथा वज्राकारैरित्यर्थः । कण्टकैः पुलकैः वेणौ द्रुमाङ्गे रोमाञ्चे क्षुद्रशत्रौ च कण्टका इति उभयत्रापि वैजयन्ती । घनां सान्द्रां आतनुतां करोतु शच्याः सपत्नी भवेत्यर्थः । अत्र पुलकेषु कण्टकत्वारोपाद्रूपकालङ्कारः ॥ ५३ ॥

अबोधीति । हे विलासिनि ! विलसनशीले ! वीकषलसकत्थस्रम्भ इति घिनुण्प्रत्ययः । तत्त्वं त्वमनोरथस्वरूपमबोधि बुद्धं कर्मणि

विना तमोजस्विनमन्यतः कथं मनोरथस्ते बलते विलासिनि ।५४
त्वयैकपत्न्या तनुतापशङ्कया ततोनिवर्त्त्यं न मनः कथञ्चन ।
हिमोपमा तस्य परीक्षणक्षणे सतीषु वृत्तिः शतशोनिरूपिता ॥५५॥
स धर्म्मराजः खलु धर्म्मशीलया त्वयास्ति चित्तातिथितामवापितः
ममापि साधु प्रतिभात्ययं क्रमश्चकास्ति योग्येन हि योग्यसङ्गमः ५६

बुङ् । तदेवाह स्वयं त्वमित्यर्थः । दहने जातवेदसि अग्निदेवे अनुरज्यसे अनुरक्तासि खलु रञ्जेर्दैवादिकात् स्वरितेतः कर्त्तरि लट् अनिदितामित्यादिना अनुनासिकलोपः । कुतः क्षत्त्रियगोत्रे जन्म यस्यास्तस्यास्ते ओजस्विवंशजाया इत्यर्थः । मनोरथः ओजस्विनं तमग्निं विनाऽन्यतोऽन्यत्र सार्वविभक्तिकस्तसिः । कथं बलते प्रवर्त्तते न कथमपीत्यर्थः । एतेनोभयोरोजस्वित्वेन समागमानुरूप्याद्दहनानुरागित्वं ते युक्तमिति समर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गं व्यक्तमेव ॥ ५४ ॥

न च दाहाद्भेतव्यमित्याह त्वयेति । एकपत्न्या सुख्रपतिव्रतया अतएव त्वया तनुतापशङ्कया देहदाहसम्भावनया वा ततोऽग्नेर्मनः कथञ्चन कथञ्चिदपि न निवर्त्त्यं न निवर्त्तयितव्यं वृतेर्ण्यन्तादचो यदिति यत्प्रत्ययः । कुतस्तस्याग्नेः परीक्षणक्षणे अग्निदिव्येन पातिव्रत्यपरीक्षावसरे सतीषु विषये हिमेनोपमा साम्यं यस्याः सा वृत्तिः । शतशः शतकृत्वो निरूपिता निर्धारिता न तु घुणाक्षरवत् सकृदित्यर्थः । तस्मात् त्वया न भेतव्यं प्रत्युत सैव साध्वी त्वां दग्धुं बिभेतीति भावः । अत्र पूर्ववाक्यस्यैकपत्नीपदार्थहेतुकत्वात्पदार्थहेतुकमेकं काव्यलिङ्गं तस्याप्युत्तरवाक्यार्थहेतुकत्वादर्थहेतुकञ्चेत्यनयोः सङ्करः ॥ ५५ ॥

स इति । अथ वा स प्रसिद्धो धर्मराजो यमः धर्मं शीलयतीति धर्मशीला धर्मचारिणी शीलिकामिव्यभिचारिभ्यो णः । तया त्वया-

अजातविच्छेदलवैः स्मरोत्सवैरगस्त्यभासा दिशि निर्मलत्विषि ।
धृतावधिं कालममृत्युशङ्किता निमेषवत्तेन नयस्व केलिभिः ॥५७
शिरीषमृद्वी वरुणं किमीहसे पयःप्रकृत्या मृदुवर्गवासवम् ।
विहाय सर्वान् वृणुते स्म किन्नसा निशापि शीतांशुमनेन हेतुना ॥५८
असेवि यस्त्यक्तदिवा दिवानिशं श्रियः प्रियेणानणुरामणीयकः ।

चिन्तातिथितां चित्तगोचरत्वमवापितोऽस्ति खलु ? कामितः किमित्यर्थः । खलुशब्दो जिज्ञासायां निषेधवाक्यालङ्कारजिज्ञासानुनये खल्वित्यमरः । तथा चेद्वरमित्याह । ममाप्ययं क्रमः क्रमणं प्रवृत्तिः साधु यथा तथा प्रतिभाति परिस्फुरति तथा हि योग्येन सह योग्यस्य समागमः । सम्बन्धस्सकान्ति शोभते उभयोर्धार्मिकत्वादिति भावः । अर्थान्तरन्यासोऽलङ्कारः ॥ ५६ ॥

अजातेति । हे भैमि ! अगस्त्यभासा निर्मलत्विषि दिशि दक्षिणस्यां दिशीत्यर्थः । तेन धर्मराजेन सह वृद्धो यूनेति ज्ञापकात् सहाप्रयोगेऽपि सहार्थे तृतीया । अविद्यमानं मृत्युशङ्कितं मरणशङ्का यस्याः सा सती अन्तकस्यैवात्मदासत्वादिति भावः । अजातो विच्छेदलवो विघ्नलेशो येषु तैः स्मरोत्सवैः सम्भोगैरेव केलिभिर्विनोदैः धृतोऽवधिरन्तो यस्य तमनन्तकालं निमेषवत् निमेषतुल्यं नयस्व यापय वरान्तरस्वीकारे दुर्लभमिदं सौभाग्यमिति भावः ॥ ५७ ॥

शिरीषेति । अथवा शिरीषमृद्वी त्वं पयःप्रकृत्या जलस्वभावेन वरुणशरीरस्य तथात्वात् कारणगुणवशेनेत्यर्थः । मृदुवर्गं वासवमिन्द्रं श्रेष्ठं वरुणमीहसे किमिच्छसि वा तदपि योग्यमेवेति शेषः । तथा हि सा मृदुस्वभावा निशापि अनेनैव मृदुस्वभावत्वेन हेतुना कारणेन सर्वनाम्नस्तृतीया । सर्वांस्तीक्ष्णान् सूर्यादीन् विहाय शीतांशुं न वृणुते स्म. किं. ? वृणुत एव दृष्टान्तालङ्कारः ॥ ५८ ॥

सहामुना तत्र पयःपयोनिधौ कृशोदरि ! क्रीड़ यथामनोरथम् ॥५९
इति स्फुटं तद्वचसस्तयादरात् सुरस्पृहारोपविडम्बनादपि ।
कराङ्कसुप्तैककपोलकर्णया श्रुतञ्च तद्भाषितमश्रुतञ्च तत् ॥६०॥
चिरादनध्यायमवाङ्मुखी मुखे ततः स्म सा वासयते दमस्वसः ।

असेवीति । हे कृशोदरि ! अनणु महद्रामणीयकं रमणीयत्वं यस्य सोऽति रमणीयो यः पयःपयोनिधिः त्यक्ता द्यौः येन तेन श्रियः प्रियेण लक्ष्मीपतिना दिवा च निशा च दिवानिशं अहोरात्रयोरित्यर्थः । द्वन्द्वैकवद्भावे अत्यन्तसंयोगे द्वितीया असेवि सेवितः तत्र पयःपयोनिधौ क्षीराब्धौ अमुना वरुणेन सह यथामनोरथं यथेच्छं क्रीड़ लक्ष्मीनारायणवद्देवेति भावः ॥ ५९ ॥

इतीति । इतीत्थं स्फुटं स्फुटार्थं तत्पूर्वोक्तं तदाभाषितं नलवाक्यं तद्वचसो नलवचसः आदरात् सम्बन्धसामान्ये षष्ठी । तद्वचनस्यानुरागाच्चेत्यर्थः । सुरेष्विन्द्रादिषु स्पृहाया अभिलाषस्यारोप एव विडम्बनं परिहासः तस्मादपि कारणात् कराङ्के करोत्सङ्गे सुप्तं विश्रान्तमेकं कपोलकर्णं द्वन्द्वादौ श्रुतस्य प्रत्येकमभिसम्बन्धादेककपोल एककर्णञ्च यस्यास्तयेत्यर्थः । तया दमयन्त्या श्रुतमश्रुतञ्च सुरस्पृहारोपरोषात् करतलेनैकं कर्णं अपिधाय नलादरादेकेन श्रुतं न तु द्वाभ्यामित्यर्थः । एककपोलरोधस्तु चिन्तावशादिति मन्तव्यं अत्रादरविडम्बनयोः श्रुताश्रुताभ्यां हेतुहेतुमद्भावेन यथासंख्यसम्बन्धाद् यथासंख्यालङ्कारः ॥ ६० ॥

चिरादिति । ततो नलवाक्यानन्तरं सा दमस्वसा दयमन्ती अवाङ्मुखी चिन्ताभरात् नम्रमुखी सती मुखे वाचि चिराच्चिरमनध्यायं मौनं अध्याय न्यायेत्यादिना घञन्तो निपातः । गतिबुद्धीत्यादिना अणिकर्तुः कर्मत्वं वासयते स्म वासितवती लट् स्मे भूते लट् न पादमित्यादिनावसेर्ण्यन्तात्तस्य परस्मैपदम् ; प्रतिषेधो णिचश्चेत्यात्मनेपदं किन्तु विचष्ट इति

क्षतायतश्वासविमोक्षणाथ तं क्षणाद्बभाषे करुणं विचक्षणा ॥६१॥
विभिन्दता दुष्कृतिनीं मम श्रुतिं दिगीन्द्रदुर्वाचिकसूचिसञ्चयैः ।
प्रयातजीवामिव मां प्रति स्फुटं कृतं त्वयाप्यन्तकदूततोचितं ॥६२॥
त्वदास्यनिर्यन्मदलीकदुर्यशो मसीमयत्वाल्लिपिरूपभागिव ।
श्रुतिं ममाविश्य भवद्दुरक्षरं सृजत्यदः कीटवदुत्कटा रुजः ॥६३॥
तमालिरूचेऽथ विदर्भजेरिता प्रगाढमौनव्रतयैकया सखी ।

विचक्षणा वक्त्री सा अनुदात्तेतश्च हलादेरिति युच्प्रत्यये टाप्। असनयोश्च प्रतिषेधो वक्तव्य इति ख्याञादेशाभावः। क्षतमायतश्वासस्य विमोक्षणं विमोचनं यया सा सती दीर्घं निश्वस्येत्यर्थः। मोक्षयतेरौरादिकात् ल्युट्। तं नलं क्षणात् क्षणं विलम्ब्येत्यर्थः। करुणं दीनं यथा तथा बभाषे एते मौनश्वासावाङ्मुखत्वादयश्चिन्तानुभावा ज्ञेयाः। ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृदिति लक्षणात् ॥६१॥

विभिन्दतेति। दुष्कृतिनीं पापिष्ठां पापोक्तिग्राहित्वादिति भावः। मम श्रुतिं श्रोत्रं दिगीन्द्राणामिन्द्रादीनां दुर्वाचिकानि दुःखसन्देश एव सूचयस्तासां सञ्चयैः समूहैर्विभिन्दता विदारयता परपुरुषप्रसक्तत्वादिति भावः। त्वयापि प्रयातो जीवो जीवितं यस्यास्तां प्रेतामिव मां प्रति स्फुटं व्यक्तं यथा तथा अन्तकदूतताया यमदूतत्वस्योचितं कर्म कृतं पतिव्रतानां परपुरुषवार्त्ताऽपि यमदूतताया नातिरिच्यत इति भावः ॥६२॥

त्वदिति। त्वदास्यान्निर्यत् निर्गच्छत् ममालीकमारोपितार्थत्वान्मिथ्याभूतं दुर्यशो दुःसमज्ञा तदेव मसीमयत्वाल्लिपिरूपभाक् लिप्यक्षरतां प्राप्तमिव स्थितमदः इदं भवतो दुरक्षरमतः क्रिमियादि दुर्वाक्यं कीटवद्दंशादिजन्तुवत् मम श्रुतिं श्रोत्रमाविश्य उत्कटा महत्तराः रुजः व्यथाः सृजति जनयति रूपकोत्प्रेक्षासंकीर्णेयमुपमा ॥ ६३ ॥

तमिति। अथानन्तरं विदर्भजेरिता दमयन्तीचोदिता सखिः

त्रपां समाराधयतीयमन्यया भवन्तमाह स्म रसज्ञया मया॥६४॥

तमर्च्चितुं संवरणस्रजा नृपं स्वयम्बरः सम्भविता परेद्यवि।
ममासुभिर्गन्तुमनाः पुरःसरै स्तदन्तरायः पुनरेष वासरः॥६५॥

तदद्य विश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकिनी।
नखैः किलाख्यायि विलिख्य पक्षिणा तवैव रूपेण समः स मत्प्रियः

सखी तं नलमूचे किमित्यत आह। सौम्य! इयं सखी भैमी प्रगाढं दृढं मौनव्रतं यस्मात्तया एकया रसज्ञया जिह्वया त्रपां समाराधयति भजते देवताराधने मौनं युक्तमिति भावः। मया मद्रूपया अन्यया रसज्ञया जिह्वया कामाभिज्ञया च भवन्तमाह स्म। अनन्तरवाच्यं लज्जया स्वयं वक्तुमशक्ता मन्मुखेन वक्तीत्यर्थः॥६४॥

स्वयमेव दमयन्ती भूत्वाह तमित्यादि। मम संवरणस्रजा तं नृपं नलं अर्च्चितुमर्च्चयितुमर्च्चतेर्भौवादिकात्तुमुन्। परेद्यवि परेऽहनि सद्यः परेत्यादिना निपातनात् साधुः। स्वयंवरः सम्भविता भविष्यति किन्तु पुरःसरन्तीति पुरःसरैः पुरोगैः पुरोऽग्रतोऽग्रेषु सर्त्तेरित्यप्रत्ययः। ममासुभिः प्राणैः सह गन्तुं मनो यस्य स गन्तुमनाः प्राणानादाय गन्तुकाम इत्यर्थः। तुं काममनसोरपीति मकारलोपः। एष वासरः पुनः वासरस्तु तस्य स्वयम्बरस्यान्तरायो विघ्नः दिनमात्रविलम्बोऽपि दुःसह इति भावः। एतेन कालाक्षमत्वलक्षणमौत्सुक्यमुक्तम्॥६५॥

ततः किमत आह तदिति। तत्तस्मात् औत्सुक्यादद्य विश्रम्य मे मम दयालुरेधि भव अद्य मद्गेहे निवासेन मामनुगृहाणेत्यर्थः। अस्तेर्लोटि सिपि हुझल्भ्यो हेर्धिः घ्वसोरेध्याभ्यासलोपश्चेत्येकारः। तन्निवासस्य फलमाह। भवन्तं विलोकत इति भवद्विलोकिनी सती दिनं निनीषामि त्वद्विलोकनेन दिनं नेतुमिच्छामीत्यर्थः। मद्दर्शनात् कथं ते कालयापनमित्याशङ्क्याह स मत्प्रियो नलः पक्षिणा दूतहंसेन

दृशोर्द्वयी ते विधिनास्ति वञ्चिता मुखेन्दुलक्ष्मीं तव यन्न वीक्षते।
असावपि श्वस्तदिमां नलानने विलोक्य साफल्यमुपैतु जन्मनः ६७
ममैव पाणीकरणेऽग्निसाक्षिकं प्रसङ्गसम्पादितमङ्ग! सङ्गतम्।
न हा सहाधीतिधृतः स्पृहा कथं तवार्य्यपुत्रीयमजर्य्यमर्जितुम् ६८

नखैर्विलिख्य तवैव रूपेणाकारेण समः सदृश आख्यायि किल ? आख्यातः खलु ? ख्यातेः कर्मणि लुङि चिणो युगागमः। अतस्त्वद्दर्शनात् दिनं नेष्यामि सदृशदर्शनादीनां कालविनोदनसाधनत्वात्तद्वियोगिनां इति प्रागेवोक्तमनुसन्धेयम् ॥ ६६ ॥

अद्येह विश्रामे न केवलं ममैव साफल्यं किन्तु तवापीत्याह दृशोरिति। हे सौम्य! विधिना स्रष्ट्रा ते तव दृशोर्द्वयी वञ्चितास्ति विफलीकृता वर्त्तते यद् यस्मात् तव मुखेन्दुलक्ष्मीं न वीक्षते स्वमुखस्य स्वचक्षुषा द्रष्टुमशक्यत्वादिति भावः। तत्तस्मादसौ ते दृग्द्वय्यपि श्वः परेऽहनि इमां त्वन्मुखलक्ष्मीं नलानने विलोक्य उभयनिष्ठत्वात् समानधर्मस्येति भावः। जन्मनः साफल्यं उपैतु। अत्र इते सुरबुध्याः इत नलमुखलक्ष्म्या भेदेऽप्यभेदोक्तेरतिशयोक्तिभेदः ॥ ६७ ॥

ममैवेति। किञ्च अङ्ग! भो! मम पाणौ करणे पाणिग्रहण एव नित्यं हस्ते पाणावुपयमन इति पाणौ शब्दस्य गतित्वात् कुगतिप्रादय इति समासः। अग्निसाक्षिकं यथा तथा विवाहाग्निसन्निधावेवेत्यर्थः। प्रसङ्गात् स्वयम्वरप्रसङ्गात् सम्पादितं सङ्गतमुभयोरानुकूल्याद्युक्तम्। आर्ययोः श्वशुरयोः पुत्र आर्यपुत्रो भर्त्ता नलः तदीयमार्य्यपुत्रीयं वृद्धाच्छः नजीर्यतीत्यजर्यं सङ्गतं रामसुग्रीवयोरिव स्थिरसख्यमित्यर्थः। अजर्यं सङ्गतमिति यत्प्रत्ययान्तो निपातः। अर्जितुं सम्पादयितुं सहाधीतिः सब्रह्मचारिता तां धारयतीति धृत् साह्यध्यदित्यर्थः। धृधातोः क्विप् तस्य तव स्पृहा कथं नास्ति हेति विषादे सर्वथा स्पृहणीया तत्सङ्गतिरित्यर्थः ॥ ६८ ॥

दिगीश्वरार्थं न कथञ्चन त्वया कदर्थनीयास्मि कृतोऽयमञ्जलिः।
प्रसद्यतां नाद्य निगाद्यमीदृशं दधे दृशौ वाष्परयास्पदे भृशम् ६९
वृणे दिगीशानिति का कथा तथा त्वयीति नेच्छे नलभामपीहया।
सतीव्रतेऽग्नौ तृणयामि जीवितं स्मरस्तु किं वस्तु तदस्तु भस्म यः ७०
न्यवेशि रत्नत्रितये जिनेन यः सधर्म्मचिन्तामणिरुज्झितो यया।
कपालिकोपानलभस्मनः कृते तदेव भस्म स्वकुले स्तृतं तया ७१

दिगीश्वरेति । किञ्चाहं त्वया दिगीश्वरार्थं कथञ्चनापि कदर्थनीया निर्बन्धनीया नास्मि अयमञ्जलिः कृतः प्रार्थये त्वामित्यर्थः । प्रसद्यतां प्रसन्नेन भूयतां भावे लोट् । ईदृशं दिगीशसन्देशरूपं न निगाद्यं न वाच्यं ऋहलोर्ण्यत् गदमदेत्यादिनानुपसर्गादेव यतो विधानात् । किं बहुना भृशं वाष्परयास्पदे अश्रुवेगाश्रयौ दृशौ दधे धारयामि रोदिमीत्यर्थः । नैवं दुःखाकर्त्तुं उचितमिति भावः ॥ ६९ ॥

वृणे इति । किञ्च दिगीशान् वृणे इति का कथा अत्यन्तासम्भावितमित्यर्थः । तथा हि नलस्य भां कान्तिमपि त्वन्निष्ठामिति शेषः । त्वयीति त्वयि परपुरुषे स्थिते इति हेतोः तयेहया तादृगुरागेण नेच्छे इह त्वयि या नलभा तां नलभामिति केचिद् योजयन्ति । नन्वेवं स्मरापवीरणे बलवद्विरोध इत्याशङ्क्याह । सतीव्रते पातिव्रत्य एवाग्नौ जीवितं तृणयामि तृणीकरोमि जीवितास्पृहाणां पतिव्रतानां न कुतश्चिद्भयमिति भावः । स्मरभयन्तु दूरापास्तमित्याह स्मरस्तु तत्प्रसिद्धं किं वस्तु कः पदार्थो भवेत् न कोऽपीत्यर्थः । कुतः यः स्मरो भस्म भस्मीभूतः व्रतैकजीविनां सोऽपि तुच्छः किं करिष्यतीत्यर्थः । चारित्रैकपरायणाः सत्यो न किञ्चिद्गणयन्तीति भावः ॥ ७० ॥

न्यवेशीति । हे सौम्य ! यो धर्मः स्वः चिन्तामणिर्जिनेन देवेन अर्हता रत्नत्रितये जैनपरिभाषया सद्दृष्टिज्ञानवृत्ताख्ये रत्नत्रये न्यवेशि निवेशितः सद्दृष्टिज्ञानवृत्तानि धर्मं धर्मेश्वरा विदुरिति तैरुक्त

निपीय पीयूषरसौरसीरसौ गिरः स्वकन्दर्पहुताशनाहुतीः ।
कृतान्तदूतं न तया यथोदितं कृतान्तमेव स्वममन्यतादयम् ७२
स भिन्नमर्म्मापि तदार्त्तिकाकुभिः स्वदूतधर्म्मान्न विरन्तुमैहत ।
शनैरशंसन्निभृतं विनिश्वसन् विचित्रवाक्चित्रशिखण्डिनन्दनः ७२
दिवीधवस्त्वां यदि कल्पशाखिनं कदापि याचेत निजाङ्गनालयम्

त्वात् । विशेषणत्वात् कर्म्मणि लुङ् । स धर्म्मचिन्तामणिः यया स्त्रिया कपाली हरः तत्कोपानलभस्मन स्तद्रूपस्य कामस्य क्षते क्षत इति तादर्थ्येऽव्ययम् । उज्झितस्त्यक्तः तया स्त्रिया तदेव भस्म स्वकुले स्तृतं विस्तृतं कामास्त्रभस्मान्वतया चरित्रत्यागिन्या स्त्रिया स्वकुलमेव भस्मसात् क्षतं भवेदित्यर्थः । अतोनलैकव्रताया ममाग्रे महेन्द्रादिनामग्रहणमपि न कार्य्यमिति भावः ॥ ७१ ॥

निपीयेति । असौ नलः पीयूषरसस्यामृतरसस्य उरसा निर्म्मिता औरसीः आत्मजाः सदृशीरित्यर्थः । उरसोऽण् चेत्यण्प्रत्ययः । संज्ञाधिकारादभिधेयनियम इति काशिका । स्वकन्दर्पहुताशनस्य निजकामाग्नेराहुतीरुद्दीपनीर्गिरो भैमीवाक्यानि निपीय स्वमात्मानं तया भैम्या यथोदितं यथोक्तं तदनतिक्रमणेनेत्यर्थः । यथासादृश्य इत्यव्ययीभावः । कृतान्तदूतं नामन्यत किन्त्वदयं निर्दयं यथातथा स्वं कृतान्तमेवामन्यत दूतधर्म्मत्वात् निर्दाक्षिण्यं वक्ष्यामीत्यमन्यतेत्यर्थः ॥७२॥

स इति । विचित्रवाक् चित्रशिखण्डिनन्दनो बृहस्पतिः । जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिज इत्यमरः । स नलस्तस्या भैम्या आर्त्त्यानिमित्तेन काकुभिः करुणोक्तिभिर्भिन्नमर्म्मापि विदीर्णहृदयोऽपि स्वदूतधर्म्मादकपटभूताद्विरन्तुं नैहत नैच्छत् । किन्तु स्वेच्छाभङ्गान्निभृतं विनिश्वसन् शनैस्त्वरया अशंसदब्रवीत् ॥ ७२ ॥

दिव इति । वक्ष्यमाणे विभीषिकानुगुणानामन्त्रयते हे भीरु !

कथं भवेरस्य नजीवितेश्वरी न मोघयाच्ञः स हि भीरु! भूरुहः॥७४॥
शिखी विधाय त्वदवाप्तिकामनां स्वयं हुतस्वांशहविः स्वमूर्त्तिषु।
क्रतुं विधत्ते यदि सार्वकामिकं कथं स मिथ्यास्तु विधिस्तु वैदिकः॥७५॥
सदा तदाशामधितिष्ठतः करं वरं प्रदातुं बलिताद्बलादपि।
मुनेरगस्त्याद्वृणुते स धर्मराड् यदि त्वदाप्तिं भण का तदा गतिः॥७६॥
क्रतोः क्षते जाग्रति वेत्ति कः कति प्रभोरपां वेश्मनि कामधेनवः।

भयशीले! भियः क्रुक्लुकनाविति क्रुप्रत्ययः। ऊङुत इत्यूङ् अम्बार्थनद्योर्ह्रस्वः। दिवौकसः स्वर्पतिरिन्द्रः कदापि निजाङ्गनात्वं कल्पशाखिनं त्वां याचेत यदि दुह्यादिपाठाद्द्विकर्मकत्वं तदा कथमस्येन्द्रस्य जीवितेश्वरी न भवेः भवेरेवेत्यर्थः। कुतः हि यस्मात्स भूरुहः कल्पवृक्षः न मोघयाच्ञः सफलप्रार्थनः॥ ७४॥

शिखीति। अग्निः त्वदवाप्तिकामनां विधाय स्वमूर्त्तिषु स्वविग्रहेषु आहवनीयादिषु स्वयमेव हुतं स्वांशं स्वदेवताकं हविर्येन सः सार्वकामिकं सर्वकामप्रयोजनमिति ठक्। क्रतुं विधत्ते यदि तदा स वैदिको वेदावगतो विधिरनुष्ठानं कथं तु मिथ्यास्तु निष्फलः स्यात्। अत्र स्वशब्दत्रयेण क्रमादग्नेरेव कर्त्तृदेवताहवनीयादिरूपताप्रतिपादनात् कर्मणि प्रमादानवकाशः सूचितः तस्माद्वेदप्रामाण्यादनलसादसीति सिद्धमिति भावः॥ ७५॥

सदेति। स धर्मराड्यमः सदा सर्वदा तस्य धर्मराजस्याशान्दिशं दक्षिणामधितिष्ठतोऽधिवसतः अतएव बलादपि वरायैव करं बलिं प्रदातुं बलितात् प्रवृत्तादगस्त्यान्मुनेस्त्वदाप्तिं त्वत्प्राप्तिं वृणुते यदि तदा का गतिः। भण वाक्यार्थः कर्म॥ ७६॥

क्रतोरिति। किञ्च क्रतोः क्षते क्रत्वर्थं अपां प्रभोः वरुणस्य वेश्मनि कति कामधेनवो जाग्रति वर्त्तन्ते को वेत्ति असंख्याकाः सन्तीत्यर्थः।

त्वदर्थमेकामपि याचते स चेत् प्रचेतसः पाणिगतैव वर्त्तसे ॥७७॥
न सन्निधात्री यदि विघ्नसिद्धये पतिव्रता पत्युरनिच्छया शची ।
सएव राजव्रजवैशसात् कुतः परस्परस्पर्द्धिवरः स्वयम्बरः ॥ ७८ ॥
निजस्य वृत्तान्तमजानतां मिथो मुखस्य रोषात् परुषाणि जल्पतः
मृधं किमच्छत्रकदण्डताण्डवं भुजाभुजि क्षौणिभुजां दिदृक्षसे ७९

स वरुणस्त्वदर्थं त्वत्सिद्ध्यर्थं तत्रैकामपि गां याचते चेत् दमयन्तीं प्रार्थयते चेत् तर्हि प्रचेतसो वरुणस्य पाणिगतैव वर्त्तसे कस्त्वां मोचयिष्यतीति भावः ॥ ७७ ॥

नेति । किञ्च पतिव्रता शची पत्युरिन्द्रस्यानिच्छया असम्मत्या कारणेन विघ्नसिद्धये स्वयम्बरविघातार्थं सन्निधात्री सन्निहिता न यदि न स्यात् विशसति हिनस्तीति विशसो हिंसकः पचाद्यच् तस्य कर्म वैशसं युवादित्वादण्प्रत्ययः । राजव्रजस्य राजन्यकस्य वैशसान्मिथो विरोधाद्धेतोः परस्परस्पर्द्धिनोऽन्योन्यसंघर्षिणो वरा वोढारो यस्मिन् स तथोक्तः स्वयम्बर एव कुतः कुतस्तरां नववरणमिति भावः । स्वयम्बरे शची सन्निधानादविघ्नसिद्धिरिति शास्त्रं तथा च रघुवंशे "सान्निध्ययोगात् किल तत्र शच्याः स्वयम्बरक्षोभकृतामभाव" इति ॥ ७८ ॥

निजस्येति । मिथो रोषात् परुषाणि जल्पतो निजस्य मुखस्य वदनस्य वृत्तान्तमजानतां रोषान्धानां उक्तमप्यविजानतां क्षौणीभुजां सम्बन्धि अच्छत्रका आयुधभङ्गेनापनीतछत्रा ये दण्डास्तेषां ताण्डवं तदेव मृधं युद्धं दण्डादण्डीत्यर्थः । तथा तेषामपि भङ्गे भुजाभ्यां भुजाभ्यां प्रवृत्तं युद्धं भुजाभुजि युद्धं च गम्यमानार्थत्वाच्च शब्दाप्रयोगः तत्र तेनेदमिति सरूप इति बहुव्रीहाविच् कर्मव्यतीहारे इतीच्प्रत्ययः । तिष्ठद्गुपाठादव्ययीभावसंज्ञः । दिदृक्षसे द्रष्टुमिच्छसि ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदम् ॥ ७९ ॥

अपार्थयन् याज्ञिकफुत्कृतिश्रमं ज्वलेद्रुषा चेद्वपुषा तु नानलः।
अलं नलः कर्त्तुमनग्निसाक्षिको विधिं विवाहे तव सारसाक्षि! ८०
पतिम्वरायाः कुलजं वरस्य वा यमः कमप्याचरितातिथिं यदि।
कथं न गन्ता विफलीभविष्णुतां स्वयम्वरः साध्वि! समृद्धिमानपि८१
अपां पतिः स्वामितया परः सुरः स तां निषेधेद्यदि नैषधक्रुधा
नलाय लोभायतपाणयेऽपि तत् पिता कथं त्वां वद संप्रदास्यते८२

अपार्थयन्निति। हे सारसाक्षि! सरोरुहाक्षि! सारसं सरसीरुहमित्यमरः। तव विवाहे अनलोऽग्निः याज्ञिकस्य फुत्कृतिश्रमं याजकफुत्कृतिश्रमं समिन्धनप्रयासमपार्थयन् व्यर्थयन् रुषा रोषेणैव ज्वलेत् वपुषा स्वरूपेण तु न ज्वलेच्चेत् तदा नलः अग्न्यभावादग्निसाक्षिको न भवतीत्यनग्निसाक्षिकस्तं विधिमनुष्ठानं कर्त्तुमलं शक्तः न किञ्चिदित्यर्थः ॥८०॥

पतिम्वराया इति। किञ्च यमोऽन्तकः पतिं वृणीत इति पतिम्वरावधूः। संज्ञायां भृतॄवृ इत्यादिना खच्। अरुर्द्विषदजन्तस्य मुम्। तस्या वरस्य वोढुर्वा कुले जातं कुलजं कमपि जनमतिथिमभ्यागतमाचरिता यदि मारयिष्यति चेदित्यर्थः। अनद्यतने लुट्। हे साध्वि! समृद्धिमान् सर्वसाधनसम्पन्नोऽपि स्वयं व्रियते अस्मिन्निति स्वयम्वरः स्वयम्वरकर्म ग्रहवृदनिश्चिगमश्चेत्यप्रत्ययः। विफलीभविष्णुतां भुवश्चेति इष्णुच्प्रत्ययः। कथं न गन्ता गमिष्यत्येवेत्यर्थः। गमेर्लुट्। वृथा नलैकासक्तिहतासीति भावः ॥ ८१ ॥

अपामिति। हे साध्वि! अपाम्पतिः स प्रसिद्धः परः सुरः स्वामितया अप्पतित्वान्नैषधे नले क्रुधा क्रोधेन ता अपो निषेधेत् प्रतिबध्नीयाद् यदि तर्हि लोभेन आयतपाणये प्रसारितहस्तायापि लौल्याज्जलं विना जिहच्चतेऽपीत्यर्थः। नलाय पिता भीमस्त्वां कथं सम्प्रदास्यते न कथञ्चिदित्यर्थः। काक्वार्थः कर्ष ॥ ८२ ॥

इदं महत्तेऽभिहितं हितं मया विहाय मोहं दमयन्ति! चिन्तय।
सुरेषु विघ्नैकपरेषु को नरः करस्थमप्यर्थमवाप्तुमीश्वरः ॥ ८३ ॥
इमागिरस्तस्य विचिन्त्य चेतसा तथेति संप्रत्ययमाससाद सा।
निवारितावग्रहनीरनिर्झरे नभोनभस्यत्वमलम्भयद् दृशौ ॥ ८४ ॥
स्फुटोत्पलाभ्यामलिदम्पतीव तद्विलोचनाभ्यां कुचकुड्मलाशया।
निपत्य बिन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विलेसतुः।

सम्प्रति हितार्थसंग्रहकारिकामाह इदमिति। हे दमयन्ति! मया
इदं महद्धितं ते तव तुभ्यं वाभिहितं मोहं मौढ्यं विहाय चिन्तय
विमृश तथा हि सुरेषु विघ्न एवैकः परं प्रधानं येषां तेषु विघातकेषु
सत्सु को नरः करस्थमप्यर्थं वस्त्ववाप्तुमीश्वरः शक्तः न कोऽपीत्यर्थान्तर
न्यासः। तस्मादलं दुरन्तेन बलवद्विरोधेनेति भावः ॥ ८३ ॥

इमा इति। सा दमयन्ती इमास्तस्य दूतस्य गिरश्चेतसा विचिन्त्य-
पर्यालोच्य तथेति संप्रत्ययं विश्वासमाससाद अथ निवारितावग्रहौ
निष्प्रतिबन्धौ नीरनिर्झरौ ययोस्ते दृशौ लोचने नभोनभस्यत्वं श्रा-
वणभाद्रपदत्वं नभाः श्रावणिकश्च सः स्युर्नभस्यः प्रौष्ठपद पदा
भाद्रपदाः समा इत्यमरः। अलम्भयत् प्रापयदित्युपमातिशयोक्ती।
तत्र लभेः प्राप्त्यर्थत्वेऽपि तदुपसर्जनगत्यर्थविवक्षायां गतिबुद्ध्या-
दिना अणिकर्तुः कर्मत्वं गत्युपसर्जनप्राप्त्यर्थत्वे तु कर्मत्वं नास्त्येव
यथा मात्रे सितं सितिम्नेत्यत्र यदाह वामनः। लभेर्गत्यर्थविवक्षायां
अणिकर्तुः कर्मत्वात् कर्मणि द्वितीयेति लभेश्चेति नुमागमः ॥ ८४ ॥

स्फुटेति। अथ कज्जलेनाञ्जनेनाविलौ मलिनौ बिन्दू अश्रुबिन्दू स्फुटो-
त्पलाभ्यामलिदम्पतीव भृङ्गमिथुनमिव कुचकुट्मलयोराशया लौल्येन
हृदि वक्षसि निपत्य तरलौ चञ्चलौ हारमध्यगौ नीलौ मणी इव
इन्द्रनीलरत्ने इव ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्य

धुता पतत्पुष्पशिलीमुखाशुगैः शुचेस्तदासीत् सरसी रसस्य सा।
रयाय बद्धादरयाम्बुधारया सनालनीलोत्पललीललोचना॥८६॥
अथोद्भ्रमन्ती रुदती गतक्षमा ससम्भ्रमा लुप्तरतिः स्खलन्मतिः।
व्यधात्प्रियावाप्तिविघातनिश्चयान्मृदूनि दूना परिदेवितानि सा॥८७॥

इत्युभयत्रापि प्रगृह्यत्वनिषेधात् सवर्णदीर्घः। विलेसतुः विरेजतुः। अत एकहल्मध्येनादेशादेर्लिटीत्वाभ्यासलोपौ॥ ८५॥

धुतेति। पतद्भिः पुष्पशिलीमुखाशुगैः पुष्पवाणैर्विशिखैरन्यत्र पतन्तः पुष्पाणि शिलीमुखा अलयश्च येषां तैराशुगैर्वायुभिः। धुता कम्पिता अलिवाणौ शिलीमुखौ आशुगौ वायुविशिखाविति चामरः। रयाय बद्धादरया रययुक्तया अम्बुधारया निमित्तेन सनालनीलोत्पलस्य लीलेव लीला ययोस्ते लोचने यस्याः सा भैमी तदा शुचेः शृङ्गारस्य सम्बन्धिनि अन्यत्र शुचेर्ग्रीष्मस्य सम्बन्धिनि कार्श्यादिति भावः। ग्रीष्मशृङ्गारयोः शुचिरित्यभिधानात् रसस्य जलस्य सरसी सर आसीत्। अत्र भैम्याः शृङ्गाररसरसीत्वेन ग्रीष्माम्बुसरसीत्वेन च रूपणाद्रूपकालङ्कारः। तस्य श्लेषोपमाभ्यामङ्गाभ्यां सङ्करः स्पष्टः॥ ८६॥

अथेति। अथ स्मरविकारोदयानन्तरं प्रियावाप्तिविघातस्य प्रियप्राप्तिप्रतिबन्धस्य निश्चयात्दूना परितप्ता स्वादय ओदित इत्योदित्वातिदेशादोदितश्चेति दूङो निष्ठानत्वं। अतएव सा दमयन्ती उद्भ्रमन्ती अश्रूणि मुञ्चती गतक्षमा नष्टधैर्या ससंभ्रमा सत्वरा लुप्ता रतिर्विषयान्तरस्पृहा यस्याः सा स्खलन्ती मतिस्तत्त्वावधारणशक्तिर्यस्याः सा सती मृदूनि परहृदयद्रावणानि परिदेवितानि विलापवचनानि व्यधात्। अत्र प्रियावाप्तिविघातप्रयुक्तचिन्ताविषादानुभावा उद्भ्रमादय इत्यनुसन्धेयम्॥ ८७॥

त्वरस्व पञ्चेषुहुताशनात्मन स्तनुष्व मद्भस्मचयं यशश्चयम् ।
विधे ! परेहाफलभक्षणव्रती पताद्य तृप्यन्नसुभिर्ममाफलैः ॥८८॥
भृशं वियोगानलताप्यमान ! किं विलीयसे न त्वमयोमयं यदि ।
स्मरेषुभिर्भेद्य ! न वज्रमप्यसि ब्रवीषि न स्वान्त ! कथं न दीर्य्यसे ॥८९॥
विलम्बसे जीवित ! किं द्रव द्रुतं ज्वलत्यदस्ते हृदयं निकेतनम् ।
जहासि नाद्यापि मृषासुखासिकामपूर्वमालस्यमहो तवेदृशम् ॥९०॥

अथ त्रयोदशभिः श्लोकैः परिदेवितान्येवाह त्वरस्वेत्यादि । हे पञ्चेषुहुताशन ! कामाग्ने ! त्वरस्व त्वरितो भव ; मद्भस्मनाञ्चयं राशिमेवात्मनस्ते यशश्चयं यशोराशिं तनुष्व विस्तारय स्त्रीवधख्यातिं सम्पादयेत्यर्थः । हे विधे ! विधातः ! परेषामीहाफलस्य क्रियाफलस्य भक्षणेव्रती नियमी सन् न तु तपस्वीतरवदन्यफलभक्षणव्रतीत्यर्थः । अद्याफलैर्नलानवाप्त्या निष्फलैर्ममासुभिः तृप्यन् तृप्तः सन् पत पतितो भव स्त्रीवधपातकी भवेत्यर्थः ॥ ८८ ॥

भृशमिति । हे भृशं वियोगानलेन ताप्यमान ! दह्यमान ! हे स्वान्त ! हृदय ! त्वमयोमयं यदि तर्हि किं विलीयसे अयोघनस्यापि तापात् विलयनदर्शनादयोमयमपि नासीति भावः । हे स्मरेषुभिर्भेद्य ! अतएव वज्रमपि नासि वज्रस्य लौहलेख्यत्वाभावादिति भावः । किन्तु कथं न दीर्य्यसे न विदलसि वज्रादन्यस्य लौहलेख्यत्वादिति भावः । न ब्रवीषीति काकुः किमिति न ब्रूषे त्वत्स्वरूपमित्यर्थः ॥ ८९ ॥

विलम्बस इति । हे जीवित ! प्राणवायो ! किं विलम्बसे द्रुतं द्रव शीघ्रं गच्छ कुतः यतस्ते तव अदो निकेतनं आवासगृहं हृदयं ज्वलति प्रज्वलति अद्यापीदानीमपि मृषा वृथा सुखासिकां सुखासनं धार्ष्यनिर्देशे खुल् वक्तव्यः । न जहासि दह्यमाने गेहे न वस्तव्यमित्यर्थः । तव जीवनस्य ईदृशमालस्यमपूर्वं नूतनमहो ॥ ९० ॥

दृशौ ! मृषापातकिनो मनोरथाः कथं पृथू वामपि विप्रलेभिरे।
प्रियश्रियः प्रेक्षणघाति पातकं स्वमश्रुभिः क्षालयतं शतं समाः ९१
प्रियं न मृत्युं न लभे त्वदीप्सितं तदेव न स्यान्मम यत्त्वमिच्छसि।
वियोगमेवेच्छ मनः ! प्रियेण मे तव प्रसादान्न भवत्यसावपि॥९२॥
न काकुवाक्यैरतिवाममङ्गजं द्विषत्सु याचे पवनन्तु दक्षिणम्।
दिशापि मद्भस्म किरत्वयं तया प्रियो यया वैरविधिर्वधावधिः ९३

दृशाविति। हे दृशौ ! मृषा पातकिनोऽनृतपातकिनो मनोरथा नलदिदृक्षारूपाः पृथू महत्यौ विप्रलम्भानर्हे इत्यर्थः। वां युवामपि कथं विप्रलेभिरे वञ्चयामासुः साहसिकाः किन्न कुर्युरित्यर्थः। मनोरथा वां विफला इत्यर्थः। किञ्च प्रियश्रियो नलसौन्दर्यस्य प्रेक्षणघाति दर्शनघातकं स्वं स्वकीयं पातकं जन्मान्तरकृतमिति भावः। अश्रुभिः शतं समाः वत्सरान् अत्यन्तसंयोगे द्वितीया। क्षालयतं गुरुपापं गुरुप्रायश्चित्तापनोद्यमित्यर्थः। अहो मे दर्शनाशापि निरस्तेति भावः॥ ९१ ॥

प्रियमिति। हे मनः ! तव ईप्सितमाप्तुमिष्टं प्रियं न लभे तदलाभे ईप्सितं मृत्युं मरणञ्च न लभे तस्मात् त्वं मम यदिच्छसि तन्न स्यादित्यन्वयव्यतिरेकदर्शनादिति भावः। अतो मे प्रियेण वियोगमेवेच्छ तव प्रसादादसौ वियोगो मे मम न भवति नलप्राप्त्यभावे मरणमेव मे शरणमित्यर्थः। अत्र संयोगार्थं वियोगप्रार्थनाद्विचित्रालङ्कारः। विचित्रं स्वविरुद्धस्य फलस्याप्त्यर्थमुद्यम इति लक्षणात्॥ ९२ ॥

नेति। द्विषत्सु चन्द्रादिवैरिमध्ये अतिवाममतिवक्रमङ्गजं कामं काकुवाक्यैः करुणोक्तिभिः न याचे न प्रार्थये किन्तु दक्षिणं दक्षिणदिग्भवं दाक्षिण्यवन्तं च पवनं याचे किमिति अयं पवनो यया दिशा प्रियो नलः सञ्चरते तया दिशा तद्विभागेनापि मद्भस्म किरतु क्षिपतु

अमूनि गच्छन्ति युगानि न क्षणः कियत् सहिष्ये न हि मृत्युरस्ति मे
स मां न कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः
मदुग्रतापव्ययसक्तशीकरः सुराः! स वः केन पपे कृपार्णवः ।
उदेति कोटिर्न मुदे मदुत्तमा किमाशु सङ्कल्पकणश्रमेण वः ९५
ममैव वाहर्दिवमश्रुदुर्दिनैः प्रसह्य वर्षासु ऋतौ प्रसज्जिते ।

प्रार्थनायां लोट् । ननु दक्षिणोऽपि शत्रुपक्षः कथमुपकरिष्यति तत्राह । वैरविधिर्वैराचरणं वधावधिर्मरणान्तः मरणान्तानि वैराणीति न्यायादित्यर्थः ॥ ९३ ॥

अमूनीति । गच्छन्ति विपरिवर्त्तमानान्यमूनि युगानि न क्षणः एकोऽप्ययं क्षणो युगसहस्रायत इत्यर्थः । कियत् सहिष्ये मृत्युर्मरणञ्च मे नास्ति हि स कान्तस्तु अन्तरात्मनि मां नोज्झिता नोज्झिष्यति स्फुटं तं कान्तं मनश्च नोज्झिता तत् मनश्च कायवायवः प्राणा नोज्झितारः हन्त का गतिरिति भावः ॥९४॥

मदिति । हे सुराः ! मदुग्रतापव्यये मदतितीव्रसन्तापप्रशान्तौ सक्ता व्यापृताः शीकरा यस्य स प्रसिद्धो वो युष्माकं कृपार्णवः केन पपे पीतः । अगस्त्येन प्रसिद्धार्णव इवेति भावः । त्वक्षोभेनैव पीत इत्यत्राह । संकल्पकणश्रमेण अभिध्यानलेशप्रयासेन मत्तोऽप्युत्तमा कोटिः स्वन्तरमित्यर्थः । वो युष्माकं मुदे आशु नोदेति किन्तु शश्यादिवदिति भावः । तस्मादनुकम्पनीये जने विपरीताचरणमनुचितमिति तात्पर्यार्थः ॥ ९५ ॥

अथ मदीयमार्त्तघोषं देवा नाकर्णयन्तीत्यत्राह ममैवेति । वा अथवा अह्नि च दिवा च अहर्दिवमहरहरित्यर्थः । ममैवाश्रुदुर्दिनैरश्रुवर्षैरित्यर्थः । प्रसह्य बलाद्वर्षासु ऋतौ वर्षर्त्तौ स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा इत्यमरः । ऋत्यक इति प्रकृतिभावः । प्रसज्जिते प्रवर्त्तिते सति

कथं नु शृण्वन्तु सुषुप्य देवता भवन्त्वरण्ये रुदितं न मे गिरः ९६
इयं न ते नैषध! दृक्पथातिथिस्त्वदेकतानस्य जनस्य यातना।
ह्रदे ह्रदे हा न कियन्नवेषितः स वेधसागोपि खगोऽपि वक्ति यः ९७
ममापि किं नो दयसे दयाधन! त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः।
निमज्जयन् सन्तमसे पराशयं विधिस्तु वाच्यः क्व तवागमः कथा ९८

देवताः स्वप्तु स्वप सुषुप्य वचिस्वपीत्यादिना संप्रसारणं सुनिदुर्भ्यः सुपि सुति समा इति षत्वं। मे गिरः कथं नु शृण्वन्तु सुषुप्तस्व तदयोगादतएव मे गिरः कथमरण्ये रुदितं। क्षेपे इति समासः। तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक्। न भवतु विधेयप्राधान्यादेकवचनं सम्भावनायां लोट्। निष्फलं वचनमरण्यरुदितप्रायमित्यर्थः। वर्षासु भवतो हरेः स्वापादन्यत्रापि देवतात्वसामान्यादारोप्यव्यपदेशः। अत्र तत्कालस्य वर्षात्वेन देवतानां स्वापेन चासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिद्वयं तथा तद्गिरामरण्यरुदितासम्भवेन सादृश्याक्षेपान्निदर्शनाभेदः तेन संकीर्णः ॥ ९६ ॥

इयमिति। हे नैषध। इयं त्वदेकतानस्य त्वत्परस्य एकतानोऽन्यवृत्तिरित्यमरः। जनस्य स्वस्यैवेत्यर्थः। यातना तीव्रवेदना ते तव दृक्पथातिथिर्न दृग्गोचरो न देशविप्रकर्षादिति भावः। किञ्च यः खगो हंसो वक्ति नलाय मद्यातनां निवेदयेत् स खगोऽपि वेधसा अगोपि क्वापि गुप्तः कृतः ह्रदे ह्रदे सर्वेषु जलाशयेष्वित्यर्थः। वीप्सायां द्विरुक्तिः। कियन्नगवेषितो नान्विष्टः हा बतेत्यर्थः ॥ ९७ ॥

ममापीति। दयाधन! कृपानिधे! मम मनस्त्वदङ्घ्रिमग्नं त्वच्चरणशरणं वेत्थ यदि वेत्सि चेत् विदो लटो वेति सिपः स्थलादेशः। ममापि किं नो दयसे ममापि किं नानुकम्पसे अधीगर्थदयेशां कर्मणीति षष्ठी अथवा परस्याशयं हृदयं सन्तमसे महामोहान्धकारे। विष्वक्सन्तमस-

कथावशेषं तव सा कृते गतेत्युपैष्यति श्रोत्रपथं कथं न ते ।
दयाणुना मां समनुग्रहीष्यसे तदापि तावद्यदि नाथ ! नाधुना ९९

ममादरीदं विदरीतुमान्तरं तदर्थिकल्पद्रुम ! किञ्चिदर्थये ।
भिदां हृदि द्वारमवाप्य मैव मे हृतासुभिः प्राणसमः समङ्गमः १००

इति प्रियाकाकुभिरुन्मिषन् भृशं द्विगीशदूत्येन हृदि स्थिरीकृतः

मित्यमरः । अवसमन्धेभ्यस्तमस इति समासान्तोऽच्प्रत्ययः । निमज्जयन् विधिस्तु वाच्य उपालभ्यः तवागसोऽपराधस्य कथा क । विधिना मोहितो मामिमां न वेत्थ न तु निर्दयत्वादित्यर्थः ॥ ९८ ॥

कथेति । हे नाथ ! तव कृते त्वदर्थं सा दमयन्ती कथैवावशेषोऽवसानं गतेति ते तव श्रोत्रपथं कथं नोपैष्यति उपैष्यत्येवेत्यर्थः । तदापि तच्छ्रवणकालेऽपि दयाणुना कृपालेशेन मां समनुग्रहीष्यसे तावदनुग्रहीष्यस्येवेत्यर्थः । ग्रहो लिटीतीटो दीर्घः । अधुना न यदि न चेत् मास्तु पश्चादनुशोचनमपि महाननुग्रह इति भावः ॥ ९९ ॥

ममेति । हे नाथ ! ममेदमान्तरं हृदयं विदरीतुं वॄतो वेति दीर्घः । आदरि आदरवत् तत्तस्माद्विदारणाद्धेतोः हे अर्थिकल्पद्रुम ! किञ्चिदर्थये याचे किमिति प्राणसमः प्राणतुल्यः त्वं हृदि भिदां भेदमेव । षिद्भिदादिभ्योऽङ् । द्वारमवाप्य मार्गं लब्ध्वा मे मम हृतैस्त्वदप्राप्त्या विफलैरसुभिः सममेव मागमः मा निर्गच्छ गमेर्लुङ् पुषादित्यादिना च्लेरङादेशः नमाङ्योग इत्यडागमाभावः । प्राणोत्क्रमणकाले त्वया जन्मान्तरेऽपि त्वत्प्राप्तिकामाया मे हृदयान्नापयातव्यम् । यं यं वापि स्मरन् भावं त्यजन्त्यन्ते कलेवरम् । तं तमेवेति कौन्तेय ! सदा सद्भावभावित इति भगवच्छासनादिति भावः ॥ १०० ॥

इतीति । द्विगीशदूत्येन हृदि स्थिरीकृतो निरुद्धः स नृपो नलः वियोगमन्मथो विप्रलम्भशृङ्गारः । इतीत्थं प्रियायाः काकुभिः करुणोक्तिभिः ।

नृपः स योगेऽपि वियोगमन्मथः क्षणं तमुद्भ्रान्तमजीजनत् पुनः
महेन्द्रदूत्यादि समस्तमात्मन स्ततः स विस्मृत्य मनोरथस्थितैः।
क्रियाः प्रियाया ललितैः करम्बिता विकल्पयन्नित्यमलीकमालपत्
अयि! प्रिये! कस्य कृते विलप्यते विलिप्यते हा मुखमश्रुविन्दुभिः
पुरस्त्वयालोकि नमन्नयन्न किं तिरश्चलल्लोचनलीलया नलः १०३॥
चकास्ति विन्दुच्युतकातिचातुरी घनाश्रुविन्दुस्रुतिकैतवात्तव।

उन्मिषन्नुद्बुद्धः सन् तं नृपं योगे सन्निधाने सत्यपि क्षणं पुनरुद्भ्रान्तं उद्भ्रान्तचित्तमुन्मत्तचित्तमिति यावत् अजीजनदकार्षीदित्यर्थः। उन्मत्तचित्तविभ्रमः सन्निधिविप्रयोगः। सर्वथा विप्रकरोतीति भावः ॥ १०१ ॥

अथोन्मादानुभावः प्रलापः प्रवृत्त इत्याह महेन्द्रेति। तत उन्मादोदयानन्तरं स नल आत्मनो महेन्द्रदूत्यादिसमस्तं सर्वकृत्यं विस्मृत्य मनोरथस्थितैः संकल्पविकल्पितैर्ललितैर्विलासैः करम्बिता मिश्रिताः प्रियायाः क्रियाः शृङ्गारचेष्टा विकल्पयन्नालोचयन्नित्यं वक्ष्यमाणप्रकारेणालीकमबुद्धिपूर्वकमालपत् ॥ १०२ ॥

अथालापमेवाष्टादशभिराह अयीत्यादि। अयि! प्रिये! भैमि! कस्य कृते कं प्रति विलप्यते भावे लट्। मुखं अश्रुविन्दुभिर्विलुप्यते प्रदूष्यते कर्मणि लट्। हेति खेदे पुरोऽग्रे नमन् प्रणमन् अयं नलस्त्वया तिरश्चलतस्तिर्यक् प्रसरतो लोचनस्य लीलया विलासेन साचीकृतदृष्ट्येत्यर्थः। नालोकि न दृष्टं किमपरोक्षे परोक्षवदुपालम्भो न युक्त इत्यर्थः ॥१०३॥

चकास्तीति। मसारसाराविन्द्रनीलमणिश्रेष्ठौ तारविवराक्षिणी यस्यास्तस्याः संबुद्धिः। हे मसारसाराक्षि! घनाश्रुविन्दुस्रुतेः सान्द्राश्रुविन्दुच्युतेः कैतवात्तव विन्दोरनुस्वारस्य च्युतमेव च्युतकं विचित्रवाक्यभेदः तत्रातिचातुरी चकास्ति भाति ततस्तच्चातुर्यादेव संसारं भवं संसारशब्दज्ञातः

असारसाराङ्गि!ससारमात्मना तनोषि संसारमसंशयं यतः॥१०४

अपास्तपाथोरुहि शायितं करे करोषि लीलानलिनं किमाननम्
तनोषि हारं कियदश्रुणः स्रवै रदोषनिर्वासितभूषणे हृदि॥१०५॥

दृशोरमङ्गल्यमिदं मिलज्जलं करेण तावत् परिमार्ज्जयामि ते।
अथापराधं भवदङ्घ्रिपङ्कजद्वयीरजोभिः सममात्ममौलिना॥१०६॥

मम त्वदच्छाङ्घ्रिनखामृतद्युतेः किरीटमाणिक्यमयूखमञ्जरी।

ना स्वसामर्थ्येन च ससारं सारवन्तं च्युतानुस्वारञ्च तनोषि असंशयं संशयो नास्तीत्यर्थः। अर्थाभावेऽव्ययीभावः। त्वया मे संसारे साफल्यमिति भावः। अत्र कैतवशब्देनाश्रुविन्दुच्युतेस्ताद्रूप्यापह्नवेन वर्णात्मकविन्दुच्युतकत्वारोपादपह्नवभेदः तदुपजीवनेन ससारमिति श्लिष्टपदोपात्तप्रागुक्तार्थद्वयाभेदाध्यवसायेन विन्दुच्युतकाख्यकार्य्यकरणोत्प्रेक्षणात् श्लेषमूला सापह्नवोत्प्रेक्षा सा चासंशयमिति व्यञ्जकप्रयोगाद्वाच्येति ॥ १०४ ॥

अपास्तेति। हे प्रिये! किं किमित्यपास्तं पाथोरुहं लीलापयोरुहं येन तस्मिन् करे शायितं स्थापितमारोपितमाननमेव लीलानलिनं करोषि लीलाकमलपरिहारेण करकपोलकरणे किं कारणमित्यर्थः। अदोषागस्येव निर्वासितानि परित्यक्तानि भूषणानि येन तस्मिन् हृदि अश्रुणः स्रवैरश्रुधाराभिरेव हारं कियत्तनोषि किमर्थं रोदिषीत्यर्थः ॥ १०५ ॥

दृशोरिति। इदं ते दृशोरक्ष्णोर्मिलद्दृश्यमानं अमङ्गल्यममङ्गलकारि जलमश्रु तावत् करेण परिमार्जयामि परिमार्ज्मि मृजेश्चौरादिकात्। अथाश्रुमार्जनानन्तरं अपराधमात्मवञ्चनदोषं भवदङ्घ्रिपङ्कजद्वयीरजोभिः समं त्वच्चरणकमलरेणुभिः सहेति सहोक्त्यलङ्कारः। आत्मनो मौलिना मुकुटेन प्रणामेनेत्यर्थः। परिमार्ज्जयामि ॥ १०६॥

उपासनामस्य करोतु रोहिणी त्यज त्यजाकारणरोषणे! रुषम्॥१०
तनोषि मानं मयि चेन्मनागपि त्वयि अये तद्बहुमानमानतः।
विनम्य वक्त्रं यदि वर्त्तसे कियन्नमामि ते चण्डि! तदा पदावधि॥१०८
प्रभुत्वभूम्नानुगृहाण वा नवा प्रणाममात्राधिगमेऽपि कः श्रमः।

ममेति। हे अकारणमेव रोषणे! कोपने! क्रुधमण्डार्थेभ्यश्चेति युच्प्रत्ययः। रोहिणी लोहितवर्णा वर्णादनुदात्तात्तोपधात्तो न इति ङीप् नकारश्च। मम किरीटमाणिक्यमयूखानां मञ्जरी सैव रोहिणी चन्द्रप्रिया सैव तारा अस्य पुरःस्थितस्य तवाच्छाङ्घ्रिनखस्यैवामृतद्युतेश्चन्द्रस्योपासनां करोतु रोहिण्याश्चन्द्रसेवौचित्यादिति भावः। रुषं रोषं त्यज त्यज अभीक्ष्णं त्यजेत्यर्थः। नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः। नित्यमभीक्ष्णं प्रणिपातप्रतीकारः संरम्भो हि महात्मनामिति भावः। रूपकालङ्कारः॥ १०७॥

तनोषीति। हे चण्डि! अतिकोपने! मनागीषदपि मानं मयि रोषमपि तनोषि चेत् तत्तर्हि त्वयि विषये आनतः सन् बहुमानं अये सन्मानं कुर्वे प्रतिकोपाशक्तेरिति भावः। अतिकोपं चेति गम्यते किञ्च वक्त्रं कियत् किञ्चिद्विनम्य विनमय्येत्यर्थः। अन्तर्भावितो णिजर्थः। वर्त्तसे तथा ते पदावधि पादपर्यन्तं नमामि पूर्वोक्त एवाभिप्रायः॥ १०८॥

प्रभुत्वेति। हे भैमि! प्रभुत्वभूम्ना प्रभुत्वप्रयुक्तगौरवेणानुगृहाण वा न वा किन्तु प्रणाममात्रस्याधिगमे स्वीकारेऽपि कः श्रमः को भार इत्यर्थः। अथ सोऽपि माभूत् दर्शनमात्रेणापि किं नानुगृह्णासीत्याह केति याचतामर्थिनां कल्पलतासि कात्वं कोत्यर्थः। असीतित्वमर्थवाक्यालङ्करणयोर्युष्मदर्थानुवादेऽपीति गण-

क्व याचतां कल्पलतासि मां प्रति क्व दृष्टिदाने तव बद्धमुष्टिता१०९

स्मरेषुबाधां सहसे मृदुः कथं हृदि द्रढीयःकुचसंहते तव ।
निपत्य वैसारिणकेतनस्य वा व्रजन्ति बाणा विमुखोत्पतिष्णुताम्१
स्मितस्य संभावय सृक्कणा कणान् विधेहि लीलाचलमञ्चलं भ्रुवोः
अपाङ्गरथ्यापथिकीञ्च हेलया प्रसह्य सन्धेहि दृशं ममोपरि॥१११॥
समापय प्रावृषमश्रुविप्रुषां स्मितेन विश्राणय कौमुदीमुदः ।

व्याख्यानात् । मां प्रति दृष्टिदाने बद्धमुष्टिता लुब्धता क्व । स्याद्बद्धमुष्टिः कृपणे कृपाणादिषु चेष्यत इति विश्वः । विरूपघटनारूपो विषमालङ्कारः ॥ १०९ ॥

स्मरेति । हे भैमि ! मृदुः मृद्वङ्गी त्वं स्मरेषुबाधां कामबाणव्यथां कथं सहसे अथवा विसरतीति विसारी स एव वैसारिणो मत्स्यः विसारिणो मत्स्य इति स्वार्थेऽण्प्रत्ययः । तत्केतनस्य कामस्य बाणाः द्रढीयोभ्यां दृढतराभ्यां कुचाभ्यां संहते तव हृदि निपत्य विमुखाः कुचप्रतिहत्या पराङ्मुखाः । अतएवोत्पतिष्णवः उत्पतनशीलाः अलंकृञित्यादिना इष्णुच्प्रत्ययः । तत्तां व्रजन्ति वा अन्यथा कथमुपेक्षेत इति भावः ॥ ११० ॥

स्मितस्येति । स्मितस्य कणान्मन्दहासलेशान् सृक्कणा ओष्ठप्रान्तेन प्रान्तावोष्ठस्य सृक्कणी इत्यमरः । सम्भावय सम्पादय भ्रुवोरञ्चलमन्तं लीलया चलं चञ्चलं विधेहि तथा अपाङ्गरथ्या कटाक्षमार्गः । तत्र पन्थानं गच्छतीति पथिकीं सञ्चारिणीं पथष्कन्निति ष्कन्प्रत्यये षिद्गौरादिभ्यश्चेति ङीप् । दृशं ममोपर्युपरिष्टात् षष्ठ्यतसर्थप्रत्ययेनेति षष्ठी । हेलया प्रसह्य बलात् सन्धेहि प्रसारयेत्यर्थः । घ्वसोरेद्धावभ्यासलोपश्चेत्येकारः ॥ १११ ॥

दृशावितः खेलतु खञ्जनद्वयी विकाशिपङ्केरुहमस्तु ते मुखम्॥११२
सुधारसोद्वेलनकेलिमक्षर-स्रजा सृजान्तर्मम कर्णकूपयोः।
दृशौ मदीये मदिराक्षि! कारय स्मितश्रिया पायसपारणाविधिम्।
ममासनार्द्धे भव मण्डनं नन प्रिये! मदुत्सङ्गविभूषणं भव।
भ्रमाङ्ग मादालपमङ्ग मृष्यतां विना ममोरः कतरत्तवासनम्॥११४

समापयेति। किञ्चाम्बुविप्रुषां प्रावृषं वर्षणान्तु वृष्टिमित्यर्थः। समापय मारोदीरित्यर्थः। प्रावृट्समाप्तौ फलमाह स्मितेन मन्दहासेन कौमुदीमुदो विश्राणय वितर श्रणदान इति चौरादिकाल्लोट्। दृशावेव खञ्जनद्वयी खञ्जनपक्षियुग्ममितो मयि खेलतु प्रसरतु ते मुखं विकासिपङ्केरुहमस्तु प्रसन्नं भवत्वित्यर्थः ॥ ११२ ॥

सुधेति। हे मदिराक्षि! मदकराक्षि! इषितमिसदीत्यादिना औणादिकः किरन्प्रत्ययः। अक्षरस्रजा वर्णावल्या वाग्गुम्फेन कर्णकूपयोरन्तः सुधारसक्षोद्वेलनकेलिं सुन्मज्जनलीलां सृज आलपेत्यर्थः। किन्तु मदीये दृशौ स्मितश्रिया करणेन पायसपारणाविधिं पायसभोजनविधिमपि कारय। परमान्नन्तु पायसमित्यमरः। हृक्रोरन्यतरस्यामिति विकल्पाद्दृशि कर्तुः कर्मत्वम् ॥ ११३ ॥

ममेति। हे प्रिये! ममासनार्द्धे मण्डनं भव तत्रोपविशेत्यर्थः। ननु अत्यनुमतमेतदित्यर्थः। किन्तु मदुत्सङ्गविभूषणं भव अङ्कमारोहेत्यर्थः। तदपि नेत्याह। भ्रमात् भ्रमादालपं भ्रमादालपं भ्रमादालपमित्यर्थः। लपेर्लङ्। अङ्ग! भो! मृष्यतां क्षम्यतां किन्तु ममोरो वक्षो विना तवासनं कतरत् किमस्ति चापले द्वे भवत इति वक्तव्यमिति ननेत्यादौ चापले द्विर्भावः। चापलं संभ्रमान्निवृत्तिः संभ्रमस्थानौचित्यभयादिति मतं भैम्याः क्रमेणाधारवृत्तिकथनात्पर्यायालङ्कारः।

अधीतपञ्चाशुगवाणवञ्चने ! स्थिता मदन्तर्वहिरेषि चेदुरः ।
स्मराशुगेभ्यो हृदयं विभेतु न प्रविश्य तत्त्वन्मयसंपुटे मम ॥११५॥
परिष्वजस्वानवकाशवाणता स्मरस्य लग्ने हृदयद्वयेऽस्तु नौ ।
दृढा मम त्वत्कुचयोः कठोरयोरुरस्तटीयं परिचारिकोचिता ॥११६॥
तवाधराय स्पृहयामि यन्मधुस्रवैः श्रवःसाक्षिकमाक्षिका गिरः

एकमनेकस्मिन्ननेकमेकस्मिन् वा क्रमेण पर्याय इति सर्वस्वकारलक्षणात् ॥ ११४ ॥

किञ्चोरःस्थलाद्यवस्थानेषु ममापि कामादभयमित्याह । अधीतेति । अधीता अभ्यस्ता पञ्चाशुगस्य पञ्चेषोर्बाणानां वञ्चना प्रतारणाविद्या यया सा तथोक्ता तस्याः संबुद्धिः । प्रायेण मनस्विनां लज्जावशंवदतया मदनवञ्चनताच्छीत्यादित्थं संबोध्यते स्वहृदयप्राणसामर्थ्यसूचनार्थं हे भैमि । त्वं मदन्तर्ममाभ्यन्तरे स्थिता अवस्थिता अथ वहिरेषि प्राप्नोषि चेत् तर्हि मम हृदयं कर्तृ त्वन्मये त्वदात्मके संपुटे पेटिकायां प्रविश्य स्मराशुगेभ्यः स्मरशरेभ्यो न बिभेतु त्वया गुप्तस्य मे कुतः कामात्तु भयमित्यर्थः ॥ ११५ ॥

परिष्वजस्वेति । हे प्रिये ! परिष्वजस्व आलिङ्ग तथा सति लग्ने मिथोघटिते नौ आवयोर्हृदयद्वये स्मरस्यानवकाशा नीरन्ध्रत्वान्निरवकाशा बाणा यस्य तस्य भावस्तत्ता अस्तु किञ्च दृढा कठोरा ममेयमुरस्तटी कठोरयोस्त्वत्कुचयोः परिचारिका उचिता युक्ता समानगुणयोः सम्बन्धो युक्त इत्यर्थः । इदमपरं स्मरशरप्रवेशानवकाशकारकमिति अत्र समालङ्कारः सा समालङ्कृतिर्योगे वस्तुनोरनुरूपयोरिति लक्षणात् ॥ ११६ ॥

तवेति । किञ्च तवाधराय स्पृहयामि अधरमिच्छामीत्यर्थः । स्पृहेरीप्सित इति सम्प्रदानत्वाच्चतुर्थी । यस्याधरस्य मधुस्रवै रा[illegible]मा[illegible]मिति भावः । श्रवसि माक्षिकात्सदृशी गिरः आक्षिप किञ्च ते

अधित्यकासु स्तनयोस्तनोतु ते ममेन्दुरेखाभ्युदयाङ्कितं नखः॥११७
न वर्त्तसे मन्मथनाटिका कथं प्रकाशरोमावलिसूत्रधारिणी।
तवाङ्गहारे रुचिमेति नायकः शिखामणिश्च द्विजराड्विदूषकः॥११८
गिरानुकम्पस्व दयस्व चुम्बनैः प्रसीद शुश्रूषयितुं मया कुचौ।

स्तनयोरधित्यकास्वूर्द्ध्वभागेषु उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यकेत्यमरः। उपाधिभ्यान्त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः। एतेन स्तनयोरद्रिरूपणं गम्यते मम नखः इन्दुरेखाभ्युदयाङ्कितं चन्द्रकलोदयचिह्नं तनोतु कुचकुम्भयोर्नखक्षतञ्च कर्त्तुमिच्छामीत्यर्थः ॥ ११७ ॥

नेति। हे भैमि! त्वं मन्मथेन कविना कृता नाटिका रूपकविशेषो मन्मथनाटिका सती कथं न वर्त्तसे वर्त्तस एवेत्युत्प्रेक्षा मन्मथोद्दीपनेति भावः। प्रतीयते उभयं श्लिष्टविशेषणैरुपपादयति। प्रकाशं स्फुटं रोमावलिः सूत्रमिव रोमावलिसूत्रं तद्धारिणी अन्यत्र सूत्रधारः कथाप्रस्तावकः तद्वती सूत्रधारिणी तव अङ्गहारे मुक्ताहारे नायको मध्यमाणिक्यं रुचिं शोभामेति अन्यत्र नायकः कथानायकोऽङ्गहारे नायकाङ्गविक्षेपे रुचिं प्रीतिमेति शिखामणिः शिरोरत्नञ्च द्विजराजश्चन्द्रस्य विशेषेण दूषको निन्दकोऽपि दूषकस्ततोऽपि रमणीय इत्यर्थः। अन्यत्र द्विजराट् ब्राह्मणो विदूषको नायकस्य हास्यप्रायो नर्मसचिवः शिखामणिरादरणीय इत्यर्थः। एवं सूत्रधारादियोगात्कथं न नाटिकासीत्यर्थः। अन्यत्र यौवनालङ्कारादियुक्ता कथं न मन्मथोद्दीपनेत्यर्थः। आलम्बनगुणश्चैव तच्चेष्टा तदलङ्कृतिः। तटस्था चेति विज्ञेयश्चतुर्धो दीपनक्रम इति लक्षणात् ॥ ११८ ॥

गिरेति। गिरा सम्भाषणेनानुकम्पस्व चुम्बनैर्दयस्व दयां कुरु मया कुचौ शुश्रूषयितुं प्रसीद अन्यथा कथमहं जीवेयमित्याशयेनाह यद्यस्माच्चान्द्रस्य करोत्करस्य किरणसमूहस्य निशेव नलस्य मम त्वमेका जीवितमसि चन्द्रस्य दिवापि जीवनसम्भवात् करग्रहणान्तस्य निशैकशर-

निशेव चान्द्रस्य करोत्करस्य यन्ममत्वमेकासि नलस्यजीवितम्११९
मुनिर्यथात्मानमथ प्रबोधवान् प्रकाशयन्तं स्वमसावबुध्यत ।
अपि प्रपन्नां प्रकृतिं विलोक्य तामवाप्तसंस्कारतयाऽसृजद्गिरः१२०
अये!मयात्मा किमनिह्नुतीकृतः किमत्र मन्ता स तु मां शतक्रतुः
पुरः स्वभक्त्याथ नमन् ह्रियाविलोविलोकिताहेन तदिङ्गितान्यपि
स्वनाम यन्नाम सुधाभ्यधामहं महेन्द्रकार्य्यं महदेतदुज्झितम् ।

शत्वादिति द्रष्टव्यम् ॥ ११९ ॥

मुनिरिति । अथैवं भ्रान्त्यनन्तरमसौ नलो मुनिरिव प्रबोधवानुत्पन्नतत्वावबोधः सन्नात्मानं स्वं स्वरूपं प्रकाशयन्तं सन्तमबुध्यत नलरूपता प्रकाशितेत्यबुद्धेत्यर्थः । अथ प्रपन्नां प्राप्तां तां प्रकृतिं स्वभावं विलोक्यापि ज्ञात्वापि अवाप्तः उद्बुद्धः संस्कारो निजदूतत्वधारकवासना येन तस्य भावस्तत्ता तया गिरो दूत्या नलगुणानेव वाक्यान्यसृजदवोचदित्यर्थः । यथा मुनिर्योगलब्धात्मतत्वावबोधोऽपि वासनावशाद् बाह्यमनुसन्धत्ते तथा नलोऽपि प्रकटितात्मा पुनः संस्कारवशात् दूत्यमेवानुसरन्नुवाचेत्यर्थः ॥ १२० ॥

अयेति । अये ! इति विषादे चेति विश्वः । मया आत्मा स्वरूपं किं किमर्थमनिह्नुतीकृतः प्रकाशितः अत्रात्मप्रकाशने स. शतक्रतुरिन्द्रस्तु मां किं मन्ता मंस्यते अथ पुरोऽग्रे स्वभक्त्या नमन् प्रणमन् ह्रिया आविलः कलुषः सन् तस्येन्द्रस्येङ्गितानि चेष्टितान्यपि न विलोकिताहे न विलोकयिष्यामि लुट् । तन्मुखमवलोकितुमपि नोत्सहे इत्यर्थः॥१२१॥

स्वेति । यद्यस्मात् सुधा इत्येव स्वनाम अभ्यधान्नाम?अवोचं खलु? तन्महदेतन्महेन्द्रकार्यमुज्झितं त्यक्तं अहो इन्दूदूतयशो मदाद्यैःयशसा सितीकृतो धवलीकृतो मया पुनर्द्विषां हसैर्हासैः स्वनहसोर्वेत्यप्रत्ययः । सितीकृतो धवलीकृतः । यशो बद्धा स्वस्यापि धवलत्वादिति विश्वेश्वरीं जेतुं हासस्य धवलस्यापि शत्रुहासस्य मालिन्या

हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः ॥१२२॥
धियात्मनस्तावदचारु नाचरं परस्तु यद्वेद स तद्वदिष्यति।
जनावनायोद्यमिनं जनार्दनं क्षयेजगज्जीवपिबं वदन् शिवम् ॥१२३॥
स्फुटत्यदः किं हृदयं त्रपाभरात् यदस्य शुद्धैर्विबुधैर्विबुध्यताम्।
विदन्तु ते तत्त्वमिदन्तु दन्तुरञ्जनानने कः करमर्पयिष्यति ॥१२४॥
मम श्रमश्चेतनयानया फली बलीयसाऽलोपि च सैव वेधसा।

पादकत्वादित्याशयेन मेचकीकृतमिति व्याख्यातं सितौ धवलमेचकौ इत्यमरः। अत्र हनूमद्ग्रहणं पूर्वकल्पाभिप्रायमन्यथा कृतत्रेतावर्त्ति पुरुषयोः पौर्वापर्यविरोधादिति ॥ १२२ ॥

धियेति। अथवा तावदात्मनो धिया बुद्धिपूर्वकमित्यर्थः। अचार्वसाधु नाचरं एवं स्थिते परोऽन्यो जनो यदचारु वदिष्यति तन्नु जनानामवनाय रक्षणायोद्यमिनमुद्योगिनं विष्णुमिति शेषः जनानामर्दयतीत्यर्दनं संहर्त्तारं नन्द्यादित्वात् ल्युट्प्रत्ययः। अथ क्षये कल्पान्ते जगज्जीवानां पिबतीति पिबं संहर्तारं रुद्रमिति शेषः। पाघ्रादिना श प्रत्ययः। शिवं शान्तं वदन् शिवमशिवमशिवं शिवञ्च वदन्नित्यर्थः। स पर एव वेद अनर्गलो लोकस्तावदास्तां ममानपराधित्वमन्तर्यामिसाक्षिकमिति ॥ १२३ ॥

स्फुटतीति। अदो हृदयं त्रपाभराल्लज्जातिभारात् स्फुटति किं? स्फुटिष्यति किं? आशंसायां भूतवच्चेति चकारादाशंसायां भविष्यदर्थे वर्त्तमानवत्प्रत्ययः। यद् यस्मात् स्फुटनादस्य हृदयस्य शुद्धैर्विबुधैर्देवैर्विबुध्यतां ज्ञायतां अतः स्फुटनमाशास्यं इत्यर्थः। परन्तु ते विबुधास्तत्त्वं हृदयशुद्धिं विदन्तु तथापि दन्तुरमतिविषमन्तदेवाह जनानने कः करं अर्पयिष्यति न कोऽपीत्यर्थः। कथञ्चिद्देवताप्रत्ययेऽपि जनप्रत्यायनं दुष्करमिति तात्पर्यार्थः ॥ १२४ ॥

श्रमेति। मम श्रमो दूत्यप्रयासः अनया चेतनया स्वरूपनिगूहन-

न वस्तु दैवस्वरसाद्विनश्वरं सुरेश्वरोऽपि प्रतिकर्त्तुमीश्वरः ॥१२५॥
इति स्वयं मोहमयोर्म्मिनिर्म्मितं प्रकाशनं शोचति नैषधे निजम्
तथाव्यथामग्नतदुद्दिधीर्षया दयालुरागाल्लघु हेमहंसराट्॥१२६
नलं स तत्पक्षरवोर्द्धवीक्षिणं सएष पक्षीति भणन्तमभ्यधात् ।
नयादयैनामति मा निराशना मसून् विहातेयमतःपरं परम्१२७
सुरेषु पश्यन्निजसापराधता मियत्प्रयस्यापि तदर्थसिद्धये ।

बुद्ध्या फली सफलः स्यात् बलीयसा बलवत्तरेण वेधसा दैवेन सा चेतनैशालोपि नाशिता च तथा हि दैवस्य स्वरसात् स्वेच्छातो विनश्वरं वस्त्वर्थं सुरेश्वरः शक्रोऽपि प्रतिकर्त्तुं नेश्वरो न शक्त इत्यर्थान्तरन्यासः ईदृशी भवितव्यतेति भावः ॥ १२५ ॥

इतीति । इतीत्थं नैषधे नले मोहमयोर्मिणा अज्ञानविलसितेन निर्मितं निजमात्मीयं स्वयं प्रकाशनं स्वरूपप्रकटितं यथा तथा शोचति व्ययमाने सति दयालुर्हेमहंसराट् सुवर्णराजहंसः तथा व्यथामग्नस्य तस्य नलस्योद्दिधीर्षया उद्धर्त्तुमिच्छया धरतेरुत्पूर्वात् सन्नन्तात् स्त्रियामप्रत्यये टाप् लघु क्षिप्रमगादागतः॥ १२६ ॥

नलमिति । स राजहंसः तस्य हंसस्य पक्षरवेण निमित्तेनोर्द्ध्वं वीक्षत इति वीक्षिणं तथा एष सर्वोपकारी पक्षीति भणन्तमेव नलमभ्यधात् अभिहितवान् हे अदय ! निर्दय ! एनां दमयन्तीमतिनिराशनां नैराश्यं मा नय प्रापय कुतः । अतः परमियं परं केवलमसून् प्राणान् विहाता विहास्यति जहातेर्लुट् । तदेतत् प्राक् स्तोतकाङ्क्षिणा त्वया नैवमाशाच्छेदः कार्य्य इत्यर्थः ॥ १२७ ॥

सुरेष्विति । हे नल ! भवान् तदर्थस्य सुरकार्य्यस्य सिद्धये इयदेतावत् प्रयस्याप्यायस्यापि यसुप्रयत्न इति धातोः समासे क्त्वोल्यवादेशः । सुरेषु विषये निजां सापराधतामेव पश्यन् उत्प्रेक्षमाणः सन् कूटसाक्षीभवनस्य कपटसाक्षीभावस्य अभूततद्भावे च्विः । उचितो न अन-

न कुटसाक्षीभवनोचितो भवान् सतां हि चेतःशुचितात्मसाक्षिका।
इतीरिणापृच्छ्य नलं विदर्भजामपि प्रयातेन खगेन सान्त्वितः।
मृदुर्बभाषे भगिनीं दमस्य स प्रणम्य चित्तेन हरित्पतीन्नृपः॥१२९
ददेऽपि तुभ्यं कियतीः कदर्थनाः सुरेषु रागप्रसवावकेशिनीः।
अदम्भदूत्येन भजन्तु वा दयां दिशन्तु वा दण्डममी ममागसा॥१३०
अयोगजामन्वभवं न वेदनां हिताय मेऽभूदियमुन्मदिष्णुता।
उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनसः॥१३१॥

पराधिन्यात्मन्यपराधोत्प्रेक्षित्वमेव कूटसाक्षित्वं तत्ते अनुचितमित्यर्थः। तथा हि सतां चेतःशुचिता चित्तशुद्धिता आत्मसाक्षिका स्वप्रमाणिका हि स्वयं प्रमितेऽर्थे किं विचारायेत्यर्थः॥१२८॥

इतीति। इतीरिणा इत्थंवादिना नलं विदर्भजामपि भैमीं चापृच्छ्यामन्त्र्य प्रयातेन प्रयाणप्रवृत्तेन खगेन हंसेन सान्त्वितो बोधितः स नृपः स्वचित्तेन हरित्पतीनिन्द्रादीन् प्रणम्य मृदुरार्द्रचित्तः सन् दमस्य भगिनीं दमयन्तीं बभाषे॥१२९॥

ददे इति। हे प्रिये! सुरेषु विषये रागप्रसवे अनुरागजनने अवकेशिनीः वन्ध्या असमर्था इत्यर्थः। वन्ध्योऽफलोऽवकेशी चेत्यमरः। कियतीरियत्तारहिता इत्यर्थः। कदर्थनाः कुत्सनाः। अश्लीलप्रयोगानिति यावत् तुभ्यं केवलं प्रियार्हायै इति भावः। ददेऽपि ददाम्यपि अतिगर्हितमाचरामीत्यर्थः। अपि गर्हायाम्। अपि सम्भावना प्रश्नशङ्का गर्हा समुच्चय इति विश्वः। किञ्चैवं सति अमी देवाः अदम्भेनाकपटेन दूत्येन दूतकर्मणा। कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे इत्यमरः। दयां वा भजन्तु आगसा अपराधेन मम दण्डं दण्डनं वा दिशन्तु इतः परमिमान्तु न कदर्थयामीति भावः॥१३०॥

अयोगजामिति। इयमुन्मदिष्णुता उन्मत्तता अलंकृञित्यादिना इष्णुच् प्रत्ययः। मे हितायोपकारायाभूत् कुतः अयोगजां

तवेत्ययोगस्मरपावकोऽपि मे कदर्थनात्यर्थतयागमद्दयाम् ।
प्रकाशमुन्माद्य यदद्य कारयन्मयात्मनो मामनुकम्पते स्म सः ॥१२२
अमी समीहैकपरास्तवामराः स्वकिङ्करं मामपि कर्त्तुमीशिषे
विचार्य्य कार्य्यं सृज मा विधान्मुधा कृतानुतापस्त्वयि पार्ष्णिविग्रहं।
उदासितेनैव मयेदमुच्यसे भिया न तेभ्यः स्मरतानवान्न वा ।

वियोगोत्थां वेदनां नान्वभवं तथा हि अज्ञानवशात् अज्ञानबलादेनसः पापस्य लघुत्वं ज्ञानकृतापेक्षयाल्पत्वमिव दोषादुन्माददोषादपि दोषस्य वियोगः दुःखस्य लाघव मल्पत्वमुदेति तस्माद्दोषोऽपि कदाचिदुपकरोतीति भावः ॥ १२१ ॥

तवेति । हे प्रिये ! इतीत्थं तव कदर्थनानां मदीयाप्रियोक्तिरूपकुत्सनानामत्यर्थतया अत्याधिक्येन हेतुना मे मम सम्बन्धी अयोगे यः स्मरपावकः कामाग्निः सोऽपि दयामगमत् दयालुरभूदित्यर्थः । यद्यस्मादद्य स कामाग्निः प्रयोजककर्त्ता उन्माद्य मामुन्मत्तं कृत्वा मया प्रयोज्येन आत्मनो मत्स्वरूपस्य प्रकाशं प्रकाशनं कारयन् त्वामनुकम्पते स्म तस्मात् कामाग्नेरपि दयोत्पन्नेत्युत्प्रेक्षा किं बहुना उन्मादप्रसादात् उभावप्यावां कृतार्थौ स्वः इति तात्पर्यार्थः ॥ १२२ ॥

अमी इति । अमी अमरास्तव समीहायां त्वत्कृतानुरागे एकपरा एकाग्रास्ते च त्वामपेक्षन्ते इत्यर्थः । त्वञ्च मामपि स्वकिङ्करं निजदासं कर्त्तुं ईशिषे शक्नोषि अपि शब्दात्तानपीत्यर्थः । ईशः से इतीडागमः । किन्तु विचार्य्य विमृश्य कार्य्यं सृज उत्पादय कुतः अनुतापः पश्चात्तापः कृतः सन् त्वयि पार्ष्णिविग्रहं पार्ष्णिग्राहकृत्यं मुधा माविधात् माकुरु विमृश्यकरणात्पश्चात्तापस्ते माभूदित्यर्थः । विपूर्वाद्धातेर्लुङि न माङ्योग इत्यड्भावः ॥ १२२ ॥

एतच्च माध्यस्थ्येनैवोच्यते न तु पक्षपातेनेत्याह उदासितेनेति । उदासितेनौदासीन्येन माध्यस्थ्येनैवेत्यर्थः भावे क्तः कर्त्तरि वा । उदा-

हितं यदि स्यान्मदसुव्ययेन ते तदा तव प्रेमणि शुद्धिलब्धये॥१३४॥
इतीरितैर्नैषधसूनृतामृतैर्विदर्भजन्मा भृशमुल्ललास सा।
ऋतोरधिश्रीः शिशिरानुजन्मनः पिकस्वरैर्दूरविकस्वरैर्यथा॥१३५
नलं तदावेत्य तमाश्रये निजे घृणां विगानञ्च मुमोच भीमजा
जुगुप्समाना हि मनोद्रुतं तदा सतीधिया दैवतदूतधावि सा॥१३६

स्थितेन मध्यस्थेनैव मया इदं पूर्वोक्तमुद्यसे वदेः कर्मणि लटि यकि वचिस्वपीत्यादिना सम्प्रसारणं। तेभ्यः सुरेभ्यो भिया वा स्वरतानवात् कामप्रयुक्तकार्श्याद्वा न युवादित्वादण् प्रत्ययः। तस्माद्विमृश्य कुर्वितिभावः। अथ विमृश्यैव कुर्वे त्वद्वरणमेवेतिनिश्चय स्तत्राह मदसुव्ययेन मत्प्राण समर्पणेनेति शेषः। तव प्रेमणि विषये शुद्धिलब्धये ते तव हितं यदिस्यात् आनृण्यलाभाय भवति त्वत्कृतानुरागोपकारस्य प्राणसमर्पणमेव प्रत्युपकार इति भावः॥ १३४॥

इतीति। इतीत्थमीरितैरभिहितैर्नैषधस्य नलस्य सूनृतैः सत्यप्रियवाक्यैरेवामृतैः सा विदर्भजन्मा वैदर्भी शिशिरमनु जन्म यस्य तस्य शिशिरानुजन्मनः शिशिरानन्तरभाविनः ऋतोर्वसन्तर्तोरधिका श्रीर्दूरविकस्वरैरतिश्राव्यैः पिकस्वरैर्यथा कोकिलकूजितैरिव भृशमुल्ललास जहर्ष अत्र सूनृतानामुपमानभूतकोकिलालापवत्तादात्विकत्वेनातिश्राव्यत्वद्योतनार्थं वसन्तस्य शिशिरानुजन्मत्वेन व्यपदेशः॥ १३५॥

नलमिति। तदा नलस्य स्वरूपगोपनकाले दैवतदूते धावति प्रवर्तन इति दैवतदूतधावि यथातथा द्रुतं मनः सतीधिया पतिव्रतात्वाभिमानेन हेतुना जुगुप्समाना बीभत्समाना भीमजा तदा नलस्य स्वरूपकथनकाले तं दूतं नलमवेत्य बुद्ध्वा निजे आश्रये घृणां परपुरुष इति जुगुप्सां विगानमात्मनिन्दां च मुमोच॥ १३६॥

मनोभुव इति। हे मन्मथ! मनोभुवो मनोजन्यस्य ते भविनां संसारिणां मनः पिता, तत् पितरं मनः एनसि एवं दुश्चिन्तापाते निम-

मनोभुवस्ते भविनां मनः पिता निमज्जयन्नेनसि नैव लज्जसे ।
अमुद्रि सत्युक्तकथा त्वयेति सा स्थितासतीमन्मथनिन्दिनी धिया ।
प्रसूनमित्येव तदङ्गवर्णना न सा विशेषात् कतमत्तदित्यभूत् ।
तदा कदम्बं निरवर्णि रोमभिर्मुदश्रुणा प्रावृषि हर्षमागतैः१३८
मयैव संबोध्य नलं व्यलापि यत् स्वमाह मद्बुद्धमिदं विमृश्य तत् ।

ज्जयन् लज्जसे त्वया एवं पितृद्रोहिणा सत्पुत्राणां कथा पितृभक्तताख्यातिरमुद्रि मुद्रिता निवारिता इत्येवं सा भैमी धियान्तःकरणेन मन्मथनिन्दिनी सती स्थिता तूष्णीं स्थिता सती कथञ्चित् किञ्चिदुवाचेत्यर्थः ॥ १३७ ॥

प्रसूनमिति । सा प्रसिद्धा तदङ्गवर्णना भैमीशरीरस्तुतिः प्रसूनं सामान्यतः पुष्पमेवाभूत् किन्तु तत्प्रसूनं कतमत् किं जातीयमितिविशेषात् विशेषोल्लेखान्नाभूत् तत्काले मुदश्रुणा प्रावृषि वर्षासु आनन्दवाष्पवर्षे सतीत्यर्थः हर्षं विकाशमागतैः प्रावृषेण्यत्वात् कदम्बकुसुमविकासस्येति भावः । लोमभिः लोमव्याजेनेत्यर्थः । कदम्बं कदम्बकुसुममिति निरवर्णि निरैक्षि प्रत्यक्षेणैवालक्षीत्यर्थः । निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणमित्यमरः । तदा पुलकितं तदङ्गं बालकदम्बकल्पमासीदित्यर्थः । एतच्च स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू । अश्रुवैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिता इत्युक्तसकलसात्त्विकोपलक्षणमिति द्रष्टव्यं तदङ्गस्य कदम्बाभेदोक्तेरतिशयोक्तिभेदः ॥१३८॥

मयेति । मया नलमेव संबोध्य व्यलापीति यत् तदिदं मद्विलपितं विमृश्यालोच्यासौ नलः मद्बुद्धं स्वसम्बोधनालिङ्गेन मया ज्ञातमेव किं स्वमात्मानमाह । स्वो ज्ञाता वात्मनि स्वमित्यमरः । अनया ज्ञातस्य किं गोपनेनेति मत्वा नलोऽहमिति कथितवानित्यर्थः। आहेति भूते नलत्वभ्रमादिति वामनः । अत्र तु वर्तमानसामीप्याद्वा गर्तारिरति । दमस्वसुः या भ्रान्ति स्तां भ्रान्तिं असौ स नलः भाषितः कापिसः स्वेननलोद्भ्रम

असाविति भ्रान्तिमसाद्दमस्वसुः स्वभाषितस्वोन्मदविभ्रमक्रमः।१३
विदर्भराजप्रभवा ततः परं त्रपासखी वक्तुमलं न सा नलम्।
पुरस्तमूचेऽभिमुखं यदत्रपा ममज्ज तेनैव महाह्रदे ह्रियः॥१४०॥
यदापवार्य्यापि न दातुमुत्तरं शशाक सख्याः श्रवसि प्रियाय सा।
विहस्य सख्येव तमब्रवीत्तदा ह्रियाधुना मौनधना भवत् प्रिया१४।
पदातिथेयाल्लिखितस्य ते स्वयं वितन्वती लोचननिर्झरानियम्।
जगाद यां सैव मुखान्मम त्वया प्रसूनबाणोपनिषन्निशम्यतां१४२

विभ्रमाणां स्वोन्मादविलसितानां क्रमः अये प्रिये ! इत्यादि तेनैव श्लोकोक्तप्रकारो येन स सन् असात् आशासीत् अच्छेदीदित्यर्थः। स्यतेर्लुङि विभाषा घ्राधेट्शाच्छास इति वा सिचो लुक्। उन्मादादात्मप्रकाशनमिति नलवाक्यादेवावगमात् स्वेन ज्ञात्वा दूतभ्रान्तिर्निरस्तेत्यर्थः॥ १३९ ॥

विदर्भेति। सा विदर्भराजप्रभवा वैदर्भी ततः परं नलोऽयमिति ज्ञानानन्तरं त्रपायाः सखी लज्जिता सती नलं वक्तुं साक्षात् सम्भाषितुमलं न शशाक कुतः पुरः पूर्वमत्रपा निस्त्रपा सती तं नलमभिमुखं यथा तथा ऊचे इति यत् तेनैव हेतुना ह्रियो महाह्रदे महति लज्जाह्रद इत्यर्थः घटस्य स्वरूपमितिवत् कथञ्चिद्भेदनिर्देशः ममज्ज मग्ना॥ १४० ॥

यदेति। सा भैमी यदा अपवार्य व्यवधायापि सख्याः श्रवसि श्रोत्रे प्रियायोत्तरं दातुं न शशाक तदा सख्येव विहस्य तं नलमब्रवीत्। किमिति अधुना भवत्प्रिया भैमी ह्रिया मौनधना बद्धमौना न तु वैराग्यद्वेषाद्वेति भावः॥ १४१ ॥

पदेति। इयं भवत्प्रिया त्वत्प्रिया लिखितस्य चित्रगतस्य ते पदयोरातिथेयान् अतिथिषु साधून् पाद्यभूतानित्यर्थः। पथ्यतिथिवसतिस्वपतेर्ढञ्। लोच-

असंशयं स त्वयि हंसएव मां शशंस न त्वद्विरहाप्तसंशयां ।
क्व चन्द्रवंशस्य वतंस!मद्वधा नृशंसता संभविनी भवादृशि॥१४३॥
जितस्त्वयास्येन विधुः स्मरः श्रिया कृतप्रतिज्ञौ मम तौ बधे कुतः।
तवेति कृत्वा यदि तज्जितं मया न मोघसङ्कल्पधराः किलामराः१४४
निजांशुनिर्दग्ध मदङ्गभस्मभि मुधा विधुर्वाञ्छति लाञ्छनोन्मृजां

ननिर्झरान् वाष्पपूरान्वितन्वती यां प्रसूनबाणोपनिषदं कामरहस्यं जगाद त्वदागमात् प्रागिति शेषः। सैवोपनिषन्मम मुखात् त्वया स्वयं निशम्यतां श्रूयताम् ॥ १४२ ॥

असंशयमिति। हे चन्द्रवंशस्य वतंसावतंस! वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यकारलोपः। स हंसः त्वद्विरहेणाप्तसंशयां प्राप्तप्राणसन्देहां मां त्वयि विषये न शशंसैव अन्यथा भवादृशे त्वादृशे त्यदादिष्वित्यादिना कञ्प्रत्ययः। सर्वनाम्नइत्याकारादेशः। मद्वधाद्धेतोर्नृशंसता घातुकत्वं स्त्रीवधपातकित्वमिति यावत् नृशंसोघातुकः क्रूर इत्यमरः। क्व सम्भविनी सम्भवति न क्वापि सम्भवितेत्यर्थः। सज्जनस्य दयानिधेस्तव नेदृशकार्यम् युक्तमिति भावः ॥ १४३ ॥

जितइति। विधुश्चन्द्र स्त्वया आस्येन जितः स्मरः श्रिया सौन्दर्येण जितः कुतः कारणात् विधुस्मरौ मम बधे कृतप्रतिज्ञौ त्वयि जेतरि स्थिते निरपराधायां किमिति मा दयत इत्यर्थः। अथ तवेति त्वदीयेति कृत्वा यदि तत्तर्हि मया जितं त्वां विना जीवनाभावात् मरणमेव मे प्रियमित्यर्थः सेत्स्यति चैतदित्याह। अमरा मोघसङ्कल्पस्य धरन्तीति धराः पचाद्यच् न किल। सत्यसङ्कल्पाः खलु देवाः देवौ च विधुस्मरौ तयो स्त्वदीयजनापकारकथनात् प्रत्यनीकालङ्कारः। बलिनः प्रतिपक्षस्य प्रतीकारे सुदुष्करे। य स्तदीयतिरस्कारः प्रत्यनीकं तदुच्यत इति लक्षणात् ॥ १४४ ॥

त्वदास्यतां यास्यति तावतापि किं वधूवधेनैव पुनः कलङ्कितः॥१४५
प्रसीद यच्छ स्वशरान् मनोभुवे स हन्तु मां तैर्धृतकौसुमाशुगः ।
त्वदेकचित्ताहमसून् विमुञ्चती त्वमेव भूत्वा तृणवज्जयामि तं॥१४६
श्रुतिः सुराणां गुणगायनी यदि त्वदङ्घ्रिमग्नस्य जनस्य किन्ततः।

निजेति । विधुश्चन्द्रः निजैरंशुभि र्निर्दग्धस्य मदङ्गस्य मत्शरीरस्य भस्मभिर्लाञ्छनोन्मृजां स्वकलङ्कपरिमार्जनं षिद्भिदादिभ्योऽङ् । सुधा वृथैव वाञ्छति नलमुखसाम्यार्थमिति शेषः। तथा हि हे प्रिय ! वधूवधेन मद्वधपातकेनैव पुनः कलङ्कितः सन् तावतापि मदङ्गभस्मनोन्मार्जनेऽपि त्वदास्यतां तत्तुल्यतामित्यर्थः । यास्यति प्राप्स्यति किं ? न यास्यत्येवेत्यर्थः अत्र विधोर्नलास्यसाम्याय भैम्यङ्गभस्मभिः स्वकलङ्कमार्जनाद्वधूवधकलङ्कप्राप्तिकथनादनर्थोत्पत्तिरूपो विषमालङ्कारः ॥ १४५॥

प्रसीदेति । हे प्रिय ! प्रसीद स्वशरान्मनोभुवे कामाय यच्छ देहि पाघ्रादिना दाणो यच्छादेशः। स कामो धृतकौसुमाशुगः त्यक्तकुसुमबाणस्तैः स्वशरैः मां हन्तु हिनस्तु तस्योपयोगमाह अहं त्वय्येकस्मिंश्चित्तं यस्याः सा सती असून् प्राणान् विमुञ्चती त्यजन्ती आच्छीनद्योर्नुमिति विकल्पान्नुमभावः । अतएव त्वमेव भूत्वा "यं यं वापि स्मरन् भावमित्यादिगीताप्रामाण्यादिति भावः। तं कामं तृणवत्तृणतुल्यं जयामि जेष्यामीत्यर्थः। आशंसायां वर्तमानवत्प्रत्ययः ॥ १४६ ॥

ननु श्रुतयोऽपि देवानेव गायन्ति किमिति तत्तेषु वेदवेद्येषु विगानमत आह श्रुतिरिति । श्रुतिर्वेदोऽपि सुराणां गुणगायनी गुणस्तोत्र्येव आदि कर्तरि ल्युट् टित्वात् ङीप् । त्वदङ्घ्रौ मग्नस्य त्वच्चरणैकशरणस्य जनस्य स्वस्येत्यर्थः । ततः किं तैर्देवैः कोऽर्थ इत्यर्थः । तथा हि अपृष्ठ घनास्वैः घनायगाढैः जनैः रवेरर्कस्य स्तवे स्तोत्रे कृते सति कुमुदान्यस्मां

स्तवि रवेरस्तु कृताप्लवैः कृते न मुद्वती जातु भवेत् कुमुद्वती॥१४७॥

कथासु शिष्ये वरमद्य न ध्रिये ममावगन्तासि न भावमन्यथा ।
त्वदर्थमुक्तासुतयाशु नाथ मां प्रतीहि जीवाभ्यधिक! त्वदेकिकां॥१४८॥

महेन्द्रहेतेरपि रक्षणं भयाद्यदर्थिसाधारणमस्त्रभृद्व्रतम् ।
न सूनवाणाशुगतोऽपि मामवन् क्षतं तदुच्चैरवकीर्णिनस्तव॥१४९॥

सन्तीति कुमुद्वती कुमुदिनी कुमुदनडवेतसेभ्यो ड्मतुप् टिलोपे ङीप् । जातु कदापि मुदस्या अस्तीति मुद्वती मोदवती विकासवती न भवेत् दृष्टमिति शेषः । दृष्टान्तालङ्कारोव्यक्तः लक्षणन्तूक्तम् ॥ १४८ ॥

कथास्विति । हे नाथ ! कथासु शिष्ये कथामात्रशेषा भवामि मरिष्यामीत्यर्थः । शिष् सर्व्वोपयोग इति धातोर्दैवादिकात् प्राप्तकाले कर्तरि लट् । वरं मनाक् प्रियं अद्य न ध्रिये न स्थास्ये न जीविष्यामीत्यर्थः । धृङ् अवस्थाने इति धातो स्तौदादिकात् प्राप्तकाले कर्तरि लट् रिङ् शयग्लिक्षु इति रिङादेशः । अन्यथा जीवेन परीक्षणे मम भावमाशयं नावगन्तासि नागमिष्यसि गमेर्लुटि सिप् । त्वदर्थं तुभ्यं मुक्तासुतया त्यक्तप्राणतया आशु मां हे जीवाभ्यधिक ! अतएव त्वमेवैक एको मुख्यो यस्यास्तां त्वदेकिकां त्वदेकशरणामित्यर्थः । शैषिके कपि कात्पूर्वस्येकारः प्रतीहि जानीहि ॥ १४८ ॥

महेन्द्रेति । महेन्द्रहेतेर्वज्रायुधादपि यद्भयं तस्माद्रक्षणं भीतार्थानां भयहेतुरिति क्रमादुभयत्रापादानात् पञ्चमी । अर्थिष्वर्थिमात्रेषु साधारणमस्त्रभृतां व्रतं सूनमेव वाणो यस्य स कुसुमवाणः कामस्तस्य आशुगस्तस्मादपि मां स्त्रियमिति भावः । नावन् ! अरक्षकः अतएवावकीर्णिनः क्षतव्रतस्य अवकीर्णी क्षतव्रत इत्यमरः । तव तदुच्चैर्महद् व्रतं क्षतं सर्वाभयदानव्रतिनस्ते पुष्पभृतः स्त्र्युपेक्षणे महत्कष्टमापन्नमित्यर्थः ॥१४९॥

तवास्मि मां घातुकमप्युपेक्षसे मृषामरं हामरगौरवात् स्मरम्।
अवेहि चण्डालमनङ्गमङ्ग तं स्वकाण्डकारस्य मधोः सखा हि सः॥१५०॥
लघौ लघावेव पुरः परे बुधैर्विधेयमुत्तेजनमात्मतेजसः।
तृणे तृणेढि ज्वलनः खलु ज्वलन्क्रमात्करीषद्रुमकाण्डमण्डलं॥१५१॥
सुरापराधस्तव वा कियानयं स्वयम्बरायामनुकम्पता मयि।

तवेति। तवास्मि त्वदीयाहमस्मि शरणागतत्राणं विहितमिति भावः। एवं सति मां घातुकं शरणागतस्त्रीहन्तारमपीत्यर्थः। लषपतेत्यादिना उकञ् न लोकेत्यादिना कर्मणि षष्ठीनिषेधात् द्वितीया। अतएव मृषामरमलीकामरं स्मरमसरमिति गौरवादुपेक्षसे हा कष्टं? किं तु अङ्ग! भोस्तमनङ्गं चण्डालमवेहि कुतः हि यस्मात्सोऽनङ्गः स्वकाण्डकारस्य स्वेषुकारस्य मधोर्वसन्तस्य पुष्पकरत्वात् स्वस्य पुष्पायुधत्वाच्चेति भावः काण्डोऽस्त्री दण्डबाणेत्यमरः। सखा हि इषुकारस्य चण्डालविशेषत्वात् तत्संसर्गिणोऽपि चण्डाला एवेत्यर्थः॥१५०॥

लघाविति। बुधैः सुज्ञैः पुरः पूर्वं लघौ लघावेव लघुप्रकारेऽल्पप्रकारएव प्रकारे गुणवचनस्येति द्विर्भावः। परे शत्रौ पूर्वादिभ्यो विकल्पात् सर्वनामाभावः। आत्मतेजसः स्वप्रतापस्योत्तेजनं उद्दीपनं विधेयं तथा हि ज्वलनोऽग्निः स नन्दादित्वाल्ल्युट्। तृणे ज्वलन् क्रमात्करीषाः शुष्कगोमयाः गोविट्गोमयमस्त्रियां तत्तु शुष्कं करीषोऽस्त्रीत्यमरः। तेषां द्रुमकाण्डानां वृक्षस्कन्धानाञ्च मण्डलं समूहं तृणेढि हिनस्ति दहति खल्वित्यर्थः तृहि हिंसायां लट् रुधादिभ्यः श्नम् तृणह इम् गुणधत्वादिकार्यम्। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥१५१॥

सुरेति। तव स्वयमेव वृणोतीति स्वयम्बरा पचाद्यच्। तस्यां मयि अनुकम्पता अनुकम्पित्वं नमिकम्पीत्यादिना ताच्छील्ये रप्रत्ययः।

गिरापि वक्ष्यन्ति मखेषु तर्पणादिदं न देवा सुखलज्जयैव ते॥१५२
व्रजन्तु ते तेऽपि वरं स्वयम्बरं प्रसाद्य तानेव मया वरिष्यसे।
न सर्वथा तानपि न स्पृशेद्दया न तेऽपि तावन्मदनस्त्वमेव वा॥१५३
दूतीयमालेख्यगतेऽपि वीक्षिते त्वयि स्मरव्रीडसमस्ययाऽनया।
पदेपदे मौनमयान्तरीपिणी प्रवर्त्तिता सारघसारसारिणी॥१५४

भावार्थे तल्प्रत्ययः। अयं कियान् सुरापराधः तत्प्रेषितस्यापि मया हृतत्वात्ते कोऽपराध इत्यर्थः। अथापराद्धृत्वेऽपि मखेषु तर्पणात् प्रीणणात् देवास्ते सुखलज्जयैव सुखदाक्षिण्येनैव इदमपराद्धृत्वं गिरापि न वक्ष्यन्त्यपिशब्दान्मनसापि न स्मरिष्यन्तीत्यर्थः ॥ १५२ ॥

व्रजन्त्विति। अथवा हे नल! ते देवा अपि ते तव सम्बन्धिनं स्वयम्बरं व्रजन्तु वरं साध्वेवैतदित्यर्थः कुतः मया तानेव प्रसाद्य प्रसन्नान् कृत्वा वरिष्यसे न च ते दुराधर्षा इत्याह सर्वथा तान् देवानपि दया न स्पृशेदिति न। किं तु स्पृशेदेवेत्यर्थः। सम्भवस्य निषेधनिवर्तने द्वौ नञौ प्रतिषेधौ स्तः। तेऽपि तावन्मदनस्त्वमेव वा न। लोके त्वां मदनं च विना न कोऽपि निष्कृप इति भावः ॥१५३ ॥

दूतीति। हे सौम्य! आलेख्यगते चित्रगतेऽपि त्वयि वीक्षिते सति स्मरव्रीडयोः समस्यया समष्ट्या अनया भैम्या पदे पदे वचने वचने स्थाने स्थाने अन्तर्गता आपोऽस्येत्यन्तरीपस्तटं द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटमित्यमरः। ऋक्पूरित्यादिना समासान्तोऽप्रत्ययः। द्व्यन्तरुपसर्गेभ्योऽप ईदितीकारः। मौनमयं मौनरूपमन्तरीपं यस्याः सा मौनान्तरीपोद्गतेत्यर्थः। सर्वधन्वीतिवदिन्नन्तो बहुव्रीहिः अटघाङित्यादिना णत्वं इतीयं उक्तरूपा सारघसारस्य मधुसारस्य सारिणी स्वल्पनदी। सारिणी स्वल्पसरिदितिविश्वः। प्रवर्त्तिता चित्रगतस्य

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयति यः किन्नु कृत्ताङ्गुलीकः ।
कृत्वा मित्रं मधुमधिवनस्थानमन्तश्चरित्वा
सख्याः प्राणान् हरति हरितस्त्वद्यशस्तद्जुषन्ताम्॥१५५॥
अथ भीमभुवैव रहोऽभिहितां नतमौलिरपत्रपया स निजाम् ।
अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगम्य ययौ॥१५६॥

तथाप्ये एव मधुवर्षिणी वागुक्तेत्यर्थः अत्र विषयस्य वाचोऽनुपादानेन विषयिण्याः सारघसारक्षारिण्या एवोपनिबन्धात्तयोर्भेदेऽप्यभेदोक्तेरतिशयोक्तिभेदः ॥ १५४ ॥

चण्डाल इति । हे नल ! विषमविशिखः कामस्ते तव सम्बन्धी चण्डालः वध्यांश्च हन्युः सततं यथा शास्त्रं नृपाज्ञयेति स्मरणात् । माऽङ्मरणार्थमेव त्वया कृतः कोऽपि चण्डाल इत्यर्थः । अतएव न दृश्यते न स्पृश्यते च एकत्रानङ्गत्वादन्यत्र शास्त्रनिषेधाच्चेति भावः किं च निजभिया स्वयपराधे दण्डभयेन त्वयि विषये त्वामुद्दिश्य कृत्ताङ्गुलीकः । अपराधेऽपि त्राणार्थं छिन्नाङ्गुलीकः नद्यृतश्चेति कप् । पद्यमङ्गुलिविच्छेद सुरोविन्यस्तमक्षरम् । तन्नामकरणं चेति दासमेतच्चतुष्टयमिति दासचिह्नत्वादितिभावः । अतएवाङ्गहीनत्वादनङ्गः ख्यातः किं नु ? अतः किमत आह । मधुं वसन्तमपि मित्रं कृत्वा सहायञ्च कञ्चन सम्पाद्येत्यर्थः । अन्तरन्तःकरणमेव अधिवनं स्थानमरण्यदेशं चरित्वा भ्रान्त्वा सख्याः स्वसख्या भैम्याः प्राणान् हरति न स्त्रीवधजन्यं त्वद्यशो दुर्यश इत्यर्थः । हरितो दिशो जुषन्तां सेवन्तां दिगन्तविश्रान्तमस्त्वित्यर्थः । अत्र कामस्य चण्डालधर्मयोग्यचण्डालत्वेनोत्प्रेक्षणादुत्प्रेक्षाव्यञ्जकाप्रयोगाद्गम्या मन्दाक्रान्तावृत्तमुक्तम् ॥ १५५ ॥

श्वस्तस्याः प्रियमाप्तुमुद्धुरधियो धाराः सृजन्त्या रया
दस्रोदस्रकपोलपालिपुलकैर्वेतस्वतीरम्बुनः।
चत्वारः प्रहराः स्मरार्त्तिभिरभूत् सा यत् क्षपा दुःक्षपा
तत्तस्यां कृपयाखिलेव विधिना रात्रिस्त्रियामा कृता॥ १५७॥

तदखिलमिह भूतं श्रुत्यगत्या जगत्याः
पतिरभिलपति स्म स्वात्मदूतत्वतत्वम्।

अथेति। अथ भैमीवाक्यश्रवणानन्तरं जगतीपतिर्नलः भीमसुतैव भैम्येव रहस्यभिहितां निजामात्मीयाममरैः सह राजसमाजस्य राजसभाया गतिं प्राप्तिमपत्रपया स्वनरणलज्जया नतमौलिर्नम्रमुखः सन् अभ्युपगम्याङ्गीकृत्य ययौ तोटकवृत्तम्। इह तोटकमम्बुधिसैः कथितमिति लक्षणात्॥ १५६॥

श्व इति। श्वः परेऽहनि प्रियं नलं आप्तुमुद्धुरधियः सन्नद्धबुद्धेः अतएव रयात् प्रवाहवेगादस्रोदस्राश्च दन्तुरा इत्यर्थः। तैः कपोलपाल्योर्गण्डभित्त्योः पुलकैरोमाञ्चैर्वेतस्वती वेतसलतावतीः कुमुदनड्वेतसेभ्यो ड्मतुप् मादुपधायाश्चेत्यादिना मकारस्य वकारः। अम्बुनो धारा आनन्दवाष्पप्रवाहान् सृजन्त्या जनयन्त्यास्तस्या भैम्याश्चत्वारः प्रहरा अपि चतुर्यामात्मकापीत्यर्थः सा क्षपा स्मरार्त्तिभिः स्मरपीडाभिर्दुःक्षपा दुरतिवाह्याभूत् तस्मादस्यां भैम्यां कृपया कृपयैवेत्यर्थः। विधिना-वेधसा अखिलैव सर्वापि रात्रिस्त्रियामा त्रियामवत्येव कृता सत्यमितिशेषः गम्योत्प्रेक्षा॥ १५७॥

त्रिभुवनजनयावद्वृत्तवृत्तान्तसाक्षात्-
कृतिकृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥ १५८ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम् ।
संदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा

तदिति । जगत्याः पृथिव्याः पतिर्नलः इह दमयन्तीसमक्षं भूतं वृत्तं तदखिलं स्वात्मनः स्वस्य दूतत्वं दूतस्वरूपं भूतगत्या त्रयाणां भुवनानां समाहारस्त्रिभुवनं तद्धितार्थेत्यादिना समाहारे द्विगुः द्विगुरेकवचनं पात्रादित्वान्न स्त्रीत्वं । तस्मिन् जना यावन्तो वृत्ता यावद्वृत्तं यावदवधारणे इत्यव्ययीभावः । यावद्वृत्तञ्च ते वृत्तान्ताश्च तेषां साक्षात्कृतौ साक्षात्करणे कृतिषु कुशलेष्विन्द्रादिषु विषये द्राक् सपदि निरस्तानन्दं तेषामिष्टविघाताद्विहतसन्तोषं यथा तथा अभिनपतिस्म कथितवान् मालिनीवृत्तम् ॥ १५८ ॥

श्रीहर्षमिति । सन्दृब्धं ग्रथितमर्णववर्णनमित्यर्थः ग्रथितं दृब्धमित्यमरः ॥ १५९ ॥

काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥१५९

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां जीवातुव्याख्यायां नवमः सर्गः ॥

दशमः सर्गः ।

रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च दृष्टपाराः ।
स्वयम्वरं शम्बरवैरिकायव्यूहश्रियः श्रीजितयक्षराजाः ॥ १ ॥
नाभूदभूमिः स्मरसायकानां नासीदगन्ता कुलजः कुमारः ।
नास्थादपन्था धरणेः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु॥ २॥

अथ स्वयम्वरवृत्तान्तं वर्णयति रथैरित्यादि। अथ नलप्रयाणानन्तरं कुलजाः कुमाराः शस्त्रेषु शस्त्रविद्यासु शास्त्रेषु त्रय्यादिषु च दृष्टं पारं यैस्ते दृष्टपाराः पारदृश्वानः शम्बरवैरिणः कामस्य कायव्यूहस्य शरीरसंस्थानस्य श्रीरिव श्रीः शोभा येषां ते कन्दर्पकल्पा इत्यर्थः। श्रिया सम्पदा जितो यक्षराजः कुबेरो यैस्ते कुमारा राजकुमाराः कन्या वरयते रूपमित्याद्युक्तसमग्रगुणसम्पन्नाः इत्यर्थः। रथैः साधनैः स्वयं व्रीयतेऽस्मिन्निति स्वयम्वरस्तं स्वयम्वरभुवं तदा आयुः आयाताः आङ् पूर्वाद्यातेर्लङि लङः शाकटायनस्यैवेति वैकल्पिको झेर्जुसादेशः ॥ १ ॥

नेति। कुलजः कोऽपीति शेषः स्मरसायकानामभूमिरविषयो नाभूत् तथा अगन्ता स्वयम्वराप्रयाता च नाभूत्। किञ्च राज्ञां व्रजेषु युगपद्व्रजत्सु सत्सु धरणेः कणोऽपि भूलेशोऽप्यपन्था अपथं विपथो विभाषेति विकल्पात् समासान्ताभावः। नास्थात् नस्थितः गतिस्थेत्यादिना सिचो लुक्। अत्र राज्ञां कार्त्स्न्येन स्मरेषु विषयत्वगन्तृत्वाभ्यां भूमेः पथित्वेन चासम्बन्धे सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ २ ॥

योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्त्तुं।
द्रष्टुं परैस्ताननुरोद्धुमन्यैः स्वमात्रशेषाः ककुभो बभूवुः ॥ ३ ॥
लोकैरशेषैरवनिश्रियन्ता मुद्दिश्य दिश्यैर्विहिते प्रयाणे।
स्ववर्त्तितत्तज्जनयन्त्रणार्त्ति विश्रान्तिमापुः ककुभां विभागाः ॥४॥
तलं यथेयुर्न तिला विकीर्णाः सैन्यैस्तथा राजपथा बभूवुः।
भैमीं स लब्धामिव तत्र मेने यः प्राप भूभृद्भवितुं पुरस्तात् ॥५॥

योग्यैरिति। योग्यैः रूपयौवनादिना सम्बन्धार्हैः नृपजां भैमीं वरीतुं वृतोर्वेति दीर्घः। अनर्हैः किन्तु वीरैः प्रसभेन बलेन हर्तुं परैः कैश्चिन्निःस्पृहैः केवलं द्रष्टुमेव अन्यैस्तु तान् राजन्यादीननुरोद्धुमुपासितुं व्रजद्भिः करणैस्तद्राजन्येनेत्यर्थः ककुभो दिशः स्वमात्रशेषाः स्वरूपमात्रावशिष्टाः बभूवुः अत्रापि ककुभां स्वमात्रशेषत्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ३ ॥

लोकैरिति। अवनिश्रियं भूलोकलक्ष्मीं तां भैमीमुद्दिश्याभिसन्धाय दिश्यैर्दिक्षु भवैर्दिगादिभ्यो यत्। अशेषैर्लोकैर्जनैः प्रयाणे विहिते सति ककुभां विभागाः प्रदेशाः स्ववर्त्तिनां स्वनिष्ठानां तेषां तेषां जनानां यन्त्रणया सम्बन्धेनार्त्तेः पीड़ायाः विश्रान्तिं विरतिमापुः तद्वदलक्ष्यतेत्युत्प्रेक्षा गम्या ॥ ४ ॥

तलमिति। यथा विकीर्णा उपरि क्षिप्तास्तिलास्तलं भूतलं नेयुः नाप्नुयुः सैन्यैः सैनिकैः सेनायां समवेता ये सैन्यास्ते सैनिकाश्च त इत्यमरः। सेनायां वेति ण्यप्रत्ययः। राजपथा राजमार्गास्तथा तिलमात्रावकाशरहिता बभूवुः तादृक्सम्बन्धासम्बन्धेऽपि सम्बन्धस्योक्ते रतिशयोक्तिभेदः। किञ्च तत्र समये यो भूभृद्राजा पुरस्ताद्भवितुं प्राप प्राप्तः स राजा भैमीं लब्धामिव मेने पूर्व्वावगतस्येयं स्वामित्यभिमानादहंपूर्व्विकया सर्व्वे समाजग्मुरित्यर्थः ॥ ५ ॥

नृपः पुरःस्थैः प्रतिरुद्धवर्त्मा पश्चात्तनैः कश्चन नुद्यमानः ।
यन्त्रस्थसिद्धार्थपदाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वं ॥ ६ ॥
राज्ञां पथि स्त्यानतयाऽनुपूर्व्वीविलङ्घनाशक्तिविलम्बभाजां ।
आह्वानसंज्ञानमिवाग्रकम्पैर्दधुर्विदर्भेन्द्रपुरीपताकाः ॥ ७ ॥
प्राग्भूय कर्कोटक आचकर्ष सकम्बलं नागबलं यदुच्चैः ।
भुवस्तले कुण्डिनगामिराज्ञां तद्वासुकेश्चाश्वतरोऽन्वगच्छत् ॥ ८॥

नृप इति। पुरःस्थैर्जनैः प्रतिरुद्धवर्त्मा निरुद्धमार्गः पश्चात्तनैः पश्चाद्भवैः पृष्ठत आगतैरित्यर्थः सायं चिरमित्यादिना ट्युप्रत्ययस्तुडागमश्च। नुद्यमानः प्रेर्य्यमाणः कश्चन नृपः यन्त्रस्थस्य तैलाकर्षणयन्त्रलग्नस्य सिद्धार्थस्य सर्षपस्य पदे स्थाने अभिषेकं लब्ध्वापि सर्षपत्वं प्राप्यापीत्यर्थः स्वमात्मानमसिद्धार्थमसर्षपममन्यतेति विरोधः। अपिशब्दो विरोधद्योतनार्थः असिद्धार्थं सिद्धिरहितममन्यतेत्यविरोधाद्विरोधाभासोऽलङ्कारः अत्र संमर्दे यन्त्रस्थसर्षपवद्विशीर्णस्य मे कुतोऽर्थसिद्धिरित्यमन्यतेत्यर्थः ॥ ६ ॥

राज्ञामिति। विदर्भेन्द्रपुरी कुण्डिनपुरन्तस्याः पताकाः अग्रकम्पैः स्वाग्रचलनैः पथि मार्गे स्त्यानतया संहततया सैन्यसङ्कीर्णतयेत्यर्थः संयोगादेरातोधातोर्यण्वत इति स्त्यायते र्निष्ठानत्वम्। आनुपूर्वीविलङ्घनाशक्त्या क्रमचंक्रमणाशक्त्या विलम्बभाजां राज्ञामाह्वानसंज्ञानमाकारणचेष्टां दधुरिवेत्युत्प्रेक्षा ॥ ७ ॥

प्रागिति। भुवस्तले भूपृष्ठे कुण्डिनगामिनां श्रितादिषु गमिगामिनामुपसङ्ख्यानाद् द्वितीयासमासः। राज्ञां सम्बन्धि सकम्बलं सप्रावारमुच्चैर्महद्यन्नागबलं गजबलं कर्म्म कर्क इति भेदः अटतीत्यटकः शीघ्रं गत्वा बहुलमन्यत्रापीत्यौणादिकः क्वुन्प्रत्ययः। कर्कः श्वेताश्वः पृष्ठस्थौरि सितः कर्क इत्यमरः। जातावेकवचनं प्राग्भूय प्रागग्रसरो भूत्वा प्रागिति च्व्यन्तस्य गतित्वाद्गतिसमासे क्त्वो ल्यप्। आचकर्ष आकृष्टवान्। अश्वपर्वं

आगच्छदुर्वीन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः ।
विस्पष्टमाचष्ट दिशां जनेषु रूपं पतित्यागदशानुरूपं ॥ ९ ॥
आखण्डलो दण्डधरः कृशानुः पाशीति नाथैः ककुभां चतुर्भिः ।
भैम्येव बद्धा स्वगुणेन कृष्टैर्यये तदुद्वाहरसान्न शेषैः ॥ १० ॥

गजा गच्छन्तीति प्रसिद्धं तत्रागवलमश्वतरो गर्दभादश्वायामुत्पन्नो वेसराख्यो वाहनविशेषः वत्सोक्षाश्वर्षभेभ्यश्च तनुत्व इति तरप्प्रत्ययः तस्य पितृत्वमन्यपितृकतेति काशिका । सोऽन्वगच्छत् अत्रापि जातावेकवचनम् अग्रतोऽश्वास्ततो गजास्ततोऽश्वतरा जग्मुरित्यर्थः । अन्यत्र भुवस्तले रसातले वासुके र्वासुकिमहानागस्य सम्बन्धि कुलिकनगामिनः सकम्बलं कम्बलाख्यंनागेन्द्रसहितं कम्बलो नागराजः स्यात् सान्द्रप्रावारयोरपीत्युभयत्रापि विश्वः । यदुक्तैर्नागवलमहिसैन्यं यद्वा याहि गजे ना इत्युभयत्रापि वैजयन्ती । कर्कोटकनामनागविशेषः प्राक्भूयाचकर्ष तं नागवल मश्वतरो नाम नागविशेषोऽन्वगच्छत् अश्वतरो वेसरे च नागराजान्तरेऽपि चेत्युभयत्रापि विश्वः । कम्बल कर्कोटकाश्वतरादियुक्तो वासुकिश्च सबल आगत इत्यर्थः अत्रोभयोः कपिनागवलयोः प्रकृतत्वात् केवलप्रकृतश्लेषः ॥ ८ ॥

आगच्छदिति । आगच्छतामुर्वीन्द्राणां राज्ञाञ्चमूसमुत्थैर्भूरेणुभिः पाण्डुरिता धूसरीकृता दिशां मुखश्रीः पतित्यागदशानुरूपं भर्तृप्रवासावस्थोचितरूपं प्रोषिते मलिना कृशेत्युक्ताकारं जनेषु विषये विस्पष्टमाचष्ट जनेभ्यः प्रकटीचकारेत्यर्थः । अत्रान्यधर्मस्यान्यत्र सम्भवाद्दिशां प्रोषितभर्तृकारूपमिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धाख्यो निदर्शनाभेदः । हरिद्वधूनामिति देशान्तरपाठे रूपकं व्यक्तम् ॥ ९ ॥

अथेन्द्रादिलोकपालवृत्तान्तमाह आखण्डल इति । आखण्डल इन्द्रः दण्डधरो यमः कृशानुरग्निः पाशी वरुण इति प्रसिद्धैः चतुर्भिः ककुभां नाथैः भैम्याः स्वगुणेन स्वसौन्दर्यगुणेनैव गुणरज्ज्वेति श्लिष्ट-

मन्त्रै पुरं भीमपुरोहितस्य तद्बद्धरक्षं विशति क्व रक्षः।
तत्रोद्यमं दिक्पतिराततान यातुं ततो जातु न यातुधानः॥११॥
कर्त्तुं शशाकाभिमुखं न भैम्या मृगं दृगम्भोरुहनिर्जितं यत्।
तस्या विवाहाय ययौ विदर्भान् तद्वाहनस्तेन न गन्धवाहः॥१२॥
जातौ न वित्ते न गुणे न कामः सौन्दर्य्यएव प्रवणः स वामः।
स्वच्छस्वशैलेक्षितकुत्सवेरस्तां प्रत्यगान्न स्त्रितरां कुबेरः॥ १३ ॥

रूपकं बद्धाक्लिष्टैरिवेत्युत्प्रेक्षा तदुद्वाहरसाद्भैमीपरिणयरागादेव यये कुण्डिनं प्रति यातं याते भावे लिट्। शेषैरवशिष्टैः नैर्ऋतादिभिः षड्भिर्नयये॥ १०॥

अथ षड्भिर्नैर्ऋताद्यनागमने कारणमाह मन्त्रैरित्यादि। भीमस्य भीमभूपतेः पुरोहितस्य मन्त्रै रक्षोघ्नमन्त्रैर्बद्धरक्षं कृतरक्षं तत् पुरं कुण्डिनपुरं रक्षो राक्षसः क्व विशति नक्वापीत्यर्थः। ततोरक्षोबन्धाद्धेतोः यातुधानो दिक्पतिर्नैर्ऋतः कदापि तत्र पुरं यातुं गन्तुमुद्यमं नाततान न चकार॥११॥

कर्त्तुमिति। गन्धवाहो वायुः भैम्या दृगम्भोरुहाभ्यां नयनारविन्दाभ्यां निर्जितं मृगं स्ववाहनमृगमभिमुखीकर्त्तुं न शशाकेति यत् तेनाशक्तत्वेन तद्वाहनो मृगवाहनः सन् तस्या भैम्या विवाहाय विदर्भान् जनपदान् न ययौ वाहनं विना गन्तुमशक्यत्वादिति भावः॥१२॥

ननु स्तुतवित्तादिसम्पन्नः कुबेरः किमिति न यातस्तत्राह। जाताविति। कामो जातावभिजने न प्रवणो न तत्परः वित्ते धने च न प्रवणः गुणे श्रुतिशीलादौ च न प्रवणः किन्तु सौन्दर्य्ये एव प्रवणः कुतः स वामो वक्र उक्तविपरीत इत्यर्थः। अत एव भणन्ति। कन्या वरयते रूपमिति तस्मात् स्वच्छे स्फटिकमयत्वाद्बिम्बग्राहिणि स्वशैले कैलासे ईक्षिता कुत्सा गर्हा यस्य तद्वेरं शरीरं यस्य सः सम्यगवगतस्वकौरूप्य इत्यर्थः। स कुबेरः स्त्रितरां सूत्कृष्टस्त्रीं त्रैलोक्यसुन्दरीमित्यर्थः। नद्याः शेषस्यान्यतरस्यामितिघादिपरो ह्रस्वः। तां दमयन्तीं प्रति नागात् कौरूप्यलज्जया न गत इत्यर्थः॥ १३॥

भैमीविवाहं सहतेऽस्य कस्मादर्द्धं तनुर्या गिरिजा स्वभर्त्तुः ।
तेन व्रजन्त्या विदधे विदर्भानीशानयानाय तयान्तरायः ॥१४॥
स्वयम्वरं भीमनरेन्द्रजाया दिशः पतिर्न प्रविवेश शेषः ।
प्रयातु भारं स निवेश्य कस्मिन्नहिर्म्महीगौरवसासहिः कः ॥१५॥
ययौ विमृश्योर्द्ध्वदिशः पतिर्न्न स्वयम्वरं वीक्षितधर्म्मशास्त्रः ।
व्यलोकि लोके श्रुतिषु स्मृतौ वा समं विवाहः क्व पितामहेन॥१६॥

भैमीति । गिरिजा पार्वती स्वभर्त्तुरीश्वरस्य भैमीविवाहं कस्मात् सहते न कस्मादपीत्यर्थः । असहने कारणमाह । या भर्त्तुरर्द्धं तनुः समांशपरत्वान्नपुंसकत्वं पुंस्यर्द्धोऽर्द्धं समेऽंशके इत्यमरः । भर्त्तुरर्द्धाङ्गभूता कथं सापत्न्यं सहत इति भावः । तेनासहनेन निमित्तेन व्रजन्त्या तया देव्या ईशानस्येश्वरस्य यानाय विदर्भान् जनपदान् प्रयाणाय अन्तरायो विघ्नो विदधे विहितः अचलत्यर्द्धे कथमर्द्धं चलेत् चलने वा शरीरं विशीर्येत निष्क्रियं स्यात् तस्मादीशानदिक्पालो नायात इत्यर्थः ॥ १४ ॥

स्वयम्वरमिति । दिशः पतिर्दिक्पालः शेषः शेषाहिः भीमनरेन्द्रजाया भैम्याः स्वयम्वरं न प्रविवेश कुतः स शेषो भारं भूभारं कस्मिन्निवेश्य निधाय प्रयातु न कस्मिन्नपीत्यर्थः । तथा हि महीगौरवं महीभारं सासहिर्भृशं सोढा सहिवहिचलिपतिभ्यो यङन्तेभ्य. किकिनौ वक्तव्याविति किकिनौ तयोर्लिड्वद्भावान्न लोकेत्यादिना षष्ठीप्रतिषेधात् कर्म्मणि द्वितीया । अन्योऽहिः सर्पः कोऽस्ति न कोऽपीत्यर्थः ॥ १५ ॥

ययाविति । वीक्षितं सम्यक् परिशीलितं धर्म्मशास्त्रं येन स ऊर्द्ध्वदिशः पतिर्ब्रह्मा विमृश्यायुक्तमिति निश्चित्यैव स्वयम्वरं न ययौ । तथा हि पितामहेन ब्रह्मणा पितुः पित्रा च समं विवाहः । पितामहो विरिञ्चिः स्यात्तातस्तु जनकोऽपि चेति विश्वः । लोके क्व व्यलोकि दृष्टः श्रुतिषु वेदेषु वा क्व श्रुतः न क्वापीत्यर्थः । असपिण्डां यवीयसीं इति स्मरणादिति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ १६ ॥

भैमीनिरस्तं स्वमवेत्य दूत्यामुखात् किलेन्द्रप्रमुखा दिगीशाः ।
स्पन्दे मुखेन्दौ च वितत्य मान्द्यं चित्तस्य ते राजसमाजमीयुः॥१७
नलत्वमेषामपि भजेत भैमी कदाचिदस्मानितिशेषिताशा।
अभून्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदलीकरूपा ॥१८॥
प्रयस्यतां तद्भवितुं सुराणां दृष्टेन पृष्टेन परस्परेण ।
तद्द्वैतसिद्धिर्न वतानुमेने स्वाभाविकात् कृत्रिममन्यदेव ॥ १९ ॥

भैमीति। अथ पूर्व्वोक्ताश्चत्वार एव इन्द्रप्रमुखा दिगीशा दूत्याः स्वप्रेषित दूतिकाया मुखात् स्वमात्मानं भैम्या निरस्तं परिहृतमवेत्य ज्ञात्वा चित्तस्य मान्द्यं विषादजाड्यं स्पन्दे गत्यां मुखेन्दौ च वितत्य विषादात् मन्दगतयो विवर्णमुखाश्च भूत्वेत्यर्थः एतेन सानुभावो विषाद उक्तः राजसमाजमीयुः किल ॥ १७ ॥

अथोपायान्तरवैफल्यादिन्द्रादयः तां वञ्चयित्वा गृहीतुं प्रवृत्ता इत्याह। नलेति। अथ राजसभाप्राप्त्यनन्तरं सा महेन्द्रादीनां चतुष्टयी भैमी कदाचित् कस्याञ्चिद्वेलायां नल इति भ्रमेण भ्रान्त्याप्यस्मान् भजेत वृणीतेत्येव शेषिताशा एतावन्मात्रावशेषितमनोरथा सती उपायान्तरापगमादिति भावः। अलीकरूपा काल्पनिकस्वरूपा अत एव काचिदनिर्व्वाच्या चतुर्नली नलचतुष्टय्यभूत् चत्वारोऽपि नलरूपं दधुरित्यर्थः। तद्धितार्थेत्यादिना समाहारद्विगावकारान्तोत्तरपदत्वात् स्त्रियां द्विगोरिति ङीप्॥ १८॥

प्रयस्यतामिति। असः स भवितुं तद्भवितुं नलीभवितुं तच्छब्दादभूततद्भावे च्विः। प्रयस्यतां प्रयतमानानां यस्यतेः दैवादिकाल्लटः शत्रादेशः। सुराणां सम्बन्धिनि द्वयोर्भावो द्विता द्वितैव द्वैतं प्रज्ञादित्वात् स्वार्थेऽण् प्रत्ययः। तस्य नलस्य द्वैतं तत्सिद्धिर्द्वितीयनलत्वसिद्धिः। तदत्यन्तसारूप्यसिद्धिरिति यावत् सा दृष्टेन पृष्टेन सा नलवदवस्थित इति पुनः पुनः स्पृष्टेन परस्परेण नानुमेने अतिप्रयासेनापि नलत्वं नारोहन्निवेत्यर्थः।

पूर्णेन्दुमास्यं विदधुः पुनस्ते पुनर्मुखीचक्रुरनिद्रमब्जं।
स्ववक्त्रमादर्शतलेऽथ दर्शं दर्शं बभञ्जुर्न तथातिमञ्जु ॥ २० ॥
तेषां तया लब्धमनीश्वराणां श्रियं निजास्येन नलाननस्य।
नालं तरीतुं पुनरुक्तिदोषं वर्हिर्मुखानामनलाननत्वं ॥ २१ ॥

वतेति खेदे तथा हि स्वाभाविकात् स्वभावसिद्धाद्रूपात् क्रियया निर्वृत्तं कृत्रिमं कृतकं रूपं ड्वित स्त्रिमक् नित्यमिति त्रिमक्। अन्यद्विलक्षणमेव हीनमेवेत्यर्थः सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥१९॥

पूर्णेन्दुमिति। ते देवाः पुनः पूर्णेन्दुं पूर्णचन्द्रमेवास्यं विदधुः आस्ये चक्रुः तथा पुनरनिद्रं विकचमब्जं पद्मं मुखीचक्रुः। नलमुखस्यास्यलाभाय पुनश्चन्द्रेण पद्मेन च मुखानि निर्ममुरित्यर्थः। अथानन्तरं स्ववक्त्रमादर्शतले दर्पणान्तर्दर्शं दर्शं दृष्ट्वा दृष्ट्वा पुनः पुनर्दृष्ट्वेत्यर्थः। आभीक्ष्ण्ये णमुन् द्विर्वचनं च। तथा नलमुखवदतिमञ्जु अतिसुन्दरं वेति वभञ्जुर्भग्नं चक्रुः निनिन्दुरित्यर्थः। अत्र पूर्णेन्द्वादिकारणसामान्येऽपि विवक्षितकार्यानुत्पत्तिकथनाद्विशेषोक्तिरलङ्कारः। तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यत इति लक्षणात् ॥ २० ॥

तेषामिति। तया तेन प्रकारेण निजास्येन प्रयोज्येन नलाननस्य श्रियं लब्धुं लम्भयितुमिति णिजर्थो ग्राह्यः। यद्वा निजास्येन साधनेन तां श्रियं लब्धुं प्राप्तुमनीश्वराणां वर्हिर्मुखानामग्निवक्त्राणां अग्निमुखा वै देवा इति श्रुतेः। वर्हिर्मुखाः क्रतुभुजो वर्हिः शुष्मा कृष्णवर्त्मेति चामरः। तेषामिन्द्रादीनां सम्वन्धि नलस्याननमिव आननं येषां ते नलानना इत्युपमानपूर्वपदो वहुव्रीहिः। ते न भवन्तीत्यनलाननत्वमेवावशिष्टं पुनरुक्तिदोषं तरीतुं नालं नसमर्थं नतु नलाननत्वसम्भावनापीत्यर्थः। द्वयोरप्यनलाननत्वयोर्भेदेऽपि श्लिष्टकपदोपादानमहिम्नैकत्वाभिमानात्पौनरुक्त्यव्यपदेशः। अत्र नलाननश्रीलिप्सूनां तेषां न केवलं तदभावः प्रत्युत दुस्तरतरपुनरुक्तिदोषरूपानर्थोत्पत्तिश्चेति द्वितीया विषमप्रभेदः यत्रानर्थस्य वा भवेदिति लक्षणात् ॥ २१ ॥

प्रियावियोगक्वथितात् किमैलाच्चन्द्राद्गृहीतैर्ग्रहपीडिताच्च ।
ध्माताङ्गवेन स्मरतोऽपि सारैः स्वङ्कल्पयन्तिस्म नलानुकल्पं॥२२॥
नलस्य पश्यत्वियदन्तरं तैर्भैमीति भूपान् विधिराहृताऽस्यै ।
स्पर्द्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमाख्यत् ॥२३
सभा नलश्रीयमकैर्यमाद्यैर्नलं विनाभूद्धृतदिव्यरत्नैः ।
भामाङ्गणाग्राघुणिके चतुर्भिर्देवद्रुमैर्द्यौरिव पारिजाते ॥ २४ ।

प्रियेति । ते देवाः प्रियावियोगेनोर्वशीविरहाग्निना क्वथितात् दग्धादैलादिलात्मजात्पुरूरवसः कर्पूरादेरिवेति भावः । तथा ग्रहपीडिताद्राहुनिष्पीडिताच्चन्द्राच्च यन्त्रनिष्पीडितात्तिलसर्षपादेरिवेति भावः । भवेनहरेण ध्मातात् सुखमारुतसन्धुक्षिताग्निदग्धात् स्मरतोऽपि कामाच्च खदिरकाष्ठादेरिति भावः । गृहीतैः रूपाद्यैः सारैः साधनैः स्वमात्मानं नलस्यानुकल्पं कल्पयन्तिस्म किमित्युत्प्रेक्षा अन्यथा तदनुकल्पतापि कुत इति भावः । मुख्यः स्यात् प्रथमः कल्पोऽनुकल्पस्तु ततोऽधम इत्यमरः ॥२२॥

नलस्येति । विधिर्ब्रह्मा नलस्य तैर्भूपैः इयत् सर्वान्तरं तारतम्यं इयं भैमी पश्यत्विति हेतोः एतान् भूपानाहृत आहृतवान् हरतेर्लुङि तङ् ह्रस्वादङ्गादिति तकारलोपः। किञ्च दिगीशानपि स्पर्द्धाङ्कारयित्वा दिगीशैरपि नलेन सह मत्सरङ्कारयित्वेत्यर्थः । हृक्रोऽन्यतरस्यामिति विकल्पाद्दणिकर्तुः कर्मत्वं । तस्य नलस्यैव तेभ्य इन्द्रादिभ्योऽपि पञ्चमीविभक्ते इति पञ्चमी । प्रथिमानमाधिक्यमस्यै भैम्यै आख्यदाख्यातवान् ख्यातेर्लुङि अस्यतिवक्तिख्यातिभ्यो ङित् च्लेरङादेशः। त्रैलोक्यातिशायि लावण्यमस्येति भैमीं प्रत्यायितुमेव ब्रह्मा स्वयम्बरव्याजेन त्रिलोकीमेकत्राचकर्षेत्युत्प्रेक्षा ॥ २३ ॥

सभेति । सभा सा राजसभा नलश्रियो यमकैः पुनरुक्ताकारैस्तद्रूपधारिभिरित्यर्थः । धृतानि दिव्यानि रत्नानि यैस्तै रत्नाभरणभूतैरित्यर्थः । यमाद्यैर्नलं विना तदा नलस्यागमनात्तैर्विनाभूतैरित्यर्थः । अत एव चतु-

तत्रागमद्वासुकिरीशभूषाभस्मोपलेहस्फुटगौरदेहः ।
फणीन्द्रवृन्दप्रणिगद्यमान प्रसीदजीवाद्यनुजीविवादः ॥ २५ ॥
द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापे सुरभूमिपालैः ।
तत्कालमालम्बि न केन यूना स्मरेषुपक्षानिलतूललीला ॥ २६ ॥

भिर्यस्माद्यैर्देवैः पारिजाते पारिजाताख्ये देवद्रुमे भामायाः सत्यभामाया अङ्गणस्य चत्वरस्य प्राघुणिके अतिथौ सति तया उपहृते सतीत्यर्थः । आदेशिकः प्राघुणिक आगन्तुरतिथिः स्मृत इति हलायुधः । इतरत्नैस्तर्भिर्देवद्रुमैर्मन्दारादिभिः पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमित्यमरः । द्यौः स्वर्गएवाभूत् सभादित्यर्थः ॥ २४ ॥

तत्रेति । ईशभूषा ईश्वराभरणभूतः अतएव भस्मन उपलेहेनोपलेपेन तदङ्गरागभस्मसङ्क्रमणेन स्फुट गौरदेहः शुभ्राङ्गः वासुकिः फणीन्द्रवृन्दैः सर्पराजगणैः प्रणिगद्यमानो व्याह्रियमाणः नेर्गदनदेत्यादिना णत्वं । प्रसीदजीवशब्दावादिर्यस्य सोऽनुजीविवादः सेवकजनो यस्य सः आदिशब्दाज्जयादिशब्दसङ्ग्रहः तत्र स्वयम्वरे आगमदागतः ॥ २५ ॥

द्वीपान्तरेभ्य इति । तत् पुटभेदनं कुण्डिनपुरं द्वीपान्तरेभ्यः अपादाने पञ्चमी । सुराश्च भूमिपालाश्च तैः क्षणादवापे अवाप्तं तथाहि तस्मिन् काले तत्कालमत्यन्तसंयोगे द्वितीया । केन यूना स्मरेषूणां पक्षानिलेन तूलस्य कार्पासादेर्लीला नालम्बि नालाभि चिण्भावकर्मणोरिति लभेः कर्मणि लुङ् विभाषाचिण्णमुलोरित्युपसृष्टाद्वैभाषिको नुमागमः । अत्राखिलयूनाङ्गासक्तत्वेन कुण्डिनप्राप्तिसमर्थनात् कारणेन विना कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः स च तूलेति निदर्शनासङ्कीर्णः ॥ २६ ॥

रम्येष्विति । सः कुण्डिननाकनाथः कुण्डिनेन्द्रो भीमः राजचक्रं राजमण्डलं रम्येषु हर्म्येषु निवेशनेन सपर्य्यया अर्घ्यपाद्यादिपूजया तथा प्रियोक्तिः प्रियवचनं दानं गन्धमाल्यताम्बूलादिसमर्पणं आदरो

रम्येषु हर्म्येषु निवेशनेन सपर्य्यया कुण्डिननाकनाथः ।
प्रियोक्तिदानादरनम्रताद्यैरुपाचरच्चारु स राजचक्रं ॥ २७ ॥
चतुःसमुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्त्तिदारे ।
औदार्य्यदाक्षिण्यदयादमानां चतुष्टयी रक्षणसौविदल्ला ॥ २८ ॥
अभ्यागतैः कुण्डिनवासवस्य परोक्षवृत्तेष्वपि तेषु तेषु ।
जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽपि नावापि नृपैर्विशेषः॥२९
अङ्के विदर्भेन्द्रपुरस्य शङ्के न सम्ममौ नैष तथा समाजः ।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥ ३०॥

बहुकरणं नम्रता विनयाचरणमेवमाद्यैरुपचारै राद्यशब्दाद्भोजनादि संविधानसंविपहैः चारु सम्यगुपाचरत् उपचरितवान् ॥ २७ ॥

युक्तं चैतदित्याह चतुरिति । चतुःसमुद्रीव परिखा वलयं यस्य तस्मिन् वासिताः स्थापिताः कीर्त्तय एव दाराः कलत्राणि यस्मिन् नृपाणां राज्ञामन्तःपुरे भूवलयरूप इति शेषः । औदार्य्यं त्यागः दाक्षिण्यं परचित्तानुवर्त्तनं दया कृपा दम इन्द्रियदमनं तेषां चतुष्टय्येव रक्षणे सौविदल्ला कञ्चुकिनो सौविदल्लाः कञ्चुकिन इत्यमरः। औदार्य्यादिगुणविहीनस्य कुतः कीर्तिरिति भावः रूपकालङ्कारः ॥ २८ ॥

अभ्यागतैरिति । अभ्यागतैर्नृपैः कुण्डिनवासवस्य कुण्डिनेन्द्रस्य भीमस्य सर्व्वेष्वपि परोक्षवृत्तेषु गूढनिष्पन्नेष्वपि तेषु तेषूपचारेषु जिज्ञासितो ज्ञातुमिष्टः प्रयत्नान्वेषणीयं इत्यर्थः । सनन्तात् कर्मणि क्तः । कुतः स्वेप्सितलाभस्य भैमीलाभस्य लिङ्गं गमकभूतः स्वल्पोऽपि विशेषो नावापि न लब्धः सर्वत्र समं व्यक्तश्चोपचरणाद्गूढोपचारविशेषेणापि दुरूहस्तदभिप्राय इत्यर्थः ॥ २९ ॥

अङ्क इति । विदर्भेन्द्रपुरस्य कुण्डिनपुरस्याङ्के अभ्यन्तरे एष समाजो राजसङ्घोऽगस्त्यहस्ते पयोराशिर्यथा मुरारेर्जठरे जगद्वा यथा तथा

पुरे पथिद्वारगृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयैव ।
नभस्तु किर्म्मीरमकारि तेषां महीभुजामाभरणप्रभाभिः ॥ २१ ॥
विलासवैदग्ध्यविभूषणश्री स्तेषां तथाभूत् परिचारकेऽपि ।
अज्ञासिषुः स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कञ्चित् ॥२३॥
अस्वेदगात्राश्चलचामरौघै रमीलनेत्राः प्रतिवस्तुचित्रैः ।
अम्लानमाला विपुलातपत्रै र्देवा नृदेवाश्च भिदां न भेजुः ॥२३॥

न सघमौ सम्मानितः न किन्तु तव सम्मसावित्यर्थः । शङ्क इत्युत्प्रेक्षायां मुनिहस्तहरिकुक्ष्यौपम्येन अल्पेऽपि पुरे समाजस्य महतः सम्मानोत्प्रेक्षणादुपमोत्प्रेक्षयोः सङ्करः तेनाधाराधेययोरानुमान्यलक्षणाधिकालङ्कारस्तन्महत्त्वमत्यद्भुतं वस्तु च व्यज्यते ॥ ३० ॥

पुर इति । तत्र पुरे उत्सववाञ्छया पन्थानो द्वाराणि गृहाणि च तान्येव चित्रीकृतानि तेषामभ्यागतानां महीभुजामाभरणप्रभाभिः नभः किर्मीरं चित्रमकारि अपिशब्दात् पथिद्वारगृहाणि च किर्मीरितानीत्यर्थः । चित्रकिर्म्मीरकल्माषः शबलैताश्च कर्वुर इत्यमरः अत्र समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारः ॥ ३१ ॥

विलासेति । तेषां राज्ञां परिचारके कर्मकरेऽपि विलासानां शृङ्गारचेष्टानां वैदग्ध्यस्य चातुर्यस्य विभूषणानां च श्रीः सम्पत्तिः तथाभूत् यथा स्त्रियः शिशवो बालिशाः अज्ञाश्च शिशावज्ञे च बालिश इत्यमरः । तं परिचारिकमागतं कञ्चिन्नायकं राजानमेव अज्ञासिषुः अमंसत विवेकिनस्तु तत्त्वत एव जानन्तीतिभावः राजभृत्याश्च राजकल्पा इति राज्ञामैश्वर्योक्तेरतिशयोक्तिः ॥ २२ ॥

अथ श्लोकद्वयेन राज्ञां देवानाञ्च भेदो दुर्बल इत्याह अस्वेदेत्यादि । चलचामराणामोघैरस्वेदानि गात्राणि येषां ते तथोक्ताः वस्तुनि वस्तुनि प्रतिवस्तु वीप्सायामव्ययीभावः । चित्रैरद्भुतैः विस्मयोऽद्भुतमाश्चर्यं चित्रमित्यमरः । मीला मीलका गुरोश्च हल इति स्त्रियामप्रत्यये टिप् ।

अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नरेषु वाग्भिः सौवर्गवर्गो न नरैरचिह्नि ॥३४॥
ते तत्र भैम्याश्चरितानि चित्रे चित्राणि पौरैः पुरि लेखितानि ।
निरीक्ष्य निन्युर्दिवसं निशाश्च तत्स्वप्नसम्भोगकलाविलासैः ॥३५॥

तत् गृहीतान्यनिमिषाणि, यद्वा न मीलन्तीत्यमीलानि पचाद्यच् । तानि नेत्राणि येषां ते तथोक्ता अनिमिषदृष्टय इत्यर्थः । तथा विपुलैरातपत्रैर्निमित्तैरम्लानमाला देवा इन्द्रादयः नृदेवा राजानश्च भिदां भेदं षिद्भिदादिभ्योऽङ् । न भेजुः देवपक्षे सर्वत्र हेतौ तृतीया राजपक्षे उपलक्षणे तृतीया । तेषां स्वेदाद्यभावस्य स्वाभाविकत्वात् अत्र स्वेदगात्रादिपदार्थानां विशेषणगत्या देवभेदाभावहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २२ ॥

अन्योन्येति । दिग्भ्यः समेतेषु समागतेषु नरेषु मनुष्येषु अन्योन्यासां भाषाणाम् अनवबोधेन निमित्तेन भीतेः सङ्कोचात्संस्कारेण निर्वृत्ताः संस्कृत्रिमाः ड्वितस्त्रिमक्नित्यं । ताभिर्वाग्भि र्व्यवहारोऽभिवादनव्यापारः तद्वत्सु देवभाषयैव भाषमाणेष्वित्यर्थः । सौवर्गवर्गो देवसमूहो नरैः कुण्डिनवासिभिर्नाचिह्नि देवत्वेनाज्ञायि चिह्नशब्दात्तत्करोतीति ण्यन्ताल्लुङि णाविष्टवद्भावे विन्मतोर्लुङि मतुपोलुक् । भेदे अभेदलक्षणातिशयोक्तिः ॥३४॥

त इति । ते सर्वे नृपास्तत्र तस्यां पुरि कुण्डिने पौरैः चित्रे आलेख्ये लेखितानि चित्राण्याश्चर्याणि आलेख्याश्चर्ययोश्चित्रमित्यमरः । भैम्याश्चरितानि निरीक्ष्य दिवसम् निन्युः । तस्याः सम्बन्धिभिः स्वप्ने याः सम्भोगकलाः सुरतचेष्टास्ता एव विलासा विनोदास्तैर्निशाश्च निन्युः एतेन जागरावस्थोक्ता ॥ ३५ ॥

सेति । सा भैमी तस्यां निशि स्वयम्वरात्पूर्वरात्रौ स्वप्नगतापि अपि सम्भावनायां जागरेऽथ सम्भावितत्वादिति भावः । एभ्यो राजभ्यः

सा विभ्रमं स्वप्नगतापि तस्यां निशि स्वलाभस्य ददे यदेभ्यः।
तदर्थिनां भूमिभुजां वदान्या सती सती पूरयति स्म कामं ॥३६॥
वैदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीष्वनुभाववत्सु ।
स्वयम्बरस्थानजनाश्रयस्तैर्दिने परत्रालमकारि वीरैः ॥ ३७ ॥
भूषाभिरुच्चैरपि संस्कृते यं वीक्ष्याकृत प्राकृतबुद्धिमेव ।
प्रसूनबाणे विबुधाधिनाथस्तेनाथ साशोभि सभा नलेन ॥३८॥

स्वलाभस्य स्वप्राप्तेर्विभ्रमं भ्रान्तिमलीकसङ्गतिमित्यर्थः ददे ददातीति यत्तस्मादलीकदानाद्धेतोर्वदान्या दात्री सती भवन्ती स्वप्राप्तिदानाद्वदान्या प्राप्तेति मिथ्यात्वात्पतिव्रता च सतीत्यर्थः अर्थिनां भूमिभुजां कामं मनोरथान् पूरयतिस्म एवं स्वकामुकानेकलोकोत्तरयुवसमुदायेऽपि सा नलैकजीवितैव सती स्थितेत्यर्थः ॥ ३६ ॥

वैदर्भेति। परत्र दिने परेऽहनि वैदर्भस्य भीमनृपतेर्दूतैरनुनयेन प्रार्थनेनोपहूतैः शृङ्गारभङ्गीषु रतिभावविजृम्भणेषु येऽनुभावाः कटाक्षविक्षेपादयस्तद्वत्सु शृङ्गारभङ्गीष्वनुभाववद्भिरितिपाठे शृङ्गारचेष्टाः प्रकाशयद्भिरित्यर्थः। तैर्दिगन्तागतैर्वीरैः स्वयम्बरस्थानभूतो जनाश्रयो मण्डपः मण्डपोऽस्त्री जनाश्रय इत्यमरः। अलमकारि अलङ्कृतं.स्वयम्बरस्थानं प्राप्तमित्यर्थः ॥ ३७ ॥

भूषेति। सुराधीश इन्द्रो यं नलं वीक्ष्य भूषाभिर्भूषणैरुच्चैरतिशयेन संस्कृतेऽलङ्कृतेऽपि प्रसूनबाणे मन्मथे प्राकृतबुद्धिं पृथक्जनबुद्धिमेव प्राकृतस्तु पृथग्जन इत्यमरः। अकृत कृतवान् न तु सुन्दरबुद्धिमित्यर्थः। कृङः कर्त्तरि लुङि तङ् ह्रस्वादङ्गादिति सकारलोपः। अथ राजागमनानन्तरं तेन नलेन सा सभा अशोभि। शोभां गमिता अलङ्कृतेत्यर्थः शोभयतेः कर्मणि लुङ् ॥ ३८ ॥

धृताङ्गरागे कलितद्युशोभां तस्मिन् सभां चुम्बति राजचन्द्रे ।
गता वताक्ष्णोर्विषयं विलङ्घ्य क्व क्षत्रनक्षत्रकुलस्य लक्ष्मीः ॥३९॥
प्राग्दृष्टयः क्षौणिभुजाममुष्मिन्नाश्चर्य्यपर्य्युत्सुकिता निपेतुः ।
अनन्तरं दन्तुरितभ्रुवान्तु नितान्तमीर्ष्याकलुषा दृगंशाः ॥ ४० ॥
सुधांशुरेष प्रथमो भुवीति स्मरोद्वितीयः किमसावितीमं ।
दस्रस्तृतीयोऽयमिति क्षितीशाः स्तुतिच्छलान्मत्सरिणो निनिन्दुः ॥४१

धृतेति । धृतोऽङ्गरागोऽनुलेपनमेवाङ्गरागो बिम्बरक्तता येन तस्मिन् प्रकृते राजचन्द्रे नले कलितद्युशोभां प्राप्ताकाशलक्ष्मीं चुम्बति सति क्षत्राणि क्षत्रिया एव नक्षत्राणि तत् कुलस्य लक्ष्मीरक्ष्णोर्विषयं विलङ्घ्य दृष्टिपथमतीत्य गता वतेत्याश्चर्य्ये नक्षत्रकुलमिव नलोदये सर्व्वं क्षत्रकुलं निष्प्रभं जातमित्यर्थः । द्युशोभेत्यत्र शोभेव शोभेति सादृश्याक्षेपात् निदर्शना तया सहाङ्गाङ्गिभावेन रूपकस्य सङ्करः ॥ ३९ ॥

प्रागिति । प्राक्पूर्व्वममुष्मिन्नले क्षौणीभुजां राज्ञां दृष्टयः पूर्णदृष्टयः आश्चर्य्येण विस्मयपारवश्येन पर्य्युत्सुकिताः उत्कण्ठिताः सत्यो निपेतुरनन्तरं तु दन्तुरितभ्रुवां द्वेषाद्विषमितभ्रुवां दृगन्ताः कोणदृष्टयः ते च ते नितान्तमीर्ष्यया कलुषाः सन्तो निपेतुः अत्रौत्सुक्येर्ष्याप्रयुक्तानां पूर्णापूर्णदृष्टीनां द्वयीनां क्रमेणैकस्मिन्नले निपतनोक्तेर्द्वितीयः पर्य्यायभेदः । एकमनेकस्मिन् अनेकमेकस्मिन् वा क्रमेण पर्य्याय इति लक्षणात्तथौत्सुक्येर्ष्यालक्षणविस्मयद्वेषसञ्चारिभावनिबन्धनाद्भावालङ्कारः प्रियोऽपरपर्य्याय इति द्वयोः संसृष्टिः ॥ ४० ॥

सुधांशुरिति । मत्सरिणः परशुभद्वेषिणः क्षितीशाः भुवीति सर्वशेषः भुवि भूतले एषः प्रथमः सुधांशुः मुख्यचन्द्रः किमित्यसौ द्वितीयः स्मरः किमित्ययं तृतीयो दस्र आश्विनेय इति च दस्रयोर्द्वित्वेऽप्येकत्वविवक्षया एकवचनं ह्येकत्वेऽपि द्वित्वविवक्षायां द्वौ चन्द्रावविरुद्धं । पुष्प-

आद्यं विधोर्जन्म स एष भूमौ द्वैतं युवासौ रतिवल्लभस्य ।
नासत्ययोर्मूर्त्तिरियं तृतीया इति स्तुतस्तैः किल मत्सरैः सः ॥४२
इहेदृशः सन्ति कतीति दुष्टैर्दृष्टान्तितालीकनलावली तैः ।
आत्मापकर्षे किल मत्सराणां द्विषः परस्पर्द्धनया समाधिः ॥४३॥
गुणेन केनापि जनेऽनवद्ये दोषान्तरोक्तिः खलु तत्खलत्वम् ।
रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य ॥ ४ ॥

वद्दारादिशब्दवन्नियतवचनत्वाभावादितीमं नलं स्तुतिच्छलान्निनिन्दुः असमानसमीकरणेन स्तुतिर्लोकोत्तरस्य निन्दैवेति भावः चन्द्रत्वाद्युत्प्रेक्षात्रयस्य संसृष्टिः ॥ ४१ ॥

आद्यमिति । स एष नलो भूमौ भूतले विधोरिन्दोराद्यं जन्म प्रथमावतार इत्यर्थः युवासौ रतिवल्लभस्य कामस्य द्वैतं द्वित्वं द्वितीयकाम इत्यर्थः नासत्ययोरश्विनोस्तृतीया मूर्त्तिरित्यर्थः स नलो मत्सरैर्मत्सरवद्भिः मत्सरोऽन्यशुभद्वेषस्तद्वत्कृपणयोरपीत्यमरः । अर्श आदिभ्योऽजिति मत्वर्थीयोऽकारः । कैश्चित् स्तुतः किल ? स्तुतः खलु ? पूर्वश्लोकेन पुनरुक्तमपि कविलोभात् स्थितं पूर्ववत् ॥ ४२ ॥

इहेति । दुष्टैः खलैस्तैर्नृपैः इह सभायामीदृशः कति कियन्तोऽपि सन्तीति इतर इत्यर्थः इतिनैवोक्तार्थत्वादप्रयोगः । अलीकनलावली इन्द्र वरुण यमानल पङ्क्तिः दृष्टान्तिता दृष्टान्तीकृता निदर्श्य साधारण्यापादानाद्दूषन्नित्यर्थः । तथाहि मत्सराणां मत्सरिणाम् आत्मनोऽपकर्षे दैन्ये सति द्विषः प्रतिपक्षस्य परेण पुरुषान्तरेण स्पर्धनया संघर्षणया कोट्यन्तरसाधारण्यापादनेनेत्यर्थः । स्वार्थे ण्यन्ताद्युच् । समाधिः किल? आत्मापकर्षपरिहारः खल्वित्यर्थः एतादृशाः कति न सन्तीति समानकोट्यन्तरोद्घाटनेन दूषयित्वा तुष्यन्तीत्यर्थः अर्थान्तरन्यासः ॥ ४३ ॥

गुणेनेति । केनापि गुणेनानवद्ये अगर्ह्ये सर्वगुणसम्पन्न इत्यर्थः अवद्यपण्येत्यादिना निपातनात्साधुः । जने दोषान्तरोक्तिः यस्य चित्तनि-

नलानसत्यानवदत्स सत्यः कृतोपवेशान् सविधे सुरेशान् ।
नोभाविलाभूः किमु दर्पकश्च भवन्ति नासत्ययुजो भवन्तः ॥४५॥
अमी तमाहुः स्म यदत्र मध्ये कस्यापि नोत्पत्तिरभूदिलायां ।
अदर्पकाः स्मः सविधे स्थितास्ते नासत्यतां नापि विभर्ति कश्चित् ४६

ह्यानवद्य धर्मस्य दोषत्वेनोद्घाटनमित्यर्थः तदेव तत्खलत्वं तस्य वक्तुर्दुष्टत्वं खलु ? कुतः यद्यस्माद्रूपेण सौन्दर्येण तस्यां संसदि तया संसदा वा अदूषि तस्य प्रत्युत स्तुतस्यैवेति भावः । तस्य नलस्य सम्बन्धि नरत्वं मनुष्यत्वं सुरैरिन्द्रादिभिरदूषि दोषत्वेनोद्घाटितमतोऽन्यद्वक्तुमशक्तमित्यर्थः दूषयतेः कर्म्मणि लुङ् । सामान्योक्तस्य खलत्वस्य नरत्वदूषणेन समर्थनाद्विशेषण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४४ ॥

नलानिति । सत्यः स नलो यथार्थनलः असत्यान्नलानलीकभूतान् सविधे समीपे कृतोपवेशानुपविष्टान् सुरेन्द्रादीनवदत् किमिति हे धन्याः ! भवन्तः असत्यौ सत्यरहितौ न भवत इति नासत्यावश्विनौ दस्राविति निपातनान्नञो नलोपाभावः । ताभ्यां युज्येते इति तद्युजौ तद्युक्तौ सत्सूद्विषेत्यादिना क्विप् । उभाविलायामिलादेव्यां भवतीतीलाभूरैलः पुरूरवाः क्विप् । दर्पकः कामश्च न भवन्ति किमिति प्रश्नः । शेषे प्रथम इति प्रथमपुरुषः । चत्वारो यूयमश्विनौ पुरूरवाः कामश्च न भवतः किमित्यपृच्छदित्यर्थः तेषु निजरूपादन्येषामिव स्वस्यापि विस्मयावेशाच्च इत्थं मद्राक्षीदिति भावः ॥ ४५ ॥

अमी इति । अथामी देवास्तं नलमाहुः स्म ऊचुः लट् स्म इति भूते लट् । उत्तरश्लोके तेभ्यः पराञ्चः परिकल्पयस्वेति वक्ष्यते तत्र हेतुमाह यदिति । यद्यस्मात्कारणात् ये वयं ते तव सविधे समीपे स्थिता अत्रैतेषु चतुर्षु मध्ये कस्यापि इलायां बुधकलत्रे इलादेव्यां भूमौ चोत्पत्तिर्नाभूत् अत न कोऽप्येकः पुरूरवा इत्यर्थः । न कोऽपि भौमः

तेभ्यः परान्नः परिभावयस्व श्रिया विदूरीकृतकामदेवान् ।
अस्मिन् समाजे बहुषु भ्रमन्ती भैमी किमस्मासु घटिष्यतेऽसौ ॥४७
असाम यन्नाम तवेह रूपं स्वेनाधिगत्य स्मितमुग्धभावाः ।
तन्नो धिगाशापतितान्नरेन्द्र ! धिक्चेदमस्माद्विबुधत्वमस्तु ।४८॥

किन्तु अदर्पका दर्पशून्या इत्यर्थान्तरं पूर्ववत्समासः । कश्चिन्नासत्यताम् अश्वितां न विभर्त्तीति न कोऽप्यनासत्य इत्यर्थः । नासत्यावश्विनौ दस्रावित्यमरः । नासत्यतां सत्यतां न बिभर्त्तीति किन्त्वसत्यनला वयमित्यर्थान्तरम् ॥ ४६ ॥

तेभ्य इति । पूर्वश्लोकस्थस्य यच्छब्दापेक्षया तदो व्यवहारः तत्तस्मादिलाभवनाद्यभावात् श्रिया सौन्दर्य्येण विदूरीकृतकामदेवान् अधरीकृतमन्मथान्नोऽस्मान् तेभ्य ऐलादिभ्यः परानन्यान् परिकल्पयस्व निश्चिनुष्व अन्यच्च हे सौम्य ! श्रिया विदूरीकृतकामदेवान्नोऽस्मांस्तेभ्यः परानुत्कृष्टान् विद्धि अस्तु किमर्थमागतास्तत्राह असौ भैमी अस्मिन् समाजे राजसंघे बहुषु मध्ये भ्रमन्ती पर्य्यटन्ती अस्मासु घटिष्यते न वेत्स्यतीति तथा बहुष्वस्मासु नलरूपेष्विति भावः अतएव भ्रमन्ती नल इति भ्रान्तिं विदन्ती अस्मासु घटिष्यते सङ्गच्छते किल इति सम्भावनायामित्य शयेनेति शेषः । अत्रार्थद्वयस्यापि विवक्षितत्वात् केवलप्रकृतश्लेषः ॥ ४७ ॥

असामेति । हे नरेन्द्र ! यद्यस्मात्तव नामरूपञ्च स्वेनात्मनाधिगत्य ज्ञात्वापि स्मितमुग्धभावाः स्वे कृतमूढ़भावाः सन्तः इह स्वयम्वरे असाम भवाम नामेति यावत् अस्तेर्लोट् । तत्तस्मादाशापतितांस्तृष्णापतितान्नोऽस्मान् धिक् इदमस्माक विबुधत्व विपश्चित्त्वञ्च धिगस्तु अन्यच्च यत्तव रूपमधिगत्य त्वद्वेषं धारयित्वा स्मितमुग्धभावा लब्धसौन्दर्य्याः सन्तः मुग्धः सुन्दरमूढ़योरिति विश्वः । असाम नाम दिव्यामहे खलु । अस गति दीप्त्यादानेष्विति धातोर्लोट् । तत्तस्म च्चनोऽस्माकम् आश पतितां दिक्पतित्व धिक् अशाटष्यादिशोरपीति विश्वः । इदमस्माद्विबुधत्वञ्च धिक्

सा वागवाज्ञायितमां नलेन तेषामनाशङ्कितवाक्छलेन ।
स्त्रीरत्नलाभोचितयत्नमग्न मेनं नहि स्म प्रतिभाति किञ्चित् ॥ ४९
य: स्पर्द्धया येन निजप्रतिष्ठां लिप्सु: स एवाह तदुन्नतत्वम् ।
क: स्पर्द्धितु: स्वाभिहितस्वहानि: स्थानेऽवहेलां बहुलां न कुर्य्यात् ॥ ५०

तुच्छव्यापारत्वादिति भाव: । विबुध: पण्डिते देव इति विश्व: । पूर्व्व एवालङ्कार: ॥ ४८ ॥

सेति । अनाशङ्कितवाक्छलेन अनाकलितवाक्कपटेन नलेन तेषां देवानां सा वाक् पूर्व्वोक्ता पूजोक्ति: अवाज्ञायितमामतिशयेनावज्ञाता पुरस्फूर्त्तिक एवार्थो गृहीतो न तु तात्त्विक इत्यर्थ: । जानातेरवपूर्व्वात्कर्म्मणि लुङि तङिति तङ् भूताम् प्रत्यय: । कुत: हि यस्मात् स्त्रीरत्नलाभे य उचितयत्नो योग्यव्यापारो देवतानुध्यानादि तत्र मग्नमासक्तमेनं नलं प्रति किञ्चित्किमप्यन्यन्न प्रतिभाति स्म नस्फुरति स्म व्यासङ्गो हि महान्विवेकप्रतिबन्धक इति भाव: ॥ ४९ ॥

नन्वसमानस्य वृथा मत्सरिण: परस्योपेक्षैव कथं स्वपरतारतम्याभिव्यक्तिरित्याकाङ्क्षायामाह य इति । योऽपकृष्टो येनोत्कृष्टेन सहस्पर्द्धया सङ्घर्षेण निजप्रतिष्ठामुत्कर्षं लिप्सु: लब्धुमिच्छु: लभे: सन्नन्तादुप्रत्यय: । स: स्पर्द्धमान एव तस्योत्कृष्टपुरुषस्य उन्नतत्वमुत्कृष्टत्वमाह ब्रवीति तद्वेष्टयैव तयोस्तारतम्यं स्फुटीभवतीत्यर्थ: । तथा हि क: प्रेक्षावान् स्वेनैवाभिहिता स्वहानि: स्वापकर्षो यस्य तस्य स्पर्द्धितुर्बहुलां भूयसीमवहेलामवज्ञां न कुर्य्यात् कुर्य्यादेवेत्यर्थ: । ब्रीडावमाननावज्ञावहेलनमसूक्षणमित्यत्रावहेलयेति क्षीरस्वामी । स्थाने युक्तं युक्ते द्वे साम्प्रतं स्थाने इत्यमर: । इन्द्रादिद्वेष्टया नलस्य महानुत्कर्ष एव आसीदिति भाव: ॥ ५० ॥

गीर्देवतागीतयशःप्रशस्तिः श्रिया तडिद्वल्ललिताभिनेता।
मुदा तदावैक्षत केशवस्तं स्वयम्बराडम्बरमम्बरस्थः ॥ ५१ ॥
अष्टौ तदाष्टासु हरित्सु दृष्टीः सदोदिदृक्षुर्निदिदेश देवः।
लैङ्गीमदृष्ट्वापि शिरःश्रियं यो दृष्टौ मृषावादितकेतकीकः॥५२॥
एकेन पर्य्यक्षिपदाम्रताद्रिं चक्षुर्मुरारेरभवत् परेण।
तैर्द्वादशात्मा दशभिस्तु शेषै र्दिशो दशालोकत लोकपूर्णाः॥५३॥

गीरिति। तदा तस्मिन् काले केशवो विष्णुः गीर्देवताया वाग्देवतया गीता यशः प्रशस्तिः कीर्त्तिप्रबन्धो यस्य सः श्रिया लक्ष्मीदेव्या तडित्वतः सविद्युतो मेघस्य ललितस्य विलासस्य अभिनेतानुकर्त्ता सन् अम्बरस्थः तं स्वयम्बराड़म्बरं संरम्भं मुदा हर्षेणैक्षत किमुतान्य इति भावः ॥ ५१ ॥

अष्टाविति। तदा तस्मिन् काले सदः स्वयम्बरसभां दिदृक्षुः द्रष्टुमिच्छुः गत इति शेषः। देवश्चतुर्मुखोऽष्टासु हरित्सु दिक्षु अष्टौ दृष्टीर्निदिदेश प्रेरयामास अष्टदिगाहृतस्य जनतावलोकनादित्यर्थः। यो देवो लैङ्गीं ज्योतिर्लिङ्गसम्बन्धिनीं शिरःश्रियं लिङ्गस्योत्तरावधिमित्यर्थः। अदृष्ट्वापि दृष्टो लिङ्गशिरोदर्शनविषये मृषा वदतीति मृषावादिनी सा कृता मृषावादिता मृषावादीकृतेत्यर्थः। मृषावादिशब्दात्तत्करोतीति णयन्तात् कर्म्मणि क्तः पुंवद्भावटिलोपाद्यर्थं णाविष्टवद्भावोपसङ्ख्यानाट्टिलोपः। तथा कृता केतकी येन स कूटसाक्षीकृतकेतकीकुसुम इत्यर्थः। नद्यृतश्चेति कप्समासान्तः। पुरा किल ब्रह्मा ज्योतिर्लिङ्गस्य शिरोदेशमद्राक्षमित्युक्त्वा तत्र शिवशिरः पतितं केतकीकुसुमं कूटसाक्षीचकारेति पौराणिकी कथात्रानुसन्धेया। तथा च शिवशिरः पारमिव स्वयम्बरागतजनतासागरमष्टाभिर्दृष्टिभिः पश्यन्नपि नापश्यदित्यर्थः ॥ ५२ ॥

एकेनेति। द्वादश आत्मानो रूपाणि यस्य स द्वादशात्मा सूर्य्य एकेन

प्रदक्षिणां दैवतहर्म्यमद्रिं पदैश्च कुर्वन्नपि शर्वरीशः ।
दृष्टा महेन्द्रानुजदृष्टिमूर्त्त्या न प्राप तद्दर्शनविघ्नतापम् ॥ ५४॥
विलोकमाना वरलोकलक्ष्मीन्तात्कालिकीमप्सरसो रसोत्काः ।
जनाम्बुधौ तत्र निजाननानि वितेनुरम्भोरुहकाननानि ॥ ५५ ॥
न यक्षलक्षैः किमलक्षि नो सा सिद्धैः किमध्यासि सभाप्तशोभा ।
सा किन्नरैः किं न रसादसेवि नादर्शि हर्षेण महर्षिभिश्च ॥५६

रूपेणाद्रिं मेरुं पर्य्यक्षिपत् प्रदक्षिणीकृतवान् परेणात्मना मुरारेर्विष्णोश्चक्षु र्दक्षिणमभवत् शेषैरवशिष्टैर्दशभिस्तैरात्मभिस्तु लोकपूर्णाः जनसम्पूर्णाः दश दिशोऽलोकत आलोकितवान् ॥ ५३ ॥

प्रदक्षिणमिति । शर्व्वरीशश्चन्द्रो दैवतानां हर्म्यं वासगृहम् अद्रिं मेरुं पदैः प्रदक्षिणं कुर्व्वन्नपि महेन्द्रानुजस्योपेन्द्रस्य विष्णोर्दृष्टिमूर्त्त्या नेत्ररूपेण दृष्टा सन् तस्य स्वयम्वरस्य दर्शनविघ्नेन यस्तापस्तं प्राप चन्द्रस्य स्वयमनागतत्वेऽपि तत्र विष्णोरागतत्वात्तद्वामाक्षिरूपेणाद्राक्षीदेवेति कुतस्तस्य दर्शनक्लेश इत्यर्थः ॥ ५४ ॥

विलोकमाना इति । रसेन रागेणोत्का उन्मनसः उत्सुकाः सत्यः उत्क उन्मना इति निपातनमभिधानं । तात्कालिकीन्तत्कालभवाम्वर लोकलक्ष्मीं परिणेतृ जनशोभाम् विलोकमाना आलोकमाना अप्सरसस्तत्र जनाम्बुधौ स्वस्वालोकजनार्णवे भूमिस्थैर्य्य गात्। निजाननानि स्वमुखानि अम्भोरुहकाननानि वितेनुः दधुः तदन्तर्गतानि तन्मुखानि पद्मानीव रेजुरित्यर्थः ॥५५॥

नेति । तदा आप्तशोभा लब्धकान्तिः सा सभा यक्षाणां लक्षैः शतसहस्रै र्नालक्षि नादर्शि किं ? सिद्धैर्वा नाध्यासि नाध्यासिता किन्नरैः रसाद्रागान्नासेवि न सेविता किं ? महर्षिभिः हर्षेण नादर्शि च न दृष्टा किं ? देवाद्यासत्तेऽपि मुख्यासम्भवात्सदशन्यायेन दर्शने पर्य्यवसिते तया च सर्वै-रदर्शीत्यर्थः सर्व्वत्र कर्म्मणि लुङ् ॥ ५६ ॥

वाल्मीकिरश्लाघत तामनेकशाखत्रयीभूरुहराजिभाजा।
क्लेशं विना कण्ठपथेन यस्य दैवी दिवः प्राग्भुवमागमद्वाक्॥५७
प्राशंसि संसद् गुरुणापि चार्व्वी चार्व्वाकतासर्व्वविदूषकेण।
आस्थानपट्टं रसनां यदीयां जानामि वाचामधिदेवतायाः॥५८
नाकेऽपि दीव्यत्तमदिव्यवाचि वचःस्रगाचार्य्यकवित्कविर्यः।
दैतेयनीतेः पथि सार्थवाहः काव्यः स काव्येन सभामभाणीत्॥५९

वाल्मीकिरिति। तां सभां वाल्मीकिर्मुनिरश्लाघत अस्तुत प्राक् भवमनेकाः शाखाः कथकाः ध्रुमादिवेदविभागाः वृक्षावयवविशेषाश्च यस्याः सा अनेकशाखा, त्रयाणां वेदानां समाहारस्त्रयी अनेकाः शाखा यस्याः सा शाखा चासौ त्रयी च। त्रय्येवभूरुहराजिस्तां राजिं भजतीति भाक् तेन, शाखा वेदप्रभेदेषु बाहौ पार्श्वद्रुमाङ्गयोरिति वैजयन्ती। सा च सा त्रयी त्रिवेदी च सैव भूरुहराजिस्तरुपङ्क्तिः तां भजतीति तद्भाक् भजोण्वः। तेन पथिकविश्रामवृक्षवतेत्यर्थः। यस्य कण्ठएव पन्थास्तेन कण्ठपथेन वाग्देवी छन्दोमयी सरस्वती क्लेशं विना अनायासेन दिवो द्युलोकात् भुवं भूलोकमगमदागता एव छन्दोबद्धा सरस्वती प्रथमं भूलोकमवतारिता तेनादिकविनापि स्तुतेत्यर्थः॥ ५७॥

प्राशंसीति। चार्व्वी चारुरस्या वोतो गुणवचनादिति ङीप्. संसत्सभा चार्वाकतया चार्व्वाकसिद्धान्तितया हेतुना सर्व्वविदूषकेण गुरुणा वृहस्पतिनापि प्राशंसि किमुत न्यैरिति भावः। यदीयां रसनां जिह्वां वाचामधिदेवतायाः सरस्वत्या आस्थानपट्टमास्थानपीठं सिंहासनं जानामि आसनान्तरपीठयोः पट्टं इति विश्वः। सर्व्वविदूषकेण वाचस्पतिनापि स्तूयत इति सभाशोभायाः परमोत्कर्ष इति भावः॥ ५८॥

नाकेऽपीति। यः काव्यः अतिशयेन दिव्यन्त्यो दिव्यत्तमाः देदीप्यमानाः तसिलादित्वात् कृत्वसुच इति पुंवद्भावः। ता दिव्यवाचः संस्कृतवाचो

अमेलयद्भीमनृपः परं न नाकर्षदेतान् दमनस्वसैव ।
इदं विधातापि विचित्य यूनः स्वशिल्पसर्वस्वमदर्शयन्नः ॥ ६० ॥
एकाकिभावेन पुरा पुरारि र्यः पञ्चतां पञ्चशरं निनाय ।
तद्भीसमाधानममुष्य कायनिकायलीलाः किममी युवानः ॥ ६१ ॥

यस्मिन्नाके स्वर्गेऽपि वचःस्रजां वाग्गुम्फनानाम् आचार्य्यकमाचार्य्यकत्वं योपधाद्गुरूपोत्तमाद्वुञ्। तद्वित्कवितामार्गोपदेष्टा कविः स्वयं कवयिता च दित्या अपत्यानि पुमांसो दैतेया राक्षसादितिशब्दात् कृदिकारमोषन्तात् स्त्रिभ्यो ढक् अन्यथा दित्यदित्यादिना ण्यप्रत्ययस्य पूर्वविप्रतिषेधेन टगपुंवादिकत्वात्स्त्रिङ्गविशिष्ट परिभाषात्वनित्येति गतिः भाष्यवार्त्तिकयोरनुरक्तत्वादसाधुरिति केचित् अभियुक्तप्रयोगादभिमौक्तिकप्रसिद्धेश्च तन्नाद्रियन्ते। तेषां नीतेः पथि दैत्यनीतिमार्गे सार्थं वहतीति सार्थवाहोऽग्रणीः कर्म्मण्यण्। स काव्यः कवेरपत्यं शुक्रः कवादिभ्योण्यः। तां सभां काव्येन प्रबन्धेनाभाणीदवर्णयत् काव्यं ग्रन्थे पुंसि काव्य इति विश्वः ॥ ५९ ॥

अथ षड्भिस्तत्काव्यमेवाह अमेलयदित्यादि। एतान्यूनो युवजनान् भीमनृपएव नामेलयत् न मेलितवान् तथा दमनस्वसा दमयन्त्येव नाकर्षत्स्वगुणेनेति शेषः। किन्तु विधातापि विचित्य एकत्र संघटय्येदं पुरोवर्त्ति युवरूपं स्वशिल्पसर्वस्वं स्वनिर्माणकौशलसम्पदं नोऽस्माकमदर्शयत् राज्ञः प्रयत्नात् भैमीसौन्दर्य्यसम्पदा ब्रह्मणः स्वनिर्म्माणकौशलप्रकाशनव्यसनाच्चेदं युवमेलनं नत्वेकस्मादित्युत्प्रेक्षा ॥ ६० ॥

एकाकीति। यः पुरारिः पुरा एकाकिभावेनासहायत्वेन हेतुना पञ्चशरं पञ्चानां भावः पञ्चता ताञ्च भौतिकस्य शरीरस्य पञ्चधा विशरणं मरणमिति यावत् तां निनाय अमी युवानः अमुष्य कामस्य सम्बन्धिन्या स्त्रखात् पुरारेर्भियः समाधानं निवारणं निवारका इत्यर्थः । कार्य्यकारणयोरभेदोपचारः । कायनिकायलीलाः शरीरसमूहविला-

पूर्णेन्दुविम्बाननुमासभिन्नानस्थापयत् क्वापि निधाय वेधाः ।
तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये॥६२॥
सुधार्पितं मूर्द्धसु रत्नमेतैर्यन्नाम तानि स्वयमेतएव ।
स्वतः प्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम् ॥६३॥
प्रवेक्ष्यतः सुन्दरवृन्दमुच्चैरिदं मुदा चेदितरेतरं तत् ।
न शक्ष्यतो लक्षयितुं विमिश्रं दस्रौ सहस्रैरपि वत्सराणां ॥६४॥

सास्तद्भेदाः किमिति यावत् एकाकी स हरः संहरिष्यतीति भयादनेकधा परिणताः कामकायव्यूहा इयमुत्प्रेक्षा सर्वे कामकल्पा इत्यर्थः ॥ ६१ ॥

पूर्णेति । शिल्पी निर्म्माणकुशलो वेधाः अनुमासं मासि मासि भिन्नान्नानुभूतान् पूर्णेन्दुविम्बान् संसारस्यानादित्वादसङ्ख्यानिति भावः । क्वापि निधाय निक्षिप्यास्थापयत् स्थापितवान् चिरमरक्षदित्यर्थः । अथ तैः पूर्णेन्दुविम्बैरमीषां यूनां लावण्यमयानि मुखानि निरमात् निर्म्मितवानिति मन्ये उत्प्रेक्षा ॥ ६२ ॥

सुधेति । एभिर्नृपैर्मूर्द्धसु रत्नं सुधार्पितं शिरोमणिर्वृथा धृतः इत्यर्थः । कुतः यद्यस्मादेते स्वयमेव नाम रत्नानि खलु तथोत्कृष्टा इत्यर्थः । रत्नं स्वजातौश्रेष्ठेऽपीत्यमरः । किं रत्नधारणेनेति वाच्य प्रतीयमानयोरभेदाध्यवसायेन वैयर्थ्योक्तिः । तथा हि स्वतः प्रकाशे स्वयं प्रकाशे परमात्मैव बोधस्तस्मिन् स्वरूपचैतन्ये विषये स्फुरणार्थं प्रकाशमानार्थं बोधान्तरं नार्थ्यं नापेक्ष्यम् । दृष्टान्तालङ्कारः ॥ ६३ ॥

प्रवेक्ष्यत इति । दस्रावश्विनावुच्चैर्महदिदं सुन्दरवृन्दं रमणीयवर्गं मुदा कौतुकेन प्रवेक्ष्यतोऽन्तःप्रविष्टौ भविष्यतश्चेत् तत्तर्हि विमिश्रं मिलितमितरेतरमन्योन्यं वत्सराणां सहस्रैरपि लक्षयितुं मदविविक्ततया ग्रहीतुं न शक्ष्यतः शक्तौ न भविष्यतः अत्र दस्रयोः । सौन्दर्य्यगुणसामान्येन सुन्दरवृन्दैकतादात्म्यात्सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् ॥ ६४ ॥

स्थितैरियद्भिर्युवभिर्विदग्धैर्दग्धेऽपि कामे जगतः क्षतिः का ।
एकाम्बुबिन्दुव्ययमम्बुराशेः पूर्णस्य कः शंसति शोषदोषं ॥६५॥
इति स्तुवन् हुङ्कृतिवर्गणाभिर्गन्धर्ववर्गेण स गायतेव ।
ओङ्कारभूम्ना पठतेव वेदान् महर्षिवृन्देन तथान्वमानि ॥ ६६॥
न्यवीविशत्तानथ राजसिंहान् सिंहासनौघेषु विदर्भराजः ।
शृङ्गेषु यत्र त्रिदशैरिवैभि रध्यासि कार्त्तस्वरभूधरस्य ॥ ६७ ॥
विचिन्त्य नानाभुवनागतांस्ता नमर्त्यसंकीर्त्यचरित्रगोत्रान् ।
कथ्याः कथङ्कारममी सुताया मिति व्यषादि क्षितिपेन तेन ॥६८

स्थितैरिति। विदग्धैः प्रगल्भैरदग्धैश्च स्थितैरियद्भिरेतावद्भिर्युवभिः परिपूर्णस्येति शेषः। जगतः कामे दग्धेऽपि का क्षतिः न्यूनता न कापीत्यर्थः। तथा हि पूर्णस्याम्बुराशेरेकाम्बुबिन्दुव्ययरूपः शोष एव दोषस्तं शंसति न कोऽपि दोषत्वेन शंसतीत्यर्थः। दृष्टान्तालङ्कारः ॥ ६५ ॥

इतीति। इतीत्थं स्तुवन् स काव्यो गायतेव गन्धर्ववर्गेण हुङ्कृतीनां वर्गणाः पुनःपुनरुच्चारणानित्यर्थः। ताभिरन्वमानि अनुमितः कर्म्मणि लुङ्। तथा वेदान् पठतेव महर्षिवृन्देन ॐकारभूम्ना प्रणवभूयस्त्वेनान्वमानि अत्र गानार्थैर्हुङ्कारैः वेदपाठार्थैः ॐकारैश्च काव्यवाक्यानुमितिः कृतैवेत्युत्प्रेक्ष्यते। ॐमित्यनुमते प्रोक्तं प्रणवे चाप्युपक्रमे इति विश्वः ॥ ६६ ॥

न्यवीविशदिति। अथ विदर्भराजो भीमस्तान् राज्ञः सिंहानिव राजसिंहान् राजश्रेष्ठान् सिंहासनौघेषु न्यवीविशत् उपवेशयामास विशेर्णौ चङ्। यत्र येषु सिंहासनेष्वेभी राजसिंहैः कार्त्तस्वरभूधरस्य हेमाद्रेः शृङ्गेषु त्रिदशैरेवाध्यासि भावे लुङ् ॥ ६७ ॥

विचिन्त्येति। तेन क्षितिपेन भीमेन नानाभुवनेभ्य आगतांस्तान् यूनो मर्त्यैः सङ्कीर्त्यानि कीर्त्तयितुं शक्यानि चरित्राणि गोत्राणि कुलानि

श्रद्धालुसङ्कल्पितकल्पनायां कल्पद्रुमस्याथ रथाङ्गपाणेः।
तदाकुलोऽसौ कुलदैवतस्य स्तुतिं ततान क्षणमेकतानः॥ ६९॥
तच्चिन्तनानन्तरमेव देवः सरस्वतीं सस्मितमाह स स्म।
स्वयम्वरे राजकगोत्रवृत्तवक्त्रीमिह त्वां करवाणि वाणि!॥७०॥
कुलञ्च शीलञ्च बलञ्च राज्ञां जानासि नानाभुवनागतानां।
एषामतस्त्वं भव वावदूका मूकायितुं कः समयस्तवायं॥७१॥

नामानि च येषां ते न भवन्तीति तथोक्तास्तांस्तथाविधान्विचिन्त्यामो युवानः सुतायां विषये कथङ्कारं कथमन्यथैवंकथमित्यादिना णमुल्। कथ्याः कथनीयाः अचोदयत् इति हेतोर्व्यंषादि विषसेन अभावि भावे लुङ्। प्राक्सिताड्व्यवायेऽपि सदेरप्रतेरिति षत्वम्॥ ६८॥

श्रद्धाल्विति। अथ विषादानन्तरमाकुलोऽसौ भीमः तथा श्रद्धलूनां स्पृहि गृहीत्यादिना आलुच् प्रत्ययः। सङ्कल्पितकल्पनायामीप्सितार्थसम्पादने कल्पद्रुमस्य कुलदैवतस्य रथाङ्गपाणेः स्तुतिं क्षणमेकतानोऽनन्यवृत्तिः ततान एकतानोऽनन्यवृत्तिरित्यमरः॥ ६९॥

तदिति। तस्य भीमस्य चिन्तनानन्तरं स्मरणानन्तरमेव स देवो हरिः। सरस्वतीं सस्मितमाह स्म। लट् स्म इति भूते लट्। किमिति हे वाणि! अहं त्वां स्वयम्वरे राज्ञां समूहो राजकं गोत्रोक्षित्यादिना वुञ्। तस्य गोत्राणां नाम्नां कुलानां वृत्तानां चरित्राणाञ्च वक्त्रीमाख्यात्रीं करवाणि प्रैषार्थे लोट्॥ ७०॥

कुलमिति। हे वाणि! नानाभुवनागतानां राज्ञां कुलञ्च शीलञ्च बलञ्च जानासि अतः कारणात् त्वमेषां वावदूका वक्त्री वंशवीर्य्यादिगुणतो वर्णयित्री भव वावदूकस्तु वक्तरीत्यमरः। जंजपेत्यत्र वदेरनुबधकारवाक्याद्रूक इति स्वामी। तथा हि तव मूकायितुम्मूकवदाचरितुं तूष्णीं स्थातुं मूकशब्दादाचारार्थे क्यजन्तात् कालसमयवेलासु तुमुन्। अयं कः समयः कोवावसरः वाग्मिनाम् अवसरे तूष्णींभावो न युक्त इत्यर्थान्तरन्यासः॥ ७१॥

जगत्त्रयीपण्डितमण्डितैषा सभा न भूता न च भाविनी वा ।
राज्ञां गुणज्ञापनकैतवेन सङ्ख्यावतः श्रावय वाङ्मुखानि ॥७२॥
इतीरिता तच्चरणात् परागं गीर्व्वाणचूड़ामणिघृष्टशेषं ।
तस्य प्रसादेन सहाज्ञयासा वादाय मूर्द्धादरिणी बभार ॥७३॥
मध्येसभं सावततार बाला गन्धर्व्वविद्यामयकण्ठनाला ।
त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्व्वर्त्तितदृक्तरङ्गा ॥७४॥

वागवसरत्वमेवाह जगदिति । जगत्त्रय्यां ये पण्डिताः वाचस्पत्यादयः तैरशेषैर्मण्डितैषा सभा न भूता नच भाविनी वा, अतो राज्ञां गुणज्ञापनकैतवेन गुणप्रकाशनच्छलेन सङ्ख्यावतः पण्डितान् वाङ्मुखान्युपन्यासान् सङ्ख्यावान् पण्डितः कविरिति उपन्यासस्तु वाङ्मुखमिति चामरः । श्रावय पण्डितमण्डलिविलसिते विदुषां विजृम्भणं स्यात् तत्रापि तूष्णीम्भावे वाग्विधेयत्वस्यायोग्यता च स्यादिति भावः ॥ ७२ ॥

इतीति । इतीरिता आज्ञप्तासौ वाणी तस्य हरेश्चरणाद्गीर्व्वाणानां चूड़ामणिभिः घृष्टस्य शेषं परागन्तस्य आज्ञयैव प्रसादेन अनुग्रहेण सहादाय मूर्द्ध्ना आदरिणी आदरवती सती बभार ॥ ७३ ॥

मध्येसभमिति । सा वाणी मध्ये सभाया मध्येसभम् पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । अवततार कीदृशी बाला युवतिर्गन्धर्व्वविद्या गानविद्या तन्मयस्तद्विकारः कण्ठनालो यस्याः सा त्रयीमयी भूतधात्री वेदविकारीभूता वलिविभङ्गा त्रिवली सर्व्वाङ्गाणि यस्याः सा साहित्येन कवित्वेन निर्व्वर्त्तिता निष्पादिता दृशो दृष्टयः तरङ्गा इव यस्याः सा ॥ ७४ ॥

अथ चतुर्दशश्लोक्या वाग्देवीमेव वर्णयति आसीदिति । अथर्वा श्रुतिरथर्ववेदः तिस्रो वलय स्त्रिवलिः त्रिवलिप्रसिद्धिः संज्ञा चेदिति वामनः। तद्रूपा त्रिवेदी सैव मूलं तस्माद्विनिर्गत्य वितायमाना वितन्यमाना तनोतेरनुनासिकस्य विकल्पादात्वम्। अथ वर्णस्तु त्र्युद्गार इति

आसीदथर्व्वा त्रिवलित्रिवेदी मूलाद्विनिर्गत्य वितायमाना ।
नानाभिचारोचितमेचकश्रीः श्रुतिर्यदीयोदररोमरेखा ॥७५॥
शिक्षैव साक्षाच्चरितं यदीयं कल्पश्रिया कल्पविधिर्यदीयः ।
यस्याः समस्तार्थनिरुक्तिरूपैर्निरुक्तविद्या खलु पर्य्यणंसीत् ॥७६
जात्या च वृत्तेन च भिद्यमानं छन्दोभुजद्वन्द्वमभूद्यदीयं ।
श्लोकार्द्धविश्रान्तिमयीभविष्णु पर्वद्वयीसन्धिसुचिह्नमध्यं ॥७७।

प्रसिद्धैः नानाविधानामभिचाराणां हिंसाकर्म्मणामुचिता मेचकश्रीः कृष्णकान्तिर्यस्याः सा अन्यत्र नानाभिचारः नानाभिप्राप्तिरित्यर्थः । तस्य उचिता सा च सा मेचका श्रीर्यस्याः सा तथोक्ता यदीया यस्याः सम्बन्धिनी उदरे रोमरेखा रोमराजिरासीत् ॥ ७५ ॥

शिक्षेति । शिक्षाग्रन्थ एव साक्षात्स्वयमेव यदीयं चरितमभूत्स्वरोपदेशरूपत्वादिति भावः । यदीय आकल्पविधिः प्रसाधनविधिः कल्पश्रिया कर्म्मकाण्डभूतया कल्पसूत्रलक्ष्म्या निर्वृत्त इति शेषः । निरुक्तविद्यैव यस्याः समस्तार्थानां सर्व्ववेदार्थानां निरुक्तिरूपैर्निर्व्वचनभङ्गिभिः पर्य्यणंसीत् खलु तद्रूपेण आसीदित्यर्थः । णमेर्लुङि तिस्तिसिचोऽपृक्त इतीडागमः यमरमनमातां सक्चेति सगिडागम इट ईटीति सेड्लोपः उपसर्गादसमासे णोपदेशस्येति णत्वम् ॥ ७६ ॥

जात्येति । जात्या मात्रवृत्तरूपेण वृत्तेन वर्णवृत्तरूपेण च भिद्यमानं द्विधाभूतं तथा श्लोकार्द्धे विश्रान्तिमयीभविष्णु विश्रान्तिरूपतामापन्नं छन्दश्छन्दोग्रन्थः पर्वणोः कूर्पर पूर्व्वोत्तरभागयोः द्वयी तस्याः सन्धिस्तेन सुचिह्नं सुव्यक्तं मध्यं कूर्परस्थानं यस्य तद्यदीयं भुजद्वन्द्वमभूत् द्विविधं छन्दो भुजयुगत्वेन श्लोकार्द्धविश्रान्तिः कूर्परत्वेन पर्य्यणंसीदित्यर्थः ॥७७॥

असंशयमिति । किञ्च गुणस्य सूत्रस्य दीर्घभावेन दैर्घ्येण लताविततिं विस्तारं दधाना अन्यत्र गुणस्य दीर्घस्य भाविप्रत्ययस्य कृत्प्रत्ययस्य

असंशयं सा गुणदीर्घभावश्रुतां दधाना विततिं यदीया ।
विधायिका शब्दपरम्पराणां किन्नारचि व्याकरणेन काञ्ची॥७८॥
स्थितैव कण्ठे परिणम्य हार-लता बभूवोदिततारवृत्ता ।
ज्योतिर्मयी यद्भजनाय विद्या मध्येऽङ्गमङ्केन भृता विशङ्के ॥७९
अवैमि वादिप्रतिवादिगाढ स्वपक्षरागेण विराजमाने ।
तौ पूर्व्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूतवती यदीयौ ॥ ८० ॥

तेषां विततिं दधानेति विपरिणामः । शब्दपरम्पाणां शिञ्जितपरम्पराणां विधायिका जनयित्री अन्यत्र सुप्तिङन्तशब्दपरम्पराणां विधायकेन साधकेनेति विपरिणामः । सा प्रसिद्धा यदीया काञ्ची व्याकरणेनारचि रचिता असंशयमित्यर्थः अर्थाभावेऽव्ययीभावः ॥ ७८ ॥

स्थितेति । कण्ठे याचि अन्यत्र ग्रीवायां स्थिता उदिता उक्तास्तारा अश्विन्यादयो येषु तानि वृत्तानि पद्यानि यस्यां सा अन्यत्र उदिततारा निर्जितशुद्धमौक्तिका साच सा वृत्ता च वर्त्तुला च तथोक्तातारोमुक्तादितं शुद्धौ तरले शुद्धमौक्तिके । वृत्तं पद्ये चरित्रेष्विति च विश्वामरौ । अङ्गानां शिक्षादीनामन्यत्र करादीनां मध्ये मध्येऽङ्गं पारेमध्य इत्यादिनाव्ययीभावः । अङ्केन एकद्व्यादिसङ्ख्यया चिह्नेन भृता पूर्णा अन्यत्र अङ्केन क्रोधेन भृता भरतेर्विभर्त्तेश्च कर्म्मणि क्तः । अङ्कं क्रोधेऽन्तिके चिह्ने इत्युभयत्रापि वैजयन्ती । ज्योतिर्मयी नक्षत्रप्रधाना अन्यत्र भास्वती ज्योतिस्तारा दूरा दूभा ज्वाला क्रत्युत्तरार्धेऽध्वरात्मस्विति च वैजयन्ती । विद्या ज्योतिर्विद्येव यद्भजनाय यस्याः सेवनाय हारलता बभूव विशङ्के इत्युत्प्रेक्षा ॥ ७९ ॥

अवैमीति । वादिप्रतिवादिनो र्गाढेन निविडेन स्वपक्षे रागेणाभिनिवेशेन अन्यत्रान्तःपार्श्वरक्तत्वेन विराजमाने पूर्व्वपक्षोत्तरपक्षशास्त्रे यदीयौ तौ प्रसिद्धौ रदच्छदौ ओष्ठौ भूतवती बभूवतुः भवतेः क्तवतु

ब्रह्मार्थकर्मार्थकवेदभेदा द्विधा विधाय स्थितयात्मदेहं ।
चक्रे पराच्छादनचारु यस्या मीमांसया मांसलमूरुयुग्मं ॥८१॥
उद्देशपर्वण्यपि लक्षणेऽपि द्विधोदितैः षोड़शभिः पदार्थैः ।
आन्वीक्षिकीं यद्दशनद्विमालीं तां मुक्तिकामाकलितां प्रतीमः॥८२

प्रत्ययः । अत्रैमि उत्प्रेक्षे ते अत्र ओष्ठयपि वादिनावभिवन्दनव्यापारवन्तौ पूर्वोत्तरीभूतौ चेति द्रष्टव्यम् ॥ ८० ॥

ब्रह्मेति । पराच्छादनचारूत्कृष्टवसनाभिरामं मांसमस्यास्तीति मांसलं पीवरं सिध्मादित्वाल्लच् । यस्या ऊरुयुग्मं परेषां प्रतिवादिना माच्छादनेन तिरस्करणेन चारु शोभनमात्मदेहं स्वस्वरूपञ्चार्वेति विशेषणान्नपुंसकग्राह्यं। कायो देहः क्लीवपुंसोरित्यमरः । ब्रह्मैवार्थः प्रतिपाद्यार्थो यस्य सः शेषाद्विभाषेति कप् भावप्रधानो निर्देशः। ब्रह्मार्थकर्मार्थकत्वाभ्यां येयो वेदस्य भेदो द्वैविध्यं तस्माद्धेतो द्विविधया पूर्वोत्तरमीमांसारूपेण द्विविधं कृत्वा स्थितया प्रतिष्ठितया मीमांसया द्वैविध्यया चक्रे कृत गत्योत्प्रेक्षा ॥ ८१ ॥

उद्देशेति । यस्या दशनानां द्वयोर्मालयोः समाहारो द्विमाली पात्रादिवन्न इति स्त्रीत्वे द्विगोरिति ङीप् । तामेव आकलिताङ्गुम्फितां मुक्तेव मुक्तिका मुक्ताशब्दात् स्वार्थे कप्रत्ययेन इति ह्रस्वे तस्याभाषितपुंस्काच्चेति कात् पूर्वस्येत्वन्तां मुक्तावलीं इत्यर्थः । उद्देशो नामतः कीर्त्तनं तस्य पर्वण्यवसरेऽपि व्यावर्तकलक्षणं, तत्पर्वणीत्यर्थः । द्विधोदितैः द्विरावृत्तैरित्यर्थः अन्यत्र लक्षणे सामुद्रिकलक्षणे द्विधोदितै द्वैगुण्येनोक्तैरित्यर्थः। उभयषोडशदशनत्वस्य भाग्यलक्षणत्वादिति भावः। षोडशभिः पदार्थैः प्रमाणादिनिग्रहस्थानां तैरुपलक्षितां तामयं अत इति मुक्तिकामाः मुमुक्षवः शीलिकामिभिक्षाचरेभ्यो ण इति णप्रत्ययः । तैराकलिताभ्यस्तां प्रमाणादिसूत्रेण पदार्थानां तत्वज्ञानान्निःश्रेयसाधिगम इत्युक्तत्वादिति भावः। तां प्रसिद्धां प्रत्यक्षागमाभ्यामीक्षितस्य पश्चादीक्षण-

तर्का रदा यद्वदनस्य तर्क्या वादेऽस्य शक्तिः क्व तथान्यथा तैः ।
पत्त्रं क्व दातुं गुणशालिपूगं क्व वादतः खण्डयितुं प्रभुत्वं ॥ ८३ ॥
सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभविष्णु ।
तन्मत्स्यपद्माद्युपलक्ष्यमाणं यत्पाणियुग्मं वहते पुराणं ॥ ८४ ॥

मन्वीक्षा सा प्रयोजनमस्यामित्यान्वीक्षिकी तर्कविद्या प्रयोजनमिति ठक्। तां प्रतीमो जानीमः प्रतिपूर्वादिणो लट्। द्विरावृत्तषोडशपदोदितद्वग्दन्तपङ्क्तियुगलत्वेन परिणतेत्युत्प्रेक्षार्थः प्रतिपाद्यप्रतिपादकयोरभेदोपचारत्वादान्वीक्षिक्येव तथा परिणतेत्युक्तं दशनद्विमालामेवाकलितां सुक्तिकामिति श्लिष्टपदोपात्तेन रूपकत्वेनोत्प्रेक्षायाः सङ्करः ॥ ८२ ॥

पुनर्दन्तानेव तर्कत्वेनाप्युत्प्रेक्षते तर्का इति। यद्वदनस्य सम्बन्धिनो रदा दन्ता रदना दशना दन्ता इत्यमरः। तर्का ऊहाख्याः प्रमाणानुग्राहक ज्ञानविशेषाः तन्तया स्तर्क्या उत्प्रेक्ष्याः अन्यत्र तर्कवत् कर्कशा इत्यर्थः। तथा हि अस्य वदनस्य तैस्तथाभूतैर्विना वादे कथाया मभिवदनव्यापारे च तथा तादृशी शक्तिः क्व। पत्त्रं पत्त्रिकां दातुं पत्त्रालम्बनं कर्तुं अन्यत्र ताम्बूलीदलादिकं दातुं खण्डयितुं शक्तिः क्व द्यने च तुमुन्। तदा गुणशालिनां प्रतिभादिगुणवतां वावदूकानां पूगं वृन्दं वादतो वादेन खण्डयितुं भङ्क्तुं अन्यत्रैवेति छेदः अदतो भक्षयतः गुणशालिरसाढ्यं पूगं पूगीफलं पूगः क्रमुकवृन्दयोरित्यमरः। खण्डयितुं शकलयितुं प्रभुत्वं सामर्थ्यं क्व श्लेषः प्रतिबुद्धो, ध्वनितेयं दन्तानां तर्कपरिणतत्वेन उत्प्रेक्षेति सङ्करः ॥ ८३ ॥

सपल्लवमिति। व्यासपराशराभ्यां प्रणीतभावात् प्रणीतत्वादुभयी भविष्णु द्विगुणीभावुकं भुवश्चेतीष्णुच्। यद्यप्यष्टादशपुराणानां कर्त्ता सत्यवतीसुतः। तथापि पुराणं वैष्णवं चक्रे यस्तं वन्दे पराशरमित्यादि प्रसिद्धमेवमुक्तं। तत्प्रसिद्धं मत्स्यपद्मपुराणादिरूपं ज्ञाधारादिशब्दात् कूर्मस्कन्दादिसङ्ग्रहः अन्यत्र मत्स्यपद्मादिरेखाधीरादिशब्दात् ध्वजकलशादिसङ्-

आकल्पविच्छेदविवर्ज्जितो यः स धर्म्मशास्त्रव्रजएव यस्याः ।
पश्यामि मूर्द्धा श्रुतिमूलशाली कण्ठे स्थितः कस्य मुदे न वृत्तः॥८५
भ्रुवौ दलाभ्यां प्रणवस्य यस्या स्तद्विन्दुना भालतमालपत्रं ।
तदर्द्धचन्द्रेण विधिर्व्विपञ्ची निक्वाणनाकोणधनुः प्रणिन्ये ॥८६

सहः। उपलक्ष्यमाण मतर्कि तर्कितमित्यर्थः। सपल्लवं सविस्तरं पल्लवं त्वस्त्री प्रकोष्ठेचापि विस्तृताविति वैजयन्ती। अन्यत्र सह सदृशं पल्लवेन सपल्लव मव्ययं विभक्त्यादिना सह शब्दस्य गुणीभूतसादृश्यार्थेऽव्ययीभावः। अव्ययीभावे चाकाल इति सह शब्दस्य सभावः। सहसादृश्य साकल्य यौगपद्यसमृद्धिष्विति विश्वः। पुराणं पद्मादि यस्याः पाणियुग्मं वृत्ते पाणिपद्मत्वेन परिणमीत्यर्थः उत्प्रेक्षा ॥ ८४ ॥

आकल्पेति। आकल्प कल्पान्तपर्य्यन्तं विच्छेदेन विवर्जितः अविच्छिन्नसम्प्रदायीत्यर्थः। अन्यत्र प्रसादनविच्छेदरहितो नित्यभूषित इत्यर्थः श्रुतिर्वेद एकः मूलं मूलप्रमाणं तेनान्यत्र श्रुतिमूलाभ्यां च शालत इति तथोक्तः वेदे श्रवसि च श्रुतिरित्यमरः। कण्ठस्थितो मुखस्थितः अन्यत्र गलस्थः यो धर्म्मशास्त्राणां मन्वादिस्मृतीनां व्रजः स एव यस्या देव्याः मूर्द्धा वृत्तः संवृत्तः परिणत इत्यर्थः। अन्यत्र वर्त्तुलः कस्य मुदे न सर्व्वस्यापि स्यादेवेत्यर्थः पश्यामि उत्प्रेक्षे ॥ ८५ ॥

अथोङ्काराक्षरस्य नागरलिप्यक्षरभेदमाश्रित्योत्प्रेक्षते भ्रुवाविति। विधि र्ब्रह्मा प्रणवस्योङ्कारस्य दलाभ्यामुभयप्रान्तरेखाभ्यां यस्या देव्या भ्रुवौ तथा तस्य विन्दुना विन्द्वाकाररेखया भाले तमालपत्रं तिलकं चित्रकाणि विशेषक इत्यमरः। तस्य ध्य तस्य प्रणवस्यार्द्धचन्द्रेणार्द्धचन्द्राकाररेखया विपञ्च्यास्त्रिक्वाणनाया वादनस्य कोणधनुः कोणभूतं धनुराकारं साध्यसाधनञ्च कोणो वीणादिसाधनमित्यमरः। प्रणिन्ये निर्म्ममे उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् उत्प्रेक्षा ॥ ८६ ॥

द्विकुण्डली वृत्तसमाप्तिलिप्याः कराङ्गुली काञ्चनलेखनीनां ।
कैश्यं मसीनां स्मितभाः कठिन्याः काये यदीये निरमायि सारैः ८७

या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव ।
विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धमयाखिलेव ॥ ८८ ॥

भीमस्तयागद्यत मोदितुं ते वेला किलेयं तदलं विषद्य ।
मया निगाद्यं जगतीपतीनां गोत्रं चरित्रं च यथात्र देषां ॥८९॥

द्विकुण्डलीति। यदीये काये देहे द्वयोः कुण्डलयोः समाहारो द्विकुण्डली कर्णकुण्डलीद्वयं वृत्ताया वर्त्तुलायाः समाप्तिलिप्या अवसानरेखाया बिन्दुद्वयरूपायाः सारैः सारांशैर्निरमायि निर्म्मिता माङो लुङि च्यातो युक् चिण्कृतोरिति युगागमः। कराङ्गुली कराङ्गुल्यः जातावेकवचनं। काञ्चनलेखनीनां स्वर्णकणिकानां सारैस्तथा केशानां समूहः कैश्यं केशाश्व भ्यां यञ् चान्यतरस्यामिति यञ् प्रत्ययः। मसीनां सारैस्तथा स्मितभा मन्दहासकान्तिः कठिन्याः घटिकायाः घटिकायान्तु कठिनीति विश्वः। सारैर्निरमायीत्युत्प्रेक्षा ॥ ८७ ॥

येति। या देवी सोमसिद्धान्तः कापालिकदर्शनं सोमस्येन्दोः सिद्धान्तः अखण्डरूपञ्च तन्मयाननेव स्थिता तथा शून्यस्यैवात्मतावादो माध्यमिकदर्शनमथ च शून्यात्मता निस्वरूपता तद्वादो नास्तिवादस्तन्मयमुदरं यस्याः सैव नास्तिकोदरैत्यादिना विकल्पादनिकारः। निराकारविज्ञानमात्रवादिना ह्यापलापे योगाचारतन्मतं विज्ञानसामस्त्यमर्थविशिष्टज्ञानसम्पत्तिश्च तन्मयमन्तरङ्गं यस्याः सैव साकारज्ञानवादी सौत्रान्तिकः ज्ञानानां नीलपीताद्याकारता साकारता तत्सिद्धिस्तन्मतं अथ शोभनाकारतासम्पत्तिश्च तन्मयाः सर्व्वा अखिला यस्याः सैव स्थितेति सर्व्वत्रोत्प्रेक्षेति ॥ ८८ ॥

भीम इति। अथ तया देव्या भीमो भीमभूपतिरगद्यत निरुक्तः किमिति हे राजन्! इयन्ते तव मोदितुं वेला किल? समयः खलु? काल

विन्दत्यसव्ये मकरन्दलीलां मन्दाकिनी यच्चरणारविन्दे ।
अत्रावतीर्णा गुणवर्णनाय राज्ञां तदाज्ञावशगास्मि कापि ॥९०
तत्कालवेद्यैः शकुनस्वराद्यै राप्तामवाप्तां नृपतिः प्रतीत्य ।
तां लोकपालैकधुरीण एष तस्यै सपर्य्यामुचितां दिदेश ॥९१॥
दिगन्तरेभ्यः पृथिवीपतीना माकर्षकौतूहलसिद्धविद्यां ।
ततः क्षितीशः स निजां तनूजां मध्येमहाराजकमाजुहाव ॥९२

समय वेलासु तुमुन् । तत्तस्माद्विपद्य खेदित्वालं विषादो न कर्त्तव्य इत्यर्थः । अलं खल्वोरित्यादिना क्त्वा प्रत्ययः । कुतः येषां जगतीपतीनां गोत्रं कुलं नाम च गोत्रं नाम्नि कुलेऽपि चेति विश्वः । चरित्रञ्च मया निगाद्यं वक्तव्यमहं वक्ष्यामीत्यर्थः । ऋहलोर्ण्यत् गदमदेत्यादिसूत्रे अनुपसर्गे एव यतो विधानात् ॥ ८९ ॥

कालं किमर्थमागता चेत्याकाङ्क्षायामाह । विन्दतीति । असौ प्रसिद्धा मन्दाकिनी यस्य पुंसश्चरणारविन्दे मकरन्दलीलां कन्दलिकां अविन्दत तस्य पुंसः आज्ञया वशगा वशवर्त्तिनी कापि या काचिदहं, किं विशेष चिन्तयेति भावः । राज्ञां गुणवर्णनायात्र स्वयम्वरसभायामवतीर्णास्मि ॥ ९० ॥

तत्कालेति । लोकपालैरिन्द्रादिभिः सहैकधुरं वहतीत्येकधुरीणः समानस्कन्धः एक धुर लुक् चेति खनुप्रत्ययः । एष नृपतिर्भीमः तत्काले वेद्ये वेदयितुं शक्ये शकुनः पक्षी स्वरश्चन्द्रादिभेदः आद्यशब्दादक्षि स्पन्दादिसंग्रहः । तैरुपायैरवाप्तां तां वाग्देवीमाप्तां हितां प्रतीत्य निश्चित्य तस्यै उचितां सपर्य्यां पूजां दिदेश समर्पयामास ॥ ९१ ॥

दिगिति । ततो देवीपूजानन्तरं सः क्षितीशः भीमो दिगन्तरेभ्यः पृथिवीपतीनामाकर्षे कौतूहले आकर्षणकर्मणि सिद्धविद्यां सिद्धमन्त्रसमोवृत्तिभिरित्यर्थः । निजां तनूजां महतो राजकस्य राजसमूहस्य

दासीषु नासीरचरीषु जातं स्फीतं क्रमेणालिषु वीचितासु ।
स्वाङ्गेषु रूपोत्थमथाद्भुताब्धिमुद्वेलयन्तीमवलोककानां ॥९३॥
स्निग्धत्वमायाजललेपलोपसयत्नरत्नांशुरजांशुकाभां ।
नेपथ्यहीरद्युतिवारिवर्त्तिस्वच्छायसच्छायनिजालिजालां ९४

मध्ये मध्येमहाराजकमाजुहाव आहूतवान् ह्वयते लिटि अभ्यस्तस्य चेति द्विर्भावात्प्राक्सम्प्रसारणे रूपसिद्धिः ॥ ९२ ॥

अथ षोडशश्लोक्या दमयन्तीं वर्णयति। दासीष्वित्यादि। कीदृशीं नासीरे चरन्तीति नासीरचारिणीष्वग्रेसरीषु चरेष्टत्वात् ङीप्। दासीषु परिचारिकासु वीचितासु सतीषु जातमुत्पन्नं क्रमेणालिषु सखीषु वीचितासु स्फीतं प्रवृद्धं स्फायः स्फी निष्ठायामिति स्फीभावः। रूपोत्थं सौन्दर्यजन्म अवलोककानां द्रष्टॄणां अद्भुताब्धिं स्वाङ्गेषु वीचितेषु सत्सूद्वेलयन्तीं उद्वेलं कुर्वन्तीं वेलामतिलङ्घयन्तीमित्यर्थः। उद्वेलशब्दात् तत्करोतीति णयन्तात् कर्त्तरि ङीप्। अत्र कस्मिन्नद्भुताब्धौ क्रमेणानेकेषां जातत्वस्फीतत्वोद्वेलत्वानां वृत्तिकथनात्पर्य्यायालङ्कारभेदः। एकस्मिन्ननेकमनेकस्मिन्नेकमिति लक्षणात् ॥ ९३ ॥

स्निग्धत्वेति। पुनः स्निग्धत्वं मासृण्यगुणः माया जलं जलगर्भताख्यो दोषः लेखा रागाख्यदोषः रागस्त्रासश्च विन्दुश्च रेखा च जलगर्भता। सर्वरत्नेष्वमी पञ्च दोषाः साधारणा मता इति वाग्भटः। तयोरभावो लोपः। ताभ्यां सयत्नानि उपलक्षणमेतत् गुणसम्पत्तिदोषविरहाभ्यां शुद्धानीत्यर्थः यतिप्रयत्न इति धातोः नश्वीदितोनिष्ठायामितीट् प्रतिषेधः। तेषां रत्नानां अंशुरजा किरणप्रसादः सैवांशुकाभा वस्त्रप्रभा यस्या स्तां पुनः नेपथ्यहीरद्युतिवारिवर्त्तिस्वच्छायमाभरणवज्रप्रभाम्बुगतस्वप्रतिबिम्बं विभाषा सेनेत्यादिना छायाशब्दस्य नपुंसकत्वं। तेन सच्छायं सवर्णं निजालिजालं स्वसखीकुलं यस्या स्तां अत्र भूषामणिप्रभा झरमग्ने सखीजने स्वप्रतिबिम्बत्वोत्प्रेक्षया तासामपि तत्समानसौन्दर्यं वस्तु व्यजते ॥ ९४ ॥

विलेपनामोदमुदागतेन तत्कर्णपूरोत्पलसर्पिणा च ।
रतीशदूतेन मधुव्रतेन कर्णे रहः किञ्चिदिवोच्यमानां ॥ ९५ ॥
विरोधिवर्णाभरणाश्मभासां मल्लाजिकौतूहलमीक्षमाणां ।
स्मरस्वचापभ्रमचालिते नु भ्रुवौ विलासाद्वलिते वहन्तीं ॥ ९६ ॥
सामोदपुष्पाशुगवासिताङ्गीं किशोरशाखाग्रशयालिमालां ।
वसन्तलक्ष्मीमिव राजभिस्तैः कल्पद्रुमैरप्यभिलष्यमाणां ॥ ९७ ॥

विलेपनेति । विलेपनस्याङ्गरागस्यामोदे सौरभे मुदा प्रीत्यागतेन तथा तस्याः कर्णपूरोत्पलं सर्पतीति तत्सर्पिणा तद्गन्धाकृष्टेन च रतीशदूतेन तदुद्दीपकेनेत्यर्थः । मधुव्रतेन कर्णे किञ्चिद्रहोरहस्यं उच्यमानामिव कामदेवसन्दिष्टं किमप्युपदेश्यमानामिव स्थिता मुत्प्रेक्षा । तया च तस्यास्तदा किलकिञ्चितादि शृङ्गारचेष्टाविर्भावो व्यज्यते ॥९५॥

विरोधीति । पुनर्विरोधिवर्णानां नानावर्णानामाभरणाश्मनां भूषणमणीनां या भासः तासां मल्लाजिकौतूहलं मल्ल युद्धकौतुकं परस्पराक्रमणसंरम्भम् ईक्षमाणां पुनर्विलासाद्वलिते स्त्रीस्वभावाल्लीलाचरिते ततोत्प्रेक्षा । स्मरेण स्वचापभ्रमाच्चालिते नु आदातुं कम्पिते इव स्थिते इत्यर्थः । चलकम्पने इति मित्त्वेऽपि ज्वलह्वलह्मलचलानामनुपसर्गाद्वेति विकल्पनाद्ध्रस्वाभावः । एवम्भूते भ्रुवौ वहन्तीम् ॥ ९६ ॥

सामोदेति । सामोदं सहर्षं यथा तथा पुष्पाशुगेन कामेन वासितमासासितमङ्गं वपुर्यस्यास्तां जगत्त्रयीजिगीषोः कामस्यामोघसुरभीकृताङ्गीम् आमोदो हर्षे गन्धयोराशुगौ वायुविशिखाविति विश्वामरौ । पुनः किशोरशाखाः कोमलाङ्गुल्यो अग्रशया अग्रपाण्यो यासान्ताः अलिमालाः सखी पङ्क्तयो यस्यास्तां पञ्चशाखः शयः पाणिरित्यमरः । अन्यत्र किशोरशाखानाम् अग्रेषु ते शेरत इति तच्छया अधिकरणे शेतेरित्यच् प्रत्ययः । वा अलिमाला भृङ्गश्रेणयः यस्यास्तां तैरभ्यागतैरागतैः कल्पद्रुमैरपि सर्वाभिलाषपूरकैरपीति भावः । वसन्तलक्ष्मीमि-

पीतावदातारुणनीलभासां देहोपदेहात् किरणैर्मणीनां ।
गोरचनाचन्दनकुङ्कुमैण नाभीविलेपान् पुनरुक्तयन्तीं ॥९८॥
स्मरं प्रसूनेन शरासनेन जेतारमश्रद्दधतीं नलस्य ।
तस्मै स्वभूषादृशदंशुशिल्पं बलद्विषः कार्मुकमर्पयन्तीं ॥ ९९ ॥
विभूषणेभ्यो वरमंशुकेषु ततो वरं सान्द्रमणिप्रभासु ।
सम्यक् पुनः क्वापि न राजकस्य पातुं दृशा धातृकृतावकाशां॥१००

वाभिलष्यमाणानां यथा सर्व्वाभिलाषपूरकैरपि कल्पवृक्षैर्वसन्तलक्ष्मीरुपेक्ष्यते तद्वद्राजभिरपीति सात्विकोक्तिः ॥ ९७ ॥

पीतेति। पुनः पीता अवदाता सैव अरुणनीलाश्च भासो येषां तेषां मणीनां किरणैर्देहस्योपदेहादुपलेहनात् गोरोचनादि चतुष्टयलेपान् पुनरुक्तयन्तीं सावर्ण्यात्पुनरुक्तान् कुर्व्वन्तीं नाभिः कस्तूरी, अत्र गोरोचनाद्यनुलेपचतुष्टयस्य यथासङ्ख्यसम्बन्धेन पीतादिमणिकिरणकैतवकथनाद्यथासङ्ख्यसङ्कीर्णसामान्यालङ्कारः। लक्षणमुक्तम्॥ ९८ ॥

स्मरमिति॥ प्रसूनेन शरासनेन पुष्पचापेन नलस्य जेतारं सन्तं स्मरमश्रद्दधतीमविश्वसतीमतएव तस्मै स्मराय स्वभूषादृशदंशूनां निजाभरणमणिकिरणानां शिल्पं निर्माणं तन्निमित्तमित्यर्थः। बलद्विषः कार्मुकमिन्द्रचापमर्पयन्तीं वीरधौरेयो नलः पुष्पचापदुर्जय इति मत्वा जयाय स्वाभरणमणिकिरणकल्पितमैन्द्रन्धनुः दृढ़ीयस्तस्मै दधानामिव स्थितामित्युत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ९९ ॥

विभूषणेभ्य इति। विभूषणेभ्यो वरं प्रथमं विभूषणेष्वासज्य ततोऽधिकं यथा तथांशुकेषु ततो वरमधिकं सान्द्रमणिप्रभासु सक्तामिति शेषः। राजकस्य राजसमूहस्य गोत्रोक्षेत्यादिना वुञ्प्रत्ययः। दृशा दृष्ट्या सम्यक् पातुं पुनः स्थैर्य्येण धात्रा कृतावकाशां न भवन्तीमुत्तरोत्तरविषयाकृष्टा पूर्व्वपूर्व्वविस्तारेण राजकदृष्टिर्नक्वापि क्षणमवस्थितेत्यर्थः। तदङ्गसङ्गस्तस्यापि दवीयानिति भावः। अत्र विभूषणानामुत्तरोत्कर्षद्वारेण राजक-

प्राक्पुष्पवर्षैर्वियतः पतद्भिर्द्रष्टुं न दत्तामथ तद्द्विरेफैः ।
तद्भीतिभुग्नेन ततोमुखेन विधेरहो वाञ्छितविघ्नयत्नः ॥१०१॥
एतद्वरं स्यामिति राजकेन मनोरथातिथ्यमवापिताय ।
सखीमुखायोत्सृजतीमपाङ्गात्कर्पूरकस्तूरिकयोः प्रवाहं ॥१०२॥
स्मितेच्छुदन्तच्छदकम्पकिञ्चिद्दिगम्बरीभूतरदांशुवृन्दैः ।
आनन्दितोर्वीन्द्रमुखारविन्दैर्मुदं नुदन्तीं हृदि कौमुदीनां ॥१०३

इष्टक्रमेण विभूषणाद्यनेकाधारसम्बन्धोक्तेः सारालङ्कारः । सङ्कीर्णपर्यायभेदः उत्तरोत्तरमुत्कर्षः सारः ॥ १०० ॥

प्रागिति । प्राक् प्रथमं वियतोऽम्बरात्पतद्भिः पुष्पवर्षैरथ तद्द्विरेफैः पुष्पाकृष्टभृङ्गैस्ततोऽनन्तरं तद्भीति भुग्नेन भृङ्गभय नम्रेण मुखेन च द्रष्टुं न दत्ता भेतैः प्रतिबद्ध दर्शनामित्यर्थः । राजकस्येति शेषः । तथाहो आश्चर्यं विधेर्दैवस्य वाञ्छितविघ्नयत्नो वाञ्छितार्थविघातव्यसनितेत्यर्थान्तरन्यासः तथा चेकस्या राजदृष्टेः क्रमेण भैमीदर्शनप्रतिबन्धक पुष्पवृष्ट्याद्यनेकाधारसम्बन्धोत्थेन पर्य्यायेण सङ्करः ॥ १०१ ॥

एतदिति । पुरा राजकेन राजसमूहेन वरं श्रेष्ठं सखीमुखं स्यां तदात्मकं भवेयं प्रार्थनायां लिङ् । इति मनोरथस्यातिथ्यमतिथित्वं ब्राह्मणादित्वात् ष्यङ् प्रत्ययः । अवापिताय प्रापिताय एतन्मुखत्वे भैमीदृष्टिगोचरत्वसिद्धे रिति भावः । सखीमुखायापाङ्गात्कर्पूरस्य कस्तूरिकायाः स्वार्थे कः केनोरिति इकारस्य ह्रस्वः । तयोश्च प्रवाहमुत्सृजन्तीं प्रवर्त्तयन्तीं सखीमुखमेव वीक्षमाणामित्यर्थः । आच्छीनद्योर्नुमिति विकल्पान्नुमभावः । दृष्टीनां सितासितत्वेन निर्देशः अतएव विषयनिगरणेन विषयिमात्रोपनिबन्धाद्भेदे अभेदरूपातिशयोक्त्यलङ्कारः ॥ १०२ ॥

स्मितेति । पुनरानन्दितानि उर्व्वीन्द्रमुखारविन्दानि यैस्तैः अतएवस्मितेच्छोः स्मितोद्युक्तस्य दन्तच्छदस्य अधरस्य कम्पेन किञ्चिद्दिगम्बरीभूतैरेव प्रकाशीभूतैर्यद्वा दिशामम्बरीभूतैर्दिग्व्यापारैरदांशूनां दन्तकान्तीनां वृन्दैः कौमुदीनां मुदं हृदि नुदन्तीं कौमुदीमधुरमन्दहासामित्यर्थः ॥ १०३ ॥

प्रत्यङ्गभूषाच्छमणिच्छलेन यल्लग्नतन्निश्चललोकनेत्रां ।
हाराग्रजाग्रद्गरुडाश्मरश्मि पीनाभनाभीकुहरान्धकारं ॥१०४॥
तद्गौरसारस्मितविस्मितेन्दु प्रभाशिरःकम्परुचोऽभिनेतुं ।
विपाण्डुतामण्डितचामराली नानामरालीकृतलास्यलीलां ॥१०५॥
तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानां ।
स्वयं धृतामप्सरसां प्रसादं ह्रियं हृदोमण्डनमर्पयन्तीं ॥१०६॥

प्रत्यङ्गेति । पुनः प्रत्यङ्गं प्रत्यवयवं ये भूषाच्छमणयः तेषां छलेन ये अङ्गेषु लग्नानि तेष्वङ्गेषु निश्चलानि हर्षपारवश्यादिति भावः । तयोः खञ्जकुञ्जवत्समासः । तानि लोकनेत्राणि यस्यास्तामिवेति सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । पुनः हाराग्रे जाग्रतः प्रकाशमानस्य गरुडाश्मनो गरुत्मद्रत्नस्य रश्मिभिः पीनाभं सान्द्रप्रभं नाभीकुहरान्धकारं यस्यास्तां अत्र मरकतच्छायस्यान्धकारैः साम्योक्तेः सामान्यालङ्कारः ॥ १०४ ॥

तदिति । पुनस्तस्या भैम्याः गौरसारस्मितेन विशदोत्कृष्टमन्दहासेन विस्मिताया विस्मयाविष्टाया इन्दुप्रभायाश्चन्द्रिकायाः शिरः कम्परुचोऽभिनेतु मनुकर्तु मिवेत्युत्प्रेक्षा । विपाण्डुतामण्डिता धावल्यशोभिता चामरपङ्क्तय एव नानामराल्यो हंसस्त्रीभिः कृता लास्यलीला नृत्यचेष्टा यस्यास्तां निजमन्दहासजनितविस्मय कम्प्रमानचन्द्रिका शिरः कम्पचारुचामरचयवीज्यमानामित्यर्थः ॥ १०५ ॥

तदङ्गेति । सैवाङ्गं काव्यार्थतया शरीरं यासान्तास्तदङ्गास्तद्विषया इत्यर्थः । शब्दादौ मूर्तिभिः ख्याताविति लक्षणात् । तासाम्भोगावलीनां प्रबन्धविशेषाणां गायन्यो गायकाः कर्तरि ल्युट् ङीप् । तासां मध्येगानमध्ये निरुक्तिक्रमेषु निष्कृष्टोच्चारणप्रकारेषु कुण्ठितानां लुप्तप्रतिभानामप्सरसां स्वयं धृतां हृदः स्वान्तस्य वक्षसश्च मण्डनमलङ्कारभूतां ह्रियं लज्जामेव प्रसादं पारेतोषिकमर्पयन्तीं प्रयच्छन्तीं तद्दोषख्यानेन ताः अपि ह्रेपयन्तीमित्यर्थः । गायकेभ्यः स्वधृतवस्त्रालङ्कारादिकं प्रीत्या प्रयच्छन्तीं

तारा रदानां वदनस्य चन्द्रं रुचा कचानाञ्च नभो जयन्तीं।
आकण्ठमक्ष्णोर्द्वितयं मधूनि महीभृतः कस्य नभोजयन्तीं ॥१०७॥
अलङ्कृताङ्गाद्भुतकेवलाङ्गीं स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीं।
इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः ॥१०८॥
आसीदसौ तत्र न कोऽपि भूपस्तन्मूर्तिरूपोद्भवदद्भुतस्य।
उल्लेसुरङ्गानि मुदा न यस्य विनिद्ररोमाङ्कुरदन्तुराणि ॥१०९॥

अत्र तु ह्रीदानमेव तद्दानमित्युक्त्या ह्रियापि स्वयं धृतत्वादलङ्कृतत्वात् तदायत्वाच्चेति भावः ॥ १०६ ॥

तारा इति। पुनः रदानां दन्तानां रुचा कान्त्या तारा नक्षत्राणि वदनस्य रुचा चन्द्रं कचानां केशानां रुचा नभश्च जयन्तीं अतएव कस्य महीभृतोऽक्ष्णोर्द्वितयं मधूनि क्षौद्राणि आकण्ठमागलं नभोजयन्तीं सर्वस्यापीत्यर्थः। नञर्थस्य न शब्दस्य सुप्सुपेति समासः। गतिबुद्धिरित्यादिना अणि कर्तुरक्षिद्वितयस्य कर्मत्वनिगरणचलनार्थेभ्यश्चेति परस्मैपदं सकलराजलोकलोचनासेचकमासीदित्यर्थः। अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुकत्वात् काव्यलिङ्गं तच्च संसृष्टाभिस्ताराद्युपमाभिः सङ्कीर्यते तस्य नभोजयन्तीमिति यमकेन संसृष्टिः ॥ १०७ ॥

अलङ्कृतेति। अथाह्वानानन्तरं अलङ्कृताङ्गेभ्योऽद्भुतानि केवलान्यनलङ्कृतानि यस्या स्तां स्तवादधिका स्तोतुमशक्या अध्यक्षनिवेद्या प्रत्यक्षगम्या लक्ष्मीः शोभा यस्यास्तामिति बहुवचनान्तोत्तरपदो बहुव्रीहिः अन्यथैकवचनान्तलक्ष्मीशब्दस्य उरःप्रभृतिकत्वात् कप्प्रसङ्गः शैषिकस्तु वैभाषिकः। विमानेन सभां विशन्तीं इमां भैमीं राजराजिरपाङ्गैः पपौ अत्यादरेण सविलासमद्राक्षीदित्यर्थः ॥ १०८ ॥

अथ तामद्भुतचेष्टां वर्णयति। आसीदिति। अत्र सभायां असावीदृशो भूपः कोऽपि नासीत् तस्या भैम्या मूर्तिरूपेण रूपसौन्दर्येणोद्भव-

अङ्गुष्ठमूर्द्ध्ना च निपीड़िताग्रा मध्येन भागेन च मध्यमायाः ।
आस्फोटि भैमीमवलोक्य तत्र न तर्जनी केन जनेन नाम ॥११०॥
अस्मिन् समाजे मनुजेश्वराणां तां खञ्जनाक्षीमवलोक्य केन ।
पुनः पुनर्लोलितमौलिना न भ्रुवोरुदक्षेपितरां द्वयी वा ॥१११॥
स्वयम्वरस्याश्रयमाजिहानां विभाव्य भैमीमथ भूमिनाथैः ।
इदं मुदा विह्वलचित्तभावा दवादि खण्डाक्षरजिह्मजिह्वं ॥११२॥

मङ्गतरसो यस्य भूपस्याङ्गानि मुदा विनिद्रैः रुदितैः रोमाङ्कुरैः पुलकैः दन्तुराणि विषमाणि सन्ति नोल्लेसुः नोल्लसितानि सर्वस्याप्यङ्गानि उल्लेसुरेवेत्यर्थः ॥ १०९ ॥

अङ्गुष्ठेति । तत्र सभायां भैमीमवलोक्याङ्गुष्ठस्य मूर्ध्ना अग्रेण तथा मध्यमाया मध्याङ्गुलेर्मध्येन भागेन च निपीडितमग्रं यस्याः सा तर्जनी केन नाम जनेन नास्फोटि अभाजीति यावत् । स्फुटभेदन इति धातोश्चौरादिकात् कर्मणि लुङ् सर्वैणाप्यद्भुताऽनुभावस्फोटिका कृतेवेत्यर्थः ॥ ११० ॥

अस्मिन्निति । अस्मिन् समाजे सभायां खञ्जनस्येवाक्षिणी यस्यास्तां भैमीमवलोक्य लोलितमौलिना आश्चर्यात् कम्पितकिरीटेन मनुजेश्वरेण राज्ञा भ्रुवोर्द्वयी भ्रूद्वयं वा पुनः पुनर्नोदक्षेपितरां सर्वैणातिशयेनोत्क्षिप्तेवेत्यर्थः क्षिपेः कर्मणि लुङि तिङ् आम् प्रत्ययः । अत्र शिरःकम्पभ्रूविकारावद्भुतानुभावावुक्तौ ॥ १११ ॥

अथ राज्ञां वागारम्भाः प्रवृत्ता इत्याह स्वयम्वरस्येति । अथास्मिन्नेव स्वयम्वरस्याश्रयं वरदेशमाजिहानां प्राप्नुवन्तीं हाजः कर्त्तरि शानच् । भैमीं विभाव्य निर्व्वर्ण्य भूमिनाथैराजभिः मुदा हर्षेण हेतुना विह्वलचित्तभावात् व्यग्रचित्तत्वाद्धेतोरिदं वक्ष्यमाणं खण्डाक्षरमर्द्धोक्तवर्णं जिह्मजिह्वं कुण्ठजिह्वं यथा तथा अवादि उक्तं कर्मणि लुङ् ॥ ११२ ॥

रम्भादिलोभात् कृतकर्म्मभिर्भूः शून्यैव माभूत् सुरभूमिपान्थैः।
इत्येतयालोपि दिवोऽपि पुंसा वैमत्यमत्यप्सरसा रसायां ॥११३॥
रूपं यदाकर्ण्य जनाननेभ्य स्तत्तद्दिगन्ताद्वयमागमाम: ।
सौन्दर्य्यसारादनुभूयमाना दस्यास्तस्माद्बहुना कनीयः ॥११४॥
रसस्य शृङ्गार इति श्रुतस्य क्व नाम जागर्त्ति महानुदन्वान्।
कस्मादुदस्थादियमन्यथा श्रीर्लावण्यवैदग्ध्यनिधिः पयोधेः ॥११५॥

अथ विंशतिश्लोक्या वागारम्भानेव वर्णयति रम्भेत्यादि। रम्भादिस्वप्सरःसु लोभात् कृतं कर्म्म यागादिर्यै स्तैः सुरभूमिपान्थैः स्वर्लोकपथिकैः पथो णनित्यमिति णप्रत्ययः। भूरेव शून्या माभूदिति हेतोः अत्यप्सरसा तया भैम्या दिवोऽपि पुंसां देवानामपि रसायां भूलोके वैमत्यं वैराग्यमलोपि लुप्तमिवेत्युत्प्रेक्षा व्यञ्जका प्रयोगाद्गम्या। लुपेः कर्मणि लुङ्। अत्यप्सरसः भैम्याः सौन्दर्य्यात् स्वर्लोकमतिशेते भूलोकमिति भावः। अत्रान्त्यपादे मत्यमत्यप्सरसारसेति व्यञ्जकयुग्मवृत्त्या छेकानुप्रासः अन्यत्र वृत्त्यनुप्रासः तयोः पूर्व्वोक्तोत्प्रेक्षयोश्च संसृष्टिः ॥ ११३ ॥

रूपमिति। वयं जनाननेभ्यः यद्रूपं सौन्दर्य्यमाकर्ण्य तस्मात्तौ दिगन्तस्य वीप्सायां द्विर्भावः। तस्मादागमाम आगताः स्मः गमेर्लुङि च्लेरङादेशः। तद्रूपमस्मादनुभूयमानात् सौन्दर्य्यसारात्पञ्चमी विभक्त इति पञ्चमी। बहुना भूम्ना प्रथिम्ना भावप्रधानो निर्देशः। कनीयोऽल्पीयः युवाल्पयोः कनन्यतरस्यामिति विकल्पात्कनादेशः ॥ ११४ ॥

रसस्येति। शृङ्गार इति श्रुतस्य प्रसिद्धस्य रसस्य शृङ्गाररसस्येत्यर्थः। तस्य सम्बन्धे महानुदन्वानुदधिः उदन्वानुदधिश्चेति निपातनात्साधुः। क्व नाम जागर्त्ति कुत्रापि किल प्रकाशत इति विकल्पः सर्व्वदा कचिदस्त्येवेत्युत्प्रेक्षा। कुतः अन्यथा शृङ्गारार्णवाभावे लावण्यवैदग्ध्ययोः सौन्दर्य्यप्रावीण्ययोर्निधिरियं पुरोवर्त्तिनी श्रीर्लक्ष्मीः कस्मात्पयोधेरुदस्थात् पयोध्यन्तरस्य तस्याः श्रिय इवास्याः श्रियो जननसामर्थ्या-

साक्षात्सुधांशुर्मुखमेव भैम्या दिवः स्फुटं लाक्षणिकः शशाङ्कः।
एतद्भ्रुवौ मुख्यमनङ्गचापं पुष्पं पुनस्तद्गुणमात्रवृत्त्या ॥११६॥
लक्ष्ये धृतं कुण्डलिके सुदत्या ताड़ङ्कयुग्मं स्मरधन्विने किं।
सव्यापसव्यं विशिखा विसृष्टा स्तेनैतयोर्यान्ति किमन्तरेण ॥११७॥

दिति भावः। अत्रेयं श्रीरिति विषयनिगरणेन विषयिमात्रनिबन्धनाद्भेदेऽप्यभेदे सातिशयोक्तिरेतन्मूला च पूर्वोक्तशृङ्गाररससद्भावोत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ११५ ॥

साक्षादिति। भैम्या मुखमेव साक्षात्सुधांशुः मुख्यचन्द्रो दिवोऽन्तरिक्षस्य मुखन्तु लाक्षणिको लक्षणागम्यो लाञ्छनकश्च शैषिकष्ठक्। शशाङ्कश्चन्द्रः शशाङ्कत्वादेव लाक्षणिकत्वमिति भावः। स्फुटमित्युत्प्रेक्षा। तथा एतस्याः भ्रुवावेव मुख्यं प्रधानमभिधेयमित्यर्थः। अमोघत्वादिति भावः। दिगादिभ्यो यदिति भावार्थे यत्प्रत्ययः। मुखे भवं शरीरावयवादि अनङ्गचापं पुष्पं पुनः पुष्पन्तु तस्य मुखस्य भ्रूचापस्य गुण उद्दीपकत्वादिस्तन्मात्रवृत्त्या तत्सादृश्यादित्यर्थः। ज्यामात्वयोगेन च गुणस्त्वावृत्तिशब्दादिज्येन्द्रिया मुखतन्तुष्विति वैजयन्ती। अत्रापि स्फुटमित्यनुषङ्गादुत्प्रेक्षेति द्वयोर्निरपेक्षत्वात् संसृष्टिः ॥ ११६ ॥

लक्ष्येति। सुदत्या भैम्या ताड़ङ्कयोः कर्णवेष्टनयोर्युग्मं स्मर एव धन्वी व्रीह्यादित्वादिनिः। तस्मै तादर्थ्ये चतुर्थी। लक्ष्ये शरव्यभूते कुण्डल्यावेव कुण्डलिके चक्रे सति धृतं किं? ताड़ङ्कयुग्ममेव शरव्यचक्रत्वेन धृतवतो किमित्युत्प्रेक्षा। अतएव तेन स्मरधन्विना सव्यमपसव्यञ्च यथा तथा विसृष्टा विमुक्ता विशिखा वाणास्तयोः शरव्यचक्रयोरन्तरेणैव यान्ति प्रसरन्ति किमित्युत्प्रेक्षा सापेक्षत्वात् सङ्करः। सव्यसाचिनो धानुष्काः शरव्यद्वये शरान् मुञ्चन्तीति भावः ॥ ११७ ॥

तनोतीति। सैषा भैमी इन्दीवरकर्णपूरावेव कुसुमाशुगस्याकीर्त्तिमपकीर्त्तिं तनोति तस्यां तस्याकीर्त्तिं जनयतीत्यर्थः। आयुर्घृतमितिवत्कार्य्यकारणयोरभेदोपचारः कारणेन्दीवरगुणाद कीर्त्तिश्च कालि-

तनोत्यकीर्तिं कुसुमायुधस्य सैषा वतेन्दीवरकर्णपूरी ।
यतः श्रवःकुण्डलिकापराद्धशरं खलः ख्यापयिता तमाभ्यां ॥११८॥
रजःपद षट्पदकीटजुष्टं हित्वात्मनः पुष्पमयं पुराणं ।
अद्यात्मभूराद्रियतां स भैम्या भ्रूयुग्ममन्तर्धृतमुष्टिचापं ॥११९॥
पद्मान् हिमे प्रावृषि खञ्जरीटान् क्षिप्नुर्यमादाय विधिः क्वचित्तान्
सारेण तेन प्रतिवर्षमुच्चैः पुष्णाति दृष्टिद्वयमेतदीयं ॥१२०॥

मेति भावः । वतेति खेदे कुतस्तत्कारणं तदाह यतः खलः कश्चिद्दोषान्वेषो दुर्जन आभ्यामिन्दीवरकर्णपूराभ्यां इमा एव निदर्श्येत्यर्थः । ल्यब्लोपे पञ्चमी । तं कुसुमशरं श्रवसोः कर्णयोः कुण्डलिके ताडङ्कौ ते कुण्डलिके लक्ष्ये चक्रे ताभ्यामपराद्धशर च्युतसायकं अपराद्धपृषत्कोऽसौ लक्ष्याच्च्युतसायक इत्यमरः । ख्यापयिता ख्यापयिष्यति कर्त्तरि लुट् । इन्दीवरयोरपि कामशरत्वात् कुण्डलिकाबहिर्भागे लग्नत्वाच्च दृष्टान्तेनैवान्यापराद्धपृषत्कदोषोद्घाटनसौकर्यात्तयोरकीर्त्तिकारणत्वोत्प्रेक्षेत्यर्थः ॥ ११८ ॥

रज इति । अद्य आत्मभूः कामः रजसां पदं स्थानं धूलीधूसरमित्यर्थः । षट्पदैरेव कीटैः क्रिमिभिः जुष्टं सेवितं दृष्टमित्यर्थः । पुराणं जीर्णं पुष्पमयमात्मनश्चापं हित्वा त्यक्त्वान्तर्मध्ये धृतमुष्टि मुष्टिपिहितत्वाददृश्यमध्यमित्यर्थः । भैम्या भ्रूयुग्ममेव चापमाद्रियताम् अङ्गीकरोतु अमोघत्वादिति भावः ॥ ११९ ॥

पद्मानिति । विधिः स्रष्टा यं पद्मं खञ्जरीटगतदृष्टांशमादाय तान्निःसारान् पद्मान् हिमे खञ्जरीटान् खञ्जनपक्षिणः प्रावृषि वर्षर्तौ क्वचित् क्वापि प्रावृषि क्षिप्नुः क्षिप्तवानित्यर्थः । त्रसिगृधृधीत्यादिना क्नुः प्रत्ययः न लोकेत्यादिना षष्ठी प्रतिषेधात् द्वितीया । तेन सारेण प्रतिवर्षं प्रतिवत्सरमेतदीयं दृष्टिद्वयं उच्चैः पुष्णातीत्युत्प्रेक्षा अन्यथा वायमीदृशी शोभेति भावः ॥ १२० ॥

एतद्दृशोरम्बुरुहैर्विशेषं भृङ्गौ जनः पृच्छतु तद्गुणज्ञौ ।
इतीव धात्रा कृततारकालिस्त्रीपुंसमाध्यस्थ्यमिवाक्षियुग्मे ॥१२१॥
व्यधत्त सौधौ रतिकामयोऽस्याभृतं वयोऽस्या हृदि वासभाजोः ।
तदग्रजाग्रत्पृथुशातकुम्भ कुम्भौ न सम्भावयति स्तनौ कः ॥१२२।
अस्याभुजाभ्यां विजिताद्बिसात्किं पृथक्करोऽगृह्यत तत्प्रसूनं ।
इहेनती तन्न गृहः श्रियः कैर्न गीयते वा करएव लोकैः ॥१२३॥

एतदिति। जन उभयतारतम्यजिज्ञासुः लोक एतद्दृशोर्भैमी दृशो रम्बुरुहैः सह विशेष तारतम्यं तद्गुणज्ञावम्बुरुहरसज्ञौ भृङ्गौ भृङ्गी च भृङ्गश्च भृङ्गौ पृच्छतु पृच्छेर्दुहादित्वाद्द्विकर्मकत्वमितीव इति मत्वेव धात्रा इहैतदीयेऽक्षियुग्मे तारके कनीनिके स्त्रीपुंसावलिदम्पती चतुरादिना समासान्त निपातः। तयोर्माध्यस्थ्य मकूटसाक्षित्वमक्षिमध्यवर्त्तित्वमकृत कृतवान् करोतेः कर्त्तरि लुङ् तङि ह्रस्वादङ्गादिति सकारलोपः। विवादपदतत्त्वज्ञो मध्यस्थस्स साक्षीति भावः। भैमीदृगम्बुरुहतारतम्यकथनाय धात्रा स्थापितमलिमिथुनमिव भाति कनीनिकायुग्ममित्युत्प्रेक्षा ॥ १२१ ॥

व्यधत्तेति। अस्या भैम्या हृदि वासभाजोर्निवसतो रतिकामयोर्भृत्तं विधेयं वयो यौवनं कर्त्तृ सौधौ व्यधत्त निर्ममे अन्यथा तयोस्तत्र निवासायोगादिति भावः। अतएव कोऽस्याः स्तनौ तयोः सौधयोरग्रे जाग्रतौ प्रकाशमानौ पृथू च शातकुम्भ कुम्भौ कनककलशौ न सम्भावयति न वितर्कयति सर्व्वोऽप्येवमुत्प्रेक्षत एवेत्यर्थः ॥ १२२ ॥

अस्या इति। अस्या भैम्या भुजाभ्यां विजेतृभ्यां विजिताद्बिसात् मृणालात् पृथगेकैकेनेव तत्प्रसूनं बिसप्रसूनं पद्ममेव करो बलिर्हस्तश्च अगृह्यत गृहीतं किमित्युत्प्रेक्षा। बलिहस्तांशवः करा इत्यमरः। जेतुर्जितात्करग्रहणमेव तत्करस्य पद्मत्वं चोचितमिति भावः। तथा हि इहास्या भुजयोस्तत्करत्वेन गृहीतं पद्मं कैर्लोकैर्जनैः श्रियो लक्ष्म्याः

छद्मैव तच्छम्बरजं विसिन्या स्तत्पद्ममस्यास्तु भुजाग्रसद्म ।
उत्कण्टकादुद्गमनेन नालादुत्कण्टकं शातशिखैर्नखैर्यत् ॥१२४॥
जागर्ति मर्त्येषु तुलार्थमस्या योग्येति योग्यानुपलम्भनं नः ।
यद्यस्ति नाके भुवनेऽथवाध स्तदा न कौतस्कुतलोकबाधः ॥१२५॥
नमः करेभ्योऽस्तु विधेर्न वास्तु स्पृष्टं धियाप्यस्य न किं पुनस्तैः ।
सर्गादिदं स्यात्स्खलितं हि शिल्पं मनोभुवोऽनङ्गतयानुरूपं॥ १२६॥

शोभाया गृहस्थालयो नेष्यते कर एव कर इत्येव स गीतेय नोच्यते वा, सर्व्वैरपि तथा क्रियत इत्यर्थः । एतद्धस्तस्य श्रीगृहत्व त्सद्मत्वं करत्वप्रसिद्धेर्विसात्मकत्वेन ग्रहणं सिद्धमित्युत्प्रेक्षा युक्तेत्यर्थः ॥ १२३ ॥

छद्मैवेति । विसिन्याः सम्बन्धि यत्पद्मं शम्बरजं शम्बरदनुजमायाजन्यं छद्मैव मायैव न तु पारमार्थिकमित्यर्थः । दैत्येना शम्बरोऽम्बुनीति वैजयन्ती । अस्या भैम्या भुजाग्रं सद्म स्थानं यस्य तत् पद्मं पारमार्थिकं पद्ममित्यर्थः कुतः यद्यस्मादुद्गताः कण्टकाः सूचयः पुलकाश्च यस्य तस्मान्नालाद्दण्डाच्चोद्गमनेन हेतुना शातशिखैः नखैश्छन्नेनेत्यर्थः । उत्कण्टकं विसपद्मन्तु सोत्कण्टकं कारणगुणानुविधायि कार्य्यत्वादिति भावः । भैमीपाणिपद्मस्य प्रसिद्धपद्म व्यतिरेकोक्त्या व्यतिरेकालङ्कारः ॥ १२४ ॥

जागर्त्तीति । अस्या भैम्यास्तुलायै तुलार्थम् औपम्याय योग्यार्हा काचिन्मर्त्येष्वस्तीत्यत्र नोऽस्माकं योग्यानुपलम्भनं योग्यानुपलब्धिरेव बाधकप्रमाणं जागर्त्ति विलसति अथ नाके स्वर्गेऽधोभुवने पाताले चास्ति यदि तर्हि कौतुकुतानां ततस्ततः स्वर्गादिलोकादागतानां तत आगत इत्यण् प्रत्ययः अव्ययात् टिलोपः । बाधः सम्बाधो न स्यादतस्त्या नागच्छेयुरित्यर्थः । अहो अनुपलब्ध्यर्थापत्तिभ्यामस्यास्त्रिलोक्यामपि तुलाभावो निश्चित इत्यर्थः । अतएवोपमानलोपाल्लुप्तोपमालङ्कारः ॥ १२५ ॥

नम इति । विधेः स्रष्टुः करेभ्यो हस्तेभ्यो नमो नमस्कारोऽस्तु यैरिदं शिल्पमकल्पीति भावः । नमः स्वस्तीत्यादिना चतुर्थी । अथ

इमां न मृद्वीमसृजत् कराभ्यां वेधाः कुशाभ्यासनकर्कशाभ्यां ।
शृङ्गारधारां मनसा न शान्ति विश्रान्तिधन्वाध्वमहीरुहेण ॥१२७
उल्लास्य धातुस्तुलिता करेण श्रोण्यौ किमेषा स्तनयोर्गुरुर्वा ।
तेनान्तरालैस्त्रिभिरङ्गुलीना मुदीतमध्यत्रिवलीविलासा ॥१२८॥

नमो नास्तु वा कुतः अस्य विधेः धिया मनसापि न स्पृष्टन्तैः करैः किं पुनः हि यस्मात् स्पर्शात्करस्पर्शादिदं शिल्पं विलुलितं तत्र तत्र प्रस्पष्टं स्यात् किन्तु अनङ्गतया मनोभुवः कामस्यानुरूपंयुक्तम् अस्पृष्ट्वैव निर्माणासम्भवात्त्रैलोक्यविजयिनस्तस्यानङ्गत्वे विनिर्म्माणशक्तिसम्भवाच्चेति भावः। अत्र भैमी शिल्पस्य विधिकरणसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्ति तत्सापेक्षा चेयमनङ्गसृष्टित्वोत्प्रेक्षेति सङ्करः ॥१२६॥

कुतोऽपि हेतोर्न वैरसृष्टिरियमित्याह इमामिति। वेधाः स्रष्टा मृद्वीं कोमलाङ्गीमिमां कुशाभ्यासनेन कुशाक्रमणेन कर्कशाभ्यां कराभ्यां नासृजदयोग्यत्वादिति भावः। तथा शृङ्गारधारां शृङ्गाररसवाहिनीमिमां। शान्ते विषयविरते विश्रान्त्यैधन्वाध्व महीरुहो मरुमार्गवृक्षः तेन विविक्तेन विषयरसानभिज्ञेन मनसापि नासृजत्स्वयमशृङ्गारिणः शृङ्गारिणीसृष्ट्यशक्तेरिति भावः। अत्र विधिकरमनःसम्बन्धाभावेऽपि तत्सम्बन्धोक्तेरतिशयोक्ति संसृष्टिः ॥१२७॥

उल्लास्येति। श्रोण्यो गुरुर्गुर्वी वोतो गुणवचनादिति विकल्पादनिकारः कुचयोर्वेति संशय्येति शेषः। इतिनैव गम्यमानार्थत्वादप्रयोगः। धातुः करेणोत्तानपाणिना उल्लास्य नीवीमुदरे गृहीत्वा उन्नमय्येत्यर्थः। तुलिता समं धारितेत्युत्प्रेक्षा। तेन तुलनेनाङ्गुलीनां चतसृणां त्रिभिरन्तरालैरुदीत उद्गतः ईज् गताविति धातोः कर्त्तरि क्तः। मध्ये त्रिवलीविलासो वलित्रय शोभा यस्याः सा जाता अतो नूनं तुलितेत्यर्थः ॥ १२८ ॥

निजेति। इन्दुर्निजमात्मीयममृतं पीयूषं क्षीर दध्यादि गोरसस्य

निजामृतोद्यन्नवनीतजाङ्गीमेतां क्रमोन्मीलितपीतिमानं ।
कृत्वेन्दुरस्यामुखमात्मनाभून्निद्रालुना दुर्घटमम्बुजेन ॥१२९॥
अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
अमूनि पुष्पैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥१३०॥
कृतिः स्मरस्यैव न धातुरेषा नास्याहि शिल्पीतरकारुजेयः ।
रूपस्य शिल्पे वयसा च वेधा निर्जीयते स स्मरकिङ्करेण ॥१३१॥

अमृतं व्योम्नि देवान्ने मोक्षे हेम्नि च गोरस इति वैजयन्ती । तस्मादुद्यदुत्पद्यमानं नवनीतं दधिसारः दधिसारो नवनीतमिति हलायुधः । तज्जमङ्गं यस्या स्तामतएव क्रमोन्मीलितपीतिमानं नवनीतवदेव क्रमाविर्भूतपीतवर्णामेतां भैमीं कृत्वा निर्म्माय निद्रालुना निमीलनशीलेनाम्बुजेन दुर्घट साध्वसाध्यमस्या मुखमात्मनाभूत् स्वयमेवाभूदित्युत्प्रेक्षा अन्यथा कथमीदृक् सर्वलावण्यसम्पत्तिरिति भावः ॥१२९॥

अस्या इति । चारुश्चतुरः सः प्रसिद्धो मधुर्वसन्त एव कारुः शिल्पी मलयानिलेनोपादानेनास्याः श्वासं निश्वासमारुतं वितेने चकार पुष्पैरमूनीति हस्तनिर्देशः । अङ्गकानि विदधे वाचं पिकपञ्चमेन कोकिलस्वरेण पिकः कूजति पञ्चममिति वचनात् । चकार ससर्ज इत्युत्प्रेक्षा अन्यथा कथमेषामीदृशीनि सौरभमार्दवमाधुर्य्याणीति भावः ॥१३०॥

कृतिरिति । एषा भैमी स्मरस्यैव कृतिः सृष्टिर्धातुः कृतिर्न तु हि यस्मादस्या भैम्या शिल्पीनिर्म्माता इतरकारुभिः शिल्पान्तरैर्जेयोजेय्यो न अपराजितेन भवितव्यमित्यर्थः । ब्रह्मा तु पराजित इत्यत्राह रूपस्य शिल्पे रूपनिर्म्माणविद्यायां वेधाः स्मरकिङ्करेण वयसा यौवनेनापि निर्जीयते ब्रह्मसृष्टेरधिकरणीयत्वादित्यर्थः । अतस्तात्स्वाम्यादसौ स्मरेण जित इति किमु वक्तव्यमिति युक्ता स्मरकृतिरेषेत्युत्प्रेक्षा स्वभावरमणीयं तद्रूपं यौवनमदनाभ्यां जगन्मोहनं जातमिति तात्पर्य्यम् ॥१३१॥

गुरोरपीमां भणतोष्ठकण्ठनिरुक्तिगर्वच्छिदया विनेतुः ।
श्रमः स्मरस्यैष भवं विहाय मुक्तिं गतानामनुतापनाय ॥१३२॥
आख्यातुमक्षिव्रजसर्वपीतां भैमीं तदेकाङ्गनिखातदृक्षु ।
गाथासुधाश्लेषकलाविलासैरलञ्चकाराननचन्द्रमिन्द्रः ॥ १३३॥
स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा ।
हेमैव कायप्रभयाङ्गशेषै स्तन्वी मतिं क्रामति मे न कापि ॥१३४

गुरोरिति। इमां भैमीं भणत् वर्णयत् गुरोर्वृहस्पतेरप्योष्ठकण्ठमोष्ठ कण्ठञ्च प्राण्यङ्गत्वादेकवद्भावः न लोकेत्यादिना षष्ठीप्रतिषेधात्कर्म्मणि द्वितीया। तस्य निरुक्तिगर्वच्छिदया वक्तृत्वाहङ्कारखण्डनेन षिद्भिदादिभ्योऽङ्। विनेतुः शिक्षयितुः ताच्छील्ये तृच्प्रत्ययः। निर्वक्तुमशक्यरूपनिर्म्माणमेवास्य शिक्षेति भावः। स्मरस्यैष श्रम ईदृग्रूपनिर्म्माणप्रयासो भवं संसारबन्धं विहाय मुक्तिगतानामनुतापनाय वृथा मुक्ताः स्म इति पश्चात्तापजननाय भवतीत्युत्प्रेक्षा तया किमुतान्येषामित्यर्थापत्तिर्व्यज्यते। दमयन्तीवञ्चरहितां मुक्तिं धिगिति भावः ॥१३२॥

आख्यातुमिति। अथेन्द्रो नलरूपधार्य्यपि निजशक्त्याक्ष्णां व्रजेण सहस्रेणाक्षिभिः सर्वेष्वङ्गेषु पीतामादरदृष्टां भैमीं तस्या भैम्या एकस्मिन्नेवाङ्गे निखाते प्रवेशिते दृशौ येषां तेषु द्विनेत्रेषु विषये आख्यातुं तेभ्यः कथयितुं सर्व्वविशेषज्ञोऽपि किञ्चिन्न चोदयतीति भावः। गाथासुधायाः श्लोकास्तस्य श्लेषकलायाः श्लेषालङ्कारविद्यायाः विलासैरन्यलास्तत्सम्पर्केण षोड़शभागविलासैश्च आननमेव चन्द्रः तमलञ्चकार श्लिष्टार्थेन श्लोकेन चाकथयदित्यर्थः ॥१३३॥

तमेव श्लोकमाह स्मितेनेति। इयं भैमी स्मितेन गौरी गौरीसंज्ञा काचिद्देवाङ्गनासिता च गौरोऽरुणे सितपीत इति वैजयन्ती। दृशा दृक्शोभया हरिणी कुरङ्गी काचिद्देवाङ्गना च सुस्वरकण्ठभासा सुमधुरकण्ठ-

इति ब्रुवानः सविधे नलेन विलोकितः शङ्कितमानसेन ।
व्याकृत्य मर्त्योचितमर्थमुक्तो राखण्डलस्तस्य नुदोद शङ्काम् ॥१३५
स्वं नैषधादेशमहोविधाय कार्य्यस्य हेतोरपि नानलः सन् ।
किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः ॥१३६

ध्वनिसम्पत्त्या वीणावती वीणायुक्ताऽप्सरोविशेषश्च । हेम सुवर्णमप्सरोविशेषश्च अङ्गेषु शेषैरवशिष्टाङ्गैः कापि तन्वी उपमानार्हा स्त्री मे मतिं न च क्रामति बुद्धिं नारोहति तथा तन्वी मेनकाऽपि मतिं मर्त्योचितार्थद्वयमाश्रित्यावादीदित्यर्थः । अत्र एकस्या भैम्या गौरीत्यादि रूपणोल्लेखनादुल्लेखालङ्कारः । नानाधर्मबलादेकं यदि नानेव गृह्यते । नानारूपसमुल्लेखात् स उल्लेख इति स्मृत इति लक्षणात् । स च श्लेषप्रतिभोत्थापित इति सङ्करः । एतावतैव कविनापि श्लेषकलाविलासैरित्युक्तम् अस्य च गृहीतृभेदात् कारकभेदाच्चोत्थानादत्र स्थितानुकारकभेदादुत्थानमिति सङ्क्षेपः ॥१३४॥

इतीति । इति ब्रुवान आखण्डलः सविधे समीपे शङ्कितमानसेन मर्त्योपचितार्थोपन्यास चकितचित्तेन नलेन विलोकितः सन् उक्तेः स्मितेनेत्यादिना वाक्यस्य मर्त्योचितमर्थं गौरीत्यादिशब्दानां सितत्वादिरूपं व्याकृत्य व्याख्याय तस्य नलस्य शङ्कां नुनोद ॥ १३५ ॥

अत्र कविराह स्वमिति । स इन्द्रः स्वं स्वकीयं नैषधस्य नलस्यादेशन्दुक्तं दमयन्तीपरिवाक्यमेवाहोविधायावधीर्य्याहो इति पाठे नैषधादेशं दमयन्तीं प्रति नलप्रेषणं विधाय तद्वैफल्ये पुनः कार्य्यस्य हेतोर्दमयन्तीप्राप्तिकारणात् । षष्ठी हेतुप्रयोगे । नलो न भवतीत्यनलः नञ् समासः । अनलो न भवतीति नानलो नल इत्यर्थः । न समानः सोऽपि सन्नलरूपधारी च सन्नित्यर्थः । पुनः पश्चात्तादृक् तथाकृतं व्याकरणं रागपारवश्योक्तस्वान्वयाविवरणं येन सोऽपि सन् प्रलपन्नित्यर्थः । स्थानि प्रसक्तिमान्

इयमियमधिरथ्यं याति नेपथ्यमञ्जु
र्विशति विशति वेदीमुर्वशी सेयमुर्व्याः।
इति जनजनितैः सानन्दनादैर्विजज्ञे
नलहृदि परभैमीवर्णनाकर्णनाग्निः ॥ १२७ ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवीच यम्।

तद्वत् किं किमर्थं। दुष्टं पापिष्ठभावं परस्त्रीवाञ्छामधत्त अहो! महेन्द्रस्यापि दुर्व्यसनितेत्याश्चर्य्यं। अन्यच्च तादृक्कृतव्याकरणो महेन्द्रव्याकरणकर्त्तापि इन्द्रो नैषधादेशम्विधाय तद्रूपधारणेन तदादेशो भूत्वा न अल् अनलेन अनल् नानल् पूर्ववत्समासः। अलित्यर्थः तस्य कार्य्यार्थं किमिति दुष्टमनल्विधाविति निषेधादयं स्थानिवद्भावमधत्त अहो विरुद्धमित्यर्थः। अन्यच्च तादृक्कृतव्याकरणस्तथा कृतसंस्कारः स इत्ययं शब्दः स्वं स्वकीयमादेशं विधायेति खण्डविश्लेषः त्यदाद्यत्व प्राप्येत्यर्थः। नानलः कार्यस्य हेतोरल आश्रित हल् ज्यादिलक्षणस्थानिकार्य्यार्थं किमिति दुष्टमल्विधाविति प्रतिषेधादनुपपन्नं स्थानिवद्भावमधत्त अहो विरुद्धमित्यर्थः। अतोक्तस्य विरोधादत्र प्राथमिकार्थेनैव समाधानेन विरोधाभासोऽलङ्कारः स च श्लेषप्रतिभोत्थापित इति सङ्करः तृतीयार्थे नञ् इति विशेष्यस्यापि सिद्धं तत् व्यङ्ग्यन्तदपि वाच्यस्य विरोधाभासस्यैव साधकत्वाद्वाच्यसिध्यङ्गमित्यनुसन्धेयम् ॥ १२६ ॥

इयमियमिति। नेपथ्येन प्रसाधनेन मञ्जुर्मनोज्ञा उर्व्या उर्वशी-भूतलोर्वशी सेयं दमयन्तीयमिति पुरोनिर्देशः सम्भ्रमे द्विरुक्तिः। अधिरथ्यं रथ्यायां विभक्त्यर्थेऽव्ययीभावः। याति रथ्यायां गच्छतीत्यर्थः। वेदिं स्वयम्बरवेदिकां विशति इत्येवं जनै रालोकजनै र्जनितैः सानन्दनादैः सन्तोषघोषैः कर्तृभिः सा प्रस्तुता नलहृदि परेषां समीपस्थजनानां भैमो

तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महा
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१३८॥

वर्णनस्याकर्णनाप्तिः श्रवणसुखलाभो विजम्भे विहृतः मालिनीवृत्तम् ॥ ॥ १३७ ॥

श्रीहर्षमिति। तर्केष्वपीति। न केवलं कवितायामेवेत्यर्थः गतमन्यत् ॥ १३८ ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां दशमः सर्गः ॥ १० ॥

अथैकादशः सर्गः।

तां देवतामिव मुखेन्दुलसत्प्रसादां
अक्ष्णा रसादनिमिषेण निभालयन्तीम्।
लाभाय चेतसि धृतस्य वरस्य भीम-
भूमीन्द्रजा तदनु राजसभां बभाज ॥१॥
तन्निर्मलावयवभित्तिषु तद्विभूषा-
रत्नेषु च प्रतिफलन्निजदेहदम्भात्।

तामिति। तदनु तस्मादानन्दनाटोत्थानादनन्तरमित्यर्थः अनुशब्दस्य लक्षणार्थे कर्मप्रवचनीयत्वात् तद्योगे द्वितीया। भीमभूमीन्द्रजा भैमी-मुखेन्दुष् मुखेन्दौ च लसन् प्रसादः प्रसक्तिरनुग्रहश्च यस्याः तां प्रसादोऽनुग्रहे काव्यप्राणस्वास्थ्यप्रसक्तिष्विति विश्वः। रसाद्रागादनिमिषेण अक्ष्णा चक्षुषा निभालयन्तीं ईक्षमाणां दर्शनेक्षणनिध्याननिर्वर्णन निभालनमिति वैजयन्ती। भल मण्डन इति धातोश्चौरादिकात् कर्तरि ङीप्। यद्यपि प्रायेणायं धातुरात्मनेपदी यदाह भट्टमल्लः, निभालयत ईक्षत इति तथाप्यस्य भ्वादिष्वपि पाठादुभयत्र पठितादुभयपदी न इति मतमाश्रित्यायं परस्मैपदप्रयोग इति द्रष्टव्यं। तां राजसभां सभा राजामनुष्यपूर्वेत्यत्र पर्यायाणामेवेष्यत इति नियमात्सभाया अनपुंसकत्वं। देवतामिव चेतसि धृतस्य चिन्तितस्य वरस्य वोढुर्देवदेयार्थस्य च वरो ना रूपजामात्रो देवादेरीप्सिते वृतौ इति वैजयन्ती। लाभाय बभाज प्राप सिषेवे च अस्मिन् सर्गे वसन्ततिलकावृत्तं लक्षणमुक्तम् ॥१॥

तदिति। तैर्युवभिः सुतनौ दमयन्त्यां दृष्ट्या परं दृष्ट्यैव न ममज्जे न मग्नं भावे लिट्। हृदयेन केवलं हृदयेनैवापि न ममज्जे किन्तु निर्मलावयव-

दृश्या परं न हृदयेन न केवलं तैः
सर्वात्मनैव सुतनौ युवभिर्म्ममज्जे ॥ २ ॥
द्यामन्तरा वसुमतीमपि गाधिजन्मा
यद्यन्यमेव निरमास्यत नाकलोकम् ।
चारुः स यादृगभविष्यदमूद्विमानै-
स्तादृक् तदभ्रमवलोकितुमागतानाम् ॥ ३ ॥
कुर्वद्भिरात्मभवसौरभसम्प्रदानं
भूपालचक्रचलचामरमारुतौघम् ।
आलोकनाय दिवि सञ्चरतां सुराणां
तत्रार्च्चनाविधिरभूदधिवासधूपैः ॥ ४ ॥

भित्तिषु गण्डस्थलादिषु तस्या विभूषारत्नेषु च प्रतिफलतां निजानां देहानां दम्भात् तत्क्षणप्रतिफलितशरीरव्याजात् कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे इत्यमरः । सर्वात्मना सर्वाङ्गेनैव ममज्जे दृङ्मनो मज्जनमात्रवार्त्ता किन्तु प्रतिविम्बव्याजेन सर्वाङ्गमज्जनं जातमिति सापह्नवोत्प्रेक्षा ॥ २ ॥

द्यामिति । गाधेर्जन्म यस्य स गाधिजन्मा विश्वामित्रः अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः । द्यां वसुमतीमप्यन्तरा स्वर्गभूम्योरन्तराले अन्तरान्तरेण युक्त इति द्वितीया । अन्यमेव नाकलोकं स्वर्गान्तरं निरमास्यत यदि निर्मिमीते चेत् माङः क्रियातिपत्तौ लृङ् । स नाकलोको यादृक् चारुरभविष्यत् भवेत् पूर्ववल्लृङ् । तदभ्रमन्तरिक्षं कर्तृ स्वयम्वरमवलोकितुमागतानां विमानैस्तादृक् तथा चारु अभूत् अत्राभ्रस्यान्तराले नाकलोकासम्बन्धेऽपि सम्भावनया तत्सम्बन्धोक्तेरतिशयोक्तिभेदः अभूतोपमेति केचित् ॥ ३ ॥

कुर्वद्भिरिति । भूपालचक्रस्य राजलोकस्य चलानाञ्चलताञ्चामराणां मारुतस्यौघं प्रवाहमात्मभवसौरभस्य स्वजन्यगन्धस्य सम्प्रदानं सम्प्रदानकारकं कुर्वद्भिः स्वसौरभं तत्र सङ्क्रामयद्भिरित्यर्थः । अधिवासधूपै

तत्रावनीन्द्रचयचन्दनचन्द्रलेप-
नेपथ्यगन्धमयगन्धवहप्रवाहम्।
आलीभिरापतदनङ्गशरानुसारी
संरुध्य सौरभमगाहत भृङ्गवर्गः॥ ५॥

उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गी-
सर्व्वानुवादविधिबोधितसाधुमेधाः।
सौधस्रजः प्लुतपताकतयाभिनिन्यु-
र्मन्ये जनेषु निजताण्डवपण्डितत्वम्॥ ६॥

वासधूपैरालोकनाय स्वयम्वरदर्शनाय दिव्याकाशे सञ्चरतां सुराणां तत्र स्वयम्वरे अर्च्चनाविधिः पूजाकृत्यमभूत् अत्राधिवासधूपस्य सुरासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः॥ ४॥

तत्रेति। तत्र स्वयम्वरे आलीभिः श्रेणीभिः श्रेणीसम्बन्धात् आपतत आगच्छतोऽनङ्गशराननुसरतीति तदनुसारी तत्सदृशो भृङ्गवर्गः अवनीन्द्रचयस्य राजलोकस्य चन्दनं चन्द्रः कर्पूरश्च। अथ कर्पूरमस्त्रियाङ्घनसार चन्द्रसंज्ञ इत्यमरः। तयोर्लेपस्तमेव नेपथ्यमलङ्कारस्तस्य यो गन्धस्तन्मयस्य तत्प्रचुरस्य गन्धवहस्य वायोः प्रवाहं संरुध्य मध्ये मार्गमावृत्य सौरभमामोदमगाहत प्राविशत्॥ ५॥

उत्तुङ्गेति। उत्तुङ्गास्तारा ये मङ्गलमृदङ्गनिनादास्तद्भङ्गीनां तत्प्रकाराणां सर्व्वानुवादविधिना प्रतिध्वनिरूपेण तत्तत्प्रत्युच्चारणेन बोधिता निवेदिता साधुर्मेधा बुद्धिविशेषो यासान्तास्तथोक्ताः। धीर्धारणावती मेधेत्यमरः। परोक्तसर्व्वविशेषानुवादस्य मेधाकार्य्यत्वात् तस्य तल्लिङ्गत्वमिति भावः। सौधस्रजः प्रासादपङ्क्तयः प्लुतपताकतया चलत्पताकतया जनेषु विषये निजताण्डवपण्डितत्वं स्वस्य नाट्यकौशलं ताण्डवं नटनंनाट्यमित्यमरः। अभिनिन्युर्व्यञ्जयन्ति स्म मन्ये वाक्यार्थः कर्म। मृदङ्गप्रतिध्वानात्पताकाचलनाच्च वाक्यनुगुणं हस्ताभिनयञ्चक्रुरिवेत्युत्प्रेक्षा॥ ६॥

सम्भाषणं भगवती सहसा विधाय
वाग्देवता विनयबन्धुरकन्धरायाः ।
ऊचे चतुर्दशजगज्जनतानमस्या
तत्राश्रिता सदसि दक्षिणपक्षमस्याः ॥ ७ ॥
अभ्यागमन्मखभुजामिह कोटिरेषा
येषां पृथक्कथनमब्दशतातिपाति ।
अस्यां वृणीष्व मनसा परिभाव्य कञ्चि-
द्यं चित्तवृत्तिरनुधावति तावकीना ॥ ८ ॥
एषां त्वदीक्षणरसादनिमेषतैषा
स्वाभाविकानिमिषतामिलिता यथाभूत् ।

सम्भाषणमिति। चतुर्दशानां जगतां समाहारश्चतुर्दशजगत् तत्र जनतायाः जनसमूहानां नमस्या नमस्कार्या नमोवरिव इति क्यचि धातुसंज्ञाया मचो यत् क्यस्य विभाषेति क्यचो लोपः। भगवती वाग्देवता तत्र सदसि विनयेन बन्धुरकन्धराया नम्रग्रीवायाः बन्धुरौ नम्रविषमाविति वैजयन्ती। अस्या भैम्या दक्षिणपक्षं दक्षिणपार्श्वं श्रिता आस्थिता पूज्यत्वाद्दक्षिणपार्श्वस्थिता सती सहसा तत्कालोचितं सम्भाषणं विधाय आगच्छ वत्से! पश्येत्यादि वाक्यमुक्त्वा ऊचे ॥७॥

अभीति। हे वत्से! इह स्वयम्वरे येषां मखभुजां देवानां कोटिरनन्तसङ्ख्या अभ्यागमदभ्यागता येषां पृथक् प्रत्येकमेव कथनम् अब्दानां वत्सराणां शतान्यतिपतति अतिक्रामतीति तथोक्तं तावता कालेनापि वक्तुमशक्येत्यर्थः। अस्यां सुरकोट्यां मनसा परिभाव्यालोच्य कञ्चित् वृणीष्व यं सुरन्तवेयं तावकीना युष्मदस्मदोरन्यतरस्यां खञ् चेति खञ् तवकममकावेकवचन इति तवकादेशः। चित्तवृत्तिरनुधावति अनुयाति तं वृणीष्वेत्यर्थः॥ ८॥

एषामिति। एषां सुराणां त्वदीक्षणे रसाद्रागादनिमेषता निमेषराहित्यं यथा स्वाभाविक्यः स्त्रियाः पुंवदित्यादिना पुंवद्भावः। न

आस्ये तथैव तव नन्वधरोपभोगै
र्मुग्धे ! विधावमृतपानमपि द्विधास्तु ॥ ९ ॥

एषां गिरेः सकलरत्नफलस्तरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः ।
मुक्ताफलं फलनसान्वयनाम तन्व
न्नाभाति विन्दुभिरिव च्छुरितः पयोभिः ॥ १० ॥

वक्त्रेन्दुसन्निधिनिमीलिदलारविन्द-
द्वन्द्वभ्रमक्षममथाञ्जलिमात्ममौलौ ।

निमिषतीत्यनिमिषा इगुपधलक्षणः कः। तेषां भावस्तत्ता तया मिलिता सङ्गता सती द्विधा द्विगुणिताऽभूत् तथैव नन्वयि ! मुग्धे ! सुन्दरि ! विधौ चन्द्रे अमृतपानमपि तवास्ये आस्यचन्द्रे अधरोपभोगैरधरामृतपानैर्मिलितं सत् द्विधास्तु द्विगुणितमस्त्वित्यर्थः । अत्र निमिषत्वामृतपानयोर्द्वैविध्यासम्बन्धोक्तेरतिशयोक्तिः ॥९॥

एषामिति । सकलानि रत्नान्येव फलानि यस्य स सर्वरत्नसूतिरित्यर्थः । फलनं धारकस्येटसम्मादनं फलनिष्पत्ताविति धातो ल्युट् । तेन सान्वयमन्वर्थं नाम यस्य तन्मुक्ताफलं तन्वन्तता इङ् मुक्ताफलं व्याप्य इत्यर्थः । एषां सुराणां सम्बन्धी स प्रसिद्धस्तरुः कल्पवृक्षः प्राक् पुरा दुग्धा भूमिरेव सुरभिः गौ र्गोरूपधरा भूमि र्येन तदुक्तम्, प्रमाणं श्रूयते दुग्धा पुनर्दिव्यैर्वसुन्धरा । औषधीश्चैव भास्वन्ति रत्नानि विविधानि च । वत्सस्तु हिमवानासीत् दोग्धा मेरु र्महागिरिरिति ॥ तस्य गिरेर्मेरोः सम्बन्धि पयोभिः क्षीररूपैर्विन्दुभिश्छुरितो व्याप्तः पञ्चशाखः पाणिरिवाभातीत्युत्प्रेक्षा । पञ्चशाखः शयः पाणिरित्यमरः । दोग्धुः पाणिः दुग्धविन्दुभिर्दिग्धो भवति प्रसिद्धं सुरवरणेन मेरुस्ते हस्तगामी भवतीति भावः ॥१०॥

वक्त्रेन्द्विति । अथ वाणी वाक्यानन्तरं वक्त्रेन्दोः सन्निधिना सन्निधानेन निमिलीनि सङ्कुचन्ति दलानि ययोस्तयोररविन्दयो द्वन्द्वे भ्रम-

कृत्वापराधभयचञ्चलमीक्षमाणा
सान्यत्र गन्तुममरैः कृपयान्वमानि ॥ ११ ॥
तत्तद्विरागमुदितं शिबिकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्य्याः ।
आसन्ननायकविपन्नमुखानुमेय
भैमीविरक्तचरितानुमया नु जग्मुः ॥ १२ ॥
रक्षःस्वरक्षणमवेक्ष्य निजं निवृत्तौ
विद्याधरेष्वधरतां वपुषैव भैम्याः ।

क्षमं भ्रान्तिजननशक्तम् अञ्जलिमात्ममौलौ स्वमूर्ध्नि कृत्वा अपराधाद्वरणाद्धेतोर्यद्भयं सुरेभ्यस्तेन चञ्चलं यथा तथा ईक्षमाणा सा भैमी अमरैः कृपया अन्यत्र गन्तुमन्वमानि अनुमता प्रणिपातप्रसाद्याः खलु महान्त इति भावः। अत्राञ्जलौ वक्त्रेन्दुसन्निधिसङ्कुचितारविन्दयुगलभ्रान्तिवर्णनाद्रूपकानुप्राणितो भ्रान्तिमदलङ्कारः इति सङ्करः। कविसम्मत सादृश्याद्वस्त्वन्तरप्रतितिचिम्बनं भ्रान्तिमानिति लक्षणात् ॥११॥

तत्तदिति। शिबिकायाश्चतुरस्रया तस्या अधरस्था अधःस्थिता अतएव ते यानस्य धुर्य्या धूर्वहाः। शिवभागवत्समासोधुरो यड्ढकाविति यत्प्रत्ययः। उदितमुत्पन्नं तत्तद्विरागं तस्या भैम्यास्तेषु तेषु नायकेषु विषये विरागमपरागं मनागीषदपि साक्षात्प्रत्यक्षं न विदुः न विन्दति स्म विदोलटो वेति सेर्जुसादेशः लट् स्म इति भूते लट्। किं त्वासन्नानां पुरोवर्त्तिनां नायकानां विपन्नैरवसन्नैर्मुखैरनुमेयानां भैम्यां विरक्तचरितानाम् अपरक्तचेष्टितानामनुमयानुमानेन आतश्चोपसर्गे इत्यङ्। अनुजग्मुः अमासिषुः नायकमुखचेष्टया भैमीवैराग्यमनुमितवन्त इत्यर्थः ॥१२॥

रक्षःस्विति। यानं वाहनमस्तीति यानिनः शिबिकावाहिनः तेषां वर्गो रक्षःसु राक्षसेषु निजम् अरक्षणमवेक्ष्य दृष्ट्वा तेषां हिंस्रत्वान्नास्तीति निश्चित्येत्यर्थः। निवृत्तः विद्याधरेषु देवयोनिषु भैम्याः भैमीतः

गन्धर्वसंसदि नगन्धमपि स्वरस्य
तस्याविमृश्य विमुखोऽजनि यानिवर्गः ॥ १३ ॥

दीनेषु सत्स्वपि कृताफलवित्तरक्षै-
र्यक्षैरदर्शि न सुखं त्रपयैव तस्याम् ।
ते जानते स्म सुरशाखिपतिव्रतां किं
तां कल्पवीरुधमधिक्षिति नावतीर्णाम् ॥ १४ ॥

जन्यास्ततः फणभृतामधिपं सुवेषा
म्माञ्जिष्ठमञ्जिमविगाहिपदौष्ठलक्ष्मीम् ।

पञ्चमी विभक्त इति पञ्चमी । अधरतां निकृष्टत्वं विमृश्य निश्चित्य तथा गन्धर्वाणां संसदि संघे तस्याः स्वरस्य न गन्धमगन्धमपि लेशस्याप्यभावं नञर्थेन नशब्देन सुप्सुपेति समासः । गन्धो लेशे महीगुणे इति वैजयन्ती । विमृश्य विमुखोऽजनि जातः जनेः कर्त्तरि लुङ् दीपजनेत्यादिना कर्तरि चिणादेशः ॥१३॥

दीनेष्विति । दीनेषु दरिद्रेषु सत्सु विद्यमानेष्वपि कृता अफला निष्फला वित्तरक्षा धनगुप्तिर्यैस्तैः कृपणैर्यक्षैः त्रपयैव तस्यां भैम्यां विषये सुखं नादर्शि न दर्शितं दृशेर्ण्यन्तात्कर्मणि लुङ् । तथा हि ते यक्षास्तां दमयन्तीम् अधिक्षिति क्षितौ विभक्त्यर्थेऽव्ययीभावः । अवतीर्णामुत्पन्नां सुरशाखिपतिव्रतां कल्पवृक्षपत्नीं कल्पवीरुधं कल्पलतां न जानते स्म किं ? ज्ञातवन्त एव अस्या वदान्यतया तेषां युक्ता लज्जेति कारणात्कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः । ततः तेषां निधिगोपकानां कुतो वरणवार्त्ताऽपीति भावः ॥१४॥

जन्या इति । ततोऽनन्तरं जनीं वधूं वहन्तीति जन्याः वधूभृत्या जन्या भृत्या नवोढाया इति केशवः । संज्ञायां जन्या इति यत्प्रत्ययान्तो निपातः । मञ्जिष्ठाया रागद्रव्यविशेषस्येमं माञ्जिष्ठन्तस्य मञ्जिमानं रामणीयकं विगाहत इति तद्विगाहिनी पदौष्ठस्य पदयोरोष्ठयोश्च लक्ष्मीः शोभा

तां मानसं निखिलवारिझरान्नवीनाम् ।
हंसावलीमिव घनागमयाम्बभूवुः ॥ १५ ॥
यस्या विभोरखिलवाङ्मयविस्तरोऽय-
माख्यायते परिणतिर्मुनिभिः पुनः सा ।
उद्गत्वरामृतकरार्द्धपरार्द्धभालां
बालामभाषत सभासततप्रगल्भा ॥ १६ ॥
आश्लेषलग्नगिरिजाकुचकुङ्कुमेन
यः पट्टसूत्रपरिरम्भणशोणशोभः ।
यज्ञोपवीतपदवीं भजति स शम्भोः
सेवासु वासुकिरयं प्रसितः सितश्रीः ॥ १७ ॥

यस्या स्तां हंसावल्यामपि योज्यं। ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यं। तां भैमीं नवीनामेता हंसावलीं घना निखिलाद्वारिझरात् जलप्रवाहात्-मानसं मानसाख्यं सरइव सुरौघात् अपादानात्तं विहायेति ल्यब्लोपे पञ्चमी। फणभृतामधिपं वासुकिं गमयां बभूवुर्निन्युः ॥ १५ ॥

यस्या इति। अयमखिलवाङ्मयविस्तारः शब्दप्रपञ्चो मुनिभिर्व्यासादिभिर्विभोर्महाशक्तेर्यस्या देव्याः परिणतिः रूपान्तरं आख्यायते सभासु सततप्रगल्भा सा देवी उद्गत्वर सुदित्वरङ्गत्वरश्चेति करबन्तो निपातः। तस्यामृतकरस्येन्दोरर्द्धमिव परार्द्धमुत्कृष्टं भालं ललाटं यस्या स्तां बालां भैमीं पुनरभाषत ॥ १६ ॥

आश्लेषेति। यो वासुकिराश्लेषादालिङ्गनाल्लग्नेन सक्तेन गिरिजायाः पार्व्वत्याः कुचयोः कुङ्कुमेन पट्टसूत्रस्य परिरम्भणात्परिवेष्टनादिव शोणशोभोऽरुणकान्तिः सन् शम्भोर्यज्ञोपवीतस्य पदवीं पदं भजते सेवासु प्रसितस्तत्परः तत्परे प्रसितासक्तावित्यमरः। सितश्रीः शुभ्रकान्तिः स वासुकिरयमिति पुरोवर्तिनिर्देशः ॥ १७ ॥

पाणौ फणी भजति कङ्कणभूयमैशे
सोऽयं मनोहरमणीरमणीयमूर्तिः ।
कोटीरबन्धनधनुर्गुणयोगपट्ट-
व्यापारपारगममुं भज भूतभर्तुः ॥ १८ ॥
धृत्वैकया रसनयामृतमीश्वरेन्दो-
रप्यन्यया त्वदधरस्य रसं द्विजिह्वः ।
आस्वादयन् युगपदेष परं विशेषं
निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥ १९ ॥
आशीविषेण रदनच्छददंशदान-
मेतेन ते पुनरनर्थतया न गण्यम् ।

पाणाविति। उच्चैरुन्नतः फणी वासुकिः ऐशे ईशसम्बन्धिनि पाणौ मनोहरैर्मणिभी रमणीयमूर्त्तिः कङ्कणभूयं कङ्कणत्वं भुवोभावइति क्यप्। भजति भूतभर्तुः कोटीर बन्धनं कपर्दबन्धनं धनुषो गुणो मौर्वी योगपट्टश्च तेषां व्यापारस्य पारगं पारीणममुं वासुकिं भज वृणीष्व। अत्रैकस्य वासुके रनेकेषु कोटीरादिषु क्रमेण वृत्तेः पर्यायभेदः। अथानुभावविशेषाद्यौगपद्यसम्भवे तु समुच्चयः ॥ १८ ॥

धृत्वेति। एकया रसनया ईश्वरेन्दोर्हरशिरश्चन्द्रस्य अमृत मन्यया रसनया त्वदधरस्य रसमपि रसं च धृत्वा युगपदिवास्वादयन् एतदुभयस्य एतस्य रसद्वयस्य विशेषमन्तरं निर्णेतुं क्षमः समर्थः स्याद्यदि द्विजिह्वो रसनाद्वयवानेष परमेष एव क्षमो नान्यइत्यर्थः। ऐन्द्वामृतादेतदधरामृतमेव ज्याय इति भावः ॥ १९ ॥

आशीविषेणेति। आशीषि दंष्ट्रायां विषमस्येत्याशीविषः विषधरः पृषोदरादित्वात्साधुः। आशीरुरगदंष्ट्रायामित्यमरः। एतेन वासुकिना ते पुनः तव तु रदनच्छदस्य अधरस्य दंशदानं दंशकरण मनर्थतया न गण्य

बाधां विधातुमधरे हि न तावकीने
पीयूषसारघटिते घटतेऽस्य शक्तिः ॥ २० ॥
तद्विस्फुरत्फणाविलोकनभूतभीतेः
कम्पञ्च वीक्ष्य पुलकञ्च ततोऽनु तस्याः ।
सञ्जातसात्विकविकारधियः स्वभृत्यान्
नृत्यान्न्यषेधदुरगाधिपतिर्विलक्षः ॥ २१ ॥
तद्दर्शिभिः स्ववरणे फणिभिर्निराशै-
र्निःश्वस्य तत्किमपि सृष्टमनात्मनीनम् ।

अनर्थत्वेन न मन्तव्यं। कुतः हि यस्मात् पीयूषसारेण घटिते निर्मिते तावकीने त्वदीये अधरे बाधां पीड़ां विधातुं दंशेन अस्य शक्तिर्न घटते न सम्भवति अमृतघटितस्य कुतो विषभयमितिभावः ॥ २० ॥

तद्दिति। ततो वाणीवाक्यानन्तरं तस्य वासुकेः विस्फुरतां स्फारयतां फणानां विलोकनेन भूतभीतेः सञ्जातसाध्वसायास्तस्या दमयन्त्याः कम्पं वेपथुं पुलकञ्च वीक्ष्य सञ्जाता सात्विकविकारधीः शृङ्गारसात्विकभ्रमो येषां तान् स्वभृत्यान् विलक्षो भैमीभावज्ञानलज्जित उरगाधिपतिर्वासुकिर्नृत्यादानन्दनर्तनान्न्यषेधत् न्यवारयत् स्वस्वामिवैलक्ष्याद्भैमीवैराग्य प्रतीतेस्ते खिन्ना इत्यर्थः। अत्र भृत्यानां भैमीभयसात्विकेषु शृङ्गार भ्रान्त्या भ्रान्तिमदलङ्कारः। स्तम्भप्रलय रोमाञ्चाः स्वेदो वै वर्णवेपथू। अश्रुवैस्वर्यमित्यष्टौ सात्विकाः परिकीर्तिताः ॥ २१ ॥

तद्दिति। तद्दर्शिभिर्वासुकिवृत्तान्तसाक्षात्कारिभिः अत एव स्ववरणे निराशैः कैमुत्यपराहतै रित्यर्थः फणिभिरन्यैः कर्कोटकादिनागैर्निश्वस्य निश्वासं कृत्वा तन्निश्वसितरूपं किमप्यवाच्यमात्मने हितमात्मनीनम् आत्मविश्वजनभोगोत्तरपदात्खः। तद्विरुद्धमनात्मनीनं सृष्टम् आत्मनो महाननर्थहेतुराचरित इत्यर्थः। कुतः यद्यस्मान्निश्वासकारणात्तान् फणिनः प्रति यातुमनसोगन्तुकामानपि विमानं यहन्तीति

यत्तान् प्रयातुमनसोऽपि विमानवाहा
हाहा प्रतीपपवनाशकुनान्न जग्मुः ॥ २२ ॥

ह्रीसंकुचत्फणगणादुरगप्रधाना
त्तां राजसङ्क्रमनयन्त विमानवाहाः ।
सन्ध्यानमद्दलकुलात् कमलाद्विनीय
कह्लारमिन्दुकिरणा इव हासभासम् ॥ २३ ॥

देव्याभ्यधायि भव भीरु ! धृतावधाना
भूमीभुजस्त्यजत भीमभुवोनिरीक्षाम् ।
आलोकितामपि पुनः पिवतां दृशैता
मिच्छापिगच्छति न वत्सरकोटिभिर्व्वः ॥ २४ ॥

विमानवाहाः शिविकावाहिनः कर्मण्यण् । प्रतीपपवनः प्रतिकूलवायुस्तस्मादेव शकुनान्न जग्मुः दूरत एव परिजह्रुरित्यर्थः । अतएव हाहेति खेदे ॥२२॥

ह्रीति । विमानवाहाः शिविकावाहिनः तां दमयन्तीं ह्रिया संकुचन् फणगणो यस्य तस्मादुरगप्रधाना दुरगराजाद्वासुकेर्विनीयापनीय इन्दुकिरणाः हासभासं विकासलक्ष्मीं सन्ध्यायां नमद्दलकुलात्संकुचत्पत्रचयात्कमलाद्विनीय कह्लारं सौगन्धिकमिव राजसङ्क्रमनयन्त प्रापयन् ञित्वादात्मनेपदं नीवह्योर्हरतेश्चेति वचनाद्विकर्मकत्वम् ॥२३॥

देव्येति । देव्या वाग्देव्या अभ्यधायि अभिहितं किं तदाह । हे भीरु ! भयशीले ! भीरुशब्दादूङ् इत्यूङ् प्रत्यये सम्बुद्धौ नदीह्रस्वः । धृतमवधानं यया सा भव अवहिता शृण्वित्यर्थः । हे भूमिभुजो ! भूपा ! यूयञ्च भीमभुवो भैम्या निरीक्षामीक्षणं गुरोश्च हल इति स्त्रियामप्रत्ययः । त्यजत यतः आलोकितामीक्षितामप्येतां पुनर्दृशा पिवतामास्यया पश्यतां वो युष्माकं वत्सरकोटिभिरनन्ताब्दैरपि इच्छा दर्शनेच्छा नापगच्छति अतो मद्वाक्यमवहिताः शृणुतेत्यर्थः ॥२४॥

लोकेशकेशवशिवानपि यश्चकार
शृङ्गारसान्तरभृशान्तरशान्तभावान् ।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन
संक्षोभयन् वितनुतां वितनुर्मुदं वः ॥ २५ ॥
पुष्पेषुणा ध्रुवममूनिषुवर्षजल्प
हुङ्कारमन्त्रबलभस्मितशान्तिशक्तीन् ।
शृङ्गारसर्गरसिकद्व्यणुकोदरि ! त्वं
द्वीपाधिपान्नयनयोर्नय गोचरत्वम् ॥ २६ ॥

लोकेशेति। योऽनङ्गो लोकेशकेशवशिवान् ब्रह्मविष्णुमहेशानपि शृङ्गारेण शृङ्गाररसेन सान्तरः सावकाशो विरलो भृशोगाढ़ आन्तर आभ्यन्तरः शान्तभावः शान्तरसो येषां तान् रागजर्जरितवैराग्यांश्चकार पञ्चानां सङ्घः पञ्चकं सङ्ख्यायाः संज्ञा सङ्घसूत्राध्ययनेषु इति कन्प्रत्ययः। इषूणां पञ्चकेन जगतां पञ्चेन्द्रियाणि चक्षुरादीनि सङ्क्षोभयन् व्याकुलयन् स वितनुरनङ्गो वो युष्माकं मुदं वितनुतां विस्तारयतु विश्वविजयिनो भगवतः कामदेवस्य प्रसादः कस्य न श्लाघ्य इति भावः॥२५॥

पुष्पेषुणेति। रसोऽस्यास्तीति रसिकम् अत इनिठनाविति ठन् प्रत्ययः। द्वावणू कारणत्वेनास्यास्तीति द्व्यणुकम् अणुद्वयारब्धद्रव्यं शैषिकः कप्रत्ययः। शृङ्गारस्य सर्गे निर्माणे रसिकं प्रवृत्त यत् द्व्यणुकं तदेवोदरं यस्यास्तस्याः सम्बुद्धिः। द्व्यणुकादिप्रक्रमेण कार्य्यद्रव्यारम्भ इति तार्किकाः। शृङ्गारमयसर्व्वाङ्गीति भावः। त्वं पुष्पेषुणा ध्रुवं सत्यमिषुवर्षे बाणमोचकाले जल्पः उच्चारितो यो हुङ्कारः कोपप्रयुक्तः स एव मन्त्रस्तस्य बलेन सामर्थ्येन भस्मिता भस्मीकृता तत्करोतीति ण्यन्तात्कर्मणि क्तः। शान्तिशक्तिः इन्द्रियनिग्रहसामर्थ्यं येषां तानमून् द्वीपाधिपान् नयनयोर्गोचरत्वं दृष्टिविषयत्वं नय पश्येत्यर्थः॥२६॥

स्वादूदके जलनिधौ सवनेन सार्द्धं
भव्या भवन्तु तव वारिविहारलीलाः ।
द्वीपस्य तं पतिममुं भज पुष्करस्य
निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ! ॥ २७ ॥
सावर्त्तभावभवदद्भुतनाभिकूपे !
स्वर्भौममेतदुपवर्त्तनमात्मनैव ।
स्वाराज्यमर्जयसि न श्रियमेतदीया-
मेतद्गृहे परिगृहाण शचीविलासम् ॥ २८ ॥
देवः स्वयं वसति तत्र किल स्वयम्भू-
र्न्यग्रोधमण्डलतले हिमशीतले यः ।

स्वाद्विति । हे निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ! अनिद्रपद्मविजयसमर्थनेत्रे ! कमलायताक्षीत्यर्थः । ततः स्वादूदके जलनिधौ मधुरोदकसमुद्रे सवनेन सवनाख्येन राज्ञा सार्द्धं भव्याः मनोहराः वारिविहारलीलाः जलक्रीड़ाविनोदाः भवन्तु अतएव पुष्करस्य पुष्कराख्यस्य द्वीपस्य पतिं सवनम् अमुम्भज वृणीष्व ॥२७॥

सावर्त्तेति । रोम्णामम्भसाञ्च भ्रमः आवर्त्तः सावर्त्तभावेन सावर्त्तत्वेन भवन्नद्भुतो विस्मयो यस्मिन् स चिन्तीयमाणो नाभिरेव कूपो यस्याः सा तस्याः सम्बुद्धिः सवर्त्तेत्यादि कूपे सावर्त्तत्वं चित्रमिति भावः । एतस्य राज्ञः उपवर्त्तनं देशः नीवृज्जनपदौ देशविषयौ तूपवर्त्तनमित्यमरः । आत्मनैव भौमं भूमिभवं स्वः स्वर्गः एतदीयां श्रियं स्वाराज्यं स्वर्गराज्यं ढ्रोरिति रेफलोपे ढ्लोपे पूर्वस्य दीर्घोऽण इति दीर्घः । नार्जयसीति काकुः अर्जयस्येवेत्यर्थः । एतद्गृहे शचीविलासं शचीसौभाग्यं परिगृहाण स्वीकुरु एतद्भूरेव स्वर्गः एतद्राज्यमेव स्वाराज्यम् अयमेवेन्द्रस्त्वमेवेन्द्राणी भवेति रूपकालङ्कारः ॥२८॥

देव इति । तत्र पुष्करद्वीपे हिमवच्छीतले न्यग्रोधः वटवृक्षः न्यग्रोधो बहुपाद्वटः इत्यमरः । तस्य मण्डले मण्डलाकारे तले अध-

स त्वां विलोक्य निजशिल्पमनन्यकल्पं
सर्व्वेषु कारुषु करोतु करेण दर्पम् ॥ २९ ॥
न्यग्रोधनादिव दिवः पततातपादे-
र्न्यग्रोधमात्मभरधारमिवावरोहैः।
तं तस्य पाकिफलनीलदलद्युतिभ्यां
द्वीपस्य पश्य शिखिपत्रजमातपत्रम् ॥ ३० ॥

स्तत्रे यः स्वयम्भूः ब्रह्मदेवः स्वयं साक्षाद्वसति किल खलु ? स देव ईषद्समाप्तमन्यदन्यकल्पम् अन्यसदृशं तन्न भवतीत्यनन्यकल्पम् अनन्यसाधारणम् ईषदसमाप्तौ कल्पप्रत्ययः। निजशिल्पं स्वनिर्माणं त्वां विलोक्य सर्व्वेषु कारुषु शिल्पिषु मध्ये करेण करकौशलेन दर्पं करोतु अहङ्करोतु इत्यर्थः। स्रष्टुः कीर्त्तिकरं ते रूपशिल्पमिति भावः ॥२९॥

न्यग्रोधनादिति। दिवोऽन्तरीक्षात्पततः आपतत आतपादेः आदिशब्दात् वर्षादेश्च न्यग्भूय अधःस्थित्या रोधनान्निवारणादिव न्यग्रोधं न्यग्रोधशब्दवाच्य मित्युत्प्रेक्षेयम्। उत्तरत्रैवं वक्ष्यमाणातपत्रत्वोत्प्रेक्षोपयोगिनी वस्तुतस्तु न्यग्रोहतीति न्यग्रोधः पचाद्यच् हकारस्य धत्वनिपातनात्साधुः तथा अवरोहन्तीत्यवरोहाः अधोमुखाः शाखाः शाखाशिफावरोहः स्यादित्यमरः। तैरवष्टम्भैरात्मनो भारं शाखभारं धरतीति तद्भारमिव स्थितमित्युत्प्रेक्षा। धरतेः कर्म्मण्यण्प्रत्ययः। किञ्च पाक एषामस्तीति पाकिनां पक्वानां फलानां नीलदलानां नीलपत्राणाञ्च द्युतिभ्यां रक्तश्यामकान्तिभ्यां निमित्तेन तस्य द्वीपस्य पुष्करद्वीपस्य सम्बन्धि शिखिपत्रजं मयूरपिच्छोद्भवं तत्प्रसिद्धमातपत्रं तद्वत् स्थितमिति निमित्तगुणजातिस्वरूपोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या अस्याश्च प्रथमोत्प्रेक्षयाऽङ्गाङ्गिभावेन सजातीयसङ्करः। द्वितीयया सजातीयसंसृष्टिः। वटवृक्षमिति शेषः पश्य एतद्राजवरणादेवंविधोद्भुतदर्शनोत्सवलाभो भविष्यतीति भावः ॥३०॥

न श्वेततां चरतु वा भुवनेषु राज
हंसस्य न प्रियतमा कथमस्य कीर्त्तिः।
चित्रन्तु तद्विशदिमाद्वयमादधन्ती
क्षीरञ्च नाम्बु च मिथः पृथगातनोति ॥ २१ ॥

शूरेऽपि सूरिपरिषत्प्रथमार्चितेऽपि
शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि ।
तस्मिन्नवद्यमियमाप तदेव नाम
यत्कोमलं न किल तस्य नलेति नाम ॥२२॥

नेति। राजहंसस्य राजश्रेष्ठस्य कलहंसस्य च राजहंसो नृपश्रेष्ठे कादम्बकलहंसयोरिति विश्वः। अस्य सवनस्य प्रियतमा इष्टतमा तत्कान्ता वरटा च कीर्त्तिः कथं न श्वेततां न धवली भवतु श्वेतवर्ण इति द्युतादौ पठ्यते। तस्माल्लोट्। भुवनेषु लोकेषु सलिलेषु च भुवनं सलिलं लोक इति विश्वः। कथं वा न चरतु किन्तु विशदिमाद्वयश्चावल्याद्वैतम् आदधन्ती क्षीरं चाम्बु च मिथोऽन्योन्यं पृथग्विभक्तं नातनोतीति यत्तच्चित्रं हंसानां क्षीरनीरविवेकस्य जातिधर्म्मत्वात्तदभावो विरुद्ध इति भावः। स चाविवेको धावल्यगुणतो न स्वरूपत इति विरोधसमाधानाद्विरोधाभासोऽलङ्कारः। तथा विशदिमाद्वयमादधन्तीत्यनेन सामान्यालङ्कारः। सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता इति तस्य विशेषणगत्या क्षीरनीराविवेकहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गं पूर्व्वार्द्धे च श्वैत्यभुवनचारीत्वराजहंसप्रियतमात्वाख्यश्लिष्टौ श्लिष्टप्रस्तुत कीर्त्तिविशेषणसाम्यादप्रस्तुतराजहंसप्रतीतेः श्लेषसङ्कीर्णार्थसमासोक्तिरित्येतैस्त्रिभिः सहाङ्गाङ्गिभावेन पूर्व्वोक्तस्य विरोधाभासस्य सङ्करः ॥ २१ ॥

शूरेइति। इयं दमयन्ती शूरे सूरिपरिषत्सु विद्वत्सभासु प्रथमार्चिते प्रथमपूज्येऽपि शृङ्गारभङ्गिमधुरे शृङ्गारविलासकान्तेऽपि कलाकरे सकलविद्यानिदानेऽपि तस्मिन् सवनाख्ये राज्ञि कोमलं कर्णाह्लतं नलेति

भ्रूवल्लिकिञ्चननिकुञ्चित मिङ्गितं सा
लिङ्गं चकार तदनादरणस्य विज्ञा।
राज्ञोऽपि तस्य तदलाभजतापवह्नि
चिह्नीबभूव मलिनच्छविभूमधूमः॥ ३३॥
राजान्तराभिमुखमिन्दुमुखीमथैनां
जन्याजनाहृदयवेदितयैव निन्युः।
अन्या नपेक्षितविधौ न खलु प्रधान
वाचां भवत्यवसरः सति भव्यभृत्ये॥ ३४॥

नाम नामधेयं तस्य न किल नास्ति हीति यत् तन्नलनामराहित्यमेव अयदं दूषणम् आप नाम जय इ खल्वित्यर्थः। अनलत्वातिरिक्त मरुचिकारणं किञ्चिदपि नाभूमित्यर्थः॥ ३२॥

भ्रुवल्लीति। विशेषेण जानातीति विज्ञा अभिज्ञा इगुपधज्ञाप्रीकिरः कः। सा दमयन्ती भ्रूवल्ल्याः किञ्चन किञ्चिन्निकुञ्चितं किञ्चनेति किञ्चिदर्थेऽव्ययन्तस्य विशेषण समासः। तदेवेङ्गितं चेष्टितं तस्मिन् सवने अनादरणस्य लिङ्गञ्चकार भ्रूनिकोचने नैव तदनादरं सूचितवतीत्यर्थः। तस्य राज्ञोऽपि मलिनच्छविभूमा वैवर्ण्यभूयस्त्वं स एव धूमस्तस्याः दमयन्त्याः अलाभेन जात स्तज्जः तस्य तापवह्नेः सन्तापाग्नेश्चिह्नीबभूव अनुमापकं जातमित्यर्थः। अतएवानुमानालङ्कारः साध्यसाधननिर्देशोऽनुमानमिति लक्षणात् किंत्विह धूमाग्न्योरूपक शब्दलक्षयोरलङ्कारगर्भीकारे विच्छित्ति विशेषाश्रयणात्तर्कानुमानाद्भेदः॥२३॥

राजान्तरेति। अथ जन्या जनाः भृत्यजनाः जन्या व्याख्याता हृदयवेदितया चित्तज्ञतयैव प्रेरणां विनैवेत्यर्थः। इन्दुमुखी मेनां भैमीम् अन्योराजा राजान्तरं सुप्सुपेति समासः। तस्याभिमुखं यथा तथा निन्युः स्वामिप्रेरणं विना कथं निन्युरत आह अन्यानपेक्षितोऽनपेक्षितान्यः स्वाम्यादेशनिरपेक्षेण इत्यर्थः। बहुव्रीहौ सर्वनाम सङ्ख्ययोरुपसङ्ख्यानाद

ऊचे पुनर्भगवती नृपमन्यमस्यै
निर्द्दिश्य दृश्यतमतावमताश्विनेयम् ।
आलोक्यतामयमये ! कुलशीलशाली
शालीनतानतमुदस्य निजास्यबिम्बम् ॥ ३५ ॥
एतत्पुरःपठदपश्रमवन्दिवृन्द-
वाग्डम्बरैरनवकाशतराम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न मत्पदाना
मर्थोऽपि नार्थपुनरुक्तिषु पातुकानाम् ॥ ३६ ॥

न्यशब्दस्य पूर्वं निपातः । स विधिः कार्य्यस्य तस्मिन् स्वतः समर्थे भव्ये अकपटे भृत्ये कर्म्मकरे सति प्रधानवाचां स्वाम्यादेशानामवसरो न भवति नास्ति खल्वित्यर्थान्तरन्यासः ॥ ३४ ॥

ऊच इति । भगवती भारती पुनः भूयः दृश्यतमतया दर्शनीयतमत्वेन सौन्दर्यातिशयेन अवमताववधीरितौ अश्विनेयौ येन तमन्यं नृपमस्यै भैम्यै निर्दिश्य हस्तेन प्रदर्श्य अये ! भैमि! कुलेन शीलेन सद्वृत्तेन च शालत इति तच्छाली अयं नृपः शालीनतया अधार्ष्ट्येन तन्निजास्य बिम्बमुदस्यान्नमय्य आलोक्यता मित्यूचे उक्तवती ब्रूतेः कर्त्तरि लिटितङ् । स शालाप्रवेश मर्हति लज्जयेत्यर्थः । शालीनकौपीने अधृष्टाकार्ययोरिति खप्रत्ययान्तो निपातः ॥ ३५ ॥

एतदिति । एतस्य पुरोऽग्रे पठतामपश्रमवन्दिनां वृन्दस्य वाग्डम्बरै वागाटोपैरनवकाशतरे अत्यन्त निरवकाशे अस्मिन्नम्बरे अन्तरिक्षे मत्पदानां महावाक्यानां पदं शब्दे च वाक्ये चेति विश्वः । उत्पत्तुमेव पदमवकाशो नास्तीत्यतिशयोक्तिः । आकाशगुणः शब्द इति तार्किकाः । कथञ्चिदुत्पत्तौ अपि अर्थपुनरुक्तिषु पातुकानां पततां वन्दिवाक्यैः पुनरुक्तार्थाना मित्यर्थः । लषपतेत्यादिना उकञ्प्रत्ययः । मत्पदानामर्थः प्रयोजन मेव नास्ति गतार्थत्वादिति भावः ॥३६॥

नन्वत्र हव्य इति विश्रुतनाम्नि शाक-
द्वीपप्रशासिनि सुधीषु सुधीभवन्त्याः ।
एतद्भुजाविरुदवन्दिजयानयापि
किं रागि राजनि गिराजनि नान्तरन्ते ॥ ३७ ॥
शाकः शुकच्छदसमच्छविपत्रमाल-
हारी हरिष्यति तरुस्तव तत्र चित्तम् ।
यत्पल्लवौघपरिरम्भविजृम्भितेन
ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥ ३८ ॥

नन्विति । ननु भैमि ! अत्रास्मिन् हव्य इति विश्रुतनाम्नि प्रख्यातनामधेये शाकद्वीपं प्रशास्तीति तत्प्रशासिनि तत्स्वामिनि राजनि विषये सुधीषु विद्वत्सु सुधीभवन्त्या विदुषीभवन्त्यास्ते तवान्तर मन्तरङ्गम् अनया श्रूयमाणया एतस्य भुजाविरुदवन्दिभ्यो वाहुप्रशस्तिस्तोतृभ्यः जाता तज्जातया गिरापि रागि रागवत् नाजनि नाजनिष्ट किमिति प्रश्नः जनेः कर्त्तरि लुङि दीपजनेत्यादिना विकल्पाच्चिण्प्रत्ययः चिणो । लुगिति तस्य लुक् ॥ ३७ ॥

शाक इति । तत्र शाकद्वीपे शुकच्छदसमच्छवीनां कीरपक्षसदृशच्छवीनां पत्राणां मालां पङ्क्तिं हरतीति तन्मालहारि इष्टकेषीकामालानां चिततूलमालहारिष्विति ह्रस्वः । शाकस्तरुः शाकद्रुः शाकवर्बरवन्दका इत्यमरः । तव चित्तं हरिष्यति हरितो दिशो यस्य शाकतरोः पल्लवौघानां राशीनां परिरम्भविजृम्भणेन व्याप्तिमहिम्ना हरितः हरिद्वर्णाः हरितो मृगे ना कनके क्लीबं दिशि स्त्री हरिते त्रिषु इति । जगत्सु ख्याताः हरित इति ख्याताः स्फुरन्ति प्रथन्ते दिक्षु हरिच्छब्दप्रवृत्तेर्हरितवर्णनिमित्तायाः शाकतरुपल्लवच्छायाङ्कुरणनिमित्तत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेस्तद्रूपातिशयोक्तिः तया च तस्य तरोस्तारो व्यज्यत इत्यलङ्कारेण वस्तु ध्वनिः ॥ ३८ ॥

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा
यन्मारुतः कमपि सम्मदमाददाति ।
कौतूहलं तदनुभूय विधेहि भूयः
श्रद्धां पराशरपुराणकथान्तरेऽपि ॥ ३९ ॥
क्षीरार्णवस्तव कटाक्षरुचिच्छटाना
मध्येतु तत्र विकटायितमायताक्षि ! ।
वेलावनी वनततिप्रतिबिम्बचुम्बी
किर्म्मीरितोर्म्मिचयचारिमचापलाभ्याम् ॥ ४० ॥

स्पर्शेनेति । तत्र द्वीपे किल तस्य तरोः पत्रेभ्यो जन्म यस्य तज्जन्मा मारुतः स्पर्शेन स्पर्शमात्रेण कमप्यनाख्यं संमदमानन्दमाददातीति यत् तदानन्ददानरूपं कौतूहलं विनोदं कौतूहलं विनोदः स्यात् कुतुकञ्च कुतूहल मित्यमरः । भूयः पुनरपि पराशरपुराणे विष्णुपुराणे यत्कथान्तर मन्या कथा तत्र श्रद्धां विधेहि विश्वासं कुरु तत्रैव सकलभूगोलवृत्तान्त कथनादेकदेशसंवादेन तदुक्तकथान्तराणामपि विश्वसनीयत्वादिति भावः । अत्र विष्णुपुराणवाक्यं शाक स्तत्र महावृक्षः सिद्धगन्धर्वसेवितः । यत् पत्रवातसंस्पर्शादाह्लादो जायते पर इति ॥ ३९ ॥

क्षीरेति । हे आयताक्षि ! तत्र शाकद्वीपे क्षीरार्णवस्तव कटाक्षरुचिच्छटानां कटाक्षकान्तिजालानां वृन्दं जालं चक्रवालं जालकं पेटकं छटा इति वैजयन्ती । विकटायितं विकटभावं विलसित मित्यर्थः विकटशब्दाल्लोहितादिक्यङन्ताद्भावे क्तः लोहितादिराकृतिगणः । वेलावनी कूलरेखा वेला कूलेऽपि वारिधेरिति शाश्वतः । तत्र या वनततिर्वनपङ्क्तिस्तस्याः प्रतिबिम्बं चुम्बति स्पृशतीति तच्चुम्बी तद्भाक् अतएव किर्मीरितः कर्बुरितः चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरेत्यमरः । तस्योर्मिचयस्य तरङ्गपङ्क्तेः चारिमा चारुता पृथ्वादित्वादिमनिचि टेरिति लोपः । चापलं

बालातपैः कृततकगौरिकतां कृता द्वि
स्तत्रोदयाचलशिलाः परिशीलयन्तु ।
त्वद्विभ्रमभ्रमणजश्रमवारिधारि
पादाङ्गुलीगलितया नखलाक्षयापि ॥ ४१ ॥
नृणां करम्बितमुदामुदयन्मृगाङ्क-
शङ्कां सृजत्वनघजङ्घि ! परिभ्रमन्त्याः ।
तत्रोदयाद्रिशिखरे तव दृश्यमास्यं
काश्मीर सम्भवसमारचनाभिरामम् ॥ ४२ ॥

चाञ्चल्यं युवादित्वादण्प्रत्ययः। ताभ्यां स्मारकाभ्याम् अध्येतु स्मरतु इक् स्मरणे इत्यस्माल्लोटि शेषत्वविवक्षाया मधिगर्थेत्यादिना षष्ठी विधानात्तद भावे कर्मणि द्वितीया। अत्र किर्मीरितोर्मिचयस्य सितासितत्वसादृश्यात् तद्विलासस्य कटाक्ष विलसितस्मारकत्वात्तया स्मरणालङ्कारः ॥ ४० ॥

बालातपैरिति। तत्र शाकद्वीपे उदयाचलशिलाः बालातपैः तदा तव विभ्रम भ्रमणे न लीलाविहारेण जातं तज्जं श्रमवारि स्वेदाम्बु तद्धारिणीभ्यः पादाङ्गुलिभ्यः गलितया स्रुतया नखलाक्षया द्विर्द्विवारं कृतां द्विगुणीकृतामित्यर्थः। क्रियाभ्यावृत्तिगणने द्वित्रिचतुर्भ्यः सुच् कृतकानि कृत्रिमाणि यानि गैरिकाणि धातु विशेषः तत्तां परिशीलयन्तु अनुभवन्तु तथाभूताः सन्तु ॥४१॥

नृणामिति। हे अनघजङ्घि ! नासिकोदरेत्यादि विकल्पेन ङीप् प्रत्ययः। तत्र द्वीपे उदयाद्रिशिखरे परिभ्रमन्त्याः विहरन्त्यास्तव काश्मीरसम्भवसमारचनेन कुङ्कुमानुलेपनेन अभिराममतएव दृश्यं दर्शनीयं ऋदुपधाच्च कृट्तेरिति क्यप् तवास्यं कर्तृ करम्बितमुदां सम्मिलितानन्दानां नृणां पुंसां नृचेति विकल्पातृदीर्घः। उदयन्मृगाङ्क शङ्कामुदीयमान चन्द्र सन्देहं भ्रान्तिं वा सृजतु करोतु अलङ्कारोऽपि सन्देह भ्रान्तिमतोरन्यतरोऽस्तु ॥४२॥

एतेन ते विरहपावकमेत्य तावत्
कामं स्वनाम कलितान्वयमन्वभावि।
अङ्गीकरोषि यदि तत्तव नन्दनाद्यै
र्लब्धान्वयं स्वमपि नन्वयमातनोतु ॥ ४२ ॥
लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि
वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि।
सामुत्र दूषणमजीगणदेकमेव
नार्थी बभूव मघवा यदमुष्य देवः॥ ४३ ॥

एतेनेति। ननु भैमि! एतेन हव्याख्येन राज्ञा ते तव विरहपावकमेत्य वियोगाग्निं प्राप्य स्वं स्वकीयं नाम हव्यसंज्ञा कामं प्रकामं कलितान्वयं गृहीतसम्बन्धं सदन्वभावि अनुभूतम्। अग्नौ हुतत्व हव्यसंज्ञा सार्थाऽजनीत्यर्थः। इत्यमनुरक्तं तं नृपमङ्गीकरोषि यदि तदायं नृपः स्वमात्मानमपि तव नन्दनाद्यैस्त्वय्युत्पादितपुत्रपौत्रादिभिर्लब्धान्वयं लब्धवंशप्रतिष्ठमातनोतु धर्म्मप्रजासम्पत्त्यर्थत्वाद्दारपरिग्रहस्येति भावः ॥४३॥

लक्ष्मीलतेति। लक्ष्मीरेव लता तस्याः समवलम्बः आधारभूतः भुज एव द्रुमो यस्य तस्मिन्नपि भुजार्जितसम्पद्यपीत्यर्थः। तथा वाग्देवतायाः सरस्वत्या आयतनं स्थानं मञ्जु मनोज्ञ मुखाम्बुजं यस्य तस्मिन्नपि लक्ष्मीसरस्वत्योरेकाधिकरणेऽपीत्यर्थः। अमुत्र अमुष्मिन् हव्ये राज्ञि सा भैमी एकमेव दूषणमजीगणद्गणयामास गणेर्णौ चङ् ईच् गण इत्यभ्यासस्येकारः। किं दूषणं तदाह अमुष्य हव्यस्य देवो मघवा महेन्द्रोऽपि अर्थी याचिता न बभूवेति यत् नलस्य तु सोऽपि, यद्दूत्यं ययाचे तत्कथमनलमेनं वृणीतेति भावः ॥४४।

लक्ष्मीविलासवसतेः सुमनःसु मुख्या
दस्माद्विकृष्य भुवि लब्धगुणप्रसिद्धिम्।
स्थानान्तरं तदनु निन्युरिमां विमान-
वाहाः पुनः सुरभितामिव गन्धवाहाः ॥ ४५ ॥

भूयस्ततोनिखिलवाङ्मयदेवता सा
हैमोपमेयतनुभासमभाषतैनां।
एनं स्वबाहुबहुवारनिवारितारिम्
चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति! ॥ ४६ ॥

द्वीपस्य पश्य दयितं द्युतिमन्तमेतम्
क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण।

लक्ष्मीविलासेति। तदनु तत्परिहारानन्तरं विमानवाहाः भुवि लोके लब्धा गुणेन सौन्दर्यादिना अन्यत्र घ्राणतर्पणेन च प्रसिद्धिर्यया तां इमां तां दमयन्तीं गन्धवाहा वायवः सुरभितां सौरभसम्पदमिव लक्ष्म्याः सम्पदः अन्यत्र पद्मायाः विलासवसते लीलागृहात् सुमनःसु विद्वत्सु अन्यत्र पुष्पेषु मुख्यादस्मान्नृपात्पद्माच्च विकृष्यापनीय पुनः स्थानान्तरं राजान्तरम् अन्यत्र पुष्पान्तरं निन्युः ॥ ४५ ॥

भूय इति। ततोऽनन्तरं भूयः पुनरपि निखिलवाङ्मयदेवता-सकलवागधिदेवता सा सरस्वती हेम्ना उपमेया तनुभाः शरीरभा यस्याः ताम् एनां दमयन्तीमभाषत हे कुरुविन्दसकान्तिदन्ति! पद्मरागसदृशदशने! नासिकोदरेत्यादिना विकल्पादीकारः। कुरुविन्दः पद्मराग इति विश्वः। सकान्तीत्यत्र समानस्य सभावश्चिन्त्यः। स्वबाहुना बहुवारं निवारितारिं निर्जितशत्रुमेनं राजानं चित्ते कुरुष्व अनुमन्यस्वेत्यर्थः ॥ ४६ ॥

द्वीपस्येति। द्युतिमन्तं नाम एतं क्रौञ्चस्य द्वीपस्य दयितम् अधिपतिं चञ्चलस्य दृगञ्चलस्य कटाक्षस्य विभ्रमेण विलासेन पश्य, यन्मण्ड

यन्मण्डले स किल मण्डलसन्निवेशः
पूरस्तकास्ति दधिमण्डपयःपयोधेः ॥ ४७ ॥
तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची
क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान्।
हंसावलीकलकलप्रतिनादवाग्भिः
स्कन्देषुवृन्दविवरैर्विवरीतुकामः ॥ ४८ ॥
वैदर्भि! दर्भदलपूजनयापि यस्य
गर्भे जनः पुनरुदेति न जातु मातुः।
तस्यार्चनां रचय तत्र मृगाङ्कमौले
स्तन्मात्रदैवतजनाभिजनः स देशः ॥ ४९ ॥

यद्देशे स प्रसिद्धो मण्डलसन्निवेशो वर्त्तुलसंस्थानः पाण्डुः पाण्डुवर्णः दध्नो मण्डं मस्तु मण्डं दधिभवं मस्त्वित्यमरः। तस्य पयोधेः समुद्रस्य पूरो राशिस्तकास्ति किलेत्यैतिह्ये ॥४७॥

तत्रेति। तत्र क्रौञ्चद्वीपे भवत्याः अङ्घ्रिविहारयाची त्वदर्थी क्रौञ्चो नामाद्रिरस्ति योऽद्रिः हंसावलीकलकलानां प्रतिनादा एव वाचो वचनानि येषां तैः स्कन्दस्य कुमारस्येषुवृन्दानां विवरैस्तैरेव मुखैरित्यर्थः। त्वदीयान् गुणान्विवरीतुकामो व्याख्यातुकाम इव स्फुरिष्यति प्रकाशिष्यते स्फुरतेः कुटादित्वाद्गुणाभावः ॥४८॥

वैदर्भीति। हे वैदर्भि! यस्य दर्भदलैः कुशपत्रैः पूजनयापि किमुत कमलदलादि पूजनयेति भावः। जनो जन्तुर्जातु कदापि पुनर्मातृगर्भे नोदेति न जायते तत्पूजनस्य मुक्तिरेव फलमित्यर्थः। तत्तस्य मृगाङ्कमौलेरीश्वरस्य अर्चनां रचय पूजां कुरु तथाहि स देशः तन्मात्रं स एवैको दैवतं येषां तेषां जनानाम् अभिजायते अस्मिन्नित्यभिजनो जन्मभूमिरित्यर्थान्तरन्यासः। ख्यातः कुलेऽप्यभिजनो जन्मभूम्यां कुलध्वज

चूडाग्रचुम्बिमिहिरोदयशैलशील-
स्तेनाः स्तनन्धयसुधाकरशेखरस्य ।
तस्मिन् सुवर्णरसरूपणरम्यहर्म्य-
भूभृद्घटा वटय हेमघटावतंसाः ॥५०॥

तस्मिन्मलिम्लुच इव स्मरकेलिजन्म-
घर्मोदविन्दुमयमौक्तिकमण्डनं ते ।
जालैर्मिलन्दधिमहोदधिपूरलोल-
कल्लोलचामरमरुत्तरुणि ! च्छिनत्तु ॥ ५१ ॥

इति विश्वः । तत्रत्याः सर्वे तद्देकशरणास्तत्सेवयोत्पन्नतत्त्वज्ञानान्मुञ्चन्तीति भावः ॥ ४९ ॥

चूडाग्रेति । तस्मिन् देशे स्तनन्धयतीति स्तनन्धयः नासिका स्तनयोर्ध्माधेटोरिति खच् प्रत्यये मुमागमः । स्तनन्धयसुधाकरशेखरस्य बालेन्दुशेखरस्य शम्भोः चूडाग्रचुम्बिमिहिरस्य शिखराग्रलग्नसूर्यस्य उदयशैलस्य उदयाद्रेः शीलं संस्थानं तस्य स्तेनास्तादृशोरित्यर्थः । हेमघटावतंसा उपरिस्थापितकनककलशा इत्यर्थः । सुवर्णरसरूपणेन हेमद्रवस्फुरणेन रम्याणि हर्म्याण्येव भूभृतः पर्वतास्तेषां घटाः पङ्क्तीर्घटय निर्मापय कनककलशे स्थितानेक सौवर्णप्रासादनिर्म्माणेन तं भगवन्तमिन्दुशेखरं भजेत्यर्थः ॥ ५० ॥

तस्मिन्निति । हे तरुणि ! तस्मिन् द्वीपे दधिमहोदधेः पूरे लोलाः कल्लोला एव चामराणि तेषां मरुत् मलिम्लुचश्चोर इव पाटच्चरमलिम्लुचावित्यमरः । जालैर्गवाक्षरन्ध्रैर्मिलन्नन्तश्चरन् स्मरकेल्या जन्म यस्य तद्घर्मोदविन्दुमयं स्वेदोत्करविन्दुरूपं मन्थौदनेत्यादिना उदकस्य विकल्पादुदादेशः । मौक्तिकमण्डनं मुक्ताभरणं स्वार्थे ठक् मौक्तिकमिति विनयादि पाठादिति वामनः । छिनत्तु छित्वा हरतु चौरा हि केनचिच्छिद्रेण प्रविश्य हारादिकं छित्वादाय पलायन्ते ॥ ५१ ॥

एतद्यशो नवनवं खलु हंसवेशं
वेशन्तसन्तरणदूरगमक्रमेण ।
अभ्यासमर्जयति सन्तरितुं समुद्रान्
गन्तुञ्च निःश्रममितः सकलान् दिगन्तान् ॥ ५२ ॥
तस्मिन् गुणैरपि भृते गणनादरिद्रै-
स्तन्वी न सा हृदयबन्धमवाप भूपे ।
दैवे निरुन्धति निबन्धनतां वहन्ति
हन्त प्रयासपरुषाणि न पौरुषाणि ॥ ५३ ॥
ते निन्यिरे नृपतिमन्यमिमाममुष्मा-
दंसावतंसशिविकांशभृतः पुमांसः ।

एतदिति। नवनवं प्रकारे गुणवचनस्येति द्विर्भावः। हंसस्येव वेशः सर्व्वत्र प्रवेशव्यापारो यस्य तत् एतस्य राज्ञो यशः वेशन्तसन्तरणं पल्वलतरणं वेशन्तः पल्वलञ्चाल्पसर इत्यमरः। दूरगमो दूरगमनं ग्रहवृदृनिश्चिगमश्चेति अप्प्रत्ययः। तयोः क्रमेण रीत्या हंसवदेव इतोऽस्माद्देशात् निःश्रमं यथा तथा समुद्रान् सन्तरितुं सकलान् दिगन्तान् गन्तुं चाभ्यासमर्जयति खलु? जिज्ञासायां खलुशब्दः तेन पुनः पुनरेवमभ्यस्यति किम् अन्यथा कथमस्य सकललोकलङ्घित्वमित्युत्प्रेक्षा लभ्यते॥५२॥

तस्मिन्निति। तन्वी कृशाङ्गी वोतो गुणवचनादिति विकल्पात् ङीप्। भैमी गणनादरिद्रैः सङ्ख्याशून्यैरसङ्ख्यैर्गुणैर्भृते पूर्णे तस्मिन् द्युतिमदाख्ये राज्ञि हृदयस्य वन्धं मनःसङ्गं नावाप तथाहि दैवे दिष्टे निरुन्धति प्रतिवध्नति सति प्रयासेन दुःखवाहुल्येन परुषाणि दुष्कराणि पौरुषाणि पुरुषकाराः युवादित्वादण्प्रत्ययः। निवन्धनतां कार्य्यहेतुत्वं न वहन्ति इत्यर्थान्तरन्यासः हन्तेति खेदे ॥ ५३ ॥

त इति। ते प्रकृताः अंसावतंसस्य भुजशिरोभूषणस्य शिविकाया अंशभृतः एकदेशधारिणः पुमांसो लेखानुजीविपुरुषाः देवानुचराः

रत्नाकरादिव तुषारमयूखलेखाम्
लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम् ॥ ५४ ॥
एकैकमुन्नतगुणं धुतदूषणञ्च
हित्वान्यमन्यमुपगत्य परित्यजन्तीम्।
एतां जगाद जगदर्च्चितपादपद्मा
पद्मामिवाच्युतभुजान्तरविच्युतांसाम् ॥ ५५ ॥
ईशः कुशेशयसनाभिशये! कुशेन
द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते।
ज्योतिष्मता सममनेन वनीघनासु
तत्त्वं विनोदय घृतोदतटीषु चेतः ॥ ५६ ॥

लेखा अदितिनन्दना इत्यमरः। तुषारमयूखरेखां चन्द्ररेखां रत्नाकराद्रत्नाकरं विहाय गिरिशोत्तमाङ्गं शिवशिर इव अमुष्मादमुं नृपं विहायेतरम् अन्यं नृपं निन्यिरे प्रापयामासुः ङित्वादात्मनेपदम् ॥ ५४ ॥

एकैकमिति। जगद्भिरर्च्चितपादपद्मा जगद्वन्द्या सरस्वती उन्नतगुणं गुणाढ्यं धुतदूषणं निर्दोषञ्च एकैकमेकमेकं नृपं वीप्सायां द्विर्भावः। एकं बहुव्रीहिवदिति बहुव्रीहिवद्भावात् सुपो लुक्। हित्वा अन्यमन्यं नृपतिं पूर्ववद्द्विर्भावः। उपगम्य परित्यजन्तीं तमपि परिहरन्तीम् अच्युतस्य विष्णोर्भुजान्तरालाद्विच्युतांसां पद्मां सचाञ्चल्यामिव स्थितामित्युत्प्रेक्षा एतां भैमीं जगाद ॥ ५५ ॥

ईश इति। हे कुशेशयसनाभिशये! कमलसदृशकरे! पञ्चशाखः शयः पाणिरित्यमरः। कुशेन दर्भस्तम्बेन लाञ्छिततनोश्चिह्नितस्वरूपस्य द्वीपस्य कुशद्वीपस्य ईशःस्वामी ते तव वाञ्छितः इष्टो यदि तर्हि त्वं ज्योतिष्मता ज्योतिष्मन्नामकेनानेन कुशद्वीपेश्वरेण समं सह वनीभिर्घनासु वनसान्द्रासु घृतमुदकं यस्य सः घृतोदो घृतसमुद्रः उदकस्योदः संज्ञायामित्युदादेशः। तस्य तटीषु तीरेषु चेतश्चित्तं विनोदय विनोदं कारय विपूर्व्वाण्ण्यन्ताद्विनोदशब्दात्तत्करोतीति ण्यन्ताल्लोटि सिप् ॥ ५६ ॥

वातोर्मिलोलनचलद्दलमण्डलाग्र-
भिन्नाभ्रमण्डलगलज्जलजातसेकः ।
स्तम्बः कुशस्य भविताम्बरचुम्बिचूड़
श्चित्राय तत्र तव नेत्रनिपीयमानः ॥ ५७ ॥

पाथोधिमन्थसमयोत्थितसिन्धुपुत्री-
पत्पङ्कजार्पणपवित्रशिलासु तत्र ।
पत्या सहावह विहारमयैर्विलासै
रानन्दमिन्दुमुखि ! मन्दरकन्दरासु ॥ ५८ ॥

आरोहणाय तव सज्ज इवास्ति तत्र
सोपानशोभिवपुरश्मवलिच्छटाभिः ।

वातेति । तत्र कुशद्वीपे अम्बरचुम्बिनी चूड़ा यस्य सोऽभ्रंकषाग्र इत्यर्थः । अतएव वातस्य वायोरूर्म्मिणा तरङ्गभङ्ग्या लोलनेन कम्पनेन चलद्भिर्दलैः पत्रैरेव मण्डलाग्रैः खड्गैर्भिन्नाद्भ्रमण्डलान्मेघमण्डलाद्गलद्भिः स्रवद्भिर्जलैः जातः सेको यस्य स कुशस्य स्तम्बो दर्भगुल्मः । अप्रकाण्डे स्तम्बगुल्मावित्यमरः । नेत्राभ्यां निपीयमानः आदराद्दृश्यमानः सन् तव चित्राय विस्मयाय भविता भविष्यति ॥ ५७ ॥

पाथोधीति । हे इन्दुमुखि ! तत्र कुशद्वीपे पाथोधिमन्थस्याब्धिमथनस्य समये उत्थितायास्तादृग्भूतायाः सिन्धुपुत्र्याः लक्ष्म्याः यत्पङ्कजयोश्चरणकमलयोः पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः । अर्पणेन पवित्राः शिला यासु तासु मन्दरकन्दरासु पत्या भर्त्रा सह विहारमयैर्विहाररूपैर्विलासैर्विनोदैरानन्दमावह सम्पादयस्व ॥ ५८ ॥

आरोहणायेति । कनककेतकं स्वर्णकेतकदलं गोत्रमभिजनो यस्य तत् तस्य गोत्रं सन्ततिर्वा गात्रं यस्यास्तस्याः सम्बुद्धिस्तद्गात्रि ! तद्वद्गात्रीत्यर्थः । अङ्ग गात्र कण्ठेभ्य इत्यादिना ङीप् । तत्र कुशद्वीपे भोगी-

भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धि-
क्षुब्धाचलः कनककेतकगौरगात्रि ! ॥ ५९ ॥
मन्था नगः स भुजगप्रभुवेष्टघृष्टि-
लेखाचलद्धवलनिर्झरवारिधारः ।
त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेष-
शेषाङ्गवेष्टिततनुर्भ्रममातनोतु ॥ ६० ॥
एतेन ते स्तनयुगेन सुरेभकुम्भौ
पाणिद्वयेन दिविषद्द्रुमपल्लवानि ।

न्द्रस्य वासुकेर्वेष्टशतघृष्टिभिर्वेष्टनशतानां घर्षणैः कृताभिरस्य शिलासु वलीनां वेष्टनमार्गाणां च्छटाभिः समूहैर्हेतुभिः सोपानैः शोभत इति तच्छोभि वपुर्यस्य सः वलिकृतसोपानपङ्क्तिरब्धेः क्षुब्धाचलो मन्दराद्रिः क्षुब्धस्वान्तेत्यादिना निपातनात्साधुः । तवारोहणाय सज्जः सज्जित इवास्ति वर्त्तत इत्युत्प्रेक्षा ॥ ५९ ॥

मन्था इति । भुजगप्रभोर्वासुकेर्वेष्टैर्वेष्टैर्दत्ता घृष्टिरेखाः घर्षणमार्गास्तासु चलन्त्यः प्रवहन्त्यो धवला निर्झरवारिधारा यस्य सः प्रसिद्धः मन्था मन्थनदण्डो नगोऽद्रिर्मन्दराद्रिः वैशाखे मन्थ मन्थान मन्थानो मन्थ दण्डक इत्यमरः । त्वन्नेत्रयोः स्वस्य मन्दरस्यैव भरेण भारेण यन्त्रितानि कुञ्चितानि शीर्षाणि यस्य तस्य शेषस्य भूभारं वहतः शेषाहेः शेषाङ्गेनावशिष्टकायेन वेष्टिता तनुः शरीरं यस्य स इति भ्रममातनोतु भ्रान्तिं जनयतु सर्पो हि शिरसि क्रामतोऽङ्गं स्वाङ्गेन वेष्टयतीति प्रसिद्धम् अत्र कविसम्मतसादृश्यमूलभ्रान्तेर्वर्णनाद्भ्रान्तिमदलङ्कारः ॥ ६० ॥

एतेनेति । हे सुन्दरि ! एतेनेति सर्वशेषपुरोवर्त्तिनिर्देशः ते तव स्तनयुगेन सुरेभस्यैरावतस्य कुम्भौ पाणिद्वयेन दिविषद्द्रुमस्य कल्पवृक्षस्य पल्लवानि आस्येन इन्दुमप्येवं नीरधिमन्थनोत्थं सर्वाणि समुद्र-

आस्येन संस्मरतु नीरधिमन्थनोत्थं
स्वच्छन्दमिन्दुमपि सुन्दरि मन्दराद्रिः ॥ ६१ ॥
वेदैर्वचोभिरखिलैः कृतकीर्त्तिरत्ने
हेतुं विनैव धृतनित्यपरार्थयत्ने ।
मीमांसयेव भगवत्यमृतांशुमौलौ
तस्मिन् महीभुजि तयानुमतिर्न भेजे ॥ ६२ ॥
तस्मादिमां नरपतेरपनीय तन्वीं
राजन्यमन्यमथ जन्यजनः स निन्ये ।

मथनोत्थानि वस्तूनि नपुंसक मनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसकत्वं वैकल्पिकमेकत्वञ्च । स्वच्छन्दं यथेष्टं स्मरतु संस्वच्छन्दो निरवग्रह इत्यमरः । अत्र कविसम्मतसादृश्यमूलस्मृतिनिबन्धनात् स्मरणालङ्कारः ॥ ६१ ॥

वेदैरिति । अखिलैः समस्तैः अन्यत्राखिलैरविच्छिन्नसम्प्रदायै वेदैः वेदतुल्यैर्वचोभिः सत्पुरुषवाक्यैरन्यत्र यतोवेति वेदवाक्यैः कृतं व्याकृतं कीर्त्तिरत्नं यस्य तस्मिन् हेतुं विनैव निर्हेतुकमेव नित्यः सदातनः परार्थयत्नः स्वयमवाप्तसकलकामनया परार्थैकप्रवृत्तिर्यस्य तस्मिन् ज्योतिष्मच्चास्मिन् महीभुजि तया भैम्या भगवत्यमृतांशुमौलौ ईश्वरे मीमांसया पूर्वमीमांसयेव अनुमतिरङ्गीकारो न भेजे न प्राप्तः भजेः कर्मणि लिट् वेदपौरुषेयवादिनी मीमांसा भगवन्तमीश्वरं न सहत इत्याशयः पूर्णोपमा ॥ ६२ ॥

तस्मादिति । अथानन्तरं जन्यजनो यानिवर्गः स्त्रीभावेन स्त्रीलीलया धावितपदाञ्चालितचरणां स्वानुरूपचरणचेष्टयैव अन्यतो गमनमनुजानतीमित्यर्थः । भावो लीला क्रिया चेष्टा भूत्यभिप्राय जन्तुषु इति वैजयन्ती । अन्यत्र स्त्री भावे स्त्रीलिङ्गे धावितं पदं याच्ञेति पदं यस्याः तां यजयाच यतविस्य प्रस्यरक्षो नङिति नङ् प्रत्ययस्य यजादिभ्यः

स्त्रीभावधावितपदामभिलष्य याच्ञा
मर्थी निवर्त्य विधनादिव वित्तवित्तम् ॥ ६३ ॥
देवी पवित्रितचतुर्भुजवामभागा
वागालपत् पुनरिमां गरिमाभिरामाम् ।
अस्यारिनिष्कृपकृपाणसनाथपाणेः
पाणिग्रहादनुगृहाण गणं गुणानाम् ॥ ६४ ॥
द्वीपस्य शाल्मलइतिप्रथितस्य नाथः
पायोधिना वलयितस्य सुराम्बुनाऽयम् ।

पुंसि प्रयोगे याचेरेव स्त्रीलिङ्ग प्रयोगादितिभावः । तन्वीं कृशाङ्गी मिमां भैमीं तस्मान्नरपतेरपनीय अर्थी याचकोऽभिलष्य विलष्यीकृतरूपां याच्ञां याच्ञावृत्तिं विधनान्निर्धनात् पुंसो निवर्त्य वित्तेन धनेन वित्तः प्रतीतः विख्यात इति यावत् वित्तोभोग प्रत्यययोरिति विदेर्लाभार्थान्निष्ठानत्वा भावान्निपातनादुभयतोभयं साधु भुज्यत इति भोगो वित्तः प्रत्ययः ख्यातिः तथाहुः वेत्तेस्तु विदितो निष्ठा विद्यते विन्न इष्यते। विन्नश्च वित्तश्च भोगवित्तेस्तु विन्दते रिति । तं वित्तवित्तं धनाढ्यमिव अन्यं राज्ञोऽपत्यं राजन्यं राजानं निन्ये राजश्वशुराद्यत् राज्ञोऽपत्ये जाति ग्रहण मिति वचनाद्राजन्यं क्षत्रियः ॥ ६३ ॥

देवीति । पवित्रित श्चतुर्भुजस्य विष्णोर्वामभागो यया सा लक्ष्मी सरस्वत्यौ देवस्य दक्षिण वामपार्श्ववर्तिन्या वित्यागमः । वाग्देवी सरस्वती गरिम्णा गुणगौरवेण अन्यत्र अर्थगौरवेण अभिरामाङ्गिरमालपत् उवाच किमिति हे वत्से ! अरिषु निष्कृपो यः कृपाणः खड्गस्तेन सनाथः सहितः पाणिर्यस्य तस्य राज्ञो गुणानां गणं पाणिग्रहणादनु विवाहानन्तरं गृहाण जानीहि तदा ज्ञास्यसि महिमानमस्येत्यर्थः ॥ ६४ ॥

द्वीपस्येति । हे तिलप्रसवनासिकि ! तिलकुसुमसमाननासिके ! नासिकोदरेत्यादिना विकल्पात् न ङीष् । यो राजा सुरा मद्यमेवाम्बु

तस्मिन् वपुष्मति न विस्मयसे गुणाब्धौ
रक्ता तिलप्रसवनासिकि ! नासि किं वा ॥ ६५ ॥
विप्रे धयत्युदधिमेकतमं त्रसत्सु
यस्तेषु पञ्चसु बिभाय न शीधुसिन्धुः ।
तस्मिन्ननेन च निजालिजनेन च त्वं
सार्द्धं विधेहि मधुरा मधुपानकेलीः ॥ ६६ ॥
द्रोणः स तव वितरिष्यति भाग्यलब्ध-
सौभाग्यकार्म्मणमयीमुपदां गिरिस्ते ।

यस्य तेन पाथोधिना समुद्रेण वलयितस्य सञ्जातवलयस्य वेष्टितस्येत्यर्थः । शाल्मल इति प्रथितस्य द्वीपस्य नाथः स्वामी गुणाब्धौ वपुष्मति वपुष्मदाख्ये अस्मिन् राज्ञि किं न विस्मयसे रक्ता वा अनुरक्ता च किं नासि उभयमप्युचित मेवेत्यर्थः ॥ ६५ ॥

विप्र इति । शेरते अनेनेति शीधुरासवः मैरेय मासवः शीधुरित्यमरः । शीङः स्युक्प्रत्यय औणादिकः । शीधुसिन्धुरासवसमुद्रः विप्रे अगस्त्ये एकतम मुदधिन्धयति पिबति सति लटः शतृप्रत्ययः । तेषु पञ्चसु समुद्रेषु त्रसत्सु बिभ्यत्सु स्वयं न बिभाय न भीतः ब्राह्मणो न सुरां पिबेदिति निषेधादितिभावः । तस्मिन् सुराब्धौ अनेन राज्ञा च निजेन आलीजनेन सार्द्धं मधुराः मनोहराः मधुपानकेलीर्विधेहि कुरु ॥ ६६ ॥

द्रोण इति । तत्र शाल्मलि द्वीपे ओषधीनां तृण ज्योतिषां दीप्तिभिस्तस्य द्वीपस्य दीप इव स्थितः अत एव चूड़ायां शिखरे मिलद्भिः सङ्गच्छमानै र्जलदैरेव कज्जलै र्दर्शनीयो दृष्टिप्रियः स द्रोणो द्रोणाख्यो गिरिस्ते तव भाग्यैरेव लब्धं सौभाग्यं पतिवाल्लभ्यं तस्य कार्म्मण मौषधसाध्यं वशीकरणकर्म्म मूलकर्म्म तु कार्म्मण मित्यमरः । वितरिष्यति दास्यति तद्युक्तात् कर्म्मणोऽणितिस्वार्थेऽण्प्रत्ययः । तन्मयी तद्रूपा मुपदा मुपायन मुप यन मुपग्राह्य मुपहारस्तथोपदेत्यमरः । वितरिष्यति दास्यति उपलक्षणमेतत्

तद्द्वीपदीप इव दीप्तिभिरोषधीनां
चूडामिलज्ज्वलदकज्जलदर्शनीयः ॥ ६७ ॥
तद्द्वीपलक्ष्म पृथुशाल्मलितूलजालैः
क्षौणीतले मृदुनि मारुतचारुकीर्णैः ।
लीलाविहारसमये चरणार्पणानि
योग्यानि ते सरससारसकोषमृद्वि ! ॥ ६८ ॥
एतद्गुणश्रवणकालविजृम्भमाण-
तल्लोचनाञ्चलनिकोचनसूचितस्य ।

सञ्जीवन्याद्यनेकदिव्यौषधि लाभस्ते भविष्यतीतिभावः । अत्र कार्म्मणमयी सुपदार्मिति परिणामालङ्कारः आरोप्यमाणो यदीयस्तद्विषय कार्म्मणाकारपरिणामेन प्रकृत प्रभु चित्तावर्जनोपयोगित्वात् आरोप्यमाण मारोपविषयात्मत्वेन स्थितम् । प्रकृतस्योपयोगित्वे परिणाम उदाहृत इति लक्षणात् । अस्य च दीप इवेत्युत्प्रेक्षया संसृष्टिः तस्यास्तु ज्वलदकज्जलेति रूपकेण सङ्करः ॥ ६७ ॥

तद्द्वीपेति । हे सरससारसकोषमृद्वि ! प्रत्यग्रकमल कोमले ! मारुतेन चारु यथा तथा कीर्णैस्तद्द्वीपस्य लक्ष्मचिह्नं पृथुर्महान् यः शाल्मलिर्वृक्षः विशेषः स्थिरायुः शाल्मलिर्द्वयोरित्यमरः । तस्य तूलजालैस्तूलसमूहैर्मृदुनि कोमले क्षौणीतले तव क्रीडा विहारसमये लीला स्वैरचरणकाले चरणार्पणानि पादन्यासयोग्यान्यनुरूपाणि भविष्यन्तीति शेषः । तच्चाति श्लाघ्यमितिभावः । अत्रानुरूप योगोक्तेः समालङ्कारः सा समालङ्कृतिर्योगे वस्तुनोरनुरूपयोरिति लक्षणात् ॥ ६८ ॥

एतदिति । तां भैमीमेकतः एकस्मात् क्षितिपते रपरं क्षितिपतिं नयन्तस्ते शिविकाभृतो जन्या एतस्य राज्ञो गुणगणश्रवणकाले विजृम्भमाणस्य तस्या दमयन्त्याः लोचनाञ्चलस्य कटाक्षस्य निकोचनेन सङ्को-

भावस्य चक्रुरुचितं शिविकाभृतस्ते
तामेकतः क्षितिपतेरपरं नयन्तः ॥ ६९ ॥

तां भारती पुनरभाषत नन्वमुष्मिन्
काश्मीरपङ्कनिभलग्नजनानुरागे ।
श्रीखण्डलेपमयदिग्जयकीर्त्तिराजि-
राजद्भुजे भज महीभुजि भैमि ! भावम् ॥ ७० ॥

द्वीपं द्विपाधिपतिमन्दपदे ! प्रशास्ति
प्लक्षोपलक्षितमयं क्षितिपस्तदस्य ।
मेधातिथेस्त्वमुरसि स्फुर हृष्टसौख्या
साक्षाद्यथैव कमला यमलार्जुनारेः ॥ ७१ ॥

अनेन सूचितस्य ज्ञापितस्य भावस्याभिप्रायस्य उचित मर्हं कृत्यं चक्रुः अपराग ज्ञानानन्तर मपसरणमेव उचितमितिभावः ॥ ६९ ॥

तामिति । भारती तां भैमीं पुनरभाषत किमिति ननु भैमि ! काश्मीरपङ्कनिभेन कुङ्कुमपङ्कमिषेणेत्यपह्नवः । लग्नो जनानुरागो यस्मिन् तस्मिन् श्रीखण्डलेपः चन्दनलेपनं तन्मयीभिर्दिग्जयकीर्त्तीनां राजिभी राजतो भुजौ यस्य तस्मिन्नमुष्मिन्महीभुजि राज्ञि भाव मनुरागं भज अत्र श्रीखण्डलेपे कीर्त्तित्वोत्प्रेक्षा गम्या ॥ ७० ॥

द्वीपमिति । द्विपाधिपतेर्गजेन्द्रस्यैव मन्दं पदं गमनं यस्याः तस्याः सम्बुद्धिः अयं क्षितिपः प्लक्षस्य प्लक्षवृक्षेण उपलक्षितं चिह्नितं द्वीपं प्लक्षद्वीपं प्रशास्ति तस्मान्मेधातिथेर्मेधातिथिनाम्नोऽस्य राज्ञ उरसि हृष्टसौख्या जनितानन्दा सती यमलयोरर्जुनवृक्षयोः ककुभवृक्षयोः तद्रूपधारिणो रसुरयो ररेर्विष्णोरुरसि यथा साक्षात्कमला लक्ष्मीरिव स्फुर भाहि ॥७१॥

प्लक्षे इति । अत्र प्लक्षद्वीपे अधिशाखं शाखायां विलम्बिनीभिर्दोलाभिर्लोल मखिलाङ्गं यस्याः तथा जनतया जनसमूहेन जनितोऽनुरागो

प्लक्षे महीयसि महीवलयातपत्रे
तत्रेक्षिते खलु तवापि मतिर्भवित्री ।
खेलां विधातुमधिशाखविलम्बिदोला-
लीलाखिलाङ्गजनताजनितानुरागे ॥ ७२ ॥
पीत्वा तवाधरसुधां वसुधासुधांशु
र्न श्रद्दधातु रसमिक्षुरसोदवाराम् ।
द्वीपस्य तस्य दधतां परिवेशवेशं
सोऽयं चमत्कृतचकोरचलाचलाक्षि ! ॥ ७३ ॥
सूरं न सौर इव नेन्दुमवीक्ष्य तस्मि-
न्नश्नाति यस्तदितरत्रिदशानभिज्ञः ।

यस्मिन् तस्मिन् महीवलयस्यातपत्रे महीयसि महत्तरे प्लक्षवृक्षे ईक्षिते सति तवापि खेलान्दोलाक्रीडां क्रीडा खेला च कूर्दन मित्यमरः । विधातुं कर्तुं मतिरिच्छा भवित्री भाविनी खलु ? परकीयविहारदर्शनात् स्वस्यापि तदभिलाषो भवतीतिभावः ॥ ७२ ॥

पीत्वेति । हे चमत्कृत चकोर चलाचलाक्षि ! चकित चकोर चञ्चलाक्षि ! वसुधासुधांशुर्भूचन्द्रोऽयं मेधातिथिस्तवाधरसुधा मधरामृतं पीत्वा यस्य द्वीपस्य परिवेशवेषं परिध्याकारं दधताम् इक्षुरस एवोदकं यस्य तस्येक्षुरसाब्धेर्वारां वारिणां रसं स्वादं न श्रद्दधातु नाभिलषतु श्रद्धास्तिक्याभिलाषयोरिति वैजयन्ती । अमृतास्वादलोलुपस्य किमिक्षुरसगण्डूषै रितिभावः ॥ ७३ ॥

सूरमिति । तस्मिन् प्लक्षद्वीपे तस्मादिन्दोरितरेषां त्रिदशानाम् अनभिज्ञः इन्दोरन्यं देवमभजमानो यः सूरे भक्तिर्यस्य सौरः सूर्यभक्तः भक्तिरित्यण् । सूरं सूर्यमिव इन्दुमवीक्ष्य नादृष्ट्वा नाश्नाति न भुङ्क्ते तस्यैन्दवस्य इन्दुभक्तस्य पूर्ववदण्प्रत्ययः । भवत्या चास्य निरीक्षयैव त्वन्मुखदर्शनेनैव सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । दर्शे अमावास्यायां सम्प्रतो भुञ्जान-

तस्यैन्दवस्य भवदास्यनिरीक्षयैव
दर्शेऽश्नतोऽपि न भवत्यवकीर्णिभावः ॥ ७४ ॥

उत्सर्पिणी न किल तस्य तरङ्गिणी या
त्वन्नेत्रयोरिह तत्र विपाशि जाता ।
नीराजनाय नवनीरजराजिरास्ता
मत्राञ्जसानुरज राजनि राजमाने ॥ ७५ ॥

एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा
दुग्धीकृते तदुभयव्यतिभेदमुग्धाः ।

स्यापि भाव अविकीर्णिभावः क्षतव्रतत्वं अवकीर्णी क्षतव्रत मित्यमरः । त्वन्मुखस्यैव मुख्येन्दुत्वात्तद्दर्शनादेव इन्दुदर्शनव्रतिनां भोजनाधिकारसिद्धिः । नास्ति व्रत भङ्गदोष इति भावः । एतेनैव तन्मुखे मुख्येन्दुभ्रमाद्भ्रान्तिमदलङ्कारो व्यज्यते इति वस्तुनाऽलङ्कारध्वनिः ॥ ७४ ॥

उत्सर्पिणीति । या विपाशानाम तरङ्गिणी तद्वीपस्य उत्सृत्य सर्पिणी दूरस्था न किल ? तत्र तस्यां विपाशि विपाशायां विपाशा तु विपाट्स्त्रियामित्यमरः । जाता नवा नीरजराजिः पद्मपङ्क्तिस्त्वन्नेत्रयोर्नीराजनाय आस्तां तिष्ठतु अह्हेत्यद्भुते राजमाने दीप्यमाने अत्रास्मिन् मेधातिथिनाम्नि राजनि अञ्जसा सत्यमनुरज अनुरज्यस्व रञ्जे र्भौवादिकाल्लोटि सिप् रञ्जेश्चेत्युपधानकारस्य लोपः ॥ ७५ ॥

एतदिति । एतस्य राज्ञो यशोभिरखिलेऽम्बुनि जले दुग्धीकृते क्षीरीकृते सति अद्य हंसास्तस्योभयस्य दुग्धाम्बुद्वयस्य व्यतिभेदे विवेके मुग्धा मूढाः सन्तु किञ्च क्षीरे पदे पयसि पदेऽपि क्षीर पयः पदयोर्विषय इत्यर्थः । नानार्थकोशस्य क्षीरं नीरे च दुग्धे 'पयोऽम्भसि च दुग्धे चेत्यादिना अनेकार्थनिघण्टो विषयस्तत्प्रतिपाद्य भूतमित्यर्थः । द्वयवाचिभूयमर्थद्वयवाचित्वं भुवो भाव इति क्यप् । क्षीरपद पयः पदयोर्निघण्टो विषयस्तत्प्रतिपाद्यभूतं उक्तमर्थद्वयवाचकत्वमद्य स्फोटं मिथ्यो-

क्षीरे पयस्यपि पदे द्वयवाचिभूयं
नानार्थकोषविषयोऽद्य मृषोद्यमस्तु ॥ ७६ ॥
ब्रूमः किमस्य नलमप्यलमाजुहूषोः
कीर्त्तिं सचैष च समादिशतः स्म कर्त्तुम् ।
स्वद्वीपसीमसरिदीश्वरपूरपार-
वेलाचलाक्रमणविक्रममक्रमेण ॥ ७७ ॥
अम्भोजगर्भरुचिराय विदर्भसुभ्रू
स्त्वां गर्भरूपमपि रूपजितत्रिलोकम् ।

दितमस्तु सलिलस्यापि दुग्धभावेन द्वितीयार्थसम्भवादिति भावः । राजसूय सूर्यमृषोद्येत्यादिना निपातनात्साधुः । अत्राखिलेऽम्बुनि दुग्धीकृते इति सामान्यालङ्कारः तदुपजीवनेन हंसानां क्षीरनीरविवेकसम्बन्धेऽपि क्षीरपयःपदयोरर्थद्वयसम्बन्धे तदसम्बन्धरूपातिशयोक्तिद्वयोत्थापनात् सङ्करः ॥ ७६ ॥

ब्रूम इति । नलं नैषधमपि अलमत्यर्थमाजुहूषोः सस्पर्धमाह्वातुमिच्छोर्नलसमानस्यान्यस्येत्यर्थः ह्वयते राङ् पूर्वात् स्पर्द्धायामात्मनेपदिनः सनन्तादुप्रत्ययः न लोकेत्यादिना षष्ठी प्रतिषेधान्नलमिति कर्मणि द्वितीया । अस्य मेधातिथेर्माहात्म्यमिति शेषः । किं ब्रूमः वक्तुमशक्य मित्यर्थः । तथाहि स नलस्य एष मेधातिथिश्च स्वद्वीपयोः प्लक्षजम्बूद्वीपयोः सीमनि सरिदीश्वरपूरस्याब्धिप्रवाहस्य पारे वेलायां परतीररेखायाम् अचलस्य आक्रमणमेव विक्रमं तमक्रमेण यौगपद्येन;कर्त्तुं कीर्त्तिं प्रयोज्यकर्त्रीं समादिशतः स्म समादिष्टवन्तौ द्वीपान्तरेष्वप्यनयोः कीर्त्तिसञ्चार इति भावः ॥ ७७ ॥

अम्भोजेति । अथैतद्वाक्यश्रवणानन्तर मम्भोजगर्भवद्रुचिरा रम्या दृष्टि स्तद्वदरुणेत्यर्थः। विदर्भसुभ्रूः वैदर्भी प्रशस्तोगर्भो गर्भरूप स्त्वां पूर्ववयसमपीत्यर्थः। प्रशंसायां रूपप्। रूपजितत्रिलोकं रूपेण सौ-

वैराग्यरूक्षमवलोकयति स्म भूपं
दृष्टिः पुरत्रयरिपोरिव पुष्पचापम् ॥ ७८ ॥

ते तां ततोऽपि चक्षुर्जगदेकदीपा
दंसस्थलस्थितसमानविमानदण्डाः ।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां
सोत्कण्ठकैरववनीसुकृतप्ररोहाः ॥ ७९ ॥

भूपेषु तेषु न मनागपि दत्तचित्ता
विस्मेरया वचनदेवतया तयाथ ।
वाणीगुणोदयतृणीकृतपाणिवीणा-
निक्वाणया पुनरभाणि मृगेक्षणा सा ॥ ८० ॥

न्दर्येण जितास्त्रयो लोका येन त पुष्पचापेऽपीदं योज्यं । भूपं मेधातिथिं पुष्पचापं कामं पुरत्रयरिपोः ईश्वरस्य दृष्टिरिव वैराग्यरूक्षं वैराग्येणापरागेण रूक्षं परुषं यथा तथा अवलोकयति स्म ॥ ७८ ॥

ते इति । अंसस्थलेषु स्थितः समान एकरूपो विमानदण्डो येषान्ते समविभक्तभरादित्यर्थः । ते धुर्या स्तां भैमीं सोत्कण्ठायाश्चन्द्ररेखोत्सुकायाः कैरववन्याः सुकृतप्ररोहाः भाग्यविलासाः उदयिनीं उदयोन्मुखीं चन्द्ररेखां जगदेकदीपाच्चण्डद्युतेश्चण्डांशोरिव जगदेकदीपात्ततो मेधातिथेरपि चक्षुरपनिन्युः । सूर्य्यस्य तेजस एव चन्द्ररूपेण कुमुदानन्दकारत्वेन । वराहमिहिरः । यत्तेजः पितृधाम्नि शीतमहसः पाथोमये मण्डले संक्रान्तं कुमुदाकरस्य कुरुते कांचिद्विकास श्रियमिति ॥ ८० ॥

भूपेष्विति । तेषु भूपेषु द्वीपाधिपतिषु मनागीषदपि न दत्तचित्ता असक्तान्तरङ्गा मृगेक्षणा सा भैमी अत एव विस्मेरया विस्मितया न कपीत्यादिना रप्रत्ययः । वाणीगुणोदयेन माधुर्यादिवाग्गुण प्रकर्षेण तृणीकृत स्तिरस्कृतः पाणिवीणायाः निक्वाणो यया तया वीणाधिकवाणीगुणया वचनदेवतया तया अथ पुनरभाणि ॥ ८० ॥

यन्मौलिरत्नमुदितासि स एष जम्बु-
द्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति ।
दोलायितेन बहुना भवभीतिकम्प्रः
कन्दर्पलोक इव खात् पतितस्त्रुटित्वा ॥ ८१ ॥
विष्वग्वृतः परिजनैरयमन्तरीपै-
स्तेषामधीश इव राजति राजपुत्रि ! ।
हेमाद्रिणा कनकदण्डमयातपत्रः
कैलासरश्मिचयचामरचक्रचिह्नः ॥ ८२ ॥
एतत्तरुस्तरुणि ! राजति राजजम्बूः
स्थूलोपलानिव फलानि विसृष्य यस्याः ।

यदिति । हे भैमि ! त्वं यस्य जम्बूद्वीपस्य मौलिरत्नं भूत्वा उदिता उत्पन्नासि स एष जम्बूद्वीपस्तुभ्यं त्वदर्थं मिलितैर्युवभिर्हेतुभिर्विभाति क इव भवभीत्या रुद्रभयेन कम्प्रः अत एव बहुना अनेकेन दोलायितेन दोलनेन त्रुटित्वा खात्स्वर्गात्पतितः खमिन्द्रिये सुखे स्वर्गे शून्यबन्धौ विहायसीति विश्वः । कन्दर्पलोकः कामजगदित्युत्प्रेक्षा विभातीत्येकान्वयो वा ॥ ८१ ॥

विष्वगिति । हे राजपुत्रि ! अन्तर्गता आपो येषां तान्यन्तरीपाणि प्लक्षद्वीपादीनि द्वीपोऽस्त्रियामन्तरीपमित्यमरः । तैरेव परिजनैर्विष्वक्समन्ताद्वृतः । हेमाद्रिणा मेरुणा कनकदण्डं कनकमयदण्डमातपत्रं कनकातपत्रमेव यस्य सः मेरोः शिरसि विशालत्वादन्यत्र तनुत्वादेकस्यैव दण्डत्वेनातपत्रत्वेन च रूपणम् । कैलासस्य रश्मिचय एव चामरचक्रं चामरजालं तच्चिह्नं यस्य सः अयं जम्बूद्वीपः तेषां द्वीपान्तराणामधीश इव राजतीत्युत्प्रेक्षा ॥ ८२ ॥

एतदिति । हे तरुणि ! एतस्य जम्बूद्वीपस्य तरुश्चिह्नभूतो राजजम्बूः जम्बूविशेषः अथो राजजम्बूः सुरभिच्छद इति वैजयन्ती ।

सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्ति-
यूथानि केन तरुमारुरुहुः पथेति ॥ ८३ ॥
जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना
कृत्स्नापि सा तव रुचा विजितश्रि यस्याः ।
तज्जाम्बवद्रवभवास्य सुधाविधाम्बु,
र्जम्बूः सरिद्वहति सीमनि कम्बुकण्ठि ! ॥ ८४ ॥

राजति स्थूलोपलान् गण्डशैलानिव स्थितानि यस्याः जम्ब्वाः फलानि विलक्ष्यालोच्य सिद्धस्त्रियः प्रियं स्वदयितं दन्तियूथानि करिघटाः केन पथा तरुमारुरुहुरिति इदं वचो निगदन्ति गजप्रमाणानि तत्फलानीत्यर्थः। ब्रुविशासिरित्यत्र ब्रुवेरर्थग्रहणाद्गदेर्द्विकर्मकत्वम् अत्र जम्बूफलेषु दन्तिभ्रमोक्त्या भ्रान्तिमदलङ्कारः ॥ ८३ ॥

जाम्बूनदमिति। कम्बोः शङ्खस्य कण्ठइव कण्ठो यस्याः तस्याः सम्बुद्धिः हे कम्बुकण्ठि ! अङ्ग गात्र कण्ठेत्यादिना ङीष्। तेषां पूर्वोक्तानां जाम्बवानां जम्बूफलानां द्रवात् रसाद्भवा तथा जम्बूः स्त्री जम्बु जाम्बवमित्यमरः। फले लुक् जम्ब्वा वेति विकल्पाद लुक्। सुधायाः विधेव विधा प्रकारो येषां तानि तद्विधानि तत्प्रकाराण्यम्बु यस्याः साः सुधाविधाम्बुर्जम्ब्वाख्यासरित् अस्य जम्बूद्वीपस्य सीमनि वहति प्रवहति किञ्च यस्याः जम्बूनद्याः सम्बन्धिनि कृत्स्ना समस्ता सा प्रसिद्धा मृत्स्ना प्रशस्ता मृत्तिका मृण्मृत्तिका प्रशस्तातु मृत्सा मृत्स्ना च मृत्तिका इत्यमरः। सस्नौ प्रशंसायामिति स्न प्रत्ययः। तव रुचा शरीरकान्त्या विजितश्रि निर्जितशोभं नपुंसके ह्रस्वः। जम्बूनद्यां भवं जाम्बूनदं सुवर्णमिति जगति विश्रुतिं विख्यातिमेति ॥ ८४ ॥

तस्मिन्निति। रम्भे कदलिस्तम्भाविवोरू यस्याः सा रम्भोरूः ऊरूत्तरपदादौपम्य इत्यूङ्प्रत्ययः तस्याः सम्बुद्धिः नदीह्रस्वः हे रम्भोरु! तस्मिन्

तस्मिन् जयन्ति जगतीपतयः सहस्र-
मस्रास्रुसान्द्ररिपुतद्वनितेषु तेषु ।
रम्भोरु ! चारु कतिचित्तव चित्तबन्धि-
रूपान्निरूपय मुदाहमुदाहरामि ॥ ८५ ॥
प्रत्यर्थियौवतवतंसतमालमाला-
न्मीलत्तमःप्रकरतस्करशौर्य्यसूर्य्ये ।
अस्मिन्नवन्तिनृपतौ गुणसन्ततीनां
विश्रान्तिधामनि मनो दमयन्ति ! किन्ते ॥ ८६ ॥
तत्रानुतीरवनवासितपस्विविप्रा
सिप्रा तवोर्म्मिभुजया जलकेलिकाले ।

जम्बूद्वीपे जगतीपतयः भूपतयः सहस्रं जयन्ति अस्रैः शोणितैः अस्रुभिर्बाष्पैश्च यथासङ्ख्यं सान्द्राः सिक्ता रिपवस्तद्वनिताश्च येषां तेषु हतारिष्वित्यर्थः । तेषु भूपेषु मध्ये कतिचित् चित्तबन्धि चित्तग्राहि रूपं येषां तान् भूपानहमुदाहरामि कथयामि मुदा हर्षेण चारु निरूपय सम्यगवधारय ॥ ८५ ॥

प्रत्यर्थीति । हे दमयन्ति ! प्रत्यर्थिनां यौवतं युवतिसमूहं भिक्षादित्वादण्प्रत्ययः । तस्य वतंसास्तमालमालास्ता एव उन्मिषत्तमांसि तेषां प्रकरस्य तस्करमपहारकं यच्छौर्यन्तत्र सूर्ये गुणसन्ततीनां गुणसम्पदां विश्रान्तिधामनि विश्रामस्थाने अस्मिन्नवन्तिनृपतौ अवन्तिनाथे ते मनः किम् ? ॥ ८६ ॥

तत्रेति । तत्र अवन्तिदेशे अनुतीरं तीरे विभक्त्यर्थे वायस्य चायाम इति वा अव्ययीभावः । तद्वनानि यावत्तीरमायतानीत्यर्थः । तद्वासिन स्तपस्विनो विप्रा यस्यां सा सिप्रा नदी तव जलकेलिकाले ऊर्मिरेव भुजा तया आलिङ्गनानि दधती कुर्वती तथा हास्यं विकासञ्चितञ्च तद-

आलिङ्गनानि दधती भविता वयस्या
हास्यानुबन्धरमणीयसरोरुहास्या ॥ ८७ ॥
अस्याधिशय्य पुरमुज्जयिनीं भवानी
जागर्त्ति या सुभगयौवतमौलिमाला।
पत्यार्द्धकायघटनाय मृगाक्षि! तस्याः
शिष्या भविष्यसि चिरं वरिवस्ययापि ॥ ८८ ॥
निःशङ्कमङ्कुरिततां रतिवल्लभस्य
देवः स्वचन्द्रकिरणामृत सेचनेन।

नुबन्धेन तद्योगेन रमणीयं सरोरुह मेवान्यत्र तदिति वास्यं यस्याः सा सती वयस्या भविता सखी भविष्यति ॥ ८७ ॥

अस्येति। भवस्य पत्नी भवानी पार्वती इन्द्र वरुण भवेत्यादिना ङीष् नुगागमश्च। अस्य अवन्तिनाथस्य उज्जयिनीं पुरमधिशय्याधिष्ठाय अयङ् यिक्ङितीत्ययङ् आदेशः अधिशीङ्स्थासां कर्मेति अधिकरणस्य कर्मत्वं। जागर्ति प्रकाशते या भवानी सुभगस्य पतिवल्लभस्य यौवतस्य युवतिसमूहस्य मौलिमाला शिरोभूषणं हे मृगाक्षि! पत्या भर्त्रा सह अर्द्धं कायस्यार्द्धकायः अर्द्धं नपुंसकमिति समासः। तस्य घटनाय तस्या भवान्याश्चिरं वरिवस्यया परिचर्य्यया नमोवरिवश्चित्रङः क्यच् अप्रत्ययादिति स्त्रियां अकारप्रत्यये टाप्। शिष्याऽपि भविष्यसि न केवलं पूर्वोक्त सिप्राविहारादि सम्पत्तिरेव किन्तु सर्वसौभाग्यभूतं भवानी शिष्यत्वमपि ते भविष्यतीतिभावः ॥ ८८ ॥

निःशङ्कमिति। तत्र उज्जयिन्यां स देवो रुद्रो महाकालनाथः। सुदृशां हृदयेषु स्वचन्द्रकिरणामृत सेचनेनैव रतिवल्लभस्य निःशङ्कमङ्कुरिततां सञ्जाताङ्कुरत्वं पुनरुत्पन्नत्वमिति यावत् चन्द्रभासां स्मरोद्दीपकत्वादिति भावः। अवलोक्य तस्य कामदेहदाहस्य स्वकृतस्य फलं किमाह?

तत्रावलोक्य सुदृशां हृदयेषु रुद्र-
स्तद्दग्धदाहफलमाह स किं न विद्मः ॥ ८९ ॥
आगःशतं विदधतोऽपि समिद्धकामा
नाधीयते परुषमक्षरमस्य वामाः ।
चान्द्री न तत्र हरमौलिशयालुरेका
नाध्यायहेतुतिथिकेतुरपैति लेखा ॥ ९० ॥
भूपं व्यलोकत न दूरतरानुरक्तं
सा कुण्डिनावनिपुरन्दरनन्दना तम् ।
अन्यानुरागविरसेन विलोकनाद्वा
जानामि सम्यगविलोकनमेव रम्यम् ॥ ९१ ॥

किं ब्रूते? न विद्मः स्वदग्धस्य कामस्य स्वशिरश्चन्द्रिकासेकादेव दग्ध वदरादिवत्पुनः सहस्रधा प्रादुर्भावे स्वप्रयासस्य किं प्रयोजकं वक्ष्यतीत्यर्थः ॥८९॥

आग इति । समिद्धकामाः नित्यप्रदीप्तमन्मथाः । अतएव वामाः वक्रशीला अपि स्त्रियः प्रतीपदर्शिनी वामा इत्यमरः । आगसामपराधानां शतं विदधतः कुर्वाणस्याप्यस्य परुषमक्षरं निष्ठुरवाक्यं नाधीयते नाम्नन्ति न जल्पन्तीत्यर्थः । अत्र हेतुमाह तत्रोज्जयिन्यामनध्यायहेतुतिथेः शुक्लप्रतिपदः केतुश्चिह्नभूता हरमौलौ शयालुः स्वायुका आलुचिति शीङ् ग्रहणादालुच् । एका चान्द्री रेखा नापैति तत्र हरशिरोगतैकेन्दुकलानित्ययोगात्सर्वासामपि तिथीनां शुक्लप्रतिपदत्वेन परुषाक्षरस्तुतीनां नित्यानध्यायहेत्वर्थः तत्र नित्यसन्निहितहरशिरश्चन्द्रिकोद्दीपितमन्मथाग्नितया खण्डितादयोऽपि नायिकाः शतशोऽपराध्यन्तमप्येनं परुषमाभाषितुं नोत्सहन्त इति भावः ॥९०॥

भूपमिति । कुण्डिनावनिपुरन्दरस्य कुण्डिनप्रधानभूमीन्द्रस्य भीमभूपस्य नन्दना दुहिता नन्दादित्वात् ल्युट् प्रत्यये टाप् । सा दमयन्ती दूरतरानुरक्तं गाढसक्तं तं भूपं न व्यलोकत नैक्षत अत्रैतदेववरमित्याह ।

भैमीङ्गितानि शिबिकामधरे वहन्तः
साक्षान्न यद्यपि कथञ्चन जानते स्म ।
जज्ञुस्तथापि सविधस्थितसंमुखीन-
भूपालभूषणमणिप्रतिबिम्बितेन ॥ ९२ ॥
भैमीमवापयत जन्यजनस्तदन्यं
गङ्गामिव क्षितितलं रघुवंशदीपः ।
गाङ्गेयपीतकुचकुम्भयुगाञ्च हार-
चूडासमागमवशेन विभूषिताञ्च ॥ ९३ ॥

अन्यानुरागाद्विरसेनापरागेण विलोकनात्तस्यगत्यन्तमवलोकन मेव रम्यमिति जानामि ॥ ९१ ॥

भैमीति । शिबिकामधरे अधरप्रदेशे वहन्तो वोढारो भैमीङ्गितानि भैमीचेष्टितानि कथञ्चन कथञ्चिदपि साक्षात्प्रत्यक्षं न जानते स्म यद्यपि नाजानन्नेव यद्यपीत्यवधारणं इति केशवः । तथापि सविधे स्थितेषु सन्मुखं दर्शनमेष्विति सम्मुखीनेषु साम्मुख्येन बिम्बग्राहिष्वित्यर्थः । यथामुखसम्मुखस्य दर्शन इति खप्रत्ययः । भूपालस्यावन्तिराजस्य भूषणमणिषु प्रतिबिम्बितेन भैमीप्रतिबिम्बकारणेन जज्ञुरज्ञासिषुः जानातेर्लिट् ॥ ९२ ॥

भैमीति । जन्यजनो वाहनजनः गाङ्गेय हेम तद्वत्पीतं हरिद्रावर्णम् अन्यत्र गाङ्गेयेन भीष्मेण पीतं पीतं स्यात्पीतगौरयोरिति विश्वः । कर्बुरहेम्नोर्गाङ्गेयं गाङ्गेयो गुह भीष्मयोरिति वैजयन्ती । तादृक् कुचकुम्भयुगं यस्यास्तां हाराः मुक्ताहाराः चूडा बाहुविभूषणाः चूडा बाहुविभूषण इति विश्वः । अन्यत्र हरस्येयं हारी चूडा शिखा हारचूडा पुंवत्कर्मधारयजातीयदेशीयेष्विति पुंवद्भावः । तत्समागमवशेन तद्योगबलेन विभूषिताञ्च भैमीं रघुवंशदीपो भगीरथो गङ्गां भागीरथीं क्षितितलमिव ततोऽन्यं नृपमवापयत निनाय आप्नोतेर्ण्यन्ताल्लङि णिचश्चेति तङ् ॥ ९३ ॥

तां मत्स्यलाञ्छनदराञ्चितचापभासा
नीराजितभ्रुवमभाषत भाषितेशा ।
व्रीड़ाजडे ! किमपि रूपय चेतसा चेत्
क्रीडारसं वहसि गौड़विड़ौजसीह ॥ ९४ ॥
एतद्यशोभिरमलानि कुलानि भासां
तथ्यं तुषारकिरणस्य तृणीकृतानि ।
स्थाने ततोवसति तत्र सुधाम्बुसिन्धौ
रङ्कुस्तदङ्कुरवनीकवलाभिलाषात् ॥ ९५ ॥
आलिङ्गितः कमलवत्करकस्त्वयाऽयं
श्यामः सुमेरुशिखयेव नवः पयोदः ।

तामिति । भाषितेशा वाग्देवता मत्स्यलाञ्छनस्य कामस्य दराञ्चितस्य किञ्चिन्नमितस्य चापस्य भासा कान्त्या नीराजिते भ्रुवौ यस्यास्तां भैमी मभाषत किमिति हे व्रीड़ाजड़े ! लज्जालसे ! चेतसा इह गौड़विड़ौजसि गौड़देवेन्द्रे क्रीड़ारसं क्रीड़ारागं वहसि चेत् किमपि रूपय किञ्चित् सूचय ॥९४॥

एतदिति । एतस्य राज्ञो यशोभिः तुषारकिरणस्येन्दोरमलानि भासाङ्कुलानि कान्तिवृन्दानि तृणीकृतानि नैर्मल्यगुणेन तुच्छीकृतानि तृणत्वं प्रापितानि तथ्यं सत्यं । तत स्तृणीकरणादेव रङ्कुरङ्कमृग स्तृणाङ्कुर वनीकवलेषु तृणाङ्कुरपूरग्रासेष्वभिलाषादेव सुधाम्बुसिन्धौ अमृतोदकमध्ये इन्दौ वसतीत्युत्प्रेक्षा स्थाने युक्तं युक्ते द्वे साम्प्रतं स्थाने इत्यमरः । तृणोदकसम्पन्नस्थले मृगा स्तिष्ठन्तीति ॥ ९५ ॥

आलिङ्गित इति । कमलवन्तौ पद्मरेखायुक्तौ करौ पाणी यस्य सः शैषिकः कप् । अन्यत्र कमलवन्तो जलवन्त स्तदारब्धाः करका वर्षोपला यस्मिन् सः । सलिलं कमलं जलमित्यमरः । श्यामः उभयत्र श्यामवर्णः स पयोदः सुमेरोः शिखया शृङ्गरेखयेव त्वयाऽयं नृपः आलिङ्गितः सन्

कन्दर्पमूर्द्धरुहमण्डनचम्पकस्रग्
दामत्वदङ्गरुचिकञ्चुकितश्चकास्तु ॥ ९६ ॥

एतेन सम्मुखमिलत्करिकुम्भमुक्ताः
कौक्षेयकाभिहतिभिर्विबभुर्विमुक्ताः ।
एतद्भुजोष्मभृशनिःसहया विकीर्णाः
प्रस्वेदविन्दव इवारिनरेन्द्रलक्ष्म्या ॥ ९७ ॥

आश्चर्यमस्य ककुभामवधीनवाप
दाजानुगाद्भुजयुगादुदितः प्रतापः ।

कन्दर्पस्य मूर्द्धरुहाणां केशानां मण्डनं यच्चम्पकस्रगेव दाम गुणस्तदिव त्वदङ्गं यस्य स रुच्या कान्त्या कञ्चुकितः सञ्जातकञ्चुकश्चकास्तु प्रकाशतु दीप्यताम् ॥ ९६ ॥

एतेनेति । एतेन राज्ञा कौक्षेयकाभिहतिभिरसिघातैः कुल कुक्षि ग्रीवाभ्यश्वास्यलङ्कारेष्विति ढकञ् प्रत्ययः । विमुक्ताः विक्षिप्ताः सम्मुखं यथा तथा मिलतां संगच्छमानानां करिणां कुम्भेषु मुक्ता मौक्तिकानि एतस्य राज्ञो भुजोष्मणो भुजप्रतापस्य भृशं न सहत इति निःसहा असहा पचाद्यच् । तया भुजोष्म सन्तप्तयेत्यर्थः । अरिनरेन्द्राणां लक्ष्म्या विकीर्णा विसृष्टाः प्रस्वेदविन्दव इव विबभुरित्युत्प्रेक्षा ॥९७॥

आश्चर्यमिति । अस्य राज्ञः आजानु जानुपर्य्यन्तं गच्छतीति तद्गाददूरगामिन इत्यर्थः । भुजयुगादुत्थितः प्रतापः ककुभामवधीन् दिगन्तानवापत् किञ्च सता शुद्धेन शयेन चित्तेन विस्तारितेभ्योऽनुष्ठितेभ्यः सप्ततन्तुभ्यः क्रतुभ्यः सप्ततन्तुर्मखः क्रतुरित्यमरः । अन्यत्र सदा सर्व्वदा शयेन पाणिना विस्तारितेभ्यः प्रसारितेभ्यः सप्तभ्य स्तन्तुभ्यः जन्म यस्य सः यशःपटः चतुर्दश जगन्ति व्यापत् व्यानशे आश्चर्यम् अत्रात्यन्तादूरगामिनः कारणात् अतिदूरगामियशसः तन्तुसप्तकाच्चतुर्दशभुवन-

व्यापत् सदाशयविसारितसप्ततन्तु
जन्या चतुर्द्दश जगन्ति यशःपटस्य ॥ ९८ ॥
औदास्यसम्बिदवलम्बितशून्यमुद्रा
मस्मिन् दृशोर्न्निपतितामवगम्य भैम्याः ।
स्वेनैव जन्यजनतान्यमजीगमत्तां
सुज्ञं प्रतीङ्गितविभावनमेव वाचः ॥ ९९ ॥
एतां कुमारनिपुणां पुनरप्यभाणी
द्वाणी सरोजमुखि ! निर्भरमारभस्व ।

व्यापि यशःपटस्योत्पत्त्या विरुद्धकार्य्योत्पत्तिलक्षणो विषमालङ्कारः क्रत्वन्तानुष्ठानं दिगन्तविश्रान्तकीर्त्तिसम्पत्तिश्चाजानुबाहुत्वस्य फलमिति भावः ॥ ९८ ॥

औदास्येति। जनीं वधूं वहन्तीति जन्या सा जनता जनसमूहश्च षष्ठीसमासे असामर्थ्यात्तदन्तविध्यभावाच्च विशेषणसमासः। अस्मिन् गौड़भूपे निपतितां भैम्या दृशोः सम्बन्धिनीं उदास्त इत्युदासा पचाद्यच्। स्त्रियां टाप्। तस्या भाव औदास्यमौदासीन्यं ब्राह्मणादेराकृतिगणत्वात् ष्यङ्। तत्सम्बिदा उपेक्षाबुद्ध्या विलम्बितां शून्यमुद्रां निःस्पृहावस्थामवगम्य स्वेनैव स्वतएव वाचं विनैव तां भैमी अन्यं नृपमजीगमत् गमितवान् गमेर्णौ चङ्। तथाहि सुज्ञं विज्ञं प्रति इङ्गितविभावनमाकारप्रकटनमेव वाचः प्रेरणानि स्वामीङ्गितज्ञस्य हि किं तद्वाग्भिरित्यर्थः ॥९९॥

एतामिति। वाणी कुमारी च सा निपुणा च तां कुमारनिपुणां कुमारश्रमणादिभिरिति समासः। स्त्रियां पुंवदित्यादिना पुंवद्भावः। एतां भैमीं पुनरप्यभाणीदवोचत् हे सरोजमुखि ! अस्मिन् नृपे असङ्कुचितेन विकसितेन पङ्कजेन सह सख्यमिच्छायां मैत्रीकरणे निष्णातया कुशलया तत्सदृशेत्यर्थः। निनदीभ्यां स्नातेः कौशल इति षत्वं दृष्ट्वा

अच्छिन्नसंकुचितपङ्कजसख्यशिक्षा
निष्णातदृष्टिपरिरम्भविजृम्भितानि ॥ १०० ॥

प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थ-
पृथ्वीधरः पृथुरयं मथुराधिनाथः ।
अप्रश्मश्रुजातमनुयाति न शर्वरीशः
श्यामाङ्ककर्बुरवपुर्वदनाब्जमस्य ॥ १०१ ॥

बाले ! ऽधराधरितनैकविधप्रवाले
पाणौ जगद्विजयकार्मणमस्य पश्य ।
ज्याघातजेन रिपुराजकधूमकेतु-
तारायमाणमुपरज्य मणिं किणेन ॥ १०२ ॥

परिरम्भविजृम्भितान्यालिङ्गनचेष्टितानि निर्भरं गाढमारभस्व कुरु एनं पश्येत्यर्थः ॥ १०० ॥

प्रत्यर्थीति । अयं पुरोवर्त्ती नृपः प्रत्यर्थिपार्थिवपयोनिधिमाथे वैरिभूपाब्धिमन्थने मन्थपृथ्वीधरो मन्थाचलः मन्दरः पृथुर्महान् मथुराधिनाथो मथुरानगरीशः प्रश्मश्रु जातमस्य तज्जातप्रश्मश्रु तन्न भवतीत्यप्रश्मश्रुजातम् आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । तस्य मुखाब्जं श्यामेन अङ्केन कलङ्केन कर्बुरवपुः शबलाङ्गः शर्वरीशो नानुयाति नानुकरोति सकलङ्कनिष्कलङ्कयोः कुतः साम्यमिति भावः ॥ १०१ ॥

बाल इति । अधरेनोष्ठेन अधरिता अधरीकृता नैकविधा अनेकविधा नञ् समासः । प्रवालाः विद्रुमपल्लवरूपा यया सा हे तथाविधे ! बाले ! अस्य मथुरेश्वरस्य पाणौ जगद्विजयस्य कार्मणं वशीकरणौषधं ज्याघातजेन किणेन ग्रन्थिना उपरज्योपरागं प्राप्य रिपोः राजकस्य राजसमूहस्य धूमकेतुतारायमाणं धूमकेत्वाख्यनक्षत्रवदाचरन्तं तद्वदुपप्लवायमानमित्यर्थः । आचारक्यङन्ताल्लटः शानच् । मणिं कङ्कणमाणिक्यं पश्य ॥ १०२ ॥

एतद्भुजारणिसमुद्भवविक्रमाग्नि-
चिह्नं धनुर्गुणकिणः खलु धूमलेखा ।
जातं ययारिपरिषन्मशकार्थयाश्रु-
विस्रावणाय रिपुदारदृगम्बुजेभ्यः ॥ १०३ ॥
श्यामीकृतां मृगमदैरिव माथुरीणां
धौतैः कलिन्दतनयामधिमध्यदेशम् ।
तत्राप्तकालियमहाह्रदनाभिशोभां
रोमावलीमिव विलोकयितासि भूमेः ॥ १०४ ॥

एतदिति । एतस्य राज्ञो भुजाया एव रणेः निर्मथ्यकाष्ठात्समुद्भवस्य समुत्पन्नस्य विक्रमाग्नेः चिह्नमनुमापकं लिङ्गं निर्मथ्य दारुणि रणिर्द्वयोरित्यमरः । धनुर्गुणकिणो ज्याघातरेखा धूमरेखा खलु ? कुतः यया धूमरेखया अरिपरिषदो अरिसङ्घास्ता एवमशकास्तदर्थया तन्निवृत्त्यर्थया जातं भावे क्तः । अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिष्वित्यमरः । अर्थेन सह नित्यसमासः सर्व्वलिङ्गता च वक्तव्या । किञ्च रिपुदाराणां दृगम्बुजेभ्यो नयनारविन्देभ्योऽश्रुविस्रावणाय वाष्पोद्गमाय जातं धूमकेतूदयाद्राजशोको धूमोत्पीड़नादश्रुस्रावश्चेति भावः ॥ १०३ ॥

श्यामीति । माथुरीणां मथुरानगरीजातस्त्रीणां तत्र जात इत्यण्प्रत्यये ङीप् । धौतैर्जलक्रीड़ासु क्षालितैर्मृगमदैः कस्तूरिकाभिरेवेत्युत्प्रेक्षा । श्यामीकृतां मध्यदेशे अधि मध्यदेशविशेषे अवलग्ने च विभक्त्यर्थेऽव्ययीभावः । आप्ता प्राप्ता कालियस्य कालियनागस्य महाह्रद एव नाभिः तस्याः शोभा यया ताम् अतएव भूमेः रोमावलिमिव स्थितामित्युत्प्रेक्षा कलिन्दतनयां कालिन्दीं तत्र मथुरायां विलोकयितासि विलोकयिष्यसि ॥ १०४ ॥

गोवर्द्धनाचलकलापिचयप्रचार-
निर्व्वासिताहिनि घने सुरभिप्रसूने ।
तस्मिन्ननेन सह निर्विश निर्विशङ्कं
वृन्दावने वनविहारकुतूहलानि ॥ १०५ ॥

भावी करः कररुहाङ्कुरकोरकोऽपि
तद्वल्लिपल्लवचये तव सौख्यलक्ष्यः ।
अन्तस्त्वदास्यहृतसारतुषारभानु-
शोभानुकारिकरिदन्तजकङ्कणाङ्कः ॥ १०६ ॥

गोवर्द्धनेति । गोवर्द्धनाचले ये कलापिचयाः केकिव्रजाः तेषां प्रचारेण सञ्चारेण निर्व्वासिताहिनि निष्कासितभुजङ्गमण्डले सुखसञ्चार इत्यर्थः । घने सान्द्रे निरातप इत्यर्थः । सुरभिप्रसूने फलकुसुमसमृद्धा विहारयोग्य इत्यर्थः । तस्मिन् प्रसिद्धे यत्र पुरा गोपालमूर्त्तिः कृष्णो विजहारेति भावः । वृन्दावने वृन्दाख्ये वने अनेन राज्ञा सह निर्विशङ्कं विस्रब्धं वनविहारकुतूहलानि वनक्रीड़ासुखानि निर्विश भुङ्क्ष्व निर्वेशो भृतिभोगयोरित्यमरः । साभिप्रायविशेषणत्वात्परिकरालङ्कारः ॥ १०५ ॥

भावीति । त्वदास्येनानेन हृतसारस्य हृतकान्तिसर्वस्वस्य तुषारभानोश्चन्द्रस्य या शोभा पराजयनिमित्ता पाण्डुच्छाया तदनुसारी तत्सदृशो यः करिदन्तस्तज्जः कङ्कणमङ्कश्चिह्नं यस्य सः तव करः कररुहा नखाः अङ्कुरा इवेत्युपमितसमासः । त एव कोरकाः कलिकाः यस्य सोऽपि सन्नित्यर्थः । तद्वल्लिपल्लवचये वृन्दावनलताकिसलयजाले अन्तर्मध्ये सौख्येन अनायासेन लक्ष्योऽदुर्ग्रहो भावी । अत्र पल्लवापचयकाले तत्सादृश्यात्सन्दिग्धस्य धर्मिकरस्य दन्तवलयेन निश्चयान्निश्चयान्तः सन्देहालङ्कारः ॥ १०६ ॥

तज्जः श्रमाम्बु सुरतान्तमुदा नितान्त
मुत्कण्टके स्तनयुगे तव सञ्चरिष्णुः ।
खञ्जन् प्रभञ्जनजनः पथिकः पिपासुः
पाता कुरङ्गमदपङ्किलमप्यशङ्कम् ॥ १०७ ॥
पूजाविधौ मखभुजामुपयोगिनो ये
विद्वत्कराः कमलनिर्मलकान्तिभाजः ।
लक्ष्मीमनेन दधताऽनुदिनं वितीर्णै
स्ते हाटकैः स्फुटवराटकगौरगर्भाः ॥ १०८ ॥

तज्ज इति। तस्मिन् वृन्दावने जातः तज्जः सप्तम्यां जने र्डः सुरतान्ते मुदा आनन्देन नितान्तमुत्कण्टके उत्पुलके च तव स्तनयुगे सञ्चरिष्णुः सञ्चरणशीलः खञ्जन् खोडन् विकलं गच्छन्नित्यर्थः। खञ्जेर्गतिवैकल्यार्थाल्लटः शत्रादेशः गतावित्यनुवृत्तौ विकलायान्तु द्वयं खञ्जति खोडतीति भट्टमल्लः। पिपासुस्तृषितः पथिकः सदागतिः अध्वगमनश्रान्तश्च प्रभञ्जनो वायुः स एव जनः कुरङ्गमदेन पङ्किलं सपङ्कमपि श्रमाम्बु स्वेदोदकम् अशङ्कमसङ्कोचं पाता पास्यति स्वेदं हरिष्यतीत्यर्थः। पिवतेः कर्त्तरि लुट्। यथातिश्रान्तः पान्थः कण्टकाक्लिष्टदेशस्थमपि पङ्किलमपि पाथः प्रायेण स्वोदरपूरं पिवति तद्वदिति भावः ॥ १०७ ॥

पूजेति। मखभुजां देवानां पूजाविधौ यज्ञादिकर्मणि उपयोगिनः प्रतिग्रहोपकारिणो ये विदुषां कराः पाणयः कमलानां या निर्मलकान्तिस्तद्भाजः ते विद्वत्कराः लक्ष्मीं दधता श्रीमता अनेन राज्ञा अनुदिनं प्रतिदिनं वितीर्णैर्दत्तैः हाटकैः सुवर्णैः स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकमित्यमरः। स्फुटाः उज्ज्वलाः वराटकाः कर्णिकाः बीजकोशो वराटकः कर्णिका कर्णिकश्चेति वैजयन्ती। ते गौरीः पीता अरुणा वा गर्भा अभ्यन्तराणि येषां ते कृता इति शेषः। गौरोऽरुणोऽसिते पीत इति विश्वः। कमलानां कर्णिकावत्पाणिकमलानां हाटकैस्तद्वत्त्वं सम्पादितमित्यर्थः ॥ १०८ ॥

वैरिश्रियं प्रति नियुद्धमनाप्नुवन् यः
किञ्चिन्न तृप्यति धारावलयैकवीरः ।
स त्वामवाप्य निपतन्मदनेषुवृन्द-
स्यन्दीनि तृप्यतु मधूनि पिबन्निवायम् ॥ १०९ ॥
तस्मादियं क्षितिपतिक्रमगम्यमान
मध्वानमैक्षत नृपादवतारिताक्षी ।
तद्भावबोधबुधतां निजचेष्टयैव
व्याचक्षते स्म शिबिकानयने नियुक्ताः ॥ ११० ॥
भूयोऽपि भूपमपरं प्रति भारती तां
तस्याक्षमूरुचलचक्षुषमाचचक्षे ।

वैरीति । धरावलये भूमण्डले एकवीरो यो मथुरापतिः वैरिश्रियं प्रत्यर्थिलक्ष्मीं लक्ष्मीमधिकृत्य नियुद्धं बाहुयुद्धम् आलिङ्गनमिति यावत् नियुद्धं बाहुयुद्धं स्यादित्यमरः । तदनाप्नुवन् किञ्चिदीषदपि न तृप्यति न तद्विना सन्तुष्यतीत्यर्थः । स नियुद्धप्रियोऽयं राजा त्वामवाप्य निपततां मदनेषूणामिषुकुसुमानां वृन्दात्स्यन्दन्ते स्रवन्तीति तत्स्यन्दीनि मधूनि मकरन्दान् पिबन्निव तृप्यतु अत्र मदनेषु मधुपानोत्प्रेक्षया तेषामेवेषूणां त्वत्समागमाद्रागानन्दकारित्वप्रतीतेरलङ्कारेण वस्तुध्वनिः ॥ १०९ ॥

तस्मादिति । इयं भैमी तस्मान्नृपादवतारिताक्षी निवारितदृष्टिः सती क्षितिपतीनां गन्तव्यनृपाणां क्रमेणानुपूर्व्या गम्यमानमध्वानमैक्षत अथ शिबिकानयने नियुक्ताः शिबिकावाहिनस्तस्या भावबोधे अभिप्रायज्ञाने बुधतां वैदग्ध्यं निजचेष्टया अन्यतो नयनक्रिययैव व्याचक्षते स्म ज्ञापयामासुरित्यर्थः ॥ ११० ॥

भूयोऽपीति । भारती भूयोऽप्यपरं भूपं प्रति तस्याक्षमूरुचलचक्षुषं

एतस्य काशिनृपतेस्त्ववलोक्य लक्ष्मी
मक्ष्णोर्मुदं जनय खञ्जनमञ्जुनेत्रे ! ॥ १११ ॥
एतस्य सावनिभुजः कुलराजधानी
काशी भवोत्तरणधर्म्मतरिः स्मरारेः ।
यामागता दुरितपूरितचेतसोऽपि
पापं निरस्य चिरजं विरजीभवन्ति ॥ ११२ ॥
आलोच्य भाविविधिकर्तृकलोकसृष्टि-
कष्टानि रोदिति पुरा कृपयैव रुद्रः ।

चकितहरिणचलाक्षीं तां भैमीमाचचक्षे किमिति हे खञ्जनमञ्जुनेत्रे ! खञ्जनाक्षि ! मञ्जुलाक्षीत्यर्थः । एतस्य काशिन्टपतेः काशिराजस्य लक्ष्मीं शोभामवलोक्य अक्ष्णोः सुखञ्जनय सम्पादय ॥ १११ ॥

एतस्येति । स्मरारेः संसारार्णव कर्णधारस्य सम्बन्धिनी भवोत्तरणे भवाब्धितरणे लोकानां धर्म्मतरिः धर्म्मतरिपदग्रहणात् केवलं धर्मार्था नौः स्त्रियां नौस्तरणिः स्तरिरित्यमरः । सा काशी एतस्यावनीभुजः काशीराजस्य कुलराजधानी । दुरित पूरित चेतसोऽपि यां काशीमागताश्चिरजं चिरसञ्चितं पापं निरस्य अविरजसो विरजसः सम्पाद्यमाना भवन्ति विरजीभवन्ति वीतपापा मुक्ता भवन्तीत्यर्थः । अभूततद्भावे च्विः अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्चेति सकारलोपः ॥ ११२ ॥

आलोच्येति । रुद्रो हरः भाविन्याः विधिकर्तृकाया ब्रह्मकर्तृकाया लोकसृष्टेः प्राणिजातस्य कष्टानि दुःखान्यालोच्य विचार्य्य कृपयैव न तूपाध्यन्तरेणेत्यर्थः । पुरा रोदिति अरुदत् पुरा लुङ् च स्म इति चकारात् पुरा शब्दयोगे भूतानद्यतनार्थे लट् । ननु रोदनाद्रुद्रनामाकाङ्क्षयाऽरोदीत् । यच्छ्रूयते सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमित्याशङ्क्य तद्वाक्यादिमात्रमित्याशङ्क्याह नामेच्छयेति । मिषमात्रं व्याजमात्रम् अधत्त धृतवान् कुतः यद्यस्मात् स रुद्रः संसारतारणतरिं काशीं पुरीमसृजत् ।

नामेच्छयेति मिषमात्रमधत्त यत्तां
संसारतारणतरीमसृजत् पुरीं सः ॥ ११३ ॥

वाराणसी निविशते न वसुन्धरायां
तत्र स्थितिर्मखभुजां भुवने निवासः ।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः
स्वर्गात्परं पदमुदेतु मुदे तु कीदृक् ॥ १४ ॥

सायुज्यमृच्छति भवस्य भवाब्धियाद-
स्तां पत्युरेव नगरीं नगराजपुत्र्याः ।
भूताभिधानपटुमद्यतनीमवाप्य
भीमोद्भवे ! भवतिभावमिवास्तिधातुः ॥ ११५ ॥

ततो नूनं कृपयैव अरोदीदित्युत्प्रेक्षा कृपालवो हि परदुःखेन दुःखायन्ते तत्प्रतीकरणोपायञ्च कुर्व्वन्तीति ॥ ११३ ॥

वाराणसीति । वाराणसी काशी वसुन्धरायां न निविशते भूलोकान्तःपातिनी न भवतीत्यर्थः । अतएव तत्र वाराणस्यां स्थितिर्निवासो मखभुजां भुवने निवासः स्वर्लोकनिवासः अतएव स्वर्गत्वादेव तस्मिन् तीर्थे मुक्तवपुषां त्यक्तकलेवराणां मुक्तिरपवर्ग एव । तथा हि स्वर्गात्परमधिकं पदन्तु कीदृगपवर्गादन्यादृश किं मुदे मोदाय उदेतु किञ्चिदन्यदित्यर्थः । सम्भावनायां लोट् । भूलोकवासिनां स्वर्गः तद्वासिनान्तु अपवर्ग एव परं पदं न तु स्वर्ग एवोचित इति भावः ॥११४॥

सायुज्यमिति । हे भीमोद्भवे ! भैमि ! भवाब्धियादः संसारसागरजजन्तुजातं यादांसि जलजन्तव इत्यमरः । नगराजपुत्र्याः पत्युः पार्व्वतीपतेः सम्बन्धिनीं तां नगरीं काशीमेत्य अस्तिधातुरसभुवि इत्ययं धातुर्भूताभिधान पटुं भूताभिधानसमर्थां मद्यतनीं लुङ मवाप्य अद्यतनीति लुङ् पूर्व्वाचार्य्याणां संज्ञा आर्द्धधातुकोपलक्षणमेतत् अस्तेर्भूभावस्यार्द्धधातुकाधिकारात् अद्यतनीग्रहणं तूपमानोपमेययोरभिन्नलिङ्गत्वा-

निर्विश्य निर्विशति काशिनिवासिभोगा
न्निर्म्माय नर्म्म च मिथोमिथुनं यथेच्छम् ।
गौरीगिरीशघटनाधिकमेकभावं
शर्म्मोर्म्मिकञ्चुकितमञ्चति पञ्चतायाम् ॥ ११६ ॥
न श्रद्दधासि यदि तन्मम मौनमस्तु
कथ्या निजाप्ततमयैव तवानुभूत्या ।
न स्यात्कनीयसितरा यदि नाम काश्या
राजन्वती सुदिरमण्डनधन्वना भूः ॥ ११७ ॥

येति द्रष्टव्यं भवतेति भावः । अस्तेर्भूरिति विधानाद्भूधातुत्वमिव भवस्येश्वरस्य सयुजो भावः सायुज्यं तादात्म्यमृच्छति गच्छति ॥ ११५ ॥

निर्विश्येति । काशिः काशी कृदिकारात् अक्तिनो वेति ङीष् भावः । तस्यां निवासि वास्तव्यं मिथुनं स्त्रीपुंसजातं यथेच्छं भुञ्जन्त इति भोगान् विषयान् निर्व्विशति निर्विच्छेदं यथा तथा निर्विश्योपभुज्य तथा मिथोऽन्योन्यं रहसि वा नर्म क्रीड़ाञ्च निर्म्माय कृत्वा पञ्चतायां मृतौ सत्यां गौरी गिरीशयोर्घटनादर्द्धाङ्गसङ्घटनादधिकमुत्कृष्टमेव शर्मोर्मिभिरानन्दलहरीभिः कञ्चुकितं सञ्जातकञ्चुकं निर्बाधमेकभावमेकाकिभाव मञ्चति प्राप्नोति अन्यत्र सन्न्यासादिक्लेशान्मुक्तिः इह भोगपूर्व्वकदेहत्यागमात्रादेव मुक्तिरित्यर्थः ॥ ११६ ॥

नेति । न श्रद्दधासि यदि मद्वाक्यं न विश्वसिषि चेत्तर्हि मम मौनमस्तु अहं तूष्णीमासे तव निजया आत्मीयया आप्ततमया प्रमाणभूतया अनुभूत्या अनुभावेनैव कथ्या कथनीयासि किं कथ्या वदाह सुदिरा जीमूताः घनजीमूतमुदिरेत्यमरः । तेषां मण्डनं धनुर्यस्य स तद्धन्वा देवेन्द्रः धनुषश्चेत्यनङादेशः । तेन राजन्वती सुराज्ञी भूः स्वर्गभूः राजन्वान् सौराज्य इति निपातनात्साधुः । काशीतः पञ्चमी विभक्त इति पञ्चमी । अतिशयेन कनीयसी कनीयसितरा युवाल्पयोः कन्नन्यतर-

ज्ञानाधिकासि सुकृतान्यधिकाशि कुर्य्याः
कार्य्यं किमन्यकथनैरपि यत्र मृत्योः ।
एकं जनाय सतताभयदानमन्य
दन्ये वहत्यमृतसत्रमवारितार्थि ॥ ११८ ॥
भूभर्त्तुरस्य रतिरेधि मृगाक्षि ! मूर्त्ता
सोऽयं तवास्तु कुसुमायुधएव मूर्त्तः ।

स्यामित्यल्पशब्दस्येति कनादेशः घरूपेत्यादिनाङ् यो ह्रस्वः। न स्यान्नाम यदि स्यादेवेत्यर्थः। दिवोऽधिका काशीदिवः स्थितेरधिकः काशीराज इत्यलं वार्त्ताभिः। एतत्पाणिग्रहणानन्तरमनुभव एव ते कथयिष्यतीति भावः ॥ ११७ ॥

ज्ञानेति। हे भैमि! ज्ञानेन अधिका उत्कृष्टासि भवसि अतः अधिकाशि काश्यां विभक्त्यर्थेऽव्ययीभावः। सुकृतानि सत्कर्म्माणि कुर्य्याः अथवाऽन्यकथनैः कर्त्तव्यान्तरोपदेशैरपि किं कार्य्यं प्रयोजनं न किञ्चिदित्यर्थः। यत्र काश्यां जनाय मृत्योः सकाशात् सततमविच्छिन्नाभयदानमेकमावहति वर्त्तते मृतस्दर्शिनां सद्य एव मृत्युञ्जयत्वप्राप्तेरिति। किञ्चान्यत् यत्र अनिवारिता अर्थिनो यस्मिन् तदमृतसत्रं मोक्षदानं गङ्गोदकदानञ्चावहति प्रवर्त्तते सत्रमाच्छादने यज्ञे सदा दाने वनेऽपि चेत्यमरः। अमृतं तूदके मोक्ष इत्यादि काशिमृतानां शिवसारूप्यममृतत्वञ्च सिद्धमित्यन्यत्र जीवनात् काश्यां मरणमेव वरमिति भावः ॥ ११८ ॥

भूभर्त्तुरिति। हे मृगाक्षि! त्वमस्य भूभर्त्तुः काशीराजस्य मूर्तामूर्तिमती रविः रतिरेधिभव अस्तेः सिचि हेर्धिरादेशे ध्वसोरेद्धावभ्यासलोपश्चेत्येकारादेशः। सोऽयं राजा च तव मूर्त्तौ मूर्त्तिमान् कुसुमायुधः काम एवास्तु किञ्च युवां पुरा विरुद्धं द्विष्टं गिरिशमीश्वरं आराद्धुं आराध-

भातञ्च ताविव युवां गिरिशं विरुद्ध
माराद्धमाशु पुरि तत्र कृतावतारौ ॥ ११९ ॥
कामानुशासनशते सुतरामधीती
सोऽयं रहो नखपदैर्महतु स्तनौ ते ।
रुष्टाद्रिजाचरणकुङ्कुमपङ्कराग-
सङ्कीर्णशङ्करशशाङ्ककलाङ्ककारैः ॥ १२० ॥
पृथ्वीश एष नुदतु त्वदनङ्गताप
मालिङ्ग्य कीर्त्तिचयचामरचारुचापः ।
संग्रामसङ्गतिविरोधिशिरोधिदण्ड-
खण्डिक्षुरप्रसरसंप्रसरत्प्रतापः ॥ १२१ ॥

यितं तत्र पुर्य्याङ्काश्यां कृतावतारौ रतिकामाविव विभातं विराजतं च भातेर्लोटि थसस्तामादेशः ॥ ११९ ॥

कामेति । कामानुशासनानां कामशास्त्राणां शते अधीतमनेनेत्यधीती इष्टादिभ्यश्चेति इनिप्रत्यये सप्तमी विधाने क्तस्येन् विषयस्य कर्मण्युपसङ्ख्यानमिति सप्तमी । सोऽयं राजा रुष्टा कुपिता अद्रिजा पार्व्वतीतस्याश्चरण कुङ्कुमपङ्करागेण सङ्कीर्णा प्रणामकाले रूषिता तया शङ्करशशाङ्ककलया अङ्ककारैः कलङ्ककारिभि स्तदनुकारिभिरित्यर्थः । कर्मण्यण् । रितिविश्वः । अङ्कः कलङ्कचिह्नयो नखपदैस्ते स्तनौ महतु पूजयतु अलङ्करोत्वित्यर्थः । मह पूजायामिति धातोर्भौवादिकाल्लोट् ॥ १२० ॥

पृथ्वीश इति । कीर्त्तिचयएव चामरत्वेन चारुश्चापो यस्य सः चापलब्धकीर्त्तिरित्यर्थः । अतएव सङ्ग्रामे सङ्गतानां विरोधिनां शिरोधिदण्डान् कण्ठनालान् खण्डयन्तीति तेषां क्षुरप्राणां शरविशेषाणां सरेण प्रसरेण सम्प्रसरत्प्रसादः एष पृथ्वीशःआलिङ्ग्य तवानङ्गतापं नुदतु नयतु समरसुरतयोः समरस इति भावः ॥ १२१ ॥

वक्षस्त्वदुग्रविरहादपि नास्य दीर्णं
वज्रायते पतनकुण्ठितशत्रुशस्त्रम् ।
तत्कन्दकन्दलतया भुजयोर्न तेजो-
वह्निर्नमत्यरिवधूनयनाम्बुनापि ॥ १२२ ॥

किं न द्रुमा जगति जाग्रति लक्षसंख्या
स्तुल्योपनीतपिककाकफलोपभोगाः ।
स्तुत्यस्तु कल्पविटपी फलसंप्रदानं
कुर्वन् स एष विबुधानमृतैकवृत्तीन् ॥ १२३ ॥

वक्ष इति। हे भैमि! तवोग्राद्विरहादपि न दीर्णम् अविकीर्णन्तथा पतनेन कुण्ठितानि प्रतिहतानि शत्रूणां शस्त्राण्यायुधानि येन तदस्य वक्षो वज्रायते वज्रमिवाचरति स्वदूक्तिरियं वज्रमेवेत्यर्थः। अन्यथा कथमीदृगभेद्यं स्यादिति भावः। आचारक्यङन्ताल्लट्। तदङ्गमेव कन्दो मूलं तत्कन्दलतया तत्प्ररोहत्वेन हृदयदार्ढ्यमूलत्वाद्भुजतेजस इति भावः। भुजयोस्तेजोवह्निः प्रतापाग्निः अरिवधूनयनाम्बुनापि न नमति न शाम्यतीत्यर्थः। वज्राग्नेरविधनत्वादिति भावः। अत्र भुजतेजसोऽनम्बुहार्यत्वेन वज्रायितवक्षः कार्यताद्वारादन्यतेजस्त्वोत्प्रेक्षयाउत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ १२२ ॥

किमिति। तुल्यं निर्विशेषं यथा तथोपनीतः सम्पादितः पिकानां काकानाञ्च फलोपभोगो यैस्ते पात्रापात्रतुल्यफलविनियोगा इत्यर्थः। लक्षसंख्या द्रुमाः जगति न जाग्रति किं? न स्फुरन्ति किं? स्फुरन्त्येवेत्यर्थः। किन्त्वमृतैकवृत्तीन् सुधैकजीवनान् विबुधान् देवान् विदुषश्च फलसम्प्रदानमभीप्सितार्थं प्रतिपादयितुः कुर्वन् सर्वामरमनोरथपूरकः स एष कल्पविटपी कल्पवृक्षः स्तुत्यः स एक एव स्तोत्रार्हो नान्य इत्यर्थः। कल्पवृक्षकल्पोऽयं काशिराज इत्यर्थः। अत्राप्रस्तुतकल्पवृक्षकथनात्प्रस्तुतकाशिराज-

अस्मै करं प्रवितरन्तु नृपा न कस्मा
दस्यैव तत्र यदभूत् प्रतिभूः कृपाणः ।
दैवाद्यदा प्रवितरन्ति न ते तदैव
नेदंकृपा निजकृपाणकरग्रहाय ॥१२४॥
एतद्बलैः क्षणिकतामपि भूखुराग्र-
स्पर्शायुषां रयवशादसमापयद्भिः ।
दृक्पेयकेवलनभःक्रमणप्रवाहै
र्वाहैरलुप्यत सहस्रदृगर्वगर्वः ॥ १२५ ॥

प्रतीतेरप्रस्तुतप्रशंसालङ्कारः। अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते। अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रितेति लक्षणात् ॥ १२३ ॥

अस्मै इति। अस्मै राज्ञे नृपाः प्रतिनृपाः कस्मात्कारणात्करं बलिं न प्रवितरन्तु न दद्युः सम्भावनायां लोट् असम्भावित मेतदित्यर्थः। कुतः यद्यस्मात्तत्र करदाने अस्यैव कृपाणः खड्गः प्रतिभूर्लग्नकोऽभूत्। स्युर्लग्नकाः प्रतिभुव इत्यमरः। अत्र कृपाणस्य प्रतिभूत्वं व्यनक्ति यदा दैवात्ते नृपाः करं न प्रवितरन्ति तदैव निजकृपाणस्य करेण हस्तेन ग्रहाय ग्रहणाय अन्यत्र निजकृपाणात् प्रतिभूसकाशात्करस्य बलेर्ग्रहणाय आग्रहे सतीति शेषः। बलिहस्तांशवः करा इत्यमरः। अस्य कृपा इदंकृपा सा न निष्कृपः कृपाणं प्रयुङ्क्ते इत्यर्थः। कृपाणपातभीत्यैव करदानात्तस्य प्रातिभाव्यव्यपदेश इति भावः ॥ १२४ ॥

एतदिति। एतद्बलैः एतत्सैन्यै रयवशाद्वेगावेशाद्भुवः खुराग्राणाञ्च ये स्पर्शाः संयोगास्तेषां यान्यायूंषि जीवितानि तेषां क्षणिकतां क्षणमात्रस्थायितामप्यसमापयद्भिः अनिवर्त्तयद्भिः क्षणिकत्वाददृश्यभूस्पर्शैरित्यर्थः। किन्तु दृक्पेया अविच्छिन्नतया दृष्टिग्राह्याः केवला नभःक्रमणप्रवाहाः नभोगतिपरम्परा येषां तैः केवलखेचरैरित्यर्थः। ईदृशै र्वाहै र्वाजिभिः सहस्रदृगर्वणः सहस्राक्षवाजिनः उच्चैःश्रवसो गर्वः

तद्वर्णनासमयएव समितलोक-
शोभावलोकनपरा तमसौ परासे ।
मानी तया गुणविदा यदनादृतोऽसौ
तद्भूभृतां सदसि दुर्यशसेव मम्लौ ॥ १२६ ॥

सानन्तानाप्य तेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाज-
श्चित्तेनाशापुषस्तान् सममसमगुणान्मुञ्चती गूढभावा ।

वाजिवाहार्व गन्धर्व्व इत्यमरः । अलुप्यत लोपितः सहस्राक्षस्य त्वेकएव खेचरोऽश्वः अस्य त्वेतादृशाः परः सहस्रा इति भावः ॥ १२५ ॥

तदिति । असौ दमयन्ती तस्य काशीराजस्य वर्णनासमये स्तोत्रकाल एव समेतलोकानां मिलितजनानां शोभावलोकनपरा सती तं काशीराजं परासे व्याजेन परिजहारेत्यर्थः । उपसर्गादस्यत्यूह्योर्वा वचनमित्यस्यते स्तङि लिट् । मानी अभिमानी असौ राजा गुणविदा गुणज्ञया तया भैम्या अनादृत इति यत् तत्तस्मादनादरणादेव भूभृतां राज्ञां सदसि दुर्यशसा दुष्कीर्त्येव मम्लौ वैवर्ण्यङ्गत इत्यर्थः ॥ १२६ ॥

सेति । शुभाङ्गी सुगात्री षडङ्गयुक्ता सा दमयन्ती अनन्तानपरिमितान् दिष्टभाजो भाग्यभाजः चित्तेनाशामभिलाषं पुष्णन्तीत्याशापुषः भैमीं कामयमानानित्यर्थः । तान् प्रसिद्धानसमगुणानसाधारणशौर्यादिगुणान् तेजसः सखायस्तेजःसखास्तेजस्विन इत्यर्थः । राजाहःसखिभ्यष्टच् । ते निखिला मरुतो देवा इन्द्रादयः पार्थिवाश्च तानाप्य प्राप्य समं युगपन्मुञ्चती परिहरन्ती उपनिषत्पक्षे तु सानन्तानाकाशसहितान् अनन्तं सुरवर्त्म खमित्यमरः । दिष्टभाजः कालयुक्तान् दिष्टं भाग्ये च काले च इति विश्वः । चित्तेन मनसा सह आशापुषो दिग्युक्तान् आशा दिगतितृष्णयोरिति वैजयन्ती । असमगुणान् न्यूनाधिकसङ्ख्यातरूपरसादिगुणकान् अपां विकारः आप्यस् द्वे आप्यमम्मयमित्यमरः । आप्यञ्चेति चान्द्रसूत्रनिपातनात्साधुः । तेजःसखाः

पारेवाग्वर्त्ति रूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी
निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः ॥१२७॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुत
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम्।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
काव्येऽस्मिन् निषधेश्वरस्य चरिते सर्गो निसर्गोज्ज्वलः ॥१२८॥

तेजोद्रव्यसहिताः मरुद्वायुः मरुतौ पवनामरौ इत्यमरः। पार्थिवा पृथिवीविकाराः अत्राप्यपार्थिवशब्दौ तद्धितावपि प्रकरणात्प्रकृत्यर्थमात्रपरौ द्रष्टव्यौ। तान् मुञ्चती तार्किकोक्तपृथिव्यादिनवद्रव्येष्वात्मातिरिक्तद्रव्याष्टकस्य श्रुतिवाक्यै निषेधं कुर्व्वतीत्यर्थः। गूढभावा निगूढाभिप्राया पारे वाचां पारेवाक् पारे मध्ये षष्ठ्या वेत्यव्ययीभावः। तद्वर्त्ति रूपं सौन्दर्यं यस्य तम् अन्यत्र यतोवाच इत्यादि श्रुतेः। वाङ्मनसातीतं चिदम्भोधिं ज्ञानाकरम् अन्यत्र तद्रूपम्। एकमद्वितीयं निःसीमा आनन्दो यस्येति बहुव्रीहिः। अन्यत्र कर्म्मधारयः। तं पुरुषं पुमांसं परमात्मानञ्च अनु तं लक्षयित्वा तं प्रतीत्यर्थः। अनुर्लक्षण इति कर्म्मप्रवचनीयत्वात् द्वितीया। भूयो भूयिष्ठम् तत्परा आसक्ता भूत्वा तत्परीभूय उपनिषद्वेदान्तवाक् उपमानं यस्याः तदुपमा तत्कल्पा आसीदिति श्लिष्टविशेषणेयमुपमा श्लेष एवेति केचित् स्रग्धरावृत्तम्॥ १२८ ॥

श्रीहर्षमित्यादि। शृङ्गार एवामृतं तस्य शीतगौ चन्द्रे शीता गावः किरणा यस्य सः शीतगुः तस्मिन् गोस्त्रियो रुपसर्ज्जनस्येति ओकारह्रस्वः ॥ १२८ ॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां एकादशः सर्गः ॥

द्वादशः सर्गः ।

प्रियाह्रियालम्ब्य विलम्बमाविला
विलासिनः कुण्डिनमण्डनायितम् ।
समाजमाजग्मुरथो रथोत्तमा-
स्तमासमुद्रादपरेऽपरे नृपाः ॥ १ ॥

ततः स भैम्या ववृते वृते नृपैर्विनिःश्वसद्भिः सदसि स्वयम्बरः।
चिरागतैस्तर्किततद्विरागितैः स्फुरद्भिरानन्दमहार्णवैर्नवैः॥२॥

अथास्मिन्नवसरे पुनरन्ये राजानः समायाता इत्याह प्रियेति। अथो अनन्तरं मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः। प्रियायां स्वकान्तायां विषये ह्रिया सङ्कोचेन दाक्षिण्येनेति यावत् विलम्बं आलम्ब्य आविलाः व्यग्राः विलासिनो विलसनशीलाः वीकषलसकत्थस्रम्भ इति घिणुन् प्रत्ययः। रथैरुत्तमाः रथोत्तमाः महारथाः परे श्रेष्ठाः अपरे अन्ये नृपाः आसमुद्रात् समुद्रपर्यन्तादपादानात् कुण्डिनस्य कुण्डिननामनगरस्य मण्डनायितं अलङ्कारभूतं मण्डनशब्दादाचारक्यङन्तात् कर्तरि क्तः। तं समाजं राजसभामाजग्मुः आपुः अत्र विलाविलेत्यादौ नियमेनासकृद्द्वयं जनयुग्मावृत्त्या छेकानुप्रासः अन्यत्रानियमाद्वृत्त्यनुप्रास इत्युभयोः संसृष्टिः संख्यानियमे पूर्वं छेकानुप्रासः अन्यथा वृत्त्यनुप्रास इति लक्षणात् ॥ १ ॥

तत इति। ततो राजान्तरागमनानन्तरं तर्किता तद्विरागिता भैमीवैराग्यं यैस्तैर्निश्चितभैम्यपरागैः अतएव विषादात् विनिःश्वसद्भिश्चिरागतैः पूर्वागतैर्नृपैस्तदा स्फुरद्भिः प्रकाशमानैरानन्दमहार्णवैर्दमयन्तीमाप्त्याशया परमानन्दभरितैर्नरैश्च नृपैर्वृते सदसि सः प्रकृतः स्वयम्बरः ववृते प्रवृत्तः ॥ २ ॥

चलत्पदस्तत्पदयन्त्रणेङ्गितस्फुटाशयामासयति स्म राजके।
श्रमं गता यानगतावपीयमित्युदीर्य धुर्य्यः कपटाज्जनीञ्जनः॥३
नृपानुपक्रम्य विभूषितासनान् सनातनी सा सुषुवे सरस्वती।
विगाह्यमारभ्य सवस्वतीः सुधासरःस्वतीवार्द्रतनूरनूत्थिताः॥४॥
वृणीष्व वर्णेन सुवर्ण केतकीप्रसूनपर्णादृतुपर्णमादृतम्।
निजामयोध्यामपि पावनीमयं भवन्मयो ध्यायति नावनीपतिः॥५

चलदिति। चलत्पदः क्वचित् स्थितिकालेऽप्युत्तमाश्ववदेकत्रानवस्थितचरण इति भारवाहिस्वभावोक्तिः। धुरं वहतीति धुर्यो जनो यानिजनः धुरो यड्ढकाविति यत्प्रत्ययः। तस्याः भैम्याः पदयन्त्रणेङ्गितेन पादनोदनचेष्टितेन स्फुटः आशय उपवेशनाभिप्रायो यस्याः तां जनीं वधूं जनी सीमन्तिनीवध्वोरिति विश्वः। इयं बाला यानेन गतावपि श्रमं गता श्रान्तेत्युदीर्य कपटात् श्रमव्याजात् राजके राजसमूहे आसयतिस्म उपवेशयामास ॥ २ ॥

नृपानिति। सनाभवा सनातनी सनाशब्दात्सायंचिरमित्यादिना ट्यु प्रत्यये ङीप्। सरस्वती वाग्देवता विभूषितासनान् अलङ्कृतसिंहासनानुप्रविष्टानित्यर्थः। नृपानुपक्रम्य सुधासरःस्वमृतरसीसु विगाह्यमारभ्यावगाह्य प्राप्य अनन्तरमनूत्थिता निर्गताः अतीवार्द्रतनूरमृतार्द्रस्वाङ्गाः सर्वाङ्गाः तद्वदमृतवर्षिणीरित्यर्थः सरस्वतीर्गिरः सुषुवे ॥ ४ ॥

वृणीष्वेति। वर्णेनाङ्गकान्त्या सुवर्णकेतकीप्रसूनस्य पर्णाद्दलादृतं ततोऽप्यधिकस्पृहणीयं पञ्चमी! ऋतुपर्णं ऋतुपर्णाख्यं नृपं वृणीष्व भवत्येव भवन्मय स्तदात्मकः स्वार्थे मयट् प्रत्ययः। सर्वनाम्नो वृत्तिमात्रे पुम्वत् भावः। अयमवनपतिः पावनीं पवित्रकरणीं निजामयोध्यां अयोध्यानगरीमपि न ध्यायति न चिन्तयति ॥ ५ ॥

न पीयतां नाम चकोरजिह्वया कथञ्चिदेतन्मुखचन्द्रचन्द्रिका ।
इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशौ ॥६॥
अपां विहारे तव हारविभ्रमं करोतु नीरे पृषदुत्करस्तरन् ।
कठोरपीनोच्चकुचद्वयीतटे त्रुटत्तरः सारवसारवोर्म्मिजः ॥७॥
अखानि सिन्धुः समपूरि गङ्गया कुले किलास्य प्रसभं स भंत्स्यते ।

नेति । एतन्मुखचन्द्रचन्द्रिका चकोरस्य जिह्वया कथञ्चिदपि न पीयतां नाम पाययितुमशक्यत्वादिति भावः । तथापि भवन्मुखस्पृशी भवन्मुखवर्त्तिनी त्वच्चक्षुरात्मना परिणते इत्यर्थः स्पृशोऽनुदके क्विप् । चकोरस्य चक्षुषी कर्म्मणी इमामेतन्मुखचन्द्रिकां किं चिरन्नाचामयसे न पाययसे जिह्वया चक्षुषा च किमिति न पीयते किमित्येनं न पश्यसीत्यर्थः । चमेः प्रत्यवसानार्थत्वाद्गतिबुद्धीत्यादिना चक्षुषोरणिकर्तुः कर्म्मत्वं निगरणचलनार्थेभ्यश्चेति चमेर्णिचि परस्मैपदनियमादात्मनेपदं चिन्त्यं । अत्र भवन्मुखस्पृशोश्चकोरचक्षुषोरिति विषये निगरणे भैमीचकोरचक्षुषोरभेदप्रतीतेः भेदे अभेदलक्षणादतिशयोक्तिरलङ्कारः ॥ ६ ॥

अपामिति । हे भैमि ! तवापां विहारे जलक्रीड़ायां नीरे जले तरन् प्लवमानः त्रुटत्तरोऽत्यन्तं त्रुटन्नतिझर्झरः सारवेष्वारवसहितेषु सारवेषु सरयूभवेषूर्म्मिषु जातः देविकायां सरय्वाश्च भवेदाविकसारवावित्यमरः । दाण्डिनायनेत्यादिना निपातनात्साधुः । पृषदुत्करो विन्दुसन्दोहः कठोरे कठिने पीने पीवरे उच्चे उन्नते कुचद्वयीतटे हारविभ्रमं मुक्ताहारभ्रान्तिं करोतु इति भ्रान्तिमदलङ्कारः ॥ ७ ॥

अखानीति । अस्य ऋतुपर्णस्य सिन्धुरुदधिरखानि खातः खनतेः कर्म्मणि लुङ् । एतत्कुल्यैः सगरसुतैः उत्पादित इत्यर्थः स सागरो गङ्गया भागीरथ्या समपूरि पूरितः एतत्कुल्येनैव भगीरथेनेति शेषः । स सिन्धुः प्रसभं बलात्कारेण भंत्स्यते एतत्कुल्येनैव रामेण बद्धः करिष्यते । कर्म्मणि लृट् । कृतयुगापेक्षया त्रेताया भावित्वात् भविष्यत्प्रयोगः । अस्य

विलङ्घ्यते चास्य यशःशतैरहो सतां महत्सम्मुखधावि पौरुषम्
एतद्यशःक्षीरधिपूरगाहि पतत्यगाधे वचनं कवीनाम्।
एतद्गुणानां गणनाङ्कपातःप्रत्यर्थिकीर्त्तीः खटिकाः क्षिणोति॥९
भास्वद्वंशकरीरतां दधदयं वीरः कथं कथ्यता-
मध्युष्टापि हि कोटिरस्य समरे रोमाणि सत्त्वाङ्कुराः।
नीतः संयति वन्दिभिः श्रुतिपथं यन्नामवर्णावली-

ऋतुपर्णस्य यशःशतैर्विलङ्घ्यते च तथाहि सतां सज्जनानां महत्पौरुषं सम्मुखं धावतीति सम्मुखधावि महतामेव विश्वपुरुषकारः स्वयमेवाभिमुखमायाति न प्रयाससाध्य इत्यर्थः ॥ ८ ॥

एतदिति। एतस्य राज्ञः यश एव क्षीरधिः क्षीराब्धिः तस्य पूरं प्रवाहं गाहत इति तद्गाहि तद्वर्णनप्रवृत्तमित्यर्थः कवीनां वचनमगाधे गम्भीरे पतति मज्जति न तु निःशेषं वर्णयितुं शक्नोतीत्यर्थः किं च एतद्गुणानां गणनाङ्कपातः संख्यानरेखाविन्यासः प्रत्यर्थिकीर्तीरेव खटिकाः लेखनकनिकाः क्षिणोति कर्षयति एतद्गुणवृद्धेः प्रत्यर्थिकीर्तिनिरोधायकत्वादित्यं निर्देशः ॥ ९ ॥

भास्वदिति। भास्वद्वंशकरीरतां सूर्यकुलाङ्कुरत्वं उज्ज्वलवंशाङ्कुरत्वञ्च दधत् वंशाङ्कुरे करीरोऽस्त्री द्वावंशौ कुलमस्कराविति चामरः। वीरः शूरोऽयमृतुपर्णः कथं कथ्यतां कथयितुमशक्य इत्यर्थः। तथाहि अस्य राज्ञः समरे प्रसक्तौ अध्युष्टा आधिक्यविशिष्टा कोटिरित्यर्थः तिस्रः कोट्योऽर्द्धकोटी च यूनि रोमाणि मानवे इत्यादि स्मरणात्। विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोरिति संख्येयेऽप्येकवचनम्। रोमाणि सत्त्वं व्यवसाय उत्साहो वीरस्य स्थायीभाव स्तस्याङ्कुरा वहिरुद्गताः वीररसाङ्कुरा एवेत्युत्प्रेक्षा। द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु इत्यमरः। वंशकरीरस्य समन्तादुपाङ्कुरप्रादुर्भावो युक्त इत्यर्थः

मन्त्रः स्तम्भयति प्रतिक्षितिभृतां दोस्तम्भकुम्भीनसान् ॥१०॥
तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां
शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः ।
व्योमव्यापिविपक्षराजकयशस्ताराः पराभावुकः
कासामस्य न स प्रतापतपनः पारङ्गिरां गाहते ॥ ११ ॥
द्वेष्याकीर्त्तिकलिन्दशैलसुतया नन्दाऽस्य यद्दोर्द्वयी-
कीर्त्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे ।

अतएव सम्प्रति युद्धे वन्दिभिर्वैतालिकैः श्रुतिपथं कर्णपथं नीतः श्रावित इत्यर्थः यस्यर्तुपर्णस्य नामवर्णावली नामाक्षरपंक्तिरेव मन्त्रः प्रतिक्षितिभृतान्दोः स्तम्भानेव कुम्भीनसाः सर्पाः तान् कुम्भीनसो लेलिहान इत्यमरः । कुम्भीनसो लेलिहान इति वैजयन्ती । स्तम्भयति प्रतिबध्नाति ॥ १० ॥

तादृगिति । तादृक् दीर्घस्य चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते इत्युक्तमहापरिमाणस्य विरिञ्चेः ब्रह्मणो वासरस्य विधौ विधाने यस्य प्रतापतपनस्य कर्तृता न तु प्रसिद्धतपनस्येत्यर्थः कल्पान्तावस्थायी यस्य प्रताप इति भावः । तां जानामीत्युत्प्रेक्षायाम् । अम्बुधिपयःपूरस्योदरे अभ्यन्तरे वाडवो वड़वानलो यस्य प्रतापतपनस्य प्रतिबिम्बमेव शङ्के इत्युत्प्रेक्षायां । व्योमव्यापिन्यो याः विपक्षस्य विरोधिनो राजकस्य राजसमूहस्य यशांस्येव तारा नक्षत्राणि ताः पराभावुकः लषपतेत्यादिना उकञ् प्रत्यये न लोकेत्यादिना षष्ठीप्रतिषेधात्कर्मणि द्वितीया । सर्वव्यापी अस्य राज्ञः प्रताप एव तपनः कासाङ्गिरां पारं परभागं न गाहते सर्वासामपि गाहते न कासामपि गोचर इत्यर्थः ॥ ११ ॥

द्वेष्येति । यद्यस्मादस्य राज्ञो दोर्द्वयी कीर्तिश्रेणिमयी भुजयुगयशः परम्परारूपा नन्दागङ्गा भागीरथी रणप्राङ्गणे द्वेष्याणां द्विषामकीर्ति

तत्तस्मिन्विनिमज्य बाहुजभटैरारम्भि रम्भापरी-
रम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः ॥ १२ ॥
इति श्रुतिस्वादिततद्गुणस्तुतिः सरस्वतीवाङ्मयविस्मयोत्थया।
शिरस्तिरःकम्पनयैव भीमजा न तं मनोरन्वयमन्वमन्यत ॥१३॥
युवान्तरं सा वचसामधीश्वरा स्वरामृतन्यक्कृतमत्तकोकिला।

रधर्म्म इति तद्विरुद्धार्थत्वादपकीर्त्तिः सैव कलिन्दतनया कालिन्दी तया समागमसमात् तत्तस्मात्तस्मिन् गङ्गायमुनासङ्गमे विनिमज्ज्य बाहुजभटैः क्षत्रियभटैः बाहुजः क्षत्रियो विराडित्यमरः। रम्भायाः परीरम्भानन्द आनन्दसुखं उपसर्गस्य घञि मनुष्ये बहुलमिति दीर्घः। तस्य निकेते स्थाने नन्दनवने क्रीडादराडम्बरो विहारेच्छाविजृम्भणमारम्भि आरब्धः। एतद्विरोधिनां मरणमेव शरणमिति भावः। अत्र कीर्त्यपकीर्त्त्योर्गङ्गायमुनारोपाद्रूपकालङ्कारः। सितासिते सरितौ यत्र सङ्गते तत्राप्लुतास्ते दिवमुत्पतन्ति एवैतन्वां विसृजन्ति धीरास्ते जनास्ते अमृतत्वं भजन्ते इति श्रुतिरत्र प्रमाणम् ॥१२॥

इतीति। भीमजा भैमी दमयन्ती इतीत्थं श्रुतिस्वादिता श्रोत्रगृहीता तस्यर्तुपर्णस्य गुणानां स्तुतिः यया सा सती सरस्वत्या देव्या वाङ्मये विषये यो विस्मयः तदुत्थया शिरस स्तिरःकम्पनयैव मनोरन्वयं मनुसन्तानन्त मृतपर्णन्नान्वमन्यत न्यषेधीत् इत्यर्थः विस्मयाभिनयशिरःकम्प एव प्रसङ्गान्निषेधार्थोऽपि संवृत इति भावः ॥ १२ ॥

युवेति। स्वर एवामृतं तेन न्यक्कृतमत्तकोकिला सा वचसामधीश्वरा वाग्देवता अन्यं युवानं युवान्तरं सुप्सुपेति समासः। तस्य यूनो दिशा-दिग्भागेन संसक्ताकारा व्यावृत्तहस्ता हस्तेन तं निर्दिशन्तीवेत्यर्थः निशापतिज्ञातिमुखीं तत्सदृशमुखीमित्यर्थः ज्ञातिसोदरबन्ध्वादयः

शशंस संसक्तकरेव तद्दिशा निशाकरज्ञातिमुखीमिमां प्रति॥१४
न पाण्ड्यभूमण्डनमेणलोचने! विलोचनेनापि नृपं पिपाससि।
शशिप्रकाशाननमेनमीक्षितुं तरङ्गयाऽपाङ्गदिशा दृशस्त्विषः॥१५
भुवि भ्रमित्वाऽनवलम्बमम्बरे विहर्त्तुमभ्यासपरम्परापरा।
अहोमहावंशममुं समाश्रिता सकौतुकं नृत्यति कीर्त्तिनर्त्तकी॥१६
इतो भिया भूपतिभिर्वनं वना-
दटद्भिरुच्चैरटवीत्वमीयुषी।

सादृश्यवाचका इत्याहुः। इमां भैमीं प्रति शशंस तामासन्त्याचख्यावित्यर्थः ॥ १४ ॥

नेति। हे एणलोचने! मृगाक्षि! पाण्ड्यानां भूमण्डनं चूडामणिं तेषु श्रेष्ठं नृपं विलोचनेनापि न पिपाससि पातुं नेच्छसि सुखेन तु कुत इति भावः। किन्तु शशिप्रकाशाननमिन्दुसुन्दरास्यं एनमीक्षितुमपाङ्गदिशा कटाक्षमार्गेणापि दृशस्त्विषो दृक्कान्तीस्तरङ्गय प्रवर्त्तय ॥ १५ ॥

भुवीति। कीर्तिरेव नर्तकी लासिकी शिल्पिनी ष्वुन् इत्यत्र नृतिखनिरञ्जनापरिगणानां नृत्यतेः ष्वुन्प्रत्ययः षिद्गौरादिभ्यश्चेति ङीप्। भुवि भूतले भ्रमित्वा भूचारीकृत्वेत्यर्थः अथाम्बरे अनवलम्बमनवष्टम्भं विहर्तुं नर्तितुमभ्यासानां परम्परा परं प्रधानं यस्याः सा सती अम्बरचारी अभ्यस्येत्यर्थः महावंशं महाकुलीनं महावेणुञ्च वंशो वेणौ कुले वर्गे इति विश्वः। अमुं पाण्ड्यमाश्रिता सती सकौतुकं नृत्यति अहो रूपकालङ्कारः ॥ १६ ॥

इतइति। इतोऽस्माद्भिया वनादटद्भिः भ्रमद्भिः भूपतिभिः प्रतिभूपैः उच्चैरटवीत्वं कालवशान्महाटवीत्वमीयुषी प्राप्ता सा पूर्वानुभूता निजा पुर्यपि चिरात् पुनरवापि प्राप्ता स्वं स्वकीयं निवासमन्दिरं

निजापि साऽवापि चिरात्पुनः पुरी
पुनः स्वमध्यासि विलासमन्दिरम् ॥ १७ ॥
आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्त्तिः
सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः ।
वीरादस्मात्परः कः पदयुगयुगपत्पातिभूपातिभूय-
श्चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्दुः ॥ १८ ॥
भङ्गाकीर्त्तिमषीमलीमसतयाप्रत्यर्थिसेनाभट-

क्रीड़ागृहञ्च पुनरध्यासि अध्यासितं आसेरधिपूर्वात् कर्म्मणि लुङ्। विलेष्वासत इति विलासा विलेशया स्तेषां मन्दिरमिति विशेषणत्वेनापि योज्यं। अत्रैकस्यादिवर्गस्य क्रमादनेकास्वटवीष्वटवीभूतपुरीषु च वृत्तेन तथा पुरीष्वपि पुरीत्वाटवीत्वयोः क्रमसम्बन्धोक्त्या च एकमनेकस्मिन्ननेकमेकस्मिन्वा क्रमेण पर्याय इत्युक्तलक्षणं पर्यायभेदद्वयं द्रष्टव्यम् ॥ १७ ॥

आसीदिति। वीरादस्मात्पाण्ड्यात् परोऽन्यः को वीर आसीमान्तात् अभिविधावव्ययीभावः। भूमिवलयस्य मलयजालेपनेपथ्यं चन्दनचर्चाप्रसाधनभूता कीर्तिर्यस्य सः सप्तानामकूपारपाराणां समुद्रपरतीराणां समाहारः सप्ताकूपारपारी तद्धितार्थेत्यादिना समाहारद्विगौ ङीप्। सैव सदनं येषां ते स्तत्स्थैर्जनैः घनं निरन्तरमुद्गीतश्चापप्रतापो यस्य सः पदयुगे युगपत्पातिनां भूपानामतिभूयांसि चूड़ारत्नान्येवोडवस्तासामेव पत्नीनां करा अंशवो हस्ताश्च बलिहस्तांशवः करा इत्यमरः। तेषां परिचरणेन परामर्शेनामन्दमतिमात्रं नन्दन्तः उल्लसन्तः नखा एवेन्दवो यस्य स आसीत् दिगन्तविश्रान्तप्रतापः समस्तराजवन्द्यश्चायमेव नान्यः कश्चिदित्यर्थः ॥ १८ ॥

भङ्गेति। अस्य पाण्ड्यस्य प्रताप एवानलः भङ्गेन पराजयेन

श्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः ।
अस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं
भालोद्भूतभवाक्षिभानुहुतभुग्जम्भारिदम्भोलयः ॥ १९ ॥

एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः ।
पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियम् ॥ २० ॥

या अकीर्तिः सैव मषी तया मलिमसतया प्रत्यर्थिसेनाभटश्रेणय एव तिन्दुककाननानि कालस्कन्दवनानि तिन्दुकः स्फूर्जकः कालस्कन्दश्च शितिसारक इत्यमरः। तेषु विलसति प्रज्वलति भालोद्भूतभवाक्षि हरनिटलनेत्रञ्च भानुश्च सूर्यश्च हुतभुगग्निश्च जम्भारिदम्भोलिः कुलिशश्च ते अस्मात्तिन्दुकाग्नेः उत्पतिता उत्थिताः स्फुलिङ्गाः अग्निकणाः जगदुत्सङ्गे जगदुपरि स्फुरन्ति स्फुटं असंशयमित्युत्प्रेक्षा रूपकसङ्कीर्णा । तिन्दुककाष्ठेभ्यो दह्यमानेभ्यो महान्तः स्फुलिङ्गाश्च उत्तिष्ठन्तीति ॥ १९ ॥

एतदिति । एतस्य पाण्ड्यास्योपस्य भयङ्करस्य समरस्य प्रेक्षायैव प्रेक्षणाय गुरोश्च हल इति स्त्रियामप्रत्यये टिप् । उपनम्राणामुपगतानां अमराणां श्रेण्यां तन्मध्ये चरतीति तथोक्तः स्वयमपि तद्द्रष्टुमागत इत्यर्थः पृथुर्वैण्यनाम पृथ्वीन्द्रः संग्रामाङ्गणसीम्नि रणाजिरभूमौ जङ्गमाः सञ्चारिणो गिरीणां स्तोमाः समूहा इति भ्रममादधत इति तथोक्तैस्तथा भ्रान्तिजनकैरित्यर्थः अतएव भ्रान्तिमदलङ्कारः । एतस्य पाण्ड्यस्य दन्तिबलैर्गजघटाभिः आलिङ्गिताङ्गीमाक्रान्तस्वरूपां निखिलां भुवं विलोक्य पुनः क्षितिधराणां क्षेपाय धनुषा प्रोत्सारणाय धियं धत्ते नूनमिति शेषः अतो गम्योत्प्रेक्षा पूर्वोक्तभ्रान्तिमदलङ्कारोत्थितेति सङ्करः तेनैतत्सेनागजाः गिरिसमानसंख्यापरिमाणा इति गम्यते

अशंस दासीङ्गितविद्विदर्भजामितो ननु स्वामिनि! पश्य कौतुकं।
यदेष सौधाग्रनटे पटाञ्चले चलेऽपि काकस्य पदार्पणग्रहः॥२१॥
ततस्तदप्रस्तुतभाषितोत्थितैः सदस्तदश्वेति हसैः सदःसदां।
स्फुटाऽजनि म्लानिरतोऽस्य भूपतेः सिते हि जायेत शितिः सुलक्षता
ततोऽनु देव्या जगदे महेन्द्रभूपुरन्दरं सा जगदेकवन्द्यया।

अत्र पराशरः तत उत्सारयामास शैलाः शतसहस्रशः। धनुष्कोट्या तथा वैण्य स्तेन शैलविवर्जिता इति ॥ २० ॥

अशंसेति। इङ्गितवित् स्वराभिज्ञा दासी किङ्करी विदर्भजां अशंसवभाण किमिति ननु हे स्वामिनि! इतोऽत्र कौतुकं विनोदं पश्य किं तत्तदाह सौधाग्रे नटे नर्त्तके अतएव चले चलत्यपि पटाञ्चले ध्वजाञ्चले काकस्यैव पदार्पणग्रहः पादन्यासाभिनिवेश इति यत् तत्कौतुकमिति पूर्वेणान्वयः एतेन भैम्या तस्मिन् पाण्ड्ये महाननादरः सूचितः॥२१॥

तत इति। ततोऽनन्तरं तथा अप्रस्तुतभाषितेनोत्थितैः सदःसदां सभासदां हसैः हासैः स्वनहसोर्वेति विकल्पादप्रत्ययः। तत्सदः संसदश्वेति चितीकृतं श्वितिधातोर्ण्यन्तात्कर्मणि लुङ्। अतः सदः श्वैत्याद्धेतोरस्य पाण्ड्यस्य भूपतेः म्लानिः विवर्णता स्फुटा व्यक्ता अजनि जाता कर्तरि लुङ् दीपजनेत्यादिना विकल्पाच्चिण् प्रत्ययः। तथा हि सिते धवलिम्नि शितेर्नीलिम्नः अशितिः शितिकृष्णे च कालं नीलञ्च मेचकमिति हलायुधः। सुलक्षता सुग्रहत्वं जायेत हि स्फुटं दृश्यत इत्यर्थः अर्थान्तरन्यासः ॥ २२ ॥

ततोऽन्विति। ततोऽनु तदनन्तरं महेन्द्रभूपुरन्दरे महेन्द्रपर्वताधीश्वरे विषये तं लक्षीकृत्येत्यर्थः तदार्जवेन तत्प्रावण्येनावर्जिता नमिता तर्जनी प्रवेशिनी यया तया तादृक्तर्जनिकया तदङ्गुल्या निर्दिश्येत्यर्थः नद्यृतश्चेति कप्। कयाचिदनिर्वाच्यया परचित्स्वरूपया

तदार्जवावर्जिततर्जनीकया जनी कयाचित्परचित्स्वरूपया॥२३
स्वयम्वरोद्वाहमहे वृणीष्व हे! महेन्द्रशैलस्य महेन्द्रमागतम्
कलिङ्गजानां स्वकुचद्वयश्रिया कलिङ्गजानां शृणु तत्र कुम्भयोः२४
अयं किलायात इतीरिपौरवाग्भयादयादस्य रिपुर्वृथा वनम्।
श्रुतस्तदुत्थापगिरस्तदक्षराः पठद्भिरत्रासि शुकैर्वनेऽपि सः॥२५॥
द्रुतत्रसद्विद्रुतभूभृदुज्झिता प्रियाऽथ दृष्टा वनमानवीजनैः।

परज्योतिरात्मिकया जगदेकवन्द्यया देव्या सरस्वत्या सा जनी वर्णगदे गदिता ॥ २३ ॥

स्वयम्वरे इति। हे इति सम्बोधने! अथ सम्बोधनार्थकाः स्युः प्याड़ङ्ग हे है भो इत्यमरः। हे भैमि! स्वयम्वरेण स्वयम्वरकर्मणा य उद्वाहमहो विवाहोत्सवस्तस्मिन्नागतं महेन्द्रशैलस्य महेन्द्रमधीशं वृणीष्व तत्र महेन्द्रशैले कलिङ्गजानां कलिङ्गदेशोद्भवानां गजानां कुम्भयोः स्वस्य तेनापि कुचद्वयश्रिया सह कलिं कलहं शृणु तद्देशस्य गजप्रायत्वात्कुचकुम्भयोः करिकुम्भयोश्च साम्यं व्यक्तीभविष्यतीति भावः ॥ २४ ॥

अयमिति। अयं महेन्द्रनाथ आयातः किल इतीरितामितिवादिनां पौराणां वाग्भ्यो जनवादेभ्यः भयादस्य रिपुर्वृथा वन मयात् वृथात्वमेवाह श्रुता आकर्णिता तान्येवाक्षराणि अयमायातः किलेत्येवं रूपाणि यासु ता तदक्षराः तेषां पौराणां उत्थापगिरो वासनायातानुत्थापयितप्रलापान् पठद्भिरुच्चारयद्भिः शुकैर्वने सः रिपुरत्रासि त्रासितः त्रसेर्ण्यन्तात्कर्मणि लुङ्। अत्र सत्यपि त्रासनिवृत्तिकारणे शुकवाक्यनिमित्तेन तदनुत्पत्तेरुक्तनिमित्तरूपो विशेषोक्तिभेदोऽलङ्कारः कारणसामग्र्यां कार्यानुत्पत्तिर्विशेषोक्तिरिति सामान्यलक्षणात् ॥२५॥

द्रुत इति। द्रुतोऽस्मात् महेन्द्रनाथात् त्रसता विभ्यता अत एव विद्रुतेन

शशंस दृष्टाद्भुतमात्मदेवजं शशित्विषः शीतलशीलतां किल॥२६॥
इतोऽपि किं वीरयसे न कुर्व्वतो नृपान्धनुर्व्वाणगुणैर्व्वशंवदान्।
गुणेन शुद्धेन विधाय निर्भरं तमेनमुर्व्वीवलयोर्व्वशी वशम्॥२७॥
एतद्भीतारिनारी गिरिबिलविगलद्वाससा निःसरन्ती
स्वक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचन्द्रा।

पलायितेन भूभृता प्रतिभूभुजोज्झिता वने त्यक्ता प्रिया तत्कान्ता वनमानवीजनैः किरातीजनैः दृष्टा। अथ दर्शनानन्तरमात्मदेशजं त्वद्देशे किमद्भुतमस्तीति पृष्टा सती अप्रधाने दुहादीनामित्यत्र प्रधाने कर्मणि क्तः। शशित्विषश्चन्द्रिकायाः शीतलशीलतां शिशिरस्वभावतां शशंस किल? कथयामास खलु? इदं पूर्वविरहाया मुग्धायाश्चन्द्रकिरणानां विरहे दुःसहत्वमजानन्त्यास्तत्र शीतलत्वमत्रे ष्यात्वमिति भ्रान्तिरिति भावः॥२६॥

इतोऽपीति। हे भैमि! उर्वीवलयोर्वशी भूलोकाप्सरोविशेषस्त्वं शुद्धेनानवद्येन गुणेन सौन्दर्यगुणेन मौर्व्या च एकैनैवेति भावः। तमेनं महेन्द्रनाथं निर्भरं नितान्तं वशं विधाय वशीकृत्य धनुर्वाणगुणैः स्तोभिरपि नृपान्वशंवदान् वश्यान् प्रियवशे वदः खच्। कुर्वतः कुर्वाणा दितोऽस्मादपि पञ्चमी। किं न वीरयसे न पराक्रमसे वीरशूरविक्रान्ताविति चौरादिकाल्लट्॥ २७॥

एतदिति। एतस्माद्भीतस्यारेर्नारी गिरि बिलेषु गुहासु विगलन्वाससो यस्याः सा तत्रैव नीतदिनेत्यर्थः निःसरन्ती सायं निष्क्रामन्ती स्वक्रीडाहंसमोहेन तद्भ्रान्त्या ग्रह आग्रहः तद्वान् ग्रहिलः पिच्छादित्वादिलच् प्रत्ययः। तेन शिशुना भृशं प्रार्थितो गृहीत्वा दीयतामिति याचित उन्निद्र श्चन्द्रो यस्याः सा सती भूरि भूयिष्ठमाक्रन्दत् यद्यस्मादाक्रन्दनात्तस्या भर्त्तुर्नयनजलेन मिलन् संक्रामन् चन्द्रएव हंसस्तस्यानुबिम्बस्य प्रत्यासत्त्या प्रतिभाम्रा महृष्यत स्तनयस्य विहसितैः अट्टहा-

आक्रन्दद्भूरियत्तन्नयनजलमिलच्चन्द्रहंसानुबिम्ब-
प्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीन्नश्वसीच्च ॥ २८॥
अस्मिन्दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायति
कम्पं सात्त्विकभावमञ्चति रिपुक्षोणीन्द्रदारा धरा ।
अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्द्ध्वं निजः
पन्था भास्वति दृश्यते विलमयः प्रत्यर्थिभिः पार्थिवैः॥२९॥
विद्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः
कोपात्कोऽपि निवर्त्तते यदि भटः कीर्त्त्या जगत्युद्भटः ।

वैराश्वसीत् स्तम्भितहृदयत्वात् किन्तु न्यश्वसीच्चेति दुर्दशानुभावदुःखाभावोक्तिः । ह्म्यन्तक्षणश्वसेत्यादिना वृद्धिप्रतिषेधः । अत्र नारीभिर्योच्चन्द्रबिम्बे तत्प्रतिबिम्बे च विसम्मतसादृश्याद्धंसभ्रान्तिनिबन्धनात् भ्रान्तिमदलङ्कारः ॥ २८ ॥

अस्मिन्निति । अस्मिन् महेन्द्रनाथे दिग्विजयोद्यते सति रिपुक्षोणीन्द्राणां दाराः कलत्रभूता धरा अयं महेन्द्रनाथएव मे मम पतिः स्यात् खलु अस्तेर्लोटिसिपि सोऽस्तु तत्र देयः श्नसोरल्लोप इति अकारलोपः । ध्यायति सङ्कल्पयति कम्पं कम्पाख्यं सात्त्विकभावमञ्चति प्राप्नोति औत्पातिके भूकम्पे सात्त्विकोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । किं चास्यैव समरे अभिमुखं निपत्यागत्योर्द्ध्वं ऊर्द्ध्वलोकं यास्यद्भिः प्रत्यर्थिभिः पार्थिवैः भास्वति सूर्यमण्डले बिलमयश्छिद्ररूपः निजः पन्था दृश्यते आसन्नमृत्योरादित्यमण्डलं सच्छिद्रमिव दृश्यत इत्यागमः । अत्रात्मीयोर्द्ध्वगमनमार्गत्वोत्प्रेक्षा पूर्ववद्गम्या । द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हत इति ॥ २९ ॥

विद्राण इति । समस्तेऽरिगणे त्रस्ते रणचत्वराद्रणाङ्गणाद्विद्राणे विद्रुते सति विद्रातेः कर्तरि क्तः । संयोगादेरातोर्यण्वत इति निष्ठातका-

आगच्छन्नपि सम्मुखं विमुखतामेवाधिगच्छत्यसौ
द्रागेतच्छुरिकारयेण ठणिति च्छिन्नापसर्पच्छिराः ॥३०॥
ततस्तदुर्व्वीन्द्रगुणाद्भुतादिव स्ववक्त्रपद्मेऽङ्गुलिनालदायिनी ।
विधीयतामाननमुद्रणेति सा जगाद वैदग्ध्यमयेङ्गितैव ताम् ॥३१॥
अनन्तरं तामवदन्नृपान्तरं तदध्वतत्कारतरङ्गरिङ्गणा ।
तृणीभवत्पुष्पशरं सरस्वती स्वतीव्रतेजःपरिभूतभूतलम् ॥ ३२ ॥

एस्य सत्वं । कीर्त्या जगत्युद्भटः प्रसिद्धः कोऽपि भटः कोपात् पुनर्निवर्तते यदि सन्मुखमभिमुखमागच्छन् अप्यसौ भटो द्राक् सपदि एतस्याः क्षुरिकायाः शस्त्रविशेषस्य रयेण ठणिति कश्चिदनुकरणशब्दः । छिन्नमपसर्पदपगच्छच्छिरो यस्य स सन् विमुखतां पराङ्मुखत्वमेवाधिगच्छतीति विरोधः विगतमुखत्वमिति तत्त्वं इति विरोधपरिहाराद्विरोधाभासोऽलङ्कारः ॥ २० ॥

तत इति । ततस्तदूर्ध्वानन्तरं तस्योर्वीन्द्रस्य महेन्द्रनाथस्य गुणेभ्योऽद्भुतादाश्चर्यातिशयादिव वस्तुतस्तु नादरादिति भावः । स्ववक्त्रपद्मे अङ्गुलिमेव नालमस्य ददातीति न्यस्यति तद्दायिनी पद्मस्य नालाविनाभावादिति भावः । सा दमयन्ती वैदग्ध्यमयं तत्प्रचुरमिङ्गितं यस्याः सैव सती तां सरस्वतीमाननमुद्रया मौनं विधीयतामिति जगाद अङ्गुलिदानरूपा निजमुखमुद्रैव तस्या मौनोपदेशोऽभूदित्यर्थः विदग्धा हि स्वेङ्गितेनैव परं बोधयन्तीति भावः ॥ २१ ॥

अनन्तरमिति । अनन्तरं सरस्वती तस्यै अध्वा तदध्वा नृपान्तराध्वा दृशो तत्कारतरङ्गरिङ्गणा प्रौढोर्मिरचना यस्याः सा सती तं दृष्ट्वा निर्दिश्येत्यर्थः तां दमयन्तीं तृणीभवन् पुष्पशरो यस्य तत् तृणीकृतमन्मथं स्वस्य तीव्रेण तेजसा परिभूतं भूतलं येन तत् नृपान्तरमन्यं नृपं अपः इव भुवि समार्थं कृत्वाद्द्विकर्म्मकत्वम् ॥ २२ ॥

तदेव किन्नु क्रियते न का क्षतिर्यदेष तद्दूतमुखेन काङ्क्षति।
प्रसीद काञ्चीमयमाच्छिनत्तु ते प्रसह्य काञ्चीपुरभूपुरन्दरः॥२३॥
मयि स्थितिर्नम्रतयैव लभ्यते दिगेव तु स्तब्धतया विलङ्घ्यते।
इतीव चापं दधदाशुगं क्षिपन्नयं नयं सम्यगुपादिशद् द्विषाम्॥२४॥
अदः समित्सम्मुखवीरयौवतत्रुटद्भुजाकम्बुमृणालहारिणी।
द्विषद्गणस्त्रैणदृगम्बुनिर्झरे यशोमरालावलिरस्य खेलति॥२५॥

तदिति। हे भैमि! एष काञ्चीपुरभूपुरन्दरः काञ्चीनगरालङ्कृतदेशाधीश्वरो दूतस्य मुखेन यदेव काङ्क्षति तत्काङ्क्षितं किं नु न क्रियत एव कर्तव्यमेव तदित्यर्थः। का क्षतिः तत्करणे का हानिः प्रत्युत श्रेय एवेति भावः। अथ तया काङ्क्षितमेव प्रार्थयते अयं काञ्चीपतिस्ते काञ्चीं मेखलां प्रसह्य बलादाच्छिनत्तु आच्छिद्य गृह्णातु काञ्चीपतेरुचितत्वादिति भावः अतएव प्रसीद प्रसन्ना भव अनुमन्यस्वेत्यर्थः॥ २३॥

मयीति। अयं काञ्चीपतिश्चापं दधन्नाशुगं बाणं क्षिपन् द्विषः शत्रून् मयि विषये नम्रतया अवनत्या प्रणत्या च स्थितिरिहावस्थानं प्रतिष्ठा च लभ्यते स्तब्धतया अनम्रतया तु दिगेव लभ्यते न कुत्रापि स्थीयत इति नयं नीतिमुपादिशदिव ब्रुव्यर्थत्वाद्द्विकर्मकः। धनुर्बाणदृष्टान्तेन द्विषां नम्रत्वे स्थितिरन्यथा क्षेपे एवेत्युपादिशदिवेत्युत्प्रेक्षा॥ २४॥

अद इति। अस्य काञ्चीपतेर्यशसामेव मरालानां हंसानामावलिः अमुष्य भूपतेः समित्सु युद्धेषु सम्मुखानां वीराणां यौवतानि युवतीसमूहाः गार्भिणं यौवतं गण इत्यमरः। भिक्षादिपाठात् समूहार्थेऽण् प्रत्ययः भस्याढे तद्धित इति पुंवद्भावाभावश्च। तेषां त्रुटन्ति भ्रंश्यन्ति भुजासु कम्बूनि शङ्खवलयानि शङ्खः स्यात्कम्बुरस्त्रियामित्यमरः। तान्येव मृणालानि तानि हरतीति तद्धारिणी सती द्विषद्गणस्य तदीयारिवर्गस्य स्त्रैणे स्त्रीसम्बन्धिनि दृगम्बुनिर्झरे नेत्रजलप्रवाहे खेलति क्रीडति स्त्रीणां पुंसाञ्च यत्किञ्चित् स्त्रैणं पौंस्नमतिक्रमादित्यमरः। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति नञ्। रूपकालङ्कारः॥ २५॥

सिन्दूरद्युतिमुग्धमूर्द्धनि धृतस्कन्धावधिश्यामिके
व्योमान्तःस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति ।
जानीमो नु यदि प्रदोषतिमिरव्यामिश्रसन्ध्याधियै-
वाऽस्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः ॥३६॥
हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटा-
सीदन्मर्कटकीटकृत्रिमसितच्छत्रीभवत्कौस्तुभम् ।
उज्झित्वा निजसद्म पद्ममपि तद्व्यक्तावनद्धीकृतं
लूतातन्तुभिरन्तरद्य भुजयोः श्रीरस्य विश्राम्यति ॥३७॥

सिन्दूरेति । सिन्दूरं नागसम्भवमित्यमरः । तस्य द्युतिभिः मुग्धमूर्द्धनि सुन्दरमस्तके धृतः स्कन्धोऽवधिर्यस्याः सा श्यामिका यस्य तस्मिन् स्कन्धपर्यन्तश्यामले तत उपरि सिन्दूरारुण इत्यर्थः । व्योमान्तः स्पृशि अभ्रंकषे तद्वर्त्तिनि च अस्य काञ्चीपतेः सिन्धुरे गजे समरारम्भोद्धुरे निर्भरे अनर्गल इत्यर्थः ऋक्पूरब्धूरित्यादिना समासान्तः । धावत्यभिमुखागते सति अन्वनन्तरं समस्तबाहुजानां समस्तक्षत्रियाणां भुजातेजांसि भुजप्रतापा एव सहस्रांशवः सूर्य्याः प्रदोषतिमिरेण व्यामिश्रसन्ध्याधियैवास्तं यान्ति यदि श्यामारुणसिन्धुरे तिमिरमिश्रसन्ध्याभ्रान्त्यैवास्तं यान्ति किमिति जानीमः उत्प्रेक्षालङ्कारः ॥ ३६ ॥
हित्वेति । श्रीर्लक्ष्मीः स्वभवनं निजनिवासं दैत्यरिपोर्विष्णोरुरः शून्यत्वदोषेण रिक्ततादोषेण स्फुटमासीदन्तः प्रत्यासीदन्तः ये मर्कटकीटास्तन्तुवायकीटाः लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः इत्यमरः । तेषां सम्बन्धि यत्कृत्रिमसितछत्रं सितछत्राकारं लूतातन्तुवितानमण्डलं तथा भवन् कौस्तुभो यस्मिन् कर्म्मणि तद्यथा भवति तथा हित्वा निजसद्म नित्यनिवासभवनं तत्प्रसिद्धं पद्ममप्यन्तर्भूत तन्तुभिर्व्यक्तमवनद्धीकृतं बद्धं यथा तथोज्झित्वा अद्य सम्प्रत्यस्य भुजयोरन्तर्व-

सिन्धोर्जैत्रमयं पवित्रमसृजत्तत्कीर्त्तिपूर्त्ताद्भुतं
यत्र स्नान्ति जगन्ति सन्ति कवयः के वा न वाचंयमाः।
यद्बिन्दुश्रियमिन्दुरञ्चति जलञ्चाविश्य दृश्येतरो
यस्यासौ जलदेवतास्फटिकभूर्जागर्त्ति यागेश्वरः॥ ३८॥
अन्तःसन्तोषवाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्य-
न्नङ्गेनानस्थिलोमाऽऽरचयति पुलकश्रेणिमानन्दकन्दाम्।

भ्राम्यति अत्रैकस्याः श्रियः क्रमेणानेकाधारवृत्त्युक्त्या पर्यायालङ्कारभेदः तेनैव तद्भुजयोः श्रीरञ्जने विष्णूरःपद्माभ्यामप्यधिकं वस्तु व्यज्यते ॥२७॥

सिन्धोरिति। अयं काञ्चीपतिः सिन्धोरब्धेः जैत्रं जेतृ जयशीलं ततोऽप्यधिकमित्यर्थः जेतृशब्दात् तृन्नन्तात् प्रज्ञादित्वात् स्वार्थेऽण् प्रत्ययः। पवित्रं पावनं तत्तया प्रसिद्धं कीर्तिरेव पूर्तं खातं कर्म व्याप्य मूर्च्छिमदामिति निष्ठानत्व प्रतिषेधः। तदेवाद्भुतमसृजत् यत्र पूर्ते जगन्ति लोकाः स्नान्ति यत्र यस्मिन् विषये कवयः कवयितारो वाचं यच्छन्तीति वाचंयमा न सन्ति सर्वेऽपि मौनिनो भवन्ति, वर्णयितुमशक्यत्वादित्यर्थः वाचि यमोव्रत इति खच्प्रत्ययः वाचंयमपुरन्दरौ चेति निपातनान्मुमागमः। इन्दुर्यस्य पूर्तस्य विन्दुश्रियमञ्चति प्राप्नोति कलाविन्दुर्यस्य जलञ्चाविश्य दृश्येतरः सावगरादिदृश्या जलदेवता आप्यशरीरदेवताविशेषः सन् जागर्ति प्रकारान्तरेणोत्प्रेक्षते स्फटिकाद्भवतीति स्फटिकभूः स्फटिकोद्भवो यागेश्वरः सन् जागर्ति स्फटिकलिङ्गे यागेश्वर इति प्रसिद्धः ॥ २८ ॥

अन्तरिति। एतस्य राज्ञः कीर्त्तीः शृण्वन् उरगपतिः शेषः दृशस्ताभिः दृग्भिः आकर्णयिष्यन् श्रोष्यन् अतएवान्तःसन्तोषवाष्पैः न स्थगयति नाच्छादयति अन्यथा चक्षुःश्रवसोऽस्य रूपग्रहणवच्छब्दग्रहस्यापि तैः प्रतिबन्धादिति भावः। नाङ्गेनेति देशान्तर पाठः। अङ्गेन वपुषा येनाङ्गविकार इति तृतीया। अङ्गेनेति पाठे अङ्गे वपुषि अनस्थि-

न चौणीभङ्गभीरुः कलयति च शिरःकम्पनं तत्र विज्ञः
शृण्वन्ने तस्य कीर्त्तीः कथमुरगपतिः प्रीतिमाविष्करोति॥
आचूड़ाग्रममज्जयज्जयपटुर्यच्छल्यकाण्डानयं
संरम्भे रिपुराजकुञ्जरघटाकुम्भस्थलेषु स्थिरान्।
सा सेवास्य पृथुः प्रसीदसि तया नास्मै कुतस्त्वत्कुच-
स्पर्द्धागर्द्धिषु तान् धृतवते दण्डान् प्रचण्डानपि ॥ ४० ॥
स्मितश्रिया सृक्कणिलीयमानया वितीर्णया तद्गुणशर्म्मणेव सा

लोमा न भवतीति अनस्तिलोमा अविद्यमानलोमा सन् असीत्यस्य विद्यमानपर्य्यायः। तस्य सम्बन्धि अस्तिक्षीरादिवचनाद्बहुव्रीहिः। अत एवानन्दकन्दामानन्दकारिणीं पुलकश्रेणीं आरचयति, तथा चौणीभङ्गभीरुः, च पृथिवीविदारणभीतः शिरःकम्पं च नाकलयति। तत्तस्मात्कथं केन प्रकारेण प्रीतिमाविष्करोति भविज्ञः वाक्यार्थः कर्म ॥ ३९ ॥

आचूडेति। जयेपटुः समर्थोऽयं राजा संग्रामे रिपुराजकुञ्जरघटानां कुम्भस्थलेषु स्थिरान् निश्चलान् शल्यकाण्डान् शरकाण्डान् आचूडाग्रमापुङ्खपुङ्खं अमज्जयत् निखातवानिति यत् सा अस्य राज्ञः पृथुर्महती सेवा तया सेवया त्वत्कुचाभ्यां सह स्पर्द्धागर्द्धिषु मत्सरस्पृक्तेषु कुञ्जरकुम्भेष्वपराधिषु प्रचण्डानुग्रान् तान् दण्डान् धृतवते अस्मै राज्ञे कुतो न प्रसीदसि एनं वृणीष्वेत्यर्थः ॥ ४० ॥

स्मितेति। सा भैमी तस्य काञ्चीपतेः गुणशर्म्मणा गुणप्रीत्येव वस्तुतस्तनादरादिति भावः वितीर्णया विसृष्टया सृक्कण्यधराङ्गे लीयमानया संकुचन्त्या स्मितश्रिया मन्दहासप्रभया कीर्त्यमहत्वमेव वाच्यमानमहत्वमेव अतएव तं काञ्चीपतिं उपाहसदुपहसितवती। तथा हि निषधेन्द्रवैभवं नलमाहात्म्यं गिरां पारे वर्त्तते नलगुणानुरागात्ते

उपाहसत् कीर्त्यमहत्त्वमेव तं गिरां हि पारे निषधेन्द्रवैभवं॥४१
निजाक्षिलक्ष्मीहसितैणशावकामसाऽवभाणीदपरं परन्तपं।
पुरैव तद्दिग्वलनश्रियो भुवा भ्रुवा विनिर्दिश्य सभासभाजितं॥४२॥
कृपा नृपाणामुपरि क्वचिन्न ते नतेन हाहा शिरसा रसादृशां।
भवन्तु तावत्तव लोचनाञ्चला निपेयनेपालनृपालपालयः ॥४३॥
ऋजुत्वमौनश्रुतिपारगामिता यदीयमेयत्परमेव हिंसितुं।

कारणेनैतत् अपरागरूपकार्यसमर्थनात् तद्रूपार्थान्तरन्यासः॥ ४१ ॥

निजेति। असौ सरस्वती सभासु सभाजितं पूजितं परन्तपं रिपुतापं द्विषत्परयोस्तापेरिति खच्प्रत्ययः खचि ह्रस्वः अरुर्द्विषदजन्तस्य मुम्। अपरमन्यं नृपं पुरैव पूर्ववत् तस्य राज्ञो दिशो वलने या श्रीस्तस्या भुवा स्थानेन तद्दिग्वलितयेत्यर्थः भ्रुवा दृशः ऊर्ध्वावयवेन ऊर्ध्वदृग्भ्रुवौ भ्रुवोऽस्त्रियामित्यमरः। विनिर्दिश्य निजाक्षिलक्ष्म्या स्वनेत्रशोभया हसितैणशावकां मृगाक्षीं भैमी सभाणीद्भाण॥ ४२॥

कृपेति। हे भैमि! नतेन अवनतेन शिरसा रसां भुवं पश्यन्तीति रसादृशां अधः पश्यतामित्यर्थः नृपाणामुपरि क्वचित् कुत्रापि कृपा न हाहेति खेदे। तावत्तव लोचनाञ्चला कटाक्षा निपेया पाह्या नेपालनृपालस्य नेपालभूपतेः पालिः कोटिः तद्दृग्भागो येषां ते भवन्तु कटाक्षदृष्ट्या तं पश्येत्यर्थः स्त्रियः पाल्यश्रिकोटय इत्यमरः॥ ४३॥

ऋजुत्वेति। यस्येदं यदीयं ऋजुत्वं अवक्रता परच्छन्दानुकूलता मौनं निःशब्दता वाचंयमत्वञ्च श्रुतिपारगामिता कर्णान्तगामित्वं वेदपारगत्वञ्च ता एतदेव रूपं अतीवात्यन्तं विश्वासान् विगताछन् अतएव विश्वासं प्रत्ययं विदधत इति विश्वासविधायि चेष्टितं चरित्रं परमन्यञ्च हिंसितुं हन्तुं अपकर्त्तुं चैवास्य राज्ञो बहुरनेकशः जातावेकवचनं। महाननिकः दम्भः कपटं प्रयोजनमस्येति दाम्भिको बो-

अतीव विश्वासविधायि चेष्टितं मुहुर्महानस्य स दाम्भिकः शरः॥४४॥
रिपूनवाप्यापि गतोऽवकीर्णितामयं न यावज्जनरञ्जनव्रती ।
अयं विरक्तानपि रक्तवत्तरान् निकृत्य यत्तानसृजासृजद्युधि॥४५॥
पतत्येतत्तेजोहुतभुजि कदाचिद्यदि तदा
पतङ्गः स्यादङ्गीकृततमपतङ्गापदुदयः ।
यशोऽमुष्येवोपार्जयितुमसमर्थेन विधिना
कथञ्चित् क्षीराम्भोनिधिरपि कृतस्तत्प्रतिनिधिः ॥ ४६ ॥

कवञ्चकः । स्वरः किमित्यर्थः प्रयोजनमिति ठक् । कपटोऽस्त्रीव्याजदम्भोत्यमरः । अत्र शरे दाम्भिकत्वोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ४४ ॥

रिपूनिति । यावत् साकल्यजनानां रञ्जनमेव व्रतमस्यास्तीति तद्व्रति सर्वधन्वीतिवदन्तो बहुव्रीहिः। अयं नेपालभूपो रिपूनवाप्याप्यवकीर्णितां च्युतव्रतत्वन्न गतः कुतः यद्यस्मादृश्यं विरक्तानरक्तानपि रिपून् युधि निकृत्य छित्वा कृन्ततेः क्त्वो ल्यप् । असृजा रक्तवत्तरानतिशयेन रक्तवर्णाननुरक्तांश्च रञ्जेस्तवत्वन्तात्तरप् । असृजदकरोत् रिपूनपि रञ्जयतः कुतो न रञ्जनव्रतभङ्ग इति भावः ॥ ४५ ॥

पततीति । पतङ्गः सूर्य्यः एतस्य राज्ञः तेजोहुतभुजि प्रतापाग्नौ कदाचित्पतति यदि तदा अङ्गीकृततमो ह्यस्वीकृतः पतङ्गस्य शलभस्य य आपदुदयः स येन स्यात् शलभतामियादित्यर्थः । पतङ्गः शलभे शालौ मार्जारेऽर्के खगेश्वर इति वैजयन्ती । किं च अमुष्य राज्ञः यश उपार्जयितुमसमर्थेन विधिना ब्रह्मणा कथञ्चित्तस्य यशसः प्रतिनिधिस्तत्प्रत्ययः क्षीराम्भोनिधिः कृतः न तु तादृग्यशो लब्धमित्यर्थः सूर्यादधिकप्रतापः क्षीराब्धेरधिकयशास्वेत्यर्थः ॥ ४६ ॥

यावत्पौलस्त्यवास्तूभवदुभयहरिल्लोमरेखोत्तरीये
सेतुप्रालेयशैलौ चरति नरपतिस्तावदेतस्य कीर्त्तिः।
यावत्प्राक्प्रत्यगाशापरिवृढनगरारम्भणस्तम्भमुद्रा-
वद्री सन्ध्यापताकारुचिरचितशिखाशोणशोभावुभौ च ४७
युद्धा चाभिमुखं रणस्य चरणस्यैवादसीयस्य वा
बुद्धान्तः स्वपरान्तरं निपततामुन्मुच्य बाणावलीः।

यावदिति। पौलस्त्ययोर्विभीषणवैश्रवणयोर्वास्तू भवन्तौ वेश्मभूर्वास्तुरस्त्रियामित्यमरः। उभे च ते हरितौ उभयहरितौ दक्षिणोत्तरदेशावित्यर्थः उभादुदात्तो नित्यमित्यत्र पृथग्योगकरणादेवायजादेशस्य नितत्वे सिद्धे पुनर्नित्यग्रहणं वृत्तिविषये उभशब्दस्थाने उभयशब्दप्रयोगनियमज्ञापनार्थमिति कैयटः। तयो र्यथासंख्यं रोमरेखा रोमराजिरुत्तरीयञ्च ते सन्तौ सेतुप्रालेयशैलौ यावत् यावद्दूरस्थितावितिशेषः। किं च प्राचीप्रतीच्यावाशे प्राक्प्रत्यगाशे स्त्रियाः पुंवदित्यादिना पुंवद्भावः। तयोः परिवृढौ प्रभू इन्द्र वरुणौ प्रभौ परिवृढ इति निपातः। तयोर्नगरयोरारम्भणे यौ स्तम्भौ मूलस्तम्भौ तयो र्मुद्रेव मुद्रासन्निवेशो ययो स्तौ सन्ध्ययोरेव द्वयोः पताकयोः रुचिभिर्भाभिरचितयोः शिखयोरग्रयोः शोणशोभा ययो स्तावुभौ अद्री उदयास्तशैलौ यावत्पर्यन्तमेतस्य नरपतेः कीर्तिश्चरति चतुर्दिगन्तविश्रान्तकीर्तिरित्यर्थः ॥ ४७ ॥

युद्धेति। युद्धा युद्धं कृत्वा रणस्य वा अन्तरन्तःकरणे स्वेषां परेषां चान्तरं तारतम्यं बुद्ध्वा बाणावलीरुन्मुच्यायुधान्यप्यदसीयस्य अमुष्य सम्बन्धिनश्चरणस्यैव याभिमुखं निपततामागच्छता मरीणां हठाच्छिन्नं अथवा निजभियो भरेण भारेण खिन्नं श्रान्तमतएव अवनतीभवच्चमीभवत् शिरोऽनेन राज्ञा भूमौ विलोठितं परिवर्तितमभूव

छिन्नं वा वनतीभवन्निजभियः खिन्नं भरेणाथवा
राज्ञाऽनेन हठाद्विलोठितमभूद्भूमावरीणां शिरः ॥४८॥
न तूणादुद्धारे न गुणघटने नाश्रुतिशिखं
समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि ।
नृणां पश्यत्यस्य क्वचन विशिखान् किन्तु पतित-
द्विषद्वक्षःश्वभ्रैरनुमितिरमून् गोचरयति ॥ ४९ ॥
दमस्वसुश्चित्तमवेत्य हासिका जगाद देवीं कियदस्य वक्ष्यसि ।
अथ प्रभूते जगति स्थिते गुणैरिहाप्यते सङ्कटवासयातना ॥५०॥

एतच्छत्रूणां मरणमेतच्छरणं वा गतिर्नान्येति भावः ॥ ४८ ॥

नेति । नृणां रणद्रष्टॄणां पुंसां अन्यच्चेति विकल्पान्नामि चेति दीर्घप्रतिषेधः । दृष्टिरस्य राज्ञो विशिखान् शरान् तूणात् निषङ्गादुद्धारे उद्धरणकाले न पश्यतीति गुणो मौर्वी मौर्वी गुणो ज्येति धनञ्जयः । तेन घटनेन सन्धानेन आश्रुतिशिखमाकर्णान्तं समाकृष्टौ गुणाकर्षे न वियत्याकाशे न लक्ष्ये वेध्ये भुवि एवं क्वच न कुत्रापि न पश्यतीति सर्वत्रानुषङ्गः । किन्तु पतितानां द्विषतां वक्षःसु श्वभ्रैः रन्ध्रैः रन्ध्रं श्वभ्रं वपा शुषिरित्यमरः । अनुमितिरानुमानिकज्ञानं अमून् विशिखान् गोचरयति विषयीकरोतीति वेगातिशयोक्तिः ॥ ४९ ॥

दमस्वसुरिति । हासयतीति हासिका हासयित्री काचिद् दमस्वसुश्चित्तमवेत्य बुद्ध्वा देवीं सरस्वतीं जगाद किमिति हे देवि ! अस्य राज्ञः सम्बन्धि कियद्वक्ष्यसि कियत्प्रपञ्चयसीत्यर्थः । किं तु प्रभूते महति जगति स्थितैर्गुणैरिहास्मिन्नाम्नि सङ्कटवासेन सङ्कीर्णस्थित्या यातना तीव्रवेदना आप्यते अनुभूयत इति अस्य सर्वगुणाकरत्वेनैनं दमयन्ती वृणुत इति भावः ॥ ५० ॥

ब्रवीति दासीह किमप्यसङ्गतं ततोऽपि नीचेयमतिप्रगल्भते ।
अहो सभा साधुरितीरिणः क्रुधा न्यषेधदेतत्क्षितिपानुगान् जनः
अथान्यमुद्दिश्य नृपं कृपामयी मुखेन तद्दिङ्मुखसम्मुखेन सा ।
दमस्वसारं वदति स्म देवता गिरामिलाभूवदतिस्मरश्रियं॥५२॥
विलोचनेन्दीवरवासवासितैः सितैरपाङ्गाध्वगचन्द्रिकाञ्चलैः ।
त्रपामपाकृत्य निभान्निभालय क्षितिक्षितं मालयमालयं रुचः॥५३
इमं परित्यज्य परं रणादरिः स्वमेव भग्नः शरणं मुधाविशत् ।

ब्रवीतीति । इह सभायां दासी किङ्करी किमप्यसङ्गतं ब्रवीति नीचा तुच्छा इयं दासी । ततो देवीतोऽपि प्रगल्भते उच्छृङ्खलं ब्रूते अहो आश्चर्यं सभा साधुश्चौर्येति सोल्लुण्ठोक्तिः । इतीरयतीति ईरिण आक्रोशत एतस्य क्षितिपस्यानुगाननुचरान् जनः तटस्थजनः क्रुधा क्रोधेन न्यषेधत् ॥ ५१ ॥

अथेति । अथ कृपामयी सा गिरां देवता इलाभुवा ऐलेन पुरूरवसा तुल्यं इलाभूवत् तेन तुल्यं क्रियाचेद्वतिः । क्रियात्र स्मरातिक्रमः । अतिस्मरश्रियं अतिक्रान्तमदनलावण्यमन्यं नृपमुद्दिश्य तस्य नृपस्य दिङ्मुखसंमुखेन तद्दिग्भागाभिमुखेन मुखेन करणेन तेनोपलक्षिता सा सती दमस्वसारं दमयन्तीं वदति स्म ॥ ५२ ॥

विलोचनेति । विलोचने एवेन्दीवरे तयोर्वासेनास्थित्या वासितैः सुरभितैः विप्रतव्यकर्षैरित्यर्थः सितैरवदातैरपाङ्गैरध्वगचान्द्रिकाञ्चलैः कटाक्षमार्गप्रवृत्तकान्तिशिखाभिः करणै रुचः कान्तेरालयं आवासं मालयाख्यं क्षितिक्षितं क्षितीशं क्षितिं क्षिणोतीति क्षितिक्षित् क्षितीशः क्षिधातोरैश्वर्यार्थात् क्विप् । तं त्रपामपाकृत्य निभात् कुलस्त्रिव्याजान्निभालय विलोकय ॥ ५३ ॥

इममिति । अरिरेतत्कृतरणाद्भग्नः सन् परमरिमुत्कृष्टं वा इमं नृपं परित्यज्य शरणमप्राप्य मुधा वृथा स्वं स्वकीयं शरणं गृहमेव शरणं रक्षक

न वेत्ति यस्त्रातुमितः कृतस्मयो न दुर्गया शैलभुवाऽपि शक्यते॥
अनेन राज्ञाऽर्थिषु दुर्भगीकृतो भवन् घनध्वानजरत्नमेदुरः।
तथा विदूराद्रिरदूरतां गमी यथा स गामी तव केलिशैलताम्॥
नम्रप्रत्यर्थिपृथ्वीपतिमुखकमलम्लानताभृङ्गजात-
छायान्तःपातचन्द्रायितचरणनखश्रेणिरेणेयनेत्रे॥

भविष्यत् प्रविष्ट इत्यावृत्त्या सम्बन्धः कथं वृथा वृथात्वे कथं तत्कारणं तदाह यद्यस्मात् कृतस्मयः कृताहङ्कारः सोऽरिर्दुर्गया दुर्गमया शैलभुवा शैलकूटेन गिरिदुर्गेणापीत्यर्थः। तथा शैलोद्भवया दुर्गया दुर्गादेव्यापि इतोऽस्मात्राज्ञः त्रातुं न शक्यते। किं पुनः स्वगृहेणान्येन वा पुरुषेणापीत्यपिशब्दार्थः। इति न वेत्ति प्राणाशक्त्या वैयर्थ्यमज्ञानात् प्रवेशः स्यादज्ञानञ्चेति भावः॥ ५४॥

अनेनेति। अनेन राज्ञा अर्थिषु विषये दुर्भगीकृतः तुच्छीकृतः यथेच्छमर्थिभिरुपादीयमानरत्नोऽपि कः यदेतदित्युपेक्षेत इत्यर्थः। तथा घनध्वानजैः नवमेघशब्दोत्थै रत्नैः मेदुरः पूर्ण एव भवन् अतिव्ययेऽप्यक्षीणरत्न इत्यर्थः। विदूराद्रिः वैदूर्याचलः तथा तेन प्रकारेण अदूरतामासन्नताङ्गामी गमिष्यन् यथा सोऽद्रिस्तव केलिशैलतां गामी गमिष्यन् भविष्यति गम्यादय इति गमिगाम्योः साधुत्वं। नलोकेत्यादिना षष्ठीप्रतिषेधात् कर्मणि द्वितीया॥ ५५॥

नम्रेति। एण्या इमे एणेय मेण्यास्सर्माद्य मेणस्यैणमुभे त्रिष्वित्यमरः। एण्याढञ्। ते च ते नेत्रे च ते इव नेत्रे यस्यास्तस्याः संबुद्धिरेणेयनेत्रे! उपमान पूर्वपद बहुव्रीहावुत्तरपदलोपः। नम्राणां प्रत्यर्थिपृथ्वीपतीनां मुखान्येव कमलानि तेषु या म्लानता सैव भृङ्गजातन्तस्य छाया नीलभा तस्या अन्तःपातेन मध्यगतत्वेन चन्द्रायिता चन्द्रवदाचरिता कलङ्क सम्पत्तेरितिभावः सा चरणनखश्रेणिर्यस्य सः भूलोकस्य भर्ता एष राजा इत्यादि प्राणवाता एष अमृतरसस्य लहर्यं वर्षवस्तानां भूरीणां

स्मारिप्राणवातामृतरसलहरीभूरिपानेन पीनं
भूलोकस्यैष भर्त्ता भुजभुजगयुगं सांयुगीनं बिभर्त्ति ॥५६॥
अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेष-
स्याहेर्भूयः फणसमुचितः काययष्टीनिकायः ।
दुग्धाम्भोधेर्मुनिचुलुकनत्रासनाशाभ्युपायः
कायव्यूहः क्व जगति न जागर्त्यदःकीर्त्तिपूरः ॥ ५७ ॥
राज्ञामस्य शतेन किं कलयतो हेतिं शतघ्नीं क्षतं
लक्षैर्लक्षभिदो दृशैव जयतः पद्मानि पद्मैरलम् ।

भूयसां पानेन पीनं मांसलमत एव संयुगे साधु सांयुगीनं भुजभुजगयुगम्बिभर्तीति रूपकालङ्कारः ॥ ५६ ॥

अध्याहार इति । स्मरहरशिरसि चन्द्रशेषस्य चन्द्रखण्डस्याध्याहारः शेषपूरकः शेषस्याहेरनन्तोरगस्य भूयसां फणानां समुचितः काययष्टीनां निकायः समूहः यावत्फणं कायैर्भवितव्यमिति भावः । दुग्धाम्भोधेः क्षीराम्भोधेः मुनेरगस्त्यस्य चुलुकनाच्चुलुकग्रहणात् त्रासस्य नाशे अभ्युपाय उपायभूतः कायव्यूहः कायसङ्घातः क्षीराब्धेः प्रतिनिधिरित्यर्थः । अदः कीर्तिपूरोऽमुष्य यशोराशिः क्व जगति न जागर्ति त्रैलोक्येऽपि जागर्तीत्यर्थः । अत्र कीर्तिपूरस्य त्रैलोक्यासम्बन्धेऽपि तत्सम्बन्धोक्तेस्तद्रूपातिशयोक्तिः सा चास्य चन्द्रे शेषाध्याहारत्वादिरूपकोत्थापितेति सङ्करः ॥ ५७ ॥

राज्ञामिति । शतघ्नी नाम हेतिमायुधं शतघ्नीतु चतुःशत्या लोहकण्टकसञ्चितेतियादवः । शतं हन्तीति शतघ्नीति च गम्यते अमनुष्यकर्तृके चेति टक्प्रत्यये ङीप् । शतघ्नीं कलयतो वहतोऽस्य राज्ञां शते

कर्त्तुं सर्व्वपरच्छिदः किमपि नो शक्यं परार्द्धेन वा
तत्सङ्ख्यापगमं विनाऽस्ति न गतिः काचिद्वतैतद्द्विषाम् ॥५८॥
वयस्ययाऽऽकूतविदा दमस्वसुः स्मितं वितत्याभिदधेऽथ भारती
इतः परेषामपि पश्य याचतां भवन्मुखेन स्वनिवेदनत्वराम् ॥५९॥
कृताऽत्र देवी वचनाधिकारिणी त्वमुत्तरं दासि ! ददासि का सती

न किं किञ्चित्करमित्यर्थः। लक्षभिदो लक्षभेदिनो लक्षं संख्यादि हन्तुश्च लक्ष्यं शरव्ये संख्यायामिति च विश्वः। राज्ञां लक्षैः कृतं अलमित्यर्थेऽव्ययं। तथा दृष्ट्यैव पद्मान्यब्जानि संख्याविशेषान् पद्मं स्यान्नागे व्यूहे निधौ संख्यान्तरेऽम्बुजमिति विश्वः। जयतोऽस्य पद्मैः पद्मसंख्याभिरलं किं बहुना सर्वपरच्छिदः शत्रुच्छिदोऽस्य राज्ञां परार्द्धेन च संख्यया वा परेषामरीणामर्द्धेन, किं किमपिकर्त्तुं नोशक्यन्त तस्मादेतद्विना संख्याया अपगमं अपगतसंख्यत्वं संख्याद्युद्धादपगममपसरणं विना काचिद्गतिर्नास्ति संख्या च स्यादेकत्वादि युद्धाख्यान विचारयोरिति विश्वः। अतैव द्विषद्गतिमत्त्वस्य संख्यापगमतदपगमयोरुभयोः प्राप्तस्य पूर्वत्वनिषेधस्योत्तरत्र नियमनात्परिसंख्या। तथा च सूत्रं एकस्यानेकप्राप्तावेकत्र नियमनं परिसंख्येति ॥ ५८ ॥

वयस्ययेति। अथ दमस्वसुराकूतविदाऽभिप्रायज्ञया वयस्यया सख्या स्मितं वितत्य कृत्वा भारती वाग्देवी अभिदधे अभिहिता किमिति इतोऽस्माद्राज्ञः परेषामन्येषा मपि याचतां राज्ञां भवन्मुखेन त्वद्वाचैव स्वनिवेदने स्वयं कथने त्वरां द्रुतकथनत्वं पश्य परानालोचयेति गम्यते ॥५९॥

कृतेति। हे दासि। अत्र स्वयम्वरे देवी वाग्देवी वचने राजकथने अधिकारिणी कर्तृ कृता नियुक्ता त्वं का सती उत्तरं ददासि इति दैरिया इति ब्रुवाणान् तस्य नृपस्य परिपार्श्वं वर्तन्त इति पारिपा-

द्वैतीरिणस्तत्र पपारिपार्श्विकान् स्वभर्त्तुरेव भ्रुकुटिर्न्यवर्त्तयत्६०
धराधिराजं निजगाद भारती तत्सन्मुखेषद्वलिताङ्गसूचितम्।
दमस्वसारं प्रति सारवत्तरं कुलेन शीलेन च राजसूचितम्॥६१॥
कुतः कृतैवं मवलोकमागतं प्रति प्रतिज्ञाऽनवलोकनाय वा।
अपीयमेनं मिथिलापुरन्दरं निपीय दृष्टिः शिथिलाऽस्तु ते वरम्६२
न पाहि पाहीति यदब्रवीरमुं ममौष्ठ तेनैवमभूदिति क्रुधा।

र्श्विकान् सेवकान् परिमुखं चेति चकाराट्ठक्। स्वभर्तुः स्वस्वामिन एव भ्रुकुटिं न्यवर्तयत् तत्सास्येन तान् भ्रूभङ्गेन निवारितवानित्यर्थः॥ ६० ॥

धरेति। भारती कुलेन सद्वृत्तेन राजसु मध्ये उचितसारवत्तरं बलवत्तरं तस्याः सन्मुखं यथा तथा ईषद्वलितेन वक्रितेन अङ्गेन वपुषा सूचितं निर्दिष्टं धराधिराजं भूपतिं दमस्वसारं प्रति निजगाद तस्यै कथयामासेत्यर्थः ॥ ६१ ॥

कुतइति। हे भैमि! आगतं नवलोकमपूर्वजनं प्रति एवमिति हस्तनिर्देशः। अवलोकनाय वा अवलोकितुमेव कुतः प्रतिज्ञा कृता न युक्तमिति भावः। किन्तु एनं पुरोवर्तिनं मिथिलापुरन्दरमपि मिथिलापतिं वा निपीय सम्यक्निरीक्ष्य ते तव दृष्टिः शिथिला शिथिलादरास्तु वरं अनीक्षमाणा वीक्षित्वोपेक्षणमपि किञ्चित्प्रियमित्यर्थः ॥ ६२॥

नेति। हे मदोष्ठ! मदीयाधर! यद्यस्मात् पाहि पाहीत्यमुमाब्रवीः दुरभिमानादिति शेषः। ओष्ठाधरप्रायत्वेऽपि इति च गम्यते। तेनैव पाहीति अवचनेनैव एवमीदृशी दशाऽभूदिति हेतोः क्रुधा क्रोधेन रचितावस्थ विरोधिभिर्मूर्द्धभिः शत्रुशिरोभिः निजमोष्ठं विदश्यास्यते स्थीयते एतच्छत्रूणामेव तद्धरणमेव मरणं अन्यथा मरणमेवेति

रणच्छितावस्य विरोधिमूर्द्धभिर्विदश्य दन्तैर्निजमोष्ठमास्यते॥६३
भुजेऽपसर्पत्यपि दक्षिणे गुणं सहेषुणाऽऽदाय पुरः प्रसर्पिणे।
धनुः परीरम्भमिवास्य सम्मदान् महाहवे दित्सति वामवाहवे॥६४
अस्योर्व्वीरमणस्य पार्व्वणविधुद्वैराज्यसज्जं यशः
सर्व्वाङ्गोज्ज्वलशर्व्वपर्वतसितश्रीगर्वनिर्व्वासि यत्।
तत्कम्बुप्रतिविम्बितं किमु शरत्पर्जन्यराजिश्रियः

भावः। अत्र शत्रुशिरसां प्रत्यर्थिविषयक्रोधहेतुकस्योष्ठदंशनस्योष्ठविषयक्रोधहेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ६३ ॥

भुजइति। महाहवे महारणे अस्य राज्ञो धनुर्दक्षिणे अपसव्ये दक्षे च भुजे इषुणा सह गुणं ज्यामादाय अपसर्पत्यपसरत्यपि पुरः प्रसर्पिणे पुरोगामिने इह गुणसहायभावेऽपीति भावः। वामवाहवे सम्मदात्सन्तोषात्परीरम्भमालिङ्गनं उपसर्गस्य घञ् मनुष्ये बहुलमिति दीर्घः। दित्सतीव दातुमिच्छतीवेत्युत्प्रेक्षणादिति भावः। ददातेः सनन्ताल्लट् सनिमीमेत्यादिना इदादेशः अभ्यासलोपः। दक्षिणोऽप्येव परापकारी न पूज्यते वामोऽवसरेऽप्यपकारी पूज्यत इति भावः॥६४॥

अस्येति। अस्योर्वीरमणस्य भूपतेः सम्बन्धि पर्वणि भवः पार्वणस्तस्य विधोः राकाचन्द्रस्य द्वैराज्यं तदेकस्वामिके धावल्य इति शेषः। द्विराजशब्दाद्बहुव्रीह्यन्ताद्ब्राह्मणादित्वात् ष्यङ्प्रत्ययः। तत्र सज्जं सनद्धं द्वितीयमाणमित्यर्थः। सर्व्वाङ्गे उज्ज्वलस्य धवलस्य शर्वपर्वतस्य कैलासस्य सितः सितिमा धावल्यं गुणे शुक्लादयः पुंसीत्यमरः। तस्य श्रिया सम्पदा योगर्वस्तं निर्वासयति लुम्पतीति तन्निर्वासि कैलासशुभ्रादधिकं यद्यशस्तत् कम्बूनां शङ्खानां प्रतिविम्बितं प्रतिविम्बं प्रतिच्छाया किमु? किं वा शरत्पर्जन्यराजिश्रियः शरन्मेघावलिधावल्य सम्पदः पर्यायो रूपान्तरं किमु? अथ वा दुग्धसिन्धोः क्षीराब्धेः पयसां

पर्य्यायः किमु दुग्धसिन्धुपयसां सर्व्वानुवादः किमु॥६५॥

निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटाऽवट-
स्थानस्थायुकमौक्तिकोत्करकिरः कैरस्य नायङ्करः ।
उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तुरङ्गक्षुर-
क्षुण्णासु क्षितिषु क्षिपन्निव यशः क्षौणीजबीजव्रजम्॥६६॥
अर्थिभ्रंशवङ्गभवत्फलभरव्याजेन कुब्जायितः

क्षीराणां सर्व्वानुवादः सर्व्वस्यापि पुनरुक्तिः किमु ? कृत्स्नं तत् क्षीरमेवेदं किमित्यर्थः उत्प्रेक्षाद्वयस्य संसृष्टिः ॥ ६५ ॥

निस्त्रिंशेति । निर्गता त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थमिति समासान्तो डच्प्रत्ययः । तेन त्रुटितेषु चिह्नितेष्वरिवारणघटाकुम्भेष्वस्थिकूटानामस्थिसङ्घातानां अवटस्थानेषु गर्तप्रदेशेषु स्थायुकाः स्थायिनः लषपतेत्यादिना उकञ्प्रत्ययः । तेषां मौक्तिकोत्कराणां मुक्तासमूहानां किरतीति किरः क्षिप्ता इगुपधज्ञेतिकः । अस्य नृपस्यायङ्करः चत्वार्यङ्गानि हस्त्यादीनि येषां तेषां सैन्यानां समरेषु त्वङ्गद्भिः सञ्चरद्भिः तुरङ्गैः क्षुरैः क्षुण्णासु कृष्टासु क्षितिषु यशःक्षौणीजस्य कीर्तिवृक्षस्य बीजानां व्रजं क्षिपन् किरन् वपन्निव स्थित इति कैर्जनैर्नोन्नीतो नोत्प्रेक्षित इत्युत्प्रेक्षा ॥ ६६ ॥

अर्थीति । अस्मिन् राज्ञि अतिदानभाजि दानशौण्डे सति सः प्रसिद्धः कल्पद्रुमः अर्थिनां भ्रंशेनासम्भवेन वङ्गभवतः व्ययीभावादुपचीयमानस्य फलभरस्य व्याजेन कुब्जायितः कुब्जीभूतः सन् वस्तुतस्तु लज्जयैवेति भावः । लोहितादेराकृतिगणत्वात् क्यङि कर्त्तरि क्तः । कथमस्यास्तां वन्ध्याभरणसम्भवादिति भावः । किन्तु निर्व्ययानां विनियोगरहितानां

सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः।
आस्ते निर्व्ययरत्नसम्पदुदयोदग्रः कथं याचक-
श्रेणीवर्जनदुर्यशोनिविडितव्रीड़स्तु रत्नाचलः॥ ६७॥

सृजामि किं विघ्नमिदं नृपस्तुताविती‍ङ्गितैः पृच्छति तां सखीजने।
स्मिताय वक्त्रं यदवक्रयद्वधूस्तदेव वैमुख्यमलक्षि तन्नृपे॥ ६८॥

दृशाथ निर्दिश्य नरेश्वरान्तरं मधुस्वरा वक्तुमधीश्वरा गिराम्।
अनूपयामास विदर्भजाश्रुती निजास्यचन्द्रस्य सुधाभिरुक्तिभिः॥ ६९॥

रत्नसम्पदामुदयेनोदग्र उच्छ्रितः, तथापि याचकश्रेणीनां वर्तीणां वर्जनेन परिहारेण यत् दुर्यशः तेन निविडितव्रीडो घनीकृतलज्जो रत्नाचलो रोहणाद्रिस्तु कथमास्ते कथं तिष्ठति लज्जासम्बरणोपायस्याभावादिति भावः। अत्र द्रुमशैलयोर्लज्जाऽसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः॥ ६७॥

सृजामीति। अथ सखीजने तां भैमीं इदं नृपस्यैतत् नृपस्य स्तुतौ विघ्नं सृजामि किमितीङ्गितैश्चेष्टितैः पृच्छति सति वधूर्भैमी स्मिताय स्मितं कर्तुं क्रियार्थेत्यादिना चतुर्थी। वक्त्रमवक्रयत् वक्रीचकारेति यत् तद्वक्रीकरणमेव तन्नृपे तस्मिन्नृपे वैमुख्यं नैस्पृह्यमलक्षि लक्षितम्॥ ६८॥

दृशेति। अथ मधुस्वरा मधुरकण्ठी गिरामधीश्वरा सरस्वती नरेश्वरान्तरं राजान्तरं वक्तुं वर्णयितुं दृशा विनिर्दिश्य निरूप्य विदर्भजाया वैदर्भ्याः श्रुती श्रोत्रे निजास्यचन्द्रस्य सुधाभिरुक्तिभिर्वचनामृतैरित्यर्थः अनूपयामास सरसीचकार जलप्रायमनूपं स्यादित्यमरः। अनुगता आपो यस्येत्यनूपं ऋक्पूरब्धूरित्यादिना समासान्तः ऊदनोर्देश इत्यूकारः तस्मात् तत्करोतीत्यादिना ण्यन्ताल्लिट्॥ ६९॥

स कामरूपाधिप एष हा त्वया न कामरूपाधिक ईप्स्यतेऽपि यः ।
त्वमस्य सा योग्यतमाऽपि वल्लभा सुदुर्लभा यत्प्रतिमल्लभा परा ७०
अकर्णधाराशुगसम्भृतां गतां गतैररित्वेण विनास्य वैरिभिः ।
विधाय यावत्तरणिर्भिदामहो निमज्ज्य तीर्णः समरे भवार्णवः ७१
अमुष्य भूलोकभुजो भुजोष्मभिस्तपर्तुरेव क्रियतेऽरिवेश्मनि ।

स इति । एष पुरोवर्ती सः प्रसिद्धः कामरूपाधिपः कामरूपदेशाधीश्वरः कामात्कन्दर्पादपि रूपेणाधिको यस्त्वया नेच्छते हा वत नैतद्युक्तमिति भावः । कुतः ययोर्द्वयोः प्रतिमल्ला समाना भा कान्तिर्यस्याः सा यत्प्रतिमल्लभा परा अन्याप्यालिः सुदुर्लभा अतिदुर्लभा सा त्वमस्य राज्ञो योग्यतमा अत्यन्तानुरूपा वल्लभा दयितासि समानसौन्दर्यतया समागमयोग्योऽयं त्वया वीचितव्य एवेत्यर्थः ॥ ७० ॥

अकर्णेति । कर्ण इव कर्णः प्रतिमुखशल्यं तद्रहितः अकर्णः न कर्णिभिर्नापि दिग्धैरिति निषेधादिति भावः । अकर्णधारा आश्रयो येषां तैः आशुगैर्विशिखैः संभृतानि भृतान्यङ्गानि येषां ते तदङ्गास्तां गतैस्तस्य वैरिभिररिभ्य स्त्रायत इत्यरित्वं वर्मादि तेन विना तद्विहाय समरे निमज्ज्य भंक्त्वा तरणेर्भिदां विधाय यावत् सूर्य्यमण्डलं भित्त्वैव भवः संसार एवार्णवस्तीर्णः अहो । किं च कर्णधारं नाविकमाशुगमत्वा वायुमरित्रेण केनिपातकेन च विना तरणेर्नौको भेदे जले निमज्ज्यापि संभृताङ्गैरविकलाङ्गैरेवार्णवस्तीर्णः अहो भाग्यमित्यर्थान्तरं गम्यते ॥ ७१ ॥

अमुष्येति । यद्यस्मादमुष्य भूलोकभुजो भुजोष्मभिर्भुजप्रतापैररिवेश्मनि तपर्तुः ग्रीष्मर्तुरेव क्रियते नित्यसन्तापः क्रियत इत्यर्थः । तत्तस्मात् वैलारिवेश्मनि तपस्विनी शोच्या धर्मशीला चारित्रधूर्नेत्रोत्पलयोर्वसन्तीभि

प्रपां न तत्रारिवधूस्तपस्विनी ददातु नेत्रोत्पलवासिभिर्जलैः ७२

एतद्दत्तासिघातस्रवदसृगसुहृद्वंशसार्द्रेन्धनैतद्-
दोरुद्दामप्रतापज्वलदनलमिलद्भूमधूमभ्रमाय।
एतद्दिग्जैत्रयात्रासमसमरभरं पश्यतः कस्य नासीत्
एतन्नासीरवाजिव्रजखुरजरजोराजिराजिस्थलीषु॥ ७३।

क्षीरोदन्वदपः प्रमथ्य मथितादेशेऽमरैर्निर्मिते

तद्वासिभिरुत्पलवासनावद्भिश्च जलैः प्रपिबन्त्यस्यामिति प्रपां पानीयशालिकां घञर्थे कविधानं। न ददातीति काकुः ददातीत्यर्थः। धार्मिका हि धर्मकाले वासितोदकप्रायाः प्रपाः प्रवर्तयन्तीति भावः ॥ ७२ ॥

एतदिति। आजिस्थलीषु रणभूमिष्वेतस्य राज्ञो नासीरे सेनामुखे वाजिव्रजानां खुरैः जातो रजसां राशिरेतस्य दिशो जैत्रेषु तृन्नन्तत्वात् षष्ठीसमासनिषेधः। यात्रास्वसममसदृशं समरभरं समरसम्मर्दं पश्यतः कस्य जनस्य एतेन राज्ञा दत्तैः प्रयुक्तैरसिघातैः खड्गप्रहारैः स्रवदसृजः स्रवद्रक्ताः असुहृद्वंशाः शत्रुवर्गाः त एव वा वेणवः वंशो वर्गे कुले वेणाविति विश्वः। त एव सार्द्रेन्धनानि सरसानीन्धनानि यस्य तस्मिन्नेतस्य राज्ञो दोष्णो भुजस्य उद्दामः गम्भीरः प्रताप एव ज्वलदनले मिलति वर्तमाने धूमभूम्नि धूमसङ्घे भ्रमाय भ्रान्त्यै नासीत् सर्वस्याप्यासीदेवेत्यर्थः। अत्र रजोराजौ कविसंमतसादृश्याद्धूमभ्रमोक्त्या भ्रान्तिमदलङ्कारः॥ ७३ ॥

क्षीरेति। अमरैः क्षीराणामुदन्वतः क्षीराब्धेरापः क्षीरोदन्वदापः ऋक्पूरित्यादिना समासान्तः। ताः प्रमथ्य विलोड्य मथितं मथनोद्भूतो निर्जलो दधिक्षीरविकारः तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलमित्यमरः। तद्भूते आदेशे द्रवादेशे रूपान्तरे निर्मिते सम्पादिते सति रूपान्तरापादानेन क्षीराब्धावभावङ्गमिते सतीत्यर्थः। तद्यथा प्रसिद्धमुदकं यस्य क्षीरोदः क्षीराब्धिः उदकस्योदसंज्ञायामित्युदादेशः। तस्य [illegible]

स्वाक्रम्यं सृजतस्तदस्य यशसः क्षीरोदसिंहासनम् ।
केषां नाजनि वा जनेन जगतामेतत् कवित्वामृत-
स्रोतःप्रोतपिपासुकर्णकलशीभाजाभिषेकोत्सवः ॥ ७४ ॥

समिति पतिनिपाताकर्णनद्रागदीर्ण-
प्रतिनृपतिमृगाक्षीलक्षवक्षःशिलासु ।
लिखितलिपिरिवोरस्ताडनव्यस्तहस्त-
प्रखरनखरटङ्कैरस्य कीर्त्तिप्रशस्तिः ॥ ७५ ॥

स्वेनाक्रम्यमाक्रमणार्थं सृजतः कुर्वतः स्वयमाक्रमत इत्यर्थः । अस्य राज्ञो यशसः एतस्य राज्ञः सम्बन्धि कवित्वमेतद्विषयकवित्वमित्यर्थः तदेवामृतस्य स्रोतसा प्रवाहेण प्रोते पूरिते पिपासूनां पातुमिच्छूनां अत्यादरेण शृण्वतां कर्णाविव कलशावभिषेचनकुम्भौ भजतीति तद्भाजां केषां वा जगतां सम्बन्धिना जनेन अभिषेकोत्सवो नाजनि न जनितः जनेरण्यन्तात्कर्मणि लुङ् । लोकान्तरस्था अपि कवयः क्षीराब्धियशः सर्वत्रानन्दकरं कथयन्तीत्यर्थः । अत्र क्षीरोदसिंहासनाध्यासीनः एतद्यशः क्षीरोदस्थाखिलाः कवय एवाभिषेक्तारः कवित्वमेवजलं श्रोतृजनकर्णा एव कलशाः तत्सम्भवस्यैवाप्यपसरितः प्रसर्पणात् स्तुतिरेवाभिषेक इति रूपकालङ्कारः ॥ ७४ ॥

समितीति । अस्य राज्ञः कीर्त्तेः प्रशस्तिः प्रशंसा समिति आजौ पतिनिपातस्य भर्तृमरणस्याकर्णने श्रवणेऽपि द्राक् सद्य एवादीर्णा अभिन्ना अक्षरविन्यासयोग्या इति यावत् । प्रतिनृपतिमृगाक्षीणां शत्रुराजस्त्रीणां लक्षसंख्यानां वक्षःशिलासु उरस्ताड़नेन न्यस्तानां प्रसारितानां हस्तानां ये प्रखरनखाः तीक्ष्णनखास्तैरेव टङ्कैः पाषाणभेदकैः टङ्कः पाषाणभेदक इत्यमरः । रचितलिपिरिव कृताक्षरविन्यास इव इति दुःखातिरेकाद्वक्षःक्षतरेखालेखनेषु कीर्त्तिप्रशस्तित्वस्योत्प्रेक्षा ॥ ७५ ॥

विधाय ताम्बूलपुटीं कराङ्कगां बभाण ताम्बूलकरङ्कवाहिनी
दमस्वसुर्भावमवेत्य भारतीं नयाऽनया वक्त्रपरिश्रमं शमम्॥७
समुन्मुखीकृत्य बभार भारती रतीशकल्पेऽन्यनृपे निजं भुजम्।
ततस्त्रसद्बालमृगद्विलोचनां शशंस संसज्जनरञ्जनीं जनीम्॥७७
अयं गुणौघैरनुरज्यदुत्कलो भवन्मुखालोकरसोत्कलोचनः।
स्पृशन्तु रूपामृतवापि नन्वमुं तवापि दृक्तारतरङ्गभङ्गयः॥७८।
अनेन सव्वार्थिकृतार्थताकृता ऽऽहृतार्थिनौ कामगवीसुरद्रुमौ।

विधायेति। ताम्बूलकरङ्कवाहिनी ताम्बूलपात्रधारिणी दमस्वसुर्भावमवेत्य ज्ञात्वा ताम्बूलपुटीं वीटिकां कराङ्कगां करतलसंस्थांविधाय अनया वीटिकया वक्त्रपरिश्रमञ्चिरतरव्याहारजन्यमास्यशोषं शमं शान्तिं नयेति भारतीम्बभाण अम्ब! नायमस्यै रोचते कृतं वृथा श्रमेणेति तात्पर्यम्॥ ७६॥

समुन्मुखीति। अथ भारती रतीशकल्पे कामप्रख्ये अन्यस्मिन्नृपान्तरे विषये निजम्भुजं समुन्मुखीकृत्याभिमुखीकृत्य भारती ततो हस्तोद्यमानन्तरं त्रसद्बालमृगद्विलोचनां चकितबालमृगाक्षीं संसज्जनरञ्जनीं वधूं शशंस उवाचेत्यर्थः॥ ७७॥

अयमिति। ननु रूपामृतवापि! सौन्दर्यसुधारसदीर्घिके! गुणौघैरनुरज्यन्त उत्कला जनपदा यस्मिन् सोऽयं राजा भवत्यास्यालोकरसेन आलोकनकौतुकेनोत्कलोचन उत्सुकाक्ष स्तवापि दृशोस्ताराः स्थूलतरङ्गभङ्ग्यो वीचीविन्यासा अमुमुत्कलाधिपतिं स्पृशन्तु स्वानुरागिण्यनुराग उचित इति॥ ७८॥

अनेनेति। सर्वार्थिनां कृतार्थताकृता पूर्णकामत्वकारिणा अनेन राज्ञा हृतार्थिना अर्थिरहितौ कृतौ कामानां धात्री गौः कामगवी कामधेनुः गोरतद्धितलुकीति समासान्तष्टच्। सा च सुरद्रुमः कल्पवृक्ष

मिथःपयःसेचनपल्लवाशने प्रदाय दानव्यसनं समाप्नुतः ॥७९॥
नृपः कराभ्यामुदतोलयन्निजे नृपानयं यान् पततः पदद्वये ।
तदीयचूडाकुरुविन्दरश्मिभिः स्फुटेयमेतत्करपादरञ्जना ॥ ८० ॥

यत् कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते
जातं यद्वनकाननैकशरणप्राप्तेन दावाग्निना ।
एषैतद्भुजतेजसा विजितयोस्तावत्तयोरौचिती

तौ मिथोऽन्योन्यं पयःसेचनं क्षीरसेकम्पल्लवाशनं पल्लवभोजनञ्च प्रदाय दानव्यसनन्दानासक्तिं समाप्नुतः समापयतः । अर्थान्तराभावादन्योन्यसम्प्रदानकपयःपल्लवमात्रदानेन कथञ्चिद्दानकण्डूत्यपनोदं कुरुत इत्यर्थः ॥ ७९ ॥

नृप इति । अयं नृपः निजे पदद्वये पततः प्रणमतः यान्नृपान् कराभ्यामुदतोलयत् कृपया किरीटेष्वास्फालयत् तदीयास्फालितनृप सम्बन्धिनीषु चूडासु ये कुरुविन्दाः पद्मरागाः कुरुविन्दस्तु मुस्तायां कुल्माषव्रीहिभेदयोः । हिङ्गुले पद्मरागे चेति विश्वः । तेषां रश्मिभिः एतस्य राज्ञः करपादस्य करयोः पदयोश्च रञ्जना इयं स्फुटा स्वाभाविककर पादरागेराजकिरीटमाणिक्यमयूखरञ्जनात्वमुत्तोलनेनास्यानेकराजविषयत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ८० ॥

यदिति । भानुमान् भास्वान् कस्यामपि ककुभि क्वापि दिशि स्थेमानं स्थिरत्वं स्थिरशब्दस्य दृढादिपाठाद्वर्णदृढादिभ्यः ष्यञ्चेति चकारादिमनिच् । प्रिय स्थिरेत्यादिना स्थादेशः । नालम्बत इति यद्दावाग्निना घनं सान्द्रं काननमेवैकशरणं प्राप्तेन द्वितीयाश्रितेत्यादिना समासः । जातमिति भावे क्तः । एषा एतदुभयमपीत्यर्थः विधेयप्राधान्यात् स्त्रीलिङ्गता । एतस्य भुजतेजसा भुजप्रतापेन विजितयो स्तयोर्भानुदावाग्न्योरौचिती तावदौचित्यमेव तं वाडवं वडवाग्निं तं धिक् येन

धिक्तं वाडवमम्भसि द्विषि भिया येन प्रविष्टं पुनः॥८१॥

अमुष्योर्वीभर्तुः प्रसृमरचमूसिन्धुरभवै-
रवैमि प्रारब्धे वमथुभिरवश्यायसमये।
न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न तद्-
वधूवक्त्राम्भोजं भवतु न स तेषां कुदिवसः ॥ ८२ ॥

आत्मन्यस्य समुच्चितीकृतगुणस्याहोतरामौचिती
यन्नात्रान्तरवर्जनादजनयद्भूजानिरेष द्विषाम्।
भूयोऽहङ्क्रियते स्म येन च हृदा स्कन्धो न यस्यानमत्

वाडवेन पुनर्भिया द्विषि सहजद्वेषिण्यम्भसि प्रविष्टं भावे क्तः। स्वयन्तु त्रयणाद्दूरं पलायनमेवेति भावः। अत्र स्वाभाविकस्य सूर्यादपर्यटनादेरेतद्भीहेतुकत्वोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ८१ ॥

अमुष्येति। अमुष्योर्वीभर्तुः प्रसृमराः प्रसारिणः सृघस्यदः क्मरच्। तेभ्यश्चमूसिन्धुरेभ्यः सेनागजेभ्यो भवैर्वमथुभिः करशीकरैः वमथुः करशीकर इत्यमरः। अवश्यायसमये नीहारकाले प्रारब्धे सति प्रतिभटनृपाः शत्रुभूपा अन्तरन्तःकरणे न कम्पन्तान्न कम्पेरन्निति इत्यादि सर्वत्र काकुः। तद्वधूनां वक्त्रमेवाम्भोजञ्च म्लायतु तेषां कुदिवसो दुर्दिनञ्च न भवतु भवेदेवेत्यर्थः। अवैमि जानामि वाक्यार्थः कर्म अत्र करशीकरादौ नीहारादिरूपणाद्रूपकालङ्कारः ॥ ८२ ॥

आत्मनीति। आत्मनि स्वस्मिन्नेवं समुच्चितीकृतगुणस्य समाहृतगुणस्यास्य राज्ञः औचिती औचित्यमहोतरामत्याश्चर्यं किमेतदित्यादिना अव्ययादाम्प्रत्ययः। औचित्यमेवाह समिति युद्धे अलंकर्म्मीणे अलं कर्म्मीणः इत्यमरः। पर्यादियोगात्तादर्थ्ये चतुर्थी। अत्र समासादलं-कर्म-शब्दादषड्क्षाशितं ग्वलं कर्मेत्यादिना खङ्प्रत्ययः। समिदलंकर्मीणो बाणगणो यस्य स तथोक्तः अमोघबाण इत्यर्थः अयं भूर्लोके यशोऽत

तन्मर्म्माणि दलं दलं समिदलंकर्म्मीणबाणव्रजः ॥८३॥

दूरं गौरगुणैरहंकृतिमतां जैत्राङ्ककारे चर-
त्येतद्दोर्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि ।
धम्मिल्ले तव मल्लिकासुमनसां माला भिया लीयते
पीयूषस्रवकैतवाद्धृतदरः शीतद्युतिः स्विद्यति ॥ ८४ ॥
एतद्गन्धगजस्तृषाम्बुधि भृशं कण्ठान्तमज्जत्तनुः
फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्द्धिभिः ।

भूजानिः भूपतिः जाया नीङ् । द्विषां सम्बन्धिनां येन च हृदा हृदयेन भूयो भूयिष्ठमहङ्क्रियतेस्म अहङ्करोतेर्भावे लट् लटस्म इति भूते लट् । यः स्कन्दो भुजशिरो नानमत् न प्राणमत् गात्रान्तराणां अवयवान्तराणां वर्जनाद्वर्जनकृत्वेत्यर्थः तेषामनपराधित्वादिति भावः ल्यब्लोपे पञ्चमी । तस्य हृदयस्कन्धस्य मर्माणि दलं दलं दलयित्वा आभीक्ष्ण्ये णमुल् चेति णमुल्प्रत्ययः । आभीक्ष्ण्ये द्वे भवत इत्युपसंख्यानाद्द्विर्भावः । यदजनयत् यद्खण्डनमकरोदित्यर्थः । तदेतद्खण्डप्रमाणदखण्डनं राज्ञ उचितमाश्चर्यंतरं चेत्यर्थः । अहङ्कारादनम्रमरिं समूलघातं हन्तीत्ययमिति भावः ॥ ८३ ॥

दूरमिति । एतस्य राज्ञो दोष्णो भुजस्य यशसि गौरैः धवल्यैरेव गुणैः गुणे शुक्लादयः पुंसीत्यमरः । दूरमत्यन्तमहङ्कृतिमतां असाधारणाभिमानवतां कुमुदादिधवलवस्तूनां जैत्राङ्ककारे चरति तदहङ्कारखण्डनाय जित्वरयुद्धकारिणि भ्रमति सति अङ्क इत्यनुवृत्तौ च चित्रयुद्धे विभूषणे इति विश्वः । कुमुदं बिभ्यद्भीतं सत् निशि निद्रां स्वापं मुकुलनञ्च न प्रयाति न प्राप्नोति मल्लिकासुमनसां माला भिया तव धम्मिल्ले संयतकेशपाशे धम्मिल्लाः संयताः कचा इत्यमरः । लीयते अन्तर्धत्ते शीतद्युतिश्चन्द्रोऽपि धृतदरः धृतत्रासः सन् पीयूषस्रवकैतवादमृतस्रावव्याजात् स्विद्यति निद्रापरिहारादीनि भीतचिह्नानीति भावः । अत्र दोर्यशःप्रभृतीनां अहङ्काराद्यसम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ८४ ॥

दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवमि-
व्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः ॥ ८५ ॥
अथैतदुर्व्वीपतिवर्णनाद्भुतं न्यमीलदास्वादयितुं हृदीव सा।
मधुस्रजा नैषधनामजापिनी स्फुटीभवद्ध्यानपुरःस्फुरन्नला॥८६॥
प्रशंसितुं संसदुपान्तरञ्जनं श्रिया जयन्तं जगतीश्वरं जिनम्।
गिरः प्रतस्तार पुरावदेव ता दिनान्तसन्ध्यासमयस्य देवता॥८७

एतदिति। तृषा पिपासयाऽम्भसि भृशं कण्ठान्तं कण्ठपर्यन्तं मग्ना तनुः शरीरं यस्य स तस्य क्रीडादिक्करिजयश्रीयशांसि तत्सदृग्भिः तत्सदृशैः फेनैः पाण्डुरितः पाण्डुवर्णीकृतः दन्तद्वन्द्वस्य जले अनुबिम्बनेन प्रतिबिम्बेन चतुर्दन्तो दन्तचतुष्टयवान् एतस्य राज्ञो मल्लगजो दुष्टगजः कराम्भसां वमिर्वमथुः करशीकर इत्यर्थः। प्रच्छर्दिका वमिः स्त्रीस्यादित्यमरः। औणादिक इकारः। तस्या व्याजादम्बुधेरभ्रमुवल्लभेनैरावतेन विरहं विरहतापन्निर्वापयति शमयतीति सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ८५ ॥

अथेति। अथ मधुस्रजा वरणार्थया मधूकमालया तयैवाक्षमालयेति भावः। मधूके तु गुडपुष्पमधुद्रुमावित्यमरः। नैषधस्य नलस्य नाम जपतीति तज्जापिनी अतएव स्फुटीभवता साक्षात्कारपरिणामिध्यानेन पुरोऽग्रे स्फुरन् प्रत्यक्षीभवन् नलो यस्याः सा सती दमयन्ती एतस्योर्वीपतेस्तत्कालेश्वरस्य वर्णनामेवाद्भुतमाश्चर्यरसं हृदि हृदये आस्वादयितुमनुभवितुमिव न्यमीलन्निमीलिताक्षी जाता परमार्थतस्तु नलसाक्षात्काररसास्वादनायेवेत्यर्थः ॥ ८६ ॥

प्रशंसितुमिति। दिनान्तसन्ध्यासमयस्य सायंसन्ध्याकालस्याधिदेवता सा सरस्वती सन्ध्याविध्यर्थे सरस्वतीति स्मृतेः। संसदुपान्तरञ्जनं सर्वास्थानरञ्जकमित्यर्थः श्रिया सौन्दर्येण जिनं जिनाख्यं देवं सोऽति सुन्दर इति प्रसिद्धेः। तं जयन्तं ततोऽपि सुन्दरमित्यर्थः जगतीश्वरं

तथाधिकुर्य्या रुचिरे चिरेप्सिता यथोत्सुकः सम्प्रति सम्प्रतीच्छति ।
अपाङ्गरङ्गस्थललास्यलम्पटाः कटाक्षधारास्तव कीकटाधिपः ८८
इदंयशांसि द्विषतः सुधारुचः किमङ्कमेतद्द्विषतः किमाननम्।
यशोभिरस्याखिललोकधाविभिर्विभीषिता धावति तामसीमसी
इदंनृपप्रार्थिभिरुज्झितोऽर्थिभिर्मणिप्ररोहेण विवृध्य रोहणः।
कियद्दिनैरम्बरमावरिष्यते मुधा मुनिर्विन्ध्यमरुद्ध भूधरम्॥९०॥

पृथिवीपतिं प्रशंसितुं स्तोतुं पुरा पूर्ववदेव ताः प्रसिद्धा गिरः प्रतस्तार प्रपञ्चयामास ॥ ८७ ॥

तथेति । हे रुचिरे ! सुन्दरि ! उत्सुक उत्कण्ठतः कीकटाधिपो मगधेश्वरश्चिरेप्सिताश्चिरात् प्रभृत्याकाङ्क्षिताः अपाङ्गो नेत्रान्तः स एव रङ्गस्थलं तत्र लास्ये नर्तने लम्पटा लालसा लोलुपो लोलुभो लोभो लोलुभो लालसाऽपि चेति यादवः । तव कटाक्षधाराः कटाक्षपरम्परा यथा सम्प्रति इदानीं सम्प्रतीच्छति प्रतीच्छते तथाधिकुर्याः प्रसारय कटाक्षदृष्ट्याप्येनं पश्येत्यर्थः ॥ ८८ ॥

इदमिति । अखिललोकान् धावन्ति गच्छन्तीति तद्धाविभिरस्य कीकटेश्वरस्य यशोभिः विभीषिता वित्रासिता तमस इयं तामसी मसी-तमोमालिन्यं इदंयशांस्येतत्कीर्तीर्द्विषतो विरुन्धानस्य द्विषोऽमित्र इति शतृप्रत्ययः द्विषः शतुर्वा वचनमिति विकल्पात् षष्ठी प्रतिषेधे कर्मणि द्वितीया । सुधारुचः सुधांशोरङ्कः किं धावति ? गच्छति किं ? तथा एतत्कीर्तिं द्विषत एतद्द्विषत एतच्छत्रोराननञ्च धावति किं ? एतद्यशश्चन्द्रिकाभयात्तमश्चन्द्रकलङ्कमेतच्छत्रुमुखञ्च प्रविष्टमित्युत्प्रेक्ष्यते अन्यथा कथमनयोरजस्रमीदृङ्मालिन्यमिति भावः ॥ ८९ ॥

इदमिति । इदं नृपप्रार्थिभिरिमं नृपमेव प्रार्थयमानैरर्थिभिरुज्झितो रोहणो रोहणाद्रिः मणिप्ररोहेण नवरत्नाङ्कुरोद्भेदेन विवृध्य अव्ययीभावात् वर्द्धित्वा कियद्दिनैः कतिपयदिनैरेवाम्बरमाकाशमावरिष्यते आच्छादयिष्यति मुनिरगस्त्यो मुधा वृथैव विन्ध्यं भूधरमरुद्ध स्तम्भयामा-

भूशक्रस्य यशांसि विक्रमभरेणोपार्जितानि क्रमा-
देतस्य स्तुमहे महेभदशनस्पर्द्धीनि कैरक्षरैः ।
लिम्पद्भिः कृतकं कृतोऽपि रजतं राज्ञां यशःपारदै-
रस्य स्वर्णगिरिः प्रतापदहनैः स्वर्णं पुनर्निर्मितः ॥९१॥
यद्भर्त्तुः कुरुतेऽभिषेणनमयं शक्रो भुवः सा भुवं
दिग्दाहैरिव भस्मभिर्मघवता सृष्टैर्धृतोद्धूलना ।

स रोहणस्य तत्कार्यकारित्वादिति भावः । अत्र रोहणाद्रेरीदृग्विषयसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ९० ॥

भूशक्रस्येति । भूशक्रस्य भूदेवेन्द्रस्य एतस्य राज्ञः सम्बन्धि विक्रमभरेण पराक्रमातिशयेन क्रमादुपार्जितानि महेभदशनस्पर्द्धीनि गजेन्द्रदन्तसवर्णानि यशांसि कैरक्षरैर्वाग्भिः स्तुमहे स्तोतुं न शक्यत इत्यर्थः । तथाहि लिम्पद्भिः रञ्जद्भिः राज्ञामरिराजानां यशोभिरेव पारदैः रसैः रसः सूतश्च पारद इत्यमरः । कृतकं कृत्रिमं रजतं कृतोऽपि स्वर्णगिरिः हेमाद्रिरस्य प्रतापदहनैः पुनः स्वर्णं निर्मितः कृतः रसलिप्तसुवर्णं रजतसुवर्णं भवति तत्पुनरग्निदाहात् प्रकृतिस्थं भवतीति प्रसिद्धमेव अत्राप्युक्तरूपासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ९१ ॥

यदिति । भुवः शक्रो भूदेवेन्द्रोऽयं राजा यस्याः क्षौण्या भर्तुरभिषेणनं सेनया अभियानं कुरुते यत्सेनयाभिगमनमरौ तदभिषेणनमित्यमरः । अष्टवपुषोऽष्टमूर्तेः शम्भोर्मूर्तिरष्टान्यतमा मूर्तिः सा क्षौणी असृग्वृष्टौ सतिकरकवर्षे सन्ध्याधिया सन्ध्याभ्रान्त्या सन्ध्यावेलायां भवं सान्ध्यमेव सन्ध्यावेलाद्यृतुनक्षत्रेभ्योऽण् । नृत्तं तन्नटनञ्च तदेव व्रतं सन्ध्याव्रतं माभाजि माभञ्जि भजेः कर्मणि लुङ् भञ्जेश्च चिणि विभाषा नलोपे उपधावृद्धिरिति मत्वेति शेषः इति करणादेव गम्यमानार्थत्वादप्रयोगः । मघवता इन्द्रेण सृष्टैर्दिग्दाहैर्दिग्दाहोद्भवैरिव स्थितैः भस्मभिः धृतोद्धूलना धृतभस्मानुलेपना सती द्राक् सपदि नृत्यति ध्रुवमित्युत्प्रेक्षा ।

शम्भोर्म्मा वत सान्ध्यवेलनटनं भाजि व्रतं द्रागिति
क्षौणी नृत्यति मूर्त्तिरष्टवपुषोऽसृग्वृष्टिसन्ध्याधिया॥९२॥

प्रागेतद्वपुरामुखेन्दु सृजतः स्रष्टुः समग्रस्त्विषां
कोशः शोषमगादगाधजगतीशिल्पेऽप्यनल्पायितः।
निःशेषद्युतिमण्डलव्ययवशादीषल्लभैरेष वा
शेषः केशमयः किमन्धतमसस्तोमैस्ततो निर्म्मितः॥९३॥

तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारं
निर्वाणारिप्रतापानलजमिव सृजत्येष राजा रजोभिः।

एतद्यातव्यराष्ट्रेषु दिग्दाहपांशुवर्षरक्तवृष्टिभूकम्पादयो जायन्ते तत्र इयमुत्प्रेक्षा ॥ ९२ ॥

प्रागिति। एतस्य राज्ञो वपुः प्राक् प्रथममामुखेन्दोरामुखेन्दु मुखानधिकमित्यर्थः अभिमुखार्थेऽव्ययीभावः। सृजतः स्रष्टुः सम्बन्धि अगाधजगतीशिल्पेऽप्यखिलजगन्निर्म्माणेऽनल्पायितोऽनल्पीभूतोऽक्षीण इत्यर्थः लोहितादेराकृतिगणत्वात्क्यङि कर्त्तरि क्तः। प्रत्युत समग्रः त्विषां कोशस्तेजोराशिः शोषं रिक्ततामगात् ततोऽनन्तरं निःशेषद्युतिमण्डलव्ययवशात् तेजोमात्रनाशवशादीषल्लभैः सुलभैः तद्धेतुकत्वात्तदुत्पत्तेरिति भावः। ईषद्दुरित्यादिना खल्प्रत्ययः। अन्धयन्तीत्यन्धानि तमांस्यान्धतमांसि गाढान्धकारा अवसमन्धेभ्य स्तमस इति समासान्तः। तेषां स्तोमैरेव केशमयः केशपाशात्मकः शेषो वपुःशेषो निर्म्मितः किमित्युत्प्रेक्षालङ्कारः तेन चास्य लोकातिशयतेजो व्यज्यते॥९३॥

नर्त्तदिति। एष राजा तासां दिशां जैत्रासु यात्रासूद्धुराणामुच्छृङ्खलानां तुरगाणां खुराग्रैरुद्धतैः रजोभिः करणैः निर्वाणाच्छान्तादरिप्रतापानलाज्जातं तज्जमिव शत्रुप्रतापाग्निनिर्वाणजन्यमिव स्थितमित्यर्थः तदभावहेतुकत्वादन्धकारस्येति भावः। अन्धकारं सृजति रात्रौ कल्पयतीत्यर्थः। एतस्य कीर्त्तिप्रतानैः कीर्त्तिपटलैरेव विधुभि-

भूगोलच्छायमायामयगणितविदुन्नेयकायो भियास्मा-
द्देतत्कीर्त्तिप्रतानैर्विधुभिरिव युधे राहुराह्वयमानः॥९४॥
आस्ते दामोदरीयामियमुदरदरीं याधिशय्य त्रिलोकी
सम्मातुं शक्तिमन्ति प्रथिमभरवशादत्र नैतद्यशांसि ।
तामेतां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्म-
च्छद्मापन्नानि तानि द्विपदशनसनाभीनि नाभीपथेन॥९५॥
अस्यासिर्भुजगः स्वकोशविवराकृष्टः स्फुरत्कृष्णिमा
कम्पोन्मीलदराललीलवलनस्तेषां भिये भूभुजाम् ।

चन्द्रैः युधे युद्धायाहूयमानः सन् भिया भूगोलस्य भूबिम्बस्य छाया-तच्छायं विभाषा सेनासुरेत्यादिना नपुंसकत्वं । तदेव माया कपटं तन्मयः स चासौ गणितविदुन्नेयो गणितशास्त्रैकवेद्यः कायो यस्य सोऽभूत् ज्योतिःशास्त्रप्रमाणकं यद्राहोर्भूच्छायात्मकत्वं तदेतत्कीर्तिचन्द्रभियेत्युत्प्रेक्षा तया च राहुभीषकत्वेन कीर्तिचन्द्राणां प्रसिद्धचन्द्राद्व्यतिरिक्तो व्यज्यते ॥ ९४ ॥

आस्त इति । या इयं त्रिलोकी दामोदरस्येमां वैष्णवीमुदरदरीं कुक्षिकुहरमधिशय्याधिष्ठायास्ते तानि प्रसिद्धानि द्विपदशनसनाभीनि गजदन्तसन्निभानि एतद्यशांसि प्रथिमभरवशान्महिमातिशयवशात्तत्र त्रिलोक्यां सम्मातुं वर्तितुं न शक्तिमन्त्यशक्तानि तामेतां दामोदरदरीं पूरयित्वा मधुध्वंसिनो विष्णोः पाण्डूनि पद्मच्छद्मापन्नानि नाभिपुण्डरीकव्याजापन्नानि तानि निरगुरिव अत्र पद्मच्छद्मना निरगुरिवेति सापह्नवोत्प्रेक्षा सा च त्रिलोकी यशसोराधाराधेययो रानुरूप्यविलक्षणालङ्कारोत्थापितेति सङ्करः॥९५॥

अस्येति । स्वकोशान्निजपिधानादेव विवराद्बिलादाकृष्ट उद्धृतः स्फुरत्कृष्णिमा व्यक्तकृष्णवर्णः कम्पेन धूननेनोन्मीलन्ती अराललीला वक्रविलासा यस्य तद्वलनं सङ्गतिः यस्य सः प्रकटकुटिलगतिरित्यर्थः । अस्यासिरेव भुजगस्तेषामेव भूभुजां राज्ञां भिये भीतये भवति यैनीम वैः

सङ्ग्रामेषु निजाङ्गुलिमयमहासिद्धौषधीवीरुधः
पर्व्वांस्थि विनिवेश्य जाङ्गुलिकता यैर्नास नालम्बत॥ ९६

यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रता-
मस्मिन्नेव बिभर्त्ति यश्च किरति क्रूरध्वनिं निष्ठुरः।
दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन् गुणं
विख्यातः स्फुटमेक एष नृपतिः सीमा गुणग्राहिणाम् ९७
अस्यारिप्रकरः शरश्च नृपतेः सङ्ख्ये पतन्तावुभौ
सीत्कारञ्च न सम्मुखौ रचयतः कम्पञ्च न प्राप्नुतः।

किल संग्रामेषु निजाङ्गुलिमयी स्वाङ्गुलीरूपा महती सिद्धा अमोघा ओषधिवीरुत् ओषधिलता तस्याः पर्व ग्रन्थिमात्रे विनिवेश्य जाङ्गुलिकता विषवैद्यता नालम्बत यथा मुखान्तर्गतौषधं गारुडिकः सर्पो न हन्ति ग्रन्थिनौ पर्व परुषे विषवैद्यो जाङ्गुलिक इति चामरः। रूपकालङ्कारो व्यज्यत एव॥ ९६॥

यदिति। यश्च युधि अरिभटयोः श्रेणीषु पृष्ठं पश्चाद्भागं दर्शयति अस्मिन्नेव विषये वक्रता मनार्जवं बिभर्ति ताव्य प्रत्यर्थः। योऽस्मिन्नेव निष्ठुरः पुरुषः सन् क्रूरध्वनिं कर्णकठोरमपशब्दञ्च किरति दोषं भुजं भजन आश्रयतः भुजबाहू प्रवेष्टो दोरित्यमरः। दोषमकार्यमाचरतश्च तथाविधस्य तस्य चापस्य गुणं ज्यां नैतत्वादिकञ्च गृह्णन् स्वीकुर्व्वन्नेष नृपतिः कीकटेन्द्रः एक एव गुणग्राहिणां सीमा अवधिः स्फुटं व्यक्तं विख्यातः। अत्र गुणग्राहिसीमात्वस्य पूर्ववाक्यार्थहेतुकत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः॥ ९७॥

अस्येति। अस्य नृपतेररिप्रकरः शत्रुसङ्घः शरश्चोभौ संख्ये युगपत् सम्मुखौ पराभिमुखं पतन्तौ सीत्कारञ्च न रचयतः। दुःखनिर्गमयोरभावादिति च भावः। कम्पञ्च न प्राप्नुतः भयप्रयोगयोरभावा-

तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्त्ति यन्मुक्तयो-
रेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम्॥ ८८।
धूलिभिर्दिवमन्धयन् बधिरयन्नाशाः खुराणां रवै-
र्वातं संयति खञ्जयन् जवजयैः स्तोतॄन् गुणैर्मूकयन्।
धर्म्माराधनसन्नियुक्तजगता राज्ञाऽमुनाधिष्ठितः
सान्द्रोत्फालमिषाद्विगायति पदा स्प्रष्टुं तुरङ्गोऽपि गा
एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां

दिति भावः। किं च मुक्तयोः एकत्र संसारादन्यत्र शापाच्चेति भावः। उभयोः शरपरयोः न पुनर्निवृत्ति जागर्त्ति तद्युक्तं एकत्रागमनादपरत्र प्रत्यक्षाच्चेति भावः। किन्तु तत्र तयोः मध्ये एकोऽरिसङ्गो मित्रं सूर्यं भिनत्ति अपरः शरश्च वस्त्वर्थः शरस्तु मित्रं भिनत्त्यद्भुतं अत्रामित्रं भिनत्तीत्युक्तमित्रं न भिनत्तीति च प्रतीयते ईदृ अभिमुखपतिते तस्य विरोधादद्भुतं। द्वावेतौ पुरुषौ लोके सूर्यमण्डलभेदिनौ। परिव्राड्योगयुक्तश्च रणेचाभिमुखो हत इति स्मृतेः। मित्रमण्डलभेदनस्य वीरपुरुषायत्तत्वेन अत्र शत्रून् भिनत्तीत्यविरोधाद्विरोधाभासोऽलङ्कारः॥ ८८॥

धूलिभिरिति। संयति युद्धे धूलिभिः खुराणां धूलिभिः दिवमन्धयन् अन्तरिक्षचारिणां दृष्टीः प्रतिबध्नन्नित्यर्थः। खुराणां रवैः रजोभिराशास्तत्रत्यान् प्राणिन इत्यर्थः बधिरयन् बधिरीकुर्वन् जवजयैः वेगाधिकैः वातं खञ्जयन् पङ्गुं कुर्वन् वायोरप्यधिकवेग इत्यर्थः। गुणैर्वर्णैः स्तोतॄन्मूकयन्मूकीकुर्वन् स्तोतुमशक्य इत्यर्थः। धर्म्माराधनसन्नियुक्तजगता जगतो धर्म्मैकसाधनकारिणाऽमुना राज्ञा अधिष्ठितस्तुरङ्गोऽपि सान्द्रोत्फालमिषात् वेगातिशयत्वान्निरन्तरमूर्द्ध्वचरणनिक्षेपव्याजात् पदा एकेनापि चरणेनेति वेगातिशयोक्तिः। गां भुवं धेनुञ्च न विगायति स्पृशति। गोब्राह्मणानलान् भूमिं गोच्छिष्टं न पदा स्पृशेदिति निषेधादिति भावः॥८९॥

कष्टं दृष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि
अश्वैरस्वैरवेगैः क्षतखुरखुरलीमंक्षुसंक्षुभ्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धङ्करणरणधुरारेणुधारान्धकारात् ॥१००॥

उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रीडक्रीडद्द्विजालीगरुदुदितमरुत् स्फालवाचालवीचिः ।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः ॥१०१॥

वृद्धो वार्द्धिरसौ तरङ्गवलिभं विभ्रद्वपुः पाण्डुरं
हंसालीपलितेन यष्टिकलितस्तावद्वयोबंहिमा ।

एतेनेति । समरसमालोकिलोकास्पदे युद्धप्रेक्षकजनालयेऽपि भुवि भुतले अस्वैरवेगैरमन्दवेगैः मन्दस्वच्छन्दयोः स्वैरमित्यमरः । अश्वैः क्षताभिः खुरखुरलीभिः खुरसञ्चारैः संक्षु सपदि संक्षुभ्यमानात्कृष्यमानात् क्ष्मापृष्ठाद्भूतलादुत्तिष्ठतामुत्पततां अन्धाः क्रियन्ते एभिरित्यन्धङ्करणाः तेषां आढ्य सुभगेत्यादिना ख्युन्प्रत्ययः । रणस्य धूरग्रं रणधुरा ऋक्पूरित्यादिना समासान्तः । तेषां रेणूनां धारा सन्ततिः सैवान्धकारस्तस्माद्धेतोरेतेन राज्ञा उत्कृत्तकण्ठैः छिन्नकण्ठैः प्रतिसुभटैः परवीरैरेव नटैर्नर्तकैरारब्धानामाचरितानां नाट्याद्भुतानां प्रबन्धावयवानामित्यर्थः । कष्टं वत दृष्टैव नाभूत् न विद्यते स्म ॥ १०० ॥

उन्मीलदिति । उन्मीलल्लीलानां स्फुरद्विलासानां नीलोत्पलदलानां दलनेन विकासेन य आमोदस्तेन मेदस्विनि पूरक्रीडे जलराशेरुपरि क्रीडन्तीनां द्विजालीनां पक्षिगणानां गरुदुदितस्य पक्षोत्थस्य मरुतः स्फालेनास्फालनेन वाचालवीचिर्मुखरतरङ्गः शाखानिवहेन नवैर्हरिद्भिः हरितवर्णैः पर्णैः पूर्णाभिः द्रुमालीभिर्व्यालीढैरुपान्तैः प्रान्तैः शान्तव्यथानां शमितसन्तापानां पथिकदृशां दत्तरागो जनितह्लादस्तडागः एतेन राज्ञा अखानि निखात इति पूर्वधर्मोक्तिः ॥१०१॥

बिभ्रच्चन्द्रिकया च कं विकचया योग्यस्फुरत्सङ्गतं
स्थाने स्नानविधायिधार्म्मिकशिरोनत्यापि नित्याहृतः॥

तस्मिन्नेतेन यूना सह विहर पयःकेलिवेलासु बाले!
नालेनास्तु त्वदक्षिप्रतिफलनभिदा तत्र नीलोत्पलानाम्।
तत्पाथोदेवतानां विशतु तव तनुच्छायमेवाधिकारे
तत्फुल्लाम्भोजराज्ये भवतु च भवदीयाननस्याभिषेकः॥

पुनस्तड़ागमेव वर्णयति वृद्ध इति। तरङ्गैर्वलिभं वलियुक्तं तुन्दिवलिवटेर्भ इति मत्वर्थीयो भप्रत्ययः। हंसाल्येव पलितं शुक्लकेशः पलितं जरसा शौक्ल्यं केशादावित्यमरः। तेन पाण्डुरं वपुर्विभ्रत् यदिः प्रणालीस्तम्भः आलम्बदण्डस्य तया फलितो ऽवष्टब्धस्तावान् यो बंहिमा परिवृढत्वं बाल्याद्यवस्था बाहुल्यञ्च यस्य सः प्रियस्थिरेत्यादिना बहुलशब्दस्य बंहादेशः। खगबाल्यादिनोर्वयः इत्यमरः। विकचया स्फुटया विलुप्तकेशया च चन्द्रिकया ज्योत्स्नया शिरोरोगविशेषेण च सह योग्यं स्फुरच्च सङ्गतं सम्बन्धो यस्य तत् एकत्र तत्सदृशमन्यत्र तद्युक्तञ्चेत्यर्थः। कञ्जलं शिरश्च बिभ्रत् स्नानविधायिनां स्नानाद्यनुष्ठात्रीणां स्त्रीणां धार्म्मिकाणां धर्म्मचारिणां धर्मं चरतीति ठक्। शिरसां नत्या नमनेन निमज्जनेन नमस्कारेण च नित्यमादृत तत्कृतोऽसावयं वार्द्धिस्तड़ागो वृद्धः स्थविरोऽतिपूर्णश्च स्थाने युक्तं, युक्ते द्वे साम्प्रतं स्थाने इत्यमरः रूपकालङ्कारः॥ १०२॥

तस्मिन्निति। हे बाले! तस्मिंस्तड़ागे यूना तेन राज्ञा सह विहर पयःकेलिलीलासु जलक्रीड़ाकालेषु तत्र तड़ागे नीलोत्पलानान्त्वदक्ष्णोः प्रतिफलनात् प्रतिबिम्बनात् भिदा भेदः षिद्भिदादिभ्योऽङ्। नालेनास्तु नालमेव भेदकमस्त्वित्यर्थः। तव तनोः छाया तनुच्छायं कायकान्तिः विभाषासेनेत्यादिना नपुंसकत्वं। तस्य तड़ागस्य पाथोदेवतानां जलदेवतानामधिकारे आधिपत्ये विशतु आधिपत्यं करोतु-

एतत्कीर्त्तिविवर्त्तधौतनिखिलत्रैलोक्यनिर्वासितै-
र्विश्रान्तिः कलिता कथासु जरतां श्यामैः समग्रैरपि ।
जज्ञे कीर्त्तिमयादहो भयभरैरस्मादकीर्त्तेः पुनः
सा यन्नास्य कथापथेऽपि मलिनच्छाया बबन्ध स्थितिम् १०४
अथावदद्भीमसुतेङ्गितात् सखी जनैरकीर्त्तिर्यदि वास्य नेष्यते ।
मयापि सा तत् खलु नेष्यते परं सभाश्रवःपूरतमालवल्लिताम् १०५
अस्य क्षौणिपतेः परार्द्धपरया लक्षीकृताः सङ्ख्यया

त्यर्थः । भवदीयाननस्य तस्य फुल्लाम्भोजानां राज्ये अभिषेको भवतु त्वन्नेत्रादिकं त्वदीयोत्पलादिकर्मातिशय्यवर्तिष्यत इत्यर्थः ॥ १०२ ॥

एतदिति । एतस्य राज्ञः कीर्तिविवर्तैः यशोविलासैः धौतात् क्षालितान्निखिलत्रैलोक्यात् निर्वासितैः निष्कासितैः समग्रैः समस्तैरपि श्यामैः श्यामवस्तुभिर्जरतां वृद्धानां प्रवयाः स्थविरो वृद्धो जिनो जीर्णो जरन्नपीत्यमरः । जीर्यतेरतृन्नित्यतृन्प्रत्ययः । कथासु विश्रान्तिः कलिता एतद्यशोव्याप्त्या श्यामवस्तुजातं कथामात्रशेषमासीदित्यर्थः । अकीर्तिः पुनः अपकीर्तिस्तु कीर्तिमयात् कीर्त्यात्मकादस्मान्नृपाद्भयभरैः भयराशिभिर्जज्ञे जातं भावे लिट् । अकीर्तिरस्माद्भैषीदित्यर्थः । कुतः यद्यस्मात् अस्य सम्बन्धिनी मलिनच्छाया अपकीर्तिः कथापथेऽपि वाङ्मार्गेऽपि स्थितिं न बबन्ध यतोऽकीर्तिकथापि न श्रूयते तदीयमेतद्भयात् क्वापि यशो न गच्छतीत्युत्प्रेक्ष्यते अकीर्तिलेशोऽप्यस्य नास्तीत्यर्थः ॥ १०४ ॥

अथेति । अथ सखी भीमसुताया इङ्गितात् इङ्गितज्ञानादवदत् किमित्याह । अस्याकीर्तिर्जनैर्नेष्यते नाङ्गीक्रियते यदि इषेः कर्मणि लट् । तत्तर्हि मया सा तदकीर्तिः सभायाः श्रवःपूरः कर्णावतंसो या तमालवल्लिता, तां परं भृशं नेष्यते प्रापयिष्यते खलु ? नयतेः कर्मणि लट् अहमस्यापकीर्तिं सभां श्रावयिष्यामीत्यत्यर्थः ॥ १०५ ॥

स्वयं श्रावयति अस्येति । परार्धञ्च परमा संख्या ततोऽपि परया संख्यया लक्षीकृता विषयीकृताः तत्संख्याता इत्यर्थः । प्रज्ञैव चक्षुर्येषां

(१२०स०)

प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्त्तयः ।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्म्मरमणीदुग्धोदधेरोधसि ॥ १०६ ।
तदक्षरैः सस्मितविस्मिताननां निपीय तामीक्षणभङ्गिभिः सभां
इहास्य हास्यं किमभून्न वेति तं विदर्भजा भूपमपि न्यभालयत्
नलान्यवीक्षां विदधे दमस्वसुः कनीनिकागः खलु नीलिमालयः
चकार सेवां शुचिरक्ततोचितां मिलन्नपाङ्गः सविधे तु नैषधे ॥१०
दृष्ट्वा नलस्य श्रुतिचुम्बिनेषुणा करेऽपि चक्रच्छलनम्रकार्मुकः ।

ते प्रज्ञाचक्षुषो जात्यन्धाः तैर्लक्ष्यमाणं तदेकग्राह्यं यत्तिमिरं तत्प्रख्यास्तत्सङ्काशाः अस्य क्षौणीपतेः अकीर्त्तयः अष्टमं स्वरं षड्जादिस्वरात्परं स्वरं कलयता प्रयुञ्जानेन वन्ध्याया अनपत्याया उदराज्जातेन मूकानां प्रकरेण सङ्घेन कूर्म्मरमणीनां कूर्म्मस्त्रीणां दुग्धानि क्षीराणि तेषामुदधेरब्धेः रोधसि तीरे गीयन्ते किल ? तत्कथं जनैर्ज्ञास्यन्तेत्यर्थः । एतेनास्याकीर्त्तिलेशोऽपि खपुष्पकल्प इति स्तुतेः परकाष्ठायं किमित्यक्षमफलत्वादिति भावः । अत्र निन्दया स्तुतिप्रतीतेर्व्याजस्तुतिभेदालङ्कारः ॥ १०६ ॥

तदिति । विदर्भजा वैदर्भी तस्या अक्षरैर्वाक्यैः सस्मितानि विस्मितानि आननानि यस्यां तां सभामीक्षणभङ्गिभिर्दृष्टिप्रकारैः निपीय सस्पृहं दृष्ट्वा इहैतद्वाक्ये अस्य कीटकेश्वरस्यापि हास्यं स्मितमभूत् किं वा नाभूत् इतितं भूपमपि न्यभालयत् आलोकयत् ॥ १०७ ॥

नलेति । नीलिम्नो नैल्यस्य मालिन्यस्य चालय आश्रयो दमस्वः दमयन्त्याः कनीनिका तारका तारकाक्ष्णः कनीनिकेत्यमरः । नलादन्यस्य पुंसः वीक्षां वीक्षणं गुरोश्च हल इति स्त्रियामप्रत्यये वीट् । तदेवागोऽपराधं पापञ्च विदधे आगः पापापराधयोरित्यमरः । मलिनात्मनो हि मलिनकर्म्मैवाचरन्तीति भावः । अपाङ्गस्तु सविधे समीपस्थे नैषधे अधी नले मिलन् सक्तः शुचिरक्तः श्वेतरक्तो निर्मलानुरक्तहृदयश्च यस्य तस

स्मरः पराङ्गैरनुकल्प्य धन्वितां जनीमनङ्गः स्वयमार्दयत्ततः ॥१०९

उत्कण्टका विलसदुज्ज्वलपत्त्रराजि-
रामोदभागनपरागतराऽतिगौरी ।
रुद्रक्रुधस्तदरिकामधिया नले सा
वासार्थितामधृत काञ्चनकेतकीव ॥ ११० ॥
तन्नालोकनले चलेतरमनाः साम्यान्ननागप्यभू-
द्दृष्ये चतुरः स्थितान्न चतुरा पातुं दृशा नैषधान् ।

भावस्तत्ता तां तदुचितां सेवां भञ्जन् चकार साधवः साध्वेवाचरन्तीति भावः । एतेन कीकरपतावृजुदृष्टिपातादनुरागाभावो नैषधे तद्वैपरीत्यादनुरागश्चेति गम्यते । अतएव कीकरवीक्षणमपि सखीवाक्यनिमित्तत्वानुसन्धानलौल्यादित्यदोषः ॥ १०८ ॥

तदा नलोऽपि तां सानुरागमवैक्षत इत्याह दृशेति । स्वयमनङ्गोऽङ्गरहितः स्मरो नलस्य दृशा दृष्ट्यैव श्रुतिचुम्बिना कर्णान्तकृष्टेनेषुणा करस्थेन तया करे नलस्यैव करे चक्रच्छलेन चक्ररेखाव्याजेन कार्मुकः कोदण्डो यस्य स अतएव पराङ्गैर्नलाङ्गैः परकीयसाधनैरेव धन्वितां धानुष्कत्वमनुकल्प्य कायकुथबद्धानुष्कत्वेन सम्पाद्य ततो जनीं वधूमार्दयदपीडयत् ॥ १०९ ॥

उत्कण्टकेति । उत्कण्टका उद्गतपुलका अन्यत्रोदग्रसूचिका विलसन्ती उज्ज्वला पत्त्रराजिः पत्त्ररचना अन्यत्र दलपंक्तिः यस्याः सा आमोदं गन्धं हर्षं च भजतीति आमोदभाक् भजो ण्विः । आमोदो गन्धहर्षयोरिति विश्वः । तद्भाक् अपगतरागा न भवतीत्यनपरागा उभयत्राप्यतिशयार्थे तरप् । गौरीमतिक्रान्ता गुणैरित्यतिगौरी अत्यन्तगौरवर्णेति चोभयत्रापि योज्यं । सा दमयन्ती क्रोधादिति स्मरपरित्यागरोषात्तदरिकामधिया रुद्रक्रुधस्तु कामभ्रान्त्या आगता काञ्चनवर्णा केतकी काञ्चनकेतकीवेत्युत्प्रेक्षा नले वासार्थितां निवासाकाङ्क्षां अधृत धृतवती धरतेः कर्तरि लुङ् स्वरितेत्त्वात्तङ् ॥ ११० ॥

आनन्दाम्बुनिधौ निमज्ज्य नितरां दूरङ्गता तत्तला-
लङ्कारीभवनाज्जनाय ददती पातालकन्याभ्रमम् ॥१११॥
सर्व्वस्वं चेतसस्तां नृपतिरपि दृशे प्रीतिदायं प्रदाय
प्रापत्तद्दृष्टिमिष्टातिथिममरदुरापामपाङ्गोत्तरङ्गाम् ।
आनन्दाब्ध्ये न बन्ध्यानधित तदपराकूतपातान् स रत्याः
पत्या पीयूषधारावलनविरचितेनाशुगेनाशु लीढः ॥११२॥

तर्दति । चतुरा प्रवीणापि सा दमयन्ती तत्र तस्मिन्नलीकनले साक्षादात्यन्तिकसत्यनलसादृश्यात्सत्येतरमना निश्चलचित्ता सती आनन्दाम्बुनिधौ निमज्ज्य नितरां दूरं गता तलं प्राप्ता तस्य तलस्य अलङ्कारीभवनादाभरणीभावात्तत्रावस्थानादित्यर्थः । जनायालोकजनाय पातालकन्याभ्रमन्दधती सागरतलस्यैव पातालत्वात्तत्रस्था नागलोकस्थितिभ्रान्तिं जनयन्तीत्युक्तं । अग्रे स्थितानपि चतुरो नैषधानिन्द्रादिमायानलान् सत्यनलस्तु तदन्तरपुरोवर्त्तीति भावः । मनागीषदपि दृशा पातुं द्रष्टुं नाभूत् नाकल्पत शक्तेत्यादिना अत्यर्थयोगात्तस्य निरन्तरध्यानासादितनलसाक्षात्कारानन्दपारवश्यादिषुकारवत् पुरोवर्त्तिनोऽपि पुरन्दरादिमायानलानद्राक्षीदित्यर्थः ॥ १११ ॥

एवं दमयन्त्या अलीकनलसाक्षात्कारमुक्त्वा नलस्याप्यलीकदमयन्तीसाक्षात्कारमाह सर्व्वस्वमिति । अथ नृपतिः अलीकनलोऽपि चेतसो हृदयस्य सर्वस्वं सर्वधनभूतां हृदयादनपेतामित्यर्थः । तां दमयन्तीं दृशे स्वचक्षुषे प्रीतिदायं पारितोषिकदानं दायो दाने यौतकादिधने वित्ते च पैतृके इति वैजयन्ती । प्रदाय निरन्तरध्यानेन तां साक्षात्कृत्येत्यर्थः । अथामरैरपि दुरापां दुष्प्रापामपाङ्गैरुत्तरङ्गां तरङ्गितां तस्याः कर्त्रीं दृष्टिं तद्दृष्टिमेवेष्टातिथिं प्रियबन्धुं प्रापत् लब्धवान् स्वयं च तया कटाक्षेण वीक्षित इत्यर्थः । अथ स नृपो रत्याः पत्या कामेन पीयूषधारावलनविरचितेन अमृतधारानिष्यन्दलिप्तेनाशुगेन तद्दृष्टिमेवेत्यर्थः। आशुलीढः विद्धः सन् आनन्देनाब्ध्यं मोहं पारवश्यमिति

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम् ।
तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥११२

त्रयोदशः सर्गः

—००—

कल्पद्रुमान् परिमला इव भृङ्गमाला-
मात्माश्रयां निखिलनन्दनशाखिवृन्दात् ।
तां राजकादपगमय्य विमानधुर्या
निन्युर्नलाकृतिधरानथ पञ्च वीरान् ॥ १ ॥
साक्षात्कृताखिलजगज्जनताचरित्रा

यावत् । तेन तदपरान् प्रथमदृष्टिपातानन्तरभाविन आकूतेन पातान् साकूतदृष्टिपातान् वन्ध्यानफलानकृत कृतवान् प्रथमदृष्टिपातजनितानन्दतरदृष्टिपातान्न विवेदेत्यर्थः ॥ ११२ ॥

श्रीहर्षमिति । मातृचरणाम्भोजयोरलिमौलेर्भृङ्गायमानमौलेरित्यर्थः ॥ ११२ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां जीवातुसमाख्यायां द्वादशः सर्गः ॥ १२ ॥

—००—

कल्पद्रुमानिति । अथ कीकरविषयानन्तरं विमानधुर्याः शिविकाष्टतः आत्माश्रयां स्वाधारां तां दमयन्तीं परिमलाः सौरभ्यविशेषाः आत्माश्रयां स्वोपजीविनीं भृङ्गमालां निखिलानन्दनशाखिवृन्दादपगमय्य कल्पद्रुमान् पञ्चामरतरूनिव राजकाद्राजसमूहात् मोलोचेत्यादिना उक्तात् । अपगमय्य अपनीय नलाकृतिधरान् नलरूपधारिणः पञ्च वीरान् निन्युः प्रापयामासुः ॥ १ ॥

तत्राधिनाथमधिकृत्य दिवस्तथा सा ।
ऊचे यथा स च शचीपतिरभ्यधायि
प्राकाशि तस्य न च नैषधकायमाया ॥ २ ॥
ब्रूमः किमस्य वरवर्णिनि ! वीरसेनो-
द्भूतिं द्विषद्बलविजित्वरपौरुषस्य ।
सेनाचरीभवदिभाननदानवारि-
वासेन यस्य जनिताऽसुरभी रणश्रीः ॥ ३ ॥
शुभ्रांशुहारगणहारिपयोधराङ्क-
चुम्बीन्द्रचापखचितद्युमणिप्रभाभिः ।

साक्षादिति । अथ पञ्चवीरप्रापणानन्तरं साक्षात्कृतं अखिल जगत्सु जनताया जनसमूहस्य चरितं यया सा सरस्वती तत्र पञ्चसु मध्ये दिवोऽधिनाथमधिकृत्य निर्दिश्य तथा तेन प्रकारेणोवाच यथा शचीपति रिन्द्रो नाभ्यधायि नाभिहितो भवति तस्येन्द्रस्य नैषधकायमाया नलरूपकल्पना च न प्राकाशि न प्रकाशिता ॥ २ ॥

अथ लोकपालचतुष्टयं प्रत्येकं चतुर्भिः श्लोकैः श्लेषभङ्ग्या वर्णयति ब्रूम इत्यादि । हे वरवर्णिनि ! उत्तमाङ्गने ! उत्तमा वरवर्णिनीत्यमरः । द्विषः शत्रोर्बलस्य बलासुरस्य अन्यत्र द्विषतो बलानां बलोऽसुरे बलं सैन्य इति वैजयन्ती । विजित्वरपौरुषस्य जित्वरपराक्रमस्यास्य परस्य इन्द्र नलयोः सामान्यनिर्देशः वीरसेनात्काश्यपादुद्भूति मुत्पत्तिमन्यत्र वीरसेनान्नृपादुद्भूति मुत्पत्तिं किं ब्रूमः कथं वर्णयामः यस्य वीरस्य रणश्रीः सेनाचरीभवतोः सैनिकायमानयोरिभाननदानवयोर्विनायकविष्णोः वासेनाधिष्ठानेन जनिता असुराणां भीर्यया सा अन्यत्र सेनाचरीभवतां सेनासञ्चारिणां इभानां आननेषु दानवारीणां मदाम्बूनां वासेन वासनया सुरभिर्जनितसुगन्धिः कृताः । ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ ३ ॥

शुभ्रेति । एष वीरः शुभ्रांशु श्चन्द्रः हरस्येमे हारा गणा प्रमथाः हरस्यापत्यं पुमान् हारी स्कन्दः पयोधराङ्कचुम्बी मेघोत्सङ्ग

अन्वास्यते समिति चामरवाहिनीभि-
र्यात्रासु चैष बहुलाभरणार्चिताभिः ॥ ४ ॥
भूमीभृतः समिति जिष्णुमपव्यपायम्
जानीहि न त्वमघवन्तममुं कथञ्चित्।
गुप्तं घटप्रतिभटस्तनि ! बाहुनेत्रं
नालोकसेऽतिशयमद्भुतमेतदीयम् ॥ ५ ॥

सङ्गी इन्द्रचापः तैः खचिता स्वतेजोभिः संवृता द्युमणिप्रभाः सूर तेजांसि याभिस्ताभिः बहुरनेको लाभः त्रिलोकविजयादिर्यस्मिन् तेन रत्नेनार्चिताभिः पूजिताभिः अर्चः पूजायां कर्मणि क्तः। अमरवाहिनीभिः सुरसेनाभिः समिति रणे च यात्रासु चान्वास्यते उपास्यते अन्यत्र तु शुभ्रांशुभिरुज्ज्वलमयूखैः हारगणैर्मुक्ताहारजालैः हारिपयोधराङ्कचुम्बिभिर्मनोहरकुचोत्सङ्गसङ्गिभि रिन्द्रचापै श्छायाभूतभूषणदीप्तिभिः खचिता मिश्रिताः द्युमणेः प्रभाः सूर्यप्रभा याभिस्ताभिः बहुलैराभरणैरर्चिताभिः पूजिताभि श्चामरवाहिनीभिः समिति सभायां यात्रासु देवतामहोत्सवेषु चान्वास्यते ॥ ४ ॥

भूमीति। हे घटप्रतिभटस्तनि ! घटप्रतीतकुचे ! समिति संयति भूमीभृतः पर्वतान् जिष्णुं जेतारं न लोकेत्यादिना षष्ठीप्रतिषेधात्कर्मणि द्वितीया। अविद्यमानः पवेर्वज्रस्यापायो यस्य तमपव्यपायं नित्यवज्रहस्तममुं वीरं कथञ्चिदपि अमघवन्तं मघवत इन्द्रादन्यं नतु जानीहि नैव विद्धि इन्द्रश्चेद् वज्रहस्तं क्व गतं तत्राह गुप्तं निगूहितमेतदीयं बाहुनेत्रं बहुनेतृत्वं युवादित्वादण् प्रत्ययः। तदेवाद्भुतमतिशयं नालोकसे न पश्यसि अन्यत्र तु भूमीभृतो राज्ञः जेतारं अपव्यगायं अपगतव्यवायममुं वीरं त्वं अघवन्तं पापवन्तं न जानीहि पुण्यश्लोकत्वादस्येति भावः। गुप्तं रक्षित मचत मित्यर्थः। बहूनां नेता तस्य भावस्तत्त्वं बाहुनेत्रं राजाभिराजत्वं पूर्ववदण् प्रत्ययः सौभ्रात्रादिवदिनिः। दमयन्ति ! नालोकसे किमिति काकुः अन्यत् समानम् ॥ ५ ॥

लेखा नितम्बिनि ! बलादिसमृद्धराज्य-
प्राज्योपभोगपिशुना दधते सरागम् ।
एतस्य पाणिचरणं तदनेन पत्या
सार्द्धं शचीव हरिणा मुदमुद्वहस्व ॥ ६ ॥
आकर्ण्य तुल्यमखिलां सुदती लगन्ती-
माखण्डलेऽपि च नलेऽपि च वाचमेताम् ।
रूपं समानमुभयत्र विगाहमाना
श्रोत्रान्न निर्णयमवापदसौ न नेत्रात् ॥ ७ ॥

लेखा इति । हे नितम्बिनि ! प्रशस्तनितम्बे ! प्रशंसायामिनिः । बलादीनां बलाद्यसुराणां यानि समृद्धानि राज्यानि तेषां प्राज्योपभोगस्य प्रभूतानुभवस्य पिशुनाः प्रकाशकाः लेखाः देवाः एतस्य वीरस्य पाणिचरणं च पाणिचरणौ प्राण्यङ्गत्वादेकवद्भावः । सरागं सानुरागं दधते शिरसा धारयन्ति प्रणमन्तीत्यर्थः । धाञः कर्तरि लटि तिङि बहुवचनं । तत्तस्मादनेन हरिणा देवेन्द्रेण पत्या सार्द्धं शचीव मुदमुद्वहस्व शच्याः सपत्नी भवेत्यर्थः इत्येकोऽर्थः । अन्यस्तु सरागमातामं एतस्य वीरस्य पाणिचरणं कर्तृ बलादीनि राज्याङ्गानि स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानीत्यमरः । तैः समृद्धस्य राज्यस्य यः प्राज्योपभोगस्तस्य पिशुनाः सूचकाः लेखाः दधते दधधारणे इति धातोर्भौवादिकाल्लटि तङ्येकवचनं । तदनेन वीरेण पत्या सार्द्धं हरिणा शचीव मुदमुद्वहस्व ॥ ६ ॥

आकर्ण्येति । सुदती शोभनदन्ता अत्र वयसि दन्तस्येत्यलक्षणाभावाद्ग्राम्यादिसूत्रे चकाराद्दतृदेशः सुदत्यादिशब्दानां योगारूढत्वात् स्त्रियां संज्ञायामिति विकल्पादिति केचित् । एतदेवाभिप्रेत्य सुदत्यादयः प्रतिविधेया इत्याह वामनः । उगितश्चेति ङीप् । असौ भैमी आखण्डलेऽपि च, नलेऽपि च तुल्यमविशेषेण लगन्तीं सम्बध्नतीमेतां वाचमाकर्ण्य उभयत्र इन्द्रनलयोः समानं निर्विशेषं रूपमाकारञ्च विगाहमाना अपि दर्शं दर्शमालोचयन्ती श्रोत्रात् श्रोत्रेन्द्रियात् निर्णयं

शक्रः किमेष निषधाधिपतिः स वेति
दोलायमानमनसं परिभाव्य भैमीम् ।
निर्दिश्य तत्र पवनस्य सखायमस्यां
भूयोऽसृजद्भगवती वचसां स्रजं सा ॥ ८ ॥
एष प्रतापनिधिरुद्गतिमान् सदायम्
किं नाम नार्जितमनेन धनञ्जयेन ।

नावापत् आप्नोतेः लुङि च्लेरङादेशः । स्वानुभावाच्च न निश्चेतुं शशाकेत्यर्थः ॥ ७ ॥

शक्र इति । अथ सा भगवती सरस्वती एष वीरः शक्रः किं ? निषधाधिपतिः स्वप्राणनाथो नलो वेति दोलायमानमनसं देव्याः श्लेषोक्त्या आकारसाम्याच्च सन्दिहानचित्तां भैमीं परिभाव्य समवेक्ष्य तत्र पञ्चवीरमध्ये पवनस्य सखायमग्निं निर्दिश्य हस्तेन प्रदर्श्य अस्यां भैम्यां विषये भूयो वचसां स्रजं वाक्यपरम्परामसृजज्जगादेत्यर्थः ॥ ८ ॥

एष इति । एष वीरः प्रतापस्यौष्ण्यस्य निधिः अयं सदा उद्गतिमान् ऊर्ध्वज्वलनवान् धनानि विचित्रवस्तूनि जयतीति धनञ्जयो धनञ्जयसंज्ञकः वीतिहोत्रो धनञ्जय इत्यमरः । संज्ञायां भृतृवृजीत्यादिना खचि मुमागमः । तेनानेन किं नाम ? किं किल नार्जितं ? न लब्धं सर्वञ्च उपलब्धमेवेत्यर्थः । किं नाम किं नामधेयमिति केचित् । शुचेः शुचिनामकादस्मात् शुचिरप्पित्तमित्यमरः । हेम सुवर्णं प्रभूतमुद्भूतमधिगच्छ विद्धि अग्नेरपत्यं सुवर्णमिति स्मरणादिति भावः । भास्वररूपस्य रूपान्तरप्रकाशकरूपस्य सम्पत् समृद्धिः कस्य च न इतोऽन्यस्य कस्यचिदपि नास्त्येव । अन्यत्र तु एषः प्रतापस्य तेजोविशेषस्य निधिः सः प्रतापः प्रभावश्च यत्तेजः कोशदण्डजमित्यमरः । अयं स वीर उद्गतिमानुदयमान् नित्योदित इत्यर्थः । अनेन कर्त्रा जयेन करणेन किं नाम धनं नार्जितं जयेनैव सर्वं सम्पादितमित्यर्थः । क्षत्रियस्य विजितमिति स्मरणादिति भावः । शुचेः पवित्रादस्मात् प्रभूतं प्राज्यं हेम सुवर्णम-

हेम प्रभूतमधिगच्छ शुचेरमुष्मात्
नास्त्येव कस्य च न भास्वररूपसम्पत् ॥ ९ ॥

अत्यर्थहेतिपटुताकवलीभवत्तत्
तत्पार्थिवाधिकरणप्रभवस्य भूतिः ।
अभ्यङ्गरागजननाय महेश्वरस्य
सञ्जायते रुचिरकर्णि ! तपस्विनोऽपि ॥ १० ॥

एतन्मुखा विबुधसंसदसावशेषा-
माध्यस्थ्यमस्य यमतोऽपि महेन्द्रतोऽपि ।

धिगच्छ प्राप्नुहि एतत्परिग्रहादाढ्या भवेत्यर्थः । भाः कान्ति स्वरः कण्ठध्वनिः रूपं सौन्दर्यं तेषां सम्पत्कस्य च न अन्यत्कस्यापि नास्त्येव ॥ ९ ॥

अत्यर्थेति । हे रुचिरकर्णि । कमनीयकर्णे ! नासिकोदरेत्यादिना विकल्पादिकारः । अत्यर्थाया अतिमात्राया हेतिपटुताया ज्वालापाटवस्य कवलीभवद्ग्रासीभवदिन्धनीभवदिति यावत् । तत्तत्पार्थिवं पार्थिवद्रव्यमेवाधिकरणमाश्रयस्तदेव प्रभवत्यस्मादिति प्रभवः कारणं यस्याः सा अस्य वीरस्य सम्बन्धिनी भूतिर्भस्मापि तपस्विनो महेश्वरस्याभ्यङ्गरागजननायानुलेपसम्पादनाय संजायते भवति । अन्यत्र तु अत्यर्थं हेतिपटुता आयुधसामर्थ्यं हेतिर्ज्वालास्त्रायुधमिति वैजयन्ती । तस्य कवलीभवद्भिस्तैस्तैः पार्थिवैः राजभिः सहाधिको रणः स एव प्रभवो यस्याः सा विजयलक्ष्मी अस्य भूतिः सम्पत् भूतिर्भूषित भस्मनी सम्पदित्यमरः । महेश्वरस्य महाप्रभोरपि तपस्विनः शोच्यस्यापि रागजननाय सन्तोषणाय सर्वोपकारिणीत्यर्थः अङ्गेत्यामन्त्रणे ॥ १० ॥

एतदिति । पितुर्मुखमिव मुखं यस्यास्तस्याः सम्बुद्धिः हे पितृमुखि ! धन्या पितृमुखी कन्या धन्यो मातृमुखः सुत इति वचनात् । असावशेषा विबुधसंसद्देवसभा एष एव मुखमास्यं यस्याः सा अग्निमुखा वै देवा इति श्रुतेः । वह्निर्मुखः क्रतुभुज इत्यभिधानाच्च । अस्य यमतो महेन्द्रतोऽपि यमस्य महेन्द्रस्य च षष्ठ्यर्थे सार्वविभक्तिकस्तसिल् । माध्यस्थ्यं

एनं महस्विनमुपैहि सदारुणोच्चै-
र्येनामुना पितृमुखि! ध्रियते करश्रीः ॥ ११ ॥
नैवाल्पमेधसि पटोरुचिमत्त्वमस्य
मध्येसमिन्निवसतो रिपवस्तृणानि ।
उत्थानवानिह पराभवितुं तरस्वी
शक्यः पुनर्भवति केन विरोधिनायम् ॥ १२ ॥

दक्षिणपूर्वदिक्पतित्वादिति भावः । महस्विनं तेजस्विनं एनममुमेहि प्राप्नुहि सदारुणा दारुसहितेन सेन्धनेनेत्यर्थः । येनामुना वीरेण उच्चैर्महती करश्रीरंशुसम्पत् ध्रियते धार्यते अन्यत्र तु विबुधसंसत् पितृसभा एतन्मुखा एतत्प्रधाना एतदेकशरणेत्यर्थः तदा अस्य यमतो यमान्महेन्द्राच्चेत्यर्थः पञ्चम्यास्तसिल् । माध्यस्थ्यं समवर्तित्वं महस्विनं तेजस्विनमुत्सववन्तं वा महस्तूत्सव तेजसोरिति सान्तेष्वित्यमरः । सदा सर्वदा येनामुना वीरेण आताम्रा करश्रीर्हस्तशोभा बलिहस्तांशवः करा इत्यमरः ध्रियते ॥ ११ ॥

नेति । पटोर्दाहशक्तस्यास्य वीरस्य एधसीन्धने रुचिमत्त्वमभिलाषित्वमल्पमेव किं त्वनल्पमित्यर्थः । समिधां काष्ठानां मध्ये मध्येसमित् पारेमध्ये षष्ठ्या वेत्यव्ययीभावः । निवसतोऽस्य तृणानि रिपवः विद्विषः किमिति काकुः । काष्ठानि दहतोऽस्य तृणानि न गण्यानीत्यर्थः । उत्थानवानूर्ध्वगतिमान् तरस्वी तेजस्वी वेगवानयं पुनरिह सृष्टौ विरोधिना केनाम्बुना कं शिरोऽम्बुनोरित्यमरः । पराभवितुं शक्योभवति किं ? इति काकुः नशक्य इत्यर्थः । दिव्यस्यास्याबन्धनत्वाच्चेति भावः । अन्यत्र पटोः वह्नेः प्रगल्भस्याल्पमेधसि मन्दप्रज्ञे नित्यमसिच् प्रजामेधयोरित्यत्र नित्यग्रहणसामर्थ्यान्मन्दाल्पाभ्याञ्च मेधाया इति वर्तमानवचनाच्च नञादिभ्योऽन्यत्राप्यसिच् प्रत्ययः । रुचिमत्त्वमादरो नैव मध्येसमिद्युद्धमध्ये समित्संयति संसदत्रभिधानात् । रिपवः तृणानि तृणप्रायाइत्यर्थः । उत्थानवानुत्साहवान् तरस्वी शूरः वेगि शूरौ

साधारणीङ्गिरमुषर्बुधनैषधाभ्या-
मेतां निपीय न विशेषमवाप्तवत्याः ।
ऊचे नलोऽयमिति तम्प्रति चित्तमेकम्
ब्रूते स्म चान्यदनलोऽयमितीदमीयम् ॥ १३ ॥
एतादृशीमथ विलोक्य सरस्वती तां
सन्देहचित्रभयचित्रितचित्तवृत्तिम् ।
देवस्य सूनुमरविन्दविकासिरश्मे-
रुद्दिश्य दिक्पतिमुदीरयितुं प्रचक्रे ॥ १४ ॥
दण्डं बिभर्त्ति यमहो जगतस्ततः स्यात्
कस्याकुलस्य सकलस्य न पक्षपातः ।

तरस्विनावित्यमरः । अयं केन विरोधिना पराभवितुं शक्यः न केनापीत्यर्थः ॥ १२ ॥

साधारणीमिति । उषसि बुध्यत इत्युषर्बुधोऽग्निः शोचिष्केश उषर्बुध इत्यमरः । अहरादीनां पत्यादिष्विति रेफादेशः । स च नैषधो नलश्च ताभ्यां साधारणीं समानां साधारणादङ् वक्तव्य इति विकल्पादङि टिड्ढानञ इत्यादिना ङीप् । एतां गिरं निपीयाकर्ण्य विशेषमस्य तदर्थावधारणं नावाप्तवत्या अनाप्तवत्या अस्या भैम्या स्तं पुरोवर्त्तिपुरुषं प्रत्येकं चित्तमेका बुद्धिरयं नल इत्यूचे अन्यदपरं चित्तमयमनलोऽग्निरिति ब्रूतेस्म नलो नलकोटिद्वयावलम्बी संशयो न निवृत्त इत्यर्थः ॥ १३ ॥

एतादृशीमिति । अथ सरस्वती एतादृशी मीदृशीं सन्देहः प्रागुक्तचित्रसाकाङ्क्षिकप्रबन्धोत्थमाश्चर्यं नलत्यागानलस्वीकाराच्च भयं एतैर्भीवैश्चित्रिता शबलिता चित्तवृत्तिर्यस्या स्तां तां भैमीं विलोक्य अरविन्दानि विकासयन्ति ये रश्मयो यस्य तस्य देवस्य सूरस्य सूनुं दिक्पतिं यममुद्दिश्य निर्दिश्य उदीरयितुं व्याहर्त्तुं प्रचक्रे प्रस्तावञ्चक्रे प्रचक्रम इत्यर्थः ॥ १४ ॥

दण्डमिति । अयं दण्डः दुष्टदमनं गदा च आलम्बयष्टिश

स्ववैद्ययोरपि मदव्ययदायिनीभि-
रेतस्य रुग्भिरमरः खलु कश्चिदस्ति ॥ १५॥

प्रतीयते तं विभर्ति ततो दण्डभयात्कम्पाकुलस्य सकलस्य जगतः पङ्के पाप्मे कर्दमे च पातो न स्यात् अहो अन्यस्य दण्डधारणादन्यस्यापतनमित्याश्चर्यं । अन्यत्राप्यस्य यथापराधदण्डनाज्जगतो निष्पापत्वमित्यर्थः । राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथेति स्मरणात् । तथा गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम् । इह प्रच्छन्नपापानां शास्ता वैवस्वतो यम इत्युभयोर्दण्डधारणस्मरणाच्चेति भावः । किं च स्ववैद्ययोरश्विनोरपि मदव्ययदायिनीभिर्वैद्याहङ्कारहारिणीभिस्तयोरप्यसाध्याभिरित्यर्थः; एतस्य रुग्भिरेतत्कृतरोगैः स्त्री रुग्रुजोश्चोपतापरोगव्याधि गदामया इत्यमरः । रुजेर्धातोः क्विप् । न म्रियत इत्यमरो मृतप्रायो न भवतीत्यमरः । पचाद्यच् कश्चिदित्यादि पूर्ववत् ॥ १५ ॥

मित्रेति । संज्ञा संज्ञा देवीति स्मृता प्रसिद्धा मित्रप्रिया अर्कदयिता यस्योपजननमुत्पत्तिं प्रति हेतुर्जननीत्यर्थः । अस्य कस्य जनस्य असून् हरतीत्यसुहृत् प्राणहरो न सर्वस्याप्यसुहृत् सर्वान्तकत्वादिति भावः । छाया छायाख्या मित्रप्रिया अस्य ईदृशी जननीति कुत्रचित् क्वापि शास्त्रे नाध्यगामि नाधिगता सूर्यस्य द्वे भार्ये संज्ञा छाया च तत्र संज्ञैवास्य जननीति श्रूयते न छायेत्यर्थः । किं यमेन यमाख्येनासुनैव ध्रियते न इन्द्रियनिग्रहेण तपस्तप्तं अन्यत्र तु अस्य वीरस्य संज्ञा हस्तादिचेष्टाः संज्ञार्कभार्या चैतन्यहस्ताद्यैः सूचनाभिधेति वैजयन्ती । मित्राणां सुहृदां मित्रं सुहृदि मित्रोऽर्के इति विश्वः । प्रियोपजननमिष्टसम्पादनं प्रति हेतुः स्मृता अयं कस्य जनस्य सुहृत् सखा जनस्येदृक् छाया कान्तिः छाया सूर्यप्रिया कान्तिरित्यमरः । कुत्रचित् क्वापि नाध्यगामि नाधिगता असुना यमेन च यमनियमाभ्यां तपस्तप्तमेव अन्यथा कथमयं महिमेति भावः ॥ १६ ॥

मित्रप्रियोपजननं प्रति हेतुरस्य
सञ्ज्ञा श्रुताऽसुहृदयं न जनस्य कस्य।
छायेङ्गितस्य च न कुत्रचिदप्यगामि
तप्तं यमेन नियमेन तपोऽमुनैव ॥ १६ ॥
किञ्च प्रभावनमिताखिलराजतेजा
देवः पिताऽम्बरमणी रमणीयमूर्त्तिः।
उत्क्रान्तिदा न कमनु प्रतिभाति शक्तिः
कृष्णत्वमस्य च परेषु गदान् नियोक्तुः ॥ १७ ॥
एकः प्रभावमयमेति परेतराजौ

किञ्चेति। किञ्च प्रभाभिरवनमितमभिभूतं अखिलं रा इन्द्रस्य तेजो येन सः रमणीयमूर्तिरम्बरमणिः सूर्यः इनोमे पूर्व दीर्घोऽणः। अस्य पिता, अस्य शक्तिः का कासू नामायुधं कमनु कं जनं प्रति उत्क्रान्तिदा प्राणोत्क्रमणप्रदा नप्रतिभाति प्रतिभात्येव परेभ्यो गदान्रोगान्नियोक्तुः तृजन्तत्वाच्च लोकेत्यादिना षष्ठीप्रतिषेधात् कर्मणि द्वितीया। अस्य कृष्णत्वं यमत्वं। अन्यत्र अम्बरमणिः सूर्यः तदिकारादीकारः। तद्वद्रमणीयमूर्तिरस्य पिता वीरसेनः प्रभावेन प्रतापेन नमितान्यखिलानि राज्ञां तेजांसि येन सः राजा क्षत्रियचन्द्रयोरिति विश्वः। प्रभुमन्त्रोत्साहलक्षणं सामर्थ्यं कोशसामर्थ्ययोः शक्तिरित्यमरः। शे पूर्ववत् परेषु शत्रुषु गदानामायुधविशेषं नियोक्तुरस्य कृष्णत्वं विष्णुत्वं॥१७॥

एक इति। अयमेकः परेतानां प्रेतानां राजौ पंक्तौ परेतप्रेतसंस्थितावित्यमरः। प्रभावं प्रभुत्वमेति दस्रसहोदरस्याश्विनीभ्रातुर्यस्य यमस्य भूतेषु प्राणिषु मध्ये भूर्यनेकभूतं वधाङ्गतो वध्यः तस्य भाव वध्यत्वं समाम्नर्यात खलु ? हे दग्धे अस्मिन् पुंसि सत्यपि जीवितेर्याश्रयं यमनुष्टिं भूतं पिशाचादाविति वैजयन्ती। विशेषि अन्यत्र तु अयमेकः परेषां शत्रूणामितरेषाञ्च आजौ युद्धे प्रभावं सामर्थ्यमेति दस्रसहोदरस्य अश्विसदृशस्य यस्यास्य भूतेषु पृथिव्यादिषु मध्ये अयं भूर्वश्यभावमेति व क्ष्मन्यायु क्ष्मादौ जन्तौ च भूतं क्लीबमिति वैजयन्ती। अत्रास्मिन् जीवि-

तज्जीवितेशधियमत्र विधेहि मुग्धे !।
भूतेषु यस्य खलु भूरि यमस्य वश्य-
भावं समाश्रयति दस्रसहोदरस्य ॥ १८ ॥

गुम्फो गिरां शमननैषधयोः समानः
शङ्कामनेकनलदर्शनजातशङ्के ।
चित्ते विदर्भवसुधाधिपतेः सुतायाः
यन्निर्ममे खलु तदेष पिपेष पिष्टम् ॥ १९ ॥

तत्रापि तत्रभवती भृशसंशयालो-
रालोक्य सा विधिनिषेधनिवृत्तिमस्याः ।
पाथःपतिम्प्रति धृताभिमुखाङ्गुलीक-
पाणिः क्रमोचितमुपाक्रमताभिधातुं ॥ २०

तेशधियं प्राणेश्वरबुद्धिं विधेहि जीवितेशो यमे कान्त इति विश्वः॥१८॥

गुम्फ इति। शमननैषधयोर्यमनलयोः समान एव गिरां गुम्फः सन्दर्भः अनेकेषां नलानां दर्शनेन जातशङ्के विदर्भवसुधाधिपतेः सुतायाः वैदर्भ्याश्चित्ते शङ्कां निर्ममे इति यत् तत्पिष्टं पिपेष प्रागेव साशङ्के पुनः शङ्कोत्पादने पिष्टपेषणप्रायमित्यर्थः। अत्र साशङ्कशङ्कोत्पादे पिष्टपेषणवाक्यार्थयोरेकत्वासम्भवेन सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धो वाक्यार्थवृत्तिनिदर्शनालङ्कारः॥१९ ॥

तत्रेति। सा भवती तत्रभवती पूज्या इतरेभ्योऽपि दृश्यत इति त्रल् प्रत्ययः। सा सरस्वती तत्रापि तस्मिन् पुरुषेऽपि भृशं संशयालोः सांशयिक्याः आलुचि शीङ्ग्रहणे आलुच्। अस्या दमयन्त्या विधिनिषेधयोः प्रवृत्तिनिवृत्त्योर्निवृत्तिमभावमौदासीन्यमालोक्य क्रमोचितं क्रमप्राप्तं पाथःपतिं वरुणं प्रति धृता प्रसारिता अभिमुखा अङ्गुल्यो यस्य स धृताभिमुखाङ्गुलीकः नद्यृतश्चेति कप्। स पाणिर्यस्याः सा सती अभिधातुमुपाक्रमत उपक्रान्तवती क्रमेर्लिङ् प्रोपाभ्यां समर्थाभ्यामिति तङ् ॥ २० ॥

चेति। या चमूः सेनाः सर्वतोमुखतया व्यवतिष्ठमाना जलत्वेन व्यवस्थितरूपा

या सर्व्वतोमुखतया व्यवतिष्ठमाना
यादोरणैर्ज्जयति नैकविदारका या।
एतस्य भूरितरवारिनिधिश्चमूः सा
यस्याः प्रतीतिविषयः परतो न रोधः ॥ २१ ॥
नासीरसीमनि घनध्वनिरस्य भूयान्
कुम्भीरवान् समकरः सहदानवारिः।

नैके अनेके नङर्थस्य नशब्दस्य सुप्सुपेति समासः। नैकविदारकाः कूपका
जलशोषकाः जलार्थं तीरे कृताः कूपप्रतिकृतयोर्गर्ता यस्यां सा यादसां जन
न्तूनां रणैः शब्दैः जयति प्रकाशते यस्याः परतोरोधः परन्तीरं सार्वविभक्ति
कस्तसिल्। प्रतीतिविषयो न अदृश्यमित्यर्थः। एतस्य सा चमूर्भूरितरो महत
वारिनिधिःसमुद्रो भवति। अन्यत्र तु या चमूः सर्वतोमुखतया सार्वपथिकत
व्यवतिष्ठमाना वर्तमाना नैकाननेकान्विदारयन्तीति नैकविदाराः कर्मण्यण्।
ते काया विग्रहा यस्यां सा या चमूर्दोष्णां रणैर्दोरणैर्बाहुयुद्धैर्जयति भुजबाहु
प्रवेष्टो दोरित्यमरः। तस्याः परतः परेभ्यो रोधो न रोधः प्रतीतिविषयो न
सम्भावित इत्यर्थः। सा एतस्य चमूर्भूरीणान्तरवारीणामायुधविशेषाणां
निधिराकरः ॥ २१ ॥

नासीरेति। नासीरसीमनि पुरोभागे घनध्वनिर्महाघोषः मध्ये
निस्तरङ्गत्वादिति भावः। भूयान् कुम्भीरवान् नक्रवान् नक्रस्तु कुम्भीर
इत्यमरः। समकरो मकरसहितः दानवारिणा विष्णुना सह वर्तत
इति सदानवारिः वोपसर्जनस्येति सहशब्दस्य सभावविकल्पः। उत्पद्मकाननानामुत्फुल्लपद्मवनानां सखा तत्सखस्तत्सहित इत्यर्थः। राजाहः
सखिभ्यष्टच्। नदीनामिनः पतिः नदीनः समुद्रः अलमत्यर्थं करणभावमुपकरणत्वं इतैः प्राप्तै रत्नैः श्रेष्ठवस्तुभिः रत्नं श्रेष्ठे मणावपीत्यमरः।
अस्य सुखमातनोति। अन्यत्र तु घनस्य मेघस्येव ध्वनिर्यस्य सः भूयाननेकः समकरः अन्यूनाधिकहस्तः सहदानवारिः समदाम्बुः उत्पद्मकस्य उद्भूतविन्दुजालकस्याननस्य सखा तत्सखः पद्मकालङ्कृतानन इ-

उत्पद्मकाननसखः सुखमातनोति
रत्नैरलङ्करणभावमितैर्न दीनः ॥ २२ ॥

सस्यन्दनैः प्रवहणैः प्रतिकूलपातम्
का वाहिनी न तनुते पुनरस्य नाम ।
तस्या विलासवति ! कर्कशताश्रिता या
ब्रूमः कथं बहुतया सिकता वयन्ताः ॥ २३ ॥

शोणं पदप्रणयिनं गुणमस्य पश्य
किञ्चास्य सेवनपरैव सरस्वती सा ।

त्यर्थः । पद्मकं विन्दुजालकमित्यमरः । अलङ्करणभावमितैरलङ्कारत्वं प्राप्तै रत्नैर्मणिभिः न दीनो न शून्यः अस्य वीरस्य कुम्भी करी कुम्भी-कलशदन्तिनोरिति वैजयन्ती । सुखं यथा तथा नासीरसीमनि सेनामुखभागे रवान् वृंहणान्यातनोति ॥ २२ ॥

सस्यन्दनैरिति । हे विलासवति ! भैमि ! अस्य सम्बन्धिनी का पुनर्वाहिनी नदी सस्यन्दनैः सप्रस्रवणैः प्रवहद्भिरित्यर्थः प्रवहणैः प्रवाहैः प्रतिकूलं कूले कूले पातं न तनुते नाम ? सर्वापि सर्वं कूलं पातयतीत्यर्थः । किं च तस्या वाहिन्याः सम्बन्धिन्यः कर्कशतां कार्कश्यं श्रिता याः सिकता वालुकास्ता बहुतया अपरिमितत्वेन वयं कथं ब्रूमः न शक्नुम इत्यर्थः । अन्यत्र तु अन्या का वाहिनी सेना सस्यन्दनैः सरथैः प्रवहणैः कर्णीरथैः कर्णीरथः प्रवहणमित्यमरः । प्रतिकूलानां प्रत्यर्थिनां पातं न तनुते किं च कर्काणां श्वेतानां शतैराश्रिता याः पृष्ठस्यारिः सितः कर्क इत्यमरः । तस्या वाहिन्याः ताः प्रसिद्धाः असिकताः खड्गिकत्वानि प्रहरणमिति ठक् । बहुतया कथं ब्रूमः ॥ २३ ॥

शोणमिति । अस्य वीरस्य पदप्रणयिनं पादोपसर्पिणं गुणविशेषभूतं शोणं शोणाख्यं नदं पश्य किञ्च सा सरस्वती नदी चास्य सेवनपरैव सकलनदीनदनायकोऽय मित्यर्थः । ततः कारणाद् भुवनाधिनाथ मप्रतिं सुभगं एनं भजस्व समाश्रय तस्मिन् वीरं के न कमलाशया

एनं भजस्व सुभगं भुवनाधिनाथम्
के वा भजन्ति तमिमं कमलाशया न ॥ २४ ॥
शङ्कालताततिमनेकनलावलम्बाम्
वाणी न वर्द्धयतु तावदभेदिकेयम् ।
भीमोद्भवां प्रति नले च जलेश्वरे च
तुल्यं तथापि यदवर्द्धयदत्र चित्रम् ॥ २५ ॥

जलाधाराः न भजन्ति सर्वेऽपि भजन्तीत्यर्थः । अथवा के वा जन्तवः मलाशया जलाकाङ्क्षया न भजन्तीत्यर्थः । अन्यत्र तु पदप्रणयिनं पादत गतशोणं गुणमारूण्यगुणं पश्य भाग्यलक्षणत्वादिति भावः । किन्तु सा सरस्वती वाग्देवता सेवनपरैव लक्ष्मीसरस्वत्योरयमेकाधिकरणमिति भावः । सरस्वती सरिद्भेदे गोवाग्देवतयोर्गिरीति विश्वः । ततो भुवनाधिनाथं भूलोकनाथमेनं सुन्दरं भजस्व समाश्रय भुवनं विष्टपे लोके सलिलेपथि यद्यपीति विश्वः । के वा जनास्तमिमं कमलाशया लक्ष्म्याकाङ्क्षया न भजन्ति कमला श्रीर्जले पद्मं कमलं कमलो मृग इति विश्वः ॥ २४ ॥

शङ्केति । ज्वलेश्वरे वरुणे नले च तुल्यं यथा तथा प्रयुक्तेति शेषः अत एव भीमोद्भवां भैमीं प्रत्यभेदिका अन्यतरार्था परिच्छेदिका सेयं वाणी सरस्वती वाक् अनेके पञ्च नलाः नैषधाः दुरुच्छेद्यस्तृण इति विशेषस्यावलम्बो विषयः आधारस्य यस्यास्तां नलः पोटगले राज्ञीति विश्वः । शङ्का एव लतास्तासान्ततिं परम्परान्तावन्न वर्द्धयतु न छिनत्तु वृधुच्छेदनपूरणयो रिति चौरादिकाल्लोट् । किन्तु तथाप्यवर्धयदितियत् अत्र चित्रं च्छेदनार्थत्वे या न च्छेदिका सैवाच्छिनदिति विरोधाच्चित्रं वृध्यर्थत्वे त्वविरोध इति विरोधाभासोऽलङ्कारः । वृधुवर्धन इति भौवादिकाल्लिच् । नलाख्यतृणगिम्रलताततिम् एवानेकनलावलम्बिनामयमयं वेति सन्देहततिं इयं वाणी नाच्छिनत् प्रत्युतावर्धयदेवे त्यहो कष्ट मित्यर्थः ॥ २५ ॥

बालां विलोक्य विबुधैरपि मायिभिस्तै-
श्छद्मितामियमलीकनलीकृतस्वैः ।
आह स्म तां भगवती निषधाधिराजम्
निर्द्दिश्य राजपरिषत्परिवेषभाजम् ॥ २६ ॥
अत्याजिलब्धविजयप्रसवस्त्वया किं
विज्ञायते रुचिपदं न महीमहेन्द्रः ।
प्रत्यर्थिदानवशताहितचेष्टयासौ
जीमूतवाहनधियं न करोति कस्य ॥ २७ ॥

बालामिति । अथेयं भगवती देवी मायिभि र्मायाविभिः ब्रीह्यादित्वादिनिः । अत एवालीकनलीकृतानि मायानलीकृतानि स्वान्यात्मानोयैस्तैर्दैवै र्विबुधैश्छद्मितामप्रतारितां छद्मशब्दात्तत्करोतीति ण्यन्तात्कर्मणि क्तः । बालां भैमीं विलोक्य राजपरिषदि राजसभायां परिवेषभाजं अवशिष्टतां गतं निषधाधिराजं नलं निर्दिश्य हस्तेन प्रदर्श्य तां भैमीमाह स्म उवाच ॥ २६ ॥

अथ नलमेकैकश्लोकेन क्रमादिन्द्राद्येकैकश्लेषेणाह अत्याजीति । अत्याजिषु महायुद्धेषु लब्धो विजयप्रसवो जयसम्पत्तिर्येन सः रुचिपदं त्वदनुरागास्पदं महीमहेन्द्रो भूदेवेन्द्रोऽसौ त्वया किं न विज्ञायते किञ्च अर्थिषु प्रत्यर्थि विभक्त्यर्थेऽव्ययीभावः । दानस्य वशतया तन्निष्ठतया आहितया कृतया चेष्टया वितरणव्यापारेण कस्य जीमूतवाहनो नाम महात्यागी कश्चिद्विद्याधरराजः तद्धियं न करोति न जनयति तस्मान्नलोऽयमिति भावः । अन्यत्र तु अत्याजिषु लब्धो विजयः पार्थ एव प्रसवोऽपत्यं येन सः विजयस्तु जये पार्थ इति विश्वः । अरुचिपदं त्वपरागास्पदं महत्सरः तद्वान्महो महेन्द्रो देवेन्द्रस्त्वया अत्याजि त्यक्तः किं न विज्ञायते । किं च प्रत्यर्थिनां प्रतिपक्षाणां दानवानां शतेष्वाहितया चेष्टया पौरुषेण कस्य जीमूतवाहनो जीमूतवाहन इन्द्रः तुराषाण्मेघवाहन इत्यमरः । तद्धियं न करोति ॥ २७ ॥

येनामुना बहुविगाढसुरेश्वराध्वराज्याभिषेकविकसन्महसा वभूवे
आवर्जनं तमनु तेन नु साधु नामग्राहं मया नलमुदीरितमेवमत्र

यच्चण्डिमा रणविधिव्यसनञ्च तत्त्वं
बुद्ध्वाशयाश्रितममुष्य च दक्षिणत्वम् ।
सैषा नले सहजरागभरादमुष्मिन्
नात्मानमर्पयितुमर्हसि धर्म्मराजे ॥ २९ ॥

येनेति । येनामुना बहु यथा तथा विगाढ़ः क्षुण्णः सुरेश्वरस्य इन्द्रस्याध्वा पालनमार्गो यत्र तस्मिन्राज्ये अभिषेकाद्विकसन्ति महांसि उत्सन्नास्तेजांसि यस्य तेन वभूवे भूतं । अत्र सभायां मया नामग्राहं नाम गृहीत्वा नाम्ना दृशिग्रहेरिति णमुल् प्रत्ययः । उदीरित मुक्तं नलं नलनामानं तमेत मनु ते तदावर्जनमाकर्षणं साधु ननु ? युक्तं खलु ? येनामुना बहुविगाढ़ा प्रविष्टाः सुरेश्वराः देवताविशेषाः येषु तेष्वध्वरेषु यज्ञेषु आज्यानामभिषेकादन्तःसेकात् करणाद्विकसन्महसा वर्द्धमानतेजसा वभूवे अनलमग्निं अन्यत् समानम् ॥ २८ ॥

यदिति । अमुष्य चण्डस्य भाव चण्डिमा रणेऽतिकोपनत्वं चण्डस्त्वत्यन्तकोपन इत्यमरः । पृथ्वादित्वादिमनिच् प्रत्ययः । रणविधौ युद्धकर्मणि व्यसनमासक्तिश्च व्यसनन्त्वशुभे सक्ताविति विश्वः । आशयाश्रितं चित्ताश्रितं दक्षिणत्वं दाक्षिण्यञ्चेति यत् तत्सर्वं चण्डिमादिकं नपुंसकमनपुंसकेनेत्यादिना यत्तदिति नपुंसकैकनिर्देशः । बुद्ध्वा विचार्य सैषा त्वं धर्म्मप्रधानो राजा तस्मिन् धर्मराजे नले नलनामनि अमुष्मिन् वीरे सहजरागभरादकृत्रिमरागातिरेकादात्मानमर्पयितुमर्हसि अन्यत्र तु हे चण्डि ! कोपने ! गौरादित्वात् ङीष् । अमुष्य मारणविधिव्यसनं मारणकर्म्मासक्तिं आशया दिशा निमित्तेन श्रितं प्राप्तं दक्षिणत्वं दक्षिणदिक्पतित्वं च बुद्ध्वा धर्मराजे यमधर्मराजे अनले नलादन्यस्मिन् अमुष्मिन्नित्यादिपूर्ववत् ॥ २९ ॥

किन्ते तथा मतिरमुष्य यथाशयः स्यात्
त्वत्पाणिपीडनविनिर्म्मितयेऽनपाशः ।
कान्मानवानवति नो भुवनं चरिष्णु
र्नासावमुत्र न रता भवतीति युक्तम् ॥ ३० ॥
श्लोकादिह प्रथमतो हरिणा द्वितीया-
द्धूमध्वजेन शमनेन समं तृतीयात् ।
तुर्यान्नलस्य वरुणेन समानभावं
सा जानती पुनरवादि तया विमुग्धा ॥ ३१ ॥

किमिति । हे वत्से ! अमुष्य वीरस्यासावाशयोऽभिप्रायो यथा त्वत्पाणिपीड़नविनिर्म्मितये त्वत्पाणिग्रहणकरणाय अपगताशो न भवतीत्यनपाशः साभिलाषः स्यात् ते तव मतिरपि तथा किं ? तद्युक्तमित्यर्थः । भुवनं लोकं चरिष्णुः । अत्यन्तसंयोगे द्वितीया । कान् मानवान् मनुष्यान्नो अवति न रक्षति । असौ इयं अमुत्र अमुष्मिन् नरता नाभिरतिर्युक्ता । ईदृशे पुरुषे सर्व्वदा त्वया अभिरन्तव्यमित्यर्थः । अन्यत्र अमुष्य सम्बन्धी शयः पाणिस्त्वत्पाणिग्रहणाय यथा न पाशः पाशरहितः त्वत्पाणिग्रहणार्थं यथा न पाश इत्यर्थः तथा ते मतिश्चेद्युक्तमित्यर्थः । अमुष्मिन् न रता नाभिरतिः न युक्ता । ईदृशे पुरुषे सर्व्वदा त्वया नाभिरन्तव्यमित्यर्थः । अन्यत्र तु मानवानुत्साहवान् मानश्चित्तसमुन्नतिरित्यमरः । भुवनमुदकं चरिष्णुः कान् नो अवति अमुष्य नरता नरत्वं न भवति नास्ति युक्तं तस्य देवत्वादिति भावः ॥ ३० ॥

श्लोकादिति । इह श्लोकचतुष्टये प्रथमतः प्रथमात् श्लोकाद्धरिणा इन्द्रेण द्वितीयाद्धूमध्वजेनाग्निना तृतीयाच्छमनेन यमेन समं तुर्याच्चतुरश्च यतो वाद्यच्चरलोपश्चेति साधुः । वरुणेन नलस्य समानभावं साम्यं जानती गृह्णती अतएव विमुग्धा विमूढ़ा सा भैमी तया देव्या पुनरवादि उदिता वदेः कर्म्मणि लुङ् ॥ ३१ ॥

त्वं यार्थिनी किल नलेन शुभाय तस्याः
क्व स्यान्निजार्पणममुत्र चतुष्टये ते ।
इन्द्रानलार्यमतनूजपयःपतीनां
प्राप्यैकरूपमिह संसदि दीप्यमाने ॥ २२ ॥
देवः पतिर्विदुषि ! नैषधराजगत्या
निर्णीयते न किमु न व्रियते भवत्या ।
नायं नलः खलु तवातिमहानलाभो
यद्येनमुज्झसि वरः कतरः पुनस्ते ॥ २३ ॥

अथ पुनर्देवी देवेषु दाक्षिण्यात् दमयन्तीं श्लेषभङ्ग्यन्तरेण क्लिश्नाति श्लोकद्वयेन त्वमित्यादि । या त्वं शुभाय श्रेयसे नलेन निमित्तेनार्थिनी अर्थयती किल अर्थाच्चासन्निहितादि इन्निति इनिप्रत्ययः । तस्यास्तत् प्रार्थिन्यास्ते तव अमुत्रास्मिन् नलसारूप्येण इह स्वयम्वर सभायां दीप्यमाने इन्द्रादिचतुष्टये चतुष्टयमध्ये कस्मिन्निजार्पणं शुभाय सन्तोषाय स्यात् तत् ब्रूहीति प्रश्नः एवमर्थद्वयेन क्रमान्नलप्राप्तेः नैराश्यं तन्नैसद्रूपेण तामतापयदित्यर्थः ॥ २२ ॥

देव इति । हे विदुषि ! विदग्धे ! एष धराजगत्याः भूलोकस्य पतिर्न किन्तु देवः जातावेकवचनं । एते न भूपाः किन्तु देवा इत्यर्थः । भवत्या न निर्णीयते किमु ? न व्रियते किमु? मर्त्यवरणाद्वरममर्त्यवरणमेवेति भावः । अयं तव सम्बन्धी नलो न खलु ? किं त्वतिमहा अतितेजा नलाभो नलकल्पः किन्तु नैते नलाः किन्तु नलप्रतिरूपका इत्यर्थः । यद्येनमुज्झसि एषामन्यतमं नलं वृणोषि चेदित्यर्थः पुनः पश्चात् व्रियत इति वरो वरणीयः वृञोऽप् । वरः कतरः न कश्चिदस्ति सत्यनलस्य दुर्लभत्वादिति भावः । अन्यच्च एष विबुधो भवत्या एष देवो राजा देवः सुरे नरे राज्ञीति विश्वः । नैषधराजगत्या नलमहाराजरूपेण नैषधमहाराजरूपेण पतिर्भर्ता सन्न निर्णीयते किमु ? न व्रियते किमु ? अयं ना पुरुषो नलः खलु ? एनं नलमुज्झसि यदि तव अति महान् अलाभोऽनर्थः वर इत्यादिगतम् ॥ २३ ॥

इन्द्राग्निदक्षिणदिगीश्वरपाशिभिस्तां
वाचं नले तरलिताऽथ समां प्रमाय ।
सा सिन्धुवेणिरिव वाडववीतिहोत्रं
लावण्यभूः कमपि भीमसुताऽऽप तापम् ॥ ३४ ॥
प्राप्तुं प्रयच्छति न पक्षचतुष्टये तां
तल्लाभशंसिनि न पञ्चमकोटिमात्रे ।
श्रद्धां दधे निषधराड्विमतौ मताना-
मद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥ ३५ ॥

इन्द्रेति । अथ लावण्यभूः सौन्दर्यभूमिः अन्यत्र लवणरसाश्रयः सा भीमसुता इन्द्रादिभिः समां साधारणीं तां पूर्वोक्तां नले विषये वाचं प्रमाय अनुभूय तरलिता कम्पिता सती सिन्धुवेणिः समुद्रलहरी वाडववीतिहोत्रं वाडवाग्निमिव कमप्यवाच्यं तापमाप अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जय इत्यमरः ॥ ३४ ॥

प्राप्तुमिति । पक्षचतुष्टये इन्द्रादिमायानलव्यक्तिचतुष्टये तां दमयन्तीं प्राप्तिकर्त्रीं प्राप्तिं सत्यनलं प्राप्तुं न प्रयच्छति न ददाति सत्यनलसारूप्यात्तत्प्राप्तिप्रतिबन्धके सतीत्यर्थः प्रायेणैवं भाषानुसारेणोदीच्याः प्रयुञ्जते यथा भर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्य इति भारती । तल्लाभशंसिनि दमयन्तीप्राप्त्याशंसिनि अन्यत्र विद्यालाभाकाङ्क्षिणि सत्यन्तरेऽप्यत्यन्तपारमार्थिकेऽपि पञ्चमकोटिमात्रे पञ्चमनलैकव्यक्तौ द्वितैव द्वैतं भेदः तद्रहितमद्वैतमद्वितीयं तत्त्वं ब्रह्मतत्त्वं तत्स्वरूपं तस्मिन्निव मतानां पक्षनलीगोचरज्ञानानां निषधराट् नल इति विमतौ अयमेव नलोऽयमेवेति विप्रतिपत्तौ सत्यां लोको जिज्ञासुजनः श्रद्धां दधे सद्विलक्षणत्वेनासद्विलक्षणत्वेन सदसत्समुच्चयविलक्षणत्वेन चतुष्टयाध्यात्मिकशरीरेन्द्रियाद्यसत्प्रपञ्चसम्बलनान्नित्यापरोक्षसत्यब्रह्मतत्त्व इवासत्यनलचतुष्टये सन्निधानात् सत्यनले पञ्चमे प्रतीयमानेऽपि सत्योऽयमिति जनो न विश्वासीत्यर्थः उपमा ॥ ३५ ॥

कारिष्यते परिभवः कलिना नलस्य
तां द्वापरस्तु सुतनूमदुनोत् पुरस्तात्।
भैमीनलोपयमनं पिशुनौ सहेते
न द्वापरः किल कलिश्च युगे जगत्यां॥ ३६॥
उत्कण्ठयन् पृथगिमां युगपन्नलेषु
प्रत्येकमेषु परिमोहयमाणबाणः
जानीमहे निजशिलीमुखशीलिसङ्ख्या

अथ भैम्याः सन्देहदुःखं महदभूदित्याह कारिष्यत इति। कलिना नलस्य कलियुगे परिभवः कारिष्यते करिष्यते करोतेः कर्मणि लृट् स्यसिच् युटित्यादिना विकल्पाच्चिण्वदिटि वृद्धिः। द्वापरः संशयो द्वापरयुगञ्च द्वापरौ युगसंशयावित्यमरः। स तु तां नलप्रियां सुतनूं दमयन्तीं पुरस्तादग्रे एवादुनोत् पर्यतापयत् तथा हि जगत्यां लोके पिशुनौ दुर्जनौति त्रयो जगती लोकः पिशुनो दुर्जनः खल इति चामरः। स प्रसिद्धो द्वापरः कलियुगे कालविशेषे भैमीनलयोरुपयमनमुद्वाहं न सहेते किल? किलेति खल्वर्थे अत्र पूर्वार्धे द्वापर इति वाच्यप्रतीयमानयोरभेदाध्यवसायेन द्वापरस्य स्थानान्तरकलिव्यापारात् प्राक् स्वयं दमयन्तीसन्तापकत्वोत्प्रेक्षाव्यञ्जकाप्रयोगाद्गम्या उत्तरार्द्धे तु तदुपयमनासहिष्णुत्वलक्षणकारणेन तत्समर्थनात्कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यास इत्यनयोरङ्गाङ्गिभावेन सङ्करः॥

उत्कण्ठयन्निति। स पञ्चबाणः पञ्चबाणत्वेन सः प्रसिद्धः कामो नलेषु पञ्चस्वपि इति शेषः पृथगेतैरिमां दमयन्तीं युगपदुत्कण्ठयन् उत्सुकयन् तथा एषु नलेषु पञ्चसु प्रत्येकमेकैकस्मिन् परिमोहयमाणाः प्रत्येकमेतान् संमोहयन्त इत्यर्थः कर्मण्यधिकरणविवक्षया सप्तमी। तस्मिन् प्रजह्रुरितिवत् अणावकर्मकाच्चित्तवत् कर्तृकत्वेऽपि न पादमित्यादिना परस्मैपदनिषेधादात्मनेपदं कृत्ये चणोर्विभाषेति णत्वम्। यस्य स सन् निजशिलीमुखान् शीलयतीति तच्छीलिन्याः तत्समवायिन्याः संख्यायाः साफल्यमाप यदि तदा जानीमहे साध्वीति मन्यामहे इत्यर्थः अलोल-

साफल्यमाप स तदा यदि पञ्चबाणः ॥ ३७ ॥
देवानियं निषधराजरुचस्त्यजन्ती
रूपादरज्यत नले न विदर्भसुभ्रूः ।
जन्मान्तराधिगतकर्म्मविपाकजन्मै-
वोन्मीलति क्व च न कस्य च नानुरागः ॥ ३८ ॥
क्व प्राप्यते स पतगः परिपृच्छ्यते यः
प्रत्येमि तस्य हि पुरेव नलं गिरेति ।
सस्मार सस्मरमतिः प्रति नैषधीयं
तत्रामरालयमरालमरालकेशी ॥ ३९ ॥

दृढासंमोहनपदार्थयो विशेषणगत्या साफल्यप्राप्तिहेतुकं काव्यलिङ्गं तच्च साफल्यं यदिशब्दात् सम्भावनामात्रेणोक्तमित्युत्प्रेक्षा काव्यलिङ्गोत्प्रेक्षेति सङ्करः ॥ ३७ ॥

देवानिति । इयं विदर्भसुभ्रूः वैदर्भी निषधराजस्य नलस्येव रुक् सौन्दर्यं येषां तान् देवान् त्यजन्ती नले रूपात् सौन्दर्यान्नारज्यत न रक्तारञ्जेर्दैवादिकात् कर्त्तरि लुङि तङ् । किन्तु जन्मान्तरे अधिगतस्य कर्म्मणो विपाकात्परिणामाज्जन्म यस्य स एव अरज्यौं बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः । अनुरागः कस्यचिन्न कस्यचिज्जनस्य क्व च न कुत्रचिज्जने उन्मीलत्युद्भवति रूपसाम्येऽपि देवपरिहारेण नलएवानुरागो अस्याः कर्म्मायत्तो न रूपायत्तः अन्यथा किमर्थं यथार्थनलान्वेषणमित्युत्प्रेक्षा एतेनास्या दृढव्रतत्व मुक्तमिति ज्ञेयम् ॥ ३८ ॥

अथास्याश्चिन्तासञ्चारिणीमाह क्वेति । सस्मरमतिः समदनचित्ता अरालकेशी कुटिलकेशी भैमी स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति विकल्पादिकारः । स महोपकारी पतगो हंसः क्व प्राप्यते ? किमर्थं यो हंसः परिपृच्छ्यते नलमिति शेषः । प्रश्नफलमाह पुरेव पूर्वमिव तस्य गिरा नलं प्रत्येमि विश्वसिमि च इति प्रियस्य दूतभूतं अमरालयमरालं स्वर्लोकहंसं सस्मार दुर्लभार्थप्रार्थकाः खलु कार्यकातरा इति भावः ॥ ३९ ॥

एकैकमैक्षत मुहुर्महतादरेण
भेदं विवेद न च पञ्चसु कञ्चिदेषा ।
शङ्काशतं वितरता हरता पुनस्त-
दुन्मादिनेव मनसेयमिदं तदाह ॥ ४० ॥
अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र
भ्रान्तौ दृगन्तचिपिटीकरणादिरादिः ।
स्वच्छोपसर्पणमपि प्रतिमाभिमाने
भेदभ्रमे पुनरमीषु न मे निमित्तम् ॥ ४१ ॥
किं वा तनोति मयि नैषध एव काय-
व्यूहं विधाय परिहासमसौ विलासी ।

एकैकमिति । एषा भैमी महता आदरेणैकाग्र्येण मुहुः एकैकमैक्षत पञ्चसु मध्ये कञ्चिद्भेदं विशेषञ्च न विवेद किन्तु शङ्काशतं वितरता जनयता तच्छङ्काशतं हरता निवर्तयता अतएव उन्मादिना उन्मादवतै मनसा इदमिदं वक्ष्यमाणविकल्पजातं पुनराह आहस्म पुरा लिङ् च इतिभूते लट् ॥ ४० ॥

अथ आसर्गसमाप्तेश्चिन्तानुभावविकल्पानाह अस्तीत्यादि । द्विचन्द्रमिति द्वौ चन्द्राविति भ्रान्तिरस्ति तत्र द्विचन्द्रग्राहिण्यां भ्रान्त्यां जनस्य भ्राम्यज्जनस्य दृगन्तचिपिटीकरणं कटाक्षाकुलीकरणं तदादि सत्प्रमुखमादिर्मूलमस्ति प्रतिमाभिमाने प्रतिबिम्बभ्रमे स्वच्छोपसर्पणं स्फटिकादिसन्निधानं मूलं अमीषु पञ्चसु विषये भेदभ्रमे तु मे निमित्तं नास्ति तदेतन्महच्चित्रमिति भावः ॥ ४१ ॥

किमिति । विलासी विलसनशीलः वौकषलसकत्थस्रम्भ इतिघिनुण् प्रत्ययः । असौ नैषधो नल एव कायव्यूहं देहसमूहं विधाय सम्पाद्य मयि परिहासं न तनोति नो करोति किं विज्ञानं कलापरिज्ञानं विज्ञानं शिल्पशास्त्रयोरित्यमरः । तद्वैभवस्ततस्तत्समुज्जृम्भितः तस्य नलस्य तरगाशयवेदिता अस्मद्हृदयवेदित्वमिव सा विद्या बहुरूपकल्पना विद्या र विद्यते किन्तु ? ॥ ४२ ॥

विज्ञानवैभवभृतः किमु तस्य विद्या-
सा विद्यते न तुरगाशयवेदितेव ॥ ४२ ॥

एको नलः किमयमन्यतमः किमैलः
कामोऽपरः किमु किमु द्वयमाश्विनेयौ ।
किं रूपधेयभरसीमतया समेषु
तेष्वेव नेह नलमोहमहं वहे वा ॥ ४३ ॥

पूर्व्वं मया विरहनिःसहयापि दृष्टः
सोऽयं प्रियस्तत इतो निषधाधिराजः ।
भूयः किमागतवती मम सा दशेयं
पश्यामि यद्विलसितेन नलाऽनलीकान् ॥ ४४ ॥

मुग्धा दधामि कथमित्थमथापशङ्कां
सङ्क्रन्दनादिकपटः स्फुटमीदृशोऽयं ।

एक इति । इह पञ्चके अयमेको नलः किम् ? अन्यतमोऽपर ऐलः पुरूरवाः किम् ? अपरः कामः किम् ? इयं परौ द्वावश्विनेयौ दस्रौ किम् ? किन्तु रूपमेव रूपधेयं सौन्दर्य्यं नाम रूपभागेभ्यो धेयो वक्तव्य इति स्वार्थे धेयप्रत्ययः। तद्भरस्य तत्सम्भारः सीमतया अवधित्वेन समेषु लोकोत्तर सौन्दर्य्यसाम्येनागृहीतविशेषेष्वित्यर्थः । तेष्वेव सम्प्रत्युक्तेषु नलादिष्वेवाहं नलमोहं न वहे वा किम् ? ॥ ४३ ॥

पूर्व्वमिति । पूर्व्वमपि न सहत इति निःसहा पचाद्यच् । विरहस्य निःसहा असहना तया विरहोन्मत्तया मया सोऽयं प्रियो निषधाधिराजो नलः तत इतो दृष्टः सेयं दशा मम भूयः पुनरागतवती किं ? यस्या उन्मत्तदशाया विलसितेनालीकान्नलान् पश्यामि ॥ ४४ ॥

मुग्धेति । अथवा कथमित्थं मुग्धा मूढ़ा सती अपशङ्काः दधामि असम्भावितोऽयमिदानीमीदृङ् मोह इत्यर्थः। किन्तु संक्रन्दनादीनां कपट एवायमीदृशः स्फुटः । तथा हि अनया देव्या तथा तेन प्रकारेणैषामिन्द्रादीनां गीयन्त इति गाथाः श्लोकाः उषिकुषिगादिभ्यः स्थन्नित्यौणादिक-

देव्याऽनयैव रचिता हि तथा तथैषां
गाथा यथा दिगिधिपानपि ताः स्पृशन्ति ॥ ४५ ॥
एतन्मदीयमतिवञ्चकपञ्चकस्थे
नाथे कथं नु मनुजस्य चकास्तु चिह्नं ।
लक्ष्माणि तानि किममी न वहन्ति हन्त
वर्हिर्मुखा धुतरजस्तनुतामुखानि ॥ ४६ ॥
याचे नलं किममरानथवा तदर्थं
नित्यार्च्चनादपि ममाफलिनैरलन्तैः ।
कन्दर्पशोषणपृषत्कनिपातपीत-
कारुण्यनीरनिधिगह्वरघोरचित्तैः ॥ ४७ ॥

स्यन् प्रत्ययः । रचिताद्धि यथा तथा दिगधिपानपि ता गाथाः स्पृशन्ति अतो देवस्यैवं न तु मामको मोह इत्यर्थः ॥४५॥

एतदिति । एतेषां मदीयमतिवञ्चकानां मद्बुद्धिप्रतारकाणामिन्द्रादीनां पञ्चके तिष्ठतीति तत्स्थे नाथे नले कथं नु मनुजस्य चिह्नं मनुजत्वव्यञ्जकधर्मश्चकास्तु स्फुरतु किन्तु वर्हिर्मुखा अग्निमुखा देवा धुतरजस्तनुता मुखानि धुतं रजो यस्याः सा तनुर्येषां ते तनूनां भावः तनुतामुखं येषां तानि निर्म्मलशरीराणि मुखानि निर्मलशरीरत्वप्रमुखानि तानि प्रसिद्धानि लक्ष्माणि चिह्नानि नवहन्ति किम् ? वहन्त्येव तथाप्यत्र सन्ति नात्रेति विशेषोऽप्यत्यन्तसादृश्यात् तेजोविशेषाच्च दुर्लक्ष इति भावः हन्तेति खेदे ॥ ४६ ॥

याच इति । अमरानिन्द्रादीन्नलं याचे किं ? दुहादित्वाद्द्विकर्मकत्वम् । अथवा तदर्थं नलप्राप्त्यर्थमेव नित्यं यदर्चनं तस्मादपि न दत्तफलैः किञ्च कन्दर्पस्य शोषणाख्यस्य पृषत्कस्य वाणस्य निपातेन पीतः कारुण्यनीरनिधिः कृपाब्धिः यस्मात्तेन गह्वरेण घोरं भीमं चित्तं येषां तैः स्वप्रतिषेध दृढचित्तैरित्यर्थः । तैरमरैरलम् ॥ ४७ ॥

ईशा ! दिशां नलभुवं प्रतिपद्य लेखा !
वर्णश्रियं गुणवतामपि वः कथं वा ।
मूर्खान्धकूपपतनादिव पुस्तकाना-
मस्तं गतं तव परोपकृतिव्रतित्वं ॥ ४८ ॥
यस्येश्वरेण यदलेखि ललाटपट्टे
तत् स्यादयोग्यमपि योग्यमपास्य तस्य ।
का वासनाऽस्तु विभृयामिह यां हृदाऽहं
नार्कातपैर्जलजमेति हिमैस्तु दाहम् ॥ ४९ ॥

ईशा इति । हे दिशामीशाः ! लेखाः ! सुराः ! गुणवतां गुणाढ्यानां सूत्रवतां वो युष्माकं नलान्नैषधाद्भवति इति नलभूस्तां नलभुवं नलनिष्ठां वर्णश्रियं गौररूपश्रियम् अन्यत्र नलाख्यतृणकाष्ठभुवमक्षरसम्पदं प्रतिपद्य वर्णौ द्विजादौ शुक्लादौ स्तुतौ वर्णन्तु चाक्षरमित्यमरः । मूर्खा मूढास्त एवान्धयन्तीत्यन्धाः कूपाः अन्धकूपाः पुराणकूपास्तेषु पतनात् पुस्तकानामिव परोपकृतिव्रतित्वं परोपकारनियतत्वं कथं वा अस्तं नाशङ्गतं वर्ततेति देवतोपालम्भः ॥ ४८ ॥

यस्येति । यस्य जनस्य ललाटपट्टे भालफलके ईश्वरेण ब्रह्मणा यत्तु शुभमशुभं वा कर्मानुरूपमलेखि लिखितं तस्य जनस्यायोग्य मनर्हमपि तत् शुभाशुभं कर्तृ योग्यमनुरूपं फलमपास्य आहत्य स्यादेव एवं स्थिते इह नलप्राप्तिविषये वासना ईश्वरेच्छानुगृहीतकर्मवासना कास्तु सम्भावनायां लोट् । का वा सम्भाविता तन्न वेद्मीत्यर्थः । वेदनाफलमाह यां वासना महं हृदा हृदयेन विभृयाम् अन्यतरनिश्चये सन्देहदुःखं न स्यादित्यर्थः । तत्स्यादयोग्यमपीत्यत्र दृष्टान्तमाह जलजं पद्मं अर्कातपै तपनप्रकाशै दाहं नैति हिमैस्त्वेति तेनेश्वरेच्छानुगृहीतकर्मवासनानुसारिणी नलप्राप्तिः सा तु दुर्ज्ञानेति का गतिरिति भावः ॥४९॥

इत्थं यथेह मदभाग्यमनेन मन्ये
कल्पद्रुमोऽपि स मया खलु याच्यमानः।
सङ्कोचसंज्वरदलाङ्गुलिपल्लवाग्र-
पाणीभवन् भवति मां प्रति बद्धमुष्टिः ॥ ५० ॥
देव्याः करे वरणमाल्यमथार्पये वा
यो वैरसेनिरिह तत्र निवेशयेति।
सैषा मया मखभुजां द्विषती कृता स्यात्।
स्वस्मै तृणाय तु निहन्मि न बन्धुरत्नम् ॥ ५१ ॥
यः स्यादमीषु परमार्थनलः स माला-
मङ्गीकरोतु वरणाय ममेति चैतां।

इत्थमिति। इह समये मम अभाग्यं मन्दभाग्यं यथा यतः इत्थम्भूत् अनेन दम्भावेन सोऽर्थी विधेयः कल्पद्रुमोऽपि मया याच्यमानः सन् सङ्कोचो मुकुलीभावः स एव संज्वरो ज्वरप्रायो विकारो येषां तानि दलान्येवाङ्गुलयो यस्य स पल्लवाग्रमेव पाणि र्यस्य तादृक् पाणीभवन् व इ नवन् अभूततद्भावे च्विदीर्घः। सम्प्रति बद्धमुष्टिः कृतमुष्टिबन्धश्च लुब्धश्च भवति खलु भवत्येवेति मन्ये? दानैकबद्धः स कल्पद्रुमोऽपि मयि प्रतिषेधरूक्ष एव स्यात्तथाविधो मे भाग्यविपर्य्यय इत्यर्थः ॥ ५० ॥

देव्या इति। अथवा इह पञ्चानां मध्ये यो वैरसेनि र्नलस्तत्र तस्मिन् वरणमाल्यं वेशमाल्यं निवेश्य निक्षिप्येत्युक्त्वा देव्याः करे अर्पये वा तच्च न, कुतः सैषा देवी मया मखभुजां देवानां द्विषती द्वेषिणी द्विषोऽमित्र इति शतृप्रत्ययः उगितश्चेति ङीप् द्विषः शतुर्वा वचनमिति निषेधात् विकल्पात् षष्ठी। कृता स्यात्तया च स्वयमपराधिनी स्यामिति भावः। न चैतद्युक्तमित्याह तृणाय तृणकल्पाय स्वस्मै स्वार्थमित्यर्थः। बन्धूरत्नमिव बन्धुरत्नं परमबन्धुं तु न निहन्मि बन्धुविरोधकारिणा किं कार्य्यलाभेनेति भावः ॥ ५१ ॥

तं प्रापयामि यदि तत्र विसृज्य लज्जां
कुर्व्वे कथं जगति स्खलति ह्री विडम्ब: ॥ ५२ ॥
इतरनलतुलाभागेष शेष: सुधाभि:
स्नपयति मम चेतो नैषध: कस्य हेतो: ।
प्रथमचरमयोर्वा शब्दयोर्वर्णसख्ये
विलसति चरमेऽनुप्रासभासां विलास: ॥ ५३ ॥
इति मनसि विकल्पानुद्यत: सन्त्यजन्ती
क्वचिदपि दमयन्ती निर्णयं नाससाद ।

यदिति। अमीषु पञ्चसु मध्ये य: परमार्थनल: स्यात् स परमार्थनलो वरणाय मालां वरणस्रजमङ्गीकरोतु स्वीकरोत्विति उक्त्वा वा एतां मालां तं सत्यनलं प्रापयामि यदि तत्र सभामध्ये लज्जां विसृज्य जगति लोके स्खलति सति कथं कुर्व्वे ह्री कष्टं विड़म्ब: परिहास: ॥५२॥

इतरेति। इतरेषां नलानान्तुलाभाक् सादृश्यभागेष: शेष: पञ्चमी नैषध: कस्य हेतो: केनापि कारणेन षष्ठी हेतुप्रयोग इति षष्ठी। मम चेत: सुधाभि: स्नपयति। सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त:करणप्रवृत्तय इति न्यायादनेनैव नलेन भाव्यमिति भाव:। अथवा प्रथमचरमयो: पूर्व्वोत्तरयो: द्वयो: शब्दयोर्वर्णसख्ये अक्षरसाम्ये सत्यपि चरमे उत्तरे शब्दे अनुप्रासो वर्णावृत्तिलक्षण: शब्दालङ्कार: तस्य भासां शोभानां विलासश्चमत्कारो विलसति स्फुरति यथा तथैवानुप्रासभासां विलास इत्यत्र सर्व्वसकाराश्रयत्वे अनुप्रासस्यान्तिमसकारे स्फुरणमेवमन्तिमबुद्धौ विपरिवर्त्तमानत्वान्नलत्वाभिमानमात्रं नैतावतायमेवेति निश्चयो युक्त इत्यर्थ: ॥ ५३ ॥

इतीति। इति मनसि उद्यत: उत्पद्यमानान् उत्पूर्व्वादिण: शतन्तात् शसि पुंसि रूपं। विकल्पान्विचारान् सन्त्यजन्ती नेति प्रतिषेधन्ती दमयन्ती क्वचिदपि पञ्चस्वेकत्रापि निर्णयं नलनिश्चयं नाससाद अथ संश-

सुखमथ परितापास्कन्दितानन्दमस्या-
मिहिरविरचितावस्कन्दमिन्दुं निनिन्द॥ ५४॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यं।
स्वादूत्पादभृति त्रयोदशतयाऽऽदेश्यस्तदीये महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥५५॥

यानन्तरं परितापेनास्कन्दितानन्दं निरस्तानन्दमस्या मुखं मिहिरेण सविता विरचितावस्कन्दं कृततिरस्कारमिन्दुं निनिन्द तत्तुल्यं तद्धीनमभूदित्यर्थः। एते च परितापदैन्यशून्यत्वादयश्चित्तानुभावा ज्ञेयाः तदुक्तम् इष्टानधिगमात् ध्यानञ्चिन्ता शून्यत्वता पृथक्॥ ५४॥

श्रीहर्षमित्यादि। स्वादूत्पादभृति मधुरार्थस्रष्टरीति। त्रयोदशतया देश्यः त्रयोदशत्वेन सङ्ख्येयः गतमन्यत्॥ ५५॥

इति पदवाक्य प्रमाण पारावारपारीण श्रीमहोपाध्यायकोलाचल मल्लिनाथसूरि विरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां त्रयोदशः सर्गः॥ १३॥

नैषधचरितम्

महाकवि श्रीहर्षविरचितम्।

कोलाचल-मल्लिनाथ-सूरिविरचितया-टीकयाऽन्वितम्

बि, ए, उपाधि-धारिणा

श्रीजीवानन्द विद्यासागर-भट्टाचार्य्येण

संस्कृतं परिवर्त्तितं सन्निवेशितम्

प्रकाशितञ्च।

द्वितीयखण्डम् चतुर्दशादवधि द्वाविंशति सर्ग-पर्य्यन्तम्

कलिकातानगरे

सुचारुयन्त्रे

मुद्रितम्।

इं १८७६

नैषधचरितम् ।

चतुर्द्दशः सर्गः ।

अथाधिगन्तुं निषधेश्वरं सा प्रसादनामाद्रियतामराणाम् ।
यतः सुराणां सुरभिर्नृणान्तु सा वेधसाऽसृज्यत कामधेनुः ॥१॥
प्रदक्षिणप्रक्रमणालवालविलेपधूपावरणाम्बुसेकैः ।
दृष्टञ्च मृष्टञ्च फलं सुवाना देवा हि कल्पद्रुमकाननं नः ॥ २ ॥

अथेति । अथ चिन्तानन्तरं सा भैमी निषधेश्वरं नलमधिगन्तुं लब्धुम् अमराणामिन्द्रादीनां प्रसादनामभिमुखीकरणमाद्रियत अमोघसाधकत्वेनावलम्बतेत्यर्थः । अमोघसाधकत्वमेव समर्थयते यतः सुराणां पुरा वेधसा सुरभिः काचन गौः कामानां धेनुः कामधेनुः कामदुघा असृज्यत नृणां तु सा सुरप्रसादनैव कामधेनुरसृज्यत या यस्य कामान् दुग्धे गौरगौर्वा सैवास्य कामधेनुरिति अत्रामरप्रसादनायाः कामधेनुत्वेन रूपणाद्रूपकालङ्कारः ॥ १ ॥

प्रदक्षिणेति । प्रदक्षिणप्रक्रमणमेवालवालं विलेपश्चन्दनादिचर्च्चा स एव विलेपः पिण्याकादिलेपः धूपो दशाङ्गादेर्धूपः स एव दोहदधूपश्च आवरणमङ्गदेवतापरिवेष्टनं तदेव शाखावरणम् अम्बुसेकोऽभिषेकः स एव मूलेषु जलसेकः तेषां द्वन्द्वः तैः करणैरिष्टं प्रियं मृष्टमवदातञ्च फलमीप्सिते वस्तु तदेव फलं सस्यं सस्ये हेतुकृते फलमित्यमरः । सुवाना जनयन्तः सूतेः कर्त्तरि लटः शानजादेशः । देवा एव नोऽस्माकं नृणां कल्पद्रुमाणां काननं वनं हि तत्र प्रदक्षिणप्रक्रमणाद्याल-

श्रद्धामयीभूय सुपर्वणस्तान् ननाम नामग्रहणाग्रकं सा ।
सुरेषु हि श्रद्दधतां नमस्या सर्व्वार्थनिध्यङ्गमिथःसमस्या ॥ ३ ॥
यत्तान् निजे सा हृदि भावनाया बलेन साक्षादकृताखिलस्थान् ।
अभूदभीष्टप्रतिभूस्तदस्या वरं हि दृष्टा ददते परन्ते ॥ ४ ॥

बालाद्यवयवरूपणाद्देवेषु कल्पद्रुमरूपणाच्च समस्तवस्तुवर्तिसावयवरूपकम् ॥ २ ॥

श्रद्धेति। सा दमयन्ती श्रद्धा विश्वासः तन्मयी तद्युक्ता भूत्वा भूय अभूततद्भावे च्वौ समासे क्त्वो ल्यबादेशः। तान् सुपर्वणो देवान् नामग्रहणाग्रकं नामोच्चारणपूर्वकं यथा तथा ननाम प्रणता तथा हि सुरेषु विषये श्रद्दधतां विश्वसतां नमस्या नमस्कारः श्रद्धापूर्वकनमस्कार इत्यर्थः। सा नमस्यतेः क्यजन्तादप्रत्ययादिति स्त्रियामप्रत्यये टाप्। समस्यते संगृह्यते अनयेति समस्या संज्ञायां समजिनिषधेत्यत्र संपूर्वादस्यतेः क्यप्। सर्वेषामर्थानां निधौ यान्यङ्गानि साधनानि तेषां मिथः समस्या अन्योन्यसंग्रहणकारिका समस्या तु समासार्था मिथोऽन्योन्यं रहस्यपीति चामरः। सति नमस्कारे सर्वसाधनं फलदं नान्यथातिनमस्कारेत्यर्थः। सामान्येन विशेषण समर्थन रूपोऽर्थान्तरन्यासः ॥ ३ ॥

यदिति। सा भैमी अखिलस्थान् सर्वनतांस्तान् देवान्निजे हृदि भावनाया बलेन ध्यानदार्ढ्येन साक्षादकृत साक्षात्कृतवतीति यत्। करोतेः कर्तरि लङ् तङ् ह्रस्वादङ्गादिति स लोपः। स साक्षात्कार एव तस्या भैम्या अभीष्टे इष्टार्थसिद्धौ प्रतिभूर्लग्नकोऽभूत् तथा हि ते देवा दृष्टाः प्रत्यक्षाः सन्तः परमवश्यं वरं ददते हि। नदातुं देवा वरमर्हन्ति म प्रत्यक्षं दृष्टा मनुष्येभ्य इति श्रुतिः ॥ ४ ॥

सभाजनमिति। सा भैमी तत्र सभायां सभाजने पूजने विहिते पश्यति सति पश्यन्तन्त मनादृत्येत्यर्थः। षष्ठी चानादर इति चकारा-

सभाजनं तत्र ससर्ज तेषां सभाजने पश्यति विस्मिते सा ।
आमुद्यते यत्सुमनोभिरेवं फलस्य सिद्धौ सुमनोभिरेव ॥ ५ ॥
वैशद्यहृद्यैर्म्रदिमाभिरामैरामोदिभिस्तानथ जातिजातैः ।
आनर्च गीत्यन्वितषट्पदैः सा स्तवप्रसूनस्तवकैर्नवीनैः ॥ ६ ॥

दनादरे सप्तमी। तेषां देवानां सभाजनं पूजां मालत्यादिषु संस्कारश्च गम्यते ससर्ज चकारेत्यर्थः। किमर्थं सुरार्चनमित्याशङ्क्य तत्सन्तोषार्थमित्याह यद्यस्मात् सभाजनात् सुमनोभिर्देवैः मालत्यादिकुसुमैश्च आमुद्यतएव सन्तुष्यत इव मुद्यते भावे लट्। मालत्यां पण्डिते पुष्पे हर्षे च सुमनोभिदेति विश्वः। आमोदो हर्ष गन्धयोरित्यमरः। किमेषामामोदेनेत्याशङ्क्य आमुदिता एव ते फलन्तीत्यर्थान्तरं न्यस्यति तथा हि फलं हेतु साध्यं सस्यञ्च सस्यं हेतु कृते फल मित्यमरः। तस्य सिद्धौ सिद्धिप्रसङ्गे सुमनोभिरमरैरप्यामुद्यत एव पूर्ववच्छ्लेषः। सुमनसां मालत्यादीनां फलदानपुष्पदानदर्शनात् सुरे सुमनस्त्वेन तथात्वनिश्चयात्तदामोदार्थं तत्सभाजनमन्वतिष्ठदित्यर्थः। अतोभयेषामपि सुमनसाम् उभयोरप्यामोदयोश्च फलयोरभेदाध्यवसायेनायमर्थान्तरन्यासः ॥ ५ ॥

वैशद्येति। अथ पूजानन्तरं सा दमयन्ती तान् देवान् वैशद्यमर्थव्यक्तिरन्यत्र विकाशश्च तेन हृद्यैर्हृदयप्रियैः हृदयस्य प्रिय इति यत्प्रत्ययः हृदयस्य हृल्लेख यदन्नलासेष्विति हृदादेशः। म्रदिमा शब्दार्थमाधुर्यमन्यत्र सौकुमार्यं तेनाभिरामैरामोदयन्तीत्यामोदिनः मुदेर्ण्यन्ताच्छील्ये णिनिः। अन्यत्रामोदः सौरभमेषामित्यामोदिनः मत्वर्थीय इनिः। तैरामोदिभिः जातयः छन्दांसि मालत्यामिति तज्जातैस्तदुद्भवैः गीत्यन्विता गानयुक्ताः षट्पदाः गाथाविशेषा येषु तैरन्यत्र झङ्कारप्रयुक्तैर्भ्रमरैः नवीनैरभिनवैः स्तवैः स्तोत्रैः प्रसूनस्तवकैः कुसुमगुच्छैश्चानर्च अर्चयामास पुष्पाञ्जलिं दत्त्वा तुष्टावेत्यर्थः। अर्चेर्भौवादिकाल्लिटि अत आदेरित्य

भक्त्या तयैव प्रससाद तस्यास्तुष्टं स्वयं देवचतुष्टयं तत्।
स्वेनानलस्य स्फुटतां यियासोः फूत्कृत्यपेक्षा कियती खलु स्यात्॥७
प्रसादमासाद्य सुरैः कृतं सा सस्मार सारस्वतसूक्तिसृष्टेः।
देवा हि नान्यद्वितरन्ति किन्तु प्रसद्य ते साधुधियं ददन्ते॥८॥

भ्यासदीर्घौ तस्यानच्। अत्र स्तवानां प्रसूनस्तवकानां चोभयेषामभ्यर्चनसाधनत्वेन प्रकृतानां धर्म्मतोऽल्पेनौपम्यस्य गम्यमानत्वात् केवलप्रकृतविषया तुल्ययोगिता लक्षणन्तूक्तं प्राक्॥ ६॥

भक्त्येति। स्वयं स्वतएव तुष्टं सेवादिकयापि तच्चारित्वदार्ढ्यादेव सन्तुष्टं तत्प्रकृतं देवचतुष्टयम् इन्द्रादिदेवचतुष्कं तस्या भैम्या तया भक्त्या सेवया प्रससादैव अनुजग्राहैव एवकारस्त्वविलम्बसूचनार्थं तथाहि स्वेनैव स्वतएव स्फुटतां प्रज्वलितत्वं यियासोः प्राप्तुमिच्छोरनलस्य वह्नेः फूत्कृतेः फूत्कृतस्य फूत्कारमारुतस्यापेक्षा कियती खलु स्यात्? नात्यन्तमपेक्षत इत्यर्थः। स्वतएव प्रसत्स्यतो देवगणस्य तत्कृता भक्तिः स्वतएव प्रज्वलिष्यतोऽग्नेः फूत्कृतिरिव झटिति कार्य्यप्रादुर्भावमात्रफला अन्यथापि प्रज्वलनवत् प्रसादावश्यम्भावादिति भावः। अत्र वाक्यद्वये भक्तिफूत्कृत्योः कार्य्यानपेक्षितत्वलक्षणसमानधर्म्मस्यैव कारको यच्छब्दाभ्यां विम्बप्रतिविम्बतयोक्तेर्दृष्टान्तालङ्कारः। विम्बानुविम्बन्यायेन निर्द्देशे धर्म्मधर्म्मिणाम्। दृष्टान्तालङ्कृतिर्ज्ञेया भिन्नवाक्यार्थसंश्रयेति विद्याचक्रवर्त्तिलक्षणात्॥ ७॥

प्रसादमिति। सा भैमी सुरैः कृतं प्रसादमनुग्रहमासाद्य सरस्वत्या इयं सारस्वती तस्याः सूक्तिसृष्टेः अत्याजीत्यादेः पूर्व्वसर्गोक्तश्लिष्टोक्तिगुम्फस्य सस्मार तदर्थतत्त्वं जज्ञावित्यर्थः। अधीगर्थेत्यादिना कर्म्मणि शेषे षष्ठी। नलप्राप्तौ तस्याः कोऽयमनुग्रहो यद्गाथापरिज्ञानञ्च तत्राह तथा हि देवाः अन्यत् बुद्धेर् यत् न वितरन्ति न प्रयच्छन्ति किन्तु ते देवाः प्रसद्य प्रसन्ना भूत्वा साधुधियं सम्यक्प्रतिपत्तिं ददन्ते प्रयच्छन्ति ददद्दान

श्लेषं नलं प्रत्यमरेण गाथा या या समार्था खलु येन येन ।
तां तां तदन्येन सहालगन्तीं तदा विशेषं प्रतिसन्दधे सा ॥९॥
एकैकवृत्तेः प्रतिलोकपालं पतिव्रतात्वं जगदुर्दिशां याः ।
वेद स्म गाथा मिलितास्तदासावाशा इवैकस्य नलस्य वश्याः ॥१०॥

इति धातोर्भौवादिका लट् तङ् । तदाहुः न देवा दण्डमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति बुद्ध्या स याति तत् फलमिति । तथा हि ते देवाः प्रसाद्यानुगृह्य ग्रहेः क्त्वो ल्यप् । अन्यद्बुद्धेरन्यद्देयं न किन्तु साधुधियं फलप्राप्त्युपायपरिज्ञानं ददन्ते प्रयच्छन्ति दददान इति धातोर्भौवादिकाल्लट् तङ् तदाहुः न देवा दण्डमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तमिति ॥ ८ ॥

श्लेषमिति । सा दमयन्ती श्लेषं परमार्थं नलं प्रति विरचितेति श्लेषः या या गाथा अत्याजि लक्ष्मेत्यादिको यो यः श्लोको येन येनामरेन्द्रेण देवेन समार्थाः समानाभिधेयाः खलु ? अतएव तदन्येन तत इन्द्रादेरन्येन सत्येन नलेन सह लगन्ती ससङ्गतां तत्परत्वेनानिश्चितां तां तां गाथां तदा देवतानुग्रहलब्धस्फूर्त्युद्बोधकाले विशेषं प्रति सत्यनलं प्रति सन्दधे नलपरत्वेन योजयामासेत्यर्थः । इन्द्रादिपरत्वशङ्कां विहाय नलपरत्वं निश्चिकायेति तात्पर्य्यार्थः ॥ ९ ॥

एकैकेति । या गाथा अत्याजीत्यादयः श्लोका एकैकस्मिन् लोकपाले वृत्ते वर्त्तनाद्धेतोः साम्यात् दिशां प्रतिलोकपालं यत्पतिव्रतात्वं तज्जगदुः प्राच्यादिदिश इव इन्द्राद्येकैकलोकपालपरा बभूवुरित्यर्थः । तदा देवताप्रसादकाले असौ भैमी मिलिताः समस्ता गाथा आशा इवैकस्य नलस्य वश्याः वशङ्गताः वशङ्गत इति यत्प्रत्ययः । वेद स्म लट् स्म इति भूते लट् विदो लटोवेति णलादेशः । आशा इव गाथा अपि आपातत एकैकश एकैकलोकेशपरतया प्रतीता इति सामस्त्येन नलपरा एवेति विवेदेत्यर्थः । तस्य सर्वाशाविजयत्वादाशानां तत्परत्वं गाथानान्तु देव्या चतुरोक्तिभङ्गिपर्य्यालोचनयेति भावः ॥ १० ॥

निश्चित्य शेषं तमसौ नरेशं प्रमोदमेदस्वितरान्तराऽभूत् ।
देव्या गिरा भावितभङ्गिराख्यच्चित्तेन चिन्तार्णवयादसेदम् ॥११॥
सा भङ्गिरस्याः खलु वाचि काऽपि यद्भारती मूर्त्तिमतीयमेव ।
श्लिष्टं निगद्याद्दत वासवादीन् विशिष्य मे नैषधमप्यवादीत् ॥१२॥
जग्रन्थ सेयं मदनुग्रहेण वचःस्रजः स्पष्टयितुं चतस्रः ।
द्वे ते नलं लक्षयितुं क्षमेते ममैव मोहोऽयमहो महीयान् ॥१३॥

निश्चित्येति। असौ दमयन्ती शेषं पञ्चमन्तं प्रसिद्धं नरेशं नैषधं निश्चित्य प्रमोदमेदस्वितरमानन्दमेदुरतरमान्तरमन्तरङ्गं यस्याः साऽभूत् अथ देव्या गिरा भाविता भङ्गिः प्रयोगचातुरीविशेषो यया सा सती चिन्तार्णवयादसा चिन्तासागरजलग्रहभूतेन चित्तेनेदं वक्ष्यमाणमाख्यदवोचत् ख्याते लुङि अस्यतिवक्तिख्यातिभ्योऽङि च्लेरङादेशः ॥ ११ ॥

अथ चित्तेन यदाख्यत्तदेवाह सेति। अस्या देव्या वाचि सा वक्ष्यमाणा काचिदपूर्वा भङ्गिः प्रयोगप्रकारः खलु ? यद्यस्माद्भङ्गिविशेषादियं पुरोवर्त्तिनी मूर्त्तिमती विग्रहवती सती सत्यवादिनी भारती वाग्देवता श्लिष्टं श्लिष्टार्थं यया तथा निगद्योक्त्वा वासवादीनिन्द्रादीनाद्दत आद्दतवती तानेवोपाचरदेवेत्यर्थः दृङो लुङि ह्रस्वादङ्गादिति सलोपः। अथ च नैषधं नलमपि मे मह्यं विशिष्य इन्द्रादिभ्यो विविच्यावादीत् किन्तु अहमेव न वेद्मीति भावः ॥ १२ ॥

जग्रन्थेति। सेयं देवी मदनुग्रहेण मदनुग्रहबुद्ध्या स्पष्टयितुं नलं व्यक्तीकर्तुं चतस्रः वचः स्रजो वचनमालिकाः जग्रन्थ ग्रथितवती तत्र ते इन्द्राग्निपर्यायिके आद्ये द्वे एव स्रजौ नलं लक्षयितुमभिव्यक्तुं क्षमेते शक्नुतः तत्रैव स्फुटतरं प्रतीतेरन्ये द्वे दृष्टेति भावः। किन्तु ममैवायं महीयान् महत्तरो मोहः अहो यच्चतसृभिरपि न वेद्मीति भावः ॥१३॥

श्लिष्यन्ति वाचो यदमूरमुष्याः कवित्वशक्तेः खलु ते विलासाः ।
भूपाललीलाः किल लोकपालाः समाविशन्ति व्यतिभेदिनोऽपि १४
त्यागं महेन्द्रादिचतुष्टयस्य किमभ्यनन्दत् क्रमसूचितस्य ।
किं प्रेरयामास नले च तन्मां का सूक्तिरस्या मम कः प्रमोहः॥१५
परस्य दारान् खलु मन्यमानैरस्पृश्यमानाममरैर्धरित्रीम् ।
भक्त्येव भर्त्तुश्चरणौ दधानां नलस्य तत्कालमपश्यदेषा ॥ १६ ॥

अत्याजीत्यादिश्लोकचतुष्टयेन नलमेवाचष्टे किमिति इन्द्रादिचतुष्टयञ्च स्पृशतीत्याशङ्क्याह श्लिष्यन्तीति। अमूरत्याजीत्यादयो गाथा अमुष्या देव्याः वाचः श्लिष्यन्ति नलमिवेन्द्रादीनपि स्पृशन्तीति यत् तच्छ्लेषणमित्यर्थः । विधेयविलासप्राधान्यात्तल्लिङ्गसङ्ख्यानिर्देशः। कवित्वशक्तेर्विलासाः खलु ? कवित्वधर्मोऽयं यदन्यपरेणापि शब्देन श्लेषभङ्ग्यार्थान्तरप्रत्यायनमलङ्कारत्वान्न तु तात्पर्य्यमिति भावः। तथा च श्लेषमहिम्ना तेषां नलसारूप्याच्च तत्परत्वभ्रान्तिरित्याह भूपालस्य नलस्य लीलेव लीला येषां ते तद्रूपधारिणो लोकपाला व्यतिभेदिनो नलाद्भेदवन्तोऽपि समाविशन्ति श्रोतृबुद्धौ लगन्ति किल ? ततो ममैवायं व्यामोह इत्यर्थः ॥१४॥

स्वव्यामोहमेव प्रकटयति त्यागमिति। क्रमसूचितस्य क्रमनिर्दिष्टस्य महेन्द्रादिचतुष्टयस्य त्यागं पुराकृतं परिहारं किं किमर्थमभ्यनन्दत् अन्वमोदत माञ्च किं किमर्थं नले विषये प्रेरयामास यदीयं मदनुजिघृक्षा न स्यादिति भावः। तत्तस्मादस्या देव्याः सूक्तिः साधूक्तिः अत्याजीत्यादिसत्योपदेशः का मम प्रमोहः कः अहो घण्टापथे स्खलितमिति भावः ॥१५॥

अस्पृश्या सा षड्भिर्नलज्ञानप्रकारमाह परस्येत्यादि। परस्य दारान्मन्यमानैरिव परदारा इति बुध्यमानैरिवेत्युत्प्रेक्षा। राजदारत्वाद्भुव इति भावः। भार्य्या जायाथ पुंभूम्नि दारा इत्यमरः। अमरैरस्पृश्यमानां पराङ्गनास्पर्शनिषेधादिति भावः। भक्त्येव पतिभक्त्येवेत्युत्प्रेक्षा। भर्तुः पत्युर्नलस्य चरणौ दधानां धरित्रीमेषा दमयन्ती तत्-

सुरेषु नापश्यदिवैतदक्ष्णोर्निमेषमुर्वीभृति सम्मुखे सा।
इह त्वमागत्य नले मिलेति सञ्ज्ञानदानादिव भाषमाणम्॥१७॥
नाबुद्ध बाला विबुधेषु तेषु क्षोदं क्षितेरैक्षत नैषधे तु।
पत्ये स्रजन्त्याः परिरम्भमस्याः सम्भूतसम्भेदमसंशयं सा॥१८॥
स्वेदः स्वदेहस्य वियोगतापं निर्वापयिष्यन्निव संसिस्पृक्ष्वोः।
हीराङ्कुरश्चारुणि हेमनीव नले तयालोकि न दैवतेषु॥१९॥

कालं तस्मिन् काले अत्यन्तसंयोगे द्वितीया। अपश्यत् देवा हि भूमिं न स्पृशन्ति अयन्तु स्पृशतीत्येतदेकं तावच्चिह्नमित्यर्थः॥१६॥

सुरेष्विति। सा दमयन्ती सुरेष्विन्द्रादिष्वक्ष्णोर्निमेषं नापश्यत् निजसम्मुखे स्वाभिमुखे उर्वीभृति नृपे नले त्वमिहागत्य इत एत्य नले मिल सङ्गच्छस्वेति संज्ञानदानात्संज्ञाकरणाद्भाषमाणं ब्रुवाणमिव स्थितमित्युत्प्रेक्षा। निमेषमिवैक्षत इदमपरं चिह्नमित्यर्थः॥१७॥

नेति। सा बाला भैमी तेषु विबुधेषु देवेषु क्षितेः क्षोदं रजो नाबुद्ध, नैक्षितेत्यर्थः। तैजसेषु तदसंक्रमादिति भावः। बुध्यतेर्लुङि तङि सरोसरिति सिच्लोपः। नैषधे नले तु पत्ये स्वभर्त्रे नलाय परिरम्भं स्रजन्त्या आलिङ्गनं ददन्त्याः अस्याः क्षितेः सकाशात् असंशयं यथा तथा सम्भूतसम्भेदं सञ्जातसंश्लेषमित्युत्प्रेक्षा। आलिङ्गनसंक्रान्तस्थितमित्यर्थः। क्षोदमैक्षत। रजः सम्भेदोऽपरं चिह्नमित्यर्थः॥१८॥

स्वेद इति। तया दमयन्त्या संसिस्पृक्ष्वोर्नलेन संस्प्रष्टुं सङ्गन्तुमिच्छोः स्वदेहस्य वियोगतापं नलविरहसन्तापं निर्वापयिष्यन् शमयिष्यन्निव स्थित इत्युत्प्रेक्षा। स्वेदः चारुणि शुद्धिमति श्यामिकारहिते हेमनि हेम्नि हीराङ्कुरो वज्राङ्कुर इव वज्रो हीरश्च कथ्यत इति हलायुधः। नले आलोकि दृष्टः दैवतेषु सुरेषु नालोकि॥१९॥

सुरेषु मालाममलामपश्यन्नले तु बाला मलिनीभवन्तीम्।
इमां किमासाद्य नलोऽद्य म्रद्वीं श्रद्धास्यते मामिति चिन्तयेव॥२०॥

श्रियं भजन्तां कियदस्य देवाश्छाया नलस्यास्ति तथापि नैषाम्।
इतीरयन्तीव तया निरैचि सा नैषधे न त्रिदशेषु तेषु॥ २१॥

चिह्नैरमीभिर्नलसंविदस्याः सम्वादमाप प्रथमोपजाता।
सा लक्षणव्यक्तिभिरेव दैवप्रसादमासादितमप्यबोधि॥ २२॥

सुरेष्विति। दमयन्ती भैमी सुरेष्वमला मम्लानां मालां स्रजमपश्यत् नले तु अद्य म्रद्वीं सुकुमारा मिमां दमयन्ती मासाद्य किं किमर्थं मां श्रद्धास्यते आदरिष्यत इति चिन्तयैव मलिनीभवन्तीं म्लायन्तीं माला मपश्यत् म्लानकुसुमत्वमन्यचिह्नमित्यर्थः॥ २०॥

श्रियमिति। देवा इन्द्रादयोऽस्य नलस्य श्रियं कान्तिं कियदल्प यथा तथा भजन्तां तथास्य हि एषा मिन्द्रादीनां नलस्य छाया कान्तिः समग्रेतिभावः। अनातपश्च छाया त्वनातपे कान्ताविति वैजयन्ती। नास्ति नलरूपधारित्वेऽपि तेषु तत्कान्तिरीषदेव न समग्रेत्यर्थः। इतीरयन्ती कथयन्तीव स्थिता छाया कान्तिरनातपश्च तया दमयन्त्या नैषधे नले निरैचि दृष्टा ईक्षतेः कर्मणि लुङ्। तेषु त्रिदशेषु इन्द्रादिषु न निरैचि तेषान्तैजसत्वान्न तत्र छत्रादिच्छाया लग्ना नले तु लग्नेत्येकं चिह्न मित्यर्थः। अत्र श्रियमिव श्रियं छायेव छायेति सादृश्याक्षेपान्निदर्शने ताभ्या मङ्गाभ्यामितीरयन्तीवेत्युत्प्रेक्षायाः सङ्करः॥ २१॥

चिह्नैरिति। अस्या दमयन्त्याः प्रथमोपजाता इतरनलतुलाभागेष शेष इत्युक्ता नलसम्वित् नलोऽयमिति चिरमेभिश्चिह्नैः पूर्वोक्तैः भूस्पर्शादिभिः सम्वादमैकमत्यम् आप दार्ढ्यं प्रापेत्यर्थः। सा दमयन्ती लक्षणानां पूर्वोक्त चिह्नानां व्यक्तिभिरभिव्यक्तिलक्षणकार्य्यैरेवं दैवप्रसादं दैवतानुग्रह महितकारणभूतमासादितं प्राप्तमबोधि कारणं विना कथं कार्य्यं भवेदिति भावः। बुध्यतेः कर्त्तरि लुङ् दीपजनेत्यादिना विकल्पात् चिण्॥ २२॥

नले विधातुं वरणस्रजन्तां स्मरः स्म रामां त्वरयत्यथैनाम्।
अपत्रपा तां निषिषेध तेन द्वयानुरोधं तुलितं दधौ सा ॥२३॥
स्रजा समालिङ्गयितुं प्रियं सा रसादधत्तैव बहुप्रयत्नम्।
स्तम्भत्रपाभ्यामभवत्तदीये स्पन्दस्तु मन्दोऽपि न पाणिपद्मे ॥२४॥
तस्या हृदि व्रीड़मनोभवाभ्यां दोलाविलासं समवाप्यमाने।
श्रितं धृतैणाङ्ककुलातपत्रे शृङ्गारमालिङ्गदधीश्वरश्रीः ॥ २५ ॥

नल इति। स्मरो नले वरणस्रजं विधातुं निधातुं तां रामां दमयन्तीं त्वरयतिस्म त्वरयामास अथैनां त्वरावतीं भैमी मपत्रपा लज्जा निषिषेध निवारयामास स्थादिष्वभ्यासेन चाभ्यासस्येति धात्वभ्यास सकारलोपयोः षत्वं। तेन कारणद्वयेन सा भैमी द्वयानुरोध मुभयानुरोधं तुलितं समीभूतं यथा तथा दधौ न वञ्जेणापि विररामैवेत्यर्थः एतेनास्या मध्यमानायिकात्व मुक्तं। तुल्य लज्जास्मरा मध्येति लक्षणात् ॥ २३ ॥

स्रजेति। सा भैमी रसाद्रागात्प्रियं नलं सृज्यत इति स्रक् संवरणमाला ऋत्विक् दधृगित्यादिना कर्मार्थे क्विप् ऋगागमश्च। तया समालिङ्गयितुं समाश्लेषयितुं बहु प्रयत्नं महोद्योगम् अधत्तेव किन्तु तदीये तस्याः सम्बन्धिनि पाणिपद्मे स्तम्भो निष्क्रियत्वलक्षणः सात्त्विकविशेषः सच त्रपा च ताभ्यां हेतुभ्यां मन्दोऽल्पोऽपि स्पन्दो व्यापारो नाभवत् ॥ २४ ॥

तस्या इति। व्रीडमनोभवाभ्यां लज्जास्मराभ्यां दोलाविलासं प्रेङ्खणलीलां समवाप्यमाने नीयमाने आन्दोल्यमान इत्यर्थः। धृतसेणाङ्ककुलस्य सोमवंशस्यातपत्रं भूतो नलो येन तस्मिन् तस्याः हृदि हृदये श्रितमाश्रित्य स्थितं शृङ्गारमधीश्वरश्री राजलक्ष्मीरालिङ्गत् दोलाधिरूढा स्त्रियो भीताः पुमांसमालिङ्गन्ति इति भावः। नलाधिष्ठिते हृदि भैमी परां कोटिमारूढा इत्यर्थः ॥ २५ ॥

करः स्रजा सज्जतरस्तदीयः प्रियोन्मुखीभूय पुनर्व्यरंसीत् ।
तदाननस्यार्द्धपथं ययौ च प्रत्याययौ चातिचलः कटाक्षः ॥२६॥
तस्याः प्रियं चित्तमुदेतुमेव प्रभूवभूवाक्षि न तु प्रयातुम् ।
सत्यः कृतः स्पष्टमभूत्तदानीं तयाक्षि-लज्जेति जनप्रवादः ॥२७॥
कथं कथञ्चिन्निषधेश्वरस्य कृत्वास्यपद्मं दरवीक्षितश्रि ।
वाग्देवताया वदनेन्दुबिम्बं त्रपावती साऽकृत सामिदृष्टम् ॥१८॥

कर इति । तदीयो दमयन्तीसम्बन्धिनः करः स्रजा वरणस्रजाकरणेन सज्जतरोऽतिसन्नद्धः सन् नलस्योन्मुखीभूयाभिमुखीभूय पुनर्व्यरंसीत् विरराम रमेर्लुङि व्याङ्परिभ्यो रम इति परस्मैपदं यमरमनमातां सक्चेति सगिडागमौ, अस्ति सिचोव्यक्त इतीडागमे ईट ईटीति सलोपे च सवर्ण दीर्घः । तथा अतिचलोऽत्यन्तचञ्चलः कटाक्षस्तदाननस्य नलमुखस्य अर्धः पन्था इति विशेषण समासे समासान्तः । अर्द्धं नपुंसकमिति नैकदेशी समासः समप्रविभागे प्रमाणाभावात् । तमर्द्धपथं ययौ च प्रत्याययौ प्रत्यावृत्तश्च उभयत्र लज्जयेतिभावः ॥ २६ ॥

तस्या इति । तस्या दमयन्त्याश्चित्तं प्रियं नलमुदेतुं प्राप्तुमेव प्रागेव नेदानीमितिभावः । अक्षि तु प्रयातुं नलं गन्तुं न प्रभूवभूव न शशाकेत्यर्थः प्रभुशब्दाद्भूततद्भावे च्वौदीर्घः । अक्षिणि चक्षुषि लज्जा न तु चेतसीति शेषः इति जनप्रवादः तन्वग्रा तया भैम्या स्पष्टं यथा तथा सत्यीकृतोऽभूत् अन्तःकरणवृत्तेरात्मैकसंवेद्यत्वान्न तस्य लज्जा चक्षुषस्तु न तथेति तत्रैव लज्जेतिभावः ॥ २७ ॥

कथं कथमिति । त्रपावती लज्जावती सा भैमी कथं कथञ्चिदतिकृच्छ्रेण निषधेश्वरस्य नलस्यास्यपद्मं मुखारविन्दं दरवीक्षिता ईषद्दृष्टा श्रीरस्य तत्कृत्वा लेशतोदृष्टेत्यर्थः शैषिकत्वस्य वैभाषिकत्वादभावः ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः । ईषदर्थे दरोऽव्ययं । वाग्देवतायाः

न जानतीवेदमवोचदेनाम् आकूतमस्यास्तदवेत्य देवी।
भावस्त्रपोर्मिप्रतिसीरया ते वितीर्यते लक्षयितुं न मेऽपि ॥२८॥
देव्याः श्रुतौ नेति नलार्द्धनाम्नि गृहीत एव त्रपया निपीता।
अथाङ्गुलीरङ्गुलिभिः स्पृशन्ती दूरं शिरः सा नमयाञ्चकार ॥२९॥
करे विधृत्येश्वरया गिरां सा पान्था पथीन्द्रस्य कृता विहस्य।
दमेति नामैव बभाज सार्थं पुरन्ध्रिसाधारणसंविभागम् ॥३१॥

सरस्वत्या वदनेन्दुबिम्बं सामिदृष्टमर्धदृष्टमकृत अकार्षीत् तत्रापि लज्जेति भावः सामीत्यर्धे जुगुप्सित मित्यमरः। नाहं शक्नोमि त्वया कारयितव्यमिति देवीमुखवीक्षणे तात्पर्य्यमवधार्य्यम् ॥ २८ ॥

नजानतीति । देवी वाग्देवी अस्या भैम्यास्तत्पूर्वोक्तमाकूतमभिप्रायम् अवेत्य ज्ञात्वा न जानतीव बुध्यमानेव एनां भैमीमिदं वक्ष्यमाणमवोचत् वचेर्ब्रुङादेशस्य वा लुङ् वचेरुमित्युमागमः। तदेवाह त्रपायाः ऊर्मिरेव प्रतिसीरा यवनिका प्रतिसीरा यवनिका स्यात्तिरस्करिणी च सेत्यमरः। तया कर्त्र्या ते तव भावोऽभिप्रायो मे ममापि लक्षयितुं ज्ञातुं न वितीर्य्यते न दीयते लज्जान्तर्हितो भावमयी न ज्ञायत इत्यर्थः कण्ठोक्तिमन्तरेण दुर्ज्ञान इत्यर्थः तुमनुप्रयोगस्तु टीच्यानां ॥ २९ ॥

देव्या इति। सा भैमी देव्याः सरस्वत्या नेत्येवं नलस्यार्द्धनाम्नि नाम्नोऽर्द्धे अर्धनामधेये अर्धं नपुंसकम् इत्येकदेशी समासः। श्रुतौ श्रोत्रे गृहीत एव उच्चारिते सत्येव त्रपया निपीता ग्रस्ता सती अथ त्रपाव्याप्त्यनन्तरमङ्गुलीभिः अङ्गुलीमिषेण अङ्गुलीः स्पृशन्ती सतीत्यर्थः दूरमत्यन्तं शिरोनमयाञ्चकार ननाम लज्जातिरेकाद्वेदिनैराश्याच्चेतिकर्तव्यतामूढा केवलं नता न तं विना स्थितेत्यर्थः ॥३०॥

कर इति। सा भैमी गिरामधीश्वरया वाग्देवतया स्थेशभासपिसकसेर्वरच्। विहस्य करे विधृत्य गृहीत्वा इन्द्रस्य पथि पन्थानं वा गच्छति नित्यमिति पान्था नित्यपथिकीकृता इन्द्रसमीपं नीता सतीत्यर्थः।

भैमीं निरीक्ष्याभिमुखीं मघोनः स्वाराज्यलक्ष्मीरभृताभ्यसूयाम्।
दृष्ट्वा ततस्तत्परिहारिणीं तां व्रीडां बिडौजःप्रवणाभ्यपादि ॥३२
त्वत्तः श्रुतो नेति नले मयातः परं वदस्वेत्युदिताथ देव्या।
ह्रीमन्मथद्वैरथरङ्गभूमिर्भैमी दृशा भाषितनैषधाऽभूत् ॥ ३३ ॥

पयोऽणनित्यमित्यण्प्रत्यये पयः पन्यादेशे च ङीप्। पुरन्ध्रीणां सर्वयोषितां साधारणः संविभागः सर्वनामत्वे संविभज्य ग्रहणं यस्य तद्वामेति नामैव सार्थं वक्रत्वेनार्थवद्यथा तथा बभाज बभार वक्रोग्याभूत् वामं सव्ये प्रतीपे च चारौ वक्रे च योषितीत्यजमलः ॥ ३१ ॥

भैमीमिति। मघोन इन्द्रस्याभिमुखीं भैमीं निरीक्ष्य स्वः स्वर्गस्य राज्यं स्वरव्ययं स्वर्गनाकेत्यमरः। ढ्रलोपे पूर्वस्य दीर्घोऽणः। तस्य लक्ष्मीरभ्यसूयामिन्द्रे भैम्यां चेर्ष्यामभृत बभार भृङ् लङ् तङ् ह्रस्वादङ्गादिति सलोपः। ततोऽसूयानन्तरं तत्परिहारिणीमिन्द्रप्रतिषेधिनीपताकां भैमीं दृष्ट्वा बिडौजःप्रवणा पुनरिन्द्रानुरक्ता सती व्रीडामभ्यपादि अभिपेदे तया मायाशङ्कितं सा तु न गणयतीति लज्जत इत्यर्थः। पद्यतेः कर्तरि लुङि तङि ह्रस्वादङ्गादिति सलोपः चिण्ते पदः चिणो लुङि तिङि चिण्पपदः चिणो लुङिति प्रत्ययस्य लुक्। ॥ २२ ॥

त्वत्त इति। अथ नले प्रश्निते सति मया नेति त्वत्त एव श्रुतः श्रुत एवायं त्वच्चेष्टयैव ज्ञात इत्यर्थः। अन्यथा ज्ञात्वापि तं किमिति न वृणीष इति भावः। अतो नलात्परमन्यं वदस्व नृपान्तरं ब्रूहीत्यर्थः। इति देव्या वाग्देवतया उदिता ह्रीमन्मथ द्वैरथरङ्गभूमि र्लज्जाकामरथद्वयप्रवृत्तयुद्ध नाट्यशालेव भैमी दृशा दृष्ट्यैव भाषितो नैषधो नलो यया साभूत् ह्रिया कुण्ठेन वक्तुमशक्ता कामादनुज्ञायत्ता कटाक्षदृष्ट्या नलं सानुरागमैक्षतेत्यर्थः ॥ ३३ ॥

हसत्स्विति। दिवि सीदन्तीति दिविषदो देवा आदितेया दिविषद इत्यमरः। सत्सूद्विषेत्यादिना क्विप्। हृद्युभ्यां ङेरुपसङ्ख्यानमिति सप्तम्य

हसत्सु भैमीं दिविषत्सु पाणौ पाणिं प्रणीयाप्सरसां रसात् सा।
आलिङ्ग्य नीत्वाऽकृत पान्थदुर्गां भूपालदिक्पालकुलाध्वमध्यम्॥३४॥
अदेशितामप्यवलोक्य मन्दं मन्दं नलस्यैव दिशा चलन्तीम्।
भूयः सुरानर्धपथादथासौ तानेव तां नेतुमना नुनोद॥३५॥
मुखाब्जमावर्त्तनलोलनालं कृत्वालिझंझंरवलक्षलक्ष्यम्।
भीमोद्भवा तां नुनुदेऽङ्कपालीं देव्या नवोढेव ह्रिया विवोढुः॥३६॥

लुक् सुषमादिषु चेति षत्वम्। अवहित लक्षण मूर्धन्याः सुषमादिषु द्रष्टव्या इति वचनात्। तेषु रसाद्धर्षादप्सरसां पाणौ पाणिं प्रणीय हसत्सु अहो नरासक्तेति परिहसत्सु सा सरस्वती भैमी मालिङ्ग्य भूपालानां दिक्पालानाञ्च कुलयोर्वर्गयोरध्वा तस्य मध्यन्नीत्वा पान्थानां तन्मार्गचारिणां दुर्गां दुर्गां देवीम् अकृत तद्वदलङ्घ्यामेकलक्ष्यां कृतवतीत्यर्थः कृञ् कर्तरि लुङि ह्रस्वादङ्गादिति सिच् सकार लोपः॥३४॥

अदेशितामिति। असौ देवी अदेशितामचोदितामपि दिशेश्चौरादिकात्कर्मणि क्तः। मन्दं मन्दं नलस्यैव दिशा चलन्तीङ्गच्छन्तीं चलेरात्मनेपदमनित्यत्वज्ञापनादिति वामनः। तां भैमीम् अवलोक्य भूयस्तानिन्द्रादीन् सुरान् एव नेतुं मनो यस्याः सा सती तुं काममनसोरपीति मकार लोपः। तथार्धपथादर्धमार्गात् पुरावत् नुनोद प्रेरयामास॥३५॥

मुखेति। भीमोद्भवा भैमी मुखाब्जं स्वमुखारविन्दम् आवर्तनेन दिग्वलनेन लोलनालं व्यावृत्तकण्ठनालं तथा अलीनां सखीनां झंझंरवाणां झंझमिति निवारण शब्दानाम् अन्यत्र अलीनां भृङ्गाणां झङ्कारशब्दानां लक्षैः सङ्ख्याविशेषैः लक्ष्यं दर्शनीयं च कृत्वा नवोढा नववधूर्विवोढुः परिणेतुरिव तामालिङ्ग्य नीत्वेत्यत्रोक्तां देव्याः सम्बन्धिनीं ह्रिया अङ्कपालीं परिरम्भणबन्धनम् अङ्कपाली स्मृता कोच्यां दारिका परिरम्भयोरिति विश्वः। नुनुदे तत्याज॥३६॥

देवीति। देवी तां भैमीं कथञ्चित् खलु कथञ्चिदपि देवानञ्चतीति देवद्रीची देवानञ्चतीति देवद्र्यङित्यमरः। ऋत्विगित्यादिना

देवी कथञ्चित् खलु तामदेवद्रीचीभवन्तीं स्मितसिक्तसृक्का ।
आह स्म मां मय्यपि ते भृशं का शङ्का शशाङ्कादधिकास्यविम्बे ! ३७

एषामकृत्वा चरणप्रणामं येषामनुज्ञामनवाप्य सम्यक् ।
सुपर्ववैरे तव वैरसेनिं वरीतुमीहा कथमौचितीयम् ॥ ३८ ॥

दूतीरिते विश्वसितां पुनस्तामादाय पाणौ दिविषत्सु देवी ।
कृत्वा प्रणम्रां वदति स्म सा तान् भक्तेयमर्हत्यधुनानुकम्पाम्॥३९

अञ्चतेः क्विन्प्रत्ययः विष्वग्देवयोश्च देवद्र्यञ्चतावप्रत्यय इति टेरद्र्यादेशः अञ्चतेश्चोपसङ्ख्यानमिति ङीप्। सा न भवन्तीमित्यदेवद्रीचीं तान् देवाननभिगच्छन्तीमित्यर्थः विचिन्त्य विचार्य्य स्मितेन सिक्ते सृक्कणी ओष्ठप्रान्तौ यस्याः सा सती प्रान्तावोष्ठस्य सृक्कणीत्यमरः। शशाङ्कादधिक सुत्कृष्टमास्यविम्बं मुखस्वरूपं यस्यास्तस्याः सम्बुद्धिः सापेक्षत्वेऽपि गमकत्वात् समासः। मयि स्थिते ते तव का शङ्का अविश्वासः न काचिदित्यर्थः इति तां भैमीं भृशमाह स्म उवाच लट् स्म इति भूते लट् ब्रुवः पञ्चानामित्यादिना णलाहादेशः ॥ ३७ ॥

एषामिति। हे वत्से ! एषामिन्द्रादीनां चरणप्रणाममकृत्वा येषा मनुज्ञां सम्यक् भवत्यनिश मनवाप्य अनाकर्ण्य सुपर्ववैरे देवताद्वेषे सति तव वीरसेनस्यापत्यं वैरसेनिं नलम् अत इञ्। वरीतुं वृतो वेति यिकत्वादिटो दीर्घः। इयमीहा स्पृहा कथमौचिती औचित्यं न कथञ्चिदित्यर्थः॥ ३८ ॥

दूतीति। सा देवी दूतीरिते सति विश्वसितां तां प्रतीतां भैमीं पुनर्भूयः पाणौ हस्ते आदाय तत्पाणिं गृहीत्वेत्यर्थः। दिविषत्सु देवेषु विषये प्रणम्रां प्रणतां तानिन्द्रादिदेवान् वदति स्म उक्तवती लट् स्म इति भूते लट्। किमिति भक्ता युष्मद्भक्ता इयं दमयन्ती अधुना इदानीम् अनुकम्पां भवत्कृपाम् अर्हति त्वद्वरणाशां विहाय नलवरणार्थं मनुग्रहं कुरुतेतिभावः ॥ ३९ ॥

युष्मान् वृणीते न बहून् सतीयं शेषावमानाच्च भवत्सु नैकम्।
तद्वः समेतं नृपमंशमेनं वरीतुमन्विच्छति लोकपालाः! ॥४०॥
भैम्याः स्रजः सञ्जनया पथि प्राक् स्वयम्वरं सम्वरयांवभूव।
सम्भोगमालिङ्गनयास्य वेधाः शेषन्तु कं हन्तुमियद्यतध्वम् ॥४१॥
वर्णाश्रमाचारपथात् प्रजाभिः स्वाभिः रुद्धैवास्खलते नलाय।
प्रसेदुषो वेदघट्टत्तभङ्ग्या दिशैव कीर्त्तेर्भुवमानयद्वः ॥ ४२ ॥

युष्मानिति। हे लोकपालाः! सती साध्वी इयं भैमी युष्मान् बहून्न वृणीते पातिव्रत्यभङ्गादितिभावः। शेषाणामवशिष्टानामवमानादवमानप्रसङ्गाद्भवत्सु मध्ये एकञ्च न वृणीते तत्तस्माद्वो युष्माकं सम्बन्धिनं समेतं मिलितमंशं सर्वांशसमष्टिरूपम् अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृप इति भावः। एनं नृपं वरीतुम् अन्विच्छति सर्वावरणैकवरणोक्तदोषानवकाशादितिभावः॥ ४० ॥

किञ्च भैम्या नलवरणसम्भोगौ तत्र प्रागेव ब्रह्मणैव निवर्तितौ किमपरमवशिष्यते यद्विघातार्थमयं वः प्रयास इत्याह भैम्या इति। किञ्च वेधाः स्रष्टैव प्राग्युष्मद्दूत्यानुसन्धानकाले पथि अन्तःपुरमार्गे स्रजःसञ्जनया कण्ठे योजनया ण्यासश्रन्थो युच्। भैम्याः स्वयम्वरं नलवरणं सम्वरयांवभूव निवर्तयामास तथा आलिङ्गनया आश्लेषणया पूर्ववद्युच्। सम्भोगं सम्वरयांवभूव एतच्चोभयं षष्ठसर्गे प्रसूप्रसादाधिगता मनोन्यमन्यत्रवदित्यत्र च श्लोकद्वयोक्तरीत्यनुसन्धेयं। शेषमितोऽवशिष्टन्तु अथ शेषं त्रिष्वन्यस्मिन् उपयुक्ततमामच्चता दिवाने स्त्री ना नागेशप्रधानयोरिति वैजयन्ती। कं हन्तुं वियोक्तुं इयदेतावद्यथा तथा यतध्वं प्रयतति सम्प्रश्ने लोट्। ब्रह्मसृष्टेरलङ्घ्यत्वाद्वृथा वः प्रयास इति भावः॥ ४१ ॥

यद्वा किमेषु दोषग्रहणेन येनेत्थमुपालभ्यन्ते किन्तु गुणग्रहणे नैव तान् प्रसादयामीत्याशयेनाह वर्णेति। वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्य्यादीनाम् आचारपथात् वृत्तमार्गात् स्वाभिः स्वकी-

इति स्मितेऽस्या वचने च हास्यात् कृत्वा नलस्याधरमास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञेष्वेतेषु तां साथ नलाय निन्ये ॥४३॥
मन्दाक्षनिस्पन्दतनोर्मनोभूर्दुष्प्रेरमप्यानयति स्म तस्याः ।
मधूकमालामधुरं करं सा कण्ठोपकण्ठं वसुधासुधांशोः ॥४४॥
अथाभिलिख्येव समर्प्यमाणां राजिं निजस्वीकरणाक्षराणाम् ।
दूर्वाङ्कुराढ्यां नलकण्ठनाले वधूर्मधूकस्रजमुत्ससर्ज ॥ ४५ ॥

याभिः प्रजाभिः सह अस्खलते अचलते नलाय प्रसेदुषः प्रसन्नान् भाषायां सदवसश्रुव इति सदेः क्वसुरादेशः । वो युष्मानीदृश्या दूत्यकृत्यदृष्ट्या वृत्तभङ्ग्या चरित्रवैचित्र्या तद्व्याजेनेत्यर्थः स्त्रियाः पुंवदित्यादि पुंवद्भावः । कीर्तिं दित्सा नलाय दातुमिच्छैव कर्त्री ददातेः सनि मीमेत्यादिना इसादेशेऽभ्यासलोपः । अप्रत्यया इत्यकारप्रत्ययेऽट् । शुवमान यद्वा अतो नीतवती किं नीवह्योरित्यादिना नयते द्विकर्मकता नलस्य कीर्तिम् अलङ्कर्तुमयं वः प्रयासो ननु भैमीं पीडयितुमित्यर्थः ॥ ४२ ॥

इतीति । किञ्चेतिचार्थः इतीत्थम्भूते अस्या देव्या वचने श्रुते सति हास्याद्वचनाद्धेतोरास्यबिम्बं नलस्याधरं चलदोष्ठं कृत्वा एतेषु देवेषु भ्रूविभ्रमेण भ्रूचेष्टयैवाकूतेनाकपटभावेन कृता अभ्यनुज्ञा यैस्तेषु सत्सु अथानुज्ञानन्तरं सा देवी तां भैमीं नलाय निन्ये नलसमीपं निनायेत्यर्थः क्रियाग्रहणाच्चतुर्थी ॥ ४३ ॥

मन्दाक्षेति । सा सरस्वती मन्दाक्षनिष्पन्दतनो र्लज्जानिश्चलाङ्ग्यास्तस्या भैम्या मनोभुवा कामेनापि दुष्प्रेरं प्रेरयितुमशक्यं मधूकमालया मधुरं रम्यं करं वसुधासुधांशोर्भूचन्द्रस्य नलस्य कण्ठोपकण्ठं कण्ठसमीपमानयति स्म तदास्याः स्मरादपि लज्जा बलीयसीति भावः ॥४४॥

अथेति । अथ वधूः कन्या भैमी अभिलिख्य लिखित्वा समर्प्यमाणां निजस्यात्मीयस्य यत् स्वीकरणं तस्याक्षराणां तद्वाचकवर्णानां राजिं मालामिव दूर्वाङ्कुराढ्यां तद्भूयिष्ठां मधूकस्रजं मधूकद्रुम-

तां दूर्वया श्यामरुयातिवेलं शृङ्गारभासन्निभया सशोभाम् ।
मालां प्रसूनायुधपाशभासं कण्ठेन भुभृद्विभरांबभूव ॥ ४६ ॥
दूर्वाग्रजाग्रत्पुलकावलिं तां नलाङ्गसङ्गाद्भृशमुल्लसन्तीम् ।
मानेन मन्ये नमितानना सा सासूयमालोकत पुष्पमालाम् ॥ ४७ ॥
सा निर्म्मले तस्य मधूकमाला हृदि स्थिता च प्रतिबिम्बिता च ।
कियत्यमग्ना कियती च मग्ना पुष्पेषुबाणालिरिव व्यलोकि ॥ ४८ ॥

कुसुममालाम् अथ मधूकं गुडपुष्पमधुद्रुमावित्यमरः । नलकण्ठनाले उत्ससर्ज मुमोच ॥ ४५ ॥

तामिति । अतिवेलं भृशं श्यामलया अतएव शृङ्गारभाससन्निभया शृङ्गाररसप्रभासदृश्या दूर्वया सशोभां शोभमानां प्रसूनायुधस्य कुसुमास्त्रस्य यः पाशः पाशायुधं तस्येव भा यस्या स्तां मालां भूभृन्नलः कण्ठेन विभरां बभूव भीह्रीभृहुवां भुवच्चेति विकल्प दाम् प्रत्ययस्य भवद्भावाद्द्विर्भावः लङन्ताश्च प्रयुज्यन्ते लिटीति भुवोऽनुप्रयोगः ॥ ४६ ॥

दूर्वाग्रेति । सा भैमी दूर्वाग्राण्येव जाग्रती पुलकावलिर्यस्या स्तां नलाङ्गसङ्गाद्भृशमत्यर्थं मुल्लसन्तीम् आभरणस्याप्याभरणत्वात् तदङ्गसङ्गस्येतिभावः । तां पुष्पमालां मानेन साफल्यरूपेण नमितानना सती सा सासूय मालोकतेति मन्ये अत्र दूर्वाग्रेत्यादि प्रस्तुतमालाविशेषणसाम्यादप्रस्तुतसपत्नीप्रतीतेः समासोक्तिः तदुपजीवनेन लज्जाहेतुकनलाननालोकने मानकृतासूयाहेतुकत्वोत्प्रेक्षणादनयो रङ्गाङ्गिभावेन सङ्करः ॥ ४७ ॥

सेति । तस्य नलस्य निर्मले स्वच्छे हृदि वक्षसि स्थिता बहिरवस्थिता चलन्ती प्रतिबिम्बिता च सा मधूकमाला कियती खला अमग्ना कियती मग्ना अन्तः प्रविष्टा च अर्धमग्ना चेत्यर्थः पुष्पेषोः कामस्य बाणावलिरिव व्यलोकीत्युत्प्रेक्षा ॥ ४८ ॥

कापि प्रमोदास्फुटनिर्जिहानवर्णैव या मङ्गलगीतिरासाम् ।
सैवाननेभ्यः पुरसुन्दरीणामुच्चैरुलूलुध्वनिरुच्चचार ॥ ४९ ॥
रोमाणि सर्वाण्यपि बालभावाद्वरश्रियं वीक्षितुमुत्सुकानि ।
तस्यास्तदा कण्टकिताङ्गयष्टेरुद्ग्रीविकादानमिवान्वभूवन् ॥५०॥
रोमाङ्कुरैर्दन्तुरिताखिलाङ्गी रम्याधरा सा सुतरां विरेजे ।
शरव्यदण्डैः श्रितमण्डनश्रीः स्मारी शरोपासनवेदिकेव ॥५१॥

कापीति । प्रमोदेन हर्षातिरेकेणास्फुटं यथा तथा निर्जिहाना निर्गच्छन्तो वर्णा यस्याः सैव हर्षपारवश्यादस्फुटाक्षरैव निर्गच्छन्तीत्यर्थः । काप्यपूर्वा पुरसुन्दरीणां या मङ्गलगीतिः सैव अस्फुटाक्षरा मङ्गलगीतिरेवासामाननेभ्यः उलूलुध्वनिः सन्नुच्चैस्तार मुच्चचार उत्थितः अनुकारिशब्दोऽयम् उलूलुरित्येवं रूपः कश्चिद्धर्षणात्मको मुखोच्चार्यो ध्वनिविशेष उत्सवादौ स्त्रीभिरुच्चार्य्यत इत्युदीच्यानामाचारः । तथाच पुरसुन्दरीणां यत्तु धार्मिकमङ्गले गानं तदेव हर्षपारवश्यादस्फुटाक्षरत्वात् उलूलुध्वनिकल्पमभूदित्यर्थः ॥ ४९ ॥

अथास्यास्त्रिभिः पुलकोदयमाह रोमाणीत्यादि । तदा तत्काले कण्टकिताङ्गयष्टेः पुलकिताङ्गयष्टेः तस्या भैम्याः सर्वाण्यपि रोमाणि बालभावात्कचत्वात् बवयोरभेदेन शिशुत्वाच्च बालः कचे शिशौ मूर्खे इति विश्वः । वरस्य वोढुर्नलस्य श्रियं वीक्षितुमुत्सुकानि सन्ति उद्ग्रीविका उन्नमितग्रीवीकरणं ग्रीवोन्नमनमिति यावत् उद्ग्रीवयते तत्करोतीति ण्यन्ताद्भावार्थनिर्देशेऽपि ल्यत्प्रत्ययः । तस्या आदानं स्वीकारमन्वभूवन्निवेत्युत्प्रेक्षा बाला ह्युद्ग्रीवा भृशं पश्यन्तीतिभावः ॥ ५० ॥

रोमाङ्कुरैरिति । रोमाङ्कुरैः पुलकैर्दन्तुरितं विषमितमखिलाङ्गं यस्याः सा रम्यौ अधरोष्ठौ अन्यत्राधोभागश्च यस्याः सा अधरे दन्तवनेऽनूर्ध्वेऽधरोऽन्यवदिति विश्वः । सा भैमी शरव्यदण्डैर्लक्ष्ययष्टिभिः श्रिता मण्डनश्रीः प्रसाधनश्रीः यस्याः सा । स्मरस्येयं स्मारी शरोपासनस्य

चेष्टा व्यनेशन्निखिलास्तदास्याः स्मरेषुपातैरिव ता विधूताः।
अभ्यर्थ्य नीताः कलिना मुहूर्त्तं लाभाय तस्या बहु चेष्टितं वा ॥५२॥
तन्न्यस्तमाल्यस्पृशि तस्य कण्ठे स्वेदं करे पञ्चशरश्चकार।
भविष्यदुद्वाहमहोत्सवस्य हस्तोदकं तज्जनयाम्बभूव ॥ ५३ ॥
तूलेन तस्यास्तुलना स्फुटोस्तत् कम्प्रास्तु सा मन्मथबाणपातैः।
चित्रीयितं तत्तु नलो यदुच्चैरभूत् स भूभृत् पृथुवेपथुस्तैः ॥५४॥

शराभ्यासस्य वेदिकेव सुतरां विरेजे शराभ्यासिनो व्याधप्रवणां निखातलक्ष्ययष्टिकां वेदीं कुर्वन्तीति प्रसिद्धम् ॥ ५१ ॥

चेष्टा इति। तदा तत्काले अस्या भैम्यास्ताः प्रागनुभूता निखिलाश्चेष्टाः कटाक्षवीक्षणाङ्गविक्षेपादयः स्मरस्येषुपातैर्बाणप्रहारैर्विधूतास्तिरस्कृता इवेत्युत्प्रेक्षा व्यनेशन् विनष्टाः नशेर्लुङि पुषादित्वादङ् नशोऽमन्तेन एत्वं वक्तव्यमित्येत्वं विनेशुरिति पाठे लिट्यनादेशादित्वादत एकहल्मध्येऽनादेशादेर्लिटीत्येत्वाभ्यासलोपौ। प्रकारान्तरेणोत्प्रेक्षते अथ वा तस्या भैम्या लाभाय स्वप्राप्तये बहु बहुविधं चेष्टितं विलसितं कलिना कलिपुरुषेणाभ्यर्थ्य मयि तिष्ठन्त्विति प्रार्थ्य मुहूर्तमीषत् कालं नीता वा दमयन्तीस्थायां पापिष्ठस्य कलेरप्यागमित्वात्तस्याः विकृतरूपस्य चतुरचेष्टाशून्यत्वाच्चेत्युत्प्रेक्षा। एतेनास्याः स्तम्भाख्यसात्त्विक उक्तः स्तम्भः स्यान्निष्क्रियाङ्गत्वमिति लक्षणात् ॥ ५२ ॥

अथ चतुर्भिर्नलस्यापि सात्त्विकोदयमाह। तया भैम्या न्यस्तं माल्यं स्पृशतीति तत्स्पृक् स्पृशोऽनुदके क्विप् वा। तस्मिन् तस्य कण्ठे करे च पञ्चशरः स्मरः स्वेदञ्चकार जनयामासेति यत् तत् भविष्यत उद्वाहमहोत्सवस्य सम्बन्धि हस्तोदकम् अर्घ्यजलं जनयां बभूवेत्युत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ५३ ॥

तूलेनेति। स्फुटो स्फुटद्वाः वोतोगुणवचनादिति विकल्पादनीकारः। तस्या भैम्यास्तूलेन कार्पासादिना तुलना साम्यं तत्तस्मात् सा भैमी मन्मथबाणपातैः कम्प्रा चला अस्तु किन्तूच्चैर्महान् भूभृद्राजा गिरिश्च भूभृद

दृशोरपि न्यस्तमिवास्त राज्ञां रागाद्दृगम्बु प्रतिबिम्बि माल्यम् ।
नृपस्य तत्पीतवतोरिवाक्ष्णोः प्रालम्बमालम्बत युक्तमन्तः ॥५५॥
स्तम्भस्तथालम्बितमां नलेन भैमीकरस्पर्शमुदः प्रभावः ।
कन्दर्पलक्ष्मीकरणार्पितस्य स्तम्भस्य दम्भं स चिरं यथाऽऽपत् ॥५६॥

भूमिधरे नृप इत्यमरः । स नलस्तैर्वाणपातैः पृथवेपथुः महाकम्पः ट्वितोऽथुच् । अभूदिति यत् तत्तु चित्रीयितं चित्रीकरणं नमो वरिवश्चित्रङः क्यच् । अस्यच्यादीतिकारः क्यजन्तत्वाद्भावे निष्ठा । अल्पयायुना तूलचलने किं चित्रं शैलचलनन्तु चित्रीयत इत्यर्थः । धीरो राजा नलोऽपि चलति भीरुर्भैमी चलतीति किं चित्रमितिभावः ॥ ५४ ॥

सात्त्विकानां सर्वरससाधारणत्वाद्राज्ञां रोषादश्रूत्पन्नत्वं नलस्य हर्षादित्येवं स्थिते तदाश्रित्योभयत्रोत्प्रेक्ष्यते दृशोरिति । राज्ञां रागात्मात्सर्याद्यद्दृगम्बु वाष्पः रागोऽनुरक्तौ मात्सर्ये इति विश्वः। सापेक्षत्वेऽपि गमकत्वात् समासः । तत्र प्रतिबिम्बते प्रतिफलतीति तत् प्रतिबिम्बि माल्यं सम्वरणस्रक् दृशो रक्ष्णोरपि न्यस्त मिवास्त स्थित मित्युत्प्रेक्षा । आसेर्लङ् । अपि सम्भावनायां यथोरसि तथा दृशोरपि न्यस्तं किमित्यर्थः नृपस्य नलस्य तु तन्माल्यं कर्तृ अनुरागोत्थाश्रुप्रतिबिम्बितम् अक्ष्णोः पीतवतोस्तृष्णया तन्माल्यङ्गिलतोरिव सतोः प्रालम्बं सत्प्रालम्बमृजुलम्बि स्यात्कण्ठादित्यमरः । अन्तर्मध्ये तथा प्रान्ते स्वीकारेऽपि च दृश्यत इति विश्वः । युक्तम् आलम्बत अवलम्बते स्म अत्रापि राज्ञां द्वेषादरुच्या तत् प्रतिबिम्बिमाल्ययुक्तमक्षिगतमेव कृत मित्युत्प्रेक्षा । नलस्य तु रागातिरेकादक्षिस्थं तत् तृष्णया पीत मित्युत्प्रेक्षितस्यैव बाह्यबिम्बमाल्याध्यवसायभेदेन मध्ये प्रालम्बितया लम्बन मित्युत्प्रेक्ष्यते ॥ ५५ ॥

स्तम्भ इति । नलेन भैमीकरस्पर्शेण या मुत् आनन्दः तस्याः प्रभावः तदनुभाव इत्यर्थः । स्तम्भो निष्क्रियाङ्गत्वलक्षणः सात्त्विक विशेषः सोऽपि तथा तेन प्रकारेणालम्बितमामतिशयेनालम्बि लम्बेः कर्मणि लुङ् । चिणि विभाषा चिण्णमुलोरिति विकल्पान्नुमागमः तिङ् घादा]

उत्सृज्य साम्राज्यमिवाथ भिक्षां तारुण्यमुल्लङ्घ्य जरामिवारात्।
तं चारुमाकारमुपेक्ष्य यातुं निजां तनूमादधिरे दिगिन्द्राः॥५७॥
मायानलत्वं त्यजतो निलीनैः पूर्वैरहंपूर्विकया मघोनः।
भीमोद्भवासात्विकभावशोभादिदृक्षयेवाविरभावि नेत्रैः ॥५८॥
गोत्रानुकूलप्रभवे विवाहे तत्प्रातिकूल्यादिव गोत्रशत्रुः।
पुरश्चकार प्रवरं वरं यमायन् सखायं ददृशे तया सः ॥५९॥

सुप्रत्ययः। यथा स नलः कन्दर्पस्य लक्षीकरणायार्पितस्य शराभ्यासकाले शरव्यत्वेन स्थापितस्य स्तम्भस्य स्थूणायाः स्थम्भस्थूणा जड़ीभावा वित्यमरः। दम्भं व्याजत्वं भावप्रधानो निर्देशः व्याज दम्भोपधय इत्यमरः। चिरमापत् प्रापत् ॥ ५६ ॥

उत्सृज्येति। अथ दिगिन्द्रा इन्द्रादिदिक्पाला यातुं गन्तुं सम्राजतीति सम्राट् महाराजविशेषः। येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरः। सत्सूद्विषेत्यादिना क्विप् मोराजसमः क्वाविति समो मकारस्य मकारान्नानुस्वारः। तस्य भावः कर्म वा साम्राज्यं तदुत्सृज्य भिक्षां याच्ञामिव तारुण्यं यौवन मुल्लङ्घ्य जरामिव आरात्समीपे तत्रैवेत्यर्थः तं कान्तं सुन्दरमाकारं नलरूप मुपेक्ष्य हित्वा निजां तनूमाकार मादधिरे स्वीचक्रुः ॥ ५७ ॥

मायेति। मायानलत्वं त्यजतो मघोन इन्द्रस्य निलीनैर्निगूढैः पूर्वैः प्राचीनैः नेत्रैः भीमोद्भवाया भैम्याः सात्विकभावानां शोभया दिदृक्षया द्रष्टुमिच्छयेवेति फलोत्प्रेक्षा द्योत्या आविर्भावफलत्वाच्छोभादर्शनस्य। अहं पूर्वोऽहं पूर्वइति योऽभिमानः क्रियायां साऽहंपूर्विका मयूरव्यंसकादित्वात् समासः। स्वार्थे मत्वर्थे वा ठच्प्रत्ययः। आविरभावि आविर्भूतं भावे लङ्। स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू। अश्रु वैस्वर्य्यमित्यष्टौ सात्विकाः परिकीर्त्तिताः ॥ ५८ ॥

गोत्रेति। गोत्रानुकूल्यप्रभवे कुलानुकूल्यप्रवृत्ते विवाहे गोत्रशत्रुर्गोत्रं कुलञ्चाचलश्च गोत्रं नाम्नि कुलेऽचले इति विश्वः। तच्छत्रुरिन्द्रः तत्प्राति-

स्वकामसम्मोहमहान्धकारनिर्वापमिच्छन्निव दीपिकाभिः।
उद्गत्वरीभिस्फुरितं वितेने निजं वपुर्वायुसखः शिखाभिः ॥६०॥
पत्यौ वृते भीमजया न वह्ना वह्ना स्वमङ्गाय निजुह्नुवे यः।
जनादपत्रप्य सहासहायस्तस्य प्रकाशोऽभवदप्रकाशः ॥ ६१ ॥
सदण्डमालक्तकनेत्रचण्डं तमःकिरं कायमधत्त कालः।
तत्कालमन्तःकरणं नृपाणामध्यासितुं कोप इवोपनम्रः ॥६२॥

कूल्यात् गोत्रशत्रुत्वादिव न हि यो यस्य शत्रुः स तदनुकूलकार्य्यं सहत इति भावः। एत आयन् स्वयम्बरार्थमागच्छन् इणोलटः शतरि णादेशः। प्रवरं श्रेष्ठं यं वरं वोढारमेव सखायं पुरश्चकार इत्येन सहायत्वेन स्वी चकारेत्यर्थः सएव तया ददृशे न सहस्राक्ष इत्यर्थः। केचित्तु प्रवरनामा कश्चिदिन्द्रेण सहायत्वेनानीत इति व्याचक्षते तत्तु अमूलं चिन्त्यं भारतादिष्वदर्शनादिति ॥ ५९ ॥

स्वेति। अथ वायुसखोऽग्निर्दीपिकाभिः दीपैः स्वः स्वीयः कामेन संमोहोऽज्ञानमेव महान्धकारस्तस्य निर्वापं प्रशान्ति मिच्छन्निव उद्गत्वरीभिरुद्गमनशीलाभिः गत्वरश्चेति करवन्तो निपातः। शिखाभिर्ज्वालाभिस्स्फुरितं व्याप्तं निजं वपुर्वितेने प्रकाशयामास ॥ ६० ॥

पत्याविति। यः प्रकाशः पत्यौ स्वामिनि वह्नौ भीमजया भैम्या न वृते अनादृते सति जनादपत्रप्य लज्जित्वा लज्जा शापत्रपान्यत इत्यमरः। जुगुप्साविरामप्रमदार्थाना मुपसङ्ख्यानात्पञ्चमी। अङ्गाय शीघ्र मङ्गाकरणेन स्वन्निजमात्मस्वरूपञ्च निजुह्नुवे अपह्नुतवान् अहनि वह्नेरप्रकाशादितिभावः ह्नुतेः कर्तरि लिट्। तस्य वह्नेः सहायोऽनुचरः सोऽप्रकाशोऽनुज्ज्वलोऽभवत् हा कष्टं प्रयासवैयर्थ्यादग्निरपत्रपय त्व निस्तेजा एवासीदित्यर्थः ॥ ६१ ॥

सदण्डमिति। अथ कालो यमस्तत्कालं तस्मिन् स्वयम्वरकाले अत्यन्तसंयोगे द्वितीया। नृपाणा मन्तःकरणमध्यासितु मधिष्ठातुम् उपनम्र

दृग्गोचरोऽभूदथ चित्रगुप्तः कायस्थ उच्चैर्गुण एतदीयः ।
ऊर्द्ध्वं तु पत्रस्य मषीद एको मषेर्द्दधच्चोपरि पत्रमन्यः ॥६३॥
तस्यां मनोबन्धविमोचनस्य कृतस्य तत्कालमिव प्रचेताः ।
पाशं दधानः करबद्धवासं विभुर्बभावाप्यमवाप्य देहम् ॥६४॥

उपागतः कोपः दमयन्त्यनादरोत्थक्रोध इव सदण्डं दण्डहस्तम् अलक्तके रक्ते तेन रक्तं रागादित्यण्प्रत्ययः । कषायौ गर्दभस्य कर्णाविति वदलक्तके इत्युपमानाप्रयोगः । ताभ्यां नेत्राभ्यां चण्डं क्रूरं किरतीति किरः इगुपधज्ञाप्रीकिरः कः । तमसः किरः तं तमःश्यामं कायं देहमधत्त कालोऽपि स्वरूपं प्रादर्शयदित्यर्थः ॥ ६२ ॥

दृगिति । अथ एतदीयः कालसम्बन्धि उच्चैर्महान् गुणः प्रधानं शेषभूतः चित्रगुप्तः चित्रगुप्ताख्यः कायस्थो लेखको जातिविशेषः दृग्गोचरो दृश्योऽभूत् लेखकः स्याल्लिपिकरः कायस्थोऽक्षरजीविक इति हलायुधः । अन्यत्र चित्रं यथा तथा पूर्वं निगूहितः कायस्थः कायनिष्ठ एतदीयः कालसम्बन्धि उच्चैर्महान् गुणो नीलगुणो दृग्गोचरोऽभूत् एकः चस्त्वर्थः चित्रगुप्तनीलगुणयोरेकश्चित्रगुप्तस्तु पत्रस्योर्ध्वमुपरितले मषिन्ददातीति मषीदः मषीमयलिपिकरो लेखक इत्यर्थः । अन्यश्च पूर्ववच्चार्थः अन्यो नील गुणस्तु मषेर्मषिद्रव्यस्योपरि कृदिकारादक्तिनो वेति ईकारविकल्पादुभयथा प्रयोगः । पत्रं पत्रालम्बनं दधत् दधानोऽभूत् मषितोऽपि कोऽयं नीलिमेत्यर्थः । नाभ्यस्ताच्छतुरिति नुमभावः । अत्र मषेरुपरि पत्रमिति प्रतीतेराभासीकरणाद्विरोधाभासोऽलङ्कारः ॥६३॥

तस्यामिति । तस्यां दमयन्त्यां विषये तस्मिन् काले तत्कालं नल वरणकाल इत्यर्थः । अत्यन्तसंयोगे द्वितीया । कृतस्य मनोबन्धविमोचनस्यैतत्प्रतियोगिसम्बन्धमिव स्थित मित्यर्थः उत्प्रेक्षा । करे बद्धवासं कृतस्थितिं करगतं पाशं बन्धनरज्जुं दधानो विभुः प्रभुः प्रचेताः वरुणः अपां विकारमाप्य मम्मय माप्यञ्चेति चान्द्रव्याकरणसूत्रात् साधुः । देहमवाप्य बभौ ॥ ६४ ॥

सहद्वितीयः स्त्रियमभ्युपेयादेवं स दुर्बुध्य नयोपदेशम् ।
अन्यां सभार्य्यः कथमृच्छतीति जलाधिपोऽभूदसहाय एव ॥६५॥
देव्यापि दिव्यां नु तनुः प्रकाशीचक्रे मुदश्चक्रभृतः सृजन्ती ।
अनिह्नुतैस्तामवधार्य चिह्नैस्तद्वाचि बाला शिथिलाङ्गुताऽभूत्॥६६
विलोकके नायकमेलकेऽस्मिन् रूपान्यथाकौतुकदर्शिभिस्तैः ।
बाधा वतेन्द्रादिभिरिन्द्रजालविद्याविदां वृत्तिवधाद्व्यधायि ॥६७

सहेति। जलाधिपोऽपाम्पतिः लडयोरभेदाज्जडाधिपः मूढाग्रणीश्च स वरुणः स्त्रियं कान्तामपि द्वितीयेन सह वर्तत इति सहद्वितीयः ससहाय एव तेन सहेति तुल्ययोग इति बहुव्रीहिः वोपसर्जनस्येति विकल्पान्न सहस्य स भावः। उपेयादित्येवं नयोपदेशं नीतिवाक्यम् अन्यां स्त्र्यन्तरं सभार्य्यः सस्त्रीकः सन् कथमृच्छति गच्छेदित्येवं दुर्बुध्य विपरीतं बुद्ध्वा समासात् क्त्वोल्यबादेशः असहाय एवाभूदस्त्रीक एवाभूदित्यर्थः। दमयन्ती लोभात्सर्वत्र ससहायएवोपेयादिति नीति मप्युल्लङ्घ्य सदारानादरे सम्प्रति सापि दुर्लभेत्यहो वरुणस्य दुर्बुद्धिरितिभावः॥ ६५॥

देव्येति। अथ देव्या सरस्वत्यापि चक्रभृतो गगनगतस्य विष्णोरपि मुदो हर्षान् सृजन्ती दिव्यां स्वतनुं प्रकाशीचक्रे मानुषीवेषमुत्सृज्य निजरूपमाविश्चकारेत्यर्थः। तदा बाला दमयन्ती अनिह्नुतैः प्रकाशितैः चिह्नैर्वीणाशुकपुस्तकादिभिः तां सरस्वतीमवधार्य्य सम्यङ् निर्वर्ण्य निश्चित्य तस्या वाचि वागुपन्यासे शिथिलाङ्गुता कियदेतस्या भगवत्या इति शिथिलितविश्वासाभूत्॥ ६६॥

विलोकक इति। विलोकके विलोकितवति अस्मिन् नायक मेलके पुरोवर्त्तिनीनां शुकमेलके राजसङ्घे रूपान्यथा रूपनानात्वं सैव कौतुकं विनोदस्तद्दर्शिभि स्तत्प्रदर्शकैः दर्शेर्ण्यन्तात्ताच्छील्ये णिनिः। तैरिन्द्रादिभिरिन्द्रजाल विद्याविदा मैन्द्रजालिकानां वृत्तिवधाज्जीवनोच्छेदाद्धेतोर्बाधा पीड़ा व्यधायि विहिता बतेति खेदे एतन्महेन्द्रजालाङ्गतावलोकिना

विलोक्य तावाप्तदुरापकामौ परस्परप्रेमरसाभिरामौ ।
अथ प्रभुः प्रीतमना बभाषे जाम्बूनदोर्वीधरसार्वभौमः ॥६८॥
वैदर्भि ! दत्तस्तव तावदेष वरो दुरापः पृथिवीश एव ।
दूत्यन्तु यत्त्वं कृतवानमायं नल ! प्रसादस्त्वयि तन्मयायम् ॥६९॥
प्रत्यक्षलक्ष्यामवलम्ब्य मूर्त्तिं हुतानि यज्ञेषु तवोपभोक्ष्ये ।
संशेरतेऽस्माभिरवीक्ष्य भुक्तं मखं हि मन्त्राधिकदेवभावे ॥७०॥

मिन्द्रजालान्तरेषु अरुच्या तदुपजीविनां तेषां वृत्तिविच्छेदः प्राप्त इत्यहो सेयं देवमायेतिभावः ।६७॥

विलोक्येति। अथ साक्षात्कारानन्तरं जाम्बूनदोर्वीधरस्य हेमाद्रिसम्बन्धि सर्व्वस्या भूमेरीश्वरः सार्वभौमः सर्वाध्यक्षः सर्वभूमिपृथिवीभ्यामणञ्चेत्यणप्रत्ययः अनुशतिकादीनां चेत्युभयपदवृद्धिः। प्रभुर्महेन्द्रः आप्तदुरापकामौ प्राप्तदुर्लभमनोरथौ परस्परप्रेमा अन्योन्यानुरागः स एव रसस्तेनाभिरामौ अन्यथा रसाभावादितिभावः। तौ दमयन्तीनलौ विलोक्य प्रीतमनाः सन्तुष्टान्तरङ्गः सन् बभाषे ॥ ६८ ॥

ता बभाषेत्युक्तं तत्र वैदर्भीं तावदाह वैदर्भीति। हे वैदर्भि! तव तावदेष पृथिवीशो नल एव दुरापो अस्मदनुग्रहं विना दुर्लभो वरो दत्तः प्रातिस्विकस्तावदेष वर उभयसाधारण्येव तु वरान्तरञ्च भविष्यतीतिभावः। नलञ्चाह हे नल! त्वं तु अमायमकपटं दूत्यं दूतकर्म दूतस्य भावः कर्मणीति यत्प्रत्ययः। कृतवानिति यत्तत्तस्मात्त्वयि विषये मया अयं वक्ष्यमाणः प्रसादो वरो दत्तः ॥ ६९ ॥

प्रत्यक्षेति। हे नल! तव यज्ञेषु प्रत्यक्षेण लक्ष्यां दृश्यां मूर्त्तिं विग्रहमवलम्ब्य इह हुतानि हवींष्युपभोक्ष्ये अनुभोक्ष्ये प्रोपाभ्यां भुजेरित्यात्मनेपदं। तथा हि अस्माभिर्भुक्तं मखं यज्ञमवीक्ष्य प्रत्यक्षेणादृष्ट्वा मन्त्राधिकदेवभावे शब्दातिरिक्तदेवसद्भावे संशेरते सन्दिहते चतुर्थ्यन्तशब्दो देवतेति मीमांसकाः। तत्सन्देहनिवृत्त्यर्थं ते विग्रहं दर्शयिष्यामीत्यर्थः ॥ ७० ॥

भवानपि त्वद्दयितापि शेषे सायुज्यमासादयतं शिवाभ्याम् ।
प्रेत्यास्मि कीदृक् भवितेति चिन्ता सन्तापमन्तस्तनुते हि जन्तोः ॥७१॥
तवोपवाराणसि नाम चिह्नं वासाय पारेऽसि पुरं पुरास्ते ।
निर्वातुमिच्छोरपि तत्र भैमीसम्भोगसङ्कोचभियाधिकाशि ॥७२॥
धूमावलिश्मश्रु ततः सुपर्वा मुखं मखास्वादविदां तमूचे ।
कामं मदीक्षामयकामधेनोः पयायतामभ्युदयस्त्वदीयः ॥७३॥

अथोभयसाधारणं वरमाह भवानिति । भवानपि त्वञ्च त्वद्दयितापि च ते च शेषे आयुरवसाने शिवा च शिवश्च ताभ्यां शिवाभ्यां पार्वतीपरमेश्वराभ्यां सह पुमांस्त्रियेत्येकशेषः । सयुजोभावः सायुज्यन्तादात्म्यम् आसादयतं प्राप्नुतम् आमुष्मिकफलोक्तौ कारणमाह प्रेत्य लोकान्तरं गत्वा कीदृग्भविता कीदृशो भविष्यामीति चिन्ता जन्तोरन्तरन्तरङ्गे सन्तापं तनुते तन्निवृत्त्यर्थेयमुक्तिरित्यर्थः ॥ ७१ ॥

तवेति । किञ्च तव वासाय निवासाय उपवाराणसि वाराणस्याः समीपे अव्ययं विभक्तीत्यादिना अव्ययीभावः । असिनाम नदी तस्याः पारे पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । नाम चिह्नं त्वन्नामाङ्कितं पुरं नलपुरं पुरास्ते आसिष्यते भविष्यतीत्यर्थः आस्ते भविष्यदर्थे यावत्पुरानिपातयोर्लट् । तत्पुरं निर्वातुं मोक्तुमिच्छोः मुमुक्षोरपि तव भैमीसम्भोगस्य सङ्कोचात् प्रतिबन्धाद्भिया अधिकाशि काश्यां न भविष्यति मुमुक्षुरपि त्वं यावज्जीवं भैम्या सह नलपुरे विहर अन्ते काश्यां शिवसायुज्यमाप्नुहीत्यर्थः ॥ ७२ ॥

धूमेति । तत इन्द्रवाक्यानन्तरं धूमावलिरेव श्मश्रूणि यस्य तत् मखास्वादविदां मखरसज्ञानां क्रतुरिह मुखं मुखभूतः सुपर्वा देवोऽग्निः अग्निमुखा वै देवा इति श्रुतेः । तं नलमूचे तदेवाह हे नल ! त्वदीयोऽभ्युदयो वृद्धिः मदीक्षामयी मद्दृष्टिरिव कामधेनुः तस्याः कामं पयायतां क्षीरायतां मत्कटाक्षमात्रेण ते सर्वार्थसिद्धिर्भविष्यतीत्यर्थः ।

या दाहपाकौपयिकी तनुर्मे भूयात् त्वदिच्छावशवर्त्तिनी सा।
तया पराभूततनोरनङ्गात् तस्याः प्रभुः सन्नधिकस्त्वमेधि ॥७४॥
अस्तु त्वया साधितमन्नमीनरसादि पीयूषरसातिशायि।
तद्भूय विद्मस्तव सूपकारक्रियासु कौतूहलशालि शीलम् ॥७५॥
वैवस्वतोऽपि स्वत एव देवस्तुष्टस्तमाचष्ट नराधिराजम्।
वरप्रदानाय तवावदानैश्चिरं मदीया रसनोद्गुरेयम् ॥७६॥

कर्तुः क्यङ् सलोपश्चेति पयःशब्दादाचारार्थे क्यङ् प्रत्ययो वैभाषिकः सलोपश्च ओजसोऽप्सरसो नित्यं पयसस्तु विभाषयेति वचनात् ॥७३॥

येति। दाहो भस्मीकरणं पाकस्तण्डुलविक्लेदनादि तयोः औपयिकी उपायभूता विनयादित्वात् स्वार्थे तकि ङीप् उपायाद्ध्रस्वत्वञ्च। ईदृशी या मे तनुः सा त्वदिच्छया वशवर्तिनी भूयात्। किञ्च त्वं तस्यास्तनोः प्रभुः स्वामी नियामकः सन् तया तन्वा पराभूततनोर्दग्धाङ्गात् किं स्मरहरभ्रष्टान्यतममूर्तित्वादस्या इति भावः। अनङ्गादधिक एधि भव न केवलं रूपादेवानङ्गोऽधिकः किन्तु तज्जेतु रङ्गैरपि नेतृत्वादिति भावः। अस्तेर्लोटि सिपि हेर्धिः घ्वसोरेत्यादित्वम् ॥ ७४ ॥

अस्त्विति। किञ्च हे भूप! त्वया साधितं पक्वम् अन्नं शाल्यादि मीनेति मांसोपलक्षणं तयोः रसः स्वादः आदिर्यस्य आदिशब्दाद्वीर्यविपाकादि तत्सर्वं पीयूषरसमस्तत्स्वाद मतिशेत इत्यतिशायि ततोऽप्युत्कृष्टमस्तु ईदृग्वरदाने कारणमाह तदिति तत्प्रसिद्धं तव शीलं स्वभावं सूपं सूपादिपाकं कुर्वन्तीति सूपकाराः सूदाः सूपकारास्तु वल्लवाः आरालिका आन्धसिकाः सूदा औदनिका गुणा इत्यमरः। कर्मण्यण्। तेषां क्रियासु पाकक्रियासु सुष्ठु पकारक्रियासु च कौतूहलेन शालत इति तच्छालि उत्सुकं विद्मः अतस्तवेयं सूपविद्या दत्तेत्यर्थः॥७५॥

वैवस्वत इति। देवो वैवस्वतो यमोऽपि स्वत एव अप्रार्थित एव तुष्टः सन् तं धराधिराजं नलम् आचष्ट अब्रवीत् तदेवाह हे नृप! तव अव-

सर्व्वाणि शस्त्राणि सहाङ्गचक्रैराविर्भवन्तु त्वयि शत्रुजैत्रे ।
अवाप्यमस्मादधिकं न किञ्चिज्जागर्त्ति वीरव्रतदीक्षितानाम्॥७७
कृच्छ्रङ्गतस्यापि दशाविपाकं धर्म्मान्न चेतः स्खलतात् तवेदम्।
अमुञ्चतः पुण्यमनन्यभक्तेः स्वहस्तवास्तव्य इव त्रिवर्गः ॥७८॥

दानैरद्भुतकर्मभिः इयं मदीया रसना चिरं चिरात्प्रभृति वरप्रदानाय ऊढा धूः वरदानभारो यया सा उद्धुरा उत्सुका ऋक्पूरित्यादिना समासान्तः ॥ ७६ ॥

सर्वाणीति। हे नल! सर्वाणि शस्त्राणि आयुधानि अङ्गचक्रैः स्वाङ्गकलापैः सह शत्रून् जेतर्य्येव जैत्रे जयशीले शत्रुजैत्रे जेतृशब्दात्ताच्छील्ये तृन्नन्तात् प्रज्ञादित्वात् स्वार्थेऽण् प्रत्ययः नलोकेत्यादिना षष्ठी प्रतिषेधात् कर्मणि द्वितीया योगविभागात् समस्यते। त्वयि विषये आविर्भवन्तु एतावता को लाभस्तत्राह वीरव्रतम् आहवेष्वनिवर्तित्वं तत्र दीक्षितानां कृतसङ्कल्पानां त्वादृशां शूराणां अस्मादस्त्रलाभादधिक मुत्कृष्टम् अवाप्यं लभ्यं किञ्चित् न जागर्ति न स्फुरति सामान्येन विशेषणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७७ ॥

कृच्छ्रमिति। किञ्च कृच्छ्रं कष्टं दशाविपाकम् अवस्थापरिणामं गतस्यापि दुर्दशापन्नस्यापि तवेदञ्चेतो धर्मात् न स्खलतात् न स्खलतु तोस्तातङादेशः। ततः किं तत्राह पुण्यं धर्मम् अमुञ्चतः अत्यजतः न विद्यते अन्यस्मिन् अधर्मे भक्तिर्य्यस्य तस्यानन्यभक्तेः अधर्मविमुखस्य त्रयाणां धर्मकामार्थानां वर्गः त्रिवर्गः त्रिवर्गो धर्मकामार्थैः सचतुर्वर्गः समोक्षकै रित्यमरः। स्वहस्ते वास्तव्यो वस्तेव हस्तस्थप्राय इवेत्यर्थः। वसेस्तव्यवत् कर्तरि णिच्च वक्तव्यम्। अत्र त्रिवर्गसिद्धिलक्षणकार्य्येण धर्मत्यागरूपकारण समर्थनात्कार्य्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः ॥७८॥

स्मितेति। अथ प्रसन्नचेताः प्रचेता वरुणः एनं नृपतिं नलं स्मिताञ्चितां मन्दहासमधुरां वाचमवोचत् तदेवाह अधुना ते तुभ्यं भैमीं

स्मिताञ्चितां वाचमवोचदेनं प्रसन्नचेता नृपतिं प्रचेताः ।
प्रदाय भैमीमधुना वरौ ते ददामि तद्यौतककौतुकेन ॥७९॥
यत्राभिलाषस्तव तत्र देशे नन्वस्तु धन्वन्यपि तूर्णमम्भः ।
आपो वहन्तीह हि लोकयात्रां यथा न भूतानि तथा पराणि८०
प्रसारितापः शुचिभानुनास्तु मरुः समुद्रत्वमपि प्रपद्य ।
भवन्मनस्कारलवोद्गमेन क्रमेलकानां निलयः पुरेव ॥ ८१ ॥

प्रदाय तस्मिन् प्रदाने यद्यौतकं युवयोर्वधूवरयोः देयं हरणीपराग.ख्यं युतकादिषु यद्देयं स दायो हरणं च तदित्यमरः। मङ् प्रत्ययः। तत्कौतुकेन तद्दानोत्कण्ठया वरौ वक्ष्यमाणौ ते ददामि यौतकत्वेन दास्यामीत्यर्थः ॥ ७९ ॥

तावेव वरावाह यत्रेत्यादि । ननु भो नल ! यत्र देशे तव वा अभिलाषो जलेच्छा तत्र धन्वनि मरुस्थलेऽपि समानौ मरुधन्वानावित्यमरः। तूर्णमाशु अर्णोऽम्भोऽस्तु उद्भवतु अस्य वरस्य श्लाघ्यतामाह इह लोके यथा आपो लोकस्य जनस्य यात्रां जीवनं गमने जीवने यात्रेति वैजयन्ती। वहन्ति प्रापयन्ति तथा अपराण्यन्यानि भूतानि पृथिव्यादीनि वहन्ति हि यदाह वाग्भटः। पानीयं प्राणिनां प्राणो विश्वमेतच्च तन्मयमिति। अतः श्लाघ्योऽयं वर इत्यर्थः ॥ ८० ॥

प्रसारितेति । किञ्च मरुर्निर्जलस्थलं भवतो मनस्कारः चित्ताभोगः सङ्कल्प इति यावत् अतः कृकमीत्यादिना सत्वं । तस्य लवो लेशस्तस्योद्गमे सतीति सप्तम्यन्तच्छेदः । नक्राणां जलजन्तुविशेषाणां मेला एव मेलकाः सङ्घास्तेषां निलयः तथा शुचिभानुना शुभ्रांशुना चन्द्रेण प्रसारिताः सम्वर्धिता आपो यस्य स प्रसारितापस्सन् ऋक्पूरित्यादिना समासान्तः। समुद्रत्वं प्रपद्यापि सम्प्रति भवन्मनस्कारलवोद्गमेनेति तृतीयान्तच्छेदः त्वदिच्छामात्रेणेत्यर्थः । क्रमेलकाणा मुष्ट्राणां निलयः सन् उष्ट्रा मरुप्रिया इति प्रसिद्धिः । तथा शुचिभानुना ग्रीष्मसूर्य्येण शुचिरित्युष्णौ

अम्लानिरामोदभरश्च दिव्यः पुष्पेषु भूयाद्भवदङ्गसङ्गात् ।
दृष्टं प्रसूनोपमया मयान्यत्न धर्म्मशर्म्मोभयकर्म्मठं यत् ॥ ८२ ॥
वाग्देवतापि स्मितपूर्व्वमुर्व्वीसुपर्व्वराजं रभसाद्बभाषे ।
त्वत्प्रेयसीसम्मदमाचरन्त्या मत्तो न किञ्चिद्ग्रहणोचितं ते ॥ ८३ ॥
अर्थी विनैवार्थनयोपसीदन्नाल्पोऽपि धीरैरवधीरणीयः ।
मान्येन मन्ये विधिना वितीर्णः स प्रीतिदायो बहु मन्तुमर्हः ॥ ८४

र्याम्भो जडत्वकेऽपि स्यादिति विश्वः । प्रसारितापोऽपसारितोदकः सन् पुरेवास्तु पूर्ववन्निर्जल एवास्त्वित्यर्थः ॥ ८१ ॥

द्वितीयं वरमाह अम्लानिरिति । हे नल ! भवतोऽङ्गसङ्गात्करस्पर्शादेव पुष्पेष्वम्लानिरम्लानता दिव्य आमोदभरः सौरभ्यसम्पच्च भूयात् अस्य वरस्य श्लाघ्यतामाह यद्यस्मात् प्रसूनोपमया पुष्पसाम्येन धर्मशर्मणोः सुकृतसुखयोरुभयस्मिन्द्वये कर्मठं कर्मणि घटं कर्मक्षममित्यर्थः । कर्मशूरस्तु कर्मठ इत्यमरः । कर्मणि घटोऽजिति ठच्प्रत्ययः । अन्यन्मया न दृष्टं सुरार्चनस्वोपभोगाभ्यामिहामुत्र चोपयोगाच्छ्लाघ्योऽयं वर इत्यर्थः ॥ ८२ ॥

वागिति । वाग्देवतापि स्मितपूर्वं यथा तथा उर्वीसुपर्वराजं भूदेवेन्द्रं नलं रभसाद्धर्षात् बभाषे रभसो वेगहर्षयोरिति विश्वः । अथ स्वाप्तत्वोक्तिपूर्वकं स्वदेयस्य वरस्यापरिहार्यत्वं तावत्सार्धश्लोकेनाह त्वदिति त्वत्प्रेयस्या दमयन्त्याः सम्मदं हर्षं त्वद्वरणरूपं प्रियमित्यर्थः । प्रेमसम्मदौ हर्ष इति निपातः। आचरन्त्या कुर्वन्त्या अत एव मत्तो मत् स्वस्माद्विभक्तौ पञ्चम्यर्थे तसिल्प्रत्ययः । ग्रहणोचितमाप्तत्वेन स्वीकारार्हं ते तव किञ्चित् स्थानान्तरं नास्ति अतो मद्वाक्यं ग्राह्यमित्यर्थः ॥ ८३ ॥

अर्थ इति । किञ्च अर्थनया याच्ञादैन्येन विनोपसीदन्नुपगच्छन्नल्पोऽप्यर्थी हितार्थी धीरैः प्रेक्षावद्भिः अवधीरणीयः उपेक्ष्यो न प्रत्युत मान्येन पूज्येन विधिनैव ब्रह्मणैव वितीर्णो दत्तः दीयत इति दायः कर्मणि

अवामा वामार्द्धे सकलमुभयाकारघटनाद्-
द्विधा भूतं रूपं भगवदभिधेयं भवति यत्।
तदन्तर्मन्त्रं मे स्मर हरमयं सेन्दुममलं
निराकारं शश्वज्जप नरपते! सिध्यतु स ते॥ ८५॥

घञ्प्रत्ययः। अतो युक् चिण्कृतोरिति युगागमः। प्रीत्या दायः प्रीतिदानरूपः अधिक इत्येव मन्तुमर्हः मन्ये मन्तव्य इत्यर्थः॥ ८४॥

अथ परस्वरूपमेव पञ्चभिः प्रपञ्चेनाह अवामेत्यादि। हे नरपते! नरेन्द्र! अर्द्धे एकभागे अवामा अस्त्री पुमानित्यर्थः। पुनरर्द्धभागान्तरे वामा स्त्री अत एव द्विधाभूतं स्त्रीपुंसात्मकम् उभयाकारघटनादुभयोराकारयोर्मेलनात्सकलं सम्पूर्णं भगवदभिधेयं भगवच्छब्दवाच्यं च यद्रूपं भवति विद्यते मन्त्रं मन्त्रात्मकं तद्गोप्यं वा हरमयमीश्वरात्मकं सेन्दुमिन्दुकलासमेतम् अमलं निर्मलं निराकारं परमार्थतो निरंशन्मे रूपं स्वरूपम् अन्तरन्तःकरणे स्मर चिन्तय शश्वज्जप मन्त्रात्मकत्वाज्जपरूपेण चोपास्स्व स मन्त्रमूर्तिर्भगवानर्धनारीश्वरस्ते तव सिध्यतु प्रसीदतु फलत्वित्यर्थः। मन्त्रपक्षेतु वा ॐकारेण सामकारेण प्रणवेन वा सार्धे तथा अवामार्द्धे वोपलक्षितम् एव सुभयाकारघटना दुभयाभ्यामाकाराभ्यां प्रणवस्वरूपाभ्यां घटनात्सम्पुटीकरणात् द्विधा भूतं द्व्याकारं सकलं समग्रं यद्रूपं भवति यत्स्वरूपं निष्पद्यत इति यत्तदेव हरमयं हकाररेफात्मकं तथा ई च इन्दुश्च ताभ्यामीन्दुभ्यां सह वर्तत इति सेन्दु तुरीयस्वरविन्दुसहितं अमलं निर्दोषं निराकारममूर्तिं मे मदीयं मन्त्रं प्रणवद्वयसम्पुटितं हृल्लेखात्मकं सारस्वतचिन्तामणिमन्त्रमित्यर्थः। तदुक्तं पारमेश्वरे, उद्धारस्तु परोक्षेण परोक्षप्रियताश्रुतेः। सान्तोष्टावङ्कसंयुक्तो ब्रह्मद्वितयमन्तरा। तुरीयस्वरशीतांशुरेखोङ्कारसमन्वितः। एष चिन्तामणिर्नाम मन्त्रः सर्वार्थसाधकः। जगन्मातुः सरस्वत्या रहस्यं परमं मतमिति ब्रह्मद्वितय मन्तरा प्रणवद्वितयमध्य इत्यर्थः। अन्तरित्यादि पूर्ववत्।

सर्व्वाङ्गीणरसामृतस्तिमितया वाचा स वाचस्पतिः
स स्वर्गीयमृगीदृशामपि वशीकाराय मारायते ।
यस्मै यः स्पृहयत्यनेन स तदेवाप्नोति किं भूयसा
येनायं हृदये कृतः सुकृतिना मन्मन्त्रचिन्तामणिः ॥८६॥
पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारुहंसेन मां चे-
न्निर्यान्तीं मन्त्रमूर्त्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः।

यन्त्रपक्षे भगवद्योनीव दृश्यं यद्रूपं त्रिकोणाख्यम् उभयाकारघटनात् त्रिकोणद्वयमेलनात् षट्कोणं भवति तस्य षट्कोणस्य मध्ये मन्त्रम् अनन्तरोक्तं नरपते इत्यादि पूर्ववत्। अत्र देवतामन्त्रयन्त्राणां त्रयाणामपि प्रकृतत्वात् केवलप्रकृतश्लेषोऽलङ्कारः। शिखरिणीवृत्तम् ॥ ८५ ॥

सम्प्रति श्लोकद्वयेन मन्त्रमाहात्म्यमाह सर्वाङ्गीणेत्यादि। येन सुकृतिना पुण्याधिकेनायं पूर्वोक्तो मन्मन्त्र एव चिन्तामणिः हृदये कृतोऽनुस्मृतः सोऽनुकृतः सर्वाङ्गीणेन सर्वाङ्गव्यापिना तत्सर्वादेरित्यादिना ख प्रत्ययः। रसः शृङ्गारादिः तेनैवामृतेन स्तिमितया भरितया वाचा वाग्वैदग्ध्येन स वाचस्पतिर्बृहस्पति स्तत्सदृशो भवतीत्यर्थः। कस्मात्पादलक्षो षष्ठ्याः पति पुत्रेत्यादिना विसर्जनीयस्य सत्वमिति स्वामी तन्न च्छन्दोविषयत्वादिति। स्वर्गे भवाः स्वर्गीया वा नामधेयस्येति वृद्धत्वाच्छप्रत्ययः। तासां स्वर्गीदृशां स्त्रीणां वशीकाराय वशीकरणाय मार इवाचरति मारायते न केवलं वाक्प्रदः स्त्रीवशीकरणश्चेत्यर्थः। यद्वा भूयसा बहुतरोक्तेन किं किन्तु यो यस्मै स्पृहयति यत्कामयते स्पृहेरीप्सित इति सम्प्रदानत्वाच्चतुर्थी, स कामी तत्सर्वमनेन मन्त्रेणाप्नोति एव यतोऽयं चिन्तामणिरिति भावः ॥ ८६ ॥

पुष्पैरिति। किञ्च हंसेन वाहनभूतेन चारु हस्यङ्निर्यान्तीं सञ्चरन्तीं मन्त्रमूर्तिं मन्त्ररूपां मां सुभगैर्मनोज्ञैः पुष्पैर्गन्धादिभिरादिशब्दाद्रूपाद्युपचारैरभ्यर्च्य मयि मतिं न्यस्य मनो निधाय मय्येव भक्तः सन्

सम्प्राप्ते वत्सरान्ते शिरसि करमसौ यस्य कस्यापि धत्ते
सोऽपि श्लोकाननकाण्डे रचयति रुचिरान्कौतुकं दृश्यमस्य ।

गुणानामास्थानीं नृपतिलक ! नारीतिविदितां
रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः ।
भवित्री वैदर्भीमधिकमधिकण्ठं रचयितुं
परीरम्भक्रीड़ाचरणशरणामन्वहमहम् ॥ ८८ ॥

जपति चेत्तर्हि वत्सरान्ते सम्प्राप्ते सत्यसौ जपिता यस्य कस्यानक्षरस्यापि शिरसि करं धत्ते निधत्ते सोऽनक्षरोऽप्यकाण्डे अकस्माद्रुचिरान् श्लोकान् रचयति अस्य मन्त्रस्यैतत्कौतुकमद्भुतं दृश्यं द्रष्टव्यम् ॥ ८७ ॥

अथ श्लोकद्वयेन नलं प्रत्युपयोगविशेषमाह गुणानामित्यादि। हे नृपतिलक ! नृपश्रेष्ठ ! गुणानां रूपलावण्यादीनां श्लेषप्रसादादीनाञ्चास्थानीमाधारभूताम् आस्थानी क्लीब आस्थानमित्यमरः । नारी उत्तमस्त्रीति विदितां विश्रुताम् अन्यत्र रीतिषु गौड़ीपाञ्चाल्यादिषु विदिता प्रसिद्धा सा न भवतीत्यरीतिर्विदितां नञ् समासः । सापि न भवतीति नारीतिविदितां नञर्थस्य नशब्दस्य सुप्सुपेति समासः । तां रीतिषु विदितामित्यर्थः । अन्तरन्तरङ्गे रसस्फीतां रागभृतां अन्यत्र शृङ्गारादिरसाढ्यां शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रस इत्यमरः । वैदर्भीं दमयन्तीं वैदर्भरीतिं च यथासङ्ख्यन्तव च तव वृत्ते चरित्रविषये कवितुर्वर्णयितुः कवेस्तु कवि वर्णन इति धातोस्तृच् । अधिकण्ठं कण्ठे विभक्त्यर्थेऽव्ययीभावः । परिरम्भक्रीड़ाचरणमालिङ्गनविनोदाचरणमेव शरणं प्राणत्राणं यस्या स्तां तदेकजीविता मन्वह मनुदिनं यथार्थेऽव्ययीभावः नपुंसकादन्यतरस्यामिति समासान्तष्टच् अह्नष्टखोरेवेति टिलोपः। अधिकमत्यर्थं रचयितुं कर्तुमहं भवित्री भविष्यामीत्यर्थः ॥ ८८ ॥

भवदिति । किञ्च हे नल ! भवतो वृत्तस्य चरित्रस्य स्तोतुः स्तावकस्य मया उपहृतकण्ठस्याधिष्ठितकण्ठस्य कवितुः कवेर्मुखात्

भवद्वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितु-
र्मुखात् पुण्यैः श्लोकैस्त्वयि घनमुदेयं जनमुदे ।
ततः पुण्यश्लोकः क्षितिभुवनलोकस्य भविता
भवानाख्यातः सन् कलिकलुषहारी हरिरिव ॥ ८९ ॥

देवी च ते च जगदुर्जगदुत्तमाङ्ग-
रत्नाय ते कथय कं वितराम कामम् ।
किञ्चित्त्वया न हि पतिव्रतया दुरापं
भस्मास्तु यस्तव बत व्रतलोपमिच्छुः ॥ ९० ॥

त्वयि विषये पुण्यैः पवित्रैः चारुभिर्वा पुण्यन्तुचाराव पीत्यमरः। श्लोकैः पद्यैः जनमुदे घनं निरन्तरम् उदेयम् उदेतव्यम् उदेयता मित्यर्थः। एतेः क्यपो यत्प्रत्ययः। ततः को मे लाभस्तत्राह तत इति ततः श्लोकोदयात् पुण्यश्लोकः पुण्यकीर्तिः भवानाख्यातः कीर्तितः सन् हरिर्जनार्दन इव क्षितिभुवनलोकस्य भूलोकस्य कलिकलुषहारी कलिकालकल्मषनाशनो भविता भविष्यति भवतेर्लुटि शेषे प्रथमः अत्राहुः। पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः। पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः॥ कर्कोटकस्य नागस्य दमयन्त्या नलस्य च। ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनं मिति ॥ ८९ ॥

अथ ते सर्वे दमयन्तीं प्रत्याहुः देवीति। देवी सरस्वती च ते देवाश्च जगदुः जगदुत्तमाङ्गरत्नाय त्रैलोक्यशिरोमणये उत्तमाङ्गं शिरः शीर्ष मित्यमरः। ते तुभ्यं कङ्काम्यत इति काममीप्सितं कर्मणि घञ्। वितराम प्रयच्छाम सम्प्रश्ने लोट्। कथय पत्यौ व्रतं नियमोऽस्खालित्व यस्यास्तया त्वया दुरापं दुष्प्रापं नास्ति पातिव्रत्यतेजसोऽप्रतिहतशक्तित्वादिति भावः। तथापि यः पापी तव पत्यौ व्रतमस्खालित्वं तस्य लोपं नाशमिच्छुः अभिलाषुकः विन्दुरिच्छुरित्युप्रत्ययान्तो निपातः न लोकेत्यादिना

कूटकायमपहाय नो वपु-
र्बिभ्रतस्त्वमसि वीक्ष्य विस्मिता।
आप्तुमाकृतिमतो मनीषितां
विद्यया हृदि तवाप्युदीयताम् ॥ ९१ ॥
इत्थं वितीर्य्य वरमम्बरमाश्रयत्सु
तेषु क्षणादुदलसद्विपुलः प्रणादः।
उत्तिष्ठतां परिजनालपनैर्नृपाणां
स्वर्वासिवृन्दहतदुन्दुभिनादसान्द्रः ॥ ९२ ॥

षष्ठी प्रतिषेधात्कर्म्मणि द्वितीया। स पापी भस्मास्तु तथाचास्मद्वरप्रसादादेव तत्प्रतीकारात्तव ततो व्ययो न भविष्यतीति भावः। एतच्चोत्तरत्र वनवासे अजगरग्रस्तां दमयन्ती मजगरादुन्मोच्य पुन स्तां कामयमानस्य पापिष्ठस्य व्याधस्य वधे फलिष्यतीति भारती कथात्रानुसन्धेया ॥ ९० ॥

अथ वरान्तरञ्च कूटेति। कूटकायं कपटदेहं नलाकार मपहाय वपुर्निजविग्रहं बिभ्रतो बिभ्राणान्नोऽस्मान् वीक्ष्य त्वं विस्मिता विस्मयाविष्टा तेन तत्कामात्त्वमिति प्रतिभासीति भावः। अतो हेतोर्मनीषिता मभिलषिता माकृतिं शरीरमाप्तुं तवापि हृदि हृदये विद्यया कामरूपसम्पादकविद्यया उदीयता मुद्भूयताम् उत्पूर्वादिणो भावे लोट् ॥ ९१ ॥

इत्थमिति। तेषु देवेष्वित्थं वरं वितीर्य्य दत्त्वा अम्बर माकाश माश्रयत्सु सत्सु उत्तिष्ठता मासनेभ्यः उच्चलतां नृपाणां प्रणादो हर्षोत्थध्वनिः प्रणादस्तु शब्दः स्यादनुरागज इत्यमरः। परिजनानामालापनै राभाषणैर्विपुलः सन् तथा स्वर्वासिनां दिव्यजनानां वृन्देन हतानां ताड़ितानां दुन्दुभीनां नादेन सान्द्रो घनः सन् क्षणादुदलसदुत्थितः ॥ ९२ ॥

न दोषं विद्वेषादपि निरवकाशं गुणमये
वरेण प्राप्तास्ते न समरसमारम्भसदृशम् ।
जगुः पुण्यश्लोकं प्रति नृपतयः किन्तु विदधुः
स्वनिश्वासैर्भैमीहृदयमुदयन्निर्भरदयम् ॥ ९३ ॥

भूभृद्भिर्लम्भितासौ करुणरसनदीमूर्त्तिमद्देवतात्वम्
तातेनाभ्यर्थ्य योग्याः सपदि निजसखीर्दापयामास तेभ्यः ।
वैदर्भ्यास्तेऽप्यलाभात् कृतगमनमनःप्राणवाञ्छां निजघ्नुः
सख्याः संशिक्ष्य विद्यां सततधृतवयस्यानुकाराभिराभिः ॥ ९४॥

नेति। प्राप्ताः स्वयम्वरागताः ते नृपतयो गुणमये गुणैकनिलये नले निरवकाशं दोषं विद्वेषादपि द्वेषे सत्यपीत्यर्थः। न जगुः नोद्घाटयामासुः तादृशगुणसम्पत्तिरदोषता चास्येति भावः। किञ्च वरेण शचीदत्तेन हेतुना पुण्यश्लोकं नलं प्रति समरसमारम्भस्य युद्धोद्योगस्य सदृशमनुकूलञ्च किञ्चिच्च जगुः नोचुः गैशब्द इति धातोर्लिट्। सान्निध्ययोगात्किल तत्र शच्याः स्वयम्वरक्षोभकतामभाव इति भावः। किन्तु स्वनिश्वासैर्दुःखोत्थै। भैमीहृदयञ्चेतः उदयन्ती निर्भरा अतिमात्रा दया यस्य तत्तथाभूतं विदधुः तद्दुःखं विदधुश्चक्रुः स्वावरण दुःखितान्नृपान् दृष्ट्वा तद्दुःखपहरणेच्छुरासीदित्यर्थः॥ ९३ ॥

भूभृद्भिरिति। असौ दमयन्ती भूभृद्भिः भूपालैः करुणस्य रसनद्याः करुणस्य रसप्रवाहस्य मूर्तिमद्देवतात्व मधिदेवतात्व लम्भिता प्रापिता सती स्वदुःखेन दुःखाकृता सतीत्यर्थः। सपदि योग्या राजार्हा निजसखीस्तेभ्यो भूभृद्भ्यः सम्प्रदाने चतुर्थी। तेन पित्रा भीमेनाभ्यर्थ्य सम्प्रार्थ्य दापयामास ते भूभृतोऽपि वैदर्भ्या अलाभाद्धेतोः कृतं गमनं निष्क्रमणेच्छा यै स्तेषां मनः प्राणानां वाञ्छां निष्क्रमणेच्छाकर्माणि सख्या भैम्या आख्यातोपयोग इति अपादानत्वात्पञ्चमी। विद्यां कामरूपधारणविद्यामिन्द्राद्युक्तां संशिक्ष्याभ्यस्य सततं नित्यं धृतो वयस्यानुकारो भैमीसादृश्यं याभि

अहह सह मघोना श्रीप्रतिष्ठासमाने
निलयमभि नलेऽथ स्वप्रतिष्ठासमाने ।
अपतदमरभर्त्तुर्मूर्त्तिबद्धेव कीर्त्ति-
र्गलदलिमधुवाष्पा पुष्पवृष्टिर्नभस्तः ॥ ९५ ॥
स्वस्यामरैर्नृपतिमंशमसुं त्यजद्भि-
रंशच्छिदाकदनमेव तदाध्यगामि ।
उत्का स्म पश्यति निवृत्य निवृत्य यान्ती
वाग्देवतापि निजविभ्रमधाम भैमीम् ॥ ९६ ॥

स्ताभि राभिः सखीभिः साधनै र्निजघ्नुः अन्यथापि सद्योम्रियेरन्निति अहो दमयन्त्या दयालुत्व मौचित्यञ्चेति भावः ॥ ९४ ॥

अहहेति। अथेन्द्रप्रस्थानानन्तरं मघोना इन्द्रेण सह श्रीप्रतिष्ठया सम्पत्सीम्ना समाने सदृशे नले स्वन्निलयमभि शिविरं प्रति अभिर भाग इति लक्षणार्थे कर्मप्रवचनीयत्वात्तद्योगे द्वितीया। प्रतिष्ठासमाने प्रस्थातुमिच्छति सति प्रपूर्वात्तिष्ठतेः सनन्ताल्लटः शानजादेशः समव प्रविभ्य इत्यात्मने पदत्वात् पूर्ववत्सन इत्यात्मनेपद। गलन् स्रवन् अलिमधु युक्तमकरन्द एव वाष्पोऽश्रु यस्याः सा साञ्जनवाष्प युक्तेत्यर्थः। मूर्तिबद्धा बद्ध मूर्ति र्मूर्तिमतीत्यर्थः वाहिताग्न्यादिष्विति निष्ठायाः पर निपातः। अमरभर्तुरिन्द्रस्य कीर्तिरिव पुष्पवृष्टिर्नभस्तो नभसः पञ्चम्यास्तसिल्। अपतत् पतिता अहहेत्यद्भुते स्वामिदुर्व्यसनदुःखाद्भ्रश्यतीति कीर्तिरिव स्थितेत्युत्प्रेक्षा ॥ ९५ ॥

स्वस्येति। स्वस्यात्मनोऽंशम् अंशसम्भवं तम् अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृप इति स्मरणात्। असुं नृपतिं नलं त्यजद्भिरमरै रिन्द्रादिभिरंशच्छिदा अवयवच्छेदः षिद्भिदादिभ्योऽङ्। तया यत्कदनं दुःखं तदेव तदाध्यगामि अधिगतं स्वान्तोद्भूतजनवियोगः स्वावयवच्छेदादुद्दहतीति भावः। किञ्च वाग्देवता सरस्वती अपि निज सात्मीयं विभ्रमधाम विहारभवनं यान्ती उत्का उन्मना उत्सुका सती

सानन्दं तनुजाविवाहनमहे भीमः स भूमीपति-
र्वैदर्भीनिषधाधिपौ नृपजनानिष्टोक्तिसंसृष्टये ।
स्वानि स्वानि धराधिपाश्च शिविराण्युद्दिश्य यान्तः क्रमा-
देको द्वौ बहवश्चकार सृजतः स्मातेनिरे मङ्गलम् ॥ ९७ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम् ।
यातस्तस्य चतुर्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ ९८ ॥

उत्क उन्मना इति निपातः। भैमीं निवृत्य निवृत्य पुनः पुनः परावृत्य पश्यति स्म सम्बन्ते भृशमरतिं सुहृद्वियोग इति भावः ॥ ९६ ॥

सानन्दमिति। तत्र तस्मिन् तनयाया दुहितुः दमयन्त्या विवाहनं परिणयनं विपूर्वाद्वहतेर्ण्यन्ताद्भावे ल्युट्। तदेव महः उत्सवः तस्मिन् स भीमो भूमीपतिर्भूपतिस्तथा वैदर्भीनिषधेश्वरौ दमयन्तीनलौ तथा स्वानि स्वानि शिविराण्युद्दिश्य यान्तो धराधिपा एको द्वौ बहव एते त्रितयेऽपि नृपाणां ये जनाः परिजनास्तेषां या अनिष्टोक्ति रश्लीलवाक्यानि तासां संसृष्टये स्वदोषपरिहाराय मङ्गलं नगरसंस्कारेष्ट देवतानुस्मरणतूर्य्य घोषादिमङ्गलाचरणं क्रमादेको भीमश्चकार द्वौ दमयन्तीनलौ सृजतः स्म कसृजतां चक्रतुरित्यातेनिरे बहवो धराधिपाश्चक्रुरित्यर्थ. क्रमालङ्कारः ॥ ९७ ॥

श्रीहर्षमिति। शरदिभवा शरदिजा सप्तम्यां जनेर्डः। प्राट्-शरत्काल दिवाञ्ज इति सप्तम्या अलुक्। सा च सा ज्योत्स्ना तद्वदच्छाः स्पष्टाः सूक्तयो यस्य तस्य स गतमन्यत् ॥ ९८ ॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां चतुर्दशः सर्गः ॥ १४ ॥

नैषधचरितम् ।

पञ्चदशः सर्गः ।

अथोपकार्य्यां निषधावनीपतिर्निजामयासीद्वरणस्रजान्वितः ।
वसूनि वर्षन् सुबहूनि वन्दिनां वशिष्य भैमीगुणकीर्त्तनाकृतां ।
तया पथि त्यागमयं वितीर्णवान् यथाऽतिभाराधिगमेन मागधैः ।
तृणीकृतं रत्ननिकायमुच्चकैश्चिकाय लोकश्चिरमुञ्छमुत्सुकः ॥२॥

अथेति। अथ स्वयम्बरविसर्गानन्तरं निषधावनीपतिर्नलः वरणस्रजान्वितः सन् वन्दिनां स्तुतिपाठकानां तत्रापि भैमीगुणकीर्त्तनां कुर्वन्तीति तत्कृतां तत्कारिणां क्विप्। विशिष्यातिशय्य बहूनि भूयिष्ठानि वसूनि धनानि वर्षन् निजामात्मीयामुपकार्य्याम् उपकारिकामयासीदगमत् यातेर्लुङि यमरमनमातां सक्चेति सगिटागमौ अस्ति सिचोव्यक्ते इतीडागमः ॥ १ ॥

तयेति। अयं नलः तथा तेन प्रकारेण पथि स्वनिवेशमार्गे त्यज्यत इति त्यागं धनं कर्मणि घञ्। वितीर्णवान् दत्तवान् यथा येन प्रकारेण अतिभारस्यातिगुरुत्वस्याधिगमेन प्राप्त्या मागधैर्वन्दिभिस्तृणीकृतं तृणवत्त्यक्तम् उच्चकैरुच्छ्रितं रत्नानां निकायं समूहं लोको जन उत्सुकः सन् चिरं बहुकालम् उञ्छञ्चिकाय उञ्छत्वेन सञ्चितवान् विभाषा चेति कुत्वम् उञ्छो धान्यत आदानं कटिकांशोर्जनं शीलमिति च यादवः ॥ २ ॥

त्रपास्य न स्यात्सदसि प्रियान्वयात्कुतोऽतिरूपः सुखभाजनं जनः।
अमूदृशी तत्कविवन्दिवर्णनैरपाकृता राजकरञ्जिलोकवाक् ॥३॥
अदोषतामेव सतां विवृण्वते द्विषां मृषादोषकणाधिरोपणाः ।
न जातु सत्ये सति दूषणे भवेदलीकमाधातुमवद्यमुद्यमः ॥४॥
विदर्भराजोऽपि समं तनूजया प्रविश्य हृष्यन्नवरोधमात्मनः ।
शशंस देवीमनुजातसंशयां प्रतीच्छ जामातरमुत्सुके नलम् ॥५॥

त्रपेति। अस्य नलस्य सदसि सभायां प्रियान्वयात्प्रियासमागमात् त्रपा अनुचितमाचरामीति लज्जादुःखं न स्यादिति काकुः-स्यादेवेत्यर्थः। तथा हि अतिरूपोऽतिमात्रसौन्दर्यो जनः कुतः कुत्र सुखभाजनं सुखास्पदम्भवेत् न कुत्रापीत्यर्थः। असाविव दृश्यत इति अमूदृशी एतादृशी उक्तरूपेत्यर्थः। अदःशब्दोपपदाद्दृशेस्त्यदादिषु दृशोऽनालोचने कङ् चेति कञ् टिड्ढाण इत्यादिना ङीप् आसर्वनाम्न इत्यात्वे अदसोऽसेर्दादुदोम इत्युत्वमत्वे। राजकं राजसमूहं रञ्जयतीति राजकरञ्जिनां तदिच्छानुकूलवादिनां लोकानां जनानां वाक् पूर्वोक्ता निन्दोक्तिः तस्य नलस्य कवीनां वन्दिनाञ्च वर्णनैः अहो निखिलं राजकमवधूय त्वया स्त्रीरत्नं लब्धं सर्वोत्तरोऽसीत्यादिस्तवैरपाकृता-न्यकृता वागवाकृतेति विरोधस्फुरणाद्विरोधाभासोऽलङ्कारः ॥३॥

अदोषतामिति। द्विषां सम्बन्धिन्य स्तत्कृता इत्यर्थः। मृषादोषकणाधिरोपणाः अलीकदोषलवारोपाः सतां सज्जनानाम् अदोषतां निर्दोषतामेव विवृण्वते प्रकाशयन्ति सूरे कलङ्कारोपणवदित्यर्थः। सदोषे दोषारोपणं दोषमेव प्रकाशयन्तीत्याशङ्क्याह नेति। जातु कदाचिदपि सत्ये दूषणे सति अलीक मसत्यम् अवद्यं दूषणम् अवद्यपण्येत्यादिना निपातः। आधातुम् आरोपयितुम् उद्यमः उद्योगो न भवेत् शशाङ्के कलङ्कारोपणवदितिभावः ॥ ४ ॥

विदर्भेति। अथ विदर्भराजो भीमोऽपि तनूजया दुहित्रा भैम्या समम् आत्मनोऽवरोधम् अन्तःपुरं हृष्यन् प्रविश्य जातसंशया मिष्ट वरलाभे

तनुत्विषा यस्य तृणं स मन्मथः कुलश्रिया यः पविताऽस्मदन्वयम्।
जगत्त्रयीनायकमेलके वरं सुता परं वेद विवेक्तुमीदृशम् ॥६॥
सृजन्तु पाणिग्रहमङ्गलोचिता मृगीदृशः स्त्रीसमयस्पृशः क्रियाः।
श्रुतिस्मृतीनान्तु वयं विदध्महे विधीनिति स्माह च निर्ययौ च सः॥७॥
निरीय भूपेन निरीक्षितानना शशंस मौहूर्तिकसंसदंशकम्।
गुणैररीणैरुदयास्तनिस्तुषं तदा स दातुं तनयां प्रचक्रमे ॥८॥

सन्दिहानां देवीं निजमहिषीम् अनु लक्षीकृत्य हे उत्सुके ! इष्टवरोद्युक्ते ! इष्टोद्युक्त उत्सुक इत्यमरः। नलं जामातरं दुहितुः पतिं प्रतीच्छ स्वीकुरु इति शशंस सिद्धं नः समीहितमिति भावः ॥ ५ ॥

तन्विति। किञ्च यस्य नलस्य तनुश्रिया कायकान्त्या सः प्रसिद्धो मन्मथः तृणं हि व इत्यर्थः। यः कुलश्रिया अभिजनसम्पदा अस्मदन्वयं पविता पवित्रीकर्ता पुनातेस्तृन् नलोकेत्यादिना षष्ठीप्रतिषेधात् कर्मणि द्वितीया। किञ्च जगत्त्रय्यां ये नायकास्तेषां मेल एव मेलके सङ्घे मेलात् घङन्तात् स्वार्थे कः। ईदृशं वरं विवेक्तुं सुता परं त्वत्सुतैव वेद वेत्ति विदो लटो वेति णलादेशः। अहो भाग्यत्सर्वानुकूलत्वमिति भावः ॥ ६ ॥

सृजन्त्विति। स भीमः मृगीदृशः पुरन्ध्र्यः पाणिग्रहमङ्गलोचिता मङ्गलयोग्याः स्त्रीसमयं स्पृशन्तीति तत्स्पृशः तत्समाचारप्राप्ता इत्यर्थः। स्पृशोऽनुदके क्विन्। क्रियाः मङ्गलकर्माणि सृजन्तु निर्मान्तु वयं च श्रुतिस्मृतीनां सम्बन्धिनस्तदुक्तान्विधीन् कर्माणि विदध्महे कुर्महे इत्याह स्मोवाच लट् स्म इति भूते लट्। निर्ययौ अन्तःपुरान्निर्जगाम च ॥ ७ ॥

निरीयेति। भूपेन निरीय अन्तःपुरान्निर्गत्य ईङ् गताविति धातोः समासात् क्त्वो ल्यबादेशः। निरीक्षितान्याननानि यस्याः सा सती मुहूर्त्तं विन्दन्तीति मौहूर्त्तिकाः तदधीते तद्वेदेति ठक्। तेषां संसत् ज्यौतिषक-

अथावदद्दूतमुखः स नैषधं कुलञ्च बाला च ममानुकम्प्यताम् ।
स पल्लवत्वद्य मनोरथाङ्कुरश्चिरेण नस्त्वच्चरणोदकैरिति ॥९॥
तथोत्थितं भीमवचःप्रतिध्वनिं निपीय दूतस्य स वक्त्रगह्वरात् ।
व्रजामि वन्दे चरणौ गुरोरिति ब्रुवन् प्रदाय प्रजिघाय तं वसु१०

परिषत् अरीणै रक्षीणैः समग्रैरित्यर्थः। ऋञ् गताविति धातोः कर्तरि क्तः ल्वादिभ्य इति निष्ठानत्वं। गुणैः शुभग्रहवीक्षणादिभिरुपलक्षितमुदये विवाहलग्ने जामित्राख्येऽस्तनिस्तुषं निर्दोषमंशमेवांशकं लग्ननवांशकं शशंस कथयामास तदा स भूपस्तनयां दातुं प्रचक्रमेऽन्वतिष्ठदित्यर्थः ॥ ८ ॥

अथेति। अथ स भीमो दूत एव मुखं यस्य स सन् मम कुलञ्च बाला भैमी चानुकम्प्यता मनुगृह्यता मद्य नोऽस्माकं मनोरथाङ्कुरः प्रागङ्कुरितो मनोरथः चिराय त्वच्चरणोदकैः पाद्योदकैः पल्लवेन सह वर्त्तत इति सपल्लवः स इवाचरतु सपल्लवतु उपल्लवः सपल्लव इवास्त्वित्यर्थः। सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यम् इति पल्लवशब्दादाचारक्विबन्तो धातोः प्रार्थनायां लोट्। इति नैषधं नलमवदत् नलाह्वानाय दूतं प्रेषितवानित्यर्थः ॥ ९ ॥

तथेति। स नलो दूतस्य वक्त्रमास्यमेव गह्वरं गुहा तस्मात्तथा उदित मुत्थितं भीमवचसः प्रतिध्वनिं निपीय दूतमुखात् भीमवचनं श्रुत्वेत्यर्थः। व्रजामि गुरोः श्वशुरस्य चरणौ वन्दे स्वयमहम् आगच्छामि गुरुपादवन्दनायेति ब्रुवन् वसु वसुधनं प्रदाय पारितोषिकं दत्त्वा तं दूतं प्रजिघाय प्राहिणोत् हिगताविति धातोः लिटि हेरच इति कुत्वम् ॥ १० ॥

निपीतेति। स विदर्भभर्त्ता भीमो निपीतदूतालपितः श्रुत दूतवाक्यः सन् निशावसाने श्रुता ताम्रचूडवाक् कुक्कुटकूजितं येन सः कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुध इत्यमरः। रथाङ्गश्चक्रवाकः रथाङ्गाह्वय

निपीतदूतालपितस्ततो नलं विदर्भभर्त्ताऽऽगमयाम्बभूव सः।
निशावसाने श्रुतताम्रचुडवाग्यथा रथाङ्गस्तपनं धृतादरः॥११॥
क्वचित्तदा लेपनदानपण्डिता कमप्यहङ्कारमगात्पुरस्कृता।
अलम्भि तुङ्गासनसन्निवेशनादपूपनिर्म्माणविदग्धयादरः॥१२॥
सुखानि मुक्तामणितोरणात्तदा मरीचिभिः पान्थविलासमाश्रितैः
पुरस्य तस्याखिलवेश्मनामपि प्रमोदहासच्छुरितानि रेजिरे॥१३

नामकः इति रथाङ्गपर्य्यायाणां चक्रवाक नामत्वाभिधानात् पुंलिङ्गता। तपनं यथा सूर्य्यमिवेति श्रुतोपमा। इव वत् वा यथाशब्दानां प्रयोगे श्रौतीतिलक्षणात्। धृतादरः सन् नलमागमयांबभूव। नलागमनं प्रतीक्षितवानित्यर्थः। तादृगुपमासामर्थ्यादिति॥ ११॥

क्वचिदिति। तदा तत्काले च लेपनदानपण्डिता सुधालेपनादिक्रियादक्षा काचित् आलेपनकर्म्मणि पुरस्कृता प्रधान्येन नियुक्ता सती कमप्यवाच्य महङ्कारं गर्वमगात् अपूपानां भक्ष्यभेदानां निर्म्माणे विदग्धया कयाचित्तुङ्गासने सन्निवेशनादुपवेशनादादर आत्मन्यभिमानोऽलम्भि प्रापि लभेश्चेतिनुमागमः॥ १२॥

सुखानीति। तदा तत्काले तस्य पुरस्य सम्बन्धिनामखिलवेश्मनामपि सुखानि द्वाराणि वक्त्राणि च मुक्तामणीनान्तोरणात् तन्मय बहिर्द्वारादपादानात् तोरणोऽस्त्री बहिर्द्वार मित्यमरः। पान्थविलासं नित्य पथिकविभ्रम माश्रितैः नित्यनिर्गतैरित्यर्थः। मरीचिभिः मयूखैः किरणैः मरीचिः स्त्रीपुंसयो रित्यमरः। प्रमोदहासच्छुरितानि रेजिरे अट्टहासव्याप्तानीव रेजिर इत्यर्थः। सुखत्वाच्छुभ्रत्वाच्च इयमुत्प्रेक्षाव्यञ्जकाप्रयोगाद्गम्या॥१३॥

पथामिति। तथा तेन प्रकारेणाधिवासनाच्चम्पकादिभिः अधिवासितत्वान्मधुव्रतानां मधुलिहामपि दत्तविभ्रमाः कृतस्रक्भ्रान्तय इति भ्रान्तिमदलङ्कारः। आतपनिर्भया आतपेऽप्यम्लाना इत्यर्थः। पटच्छिदा

पथामनीयन्त तथाधिवासनान्मधुव्रतानामपि दत्तविभ्रमाः ।
वितानतामातपनिर्भयास्तदा पटच्छिदाकालिकपुष्पजाः स्रजः ॥१४
विभूषणैः कञ्चुकिता बभुः प्रजा विचित्रचित्रैः स्नपितत्विषोऽट्टहाः।
बभूव तस्मिन्मणिकुट्टिमैः पुरे वपुः स्वमुर्व्याः परिवर्त्तितोपमम्॥१५
तदा निसस्वानतमां घनं घनं ननाद तस्मिन्नितरान्ततं ततम् ।
अवापुरुच्चैः सुषिराणि राणितामसमानमानद्धमियत्तयाऽध्वनीत्॥१६

पटकर्तनेन कृतानि यान्यकालिकान्यकालोद्भवानि पुष्पाणि तेभ्यो जातास्तज्जाः स्रजो मालिकाः पथां नगरमार्गाणां वितानता मुल्लोचनताम् अस्त्री-वितान मुल्लोच मित्यमरः। अनीयन्त नीताः नयतेर्द्विकर्मकात् प्रधाने कर्मणि लङ् प्रधानकर्मण्याख्येये लादीनाहु द्विकर्मणामिति वचनात्। पुष्पवितानभ्रान्तिता कपटविधानात् सर्वत्र बद्धा इत्यर्थः॥ १४॥

विभूषणैरिति। तस्मिन् पुरे प्रजा जना जनो लोकः प्रजाः प्रोक्ता इति हलायुधः। विभूषणैः कञ्चुकिताः सञ्जातकञ्चुकाः सर्वाङ्गीणाभरणा बभुरट्टहाः विचित्रचित्रैर्विविधालेख्यैः स्नपितत्विषो व्याप्तकान्तयो बभुः मग्नाः ग्लास्नावनुवमाञ्चेति स्नातेरनुपसर्गस्य मित्वविकल्पाद्ध्रस्वत्वम्- उर्व्यास्तत्रत्यभूमेः स्वं वपुर्निजस्वरूपं मणीनां कुट्टिमैर्मणिबद्धप्रदेशैः कुट्टिमोऽस्त्री निबद्धा भूरिति स्वामी। परिवर्तितोपमं निरस्तोपमानम् असदृशं बभूव कुट्टेन बद्धेन निर्वृत्तं कुट्टिमं भावप्रत्ययान्तादिमनिज्वक्तव्यम्॥ १५॥

तदेति। तदा तस्मिन् पुरे घनं कांस्यतालादिवाद्यं घनं निरन्तरं निसस्वानतमामतिशयेन सस्वान किमेत्तिङव्ययघादामित्यादिना आमु प्रत्ययः। ततं वीणादिकं वाद्यं नितरामतिशयितं अव्ययघादामुप्रत्ययः। ततं विस्तृतं यथा तथा ननाद। आनद्धं मुरजादिवाद्यं सुपजातिकं वंशादिकन्तु सुषिरं कांस्यं तालादिकं इयत्तया केनचिन्मानेनासमानं मानरहितं यथा तथा अध्वनीत् दध्वान ध्वनतेर्लुङ् अतो हलादेर्लघो-

विपञ्चिराच्छादि न वेणुभिर्न ते प्रणीतगीतैर्न च तेऽपि झर्झरैः।
न ते हुडुक्केन न सोऽपि ढक्कया न मर्द्दलैः सापि न तेऽपि ढक्कया॥१७
विचित्रवादित्रनिनादमूर्च्छितः सुदूरचारी जनतामुखारवः।
ममौ न कर्णेषु दिगन्तदन्तिनां पयोधिपूरप्रतिनादमेदुरः॥१८
उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे।
यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्गः स्नपयाम्बभूव ताम्॥१

रिति विकल्पाद्वृद्धिप्रतिषेधः। सुषिराणि वंशादिवाद्यानि उच्चैस्तरां रणितं राणनं रणतेर्ण्यन्ताद्भावे क्तः। अवापुः ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंशादिकन्तु सुषिरं कांस्यं तालादिकं घनमिति सर्वत्राप्यमरः॥ १६ ॥

विपञ्चिरिति। विपञ्ची वीणादि विपञ्चिर्वल्लकी वीणेति वैजयन्ती। कृदिकाराद्विकल्पादीकाराभावः। वेणुभिर्वेणुवाद्यैः नाच्छादि न च्छादिता च्छादयतेः कर्मणि लुङ्। ते वेणवः प्रणीतगीतैः प्रयुक्तगानैः गायकैरित्यर्थः। नाच्छादिषत इति विपरिणामेनैवमुत्तरत्रापि योज्यं झर्झरादयो वाद्यविशेषाः॥ १७ ॥

विचित्रेति। विचित्राणि वादित्राणि च ततादि चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकमित्यमरः। तेषां निनादे संमूर्च्छितः प्रवृद्धः सुदूरचारी अतिदूरव्यापी च जनतानां जनसमूहानां मुखेभ्यारवः वरल्लापकोलाहलः पयोधीनां पूरेषु लहरीषु प्रतिनादेन प्रतिध्वनिना मेदुरो मेदस्वी प्रवृद्धः सन् भङ्गभास्वमिदोद्धुरश्च। दिगन्तदन्तिनां दिग्गजानां कर्णेषु न ममौ न मातिस्मेति अतिशयोक्तिः। वधूमङ्गलस्नानार्थं महान्तं मङ्गलतूर्यघोषणमकार्षुरित्यर्थः॥ १८ ॥

उदस्येति। अथ मङ्गलतूर्य्यघोषणानन्तरं पुरन्ध्रीवर्गः सुवासिनीसङ्घः शातकुम्भजाः सौवर्णीः कुम्भीः पूर्णकलशीः उदस्य उन्नमय्य अथ तदनन्तरं चतुष्केण चतुस्तम्भमण्डपेन चारुत्विषि अतिशयशोभे

विजित्य दास्यादिव वारिहारितामवापितास्तत्कुचयोर्द्वयेन ताः ।
शिखास्रवाचुः सहकारशाखिनस्त्रपाभरग्लानिमिवानतैर्मुखैः ॥२०॥
असौ मुहुर्जातजलाभिषेचना क्रमाद्दुकूलेन सितांशुनोज्ज्वला ।
द्वयस्य वर्षाशरदां सदातनीं सनाभितां साधु बवन्ध सन्धया ॥२१॥
असौ प्रभिन्नाम्बुददुर्दिनीकृतां निनिन्द चन्द्रद्युतिसुन्दरीं दिवम् ।
शिरोरुहौघेण घनेन संयुता तथा दुकूलेन सितांशुनोज्ज्वला ॥२२

वेदिकोदरे वेदिमध्ये यथाकुलाचारमनतिक्रम्य कुलाचारमित्यर्थः । तामवनीन्द्रजां भैमीं स्नपयां बभूव स्नानं कारयामास स्नातेर्विभाषा मित्वाद्ध्रस्वत्वम् ॥१९॥

विजित्येति । तत्कुचयोर्द्वयेन भैमीकुचद्वयेन विजित्य दास्याद्दासीकरणादिव वारिहारितां जलवाहिनीत्वमवापिताः प्रापिताः अणेर्ण्यन्तादणिकर्तुः कर्म्मणि क्तः ण्यन्ते कर्तुश्च कर्म्मण इति वचनात् । ताः कुम्भ्यः आनतैर्मुखैर्नतैश्च आननैश्च सहकारशाखिनः शिखाश्चूतपल्लवं त्रपाभरेण या ग्लानिः ग्लानता तामिव तामेव अवाचुरधार्षुः वहो लुङि सिचि नवदव्रजत्यादिना वृद्धिः होढः षढो कः सितकत्वे इणकोरिति षत्वं सिजभ्यस्तेत्यादिना झर्झरि अड़ागमः । लोके दासीकृता स्त्रियो नतानना जलाहरणादिकर्म कुर्वन्तीति भावः । अत्र दास्यादिवेति हेतूत्प्रेक्षा ग्लानिमिवेति गुणस्वरूपोत्प्रेक्षा तयो रङ्गाङ्गिभावेन सजातीयसङ्करः ॥ २० ॥

असाविति । असौ भैमी मुहुर्जातं जलाभिषेचनं यस्याः सा जलाभिषिक्ता सती क्रमात् शीतांशुना शुभ्रतरेण दुकूलेन उज्ज्वला वर्षाशरदां द्वयस्य सन्धया सन्धिस्थत्वेन सदातनीं सनातनीं सनाभितां तुल्यत्वं साधु यथा तथा बबन्ध, दधार वर्षर्तुरपि जलाभिषिक्तः, शरच्च, शीतांशूज्ज्वलो भवतीत्युपमा ॥ २१ ॥

असाविति । असौ भैमी प्रभिन्नैर्वर्षुकै रम्बुदैर्दुर्दिनीकृता मभिदृष्टामित्यर्थः । अथ चन्द्रद्युत्या चन्द्रकान्त्या सुन्दरीं दिवं नभःस्थलीं

विरेजिरे तच्चिकुरोत्कराः किराः क्षणं गलन्निर्म्मलवारिविप्रुषाम्
तमःसुहृच्चामरनिर्ज्जयार्ज्जिताः सितावमन्तः खलुकीर्त्तिमौक्तिकाः॥२

म्रदीयसा स्नानजलस्य वाससा प्रमार्ज्जनेनाधिकमुज्ज्वलीकृता।
अदभ्रमभ्राजत साऽश्मशाणनात् प्रकाशरोचिः प्रतिमेव हेमजा

तदा तदङ्गस्य बिभर्त्ति विभ्रमं विलेपनामोदमुचः स्फुरद्रुचः।
दरस्फुटत्काञ्चनकेतकीदलात् सुवर्ण्णमभ्यस्यति सौरभं यदि ॥२५॥

निनिन्द तदुपमाभूदित्यर्थः। कदर्थयती निन्दयतीति सादृश्यवाचकेषु दण्डी उपमालङ्कारः। घनेन सान्द्रेण मेघेन च शिरोरुहौघेण केशपाशेनोपलक्षितेति वर्षासाम्योक्तिः क्वचिदेकदेशे शितांशुना चन्द्रेण च दुकूलेनोज्ज्वलेनेति शरत्साम्योक्तिः ॥ २२ ॥

विरेजिर इति। क्षणं क्षणमात्रं गलन्त्यो निर्म्मलाश्च या वारिविप्रुषो स्तोयविन्दवस्तासां कृद्योगात्कर्मणि षष्ठी। किरन्तीति किराः विक्षेपका इगुपधज्ञाप्रीकिरः क इति कः। तस्या भैम्याश्चिकुरोत्कराः केशनिकराः तमःसुहृद स्तमोनिभस्य चामरस्य लीलाचामरस्य निर्जयेनार्जिताः सम्पादिताः सिता शुभ्रा एव मौक्तिकाः अभाषितपुंस्काच्चेतिकात्पूर्वस्य विकल्पादिकारः। कीर्तिरेव मौक्तिका वमन्तः उद्गिरन्त इवेत्युत्प्रेक्षा व्यञ्जका प्रयोगाद्गम्या। विरेजिरे खलु फणानाञ्च सप्तानामित्येत्वाभ्यासलोपौ ॥ २३ ॥

म्रदीयसेति। म्रदीयसा मृदुतरेण वाससा स्नानजलस्याङ्गसङ्गिनः प्रमार्जनेन अपाकरणेन अधिकमुज्ज्वलीकृता विमलीकृता सा भैमी अश्मशाणनात् उत्तेजणोपलेन शाणनात् उत्घर्षणात् प्रकाशमुज्ज्वलं रोचिर्दीप्तिर्यस्याः सा हेमजा हैमी प्रतिमेव उदभ्रं बहुलम् अभ्राजत अराजत ॥ २४ ॥

तदेति। सुवर्णं कर्त्तृ दरस्फुटतः ईषद्विकसतः ईषदर्थे दरोऽव्ययमित्यमरः। काञ्चनकेतकीदलात् काञ्चनवर्णकेतकपीतात् आख्यातोपयोग इत्यपादानत्वात्पञ्चमी। सौरभमामोदमभ्यस्यति यदि अधीते

अवापितायाः शुचि वेदिकान्तरं कलासु तस्याः सकलासु पण्डिताः
क्षणेन सख्यश्चिरशिक्षणास्फुटं प्रति प्रतीकं प्रतिकर्म निर्ममुः ॥२६॥
विनापि भूषामवधिः श्रियामियं व्यभूषि विज्ञाभिरदर्शि चाधिका
न भूषयैषाऽतिचकास्ति किन्तु सा ऽनयेति कस्यास्तु विचारचातुरी२७

चेत् तथा तर्हि विलेपनेनाङ्गरागेण य आमोदो मनोज्ञगन्धस्तं मुञ्चति किरतीति तन्मुचः स्फुरद्रुचः स्फुरत्कान्तेः तदङ्गस्य विभ्रममिव विभ्रमं शोभां बिभर्ति विभ्रमः संशये भ्रान्तौ शोभायामिति वैजयन्ती। तथा च तदङ्गस्य सौरभगुणेन तद्रहितान् सुवर्णाधिक्यकथनाद्व्यतिरेकस्यावद्रेकः। यदिशब्देन सुवर्णस्य सौरभासम्बन्धेऽपि सम्भावनया तत्सम्बन्धोक्तेरतिशयोक्तिभेदः विभ्रममिव विभ्रममिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धरूपो निदर्शनाभेदः तदङ्गोपमानसुवर्णस्योपमेयत्वकल्पनात् प्रतीपालङ्कारः तेनचाङ्गिनाङ्गत्वेन तेषां सङ्कर इति विवेकः ॥ २५ ॥

अवापिताया इति। सकलासु कलासु शिल्पविद्यासु पण्डिताः कुशलाः कला शिल्पे कालभेदे इत्यमरः। सख्यः शुचि शुद्धं वेदिकान्तरं स्नानवेदेरन्यां वेदिमवापितायाः तस्या दमयन्त्या चिरशिक्षणेन चिराभ्यासेन स्फुटं सुश्लिष्ट प्रति प्रतीकं प्रत्यवयवम् अङ्गं प्रतीकोऽवयव इत्यमरः। प्रतिकर्म प्रसाधनं क्षणेन निर्ममुः चक्रुरित्यर्थः ॥ २६ ॥

विनेति। भूषां विना अलङ्कार मन्तरेणापि श्रियां शोभानामवधिः सीमा इयं भैमी विज्ञाभिः प्रवीणे निपुणाभिज्ञ विज्ञनिष्णातशिक्षित इत्यमरः। व्यभूषि विभूषिता तदा अधिका पूर्वावस्थातोऽप्युत्कृष्टा अदर्शि दृष्टा च तथा अमानीत्यर्थः। वस्तुतस्तु एषा भैमी भूषया नातिचकास्ति किन्तु सा भूषैवानया भैम्यातिचकास्तीति विचारचातुरी विमर्शनकौशलं कस्यास्तु न कस्यापीत्यर्थः। लोकदृष्ट्या भूषणे भूष्यत्वभ्रमादलङ्कृतः भूषणं भूष्यश्चिति तु न काचिदिति भावः ॥ २७ ॥

विधाय वन्धूकपयोजपूजनं कृतां विधोर्गन्धफलीवलिश्रियम्।
निनिन्द लब्धाधरलोचनार्चनं मनःशिलाचित्रकमेत्य तन्मुखम्
महीमघोनां मदनान्धतातमीतमःपटारम्भणतन्तुसन्ततिः।
अवन्धि तन्मूर्द्धजपाशमञ्जरी कयापि धूपग्रहधूमकोमला ॥२९॥
पुनः पुनः काचन कुर्वती कचच्छटाधिया धूपजधूमसंयमम्।
सखीस्मितैस्तर्किततन्निजभ्रमा ववन्ध तन्मूर्द्धजचामरं चिरात् ३०

विधायेति। लब्धमधरेण लोचनाभ्यां चार्चनं येन तदधरलोचनार्चितमित्यर्थः तन्मुखं कर्तृ मनःशिलया धातुविशेषेण चित्रकं तिलकमेत्य तमालपत्रतिलकचित्रकाणि विशेषकमित्यमरः। विधोश्चन्द्रस्य वन्धूकेन वन्धूजीवककुसुमेन पयोजाभ्याञ्च यत्पूजनं तद्विधाय कृतां गन्धफल्यां चम्पककलिकायां वलेः पूजनस्य श्रियं शोभां निनिन्द अथ चाम्पेयश्चम्पको हेमपुष्पकः एतस्य कलिका गन्धफलीत्यमरः। अधराद्यञ्चितं तन्मुखं वन्धूकाद्यञ्चितं चन्द्रविम्वमिव वभावित्यर्थः ॥ २८ ॥

महीति। महीमघोनां भूदेवेन्द्राणां या मदनान्धता सैव तमी रजनी रजनीयामिनीतमीत्यमरः। तस्याः तम एव पटः तस्यारम्भणे तन्तुसन्ततिः तत्तदर्थं तन्तुपुञ्जवत्स्थितेत्युत्प्रेक्षा। धूपग्रहेण ग्रहणेन यो धूमः तेन कोमला रम्या तन्मूर्धजपाशमञ्जरी तत्केशपाशवल्लरी कयापि सख्या अवन्धि वद्धा ॥ २९ ॥

पुनः पुनरिति। काचन कचच्छटाधिया केशपाशभ्रान्त्या धूपजधूमस्य संयमं वन्धनं पुनः पुनः कुर्वतीति भ्रान्तिमदलङ्कारः। सखीनां स्मितैस्तर्कितः ऊहितः स पूर्वोक्तो निजभ्रमो यया सा सती चिरात्तस्य मूर्धजाच्चामरमिव तद्ववन्ध ॥ ३० ॥

वलस्येति। या कलिन्दकन्या कालिन्दी वलस्य वलभद्रस्य हलेन कृष्टेव अद्यापि कर्षणविशिष्टेव घनैर्निरन्तरैर्भङ्गैः खुङ्गैस्तरङ्गैर्भङ्गुरा अराला भाति तां कालिन्दीं तस्याः कुटिला वक्रा कचच्छटा केशपाशः तदा तत्काले

बलस्य कृष्टेव हलेन भाति या कलिन्दकन्या घनभङ्गभङ्गुरा ।
तदर्पितैस्तां करुणस्य कुट्मलैर्जहास तस्याः कुटिला कचच्छटा३१
धृतैतया हाटकपट्टिकालिके बभूव केशाम्बुदविद्युदेव सा ।
मुखेन्दुसम्बन्धवशात् सुधाजुषः स्थिरत्वमूहे नियतं तदायुषः ॥३२
ललाटिकासीमनि चूर्णकुन्तला बभुस्तमां भीमनरेन्द्रजन्मनः ।
मनःशिलाचित्रकदीपसम्भवा भ्रमीभृतः कज्जलधूमवल्लयः ॥३३॥
अपाङ्गमालिङ्ग्य तदीयमुन्नकैरदीपि रेखा जनिताञ्जनेन या ।
अपाति सूत्रं तदिव द्वितीयया वयःश्रिया वर्द्धयितुं विलोचने३४

अर्पितैर्न्यस्तैः करुणस्य वृक्षविशेषस्य करुणस्तु रसे वृक्षे इति विश्वः । कुड्मलैः जहास जहासेवेत्यर्थः व्यञ्जका प्रयोगाद्गम्योत्प्रेक्षा ॥ ३१ ॥

धृतेति । एतया भैम्या अलिके ललाटे धृता ललाटमलिकं गोधिरित्यमरः । सा हाटकपट्टिका सुवर्णपट्टः केश एवाम्बुदस्तस्य विद्युदेव बभूव विद्युच्चेत्कथं स्थिरत्वं तत्राह । मुखेन्दुसम्बन्धवशात् सुधाजुषोऽमृतपायिनः तस्या विद्युतः सम्बन्धिनः आयुषः स्थिरत्वं चिराय स्थापित्वं नियतम् ऊहे उत्प्रेक्षे उपसर्गादस्यत्यूह्योर्वा वचनमित्यात्मनेपदम् ॥३२॥

ललाटिकेति । भीमनरेन्द्राज्जन्म यस्यास्तस्या भैम्याः अवज्यों बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः । ललाटस्यालङ्कारो ललाटिका कर्णललाटात्कनलङ्कार इति कन् प्रत्ययः । तस्याः सीमनिप्रान्ते चूर्णकुन्तलाः अलका मनःशिलाया धातुविशेषस्य चित्रकं तिलकं स एव दीपस्ततः सम्भवाः जाताः भ्रमीं भ्रमं बिभ्रतीति भ्रमीभृतो भ्रमन्त्यः कज्जलस्य धूमस्तत्सम्पादकधूमस्तस्य वल्लयो लता इवेत्युत्प्रेक्षा बभुस्तमामतिशयेन बभुः तिङ्घादाम्प्रत्ययः ॥ ३३ ॥

अपाङ्गमिति । अञ्जनेन जनिता या लेखा तदीयं दमयन्तीयमपाङ्गमालिङ्ग्य स्पृष्ट्वा अदीपि आयतत्वान्नेत्राद्बहिः प्रसारिता सती रराज ।

अनङ्गलीलाभिरपाङ्गधाविनः कनीनिकानीलमणेः पुनः पुनः।
तमिस्रवंशप्रभवेन रश्मिना स्वपद्धतिः सा किमरञ्जि नाञ्जनैः॥३५॥
असेविषातां सुषुमां विदर्भजादृशाववाप्याञ्जनरेखयान्वयम्।
भुजद्वयज्याकिणपद्धतिस्पृशोः स्मरेण वाणीकृतयोः पयोजयोः॥३६॥
तदक्षितत्कालतुलागसा नखं निखाय कृष्णस्य मृगस्य चक्षुषी।
विधिर्यदुद्धर्त्तुमियेष तत्तयोरदूरवर्त्तिक्षतता स्म शंसति॥३७॥

तत् सुलेखेत्यर्थः विधेयसूत्रापेक्षया नपुंसकनिर्देशः। द्वितीयया वयःश्रिया यौवनसम्पदा विलोचने वर्द्धयितुं दीर्घीकर्त्तुं सूत्रमपातीव पातितमिवेत्युत्प्रेक्षा। पातेर्ण्यन्तात्कर्मणि लङ्। एतावन्मे क्षेत्रमिति निश्चित्य पातितं सीमासूत्रमिव साञ्जनरेखा विरराजेत्यर्थः॥ ३४॥

अनङ्गेति। अनङ्गलीलाभिः स्मरविलासैर्हेतुभिः पुनः पुनः अपाङ्गधाविनो नेत्रान्तगामिनः कनीनिका तारका सैव नीलमणिः इन्द्रनीलोपलः तस्य सम्बन्धि तमिस्रवंशप्रभवेन तद्रूपतमःकुलसम्भवेनास्थितेनेत्यर्थः। रश्मिना सा रेखारूपा स्वपद्धतिः रश्मिमार्ग एवारञ्जि रञ्जितम् किम्? अञ्जनैः कज्जलैः नारञ्जीति सापह्नवोत्प्रेक्षा॥ ३५॥

असेविषातामिति। विदर्भजादृशौ वैदर्भीनेत्रे अञ्जनलेखया सहान्वयं सम्बन्धमवाप्य भुजद्वये ये ज्याकिणपद्धती ज्याघातरेखे तत्स्पृशोस्तद्युक्तयोः एतेन स्मरस्य सव्यसाचित्वं गम्यते। स्मरेण वाणीकृतयोः पयोजयोः सरोजयोः सुषमामिव सुषमां तां परमशोभामसेविषातां प्राप्नुतामित्यसम्भववस्तुसम्बन्धो निदर्शनाभेदः साञ्जनरेखे तद्दृशौ ज्याघातरेखास्पृशौ स्मरमुक्तवाणसरोजे इव रेजतुरित्यर्थः॥ ३६॥

तदिति। तस्याः अक्षिभ्यां सह तत्काले प्रसाधनकाले तुला सादृश्यं तेनैवागसा अपराधेन हेतुना विधिर्वेधाः कृष्णस्य मृगस्य सारङ्गस्य चक्षुषी नखं निखाय निक्षिप्योद्धर्तुं नखेनोत्पाटयितुम् इयेष ऐच्छदिति यत् तदेवैषणं कर्म तयोर्मृगचक्षुषोरदूरवर्तिक्षतता निकटवर्तिक्षतत्वं कर्त्री

विलोचनाभ्यामतिमात्रपीड़िते ऽवतंसनीलाम्बुरुहद्वयीं खलु।
तयोः प्रतिद्वन्द्विधियाऽधिरोपयाम्बभूवतुर्भीमसुताश्रुती ततः॥३८

धृतं वतंसोत्पलयुग्ममेतया व्यराजदस्यां पतिते दृशाविव।
मनोभुवाभ्यङ्गमितस्य पश्यतः स्थिते लगित्वा रसिकस्य कस्यचित्।

विदर्भसुभ्रूश्रवणावतंसिकामणीमहः किंशुककार्मुकोदरे।
उदीतनेत्रोत्पलबाणसम्भृतिर्नलं परं लक्ष्यमवैक्षत स्मरः॥ ४० ॥

ध्वंसतिस्म ध्वंस मृगस्य स्वाभाविकेक्षणे पूर्वोक्तापराधप्रयुक्त विधिनखोत्पाटनक्षतत्वमुत्प्रेक्ष्यते ॥ ३७ ॥

विलोचनाभ्यामिति। तत्र भीमसुताश्रुती भैमीश्रोत्रे विलोचनाभ्यामतिमात्रं पीड़िते सत्यौ अवतंसनीलाम्बुरुहद्वयीमवतंसनीलोत्पलयुगलं तयोर्विलोचनयोः प्रतिद्वन्द्विधिया प्रतिपक्षबुध्या अधिरोपयाम्बभूवतुः आरोपयामासतुः खल्वित्युत्प्रेक्षा बलिना पीड़ितस्तुल्यं प्रतिपक्षमन्तर्धत्ते इति भावः ॥ २८ ॥

धृतमिति। एतया भैम्या धृतमवतंसोत्पलयुग्ममस्यां भैम्यां पतिते सत्यौ तत्रैव लगित्वा आसज्य स्थिते पश्यतः सतो मनोभुवा कामेन आभ्यङ्गमितस्य तदेकासक्तीकृतस्य कस्यचिद्रसिकस्य रसवतो रागिण इत्यर्थः। अत इन्निति ईठनाविति ठक्प्रत्ययः। दृशाविव व्यराजीत् विरराजेत्युत्प्रेक्षा ॥ ३९ ॥

विदर्भेति। विदर्भसुभ्रुवो वैदर्भ्याः श्रवणावतंसिका कर्णावतंसीभूता या मणी कर्दिकारादीकारः। तस्य महः प्रभैव किंशुककार्मुकं पलाशकुसुमचापं तस्योदरे मध्ये उदीता उत्पन्ना नेत्रस्यैवोत्पलबाणस्य सम्भृतिः सम्भरणं यस्य स सन् स्मरो नलं परं नलमेव लक्ष्यमेवैक्षत सर्वथा नलस्यायमीदृक् स्मरबाणो भविष्यति इति ॥ ४० ॥

अनाचरत्तथ्यमृषाविचारणां तदाननं कर्णलतायुगेन किम्।
बबन्ध जित्वा मणिकुण्डले विधू द्विचन्द्रबुद्ध्या कथितावसूयकौ ॥४१॥
अवादि भैमी परिधाप्य कुण्डले वयस्ययाभ्यामभितः समन्वयः।
त्वदाननेन्दोः प्रियकामजन्मनि श्रयत्ययं दौरधुरीं धुरं ध्रुवम् ॥४२॥
निवेशितं यावकरागदीप्तये लगत्तदीयाधरसीम्नि सिक्थकम्।
रराज तत्रैव निवस्तुमुत्सुकं मधूनि निर्धूय सुधासधर्मणि ॥४३॥

अनाचरदिति। तदाननं कर्त्तृ तथ्यमृषाविचारणामनाचरत् सत्यासत्यविमर्शमकुर्वत् द्विचन्द्रबुद्ध्या द्वौ चन्द्राविमाविति भ्रान्त्या कथितावसूयकौ सूचिता वसूयकौ स्वद्वेषिणौ मणिकुण्डले एव विधू चन्द्रौ जित्वा कर्णलतयोर्युगेन बबन्ध किमिति मिथ्याचन्द्रयोरेव बन्धनमुत्प्रेक्षते जितस्य शत्रोर्बन्धनमुचितमिति भावः ॥ ४१ ॥

अवादीति। वयस्यया सख्या कुण्डले मणिकुण्डले परिधाप्यारोप्य भैमी अवादि उदिता किमिति हे भैमि! त्वदाननेन्दोरभ्यां मणिकुण्डलाभ्यामयमभित उभयतः समन्वयः समायोगः प्रियस्य नलस्य कामजन्मनि त्वयि रागोदये दौरधुरीन्द्ररुदयाख्ययोगसम्बन्धिनीं धुरं श्रयति फलदानभारं वहति ध्रुवमित्युत्प्रेक्षा। चन्द्रस्यार्कातिरिक्तोभयग्रहमध्यगते धौरधुरयोगः यदाह वराहमिहिरः। हित्वार्कं सुनयानयाद्दर धुरः स्वान्त्योभयस्थैर्ग्रहैः शीतांशोरिति ॥ ४२ ॥

निवेशितमिति। तदीयस्य दमयन्त्या अधरस्य सीम्नि प्रदेशे यावकरागस्यालक्तकरागस्य दीप्तये स्फुरणाय निवेशितं न्यस्तं लगत् सत् सिक्थकं मधूच्छिष्टं मधूनि द्राक्षाणि निर्धूय निरस्य सुधया समानो धर्मः स्वादात्मा यस्याः सा सुधाधरा नामगोत्र रूप स्थान वर्ण वयो वचन धर्म जातीयेषु समानस्य सभाव इति वर्धमानसूत्रं। समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केष्विति समानस्येति योगविभागात्सपक्षसधर्मसंस्थानादिसिद्धिरिति का-

स्वरेण वीणेत्यविशेषणं पुराऽस्फुरत्तदीया खलु कण्ठकन्दली ।
अवाप्य तन्त्रीरथ सप्त मौक्तिकासरानराजत् परिवादिनी स्फुटम् ॥ ४४ ॥
उपास्यमानाविव शिञ्जितुं ततो मृदुत्वमप्रौढमृणालनालया ।
विरेजतुर्माङ्गलिकेन संयुतौ भुजौ सुदत्या वलयेन कम्बुनः ॥ ४५ ॥
पदद्वयेऽस्या नवयावरञ्जना जनैस्तदानीमुदनीयतार्पिता ।
चिराय पद्मौ परिरभ्य जाग्रती निशीव विश्लिष्य नवा रविद्युतिः ॥ ४६ ॥

षिका । धर्मादनिच् केवलात्मनो बहुव्रीहेरिति प्रतिषेधाद्यनेभ्य इति ङीप् । तस्यां सुधासधर्मिणि अमृतसदृश्यां तत्रैव तदीयाधरसीम्न्येव निवस्तुं स्थातुमुत्सुकं रराज अन्यथा कथम् अत्रैव लगेदित्युत्प्रेक्षा उत्कृष्टस्थानलाभे चिरपरिचितमपि स्वस्थानमुत्सृजति नत्वौचित्यं गम्यते विशेषार्थिभिरिति भावः ॥ ४३ ॥

स्वरेणेति । तदीया दमयन्तीया कण्ठकन्दली कण्ठनालः पुरा पूर्वं स्वरेण ध्वनिना वीणेत्यविशेषणं निर्विशेषं यथा तथा अस्फुरत् वीणेत्येवाबोधीत्यर्थः । अथ वीणेति स्फुरणानन्तरं सप्त मौक्तिकासरान् मुक्तायष्टीरेव सप्ततन्त्रीरवाप्य परिवादिनो परिवादिन्याख्या वीणा सती अराजत् स्फुटमित्युत्प्रेक्षायां विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनीत्यमरः ॥ ४४ ॥

उपास्यमानाविति । ततः कण्ठभूषणानन्तरं माङ्गलिकेन मङ्गलार्थेन प्रयोगजनमिति ठक् । कम्बुनः शङ्खस्य वलयेन संयुतौ शङ्खः स्यात्कम्बुरस्त्रियामित्यमरः । सुदत्याः तस्याः भुजौ अप्रौढमृणालनालया बालबिसकान्तिदण्डेन मृदुत्वं मार्दवं शिञ्जितुमभ्यसितुमुपास्यमानौ सेव्यमानाविव विरेजतुरित्युत्प्रेक्षा ॥ ४५ ॥

पदेति । तदानीं प्रसाधनकाले अस्याः सैख्यः पदद्वये अर्पिता नवयावस्य नवालक्तस्य रञ्जना यावोऽलक्तो द्रुमामय इत्यमरः । निशि रात्रौ विश्लिष्य वियुज्य चिराय प्रभाते पद्मौ पद्मे वा पुंसि पद्मं नलिनमित्य-

कृतापराधः सुतनोरनन्तरं विचिन्त्य कान्तेन समं समागमम् ।
स्फुटं सिषेवे कुसुमेषुपावकः सरागचिह्नश्चरणौ न यावकः ॥ ४७ ॥
स्वयं तदङ्गेषु गतेषु चारुतां परस्परेणैव विभूषितेषु च ।
किमूचिरेऽलङ्करणानि तानि तत् वृथैव तेषां करणं बभूव यत् ॥ ४८ ॥
क्रमाधिकामुत्तरमुत्तरं श्रियं पुपोष यां भूषणचुम्बनैरियम् ।
पुरः पुरस्तस्थुषि रामणीयके तया वबाधेऽवधिबुद्धिधोरणिः ॥ ४९ ॥

मरः । परिरभ्य प्राप्य जाग्रती प्रकाशमाना नवा प्रत्यग्रा रविद्युतिरिव बालार्कप्रभेव स्थितेति जनैरुदनीयत उन्नीता उत्प्रेक्षितेत्यर्थः ॥ ४६ ॥

कृतेति । सुतनोर्भैम्याः कृतापराधः पूर्वं विरहकाले सापराधः कुसुमेषुपावकः कामाग्निः अनन्तरं कान्तेन समं नलेन सह समागमं विचिन्त्य सरागचिह्नो रक्तचिह्नसहितः सन् अन्यथा कुत एष राग इति भावः । चरणौ सिषेवे स्फुट यावक एव यावकोऽलक्तस्तु नेति सापह्नवोत्प्रेक्षा यावादिभ्यः कन्निति स्वार्थे कन्प्रत्ययः ॥ ४७ ॥

स्वयमिति । स्वयं स्वभावत एव चारुताङ्गतेषु परस्परेण इतरेतरेणैव विभूषितेषु च परस्परमेलनात् प्रत्यवयवं कस्यचित्कमनीयविशेषस्य च स्फुरणादितिभावः । तदङ्गेषु भैमीगात्रेषु तेषां पूर्वोक्तहेमपट्टादीनां करणमर्पणं वृथैव बभूवेति यत्तद्वास्तव्यान्यलङ्करणानि कर्तृणि ऊचिरे किम् उक्तिः सम्भावितेत्युत्प्रेक्षा ॥ ४८ ॥

क्रमेति । इयं दमयन्ती भूषणचुम्बनैराभरणसम्बन्धैरुत्तरमुत्तरमुपर्युपरि उपर्युदीच्य श्रेष्ठेष्वप्युत्तरः स्यादित्यमरः । क्रमेणाधिकां यां श्रियं शोभां पुपोष तया श्रिया रामणीयके कमनीयत्वे मनोज्ञादित्वाद्वुञ्प्रत्ययः । पुरोऽग्रे तस्थुषि स्थिते सति अवधिबुद्धिधोरणिरियत्ताधीपरम्परा वबाधे बाधिता इयत्तारहिता सा शोभासम्पत्तिरितिभावः । धोरणिशब्दः पङ्क्तौ देशीय इति सम्प्रदायः ॥ ४९ ॥

मणीसनाभौ मुकुरस्य मण्डले वभौ निजास्यप्रतिविम्बदर्शिनी।
विधोरदूरं स्वमुखं विधाय सा निरूपयन्तीव विशेषमेतयोः ५०

जितस्तदास्येन कलानिधिर्दधे द्विचन्द्रधीसाक्षिकमायकायताम्।
तथापि जिग्ये युगपत् सखीयुगप्रदर्शितादर्शबहूभविष्णुना॥५१॥

किमालियुग्मार्पितदर्पणद्वये तदास्यमेकं बहु चान्यदम्बुजम्।
हिमेषु निर्वाप्य निशासमाधिभिस्तदास्यसालोक्यमितं व्यलोक्यत ५२

मणीति। मणीसनाभौ रत्नप्रख्ये मुकुरस्य मण्डले दर्पणतले निजास्यप्रतिविम्बदर्शिनी सा भैमी स्वमुखं विधोश्चन्द्रस्यादूरं समीपगतं विधाय एतयोः स्वमुखचन्द्रयोर्विशेषं तारतम्यं निरूपयन्ती परीक्षमाणेव वभौ परीक्षका ह्युभयमेकत्रावस्थाप्य परीक्षन्त इति भावः॥५०॥

जित इति। कलानिधिश्चन्द्रः शिल्पे कला विधोरंश इत्यभिधानात्। तदास्येन भैमीमुखेन जितः सन् द्वौ चन्द्राविति धीरेव कार्यभूता साक्षी प्रमाणं यस्याः सा तत्साक्षिका माया कारणभूता यस्य स समायः कायो यस्या स्तस्या भावस्तत्ता तां दधे दधारेति एकाकिना तन्मुखस्य दुर्जयत्वादेकोऽपि चन्द्रो मायया द्वा वभूदित्यर्थः। तन्मुखन्तु स्वयमपि कपटादेव त्रित्वमापद्य पुनस्तञ्जिगायेत्याह तथापि द्विभूतोऽपि युगपत्सखीयुगेन प्रदर्शिताभ्यामादर्शाभ्यां दर्पणाभ्यां तद्गतप्रतिविम्बद्वयवशेनेत्यर्थः। दर्पणे मुकुरादर्शावित्यमरः। बहुभविष्णुना ताच्छील्येन बहु भविता प्रतिविम्बद्वयेनात्मना च त्रित्वमापन्नेन तन्मुखेनेत्यर्थः। भुवश्चेति इष्णुच्प्रत्ययः जिग्ये जितः त्रिभिर्द्वौ सुजयावितिभावः॥५१॥

किमिति। आली युग्मेन सखीद्वयेन अर्पिते दर्पणद्वये तदास्यं भैमीमुखम् एकमनेकार्कप्रतिविम्बितार्कवदनेकाविद्याप्रतिविम्बितब्रह्मवच्चेति भावः। ब्रह्म नैकम् अन्यत् तन्मुखसदृशं चाम्बुजं पद्मं निशासु समाधिभि स्तन्मुखध्यानैः मुकुलभावलक्षणै रुपलक्षितं सत् हिमेषु निर्वाप्य स्नात्वा स्नात्वा च तदास्यस्य भैमीमुखस्य आलोकेन दर्शनेन सह वर्तत इति

पलाशदामेति मिलच्छिलीमुखैर्वृता विभूषामणिरश्मिमण्डलैः।
अलक्षि लक्षैर्धनुषामसौ तदा रतीशसर्वस्वतयाभिरक्षिता ॥५३॥
विशेषतीर्थैरिव जह्नुनन्दना गुणैरिवाजानिकरागभूमिका।
जगाम भाग्यैरिव नीतिरुज्ज्वलैर्विभूषणैस्तत्सुषमा महार्घताम्।

सालोकम् तस्य भावः सालोक्यमालोकनीयत्वं रम्यत्वमिति यावत् तदाननसालोक्यं तदानन समानालोकत्वञ्च इतस्याप्तं सत् इणः कर्तरि क्तः। व्यलोक्यत किम्? दृष्टं किमित्युत्प्रेक्षा। निर्वाणकाले यां देवतां ध्यायन्ति तत्सालोक्यं लभन्त इत्यागमः। निशि हिमोपघातान्मुकुलीभावाच्च तत्साम्यकथैव नास्ति दिवा तदभावात्तदा समानालोकैर्वा कथञ्चित्तत्साम्यं लभते पद्ममिति तात्पर्य्यम्॥ ५२॥

पलाशेति। पलाशदाम किंशुकमालेति मिलन्तः शिलीमुखा अलयो वाणाश्च येषु तैरिति भ्रान्तिमदलङ्कारः। विभूषामणिरश्मिमण्डलैराभरणरत्नकान्तिपटलैर्वृता असौ भैमी तदा रतीशस्य कामस्य सर्वस्वतया सर्वधनत्वेन धनुषां लक्षैः शतसहस्रैरभिलक्षिता अलक्षीत्यर्थः। व्यञ्जका प्रयोगाद्गम्योत्प्रेक्षा राजधनं शस्त्रिभिरभिरक्ष्यत इति भावः॥ ५३॥

विशेषेति। विशेषतीर्थैर्यमुना सरयूप्रमुखैः जह्नुनन्दना जाह्नवीव नन्द्यादित्वाल्ल्युप्रत्यये टाप्। गुणैर्विद्याविनयादिभिः अजनादुत्पन्नोऽजानिकः सहजः शैषिकष्ठन् प्रत्ययः। तस्य रागस्य प्रेम्णो भूमिरेव भूमिका आस्पदं पुत्रादिभिरिव भाग्यैर्दैवानुकूल्यैः नीतिरिव उज्ज्वलैर्विभूषणैः तस्याः सुषमा परमा शोभा कान्तिर्महार्घतां महामूल्यता मत्यन्तोत्कृष्टतां जगाम जाह्नव्या इव पावनत्वमुत्कर्षः पुत्रादेः परमप्रेमास्पदत्वन्नीतेः फलप्राप्तिः सुषमायास्तु लोकोत्तरचमत्कारकारित्वमिति विवेकः॥ ५४॥

नलात् स्ववैश्वस्त्यमनाप्तुमानता नृपस्त्रियो भीममहोत्सवागताः।
तदङ्घ्रिलाक्षामदधन्त मङ्गलं शिरःसु सिन्दूरमिव प्रियायुषे ५५
अमोघभावेन सनाभिताङ्गताः प्रसन्नगीर्वाणवराक्षरस्रजाम्।
ततः प्रणम्याधिजगाम सा ह्रिया गुरुर्गुरुब्रह्मपतिव्रताशिषः॥५६
तथैव तत्कालमथानुजीविभिः प्रसाधनासज्जनशिल्पपारगैः।
निजस्य पाणिग्रहणक्षणोचिता कृता नलस्यापि विभोर्विभूषणा५७

नलादिति। नलात्सकाशात् स्वस्य वैश्वस्त्यं वैधव्यं विश्वस्ता विधवे समे इत्यमरः। अनाप्तुमप्राप्तुमानताः अन्यथा नलः स्वभर्तॄन् वैरायमाणान् हनिष्यतीति भयात् भैमीं प्रणता भीमस्य महोत्सवे भैमीविवाह इति आगता नृपस्त्रियः राज्ञस्तद्राजकान्ताः प्रियायुषे न केवलं प्रणमन्तु मङ्गलाचरणादपि स्वभर्तृजीवनाय मङ्गलं सिन्दूरमिव तस्या भैम्याः अङ्घ्राः लाक्षां प्रणामात्संसक्तं सलक्तकं शिरःस्वदधन्त अधारयन् दधधारण इति धातोः लङि तङ्। स्त्रीणां सिन्दूरधारणं पतिमत्या इत्यागमः ॥ ५५ ॥

अमोघेति। ततः प्रसाधनान्तरं ह्रिया गुरुः देवतातिभारा सा भैमी प्रणम्य गुर्वादीनभिवाद्य. अमोघभावेन अवैफल्यगुणेन प्रसन्नानाङ्गीर्वाणाना मिन्द्रादिदेवतानां वराक्षरस्रजां वरदानवाग्गुम्फानां सनाभितां सादृश्य गतास्तदमोघाः गुरूणां पितादीनां ब्रह्मणां ब्राह्मणानां पतिव्रताना माशिष आशीर्वादानभिजगाम लेभे ॥ ५६ ॥

तथैवेति। अथास्मिन्नवसरे सएव कालो यस्मिन् कर्मणि तदविलम्बित मित्यर्थः। तथैव तथा भैम्यास्तथैव प्रसाधनासज्जनं प्रसाधनाकरणं तदेव शिल्पं विद्याविशेषः तस्य पारगैः पारदर्शिभिः अन्तात्यन्तेत्यादिना डप्रत्ययः। अनुजीविभिः सेवकैः निजास्यात्मीयस्य विभोः स्वामिनो नलस्यापि पाणिग्रहणक्षणोचिता विवाहकालोचिता विभूषणा प्रसाधना कृता ॥ ५७ ॥

नृपस्य तत्राधिकृताः पुनः पुन-
र्विचार्य्य तान् बन्धमवापयन् कचान् ।
कलापलीलोपनिधिर्गरुत्त्यजः
स यैरपालापि कलापिसंसदः ॥ ५८ ॥
पतत्त्रिणां द्राघिमशालिना धनु-
र्गुणेन संयोगजुषां मनोभुवः ।
कचेन तस्यार्जितमार्जनश्रिया
समेत्य सौभाग्यमलम्भि कुट्मलैः ॥ ५९ ॥

नृपस्येति। तत्र प्रसाधने अधिकृताः नियुक्ताः तान् वक्ष्यमाणान् नृपस्य नलस्य कचान् केशान् विचार्य्य अपराध मनुचिन्त्य पुनः पुनः बन्धमवापिवन् प्रापितवन्तः आपेर्णौ चङ् द्वितीयस्यैकाचो द्विर्भावः यत्तदोर्नित्यसम्बन्धाद्यैः कचैर्गरुतः पक्षांस्त्यजतीति त्यजः त्यजन्त्याः स्तस्याः कलापिसंसदो मयूरसङ्घस्य कलापस्य वर्हभारस्य लीला विलासः सएवोपनिधिर्न्यासः वर्हमोचनकालकृतो निक्षेप इत्यर्थः। पुमानुपनिधिर्न्यास इत्यमरः। अपालापि अपलपितः पुनः वर्होदयेऽपि न प्रत्यर्पित इत्यर्थः। अतो बन्धनमुचितमिति भावः ॥ ५८ ॥

पतत्त्रिणामिति। कुड्मलैरर्धविकसितकुसुमैः कर्तृभिः द्राघिमशालिना दैर्घ्यशोभिना प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघ्यादेशः। अर्जितमार्जनश्रिया सम्पादितश्लङ्गादिसंस्कारसम्पदा तस्य कचेन केशपाशेन समेत्य मिलित्वा द्राघिमशालिना अर्जितमार्जनश्रिया सम्पादितोत्तेजनसम्पदा धनुर्गुणेनालिमालारूपेण संयोगजुषां सन्धानभाजां मनोभुवः कुसुमेषोः पतत्त्रिणां बाणानां सौभाग्यमिव सौभाग्यं सौन्दर्यमलम्भि लब्धमिति निदर्शनाभेदः ॥ ५९ ॥

अनर्घ्यरत्नौघमयेन मण्डितो
रराज राजा मुकुटेन मूर्द्धनि ।
वनीयकानां स हि कल्पभूरुह-
स्ततो विमुञ्चन्निव मञ्जुमञ्जरीम् ॥ ६० ॥
नलस्य भाले मणिवीरपट्टिका-
निभेन लग्नः परिधिर्विधोर्बभौ ।
तदा शशाङ्काधिकरूपतां गते
तदानने मातुमशक्तिमुद्वहन् ॥ ६१ ॥
बभूव भैम्याः खलु मानसौकसम्
जिघांसतो धैर्य्यभरं मनोभवः ।

अनर्घ्येति । हि यस्मात्स राजा नलः वनीयकानामर्थिनां कल्पभूरुहः कल्पवृक्षः वनीयको याचनको मार्गणो याचकार्थिना वित्यमरः । ततोऽर्थिकल्पवृक्षत्वादनर्घ्यरत्नौघमयेन अमूल्यमणिनिचयप्रचुरेण मुकुटेन मूर्धनि मण्डितोऽलङ्कृतः सन्मञ्जु फलदां मञ्जरीं सकलिकां बालशाखां मुञ्चन्नर्थिनां त्यजन्निव रराजेत्युत्प्रेक्षा ॥ ६० ॥

नलस्येति । विधोरिन्दोः परिधिः परिवेषो नलस्य भाले ललाटे मणिवीरपट्टिकानिभेन मणिमयवीरोचितपट्टमिषेण लग्नः सन् ततः शशाङ्कादधिकं रूपं स्वरूपं सौन्दर्य्यं वा यस्य तस्य भावस्तत्तां गते तदानने नलमुखे मातुमभिव्याप्तुमशक्तिमुद्वहन् बभौ यः परिवेषश्चन्द्रं परिवेष्ट्य शोभते इति स्तोतैकदेशवर्त्तीत्याधाराधेययो रानुरूप्यादधिकालङ्कारः । आधाराधेययोरानुरूप्याभावाधिको मत इति लक्षणात् ॥ ६१ ॥

बभूवेति । भैम्या मानसं स्वान्तं सरोविशेषश्च मानसं स्वान्तमिति विश्वः । तदोकः स्थानं यस्य तं मनोनिष्ठं हंसं चक्राङ्गा मानसौकस इत्यमरः । धैर्य्यभरं धैर्य्यातिशयं धैर्य्यघनं जिघांसतो हन्तुमिच्छतः

उपभ्रु तद्वर्त्तुलचित्ररूपिणी
धनुःसमीपे गुलिकेव सङ्गता ॥ ६२ ॥
अचुम्बि या चन्दनविन्दुमण्डली
नलीयवक्त्रेण सरोजतर्जिना ।
श्रियं श्रिता काचन तारका सखी-
कृता शशाङ्कस्य तयाङ्कवर्त्तिनी ॥ ६३ ॥
न यावदग्निभ्रममेत्युदूढतां
नलस्य भैमीति हरेर्दुराशया ।

हन्तेः सनन्ताल्लट् शत्वादेशः सन्यङोरिति द्विर्भावः अभ्यासाच्चेति कुत्वं अज्झनगमां सनीति दीर्घः । मनोभुवः कामस्य धनुः समीपे गुलिका या पक्षिवेधगुटिका सैवास्योपभ्रु भ्रूसमीपे सामीप्यस्याव्ययीभाव नपुंसकह्रस्वत्वम् । तस्य नलस्य यद्वर्तुलं चित्रं तिलकं तद्रूपिणी सती सङ्गतेवेत्युत्प्रेक्षा बभूव खलु ? चित्रं स्यादद्भुतालेख्यतिलकेति विश्वः । सद्यो भैमी चित्ताकर्षकं वर्तुलतिलकं दधारेत्यर्थः । त्रिपुण्ड्रं सुरविप्राणां वर्तुलं नृपवैश्ययोः । अर्द्धचन्द्रन्तु शूद्राणामन्येषामूर्द्ध्वपुण्ड्रकमिति स्मरणाद्वर्तुलेत्युक्तम् ॥ ६२ ॥

अचुम्बीति । सरोजतर्जिना पद्मधिक्कारिणा नलस्येदं नलीयं वा नामधेयस्येति वृद्धत्वाच्छप्रत्ययः । तेन वक्त्रेण वक्त्रचन्द्रेणेत्यर्थः । सरोजतर्जिविशेषणसामर्थ्याद्वक्ष्यमाणतारायोग्यसामर्थ्याच्च या चन्दनविन्दोर्मण्डली विम्बं पूर्वोक्तवृत्ततिलकमित्यर्थः । विम्बोऽस्त्रीमण्डलं त्रिष्वित्यमरः । अचुम्बि चुम्बिता स्पृष्टेत्यर्थः । तया मण्डल्या तद्व्याजेनेत्यर्थः । शशाङ्कस्याङ्कवर्तिनी समीपवर्तिनी श्रियं श्रिता श्रीः सती काचन तारका दिनकृतसागता काचिदश्विन्याद्यन्यतमा तारका सखी सहचरी कृतेत्युत्प्रेक्षा चन्दनविन्दुतिलके तु नलमुखचन्द्रे नन्दिनतारायुक्तचन्द्रवच्चकासामासेत्यर्थः ॥ ६३ ॥

स विन्दुरिन्दुः प्रहितः किमस्य सा
न वेति भाले पठितुं लिपीमिव ॥ ६४ ॥
कपोलपालीजनितानुविम्बयोः
समागमात् कुण्डलमण्डलद्वयी ।
नलस्य तत्कालमवाप चित्तभू-
रथस्फुरच्चक्रचतुष्कचारुताम् ॥ ६५ ॥
श्रितास्य कण्ठं गुरुविप्रवन्दना-
द्विनम्रमौलेश्चिबुकाग्रचुम्बिनी ।

नेति । स पूर्वोक्तो विन्दुर्वर्तुलचन्दनतिलकः यावानग्निभ्रमो-यावदग्निभ्रमं प्रदक्षिणीकरणपर्यन्त मित्यर्थः । यावदवधारणे इत्यव्ययीभाव. । भैमी नलस्य उदूढता सुद्वाहसंस्कृतत्वं भार्यात्वं नैति प्राप्नोतीति हरेरिन्द्रस्य दुराशया वृथाभिलाषेण हेतुना सा भैमी अस्य नलस्य किं भवेदिति न वेति भाले लिपीं ललाटलिखितं तदिकारादीकारः । पठितुं वाचयितुं प्रहित इन्द्रेण प्रेषितः इन्दुरिवाभातीति शेषः उत्प्रेक्षा ॥ ६४ ॥

कपोलेति । नलस्य कुण्डलमण्डलद्वयी कर्णवेष्टन युगली कपोलपालीसाम्यात् जनितयोः गण्डमण्डलसंक्रान्तयोर्निजानुविम्बयोः स्वप्रतिविम्बयोः समागमान्मेलनात् तत्कालं तस्मिन् काले चित्तभुवः कामस्य रथे स्फुरतः चक्रचतुष्कस्य चारुता मवाप रथस्य चतुश्चक्रत्वात् कुण्डलद्वयं स्वप्रतिविम्बद्वयेन सह मन्मथः श्रितेति रथचक्रचतुष्टयवती भातीत्यर्थः ॥ ६५ ॥

श्रितेति । गुरूणां मातापित्रादीनां विप्राणाञ्च वन्दनात्प्रणामात् विनम्रमौलेर्नम्रशिरसोऽस्य नलस्य कण्ठं श्रिता चिबुकं मधुराधरभागः अधस्ताच्चिबुकम् इत्यमरः । तस्याग्रं चुम्बति स्पृशति इति तच्चुम्बिनी मुक्ता-

अवाप मुक्तावलिरास्यचन्द्रसः
स्रवत्सुधातुन्दिलविन्दुवृन्दताम् ॥ ६६ ॥
यदुद्गता श्रीर्बलवान् बलं द्विषन्
बभूव यस्याजिषु वारणेन सः ।
अपूपुरत्तान् कमलार्थिनो घनान्
समुद्रभावं स बभार तद्भुजः ॥ ६७ ॥

वलिरास्यचन्द्रमसो मुखचन्द्रात् स्रवन्त्या सुधायास्तुन्दिलानां स्थूलानां विन्दूनां वृन्दतां समूहत्वमवाप तद्भावित्यर्थः ॥ ६६ ॥

यदिति । श्रीः सम्पत्तिः पद्मा च यदुद्गता यस्मात्समुद्राद्भुजाच्चोद्गता यद्वा यदिति भिन्नं पदम् अव्ययं पञ्चम्यर्थे योज्यम् । शोभा सम्पत्तिपद्मे च लक्ष्मीः श्रीरिव कथ्यत इति विश्वः । बलं सैन्यं द्विषन् विरुन्धन् स नलः आजिषु युद्धेषु यस्य भुजस्य कर्तृसम्बन्धिना वारणेन शत्रुनिवारणशक्त्या बलवान् प्रबलो बभूव अन्यत्र सः प्रसिद्धो बलं द्विषन् बलासुरस्य द्विड् इन्द्रः द्विषोऽमित्र इति शतृ प्रत्ययोऽजादेशः तस्यापि द्विषिति प्रत्याहारान्नलोकेत्यादिना षष्ठीप्रतिषेधात्कर्मणि षष्ठी। यस्य समुद्रस्य सम्बन्धिना वारणेनापि साधनेनाजिषु बलवान् बभूव बलं सैन्यं बलं स्थौल्यं बलं शक्तिर्बलोऽसुर इति शाश्वतः । यो भुजः घनान् निरन्तरान् तान् प्रसिद्धान् कमलार्थिनो लक्ष्मीकामान् अन्यत्र यः समुद्रः तान् कमलार्थिनो जलार्थिनो घनान् मेघानपूपुरत् पूरयामास पिपर्तेः पृणोतेर्वा लुङ् । कमला श्रीर्जलं पद्मं कमलं कमलो मृगः घनं सान्द्रं घनं वाद्यं घनो मुस्ता घनेऽम्बुद इति च शाश्वतः । स तद्भुजो नलबाहुः मुद्रया सह वर्तत इति समुद्रो मुद्रयाऽङ्कितः स मुनक्तीति समुद्रः सागरश्च षा विपञ्चीत्यादिना जलधेः कारणादिकः ठप्रत्ययः । तस्य भावं समुद्रत्वं बभार मुद्रिताभरणमामुमोचेति प्रकृतार्थः सागरार्थस्तु ध्वनिरेव विशेषणविशेष्ययोरुभयोरिति श्लिष्टत्वादिति ॥ ६७ ॥

कृतार्थयन्नर्थिजनाननारतम्
बभूव तस्यामरभूरुहः करः।
तदीयमूले निहितं द्वितीयवत्
ध्रुवं दधे कङ्कणमालवालताम्॥ ६८॥
रराज दोर्मण्डनमण्डलीजुषोः
स वज्रमाणिक्यसितारुणत्विषोः।
मिषेण वर्षन् दशदिङ्मुखोन्मुखौ
यशःप्रतापाववनीजयार्जितौ॥ ६९॥
घने समस्तापघनावलम्बिनाम्
विभूषणानां मणिमण्डले नलः।

कृतार्थयन्निति। तस्य नलस्य करेण हस्तेनानारतमश्रान्तमर्थिजनान् कृतार्थयन् सार्थान् कुर्वन् अमरभूरुहः कल्पवृक्षो बभूव तदीये कल्पवृक्षसम्बन्धिनि मूले मणिबन्धे निहितमासक्तं द्वितीयवत् सद्वितीयं कङ्कणं कनकवलयमालवालतान्दधे दधार ध्रुवमित्युत्प्रेक्षायाम्॥ ६८॥

रराजेति। स नलो दोर्मण्डने मण्डलीजुषोः बाहुभूषणपटलभाजोर्वज्राणां हीराणां माणिक्यानां पद्मरागाणाञ्च यथासङ्ख्यं सितारुणयोः श्वेतलोहितयोः त्विषोः कान्त्योर्मिषेण दशदिगन्तोन्मुखौ दशदिगन्तव्यापिनौ अवनीजयार्जितौ भूविजयसम्पादितौ यथासङ्ख्यं यशःप्रतापौ वर्षन् रराज अत्र द्विषोर्मिषेणेति छलादिशब्दैरसत्यत्व प्रतिरूपोऽपह्नवालङ्कारभेदः। तस्य पूर्वसूचितयथासङ्ख्यद्वयभेदेन सङ्करः वर्षन्निवेत्युत्प्रेक्षा गम्यते सा च सापह्नवेति सङ्करः॥ ६९॥

घन इति। नलः समस्तापघनावलम्बिनां सर्वावयवगतानां अङ्गं प्रतीकोऽवयवोऽपघन इत्यमरः। विभूषणानां सम्बन्धिनि घने सान्द्रे मणिमण्डले स्वरूपरेखामाकारसंस्थानं अवलोक्य सेवया वित्तः सेवाचणाः सेवाकुशलः तेन वित्तञ्चुप्चणपाविति चणप्प्रत्ययः।

स्वरूपरेखामवलोक्य निष्फली-
चकार सेवाचणदर्पणार्पणम् ॥ ७० ॥
व्यलोकि लोकेन न केवलं चलन्-
मुदा तदीयाभरणार्पणद्युतिः ।
अदर्शि विष्फारितरत्नलोचनैः
परस्परेणैव विभूषणैरपि ॥ ७१ ॥
ततोऽनु वार्ष्णेयनियन्तृकं रथम्
युधि क्षतारिक्षितिभृज्जयद्रथः ।

तेषां दर्पणार्पणं दर्पणसंनिधापनं निष्फलीचकार दर्पे । काकतालीयन्यायेन मणिमण्डली नैव क्षतत्वादिति भावः । अतएव समाध्यलङ्कारोऽयम् । एकस्मिन् कारणे कार्य्यसाधनेऽन्यत्वमागतेति । काकतालीयनयतः स समाधिरुदीयत इति लक्षणात् ॥ ७० ॥

व्यलोकीति । तदीयानां नलीयानामाभरणानामर्पणेनामोचनेन या द्युतिः शोभा सा चलन्मुदा लोकेन जनेन केवलं न व्यलोकि विलोकिता किन्तु विष्फारितानि विस्तारितानि रत्नान्येव लोचनानि यैस्तैर्विभूषणैरपि अचेतनैरपीति भावः परस्परेण अदर्शि किमुत चेतनलोकेनेत्यर्थः । अर्थापत्तिरलङ्कारः सा रत्नलोचनेति रूपकोत्थेति सङ्करः तेन विभूषणानि रत्नलोचनै रन्योन्यं पश्यन्तो वा दृश्यन्त इत्युत्प्रेक्षा व्यज्यते ॥ ७१ ॥

ततोऽन्विति । ततः प्रसाधनानन्तरं युधि क्षता अरिक्षितिभृतः शत्रुभूपा येन सः जयन्रथो यस्य सः जयद्रथः जतरथ इत्यर्थः । अन्यत्र अरिक्षितिभृत् चासौ जयद्रथः सैन्धवश्च स क्षतो येन स तथोक्तः जन्यानां स्निग्धानां यात्रया विवाहयात्रया मुदितो हृष्टः अन्यत्र युद्धयात्रया मुदितः जन्यं रणे च जनितं वित्तेऽति जननीययोः । ज्ञातिभृत्या नवोढाया जन्या स्निग्धा वरस्य चेति वैजयन्ती । किरीटवान् किरीटयुक्तः अन्यत्र

नृपः पृथासूनुरिवाधिरूढवान्
स जन्ययात्रामुदितः किरीटवान् ॥ ७२ ॥
विदर्भनाम्नस्त्रिदिवस्य वीक्षितुम्
रसोदयादप्सरसस्तमुज्ज्वलम् ।
गृहाद्गृहादेत्य कृतप्रसाधना
व्यराजयन् राजपथानथाधिकम् ॥ ७३ ॥
अजानती कापि विलोकनोत्सुका
समीरधूतार्द्धमपि स्तनांशुकम् ।
कुचेन तस्मै चलतेऽकरोत् पुरः
पुराङ्गना मङ्गलकुम्भसम्भृतिम् ॥ ७४ ॥

किरीटवानिति प्रसिद्धः स नृपो नलः पृथासूनुरर्जुन इव वार्ष्णेयो वार्ष्णेय नामा अन्यत्र वृष्णेरपत्यं पुमान् वार्ष्णेयः कृष्णश्च इतश्चानिञ् इति ठक्। स नियन्ता सारथिर्यस्य स वार्ष्णेयनियन्तृकन्नद्यृतश्चेति कप्। रथ मधिरूढ़वान् अध्यरोहत श्लिष्टविशेषणेयं पूर्णोपमा ॥ ७२ ॥

विदर्भेति। अथ विदर्भनाम्नो विदर्भदेशाख्यस्य त्रिदिवस्य स्वर्गस्य सम्बन्धिन्योऽप्सरसः तत्कल्पाः पौराङ्गना उज्ज्वलं दीप्यमानन्तं नलं वीक्षितुं रसोदयाद्रागातिरेकात्कृतं प्रसाधनं याभिस्ता अलङ्कृताः सत्यो गृहात् गृहात् वीप्सायां द्विर्भावः। एत्यागत्य राजपथान् राजमार्गान् अधिकं व्यराजयन्नशोभयन् ॥ ७३ ॥

अथ वाराङ्गनानां तात्कालिकीः शृङ्गारचेष्टा नवभिर्वर्णयति अजानतीत्यादि। कापि पुराङ्गना विलोकनोत्सुका नलदर्शनासक्ता सती समीरेण धूत मर्धं यस्य अर्धापसृतमपि स्तनांशुक मजानती व्यासङ्गादपि कुचेन स्रस्तांशुकेन कुचकुम्भेन चलते गृहान्निर्गच्छते तस्मै नलाय पुरोऽग्रे मङ्गलकुम्भसम्भृतिं मङ्गलार्थं पूर्णकुम्भ सम्भरण मकरोत् प्रवेशोत्सवेषु नववस्त्रवेष्टितं पूर्णकलशमग्रे स्थापयेदित्याचारः ॥ ७४ ॥

सखीं नलं दर्शयमानयाङ्कतो
जवादुदस्तस्य करस्य कङ्कणे ।
विषज्य हारैस्त्रुटितैरतर्कितैः
कृतं कयापि क्षणलाजमोक्षणम् ॥ ७५ ॥
लसन्नखादर्शमुखाम्बुजस्मित-
प्रसूनवाणीमधुपाणिपल्लवम् ।
यियासतस्तस्य नृपस्य जज्ञिरे
प्रशस्तवस्तूनि तदेव यौवतम् ॥ ७६ ॥

सखीमिति । अङ्कतः कुतश्चित् श्वेतच्छत्रादिचिह्नात् उत्सङ्ग चिह्नयोरङ्क इत्यमरः । सखीं नलं दर्शयमानया सख्या नलं दर्शयमानयेत्यर्थः । णिचश्चेत्यात्मनेपदम् उपसङ्ख्यानादणि कर्त्री सख्या वैकल्पिकं कर्मत्वं । कयापि पुराङ्गनया जवादुदस्तस्य नलदर्शनायोत्क्षिप्तस्य करस्य सम्बन्धिनि कङ्कणे विषज्य लगित्वा त्रुटितैः छिन्नै रतर्कितै रचिन्तितोपनतैः हारैः क्षणं लाजमोक्षणं कृतं तदेव माङ्गलिके लाजावकिरणं जातमित्यर्थः । आवश्यकश्चायमाचारः यथोक्तं रघुवंशेऽपि अवाकिरन् वयुर्द्धास्ते लाजैः पौरयोषित इति ॥ ७५ ॥

लसदिति । नखा एवादर्शाः मुखान्येवाम्बुजानि स्मितान्येव प्रसूनानि वाण्येव मधूनि माक्षिकाणि पाणय एव पल्लवास्तेषां द्वन्द्वः ते लसन्तो यस्मिन् तत्तथोक्तं तद्यौवतं युवतिसमूह एव गार्भिणं यौवतं गणे इत्यमरः । भिक्षादिभ्योऽण् युवतिशब्दस्य गणे पठण सामर्थ्यादेव भस्याढे तद्धित इति पुंवद्भावः । यियासतोऽभिजिगमिषतः यातेः सनन्ताल्लट् शत्रादेशः । तस्य नृपस्य नलस्य प्रशस्तवस्तूनि तत्कालोचितमङ्गलद्रव्याणि जज्ञिरे जातानि जनेर्लिटि गमहनेत्यादिना उपधालोपः ॥ ७६ ॥

करस्थताम्बूलजिघत्सुरेकिका
विलोकनैकाग्रविलोचनोत्पला।
मुखे निचिक्षेप मुखद्विराजता-
रुषेव लीलाकमलं विलासिनी ॥ ७७ ॥

कयापि वीक्षाविमनस्कलोचने
समाज एवोपपतिः समीयुषः।
घनं सविघ्नं परिरम्भसाहसै-
स्तदा तदालोकनमन्वभूयत ॥ ७८ ॥

दिदृक्षुरन्या विनिमेषवीक्षणा
नृणामयोग्यां दधती तनुश्रियम् ।

करस्थेति। करस्थताम्बूलं अत्तु मिच्छुर्जिघत्सुः घसादेशात्सनन्तादुप्रत्ययः। एकैवैकिका विलोकनैकाग्रे तदेकासक्ते विलोचनोत्पले यस्याः सा अतो काचित् विलासिनी मुखस्य द्वितीयो राजा द्विराजः वृत्तिविषये सङ्ख्याशब्दस्यापूरणार्थत्वं त्रिभागेत्यादिवद्द्विराजः। द्विराजस्य भावोद्विराजता तत्र रुषा रोषेणेवेत्युत्प्रेक्षा। लीलाकमलं मुखे निचिक्षेप विदधे एतेन विभ्रमाख्य श्चेष्टानुभाव उक्तः विभ्रम स्त्वरयाऽकाले भूषास्थान विपर्य्यय इति लक्षणात् ॥ ७७ ॥

कयापीति। कयापि कान्तया विनिमेष वीक्षया नल दर्शनलालसेन विमनस्के विमुखे विषयान्तर विमुखे लोचने यस्य तस्य तस्मिन् समाजे जनसमूह एव समीयुषः समेतस्योपपतेर्जारस्य घनं गाढं यथा तथा परिरम्भसाहसैरालिङ्गनसाहसकृत्यैः तदा तत्काले नलविलोकनं सविघ्नं यथा तथा अन्वभूयत अनुभूतं कामान्धाः किं न कुर्वन्तीति भावः ॥ ७८ ॥

दिदृक्षुरिति। दिदृक्षुर्नलं द्रष्टुमिच्छुः अतएव विनिमेषवीक्षणा अनिमेषदृष्टिः नृणाम योग्याम मानुषीं तनुश्रिय मङ्गसौन्दर्यं दधती

पदाग्रमात्रेण यदस्पृशन्महीम्
न तावता केवलमप्सरोऽभवत् ॥ ७९ ॥
विभूषणस्रंसनशंसनार्पितैः
करप्रहारैरपि धूननैरपि ।
अमान्तमन्तः प्रसभं पुरा परा
सखीषु सम्मापयतीव सम्मदम् ॥ ८० ॥
वतंसनीलाम्बुरुहेण किं दृशा
विलोकमाने विमनीबभूवतुः ।
अपि श्रुती दर्शनसक्तचेतसाम्
न ते न ते शुश्रुवतुर्मृगीदृशाम् ॥ ८१ ॥

अन्या पदाग्रमात्रेण महीं यदस्पृशत् तावता केवलं महीतलस्पर्शेनैव अप्सरोऽभवत् अन्यथाप्सरसोऽस्याः को भेद इति भावः। अत्र महीमस्पृशदित्युपमेयस्योपमानादीषदल्पत्वकथनेन भेदप्रधानसादृश्योक्तिव्यतिरेकालङ्कारभेदः ! भेद प्रधानं साधर्म्यमुपमानोपमेययोः। आधिक्याल्पत्वकरणाद् व्यतिरेकः स उच्यत इति लक्षणात् ॥ ७९ ॥

विभूषणेति। परान्या काचित् सखीष्वन्तरन्तःशरीरे अमान्तमत्याधिक्यादुल्लसन्तं सम्मदं हर्षं विभूषणानां स्रंसनस्य शंसनाय यथास्थानाभिवेशनाय अर्पितैः प्रयुक्तैः करप्रहारैः पाणिघातैरपि तथा धूननैरपि प्रसभं बलात् पुरा संमापयतीव सम्मापयामासेवेत्युत्प्रेक्षा यावत्पुरानिपातयोर्लड़ितिभूते लट्। यदा तण्डुलादिसम्मापनाय प्रस्थादिकं मुष्टिभिर्बध्नन्ति धुवन्ति च तद्वदिति भावः ॥ ८० ॥

वतंसेति। दर्शनसक्तचेतसां नलविलोकनासक्तचित्तानां मृगीदृशां स्त्रीणां श्रुती कर्णौ वतंसनीलाम्बुरुहेण कर्णावतंसोत्पलेन दृशा चक्षुषेति

काश्चिन्निर्माय चक्षुःप्रसृतिचुलुकितं तास्वशङ्कन्त कान्ता
मौग्ध्यादाचूडमोघैर्निचुलितमिव तं भूषणानां मणीनाम्।
साहस्रीभिर्निमेषाक्षतमतिभिरयं दृग्भिरालिङ्गितः किम्
ज्योतिष्टोमादियज्ञश्रुतफलजगतीसार्व्वभौमभ्रमेण ॥ ८२ ॥
भवन् सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी
तमूर्वश्याः प्राणानपि विजयमानस्तनुरुचा।

रूपकं विलोकमाने नलं पश्यन्त्यौ अविमनसौ विमनसौ वभूवतुः दुःखिते किमित्युत्प्रेक्षा अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्चेति च्विप्रत्ययः स लोपश्च अस्य च्वावितीकारः। तेन विमनीभावेन ते न शुश्रुवतुः अन्यथा कथं पथि करणानां स्वविषयग्रहणमिति भावः ॥८१॥

काश्चिदिति। तासु पौरकान्तासु मध्ये काचित्कान्ता भूषणानां सम्बन्धिनां मणीनामोघैः आचूडमाशिखण्डकम् अभिविधवाव्ययीभावः। निचुलितं छादितमिव स्थितं तं नलं चक्षुर्भ्यामिव प्रसृतिभ्यां निकुब्जपाणिभ्यां पाणिर्निकुब्जः प्रसृतिरित्यमरः। चुलुकितं निर्माय गृहीतं कृत्वा अधिकं दृष्ट्वेत्यर्थः। मौग्ध्यान्मोहादशङ्कन्त शङ्काप्रकारमेवाह अयं पुमान् ज्योतिष्टोमादियज्ञानां श्रुतं ज्योतिष्टोमादिवाक्यावगतं फलं फलभूता जगती लोकः स्वर्गस्तस्याः सार्वभौमः सर्वभूमेरीश्वरः इन्द्रः सर्वभूमिपृथिवीभ्यामणञाविति अण्प्रत्ययः। इति भ्रमेण भ्रान्त्या निमेष मक्षतमनिमिषक्षतबुद्धिभिः अनिमेषाभिरित्यर्थः। साहस्रीभिः सहस्रसङ्ख्याकाभिः अण्चेति मत्वर्थीयोऽण् प्रत्ययः। दृग्भिर्नेत्रैरालिङ्गितः किमित्याशङ्कन्तेत्येकान्वयो वा मणिभूषितमेनं दृष्ट्वा पौरकान्ता अस्मिन् इन्द्रभ्रान्त्या नेत्रसहस्रमेनं प्राप्तं किमित्युत्प्रेक्षितवत्य इत्यर्थः। भ्रान्तिमत्सङ्कीर्णेयमुत्प्रेक्षा ॥ ८२ ॥

भवन्निति। सुद्युम्नो नाम राजा स्त्री भवन्नीश्वरशापात् सन् यस्य पुरूरवसो जननी माताभूत् उर्वश्याः प्राणान् प्राणभूत मप्सरो

हरारब्धक्रोधेन्धनमदनसिंहासनमसा-
वलङ्कर्मीणश्रीरुदभवदलङ्कर्त्तुमधुना ॥ ८३ ॥
अर्थी सर्वसुपर्वणां पतिरसावेतस्य यूनः कृते
पर्य्यत्याजि विदर्भराजसुतया युक्तं विशेषज्ञया ।
अस्मिन्नाम तया हृते सुमनसः सन्तोऽपि यन्निर्ज्जरा
जाता दुर्मनसो न सोढुमुचितास्तेषां तु सानौचिती ॥ ८४ ॥

मनोहारिरूप मित्यर्थः। तस्या मिलायां बुधादुत्पन्न मैलं पुरूरवस मैलं तनुरुचा अङ्गलावण्येन विजयमानो अतिशयानोऽसौ नलः हरेणारब्धस्यावेधितस्य क्रोधस्य क्रोधाग्नेरिन्धकस्य दाह्यस्य मदनस्य सिंहासन मलङ्कर्तुम् अधिष्ठातु मलङ्कर्मणि अलङ्कर्मीणः कर्मक्षमोऽलङ्कर्मीण इत्यमरः। अषड़क्षेत्यादिना खप्रत्ययः। सा श्री यस्य सः मदन राज्याभिषेकार्हः सन्नधुना उदभवत् ततोऽपि सुन्दर इत्यर्थः। अत सुद्युम्नो नाम राजा मृगयासक्तो हिमवत्पार्श्वे पार्वतीवनं प्रविष्टः ईश्वरशापात् स्त्रीत्वं प्राप्य बुधात्पुरूरवसमतिसुन्दरमिन्दुवंशवर्तकं जनयामासेति पौराणिको कथानुसन्धेया॥ ८३॥

अर्थीति। अर्थित्वं प्राप्तोऽसौ प्रसिद्धः सर्वसुपर्वणां पतिर्देवेन्द्र एतस्य यूनः कृते यन्नलार्थं विशेषज्ञया विदर्भराजसुतया वैदर्भ्या पर्यत्याजि परित्यक्तस्त्यक्तः युक्तम् अन्यथा अज्ञत्वं स्यादिति भावः। किन्तु अस्मिन्नले त्वया वैदर्भ्यां हृते सति निर्जरा देवा इन्द्रादयः सुष्ठु मन्यन्ते जानन्तीति सुमनसः सुन्नोऽजाणादिकोऽसुन्प्रत्ययः। शोभनचित्ताश्च सन्तोऽपि दुर्मनसो दूनमनसो जाता नामेति यत् नामेति सम्भावनायान्तेषां देवानां सा तु दुर्मनीकरणन्तु विधेयप्राधान्यात् स्त्रीलिङ्गनिर्देशः। अनौचिती अनौचित्यं सोढुं नोचिता विशेषज्ञाना सुत्कृष्टवस्तुस्वीकरण सुचितमेव किन्तु देवतादिवशीकरण साहसमनुचित मिति भावः॥८४॥

अस्योत्कण्ठितकण्ठलोठिवरणस्रक्साक्षिभिर्दिग्धवैः
स्वं वक्षः स्वयमस्फुटन्न किमदः शस्त्रादपि स्फोटितम् ।
व्यावृत्योपनतेन हा शतमखेनाद्य प्रसाद्या कथम्
भैम्या व्यर्थमनोरथेन च शची साचीकृतास्याम्बुजा ॥ ८५ ॥
मा जानीत विदर्भजामविदुषीं कीर्त्तिं मुदः श्रेयसीम्
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीम् ।
कः शच्या रचयाञ्चकार चरितं काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कैः ॥ ८६ ॥

अस्येति । अस्य नलस्योत्कण्ठिते कण्ठे लुण्ठतीति लोठिन्या वरणस्रजः साक्षिभि र्दिग्धवैः स्वयं स्वतः स्फुटदपि तुटदपि इदं स्वं वक्षः शस्त्रादपि किं न स्फोटितं तत्र यावद्विस्फोटितव्य मेवेत्यर्थः । किञ्चाद्य भैम्यां व्यर्थमनोरथेन व्यावृत्योपनतेन प्रत्यावृत्तेन शतमखेनेन्द्रेण साचीकृतं तिर्य्यक्कृतम् आस्याम्बुजं यस्याः सा पराङ्मुखी शची कथं प्रसाद्या प्रसादयितव्या न कथञ्चिदित्यर्थः हा विषादे ॥८५॥

मेति । विदर्भजां वैदर्भीमविदुषीम विशेषज्ञां मा जानीत मन्यध्वं देवानन्दं विहाय मानुषानन्दे प्रवृत्ता कथमविदुषीशङ्कान्निरस्यति । मुद आनन्दात्कीर्त्तिं श्रेयसीं प्रशस्यतरां ततः किं तत्राह सेयं दमयन्ती प्रयोजका मघवता इन्द्रेण प्रयोज्येन स्वमात्मानं द्वितीयां शची मचीकरत् नकारितवती नेन्द्रं वव्र इत्यर्थः । करोतेर्णौ चङ्युपधाया ह्रस्वः चङीति द्विर्भावे सन्वद्भावे सन्वत इत्यभ्यासस्यात्वं दीर्घो लघोरिति दीर्घः । भद्रम् इन्द्रस्यावरणं साधु कीर्तिकरत्वादित्यर्थः । अथ शचीत्व मेवाह कः कविः शच्याश्चरिते काव्यं रचयाञ्चकार स कवि र्नोऽस्मभ्यं कथ्यतां न कोऽपीत्यर्थः । एवं स दमयन्त्याः सम्बन्धिनी रसधुनी रसवती तटिनी ह्रादिनी धुनीत्यमरः । तस्याः पात्रे कूलद्वयमध्ये

[७]

वैदर्भीबहुजन्मनिर्मिततपःशिल्पेन देहश्रिया
नेत्राभ्यां स्वदते युवायमवनीवासः प्रसूनायुधः।
गीर्वाणालयसार्वभौमसुकृतप्राग्भारदुष्प्रापया
योगं भीमजयानुभूय भजतामद्वैतमद्य त्विषाम् ॥ ८७ ॥
स्त्रीपुंसव्यतिषञ्जनं जनयतः पत्युः प्रजानामभू-
दभ्यासः परिपाकिमः किमनयोर्दाम्पत्यसम्पत्तये।
आसंसारपुरन्ध्रिपूरुषमिथः प्रेमार्पणक्रीडया-
प्येतज्जम्पतिगाढरागरचनात् प्राकर्षि चेतोभुवः ॥ ८८ ॥

प्रवाहस्थान इत्यर्थः। पात्र तु भजने योग्ये वित्ते कूलद्वयान्तरे इति वैजयन्ती। चरित्रे कैः कविभिर्न करिष्यते सर्वैरपि स्वतएवेत्यर्थः। स्वयमेव दृष्टान्त इति कवेस्तात्पर्य्यं तस्मात्कीर्त्तिकरत्वादेतदेव भद्रमिति भावः ॥ ८६ ॥

वैदर्भीति। अवन्यां वासो यस्य भूलोकमन्मथोऽयं युवा नलो वैदर्भ्या दमयन्त्या बहुषु जन्मसु निर्मितेन तपसा शिल्पेन निर्माणेन दमयन्तीतपःफलेनेत्यर्थः। देहश्रिया कायकान्त्या नेत्राभ्यां स्वदते रोचते नेत्रानन्दं करोतीत्यर्थः। रुच्यर्थानां प्रीयमाणत्वाच्चतुर्थी। तस्मादयं गीर्वाणालयसार्वभौमसुकृतप्राग्भारैर्नाकनायकसुकृतराशिभिरपि दुष्प्रापया इन्द्रादिदुर्लभयेत्यर्थः। भीमजया भैम्या योगमनुभूय अद्य त्विषां कान्तीनामद्वैतमद्वितीयत्वमसाधारण्यं भजतां गच्छतु ॥ ८७ ॥

स्त्रीपुंसेति। स्त्री च पुमांश्च स्त्रीपुंसौ अचतुरादिना निपातनात् साधुः। तयोर्व्यतिषञ्जनं जनयतः सङ्घटनं कुर्वतः प्रजानाम्पत्युः स्रष्टुः परिपाकेन निर्वृत्तः परिपाकिमः परिपक्व इत्यर्थः। भावप्रत्ययान्तादिमनिज्वक्तव्यः। अभ्यासः स्वाभ्यासः अनयोर्दमयन्ती नलयोर्दाम्पत्यस्य जायापतित्वस्य सम्पत्तये सम्पादनायाभूत् किं? नोचेत्कथमीदृगनुरूपसङ्घटकत्वमिति भावः।

ताभिर्दृश्यत एष यान् पथि महाज्यैष्ठीमहे मन्महे
यद्दृग्भिः पुरुषोत्तमः परिचितः प्राङ्मञ्चमञ्चत्कृतः ।
सा स्त्रीराट् पतयालुभिः शितिसितैः स्यादस्य दृक्चामरैः
सस्ने माघसघाभिघातियमुनागङ्गौघयोगे यया ॥८९॥

किञ्च चेतोभुवः कामस्यापि आसंसारं संसारमारभ्य अभिविधा वव्ययीभावः । पुरन्ध्रीपुरुषयोः स्त्रीपुंसयोः मिथोऽन्योन्यं प्रेम्णोऽर्पण मनुरागोत्पादनमेव क्रीड़ा तयापि एतज्जम्पत्योर्यो गाढोरागः प्रेमा तस्य रचनात् सम्पादनात् प्राकर्षि प्रकर्षङ्गमित इत्यर्थः । तथाभ्यासं विना कथमीदृगन्योन्यानुरागजननचातुरीभावः कृषेर्ण्यन्तात्कर्मणि लुङ् । दम्पती जम्पती जायापतीत्यमरः । जायाशब्दस्य दम्भावो जम्भावश्च निपातितः ॥८८॥

ताभिरिति । ताभिः स्त्रीभिरेष नलः पथि राजपथे यान् गच्छन् यातेर्लटः शत्रादेशः । दृश्यते याभिः पूर्वस्मिन् जन्मनि ज्येष्ठया नक्षत्रेण युक्ता पौर्णमासी नक्षत्रेण युक्तः काल इति ङीप् । सा महती पूज्या ज्येष्ठी तस्यां यो मह उत्सवः तस्मिन् मञ्चपर्य्यङ्क महन् मञ्चस्य इत्यर्थः । शयनं मञ्चपर्य्यङ्क पल्यङ्काः खट्टका समा इत्यमरः । पुरुषोत्तमः परिचितः कृतः उपासित इत्यर्थः । तादृक् सुकृतं विना कथमीदृङ्महाभागदर्शनं लभ्यत इति भावः । यथाहुः । दोलारूढञ्च गोविन्दं मञ्चस्थं मधुसूदनम् । रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते । सा स्त्री पतयालुभिरुपरिपातुकैः स्पृहि गृहिपतीत्यादिना चौरादिकात्पतेरालुचिरयान्ताल्वित्यादिना णेरयादेशः । शितिभिः सितैश्चास्य नलस्य दृग्भिः दृष्टिभिरेव स्त्रीणां राट् स्त्रीराट् सत्सूद्विषेत्यादिना क्विप् । राजचिह्नत्वात् चामराणामिति भावः । यया स्त्रिया अघान्यतिहन्तीत्यघाति घाती पापविनाशी ताच्छील्ये णिनिः हो हन्तेरिति कुत्वं हनस्ताच्छिल्यणलोरिति नकारस्य तकारः । तस्मिन्यमुनागङ्गयोरोघयोगे समीपे गङ्गायमुनासङ्गमे प्रयाग इत्यर्थः । सामीप्ये अव्ययीभावः तृतीयासप्तम्यो

वैदर्भीविपुलानुरागकलनासौभाग्यमत्राखिल-
क्षौणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः।
किञ्चास्माकनरेन्द्रभूसुभगतासम्भूतये लग्नकम्
देवेन्द्रावरणप्रसादितशचीविश्राणिताशीर्वचः॥ ९०॥
आस्तामममपासनान्मखभुजां भैम्यैव राजव्रजे
तादर्थ्यागमनानुरोधपरया युक्तार्जि लज्जास्रजा।

वंफलमिति विकल्प दम्भावाभावः। मघाभिर्नक्षत्रेण युक्ता पौर्णमासी माघी नक्षत्रेण युक्तः काल इत्यण् स माघोऽस्मिन्निति माघः साऽस्मिन् पौर्णमासीति संज्ञायामित्यण्प्रत्ययः। तं माघं माघमासम् अत्यन्त संयोगे द्वितीया। सस्ने स्नातं स्नातेर्भावे क्त्। यया प्रयागे सेयमेतेनावलोक्यते अन्यथा कथमीदृङ्महालाभ इति भावः। अत्राप्याहुः सितासितेषु यैः स्नातं माघमासे युधिष्ठिर!। न तेषां पुनरावृत्तिः कल्पकोटिशतैरपीति मन्महे वाक्यद्वयार्थः कर्म॥ ८९॥

वैदर्भीति। अखिलक्षौणीचक्रशतक्रतौ अखिलभूलोकदेवेन्द्रे अत्रास्मिन्नले वैदर्भीविपुलानुरागकलना दमयन्तीगाढानुरागलाभः सैव सौभाग्यं वाल्लभ्यं कर्म तस्या भैम्या वृत्त वृत्त क्रमैरितीव चरित्रप्रकारैरिन्द्रप्रतिषेधादिभिः कर्तृभिः वृत्तं पद्ये चरित्रे च वर्तुलं निस्तलं वृत्तमित्युभयत्राप्यमरः। निजगदे गदितं तादृगनुरागाभावे कथमिन्द्रादिप्रतिषेध इति भावः। किञ्च देवेन्द्रस्यावरणेन वरणप्रतिषेधेन प्रसाधितया सन्तोषितया शच्या विश्राणितं दत्तमाशीर्वच एव अस्माक मियमास्माकी युष्मदस्मदोरन्यतरस्यां खञ् चेति चकारादण् तस्मिन्नणि च युष्माकास्माकाविति अस्माकादेशः। तस्या नरेन्द्र भुवो राजपुत्र्या भैम्याः सुभगतायाः पतिवाल्लभ्यस्य सम्भूतये लाभाय लग्नकं प्रतिभूः स्युर्लग्नकाः प्रतिभुव इत्यमरः। स्त्रीणां सौभाग्यस्य शचीप्रसादलभ्यत्वादिति भावः॥ ९०॥

आत्मानं त्रिदशप्रसादफलितां पत्ये विधायानया
ह्रीरोषापयशः कथानवसरः सृष्टः सुराणामपि ॥ ९१ ॥

इत्यालेपुरनुप्रतीकनिलयालङ्कारसारश्रियाऽ
लङ्कुर्वत्तनुरामणीयकममूरालोक्य पौरस्त्रियः ।
सानन्दं कुरुविन्दसुन्दरकरस्यानन्दनं स्यन्दनम्
तस्याध्यास्य यतः शतक्रतुहरित्क्रीडाद्रिमिन्दोरिव ॥ ९२ ॥

आस्तुताममिति । राज्ञां भूभुजां राजव्रजे स्वयम्वरगतराजसमाजे तादर्थ्येन नलाद्यर्थं यदभिगमनं स्वयम्वरप्रवेशनं तस्यानुरोधोऽनुवर्तनमेव परं प्रधानं यस्यास्तया नलैकपरया भैम्या आस्तुताममिन्द्रपर्यन्तमभिविधावव्ययीभावः अनश्चेति समासान्त टच् । मखभुजां देवानामपासनात्प्रतिषेधाद्धेतोः लज्जाया स्रजा प्रमार्जन युक्ता योग्यैवार्जि वर्जिता आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेदिति न्यायादिति भावः । अनया भैम्या त्रिदशप्रसादेन फलितं सफलमात्मानं पत्ये वीराय नलाय दत्त्वा सुराणां ह्रीरोषापयशसां सम्प्रतिषेधप्रसक्तानां कथाया अप्यनवसरः सृष्टः अनवकाशः कृतः तदनुज्ञयैव प्रकृतेन कश्चिदर्थावकाश इत्यर्थः ॥ ९१ ॥

इतीति । कुरुविन्दः पद्मरागः कुरुविन्दस्तु मुस्तायां कुल्माषव्रीहिभेदयोः । हिङ्गुले पद्मरागेऽपि मुकुरेऽपि समीरित इति विश्वः । तद्वत्सुन्दरौ करौ हस्तौ अन्यत्र सुन्दराः करा अंशवो यस्य तस्य आनन्दयतीत्यानन्दनम् आनन्दकरं नन्द्यादित्वाल्ल्युः । स्यन्दनं रथमध्यास्य अधिष्ठाय यतो गच्छत इणोलटः शत्रादेशः । तस्य नलस्य शतक्रतु हरितः प्राच्याः क्रीड़ाद्रिमुदयाद्रिं तमध्यास्य यतो गच्छत इन्दोरिव अनुप्रतीकनिलयानां प्रत्यवयवसंश्रयाणाम् अलङ्कारसाराणाम् आभरणश्रेष्ठानां श्रिया शोभासाधनेनालङ्कुर्वन्त्या आत्मानं प्रसादयन्त्या तनोर्मूर्तेः रामणीयकं रमणीयत्वं योगोपधाद्गुरूपोत्तमाद्वुञ् । आलोक्य सानन्दममूः

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
यातः पञ्चदशः कृशेतररसस्वादाविहायं महा-
काव्ये तस्य हि वैरसेनिचरिते सर्गौनिसर्गौज्ज्वलः ॥ ९३ ॥

पौरस्त्रिय इति पूर्वसम्भोगोक्तरीत्या आलेपुरालपन् आलपेर्लिट्। अतएव एत्वाभ्यासलोपौ ॥ ९२ ॥

श्रीहर्षमिति। कृशेतरेणाकृशेन निर्भरेण रसेन शृङ्गारेण स्वादौ रुचिरे तस्य कृतौ काव्ये पञ्चदशानां पूरणः पञ्चदशः तस्य पूरणेऽप्। सर्गौ यातो गतः समाप्त इति यावत् ॥ ९३ ॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमन्महोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां पञ्चदशः सर्गः ॥ १५ ॥

नैषधचरितम् ।

षोडशः सर्गः ।

वृतः प्रतस्थे स रथैरथो रथी
गृहान् विदर्भाधिपतेर्धराधिपः ।
पुरोधसङ्गौतममात्मवित्तमम्
द्विधा पुरस्कृत्य गृहीतमङ्गलः ॥ १ ॥
स्वभूषणांशुप्रतिबिम्बितैः स्फुटम्
यशोवदातैः स्वनिवासिभिर्गुणैः ।
मृगेक्षणानां समुपासि चामरै-
र्विधूयमानैः स विधुप्रभैः प्रभुः ॥ २ ॥

वृत इति । अथो प्रसाधनानन्तरम् रथोऽस्यास्तीति रथी रथिकः स धराधिपो नलः अतिशयेनात्मवित्तम मात्मतत्त्वज्ञानिनं गौतमं गौतमाख्यमृषिं पुरोधसं पुरोहितं द्विधा पुरस्कृत्य पूजयित्वाग्रे कृत्वा च पुरस्कृतः पूजितेऽभियुक्तेऽग्रतः कृत इत्यमरः । गृहीतमङ्गलः स्वीकृतमङ्गलाचारः सन् तथैव रथैर्वृतो विदर्भाधिपतेर्भीमस्य गृहान् प्रति प्रतस्थे प्रस्थितः समवप्रतिभ्यः स्थ इत्यात्मनेपदम् ॥ १ ॥

स्वेति । स प्रभुर्नलः स्वभूषणानामंशुषु मणिषु प्रतिबिम्बितैर्यशोवदातैः स्वच्छैर्विधूयमानैः कम्प्यमानैः विधोः प्रभेव प्रभा येषान्तैर्मृगेक्षणानां चामरग्राहिणीनां सम्बन्धिभिश्चामरैः चामरव्यजनेनेत्यर्थः । यशोवदातैः स्वनिवासिभिः स्वनिष्ठैर्गुणैः स्तुतिशीलादिगुणैरेव समुपासि

परार्ध्यवेशाभरणैः पुरःसरैः
सहाजिहाने निषधावनीभृति।
दधे सुनासीरपदाभिधेयताम्
स रूढिमात्राद्यदि वृत्रजान्नवः ॥ ३ ॥

नलस्य नासीररुजां महीभुजाम्
किरीटरत्नैः पुनरुक्तदीपया।
अदीपि रात्रौ वरयात्रया तया
चमूरजोमिश्रतमिस्रसम्पदा ॥ ४ ॥

उपासितः स्फुटं प्रतिविम्बितचामरैः स्वामिसेवार्थ माविर्भूत चामरगुणत्व मुत्प्रेक्ष्यते ॥ २ ॥

परार्द्ध्येति। निषधावनीभृति नले परार्ध्यानि श्रेष्ठानि परावराधरोत्तम पूर्वाच्चेति यत्प्रत्ययः। तानि वेषा आकल्पा वस्त्राभरणादि शोभाः आकल्पवेषौ नेपथ्य मित्यमरः। ते च आभरणानि कटकमकुटादीति च येषां तैः पुरःसरैः सुनासीरैः सहाजिहाने गते सति स प्रसिद्धो वृत्रघातक इन्द्रः सुः पूजायाञ्च. सुर इति वदिति स्वामी। सुः शोभना नासीरा यस्य सः सुनासीरः तस्य पदस्याभिधेयतां वाच्यत्वं रूढिमात्रादश्वकर्णादिवत् समुदाय प्रतीतिमात्राद् दधे यदि न तु नलवरणपदार्थयोगाद्यथा युक्त मित्यर्थः। एतन्नासीरदर्शनामयमेव सुनासीरइन्द्र इति प्रतीयत इति भावः ॥ ३ ॥

नलस्येति। चमूरजोमिश्रास्तमिस्रसम्पदो यस्यां तया चमूरजोमेलनाद्गाढान्धकारयेत्यर्थः॥ तथापि नलस्य नासीररुजाम् अप सरसस्मादकानां महीभृतां राज्ञां किरीटगतैः पुनरुक्ता दीपा यस्यां तया प्रकृतया वरस्य वोढुर्यात्रया विवाहैकरूटहयात्रया रात्रावपि अदीपि दीप्तं भावे लुङ्। दीप प्रकाशेन सा यात्रा गाढान्धकारेऽपि दीपवदिति इत्यर्थः ॥ ४ ॥

विदर्भराजः क्षितिपाननुक्षणम्
शुभक्षणासन्नतरत्वसत्वरः ।
दिदेश दूतान् पथि यान् यथोत्तरम्
चमूममुष्योपचिकाय तच्चयः ॥ ५ ॥

हरिद्विपद्वीपिभिरङ्कनैर्नभो-
नभस्वदाध्मापनपीनितैरभूत् ।
तरस्वदश्वध्वजिनीध्वजैर्वनम्
विचित्रचीनांशुकवल्लिवेल्लितम् ॥ ६ ॥

भुवाऽऽह्वयन्तीं निजतोरणस्रजा
गजालिकर्णानिलखेलया ततः ।

विदर्भेति। विदर्भराजो भीमः शुभक्षणस्य विवाहमुहूर्त्तस्य आसन्नतरत्वेन सत्वरः सन् अनुक्षणं ये क्षितिपास्तानेव दूतान् उत्तरोत्तरं यथार्थे विप्साया मव्ययीभावः। दिदेश तच्चयस्तेषां प्रेषितानां राज्ञां समूहः पथि मार्गे अमुष्य नलस्य चमू सुपचिकाय वर्धयामास सम्लिटेति कुत्वं। तावन्तः प्रेषणा इति लग्नातिक्रमभीरोराज्ञ त्वरातिशयोक्तिः ॥ ५ ॥

हरीति। विचित्राणि चीनांशुकानि पट्टवस्त्राणि तैरेव वल्लिभिर्वेल्लितं नभोऽन्तरिक्षं नभस्वतो वायोराध्मापनेन पूरणेन पीनितैः स्थूलितैः पीनित स्थूल पीवर इत्यमरः। हरिद्विपद्विपिभिः सिंहराजव्याघ्रैः तदाकारैरित्यर्थः। शार्दूल द्वीपिनौ व्याघ्रेत्यमरः। अंशुकैरंशुक निर्मितैः तरस्विनां वेगवतामश्वानां ध्वजिनीषु सेनासु ध्वजैर्वन मभूत् वनकल्प मभूदित्यर्थः ॥ ६ ॥

भुवेति। स महीपतिर्नलः गजालीनां गजघटानां कर्णानिलैः खेलया निजया तोरणस्रजा तोरणमालयैव भुवा आह्वयन्तीं भीम

ददर्श दूतीमिव भीमजन्मनः
स तत्प्रतीहारमहीं महीपतिः ॥ ७ ॥
श्लथैर्दलैस्तम्भयुगस्य रम्भयो-
श्चकास्ति चण्डातकमण्डिता स्म सा ।
प्रियासखीवास्य मनःस्थितिस्फुरत्-
सुखागतप्रश्निततूर्यनिस्वना ॥ ८ ॥
विनेतृभर्तृद्वयभीतिदान्तयोः ।
परस्परस्मादनवाप्तवैशसः ।
अजायत द्वारि नरेन्द्रसेनयोः
समागमः स्फारमुखारवोद्गमः ॥ ९ ॥

मागच्छेति आह्वयन्तीं भीमजन्मनो भैम्या दूतीमिवेत्युत्प्रेक्षा तस्य भीमस्य प्रतीहारमहीं ददर्श स्त्रीद्वार्द्वारं प्रतीहार इत्यमरः ॥ ७ ॥

श्लथैरिति । रम्भयोः स्तम्भयुगस्य द्वारशोभार्थं प्रस्थापितकदलिस्तम्भयुगलस्य श्लथैर्दलैः पर्णैः चण्डातकेन अर्द्धोरुकेण मण्डिता भूषिता अर्द्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुक इत्यमरः । सा द्वारमही मनसि स्थित्या मनोगतत्वेन स्फुरन् बलान्निर्गच्छन् स सुखागतप्रश्नः प्रश्नीकृतः करोतेर्ण्यन्तात्कर्मणि क्तः । तूर्यनिस्वनो यया सा सती अस्य नलस्य प्रिया सखी भैमीसखीव चकास्ति स्म चकासामास कदलीदलतूर्यनिस्वनयोगात् सुवसना स्वागतं पृच्छन्ती भैमीसखीव बभावित्युत्प्रेक्षा ॥ ८ ॥

विनेत्रेति । विनेत्रोर्नियामकयोर्भर्त्रोः स्वामिनोर्द्वयोर्भीत्या दान्तयोर्नरेन्द्रसेनयोर्भैमनलसेनयोः परस्मादन्योन्यस्मादनवाप्तं वैशसं हिंसनं यस्मिन् स्फारस्तारो मुखरोद्गमः कलकलोदयो वा यस्मिन् स समागमो मेलनं द्वारि राजभवनद्वारे अजायत जातः ॥ ९ ॥

निवेश्य बन्धूनित इत्युदीरितम्
दमेन गत्वार्द्धपथे कृतार्हणाम् ।
विनीतमाद्वारत एव पद्गताम्
गतं तमैक्षिष्ट मुदा विदर्भराट् ॥ १० ॥
अथायमुत्थाय विसार्य्य दोर्युगम्
मुदा प्रतीयेष तमात्मजन्मनः ।
सुरस्रवन्त्या इव पात्रमागतम्
धृताभितो वीचिगतिः सरित्पतिः ॥ ११ ॥
यथावदस्मै पुरुषोत्तमाय ताम्
स साधुलक्ष्मीं बलवाहिनीश्वरः ।

निवेश्येति । दमेन भीमजात्मजेन बन्धून् जामातृबन्धून् निवेश्य उपवेश्य गत्वा प्रत्युद्गत इत इत्युदीरितम् इत्यागमन नैषधार्य्यतामिति प्रार्थितं अर्द्धपदे अर्द्धमार्गे कृतार्हणां कृतपूजां विनीत मनुगतम् आद्वारतो द्वारमारभ्य पादाभ्यां गच्छति पद्गः तत्तां पद्गतां पादचारित्वं गतं पादस्य पदाज्याति गोपहतेष्विति पादस्य पदादेशः । तं नलं विदर्भराट् भीमो मुदा ऐक्षिष्टः अद्राक्षीत् ॥ १० ॥

अथेति । अथ नलेक्षणानन्तरम् अयं विदर्भराडुत्थाय दोर्युगं प्रसार्य्य आत्मजन्मनः आत्मजायाः भैम्याः पात्रं योग्य मभ्यागतं नलं धृत्वा अभितोवीचिगतिरुभयतस्तरङ्गप्रसारो यस्य स सरित्पतिः समुद्रः सुरस्रवन्त्या भागीरथ्या इव अस्या गतं पात्रं तीर्थद्वयान्तरमिव मुदा हर्षेण प्रतीयेष प्रत्यैच्छदालि लिङ्गेत्यर्थः । ॥ ११ ॥

यथावदिति । अथ वरप्रत्युद्गमनानन्तरं बलवाहिनीश्वरः बल-सेनाधीश्वरः महीभृतां राज्ञां पतिर्राजराजः स भीमः पुरुषोत्तमाय

शिवामथ स्वस्य शिवाय नन्दिनाम्
ददे पतिः सर्व्वविदे महीभृताम् ॥ १२ ॥
असिस्वदद्यन्मधुपर्कमर्पितम्
स तद्व्यधात्तर्कमुदर्कदर्शिनाम् ।
यदेष पास्यन्मधु भीमजाधरम्
मिषेण पुण्याहविधिं तदा कृतम् ॥ १३ ॥

पुरुषश्रेष्ठाय शिवाय भद्रमूर्त्तये सर्वविदे सर्वज्ञाय अस्मै नलाय साधुलक्ष्मीं समीचीनशोभां शिवां भद्रमूर्त्तिं स्वस्य नन्दनां दुहितरं तां दमयन्तीं यथावद्यथार्हं विधिवदित्यर्थः। तदर्हमिति वतिप्रत्ययः। ददे दत्तवान् अन्यत्र वाहिनीश्वरो नदीपतिः समुद्रः पुरुषोत्तमाय विष्णवे लक्ष्मीं ददे ददौ तथा महीभृतां पर्वतानां पतिर्हिमवान् स्वनन्दनां शिवां गौरीं शिवाय शम्भवे ददौ च अर्थान्तरं प्रति विशेषणविशेष्ययोरपि श्लिष्टत्वादभिधायाः प्रकृतार्थोपक्षीणत्वा द्वाच्यार्थानु पपत्त्याभावोलक्षणाच्च ध्वनिरेवौपम्यपर्य्यवसायी। शिवं भद्रं शिवः शम्भुः शिवा गौरी शिवा भयेति सर्वत्र शाश्वतः ॥ १२ ॥

असिस्वददिति। स नलः अर्पितं दत्तं मधुपर्कं दधिमधुघृतात्मकं त्रिमधुरमसिस्वदत् स्वादितवानिति यत् स्वादेर्णौ चङ्युपधाह्रस्वः तन्मधुपर्कस्वादनम् उदर्कदर्शिनामागामिफलज्ञाना मुदर्कफल मुत्तरमित्यमरः। तर्कं कञ्चिदूहस्य व्यधादकार्षीत् तं तर्कमेवाह एष नलः भीमजाया भैम्या अधरमेव मधु माक्षिकं पास्यन्धास्यन् मिषेण मधुपर्कपानव्याजेन पुण्याहविधिं कर्मादौ कर्त्तव्यं पुण्याहकर्मैव चकारेति सापह्नवोत्प्रेक्षा इति यत्तं तर्कमिति पूर्वेण सम्बन्धः मङ्गल्यकृत्येष्वादौ पुण्याहक्रिया प्रसिद्धैव ॥ १३ ॥

वरस्येति। वरस्य नलस्य पाणिः परघातकौतुकी शत्रुवध लम्पटः परहिंसालोलुपश्च वधूकरः पङ्कजकान्तेस्तस्कर श्चोरश्च तद्वृहतो

वरस्य पाणिः परघातकौतुकी
वधूकरः पङ्कजकान्तितस्करः ।
सुराज्ञि तौ तत्र विदर्भमण्डले
ततो निबद्धौ किमु कर्कशैः कुशैः ॥ १४ ॥

विदर्भजायाः करवारिजेन यन्-
नलस्य पाणेरुपरि स्थितं किल ।
विशङ्क्य सूत्रं पुरुषायितस्य तद्
भविष्यतोऽख्यायि तदा तदालिभिः ॥ १५ ॥

सखा यदस्मै किल भीमसंज्ञया
स यक्षरूख्याधिगतं ददौ भवः ।

रित्यादिना सुट् तलोपौ । ततः पूर्वापराधाद्धेतोस्तौ वधूवरौ शोभनो राजा यस्य तस्मिन् सुराज्ञि विदर्भमण्डले विदर्भराज्ये कर्कशैः कुशैर्निबद्धौ संयतौ किमु ? धार्मिकराज्ये दुष्टा बध्यन्त इति भावः । वधूवरयोः कुशसूत्रेण करबन्धनं केषाञ्चिदाचारप्राप्तस्य बन्धनस्य अपराधहेतुकत्वमुत्प्रेक्ष्यते ॥ १४ ॥

विदर्भजाया इति । विदर्भजायाः वैदर्भ्याः करवारिजेन करकमलेन नलस्य पाणेरुपरि स्थितं किलेति यद्भावे क्तः । सूत्र्यते अनेनेति सूत्रं भविष्यतः पुरुषायितस्य पुरुषवदाचरितस्य सूचकसूत्राक्षरं विशङ्क्य विभाव्य तदा तदालिभिर्भैमीसखीभिः अख्यायि सन्दमहासि ख्यायतेर्भावे लुङ् चिण्युड्डायादेशः । हस्तेन करस्योपरि स्थित्या पुंभावसुलभं व्यक्षितं कृतम् इत्यर्थः ॥ १५ ॥

अथैकविंशतिश्लोक्या यौतकदानं वर्णयति सखेत्यादि । स प्रसिद्धो भगवान् ईश्वरो यक्षसख्याधिगतं कुबेरमैत्रीलब्धं कुबेराल्लब्धमित्यर्थः । यक्षः कपिङ्गैलविलेत्यमरः । यश्चिन्तामणिदानः भीम इति संज्ञया नाम्ना सखा सन् स्वनामधारणात्प्रीतः सन्नित्यर्थः । व्योमकेशो भवो भीमः इत्यमरः । अस्मै भीमभूपाय ददौ स्वनामकरणपारितोषिकत्वेनेति भावः

ददे तदेष श्वशुरः सुरोचितम्
नलाय चिन्तामणिदाम कामदम् ॥ १६ ॥
बह्वोर्दुरापस्य वराय वस्तुन-
श्चितस्य दातुं प्रतिबिम्बकैतवात् ।
बभौतरामन्तरवस्थितं दधद्
यदर्थमभ्यर्थितदेयमर्थिने ॥ १७ ॥
असिं भवान्याः क्षतकासुरासुरम्
वराय भीमः स्म ददाति भासुरम् ।

ददे तत् सुरोचितं देवतायोग्यं कामदुघं चिन्तामणीनां दाम मालिकां श्वशुरः पत्याः पिता भीम भूपतिः वराय जामात्रे ददौ ॥ १६ ॥

तन्मणिदामैव वर्णयति ! बह्वोरिति यद्दाम वराय दातुं चितस्य राशीकृतस्य दुरापस्य दुर्लभस्य बह्वोरनेकस्य भाषितपुंस्कत्वात् पुंवद्भावः । वस्तुनः पदार्थजातस्य प्रतिबिम्बस्य कैतवान्मिषादन्तरभ्यन्तरे स्थितम् अर्थिने याचकाय अभ्यर्थितो याचितः सन् देयो देयत्वेन निश्चितः तं मभ्यर्थितं तदेवमर्थं वस्तुजातं तदेतच्चिन्तामणिदाम स्वयं दातृत्वादर्थिदेयमर्थजातं पूर्वोक्तप्रतिबिम्बव्याजादन्तर्धानमिवेति सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या बभौतराम् अतिशयेन बभौ तिङन्तादाम् प्रत्ययः ॥ १७ ॥

असिमिति । भीमः क्षतकासुरासुरं हतमहिषासुरं लुलापो महिषो वाहद्विषत्कासरसैरिभा इत्यमरः । भासुरं भास्वरं भवान्यादुर्गायाः असिं दत्तमित्यर्थः । वराय नलाय ददाति स्म स्वयम्वरण रागिण्या दुर्गया अस्मै दत्त स्तत्राह शम्भु सम्भोग निमग्नया महिषादिमर्दनानन्तरं निवृत्तरणरागया केवल सुरत सुखासक्तया तया दुर्गया भवस्य स्वप्रियस्य शम्भोर्नामधारिणेति वात्सल्यकरुणोक्तिः भवः । प्रियः पति भर्त्तेत्यमरः । तस्मै भीमभूभुजे सोऽसिर्ददे दत्तः खलु ? ददातेः कर्मणि लिट् ॥ १८ ॥

ददे हि तस्मै धवनामधारिणे
स शम्भुसम्भोगनिमग्नयाऽनया ॥ १८ ॥
अधारि यः प्राङ्महिषासुरद्विषा
कृपाणमस्मै तमदत्त कूकुदः ।
अहायि तस्या हि धवार्द्धमज्जिना
स दक्षिणार्द्धेन पराङ्गदारणः ॥ १९ ॥
उवाह यः सान्द्रतराङ्ककाननः
स्वशौर्य्यसूर्य्योदयपर्व्वतव्रतम् ।
सनिर्झरः शाणनधौतधारया
समूढसन्ध्यः क्षतशत्रुजासृजा ॥ २० ॥

अधारीति। यः कृपाणः प्राक् पूर्वं महिषासुरद्विषा दुर्गया अधारि धृतः तं कृपाणम् असिं कूकुः कन्या कूकु रित्युच्यते कन्या इति स्मरणात् तां ददातीति कूकुदः कन्याप्रदो भीमः सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुद इत्यमरः। अस्मै नलाय दत्तवान् दाने कारणान्तरमाह तस्या दुर्गायाः सम्बन्धिना धवस्य प्रियस्यार्धे वामार्धे मज्जतीति तन्मज्जिना दक्षिणार्द्धेन कर्त्रा यः कृपाणधारीति भावः। परेषां संसर्गिणाम् अङ्गदारणो गात्रविदारणः अहायि अत्याजि खलु अन्यथा स्वप्रियाङ्गदारण प्रसङ्गादिति भावः। हातेः कर्मणि लुङ् चिणि युगागमः ॥१९॥

उवाहेति। सान्द्रतरा निरन्तरा अङ्कासच्छायाख्यानि चिह्नान्येव काननानि यस्य स शाणनेनोत्तेजनेन धौतया निर्मलया धारया अस्या आसारेण सनिर्झरः सप्रवाहः क्षतेषु प्रहृतेषु शत्रुषु जातं तज्जन्तेना सृजा रक्तेन समूढा धृता सन्ध्या येन स यः कृपाणः स्वशौर्य्यमेव सूर्य्यस्योदयपर्वतस्य व्रतं सूर्योदयनियममुवाह वहतिस्म इति रूपकालङ्कारः ॥ २० ॥

यमेन जिह्वा प्रहितेव या निजा
तमात्मजां याचितुमर्थिना भृशम्।
स तां ददेऽस्मै परिवारशोभिनीम्
करग्रहार्हामसिपुत्रिकामपि ॥ २१ ॥
यदङ्गभूमीवभतुः स्वयोषिता-
मुरोजपत्रावलिनेत्रकज्जले।
रणस्थलस्थण्डिलशायिताव्रति
गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥
पुरैव तस्मिन् समदेशि तत्सुता-
भिकेन यः सौहृदनाटिनाग्निना।

यमेनेति। या निजा असिपुत्रिका भृशमत्यर्थमर्थिना याचकेन यमेनान्तकेन तं भीमं आत्मजां भैमीं याचितुं प्रेषिता प्रहिता स्थितेत्युत्प्रेक्षा स भीमः परिवारेण कोशेन परिजनेन च शोभिनीं परिवारः परिजने खड्गकोशे परिच्छद इति विश्वः। करग्रहस्य हस्तधारणस्य चार्हां तामसिपुत्रिकां छुरिकां स भीमोभूपतिरस्मै ददे शस्त्रीपुत्रिकयोः प्रकत्वःत् केवलप्रकृत श्लेषः ॥ २१ ॥

यदिति। यस्या असिपुत्रिकाया अङ्गभूमौ प्रान्तदेशौ रणस्थलमेव स्थण्डिलमनावृतभूः तत्र शेरत इति तच्छायिनः व्रत इति णिनि। तच्छायितैव व्रतं तत्र गृहीतदीक्षैः दक्षिणीकृते असिपुत्रिकायै तत् कार्त्विज्ये दक्षिणीकृते इत्यर्थः। स्वयोषितामुरोजयोः पत्रावलिः स्तनपत्रवल्लौ, नेत्र कज्जलन्ते इव वभर्तुर्विरेजतुः इत्युत्प्रेक्षा भावे लिडि अतुसादेशः ॥ २२ ॥

पुरेति। तत्सुताभिकेन भैमीकामुकेन कम्रः कामयिताभीकः इत्यमरः। कमितेति निपातनात्साधुः। अतएव सुहृदयस्य भावः सौहृदं सौहार्दं युवादित्वादण् हृद्भावादिना हृद्भरेनेत्यादिनोभयपदवृद्धिः

नलाय विश्राणयति स्म तं रथम्
नृपः सुलङ्घ्याद्रिसमुद्रकापथम् ॥ २२ ॥
प्रसूतवत्ता नलकूबरान्वय-
प्रकाशितस्यापि महारथस्य यत् ।
कुबेरदृष्टान्तबलेन पुष्पक-
प्रकृष्टतैतस्य ततोऽनुमीयते ॥ २३ ॥
महेन्द्रमुच्चैःश्रवसा प्रतार्य्य य-
न्निजेन पत्याकृत सिन्धुरन्वितम् ।

अतएव सौहृदशब्दादपि हृद्भावादिति वामनः । तन्नाटयति यस्तेन सौहृदनाटिना अग्निना यो रथः पुरैव स्वयम्वरात्प्रागेव तस्मिन् भीमे समदेशि सन्दिष्टः दत्त इत्यर्थः । सुलङ्घ्याः सुसञ्चरा अद्रयः समुद्राः कापथाः अन्ये कुत्सितपथाश्च यस्य तङ्कापथ्यक्षयोरिति कोः कदादेशः । तमग्निदत्तं रथं नलाय नृपो भीमो विश्राणयति स्म ददावित्यर्थः । विश्राणनं वितरणम् इत्यमरः ॥ २३ ॥

प्रसूतवत्तेति । यद्यस्मादस्यापि कुबेरवदितिभावः महारथस्य महतोरथस्य अन्यत्र महान्रथो यस्य तस्य रथिकविशेषस्य प्रसूतवत्ता प्रकृष्टसारथिवत्ता सूतक्षत्ता च सारथिः इत्यमरः । मत्वन्तत्वात्तल्प्रत्ययः । अन्यत्र सूतवत्ता प्रजनितता प्रपूर्वात् सूतेः क्तवन्तत्वात्तल्प्रत्ययः । अनलेन अग्निना दात्रा कुबेरेण पुत्रेण चान्वयाद्योगात्प्रकाशत इति तत्प्रकाशितस्य भावस्तत्ता यतः कारणादेतस्य महारथस्य कुबेर एव दृष्टान्तो निदर्शनं तच्छब्देन पुष्पकप्रकृष्टता अनुमीयते अयं महारथः पुष्पकप्रकृष्टो भवितुमर्हति प्रसूतवत्त्वादि धर्मयोगी महारथत्वात् कुबेरवदिति अनुमातुं शक्यत्वादित्यर्थः । अतएवानुमानालङ्कारः साध्यसाधन निर्देशस्त्वनुमान मुदीरितम् इति लक्षणात् । रूपहेतुत्वेन तर्कानुमानेन वैलक्षण्यं रूपकञ्च प्रसूतवत्तादिप्रकाशितैः तत्प्रकाशितेति श्लिष्टरूपकं द्रष्टव्यम् ॥ २४ ॥

स तद्ददेऽस्मै हयरत्नमर्पितम्
पुरानुबद्धुं वरुणेन बन्धुताम् ॥ २५ ॥
जवादवारीकृतदूरदृक्पथ-
स्तथाक्षियुग्माय ददे मुदं न यः ।
ददद्दिदृक्षादरदासतां यथा
तथैव तत्पांशुलकण्ठनालताम् ॥ २६ ॥
दिवस्पतेरादरदर्शिनादरा-
दढौकि यस्तम्प्रति विश्वकर्मणा ।

महेन्द्रमिति । सिन्धुः समुद्रः उच्चैःश्रवसा महेन्द्रं प्रतार्य्य वञ्चयित्वा यद्धयरत्न मुच्चैःश्रवसोऽपि श्रेष्ठमित्यर्थः । निजेन पत्या स्वामिना वरुणेन स्वन्वितमकृत तस्मै ददौ इत्यर्थः । पुरा स्वयम्वरात्पूर्वं बन्धुतां बान्धवतम् अनुबद्धुं प्रवर्त्तयितुं वरुणेनार्पितं दत्तं हयरत्नं स भीमस्तस्मै नलाय ददे दत्तवान् ॥ २५ ॥

जवादिति । अक्षि युग्माय द्रष्टुर्दृष्टियुगलाय दिदृक्षायां दर्शनेच्छायाम् आदरः आस्था तस्य दासतां विधेयतां दधत् अत्यन्तदिदृक्षामेव कुर्वन् यो हयो जवाद्वेगात्तथा तेन प्रकारेण अवारीकृतोऽवाकृतो प्राग दूरीकृत इति यावत् निर्जलीकृतश्च गम्यते पारावारे परार्वाचीत्यमरः। स दूरदृक्पथो येन स तथा मुदन्तृप्तिं न दधे किन्तु तृष्णामेव वर्धयति अवारि कृतमार्गत्वादिति भावः तथा तेन प्रकारेण तत्तस्य त्पूर्वोक्ता अवारि करणतृष्णा अकारि त्वद्धेतोः पांशुलः पांशुमान् शुष्कश्च कण्ठनालो यस्य तस्य भावस्तत्तान्तदर्थमुदं न दधे कण्ठशोषकारी कथं मुदं दद्यादितिभावः अक्षियुग्मस्य पांशुलकण्ठनालत्वं नाम दूरोद्धतधूली धूसरप्रान्तत्वञ्च उत्कण्ठाचरितत्वम् अजस्रदर्शनीयवेगोऽयमस्य इति तात्पर्य्यम् अवारि करणाद्यसम्बन्धेऽपि तत्सम्बन्धोक्ते रतिशयोक्तिः ॥२६॥

दिवस्पतेरिति । दिवस्पतेरिन्द्रस्य दमयन्तीरागिण इति भावः कस्कादित्वात् अलुक्सत्वे। आदरदर्शिना आदरज्ञेन विश्वकर्मणा देव

तमेकमाणिक्यमयं महोन्नतम्
पतद्ग्रहं ग्राहितवान्नलेन सः ॥ २७ ॥
नलेन ताम्बूलविलासिनोज्झितै-
र्मुखस्य यः पूगकणैर्भृतो न वा ।
इति व्यवेचि स्वमयूखमण्डला-
दुदञ्चदुच्चारुणचारुणश्चिरात् ॥ २८ ॥
मयेन भीमं भगवन्तमर्चता
नृपेऽपि पूजा प्रभुनाम्नि या कृता ।
अदत्त भीमोऽपि स नैषधाय ताम्
हरिन्मणेर्भोजनभाजनं महत् ॥ २९ ॥

शिल्पिना यः पतद्ग्रहः तं भीमं प्रत्यादरात् अढौकि प्रापितः ढौकतेर्ण्यर्थे ण्यन्तात्कर्मणि लुङ् । तं विश्वकर्मदत्तमेकमाणिक्यमयमेकपद्मरागोपलविकारं महती उन्नतिर्यस्य तमत्युन्नतं गृह्यते अनेनेति ग्रहः पततोग्रहः निस्यूतताम्बूलभाजनं पतद्ग्राहः पतद्ग्रहः इत्यमरः । विभाषाग्रह इति णप्रत्ययाभावः पक्षे ग्रहवृदृनिश्चिगमश्चेति अप्रत्ययः । तं स भीमो नलेन ग्राहितवान् अग्राहयत् नलाय ददावित्यर्थः ॥ २७ ॥

नलेनेति । यः पतद्ग्राहः उदञ्चदुद्गच्छत् उच्चादुन्नतादरुणाद्रक्तवर्णात् स्वमयूखमण्डलाद्धेतोश्चारुणः, ताम्बूलविलासिना ताम्बूलशोभिना नलेनोज्झितैः निस्यूतैर्मुखस्य सम्बन्धिभिः पूगकणैः क्रमुकशकलैर्भृतः पूर्णो न वेति सन्दिह्योऽतिशयेन चिराद्व्यवेचि विविक्तः निश्चयान्तः सन्देहालङ्कारः ॥ २८ ॥

मयेनेति । भगवन्तं भीममीश्वरम् अर्चता अर्चते र्भौवादिकाल्लटः शत्रादेशः । मयेन दैत्यशिल्पिना प्रभोर्नायकस्य तस्मिन् प्रभुनाम्नि स्वामिनामधारिणि नृपे भीमे या पूजा कृता स भीमोऽपि हरिन्मणेर्गारुत्मतमणेः सम्बन्धि तन्मयं महद्भोजनपात्रं भोजनभाजनं भोजनपात्ररूपान्तां पूजां नैषधाय नलाय दत्त ॥ २९ ॥

छदे सदैव च्छविमस्य बिभ्रतां
न केकिनां सर्पविषं प्रसर्पति।
न नीलकण्ठत्वमधास्यदत्र चेत्
स कालकूटं भगवानभोक्ष्यत ॥ ३० ॥

विरोध्य दुर्वाससमस्खलद्दिवः
स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः।
अदत्त तस्मै स मदच्छलात् सदा
यमभ्रमातङ्गतयैव वर्षुकम् ॥ ३१ ॥

मदान्मदग्रे भवताथवा भिया
परं दिगन्तादपि यात जीवत।

छद इति। अस्य गारुत्मतभाजनस्य छविं कान्तिं सदा सर्वथैव छदे पक्षे बिभ्रतां केकिनां बर्हिणां सर्पविषं न विसर्पति न व्याप्नोति स भगवानीश्वरोऽपि अत्र गारुत्मतभाजने कालकूटमभोक्ष्यत चेत् भुञ्जीत यदि नीलकण्ठत्वं नाधास्यत् तदभावात्कालकूटविषस्य कण्ठस्थाय नीलकण्ठत्वमस्येत्यर्थः। यत्सावर्ण्यात् केकिनो निर्विषास्तत्पात्रे भोजने किं वक्तव्यमित्यर्थः ॥ ३० ॥

विरोध्येति। अभ्रमातङ्गतया मेघरूपगजत्वेन हेतुना मदच्छलान्मदस्रावमिषात् वर्षुकं वर्षणशीलमिव स्थितम् इति सापह्नवोत्प्रेक्षा लषपतेत्यादिना उकञ् प्रत्ययः। यं सिन्धुरं स भीमोऽस्मै नलाय अदत्त दत्तवान् स नलक्षात्क्षतसिन्धुरो दुर्वाससं विरोध्य विरुध्य अस्य दुर्वाससः सम्बन्धिनीं तद्दत्तामित्यर्थः। स्रजं त्यजन् क्षिपन् इन्द्रसिन्धुर ऐरावत इव दिवः स्वर्गादस्खलत्किम्? स्रदत्तस्रक्त्यागापराधनिमित्ता दुर्वाससः शापाद्दिवश्च्युत ऐरावत एवायं किमित्युत्प्रेक्षा ॥ ३१ ॥

मदादिति। यो गजो हे दिक्करिणः। दिग्गजाः! मदान्मदपारवश्यान्मदग्रे ममाग्र एव भवत तिष्ठत अथवा भिया दिगन्तादपि परं दूरं

इति स्म यो दिक्करिणः ! स्वकर्णयो-
र्विनाह्व वर्णस्रजमागतैर्जनैः ॥ ३२ ॥
अधत्त वीजं निजकीर्त्तये रदौ
द्विषामकीर्त्त्यै खलु दानविप्रुषः ।
श्रवः श्रमैः कुम्भकुचां शिरः श्रियम्
मुदे मदखेदवतीमुपास्त यः ॥ ३३ ॥
न तेन वाहेषु विवाहदक्षिणी-
कृतेषु सङ्ख्यानुभवेऽभवत् क्षमः ।
न शातकुम्भेषु न मत्तकुम्भिषु
प्रयत्नवान् कोऽपि न रत्नराशिषु ॥ ३४ ॥

दूरानादोत्तमाः परेत्यमरः । यात गच्छत जीवत यथा कथञ्चित्प्राणान् धारयत इति इत्यक्षरस्रजं वर्णपङ्क्तिं विनैव वागृष्टिं मन्तरेणेत्यर्थः । किन्तु स्वकर्णयोः आगतागतैर्यातायातैः चेष्टाभिरेव आह्व ब्रूते स्म वेत्यर्थः गम्योत्प्रेक्षा लट् स्म इति भूते लट् ब्रुवः पञ्चादित्यादिना णलाह्वादेशौ ॥ ३२ ॥

अधत्तेति । यो गजो निजकीर्त्तये तत्प्ररोहायेत्यर्थः । रदौ दन्तावेव वीजमधत्त द्विषामकीर्तये तत्प्ररोहाय दानविप्रुषो मदविन्दूनेव वीजमधत्त कीर्त्त्यकीर्त्त्योः सितासितकारित्वात्सितासितयोरेव दन्तदानयोर्वीजत्वेनोत्प्रेक्षा । किञ्च कुम्भावेव कुचौ यस्याः तां मदेन खेदवतीमिति सात्विकोक्तिः शिरः श्रिय शिरःशोभामेव श्रवसोः श्रमैः व्यापारैः कर्णतालैरेव व्यजनवातैरिति भावः मुदे हर्षाय उपास्त असेवतेत्युत्प्रेक्षानयोस्संसृष्टिः ॥ ३३ ॥

नेति । तेन भीमेन विवाहे दक्षिणीकृतेषु वरायाहरिणीकृतेष्वित्यर्थः । वाहेषु वाजिषु विषयवाजि वाहार्वगन्धर्व इत्यमरः । प्रयत्नवानुद्योगवानपि सङ्ख्यानुभवे इयत्तापरिच्छेदे क्षमो नाभवत् शातकुम्भेषु स्वर्णेषु तपनीयं शातकुम्भमित्यमरः । मत्तकुम्भिषु मदगजेषु

करग्रहे वाम्यमधत्त यस्तयोः
प्रसाद्य भैम्या न च दक्षिणीकृतः ।
कृतः पुरस्कृत्य ततो नलेन स
प्रदक्षिणस्तत्क्षणमाशुशुक्षणिः ॥ ३५ ॥
स्थिरा त्वमश्मेव भवेति मन्त्रवा-
गनेशदाशास्य किमाशु तां ह्रिया ।

रत्नराशिषु न सर्वत्र सङ्ख्यानुभवे क्षम इत्यनुषङ्गः । विवाहादिषु सङ्ख्यासम्बन्धेऽप्यसम्बन्धोक्ते रतिशयोक्तिभेदः ॥ ३४ ॥

करेति । य आशुशुक्षणिः शोषितुमिच्छतीत्याशुशुक्षणिरग्निः शिखावानाशुशुक्षणि रित्यमरः । आङि शुषेः सनन्तादाङ् पूर्वाच्छुषे धातोः सनन्तादुप्रत्ययः भाषायामपीष्यते । तयोर्भैमीनलयोः करग्रहे पाणिग्रहे वाम्यं वक्रतां वामभागवर्त्तित्वम् अधत्त वाम्यं सव्ये प्रतीपञ्चेति विश्वः । अनु वाम्यानन्तरं भैम्या प्रसाद्य प्रसन्नीकृत्य दक्षिणीकृतश्च दक्षिणभागवर्त्तीकृतश्च दक्षिणः स नलो वामपरः छन्दानुवर्त्तिष्विति विश्वः । नलेन स आशुशुक्षणिस्तत्क्षणं सएव क्षणो यस्मिन् तत्कर्मणीति क्रियाविशेषणं स चासौ क्षणश्चेति तत्पुरुषे वात्यन्त संयोगे द्वितीया । पुरस्कृत्य अग्रतः कृत्वा च प्रदक्षिणोऽत्यन्तानुकूलो दक्षिणभागवर्त्ती च कृतः पूर्वं प्रतिकूलोऽप्यग्निः प्रार्थनया अनुकूलित इत्येकोऽर्थः अग्निप्रदक्षिणी कृत्येत्यादि शास्त्रार्थोऽनुष्ठित इत्यपरार्थः ॥ ३५ ॥

स्थिरेति । अश्मेव स्थिरा भवेति मन्त्र वाक् तां दमयन्तीम् आशास्य स्वाक्षरं प्रकाश्या माशिषं शिलावदचला भवेति एवं रूपा तदीयं ह्रिया हीनोपमाकरणहेतुकलज्जया इवेत्युत्प्रेक्षा आशु सपदि अनेशददृश्यतां गता उच्चरितप्रध्वंसित्वादिति भावः । नशेर्लुङि पुषादित्वादङि नशिमन्योरलिट्येत्वं वक्तव्यम् । हीनोपमात्वं व्यनक्ति

शिला चलेत् प्रेरणया नृणामपि
स्थितेस्तु नाचालि विडौजसापि सा ॥ ३६ ॥
प्रियांशुकग्रन्थिनिबद्धवाससम्
तदा पुरोधा विदधे विदर्भजाम् ।
जगाद विच्छिद्य पटं प्रयास्यतो
नलादविश्वासमिवैष विश्ववित् ॥ ३७ ॥
ध्रुवावलोकाय तदुन्मुखभ्रुवा
निर्दिश्य पत्याभिदधे विदर्भजा ।

शिला अश्मा नृणां मनुष्याणाम् अपि प्रेरणया चलेत् सा दमयन्ती विडौजसा देवेन्द्रेणापि स्थितेः पतिव्रतामार्गान्नाचालि न चालिता चलेर्ण्यन्तात्कर्मणि लुङ्। अत्र पूर्ववाक्यार्थस्योत्तरवाक्यार्थहेतुकत्वात्काव्यलिङ्गमलङ्कारः ॥ ३६ ॥

प्रियेति। तदा तत्काले विदर्भजां वैदर्भीं प्रियस्य नलस्यांशुके ग्रन्थिना बन्धविशेषेण निबद्धवाससं ग्रन्थितांशुकां विदधत् कुर्वन् देशाचारप्राप्तत्वादिति भावः विश्वविस्तर्वज्ञ एष पूर्वोक्तः पुरोधाः गौतमः पटंविच्छिद्य द्वेधा विपाट्य प्रयास्यतः परित्यज्य गमिष्यतो नलादविश्वासं जगादेव आगस्यर्थज्ञापनार्थमिवानयोर्वस्त्राञ्चलद्वयं जग्रन्थेति उत्प्रेक्षा अत्रारण्यपर्वणि नलोपाख्याने श्लोकः। ततोऽर्धं वाससश्छित्वा निवस्य च परंतप!। सुप्तामुत्सृज्य वैदर्भीं प्राद्रवन्नष्टचेतन इति ॥ ३७ ॥

ध्रुवेति। विदर्भजा वैदर्भी ध्रुवावलोकाय ध्रुवमरुन्धतीञ्च यं दर्शयति शास्त्रात्। तदुन्मुखभ्रुवा ध्रुवाभिमुखभ्रूर्यस्य तेन पत्या नलेन निर्दिश्य पश्येत्यादि अभिदधे अभिहिता कर्मणि लिट्। किं तदाह अस्य ध्रुवस्य अणिमा अणुत्वम् अक्षिसाक्षी चक्षुः प्रमाणको न स्यात्किञ्चक्षुषा नलक्ष्यते किमित्यर्थः। तथापि चक्षुषा अणुतावगमेऽपि आगमोदितो ज्योतिःशास्त्रोक्तो महिमा महत्त्वैव तथ्यः प्रामाणिकः अणुत्वग्राहि

किमस्य न स्यादणिमाक्षिसाक्षिक-
स्तथापि तथ्यो महिमाऽऽगमोदितः ॥ ३८ ॥
धवेन सादर्शि वधूररुन्धतीम्
सतीमिमां पश्य गतामिवाणुताम् ।
कृतस्य पूर्वं हृदि भूपतेः कृते
तृणीकृतस्वर्गपतेर्जनादिति ॥ ३९ ॥
प्रसूनता तत्करपल्लवस्थिते-
रुडुच्छविव्योम्नि विहारिभिः पथि ।
सुखेऽमराणामनले रदावले-
रभाजि लाजैरनयोज्झितैर्द्युतिः ॥ ४० ॥

प्रत्यक्षस्य दूरत्वदोषदुष्करत्वेन दुर्बलत्वादिति भावः महदपि दूरादणु प्रतीयत इति प्रसिद्धम् ॥ ३८ ॥

धवेनेति । पूर्वं विवाहात्प्रागेव हृदि कृतस्य पतित्वेन मनसि निश्चितस्य भूपतेः स्वस्य नलस्य कृते तदर्थमित्यर्थः । तादर्थ्येऽव्ययं तृणीकृतस्वर्गपतेरगणितमहेन्द्राज्जनात्त्वत्तः पञ्चमी विभक्ते इति पञ्चमी । अणुतां सूक्ष्मतां पातिव्रत्यगुणेन न्यूनताञ्च गतामिव स्थितां सतीं साध्वीमरुन्धतीं सा वधूर्नवोढा भैमी धवेन भर्त्रा नलेन इमां पश्येत्युक्त्वा इतिशेषः अदर्शि दृशेर्ण्यन्तादात्मनेपदिनः कर्मणि क्तः । अभिवादिदृशोरात्मनेपद इति वाच्यम् अणि कर्मत्वं णयन्ते कर्त्तुश्च कर्मण इति अनभिहितकर्मत्वं वोढव्यस्वाणित्वात्सङ्कल्पितान्तःपुरः स्वाणित्वं दुस्तरमित्युक्तम् अरुन्धत्या सङ्कुचितत्वमिति भावः ॥ ३९ ॥

प्रसूनेति । तत्करपल्लवस्थितेः होमार्थं तस्याः पाणिपल्लवधृतैरित्यर्थः । लाजैः भ्रष्टधान्यैः परिवापापरपर्य्यायैः लाजाः पुं भूम्नि परिवापक इति वैजयन्ती । प्रसूनता पुष्पत्वमभाजि तत्सादृश्यं प्राप्तमित्यर्थः । भजतेः कर्मणि लुङ् । अनया वध्वा उज्झितैस्त्यक्तैरतएव

तया प्रतिष्ठाकृतिधूमपद्धति-
र्गता कपोले मृगनाभिशोभिताम् ।
ययौ दृशोरञ्जनतां श्रुतौ श्रिता
तमाललीलामलिकेऽलकायिता ॥ ४१ ॥
अपह्नुतः स्वेदभरः करे तयो-
स्तपाजुषोर्दानजलैर्मिलन्मुहुः ।
दृशोरपि प्रस्तुतमश्रु सात्त्विकम्
घनैः समाधीयत धूमलङ्घनैः ॥ ४२ ॥

पथि मध्ये मार्गे व्योमचारिभिः खेचरैः सद्भिरुडुच्छवि र्नक्षत्रकान्तिरभाजि तथा अमराणां मुखे आस्यभूते अनले अग्निमुखा वै देवा इति श्रुतेः । रदावलेर्दन्तपङ्क्ते र्द्युतिरभाजि अत्रैकस्य लाजद्रव्यस्य क्रमेण करपल्लवाद्यनेकाधारवृत्तिकथनात्पर्यायभेदस्तावत् तदुपमेन लाजानां प्रसूनदन्तशोभासादृश्यान्निदर्शनाभेद इत्यनयो रङ्गाङ्गिभावेन सङ्करः ॥ ४० ॥

तयेति । तया बध्वा प्रतिष्ठा खीलता आकृतेर्लाजाकृते धूमपद्धति र्धूमरेखा कपोले मृगनाभिः कस्तूरीव शोभत इति तच्छोभिताङ्गता दृशो रञ्जनतां ययौ तत्सादृश्यं गतेत्यर्थः । श्रुतौ श्रोत्रे तमालस्य तमालावतंसस्य लीलां विलासं श्रिता अलिके ललाटे ललाट मलिकं गोधीत्यमरः । अलकायिता अलकवदाचरिता उपमानादाचारक्यङन्तात्कर्मणि क्तः । अत्राप्येकस्यैव धूमस्य क्रमादनेकाधारसम्बन्ध पर्यायात्तदुपजीविना मुत्तरेषां यथायोग मुपमा निदर्शनाभ्यां पूर्ववत्सङ्करः ॥ ४१ ॥

अथानयोस्त्रिभिः सात्त्विकोदयमाह अपह्नुत इत्यादिना । तपाजुषोर्लज्जाभाजोस्तयोर्वधूवरयोः करे स्वेदभरो मुहुर्दानजलै स्तत्कालोचितदानजलैर्मिलन्मिश्रीभवन्नपह्नुतः आच्छादितः दृशो रक्ष्णोः प्रस्तुतं गलितं सात्त्विकं सत्त्वसमुद्भूत मश्रु घनैः सान्द्रै र्धूमलङ्घनैः धूमपीडनैः

बहूनि भीमस्य वसूनि दक्षिणाम्
प्रयच्छतः सत्त्वमवेक्ष्य तत्क्षणम्।
जनेषु रोमाञ्चमितेषु मिश्रताम्
ययुस्तयोः कण्टककुड्मलश्रियः॥ ४३॥
बभूव न स्तम्भविजित्वरी तयोः
श्रुतिक्रियारम्भपरम्परात्वरा।
न कम्पसम्पत्तिमलुम्पदग्रतः
स्थितोऽपि वह्निः समिधा समेधितः॥ ४४॥

समाधीयत समाहितः परिहृतः इति यावत्। अत्र स्वेदाश्रुणोः सहजयोरागन्तुकदानोदकधूमाभिभवाभ्यां तिरोधानान्मीलनभेदः। मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनमिति लक्षणात्॥ ४२॥

बहूनीति। तयोर्वधूवरयोः कण्टककुड्मलश्रियः पुलकाङ्कुरसम्पदः बहूनि वसूनि धनान्येव दक्षिणां तत्कालदानं प्रयच्छतो ददतो भीमस्य सत्त्वमुत्साहमवेक्ष्य तत्क्षणं तत्काले अत्यन्तसंयोगे द्वितीया। रोमाञ्चमितेषु गतेषु जनेषु मिश्रतां मेलनं ययुस्तेन रोमाञ्चे सति तिरोहिता इत्यर्थः। पूर्ववदलङ्कारः॥ ४३॥

बभूवेति। तयोर्वधूवरयोः श्रुतिक्रियाणां श्रुत्युक्तकर्मणामारम्भपरम्परायां त्वरा प्रयोगाविच्छेदत्वरा ससम्भ्रमः स्तम्भस्य निष्क्रियाङ्गत्वलक्षणस्य सात्त्विकस्य विजित्वरी विजेत्री इण्नशजिसर्त्तिभ्यः क्वरप् टिड्ढाणञित्यादिना ङीप्। न बभूव नापह्नोतुं शशाकेत्यर्थः। समिधा इन्धनेन समेधितः प्रदीपितः अग्रतः स्थितो वह्निरपि कम्पसम्पत्तिं वेपथूद्रेकं नालुम्पन्निरोद्धुं नाशकदित्यर्थः। गाढानुरागविकाराणां दुर्वारवेगत्वादिति भावः। अत्र कर्मत्वरासमिधद्वह्निरूपकारणसद्भावेऽपि स्तम्भकम्पनिर्वृत्तिरूपकार्य्यानुत्पत्तेर्विशेषोक्तिरलङ्कारः। तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिरिति लक्षणात्॥ ४४॥

दमस्वसुः पाणिममुष्य गृह्णतः
पुरोधसा संविदधेतरां विधेः ।
महर्षिणेवाङ्गिरसेन साङ्गता
पुलोमजामुद्वहतः शतक्रतोः ॥ ४५ ॥
स कौतुकागारमगात् पुरन्ध्रिभिः
सहस्वरन्ध्रीकृतमीक्षितुं ततः ।
अधात् सहस्राक्षतनुत्वमितना-
मधिष्ठितं यत् खलु जिष्णुनामुना ॥ ४६ ॥
तथाशनाया निरशेषि नो ह्रिया
स सभ्यगालोकि परस्परक्रिया ।

दमस्वसुरिति । दमस्वसुः पाणिं गृह्णतः तामुद्वहत इत्यर्थः । अमुष्य नलस्य पुलोमजां शचीम् उद्वहतः शतक्रतोरिन्द्रस्य महर्षिणा आङ्गिरसेन बृहस्पतिना पुरोधसा गौतमेन विधेरनुष्ठानस्य साङ्गता साङ्गुण्यं सम्विदधेतरा अतिशयेन सम्पादिता तिङव्ययघादाम्प्रत्ययः ॥ ४५ ॥

स इति । ततो होमानन्तरं स नलो वीक्षितुं सर्वेषां विस्रम्भवीक्षणार्थं सहस्ररन्ध्रीकृत मनेकगवाक्षीकृतं मङ्गलोद्वाहावभूत तद्भावेक्षिः । कौतुकागारं मङ्गलगृहं पुरन्ध्रिभिः सह वृद्धो यूनेति ज्ञापकात्सहाप्रयोगे सहार्थे तृतीया । अगात् प्राविशत् यथागारं जिष्णुना जयशीलेन इन्द्रेण चामुना नलेनाधिष्ठितं तं सहस्राक्षतनुत्व मिततामिन्द्रकवचतुल्यतामधात् ॥ ४६ ॥

तथेति । अथ वरेण वध्वा च यथाविधि यथा शास्त्रं त्र्यहं त्रिदिनम् अत्यन्त संयोगे द्वितीया । तद्धितार्थेत्यादिना समाहारे द्विगुः राजाहःसखिभ्य टच् द्विगुरेकवचनं रात्राह्नाह्नाः पुंसि इति पुंलिङ्गता । अथ-

विमुक्तसम्भोगमशायि सस्पृहम्
वरेण वध्वा च यथाविधि त्र्यहम् ॥ ४७ ॥
कटाक्षणाज्जन्यजनैर्निजप्रजाः
क्वचित् परीहासमचीकरत्तराम् ।
धराप्सरोभिर्वरयात्रयागता-
नभोजयेद्भोजकुलाङ्कुरः क्वचित् ॥ ४८ ॥
स कश्चिदूचे रचयन्तु तेमनो-
पहारमत्राङ्ग ! रुचेर्यथोचितम् ।

नाया बुभुक्षात् अशनेति पिपासार्थेष्विति निपातनात्साधु । ह्रिया न निरशेषि तानपर्याप्तं सभोजि इत्यर्थः । परस्परक्रिया अन्योन्यचेष्टा सख्यस्यश्रेच्छं नालोकि नवीक्षिता तथा विमुक्तसम्भोगं यथा तथा सस्पृहं साभिलाषमेव अशायि शयितं भावे लुङ् । यथाह आपस्तम्बः त्रिरात्रमुभयोरधःशय्या ब्रह्मचर्य्यं मक्षारलवणवर्जितञ्च तयोः शय्यामन्तरेण दण्डोपलिप्तवाससा सूत्रेण परिवीतस्तिष्ठतीति ॥ ४७ ॥

कटाक्षणादिति । भोजकुलाङ्कुरो भोजकुलकुमारो दमः निजाः प्रजाः स्वजनान् प्रजा स्यात्सन्ततौ जने इत्यमरः । कटाक्षणात्कटाक्षकरणात्तत्संज्ञित इत्यर्थः कटाक्षयते स्तत्करोतीतिण्यन्ताद्भावे ल्युट् । जन्यजनैः सह जन्याः स्निग्धाः वरस्येत्यमरः । परीहासं सद्रूयमिति यावत् द्रवः केली परीहास इत्यमरः । उपसर्गस्य घञ् मनुष्ये बहुलमिति दीर्घः । क्वचित्प्रदेशे अचीकरत्तरा मतिशयेन कारयामास करोतेर्णौ चङ् सन्भावादभ्यासत्वे दीर्घः तिङ् घादाम् प्रत्ययः । तदा क्वचित् प्रदेशान्तरे वरस्य यात्रया सह आगतान् जनान् धराप्सरोभिः क्षितिसुन्दरीभिः अभोजयद्भोजयामास तत्काले परिहासकरणसौकर्य्यादितिभावः । निगरणचलनार्थेभ्यश्चेति परस्मैपदं गति बुद्धीत्यादिना अणिकर्त्तुः कर्मत्वम् ॥४८॥

पिपासतः काञ्चन सर्वतोमुखम्
तवार्पयन्तामपि काममोदनम् ॥ ४९ ॥
मुखेन तेऽत्रोपविशत्वसाविति
प्रयाच्य दृष्टानुमतिं खलाहसत् ।
वराङ्गभागः स्वमुखं मतोऽमुना
स हि स्फुटं येन किलोपविश्यते ॥ ५० ॥

तात्कालिकमेव परीहासं वहुधा वहुधा वर्णयति स इत्यादि । स इमः कश्चिज्जन्यजनमूचे उवाच किमिति अङ्ग ! भो ! अत्र प्रदेशे पिपासतः उत्तृषतः पिवतेः सनन्ताल्लटः शतरि ङीप् । सर्वतोमुखम् उदकं पुष्करं सर्वतोमुखमित्यमरः । यथा तव काश्चन स्त्रियः रुचेस्तृषाया यथोचितं यथार्हन्तेमनस्य निष्ठानापराख्यस्य चोष्यद्रवस्य उपहारं समर्पणं स्व त्तेमनन्तु निष्ठानमित्यमरः । रचयन्तु यथा कुर्वन्तु काममोदनमन्नं न चार्पयन्तां प्रयच्छन्त्विति अस्य पिपासतो मुखपानेच्छो रङ्गरुचेः स्वाङ्गसौन्दर्याद्धेतोः मनो अपहरतीति मनोऽपहारं मनोहरं कर्मण्यण् । मुखमास्यं सर्वतः समन्तादर्पयन्तां कामस्य मोदनं समर्पणं रचयन्तु रमयन्तामिति चेत्यर्थः । इत्यूचे इत्यन्वयः अत्रोभयोरप्यर्थयोर्विवक्षितत्वेन प्रकृतत्वात् केवलप्रकृतश्लेषः ॥ ४९ ॥

मुखेनेति । हे जन्य ! अत्र पङ्क्तावसौ ते तव मुखेन आस्येन वक्त्रेण च अधिकरणे साधनत्वनिर्देशः मुख इत्यर्थः । उपविशत्विति प्रार्थनायां लोट् । प्रयाच्य प्रार्थ्य दृष्टानुमतिं कृताङ्गीकारं जन्यं खला काचिद्धूर्त्ता अपहसत् परिजहास किमिति अमुना जन्येन स वराङ्गभागो अस्याः गोप्यप्रदेशः वराङ्गोमूर्ध्नि गुह्ययोरित्यमरः । स्फुटं यथा तथा स्वमुखं मतोहि स्ववक्त्रसदृशत्वेन अनुमत इत्यर्थः । येन वराङ्गेन उपविश्यते किल सुखोपवेशनाङ्गीकारो नान्तरीयकः सिद्ध इति भावः ॥५०॥

युवामिमे मे स्त्रितमे इतीरिणो
गले तयोक्ता निजगुच्छमेकिका।
न भास्यदस्तु छगलो वदन्निति
न्यधत्त जन्यस्य ततः पराकषत् ॥ ५१ ॥
नलाय बालव्यजनं विधुन्वती
दमस्य दास्या निभृतं पदेऽर्पितात्।
अहासि लोकैः सरटात् पटोज्झिनी
भयेन जङ्घायतिलङ्घिरंहसः ॥ ५२ ॥
पुरस्थलाङ्गूलमदात् खला वृषी-
मुपाविशत् तत्र ऋजुर्वरद्विजः।

युवामिति। इमे युवां भवत्यौ मे मम अतिशयेन स्त्रियौ स्त्रितमे प्रियतमे इत्यर्थः। नद्याः शेषस्यान्यतरस्याम् इति विकल्पाद्ध्रस्वः। इतीरिणः इति वादिनः ईरतेर्णिनिः। जन्यस्य वरसखस्य गले कण्ठे तयोक्ता स्त्रीतमेत्युक्ता एकैवैकिका तयोरन्यतरा स्त्री कात्पूर्वस्येतीकारः। अद इदं स्त्रीतमेति वचो वदन् त्व तुच्छगलो रिक्तकण्ठः सन् न भासि न शोभस इत्युक्त्वेति शेषः गम्यमानार्थत्वादप्रयोगः। निजमात्मीयं गुच्छं द्वात्रिंशद्यष्टिकहारं हारभेदा यष्टिभेदा गुच्छगुच्छार्धगोस्तना इत्यमरः। न्यधत्त निदधे अपरत्वयात्तु स्त्री अदोमे मेदृदं शब्द मयुक्तां वदन् च्छगलश्छागोऽसीत्यपाकषदाचकर्ष कषे स्तौदादिका ल्लङ् अजाच्छागो स्तवच्छाग वस्तच्छगलका अजेत्यमरः ॥ ५१ ॥

नलायेति। नलाय बालव्यजनं विधून्वती चामरग्राहिणी दमस्य दास्या निभृतं निगूढ़म्पदे अर्पिताद्विस्टटात् जङ्घायतिलङ्घिरंहसो जङ्घादैर्घ्यव्यापिवेगात् वेगेन जङ्घामारोहत इत्यर्थः। सरटात् कृकलासात् सरटः कृकलासः स्यादित्यमरः। भयेन पटोज्झिनी वस्त्रत्यागिनी सती लोकैर्जनैरहासि परिहसिता ॥ ५२ ॥

पुनस्तमुत्थाप्य निजामतेर्वदाऽ
हसच्च पश्चात् कृतपुच्छतत्प्रदा ॥ ५३ ॥
स्वयं कथाभिर्वरपक्षसुभ्रुवः
स्थिरीकृतायाः पदयुग्ममन्तरा ।
परेण पश्चान्निभृतं न्यधापयत्
ददर्श चादर्शतलं हसन् खलः ॥ ५४ ॥
अथोपचारोद्धुरचारुलोचना-
विलासनिर्वासितधैर्य्यसम्पदः ।

पुरस्येति। खला काचिद्धूर्त्ता वृसीमासनं मुनीनामासनं वृसीत्यमरः। पुरस्थलाङ्गूलं पुरोभागस्थपुच्छं यथा तथा अदाद्दत्तवान् ददातेर्लुङि गातिस्थादिनासिचो लुक्। तत्र तस्यां ऋजुर्मुग्धो वरस्य सम्बन्धि द्विजः उपाविशत् उपविष्टः निजामतेः स्वाज्ञानस्य वदतीति अज्ञानात्कृतमिति वदतीत्यर्थः। पचाद्यच् वदा वदो वदावदोवक्ता इत्यमरः। पुनस्तं द्विजं उत्थाप्य पश्चात् कृतपुच्छां तां वृसीं प्रददातीति तत्प्रदा सती प्रदेति प्रपूर्वाद्दातेः कर्मोपपदात्कप्रत्ययः। अहसत् जहास च पुच्छस्य पुरोपस्थाने द्विजस्य प्रकाशमेहनत्वप्रतीतेः पृष्ठत उपस्थाने पशुत्वप्रतीतेश्चेति भावः। कूर्मादिपीठसृष्टौ पुच्छव्यपदेशः ॥ ५३ ॥

स्वयमिति। खलो धूर्त्तः स्वयं स्वेन कथाभिरिष्टालापैः स्थिरीकृतायाः निश्चलीकृतायाः वरपक्षे सुभ्रुवः स्त्रियाः पदयुग्मं अन्तरा पादयुगलस्यान्तराले अन्तरान्तरेण युक्ते इति द्वितीया। परेण पुरुषान्तरेण पश्चात् पृष्ठतो निगूढं यथा तथा आदर्शतलं दर्पणस्वरूपं न्यधापयत् निधापयामास स हसन् ददर्श च वराङ्गप्रतिविम्बदर्शनाद्धासः ॥ ५४ ॥

अथेति। अथोपचारेषु उद्धुरा उद्गूढभारा तत्परा इत्यर्थः। ऋक्पूरित्यादिना समासान्तः। तासां चारुलोचनानां स्त्रीणां विलासैः साधनै

स्मरस्य शिल्पं वरवर्गविक्रिया-
विलोककं लोकमहासयन्मुहुः ॥ ५५ ॥
तिरोवलद्वक्रसरोजनालया
स्मिते स्मितं यत् खलु यूनि बालया ।
तया तदीये हृदये निखाय तद्-
व्यधीयतासम्मुखलक्ष्यवेधिता ॥ ६ ॥
कृतं यदन्यत्करणोचितत्यजा
दिदृक्षु चक्षुर्यदवारि बालया ।
हृदस्तदीयस्य तदेव कामुके
जगाद वार्त्तामखिलां खले खलु ॥ ५७ ॥

र्निवासिता निष्कासिता धैर्यसम्पद्येन तस्य स्मरस्य शिल्पं सृष्टिः स्मरकृता इत्यर्थः। वरवर्गस्य जन्यजनस्य विक्रिया वक्ष्यमाणविकाराः कर्त्र्यः विलोककं द्रष्टृजनं मुहुरहासयन् परिचारिकाविलासदर्शनादेव जन्यजनस्य जनहासकरः स्मरविकारोजात इत्यर्थः ॥ ५५ ॥

तिर इति। तिरोवलन् तीर्य्यग्वलन् वक्रसरोजनालं कण्ठो यस्यास्तया वलितकन्धरया बालया युवत्या यूनि तरुणे स्मिते स्मितवति सति कर्त्तरि क्तः। यत् स्मितं किल हसितं खलु भावे क्तः, तया बालया तदीये युवसम्बन्धिनि हृदये तस्मिन् तन्निखाय गाढं प्रवेश्य असम्मुखमनभिमुखं यल्लक्ष्यं तद्वेधिता तद्वेधित्वं व्यधीयत विहिता तत् स्मितं तस्य तिरश्चीनलक्ष्यवधी स्मरोजात इत्यर्थः ॥ ५३ ॥

कृतमिति। करणोचितं क्रियार्हन्त्यजतीति तत्त्यजा तत् कर्त्तव्यमकुर्वतेत्यर्थः। त्यजेः क्विप्। तादृश्या बालया तरुण्या अन्यदकर्त्तव्यं यत्कृतं दिदृक्षु दर्शनोत्सुकं चक्षुः स्वदृष्टिर्यदवारि वारितं तदेव कार्यकरणं दिदृक्षतादर्शनद्वयमेव तदीयस्य बालासम्बन्धिनो हृदो हृदयस्याखिलां वार्त्तां वृत्तान्तं खले धूर्त्ते कामुके जगाद खलु तस्मै जगादे-

जलं ददत्याः कलितानतेर्मुखम्
व्यवस्यता साहसिकेन चुम्बितुम् ।
पदे पतद्वारिणि मन्दपाणिना
प्रतीक्षितोऽन्येक्षणवञ्चनक्षणः ॥ ५८ ॥
युवानमालोक्य विदग्धशीलया
स्वपाणिपाथोरुहनालनिर्मितः ।
श्लथोऽपि सख्या परिधिः कलानिधौ
दधावहो तं प्रति गाढबन्धताम् ॥ ५९ ॥

त्यर्थः । तत्र क्रियादृक्त्या सान्द्ररागपारवश्य मद्दर्शनोत्सुकं चक्षुः स्वदृष्टिः यद्वारि प्रणयकोपस्य सूचितेत्यर्थः ॥ ५७ ॥

जलमिति । जलं ददत्या आवर्जयन्त्या अतएव कलिता आनतिर्यया तस्या नम्रमुख्या इत्यर्थः । मुखं चुम्बितुं व्यवस्यता उद्युञ्जानेन व्यवस्यतेर्लटः शत्रादेशः । अतएव मन्दपाणिना श्लथहस्तेन सहसा बलात्कारेण वर्त्तते यस्तेन सह साहसिकेन केनचित् ओजःसहोऽम्भसां वर्त्तत इति ठक् । पदे स्त्रीचरणे पतद्वारि यस्मिन् तस्मिन् सति चुम्बनव्यसनाज्जलपानमप्यविगणय्येत्यर्थः । अन्येक्षणवञ्चनक्षणः परदृष्टिवञ्चनसमयः प्रतीक्षितः आकाङ्क्षित इत्यर्थः । कामान्धाः किं न कुर्व्वन्तीति भावः ॥ ५८ ॥

युवानमिति । विदग्धशीलया प्रगल्भस्वभावया कयाचिद् युवानमालोक्य कलानिधौ कामशिल्पाकरे चन्द्रे कला शिल्पे विधोरंश इत्यभिधानात् । सख्या स्वपाणिपाथोरुहनालाभ्यां निजभुजाभ्यां निर्मितः निजभावसूचनार्थं कृतः परिधिः परिवेषरूपत्वात् परिरम्भः परिवेषः चन्द्रे तत्सम्भावनयेति भावः । श्लथोऽपि सन् तं युवानं प्रति तस्मिन्नित्यर्थः । गाढबन्धतां दधौ गाढालिङ्गनसुखं तस्मादभूदित्यर्थः । अहो कार्य्यकारणवैरस्याद्विरुद्धकार्य्योत्पादाच्च आश्चर्य्यं अतएवासङ्गति विष-

नतभ्रुवः स्वच्छनखानुबिम्बन-
च्छलेन कोऽपि स्फुटकम्पकण्टकः ।
पयो ददत्याश्चरणे भृशं क्षतः
स्मरस्य बाणैः शरणे न्यविक्षत ॥ ६० ॥
मुखं यदस्मायि विभज्य सुभ्रुवा
ह्रियं यदालम्ब्य नतास्यमासितम् ।
अवादि वा यन्मृदु गद्गदं युवा
तदेव जग्राह तदाप्तिलग्नकम् ॥ ६१ ॥

मालङ्काराः संसृष्टाः कार्य्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः । विरुद्धकार्य्यस्योत्पत्तिरिति च लक्षणात् । अत्र रतिरहस्योक्तेः उत्सङ्गसङ्गतापि प्रियसख्यां विविधविभ्रमं तनुता । भावादङ्कगतं शिशुमालिङ्गति चुम्बति ब्रूते ॥ ५९ ॥

नतेति । स्मरस्य बाणैः भृशं क्षतः अतएव स्फुटौ कम्पकण्टकौ वेपथुरोमाञ्चौ रागसात्त्विकौ शृङ्गारसात्त्विकौ च यस्य सः रोमाञ्चेऽपि च कण्टक इत्यमरः । कोऽपि युवा पयो दधत्या नतभ्रुवः स्त्रियः स्वच्छनखेष्वनुबिम्बनच्छलेन प्रतिबिम्बव्याजेन चरणे पाद एव शरणे रक्षितृ न्यविक्षत निविष्ट इति सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद् गम्या नेर्विश इति लुङि तङ् इगुपधादनिट्काः इति क्सेकनिर्देशः ॥ ६ ॥

मुखमिति । सुभ्रुवा कयाचिद्योषिता मुखं विभज्य कुटिलीकृत्य किञ्चिद्विकृत्येत्यर्थः । यदस्मायि विस्मितं स्मयतेर्भावे लुङि चिणि वृद्ध्यादेशौ, ह्रियमालम्ब्य यं नतास्यं नम्रमुखं यथा तथा आसितम् आसेर्भावे क्तः । मृदु गद्गदं अवादि वा उदितञ्च वदेः कर्मणि लुङ् । युवा तदेव तच्चेष्टात्रयमेव तदाप्तौ तस्याः प्राप्तौ लग्नकं प्रतिभुवं जग्राह गाढानुरागानुभावत्वात् तस्येति भावः ॥ ६१ ॥

विलोक्य यूना व्यजनं विधुन्वती-
मवाप्तसत्त्वेन भृशं प्रसिष्विदे ।
उदस्तकण्ठेन मृषोष्मनाटिना
विजित्य लज्जां ददृशे तदाननम् ॥ ६२ ॥

स तत्कुचस्पृष्टकचेष्टितदोर्लता-
चलद्दलाभव्यजनानिलाकुलः ।
अवाप नानानलनालशृङ्खला-
निबद्धनीडोद्भवविभ्रमं युवा ॥ ६३ ॥

विलोक्येति । व्यजनं तालवृन्तकं विधुन्वतीं चालयन्तीं काञ्चिद्विलोक्य अवाप्तसत्त्वेन उद्रिक्तसत्त्वगुणेन यूना भृशं प्रसिष्विदे स्विन्नं सञ्जातसात्त्विकोऽभूदित्यर्थः । स्विद्यतेर्भावे लिट् । मृषोष्मनाटिना नाटकेन उदस्तकण्ठेन उद्ग्रीवेण सता तेन लज्जां विजित्य विहृत्येत्यर्थः । तदाननं तस्याः आननं ददृशे दृष्टं व्यजनपवनापेक्षयेति भावः । दृशेः कर्मणि लिट् । अत्रागन्तुकेन घर्मस्वेदेन सहजसात्त्विकस्वेदेन ग्रहणान्मीलनालङ्कारः । मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनमिति लक्षणात् ॥ ६२ ॥

स इति । स पूर्वोक्तो युवा तस्या व्यजनहस्तायाः कुचयोः स्पृष्टमेव स्पृष्टकं घर्षणं तदेव चेष्टा यस्याः तस्या दोर्लतायाश्चलद्दल इवाभातीति तदाभं इत्युत्प्रेक्षा लतायाः पत्रेण भवितव्यमिति भावः । तस्य व्यजनस्यानिलेन आकुलः उक्तरीत्या तत्कुचस्पृष्टकादुत्कर्षाहित मित्यर्थः । नानानलनालो नानाविधतृणकाण्ड एव शृङ्खला निगडस्तया निबद्धस्य नीडोद्भवस्य पक्षिणो विभ्रमं विलासं अवाप उपरि सञ्चार्यमाण बालव्यजनवर्त्तिसुखनिश्चलाङ्गः पञ्जरबद्धपक्षीव तद्वभावित्यर्थः । नीडोद्भवा गरुत्मन्तः इत्यमरः ॥ ६३ ॥

आवच्छटा काऽपि कटाक्षणस्य सा
तथैव भङ्गी वचनस्य काचन।
यया युवभ्यामनुनाथने मिथः
कयोऽपि दूतस्य न शेषितः श्रमः ॥ ६४ ॥
पपौ न कश्चित् क्षणमास्यमीलितम्
जलस्य गण्डूषमुदीतसम्मदः।
चुचुम्ब तत्र प्रतिबिम्बितं मुखम्
पुरः स्फुरन्त्याः स्मरकार्मुकभ्रुवः ॥ ६५ ॥
हरिन्मणेर्भोजनभाजनेऽर्पिते
गताः प्रकोपं किल वारयात्रिकाः।

आवच्छटेति। सा तात्कालिकी रौप्यवाच्या कटाक्षणस्य कटाक्षोपयोगस्य तत्करोतीति णयन्ता ल्युट्। आवच्छटा भङ्गी तथैव वचनस्य काचनभङ्गी जातेति विशेषः। यया कटाक्षवचनभङ्ग्या युवभ्यां युवत्या यूना च पुमान् स्त्रियेत्येकशेषः। मिथोऽनुनाथने परस्परप्रार्थने नाथतेर्याचार्थत्वाल्ल्युट्। कयोऽल्पो दूतस्य श्रमः प्रयासो न शेषितः स्वयमेव तत्कार्यकारित्वान्नावेक्षित इत्यर्थः ॥ ६४ ॥

पपाविति। उदीतसम्मदः उत्पन्नकौतुकः कश्चिद्युवा पुरः स्फुरन्त्याः पुरोवर्त्तिन्याः स्मरस्य कार्मुके कार्मुकभूते भ्रुवौ यस्याः जलदात्र्या आस्येन मीलितं मिश्रितं सङ्क्रान्तं प्रतिबिम्बञ्जलस्य गण्डूषं गण्डूषितजलमित्यर्थः तच्च गण्डूषणाय मुखसंयुक्तं पाणिधृतमिति द्रष्टव्यम् 'अन्यथा प्रतिबिम्बादिकार्य्यायोगादिति भावः। क्षणं क्षणमात्रं न पपौ किन्तु तत्र जले प्रतिबिम्बितं मुखं चुचुम्ब ॥ ६५ ॥

हरिदिति। हरिन्मणेर्मरकतोपलस्य सम्बन्धिनि तन्मये भोजनभाजने भोजनपात्रे अर्पिते सति प्रकोपमतिरोषङ्गताः पत्रभाजन भा-

ऋतं न शाकैः प्रवितीर्णमस्ति व-
स्त्विषेदमेवं हरितेति बोधिताः ॥ ६६ ॥

ध्रुवं विनीतः स्मितपूर्ववाग् युवा
किमप्यपृच्छन्न विलोकयन्मुखम् ।
स्थितां पुरः स्फाटिककुट्टिमे वधूम्
तदङ्घ्रियुग्मावनिमध्यबद्धदृक् ॥ ६७ ॥

अमी लसद्बाष्पमखण्डिताखिलम्
वियुक्तमन्योन्यमसुक्तमार्दवम् ।

भ्रान्त्येति भावः । वरयात्रा प्रयोजनमेषामस्तीति वारयात्रिकाः वरेण सह भोक्तारः प्रयोजनमिति ठक् । इदं वो युष्माकं प्रवितीर्णं दत्तं भाजनं शाकैः शाकतरुपत्रैः शाके पृथुच्छदाविति वैजयन्ती । ऋतङ्कृतं नास्ति न भवति किन्तु हरिता हरितया पालाशो हरितो हरिदित्यमरः । त्विषा स्वकान्त्या एव सित्यं वा भ्रान्तिः कथमिति बोधिताः । अत्र कलितसाऽश्यान्मरकतभाजनेषु पत्रभाजनभ्रान्तिनिबन्धनाद्भ्रान्तिमदलङ्कारः ॥ ६६ ॥

ध्रुवमिति । युवा कोऽपि तरुणः पुरोऽग्रे स्फाटिके स्फटिकमये कुट्टिमे निबद्धभूमौ स्थितां वधूं तस्याङ्घ्रियुग्मस्य अवनिमध्ये अन्तरालभूमध्ये बद्धदृग्दत्तदृष्टिः सन् तत्सङ्क्रान्ततद्वराङ्गप्रतिविम्बाकृष्टः सन्नित्यर्थः । मुखं न विलोकयन् न पश्यन् नञर्थस्य नशब्दस्य सुप्सुपेति समासः । ध्रुवं सत्यं विनीतः साधुः किल स्मितपूर्वा वाग्यस्य स सन् किमपि यत्किञ्चिदपृच्छत् अत्र यूनस्त्रीसम्भाषणे पादावलोकनेन मुखावलोकनादिति धर्मयोगाद्विनीतत्वोत्प्रेक्षा ॥ ६७ ॥

अमी इति । अमी जना जन्यजना लसन् बाष्पो यस्य तमखण्डितमखिलं स्वरूपं यस्य तदखण्डिताखिलमित्यर्थः । अन्योन्यं वियुक्त मसंश्लिष्टं

रसोत्तरं गौरमपीवरं रसा-
दभुञ्जतामोदनमोदनं जनाः ॥ ६८ ॥
वयोवशस्तोकविकस्वरस्तनीम्
तिरस्तिरश्चुम्बति सुन्दरे दृशा ।
स्वयं किल स्रस्तमुरस्यमम्बरम्
गुरुस्तनी ह्रीणतराऽपराऽऽदधे ॥ ६९ ॥
यदादिहेतुः सुरभिः समुद्भवे
भवेत्तदाज्यं सुरभि ध्रुवं ततः ।
वधूभिरेभ्यः प्रवितीर्य्य पायसम्
तदोघकुल्यातटसैकतं कृतम् ॥ ७० ॥

तथाप्यमुक्तमार्दवमकठिनं रसोत्तरं स्वादुभूयिष्ठं गौरं शुभ्रमपीवरमस्थूलं आमोदनमन्नमभुञ्जत सार्थकविशेषत्वात्परिकरः ॥ ६८ ॥

वय इति । सुन्दरे रूपसम्पन्ने पुंसि वयोवशेन स्तोकविकस्वरस्तनीन्दिनेदिने किञ्चित्किञ्चिद्वर्द्धमानकुचां काञ्चित् तिरस्तिरोदृशा तिरश्चीनदृष्ट्या चुम्बति तृष्णया पश्यति सति अपरा पृथुस्तनी स्त्री स्वयं किल दृष्टैवेति भावः । अतिशयेन ह्रीणा लज्जिता ह्रीणतरा सती ह्रीधातोः कालान्तरप् नुदविदेत्यादिना पक्षे निष्ठानत्वन्तसिलादिष्विति तल्वसुच इति पुंवद्भावः । स्रस्तमुरस्यमम्बरमुत्तरीयमादधे यथा स्थानं निदधे कैमुत्येनाप्यदर्शनसम्भवनाभिमानादिति भावः ॥ ६९ ॥

यदिति । यद्यस्मात् कारणात् समुद्भवे उत्पत्तौ सुरभिर्गौरः सुगन्धि च सुरभिर्वाच्यवत् सौम्ये सुगन्धौ स्त्रीष्वसौरभेति यादवः । आदिहेतुर्मूलकारणं ततः कारणाद् यदाज्यं सुरभि सुगन्धि भवेत् सुरभिस्ततस्य सुरभित्वं युक्तमिति भावः । ध्रुवमित्युत्प्रेक्षायां वधूभिः परिवेष्ट्रीभिः एभ्यो जन्यजनेभ्यः पयसि संस्कृतं पायसं परमान्नन्तु पायसमित्यमरः ।

यद्यप्यपीता वसुधालयैः सुधा
तदप्यदः स्वादु ततोऽनुमीयते ।
अपि क्रतूषर्बुधदग्धगन्धिने
स्पृहां यदस्मै दधते सुधान्धसः ॥ ७१ ॥
अबोधि नो ह्रीनिभृतं मदिङ्गितम्
प्रतीत्य वा नादृतवत्यसाविति ।
लुनाति यूनः स्म धियं कियद्गता
निवृत्य बालादरदर्शनेषुणा ॥ ७२ ॥

संस्कृतं भिक्षादिभ्य इत्यण् प्रत्ययः। प्रवितीर्य्य दत्त्वा तस्य सुरभ्याज्यस्य ओघः प्रवाह स्तस्य कुल्या कृत्रिमसरित् तस्याः तटे सैकतं सिकतामयं पुलिनं कृतमिति रूपकं देशे लुबिलचौ चिण् प्रत्ययः ॥ ७० ॥

यदपीति। यदपि यद्यपि सुधा वसुधालयै र्भूनिलयैरपि अपीता न पीता तथाप्यदः आज्य ततः सुधातोऽपि स्वाद्वनुमीयते यतः सुधैवान्धोऽन्नं येषां ते सुधान्धसो देव्यः क्रतूषर्बुधदग्धगन्धिने यज्ञाग्निप्लुष्टगन्धवति अस्मै आज्याय स्पृहामिच्छां दधते स्पृहेरीप्सित इति सम्प्रदानत्वाच्चतुर्थी। अस्माकमुभयानुभवाभावेऽपि तद्वत्प्रवृत्तिलिङ्गेन तदुभयरसतारतम्यानुमानं सुकरमित्यर्थः ॥ ७१ ॥

अबोधीति। असौ बाला युवतिः ह्रीनिभृतं निगूढं मदिङ्गितं मदभिप्रायं नो अबोधि नावोधिष्ट बुध्यतेः कर्त्तरि लुङि तङ् दीपजनेत्यादिना च्लेश्चिणादेशः। प्रतीत्य बुद्ध्वापि नादृतवती न गणितवतीत्येवं रूपां यूनोधियं संशयबुद्धिं कियत् कतिचित्पदानि गता निवृत्य आदरदर्शनं सरागदृष्टिः किञ्चिद्दर्शनमसकलदृष्टिरिति व्याचक्षते ईषदर्थेदरोऽव्यय मित्यमरः। तेनैवेषुणा शस्त्रेण लुनाति स्म। एतावतैव यूनो विषमानुरागशङ्काशङ्कुरुद्धृतं इति भावः ॥ ७२ ॥

न राजिकाराद्धमभोजि तत्र कै-
र्मुखेन सीत्कारकृता दधद्दधि ।
धुतोत्तमाङ्गैः कटुभावपाटवा-
दकाण्डकण्डूयितमूर्द्धतालुभिः ॥ ३ ॥
वियोगिदाहाय कटूभवत्त्विष-
स्तुषारभानोरिव खण्डमाहृतम् ।
सितं मृदु प्रागथ दाहदायि तत्
खलः सुहृत्पूर्वमिवाहितस्ततः ॥ ७४
नवौ युवानौ निजभावगोपिना-
वभूमिषु प्राक्प्रहितभ्रमिक्रमम् ।

नेति । तत्र भोजने कैर्जनैः दधद्दधि दधिवद्म्ना संस्कृतमित्यर्थः । राजिकाराद्धं राजसर्षपनिष्पन्नं तत्पिष्टमयं व्यञ्जनमित्यर्थः । अथो राजसर्षपे क्षवः क्षुधाभिजननो त्वाष्टिका राजिकेति यादवः । कटुभावपाटवात् कटुसामर्थ्यात् धुतोत्तमाङ्गैः कम्पितमस्तकैः यथा अकाण्डे असमये कण्डूयितं मूर्धतालु मूर्धानस्तालूनि च यैस्तैः सद्भिः सीत्कारकृता ससीत्कारेण मुखेन वक्त्रेण नाभोजि सर्वैरेवं कुर्वद्भिरेव अभोजि स्वभावोक्तिः अलङ्कारः ॥ ७३ ॥

वियोगीति । वियोगिनां दाहाय कटूभवन्त्यस्तीक्ष्णीभवन्त्यस्त्विषो यस्य तस्य तुषारभानोश्चन्द्रस्य खण्डमिव स्थितमित्युत्प्रेक्षा । सितं शुभ्रं तद्राजसर्षपनिष्पन्नं व्यञ्जनं पूर्वमादौ सुहृदाप्तः ततः पश्चात् कार्यकाले अहितोऽनाप्तः खल इवेत्युपमा प्रागादौ मृदु अथ पश्चाद्दाहदायीति दाहकाले बभूवेति शेषः ॥ ७४ ॥

नवाविति । नवावपूर्वौ युवानौ युवतिश्च युवा च पुमान् स्त्रियेत्येकशेषः । निजभावगोपिनौ स्वाभिप्रायवञ्चकौ सन्तौ अतएव प्राक् प्रथममभूमिष्वन्यविषयेषु नञर्थेन नञ् समासः । प्रहितभ्रमिक्रमं कृतसञ्चार-

दृशोर्विधत्तः स्म यदृच्छया किल
त्रिभागमन्योन्यमुखे पुनः पुनः ॥ ७५ ॥
व्यधुस्तमां ते मृदुमांससाधितम्
रसादशित्वा मृदु तेमनं मनः ।
निशाधवोत्सङ्गकुरङ्गजैरदः
पलैः सपीयूषपलैः किमप्यपि ॥ ७६ ॥
परस्पराकूतजदूतकृत्ययो-
रनङ्गमाराद्धुमपि क्षणं प्रति ।

प्रकारं दृत स्ततः प्रवर्त्तित मित्यर्थः दृशोस्त्रिभागं तृतीयभागमपाङ्गमित्यर्थः । वृत्तिविषये सङ्ख्याशब्दस्य पूरणार्थत्वमिति कैयटः । पुनः पुनरन्योन्यस्य मुखे यदृच्छया किल अनिच्छयेन विधत्तः स्म आदौ ह्रिया विषयान्तरदर्शनव्याजादेव अन्योन्यमुखमपाङ्गदृष्ट्या ददृशतुरिति चक्षुः प्रीत्याख्या प्रथमावस्थैका ॥ ७५ ॥

व्यधुस्तमामिति । ते जन्याः मृदुना अकठिनेन मांसेन साधितं निष्पादितं तेमनं निष्ठानापराख्यं चाप्यविशेषः स्यात्तेमनं तु निष्ठानं इत्यमरः । रसाद्रागादशित्वा आस्वाद्य अद इदन्तेमनं निशाधवस्येन्दो रुत्सङ्गे यः कुरङ्ग स्तज्जैः तत एव पीयूषरसैः अमृतद्रवमिश्रितैः पलैर्मांसैरप्यपि किमपाचि किं? श्रितेः पाकार्थत्वाण्ण्यन्तात्कर्मणि लुङ् घटादि मित्वाद्ध्रस्वः । इति मनोमतिं व्यधुस्तमाम् अतिशयेन विदधुरित्युत्प्रेक्षितवन्त इत्यर्थः । दधातेर्लुङि तिङ्घादाम् प्रत्ययः ॥ ७६ ॥

परस्परेति । परस्पराकूतजम् अन्योन्याभिलाषजन्यं दूतकृत्यं दूतव्यापारो नयनादिचेष्टारूपो ययो स्तयोः संज्ञाभिरेव कृतसमागमनिश्चययो रित्यर्थः । यूनो स्तरुणयोः स्त्रीपुंसयो रनङ्गमाराद्धुं सेवितु मपि रन्तुमपीत्यर्थः । क्षणं कालं प्रति निर्णयः प्रत्ययः समागमकालनिश्चयोऽपि इत्यर्थः । जनेषु जनमध्य एव कियच्चिरायुषा किञ्चिच्चिरा-

निमिषणेनैव कियच्चिरायुषा
जनेषु यूनोरुदपादि निर्णयः ॥ ७७ ॥
अहर्निशा वेति रताय पृच्छति
क्रमोष्णशीताङ्गकरार्पणाद्विटे ।
ह्रिया विदग्धा किल तन्निषेधिनी
न्यधत्त सन्ध्यामधुरेऽधरेऽङ्गुलीम् ॥ ७८ ॥
कियत् त्यजन्नोदनमानयन् कियत्
करस्य पप्रच्छ गतागतेन याम् ।
अहं किमेष्यामि किमेष्यसीति सा
व्यधत्त नम्रं किल लज्जयाननम् ॥ ७९ ॥

वस्यायिना निमेषणेन निमीलनेनैव उदपादि उत्पन्नः उत्पद्यतेः कर्त्तरि लुङ् चिण्ते पदः। परेषु निद्रितेष्वावयोः समागमः इति कालनिश्चयोऽपि संज्ञयैव कृत इत्यर्थः ॥ ७७ ॥

अहरिति। विटे क्रमेण उष्णशीतयोः अङ्गयोः करार्पणात् सूचनात् रताय अहर्निशा वेति पृच्छति सति विदग्धा चतुरा ह्रिया किल तत्कालद्वयं निषेधतीति तन्निषेधिनी सती सन्ध्यामधुरे सन्ध्यासवर्णे अधरे अङ्गुलिं न्यधत्त सन्ध्यासवर्णाधरस्पर्शेन आवयोः सन्ध्यासमये समागम इति सूचयामासेत्यर्थः। ह्रिया स्त्रीभिरङ्गुल्याधर माच्छाद्यत इति प्रसिद्धम् ॥ ७८ ॥

कियदिति। कियदोदनन्त्यजन् अपसारयन् कियदानयन् आकर्षन् करस्य गतागतेन यातायाताभ्यां विप्रतिषिद्धञ्चानधिकरणवाचि इति वैभाषिको द्वन्द्वे एकवद्भावः। किमहमेष्यामि किं त्वमेष्यसि वेति याम्पप्रच्छ सा स्त्री लज्जया किल आननं नम्रं व्यधत्त शिरोऽवनतिभेदेन त्वमेवागच्छेति सूचितवतीत्यर्थः ॥ ७९ ॥

यथामिषे जग्मुरनामिषभ्रमम्
निरामिषे चामिषमोहमूहिरे ।
तथा विदग्धैः परिकर्मनिर्मितम्
विचित्रमेते परिहस्य भोजिताः ॥ ८० ॥

नखेन कृत्वाधरसन्निभां निभाद्
युवा मृदुव्यञ्जनमांसफालिकाम् ।
ददंश दन्तैः प्रशशंस तद्रसम्
विहस्य पश्यन् परिवेषिकाधरम् ॥ ८१ ॥

अनेकसंयोजनया तदा कृते-
र्निकृत्य निष्पिष्य च तादृगर्जनात् ।
अमी कृताकालिकवस्तुविस्मयम्
जना बहु व्यञ्जनमभ्यवाहरन् ॥ ८२ ॥

यथेति । ते जन्याः यथा आमिषे मांसे अनामिषमिति भ्रमं जग्मुः यथा निरामिषे अनामिषे आमिषमोहं मांसभ्रमं चोहिरे वहन्तिस्म तथा तेन प्रकारेण विदग्धैः कुशलपाचकैः परिकर्मणा संस्कारेण निर्मितम् अतएव विचित्रं भोज्यवस्तु परिहस्य विहस्य भोजिताः सर्वे सर्वज्ञत्वमादिताः इत्यर्थः ॥ ८० ॥

नखेनेति । युवा मृदोर्व्यञ्जनमांसस्य फालिकां खण्डिकान्निभात् संछिद्य भक्षणव्याजात् नखेनाधरसन्निभां परिवेषिकाधराकारां कृत्वा विहस्य परिवेषिकायाः भोज्यप्रदात्र्या अधरं पश्यन् दन्तैददंश दष्टवान् तस्य रसं स्वादुं प्रशंसश अहो अमृतकल्पमिति तुष्टाव चेत्यर्थः । तदधरबुद्ध्येति भावः ॥ ८१ ॥

अनेकेति । तदा भोजनकाले अमी जना भोक्तारः अनेकेषां संस्कारद्रव्याणां संयोजनया मेलनेन तदा निकृत्य छित्वा निष्पिष्य पिष्ट्वा अर्ज-

पिपासुरस्मीति विवोधिता मुखम्
निरीक्ष्य वाला सुहितेन वारिणा ॥
पुनः करे कर्त्तुमना गलन्तिकाम्
हसात् सखीनां सहसा न्यवर्त्तत ॥ ८३ ॥
युवा समादित्सुरमत्रगं घृतम्
विलोक्य तत्रैणदृशोऽनुविम्बनम् ।
चकार तन्नीविनिवेशितं करम्
वभूव तच्च स्फुटकण्टकोत्करम् ॥ ८४ ॥

नात्सम्मादनाद्धेतोः तादृक्तथा विचित्रं कृतं निष्पादितं किञ्च कृतम् आकालिकेष्वकालभवेषु तत्कालदुर्लभेषु वस्तुषु पदार्थेषु विस्मयो येन तत् बह्वनेकं व्यञ्जन सुपदंशमभ्यवाहरन्नभुञ्जत ॥ ८२ ॥

पिपासुरिति। वारिणा सुहितेन वारिणा तृप्येत्यर्थः। सौहित्यं तर्पणं तृप्तिरित्यर्थः। शेषार्थे षष्ठी पूरणगुणेत्यादिना समासनिषेधः। केनचिद्यूनेति शेषः, पिपासुः पातुमिच्छुरस्मीति विवोधिता वाला मुखं निरीक्ष्य पुनर्गलन्तिकां पात्रं कर्कर्यालुर्गलन्तिकेत्यमरः। करे हस्ते कर्त्तुमना धर्त्तुकामा तुं काममनसोरपि इति मकारलोपः। सखीनां हसाद्धासात् स्वनहसोर्वेति विकल्पादप्प्रत्ययः। सहसा सपदि न्यवर्त्तत निवृत्ता अधरपिपासोक्तित्वपरिज्ञानादिति भावः ॥ ८३ ॥

युवेति। युवा अमत्रगं पात्रगतं घृतं समादित्सुः समादातुमिच्छुः सन् ददातेः सनन्तादु प्रत्ययः सनि मीमेत्यादिना इसादेशे अभ्यासलोपः। तत्र घृते एणदृशो मृगाक्ष्याः अनुविम्बनं विलोक्य करं तस्य स्त्रीप्रतिविम्बस्य नीव्यां निवेशितञ्चकार तत्प्रतिविम्बञ्च स्फुटं कण्टकोत्करमव्यक्तपुलकप्रकरं वभूव तावतैव विम्बस्य पुलकितत्वादिति भावः ॥ ८४ ॥

प्रलेहेति। कोऽपि युवा स्मितभोजनस्थलः प्राप्तभोजनभाजनः सन् प्रलेहजस्नेहे लेह्यद्रव्ये स्नेहरसे करतलगत इति भावः। कृतानु-

प्रलेहजस्नेहलतानुविम्बनाम्
चुचुम्ब कोऽपि स्मितभोजनस्थलः ।
मुहुः परिस्पृश्य कराङ्गुलीमुखै-
स्ततोऽनुरक्तैः स्वमवापितैर्मुखम् ॥ ८५ ॥
अराधि यन्मीनमृगाजपत्रिजैः
पलैर्मृदु स्वादु सुगन्धि तेमनम् ।
अशाकि लोकैः कुत एव जेमितुम्
न तत्तु सङ्ख्यातुमपि स्म शक्यते ॥ ८६ ॥
कृतार्थनस्वादुभिरिङ्गितैः परा
परासि यः किञ्चनकुञ्चितभ्रुवा ।

विम्बनां प्राप्तप्रतिविम्बां कान्ता मितिशेषः। मुहुः परिस्पृश्य ततः स्पर्शादनन्तरं स्वम्मुखमवापितैरास्यं प्रापितैश्चुम्बितै रित्यर्थः। अतएव अनुरक्तैः सस्नेहैः कराङ्गुलीमुखैरङ्गुल्यग्रैश्चचुम्ब मुहुर्लेह्यलेहनव्याजेन कान्ताप्रतिविम्बानुस्पृष्टाङ्गुलिमुखचुम्बनादेव तत्प्रतिविम्बचुम्बनात् सुखमन्वभूदित्यर्थः ॥ ८५ ॥

अराधीति। मीना मत्स्या मृगाः शशादयः अजाश्छागाः पत्रिणः पक्षिणश्चटकादयः तेभ्यो जातैस्तज्जैः पलैर्मांसैः पललं जाङ्गलं मांसं पललं क्रव्यमामिषम् इति हलायुधः। मृदु मनोहरं स्वादु रसवत् सुगन्धि सुरभि यत्तेमनं लेह्यमराधि अपाचि तत्तेमनं लोकैर्भोक्तृजनैः सङ्ख्यातुं गणयितुम् अपि न शक्यते स्म जेमितुमशितुं कुत एवाशाकि बहुलत्वाच्चेति भावः पाके राध्यते रध्यतिजेमत्यत्ति चमतीति भट्टमल्लः ॥ ८६ ॥

कृतेति। स्वादुभिर्मनोहरैः इङ्गितैर्नयनादिचेष्टितैः कृतार्थनो देहीति कृतार्थनो यो युवा किं न किञ्चनकुञ्चितभ्रुवा कुटिलभ्रुवा स्त्रिया पुरा पूर्वं परासि पर्यहारि स युवा भोजनलीलया भोजनव्यापारेण तद्व्याजेनेत्यर्थः। मुखे अङ्गुलिं क्षिपन् प्रसन्नाननया तया

क्षिपन्मुखे भोजनलीलयाङ्गुली:
पुन: प्रसन्नाननयाऽन्वकम्पि स: ॥ ८७ ॥
अकारि नीहारनिभं प्रभञ्जना-
दधूपि यच्चागुरुसारदारुभि: ।
निपीय भृङ्गारुकसङ्गि तच्च तै-
रवर्षि वारि प्रतिवारमीदृशम् ॥ ८८ ॥
त्वया विधातर्यदकारि चामृतम्
कृतञ्च यज्जीवनमम्बु साधु तत् ।
वृथेदमारम्भि तु सर्वतोमुखम्
तथोचित: कर्त्तुमिदं पिबस्तव ॥ ८९ ॥

पुनरन्वकम्पि अनुकम्पित: कार्य्यकातरो दृष्टाङ्गुलि: कृपापात्रं भवतीति भाव: ॥ ८७ ॥

अकारीति । यद्वारि प्रभञ्जनाद्वायो र्वायुसञ्चारादित्यर्थ: । पवमान: प्रभञ्जन इत्यमर: । नीहारनिभं हिमकल्पं तद्वच्छीतल मित्यर्थ: । अकारि कृतम् अगुरुसारैर्दारुभि: धूपकाष्ठैरधूपि धूपितं वासितं चेत्यर्थ: ईदृशमीदृग्गुणं भृङ्गारुकसङ्गि कनकालुकान्तर्गतं भृङ्गारु: कनकालुकेत्यमर: । वारि निपीय प्रतिवारं प्रतिपानं तत्र तस्मिन्देशे काले वा तैर्भोक्तृभिरवर्षि वर्षितम् ॥ ८८ ॥

त्वयेति । हे विधात: ! त्वया अम्बु अमृतञ्च अमृतनामकं पीयूषञ्च यदकारि तदा जीवनं जीवनसंज्ञिकञ्च यत्कृतं तदुभयं साधु सफलं सर्वतो मुखानि प्रवाहवक्त्राणि च यस्य तत्तया कृत मिति यावत् वृथैवारम्भि अकारि पेयस्य मुखवैयर्थ्यादिति भाव: । किन्तु तव अस्याम्बुन: पिबतीति इदं पिब: पाता इदमभिभोजनस्तु पाघ्रादिना शप्रत्यय: । तथा सर्वतोमुख: कर्त्तुमुचित: बस्य तदुपयोगादिति भाव: पुष्करं सर्वतो मुख मित्यमर: ॥ ८९ ॥

सरोजकोशाभिनयेन पाणिना
स्थितेऽपि कूरे मुहुरेव याचते ।
सखि ! त्वमस्मै वितर त्वमित्युभे
मिथो न वादाद्ददतुः किलौदनम् ॥ ९० ॥
इयं कियच्चारुकुचेति पश्यते
पयःप्रदायाहृदयं समावृतम् ।
ध्रुवं मनोज्ञा व्यतरद्यदुत्तरम्
मिषेण भृङ्गारभृतेः करद्वयी ॥ ९१ ॥
अमीभिराकण्ठमभोजि तद्गृहे
तुषारधारामृदितेव शर्करा ।

सरोजेति । कूरे ओदने स्थितेऽपि अन्धः कूरं भक्तमन्नमोदनं भस्मेति हलायुधः । सरोजकोशस्याभिनयोऽनुकरणं यस्य सः कमलमुकुलानुकारी तदीयकुचग्रहणाभिलाषव्यञ्जक इत्यर्थः । तेन पाणिना मुहुरेव याचते पुनः पुनः कूरं याचते याचमानाय यूने याया रुभयपदित्वाच्छतृप्रत्ययः । उभे स्त्रियौ हे सखि ! त्वमेवास्मै वितर देहि मिथोवादाद्विवादादोदनं न ददतुः किल खलु ? पराभिप्रायज्ञाने तद्वैयर्थ्यादिति भावः ॥ ९० ॥

इयमिति । पयः प्रददातीति पयःप्रदाया तस्याः सम्बन्धि समावृतमाच्छादितं हृदयं वक्षः कर्म हृदयं कियन्तौ चारू कुचौ यस्याः सेति पश्यते कुचपरिमाणं जिज्ञासमानायेत्यर्थः । करद्वयी तस्याः पाणियुगली भृङ्गारभृतेर्मिषेण कनकालुकाधारणव्याजेन यद्यस्मादुत्तरमेतद् भृङ्गारपरिमाणमित्येवं रूपमुत्तरं व्यतरददात्तस्माद्ध्रुवं मनोज्ञा चित्तज्ञेत्युत्प्रेक्षा ॥ ९१ ॥

अमीभिरिति । अमीभिर्जन्यैस्तद्गृहे भीमभवनेषु तुषारधारया हिमोदकेन मृदिता मर्दिता शर्करा खण्डविकारा इव तत्साधु शुभ्रं

वाहं द्विषद्वष्कयणीपयः स्नुतम्
सुधाह्रदात् पङ्कमिवोद्धृतं दधि ॥ ९२ ॥
तदन्तरन्तः सुषिरस्य विन्दुभिः
करम्बितं कल्पयता जगत्कृता ।
इतस्ततः स्पष्टमचोरि मायिना
निरीक्ष्य तृष्णाचलजिह्वताभृता । ९३ ॥
ददासि मे तन्न रुचेर्यदास्पदम्
न यत्र रागः सितयापि किं तया ।

चेत्यर्थः। खण्डविकाराः शर्करा सितेत्यमरः। सुधाह्रदादुद्धृतं पङ्कं अमृतकर्दममिव स्थितमित्युत्प्रेक्षा। वाहं द्विषन्ती महिषी सा च सा वष्कयणी चिरप्रसूता स्त्रियाः पुंवदित्यादिना पुंवद्भावः लुलायो महिषो वाह इत्यमरः। तस्याः पयसः चोरात् स्नुतमुत्पादितं स्नौतेः कर्मणि क्तः। दधि आकण्ठं मभोजि भुक्तम् ॥ ९२ ॥

तदिति। निरीक्ष्य वीक्ष्य सृष्ट्यादौ स्वसृष्टं दधि दृष्ट्वा तृष्णयागर्द्धनेन चलजिह्वताभृता लोलजिह्वत्वधारिणा अतएव मायिनास्वचापल्यवञ्चनाचतुरेण जगत्कृता स्रष्ट्रा सद्यस्तद्दधि अन्तरन्तर्मध्ये सुषिरस्य जातावेकवचनम्। सुषिराणां विन्दुभिर्मण्डलैः करम्बितं मिश्रितं कल्पयता तत्र वर्त्तुलच्छिद्रयुक्तं कुर्वता सता इतस्ततोऽचोरि चोरितं सर्वथा कतिपयावयवानां स्वादे कृतच्छिद्राणामिति भावः। स्पष्टमित्युत्प्रेक्षायां ब्रह्मणोऽप्याकर्षकं माहिषदधि किमुतान्येषामिति भावः ॥ ९३ ॥

ददासीति। यत् रुचेः रागस्यास्पदन्तन्मे मह्यं न ददासि यत्र स रागस्तया सितया कृतमलं खण्डविकाराः शर्करा सितेत्युक्तं रक्तवस्तुरागिणः किं सितवस्तुनेति च गम्यते। इतीरिणे इतिवादिने रागिणे रुचिच्छला छलप्रयोगे छलप्रयोग एव कर्त्तव्य इति न्यायादित्यर्थः। बिम्बमिव अधरो यस्याः स्तया बिम्बौष्ठ्या स्त्रिया बिम्बफलमदायि दत्तमिवान्तरेणाधरबिम्बं याचितं मिषान्तराद्दानमङ्गीकारेत्यर्थः। तद्बिम्ब-

इतीरिते विम्बफलं फलच्छला-
ददायि विम्बाधरयारुचच्च तत् ॥ ९४ ॥

समं ययोरिङ्गितवान् वयस्ययो-
स्तयोर्विहायोपहृतप्रतीङ्गिताम् ।
अकारि नाकूतमवारि सा यया
विदग्धयाऽरञ्जि तयैव भाववित् ॥ ९५ ॥

सखीं प्रति स्माह युवेङ्गितेक्षिणी
क्रमेण तेऽयं क्षमते न दित्सुताम् ।
विलोम तद्व्यञ्जनमर्प्यते त्वया
वरं किमस्मै न नितान्तमर्थिने ॥ ९६ ॥

फलमरुचत् अरोचिष्ट स्वादूबभूवेत्यर्थः। प्रियाधरप्रतिविम्बप्रतिनिधित्वादितिभावः। रुचदीप्तौ प्रीत्यर्थाल्लुङ् द्युद्भ्यो लुङीति परस्मैपदं पुषादिद्युतादीत्यादिना च्लेरङादेशः ॥ ९४ ॥

सममिति। ययोर्वयस्ययोः सहचर्य्योः समं तुल्यं यथा तथा इङ्गितवान् दृगादिसंज्ञावान् तयोर्मध्ये उपहृतप्रतीङ्गितां दत्तप्रतिसंज्ञां विहाय परिहृत्य किन्तु यया आकूतं प्रतीङ्गितं नाकारि किन्तु सा प्रथमा अवारि वारिता यदास्यामयमपरक्तो रक्तश्चात्मनः स्यात् तदोदासितमित्यर्थः। विदग्धया चतुरया द्वितीययैवायम्भावविद्भावज्ञः अरञ्जि रञ्जितः आकृष्टः एतेन पूर्व्वा विवृता द्वितीया गम्भीरा सोऽपि भावज्ञस्तद्युक्तमेतदिति गम्यते ॥ ९५ ॥

सखीमिति। युवेङ्गितेक्षिणी युवाभिप्रायदर्शिनी काचित् सखीं परिवेषिकां वयस्यां प्रत्याह स्म उवाच लट् स्म इति भूते लट्। किमिति अयं युवा ते तव सर्व्वान्विनीं क्रमेण दित्सुतां न क्षमते पङ्क्तिक्रमेण परिवेषणं न सहत इत्यर्थः। अतस्त्वया नितान्तमर्थिने याचकाय तस्मै वरमुत्कृष्टं व्यञ्जनं निष्ठानं विलोम विपरीतं व्युत्क्रमेण नार्प्यते न दीयते व्यत्याय

समाप्तिलिप्येव भुजिक्रियाविधे-
र्दलोदरं वर्त्तुलयाऽऽलयीकृतम् ।
अलङ्कृतं क्षीरवटैस्तदश्नताम्
रराज पाकार्पितगैरिकश्रिया ॥ ९७ ॥
चुचुम्ब नोर्वीवलयोर्वशीं परम्
पुरोऽधिपारि प्रतिबिम्बितां विटः ।
पुनः पुनः पानकपानकैतवा-
च्चकार तच्चुम्बनचुङ्कृतान्यपि ॥ ९८ ॥

शीघ्रदेयमिति भावः । विलोम अरोमकं अतएव वरमुत्कृष्टं व्यञ्जनं वराङ्गमर्थिनेऽस्मै किं नार्प्यत इत्यर्थान्तरस्यापि विवक्षितत्वात् केवलप्रकृतश्लेषः व्यञ्जनं श्मश्रु निष्ठान चिह्नेष्ववयवेऽक्षरे इति यादवः ॥ ९६ ॥

समाप्तिमिति । तदा तत्काले क्षीरपक्वा वटाः क्षीरवटाः पिष्टकविशेषाः तै रलङ्कृतमश्नतामभ्यवहरतान्दलस्य लेख्यपत्रस्योदरं मध्यपात्रं समाप्तिः अभिव्यक्तिः पचि व्यक्तीकरणे इतिधातोर्घञन्तः । तदर्थमर्पिता न्यस्ता गैरिकश्री धातुरागो यस्यां तया क्षीरवटपाकेन अग्निसंयोगभेदेन अर्पिता उत्पादिता गैरिकस्येव श्रीः कान्तिर्येषां तैः इति परिणामः वर्त्तुलया निस्तलया अन्यत्र निस्तलैरित्यर्थः । भुजिक्रिया भुजिधात्वर्थः सैव विधिर्व्यापारो भोजनमिति यावत् तस्य समाप्तौ या लिपि स्तन्नीकरणलेखविन्यास स्तया आलयीकृतमास्पदीकृतमिव तदङ्कितमिति यावत् रराजेत्युत्प्रेक्षा ॥ ९७ ॥

चुचुम्बेति । विटः पुरोऽग्रे पार्य्यामधि अधिपारि पानपात्रमित्यर्थः । पारी पात्री पराङ्ग्योरिति विश्वः । वारिवहनभाण्डमिति स्वामी । प्रतिबिम्बितामुर्व्वीवलयोर्व्वशीं भूमण्डलोर्वशीं स्त्रीं परं केवलं न चुचुम्ब किन्तु पुनः पुनः पानकपानकैतवात्तस्याश्चुम्बने चुङ्कृतान्यपि चूषण चुङ्कारशब्दांश्चकार ॥ ९८ ॥

[१६ सर्गः ।]

घनैरमीषां परिवेषकैर्जनै-
रवर्षि वर्षोपलगोलकावली ।
चलद्भुजाभूषणरत्नरोचिषा
धृतेन्द्रचापैः श्रितचान्द्रसौरभा ॥ ९९ ॥

कियद्बङ्क व्यञ्जनमेतदर्प्यते
ममेति त्वम्मेर्वदतां पुनः पुनः ।
अमूनि सङ्ख्यातुमसावढौकि तै
श्छलेन तेषां कठिनीव भूयसी ॥ १०० ॥

विदग्धबालेङ्गितगुप्तिचातुरी-
प्रवल्हिकोत्पाटनपाटवे हृदः ।

घनैरिति । चलन्त्योभुजास्तासां भुजानां भूषणरत्नानां रोचिषैव धृतमिन्द्रचापं यैस्तैः परिवेषन्तीति परिवेषिका दातारस्तैर्जनैर्घनैर्मेघैरमीषाम्भोक्तॄणां श्रितचन्द्रसौरभा प्राप्तकर्पूरगन्धा अथवा श्रिते व्याप्ते चान्द्रस्य सूर्यस्य वा सौरी भा प्रभाच यया सूर्येतिष्यागस्त्यानां उपधाया इति यकारलोपः । वर्षोपला इव गोलकाः घुटिकाकाराः पिष्टविशेषास्तेषामावलिरवर्षि वृष्टा ॥ ९९ ॥

कियदिति । ममैतत्कियत् बङ्कव्यञ्जनं शाकं कतिव्यञ्जनानीत्यर्थः । अर्प्यते इति वदतां तेषां भोक्तॄणां अमूनि व्यञ्जनानि सङ्ख्यातुं भूयसी कठिनीव भूयस्यः करिका इव सङ्ख्यानघुटिका इवेत्यर्थः । करिका कठिनी इति विश्वः । असौ गोलकावलिः तैः परिवेषकैः च्छलेन परिवेषणव्याजेन अढौकि ढौकिता दत्तेत्यर्थः ॥ १०० ॥

विदग्धेति । कामुकः कामी विदग्धबालायाः प्रौढाङ्गनायाः इङ्गितगुप्तिचातुरी आकारगोपनचातुर्यं निगूढार्थचेष्टाप्रयोगचातुरी सैव प्रवल्हिका प्रहेलिका पराख्यो निगूढार्थोक्तिविशेषः तस्या उत्पाटने अर्थोद्भेदने यत्पाटवं तस्मिन् पटुमदुत्पाटने प्रसिक्ते सतीत्यर्थः । अस्मिन्-

निजस्य टीकां प्रबबन्ध कामुकः
स्पृशद्भिराकूतशतैस्तदौचितीम् ॥ १०१ ॥
घृतप्लुते भोजनभाजने पुरः-
स्फुरत्पुरन्ध्रिप्रतिबिम्बिताकृतेः ।
युवा निधायोरसि लड्डुकद्वयम्
नखैर्लिलेखाथ ममर्द निर्दयम् ॥ १०२ ॥
विलोकिते रागितरेण सस्मितम्
ह्रियाऽथ वैमुख्यमिते सखीजने ।
तदालिरानीय कुतोऽपि शार्करीम्
करे ददौ तस्य विहस्य पुत्रिकाम् ॥ १०३ ॥

र्थोद्भेदेन औचितीमानुकूल्यं स्पृशद्भिस्तदानुकूलैरित्यर्थः । स्वकूतानां शतैर्निजस्यात्मीयस्य हृदो हृदयस्य टीकां व्याख्यां प्रबबन्ध स्वहृदयं तस्यै निवेदयामासेत्यर्थः । उचितोत्तरदानद्वैव प्रश्नार्थप्रकाशनात्तदेव तद्व्याख्यानमिति भावः ॥ १०१ ॥

घृतेति । यवा पुरोऽग्रे घृतेन प्लुते सिक्ते भोजनभाजने स्फुरन्ती या पुरन्ध्र्याः अङ्गनायाः प्रतिबिम्बिता आकृतिः शरीरं तस्या उरसि लड्डुकद्वयं वर्तुलपिष्टकविशेषपिण्डयुग्मं निधाय नखैर्लिलेख विददार निर्दयं ममर्द पीड़यामास तदीयकुचकुम्भयुगलभावनयेति भावः ॥ १०२ ॥

विलोकित इति । रागितरेण अत्यन्तानुरक्तेन केनचित् सस्मितं विलोकिते सख्येव जन तस्मिन् निजसख्याम् अथ विलोकनानन्तरं ह्रिया वैमुख्यमिते पराङ्मुखताङ्गते सति एतेन तस्या अपि तस्मिन् तथारागः सूचित स्तदालिस्तत्सखी कुतोऽप्यानीय शार्करीं शर्करामयीं विकारार्थेऽण्प्रत्ययः । पुत्रिकां कृत्रिमपुत्रीं पाञ्चालिकामित्यर्थः पाञ्चालिका पुत्रिका स्यादित्यमरः । पुत्राच कृत्रिमा पुत्रि इति कप्रत्यये कात्पूर्वस्येकारः । करे विहस्य ददौ एवमेषा सखीकरगतेति सूचयामासेत्यर्थः ॥ १०३ ॥

[१६ सर्गः ।]

निरीक्ष्य रम्याः परिवेषिका ध्रुवम्
न भक्तमेवैभिरवाप्ततृप्तिभिः ।
अशक्नुवद्भिर्बहुभुक्तवत्तया
यथोज्झिता व्यञ्जनपुञ्जराजयः ॥ १०४ ॥

पृथक् प्रकारेङ्गितशंसिताशयो
युवा ययोदासि तयापि तापितः ।
ततो निराशः परिभावयन् परा-
मये ! तयाऽतोषि सरोषयैव सः ॥ १०५ ॥

निरीक्ष्येति । यथा यथेष्टं बहुभुक्तवत्तया कृतभोजनतया अशक्नुवद्भिर्निःशेषं भोक्तुमशक्नुवद्भिस्तैर्व्यञ्जनपुञ्जराशयो भोज्यराशीनां श्रेणयः उज्झितास्त्यक्ताः तथा बहुलं परिवेषणादिति भावः । अतोत्प्रेक्षते रम्या रमणीयाः परिवेषिका योषितः निरीक्ष्य अवाप्ततृप्तिभि स्तावतैव तृप्तैरेभिर्भोक्तृभिर्न भुक्तमेव ध्रुव मित्युत्प्रेक्षा अन्यथा कथमेते भोज्यराशयः पात्रेषु तथैव दृश्यन्त इति भावः ॥ १०४ ॥

पृथगिति । यया पृथक्प्रकारेङ्गित संशिताशयो नानाविधचेष्टाप्रकाशितहृदयो युवा उदासि तया रोषादनादरपरया अतापि तापितः सन्तापितः अभ्युपसर्गौ धात्वर्थाननुवर्त्तेते । औदासीन्यात् निराशोऽस्पृहः परामन्यां परिभाव्य विभाव्य स युवा सरोषया अन्यावलोकनरुष्टया पूर्वयैव अतोषि तोषितः तोषयतेः कर्मणि लुङ् । अये इति रुष्टसम्भ्रमे अन्यावलोकाद्धि रोषदर्शनात्पूर्वमभितापितोऽयं न तु विरक्तेति ज्ञात्वा सन्तोषात्सम्भ्रान्त इत्यर्थः । अये क्रोधे विषादे च स्मरणे सम्भ्रमेऽपि चेति विश्वः ॥ १०५ ॥

पय इति । पयः पाथः क्षीरं वा स्मितं यस्याः सा मण्डपमण्डलं मण्डपसमूह एवाम्बरं यस्याः सा वटाः वटकाः घुस्नवर्तुलपिष्टकविशेषकाः स एवाननेन्दुर्यस्याः सा पृथू लड्डुकावेव स्तनौ यस्याः सा रुचेः पदम्

पयःस्मिता खण्डसमण्डलाम्बरा
वटाननेन्दुः पृथुलड्डुकस्तनी ।
पदं रुचेर्भोज्यभुजां भुजिक्रिया
प्रिया बभूवोज्ज्वलकूरहारिणी ॥ १०६ ॥
चिरं युवाकूतशतैः कृतार्थन-
श्चिरं सरोषेङ्गितया च निर्धुतः ।
सृजन् करच्चालनलीलयाञ्जलिम्
न्यषेचि किञ्चिद्विधुताम्बुधारया ॥ १०७ ॥
न षड्विधः षिड्गजनस्य भोजने
तया यथा यौवतविभ्रमोद्भवः ।

अभिलाषास्पदं लावण्यास्पदञ्च उज्ज्वलैः स्वच्छैः कूरैर्भक्तैः हारिणी हारवती मनोहरा च अन्धः कूरं भक्तमिति हलायुधः । भुजिक्रिया भोजनक्रिया भुज इति धातुनिर्देशेनार्थलक्षणा । भोज्यभुजाम्भोक्तॄणां भोगिनाञ्च प्रीणातीति प्रिया इष्टवल्लभा च बभूव रूपकालङ्कारः ॥ १०६ ॥

चिरमिति । चिरमाकूतशतैः चेष्टाशतैः कृतार्थनः कृतप्रार्थनो युवा चिरं सरोषेङ्गितया रोषचेष्टावत्या निर्धुत स्त्वावधुतोऽपि सन् करच्चालनलीला तद्व्यापारस्तया तद्व्याजेनेत्यर्थः । अञ्जलिं सृजन्नञ्जलिबन्धेन प्रार्थयमान इत्यर्थः । किञ्चिद्विधुतया निर्धुतयाऽम्बुधारया धारा विधूननव्याजेनेत्यर्थः । न्यषेचि निषिक्तः कोपादिति भावः ॥ १०७ ॥

न षड्विध इति । षिड्गजनस्य विटजनस्य षिड्गः पल्लविको विट इत्यमरः । भोजने भोजनकाले षड्विधो मधुरादिभेदेन षट्प्रकारः तथा सन्तोषं नाधत्त नापुष्यात् पोषणार्थे लुङि तङ् । यथा युवतीनां समूहो यौवतं भिक्षादिभ्योऽण् । तत्र युवतीति सामर्थ्याद्भस्याढे तद्धित इति टिलोपः । विभ्रमैर्विलासै रुद्भवः उद्भतः पचाद्यच् । समुन्मिषन् समुज्जृम्भमाणः अपारोऽपरिमितः शृङ्गारमयः शृङ्गारो नाम सम्भोगरसः मधु-

अपारशृङ्गारमयः समुन्मिषन्
भृशं रसस्तोषमधत्त सप्तमः ॥ १०८ ॥
मुखे निधाय क्रमुकं नलानुगै-
रथोज्झि पर्णालिरवेक्ष्य वृश्चिकम् ।
दमार्पितान्तर्मुखवासनिर्मितम्
भयाविलैः सम्भ्रमहासिताखिलैः ॥ १०९ ॥
अमीषु तथ्यानृतरत्नजातयो-
र्विदर्भराट् चारुनितान्तचारुणोः ।
स्वयं गृहाणैकमिहेत्युदीर्य तद्
द्वयं ददौ शेषजिघृक्षवे हसन् ॥ ११० ॥

रादिषड्रसापेक्षया इति भावः । तोषमधत्त एकोऽपि लोकोत्तरो बहूनतिशेत इति भावः ॥ १०८ ॥

मुख इति । नलानुगैर्नलानुचरैः क्रमुकं पूगीफलं मुखे निधाय दमेनार्पितमन्तर्मुखस्य अन्तर्मुखं विभक्त्यर्थेऽव्ययीभावः । मुखवासं लवङ्गतक्कोलाकर्पूरादिवासनाद्रव्यं कर्मण्यण् । तेन निर्मितं तयोर्विशेषणविशेष्यभावविवक्षायां विशेषणसमासः । वृश्चिकमवेक्ष्य भयेनाकुलैराविलैः अतएव सम्भ्रमेण हासिता अखिला यैस्तैः सद्भिः पर्णालिः नागवल्ली अथोज्झि उज्झिता उज्झ विसर्गे कर्मणि लुङ् ॥ १०९ ॥

अमीष्विति । विदर्भराट् विदर्भदेशाधीश्वरो भीमः चारुनितान्तचारुणोर्यथासङ्ख्यं रम्यातिरमणीययो रिहानयोस्तथ्यानृतरत्नजातयोः सत्यासत्यरत्नौघयोः जाते जात्यौघजन्मस्विति विश्वः । मध्ये एकं स्वयं गृहाणेत्युदीर्य शेषमसत्यमेव जिघृक्षवे गृहीतुमिच्छवे तस्यैवाति चारुत्वादितिभावः ग्रहेः सनन्तादुप्रत्ययः मधुपिपासादित्वाद्द्वितीया समासः । तयोः कृत्रिमाकृत्रिमयोर्द्वयं हसन् ददौ तत्र कृत्रिमं विनोदाय ददौ अन्यदौचित्यादिति भावः ॥ ११० ॥

इति द्विवारं शुचिमिष्टभोजिनाम्
दिनानि तेषां कतिचिन्मुदा ययुः।
द्विरष्टसंवत्सरवारसुन्दरी-
परीष्टिभिस्तुष्टिमुपेयुषां निशि ॥ १११ ॥
उवास वैदर्भगृहेषु पञ्चषा
निशाः कृशाङ्गीं परिणीय तां नलः।
अथ प्रतस्थे निषधान् सहानया-
रथेन वार्ष्णेयगृहीतरश्मिना ॥ ११२ ॥
परस्य न स्प्रष्टुमिमामधिक्रिया
प्रिया शिशुः प्रांशुरसाविति ब्रुवन्।
रथे स भैमीं स्वयमध्यरूरुह-
न्न तत् किलाश्लिक्षदिमां जनेक्षितः ॥ ११३ ॥

इतीति। इति द्विः कृतो द्विवारं सङ्ख्यायां क्रियाभ्यावृत्तिगणने कृत्वसुचिति। शुचि पवित्रं मिष्टञ्च भुञ्जत इति तद्भोजिनान्तथा निशि द्विरावृत्ता अष्टसम्वत्सरा यासां तासां षोड़शवर्षाणां वारसुन्दरीणां गणिकानां परीष्टिभि र्भोजनैः परीष्टिर्भोजने भक्ता विति वैजयन्ती। तुष्टिमुपेयुषां तेषां नलानुगानां कतिचिद्दिनानि मुदा ययुः ॥ १११ ॥

उवासेति। नलः कृशाङ्गीं तां दमयन्तीं परिणीय वैदर्भगृहेषु पञ्च षड्वा पञ्चषाः सङ्ख्याव्ययेत्यादिना बहुव्रीहौ डच्समासान्तः। निशा रात्रीः उवास अत्यन्त संयोगे द्वितीया। तथाऽनया भैम्या सह वृष्णेरपत्यं वार्ष्णेयो नलसारथिः ड्वितश्चानिञ् इति ठक्। तेन गृहीता रश्मयः प्रग्रहा यस्य किरणप्रग्रहौ रश्मावित्यमरः। तेन रथेन निषधान् प्रतस्थे ॥ ११२ ॥

परस्येति। परस्य अन्यतरस्य इमां भैमीं स्प्रष्टुमधिक्रिया अधिकारो न प्रिया भैमी शिशुः असौ रथः प्रांशुरुन्नतः इति ब्रुवन् स्वयुक्तियुक्तं वदन् तत्किल तत्कारणादेव इमां भैमीं स नलो जनेक्षितः सन्

इति स्मरः शीघ्रमति श्चकार तम्
वधूं च रोमाञ्चभरेण कर्कशौ ।
स्खलिष्यति स्निग्धतनुः प्रियादियम्
म्रदीयसी पीडनभीरुदोर्युगात् ॥ ११४ ॥
अथ किमाजन्मनिजाङ्कवर्द्धिताम्
प्रहित्य पुत्रीं पितरौ विषेदतुः ।
विसृज्य तौ तं दुहितुः पतिं यथा
विनीततालघुगुणीभवद्गुणाम् ॥ ११५ ॥
निजादनुव्रज्य स मण्डलावधे-
र्नलं निवृत्तौ चटुलापतां गतः ।

स्वयमेव रथे अध्यरुरुहत् अधिरोहयामास स्पर्शलोभादिति भावः रुहेर्णौ चङ् । नाश्लिषत् अनौचित्यादिति भावः । श्लिष आलिङ्गन इति श्लिषेर्लुङि च्लेः क्सादेशः ॥ ११३ ॥

इतीति । स्निग्धतनुर्मसृणाङ्गी म्रदीयसी अतिसुकुमाराङ्गी इयं भैमी पीडनाद्भीरु दोर्युगं यस्य तस्मात् म्रदीयसः पीडनासहत्वादिति भावः । प्रियात् स्खलिष्यतीति मृदुत्वात् स्वयालिङ्गने स्निग्धत्वात्प्रियभुजान्तरात् सस्रंसेवेति शीघ्रमतिः प्रत्युत्पन्नमतिः स्मरः तं नलं वधूं भैमीं च रोमाञ्चभरेण पुलकोत्करेण कर्कशावस्निग्धगात्रौ चकार अस्य परस्पराङ्गसङ्गहेतुके रोमाञ्चे आलिङ्गनानीव स्खलितप्रतिबन्धार्थत्व मुत्प्रेक्ष्यते ॥ ११४ ॥

अथेति । अथ पितरौ माता पितरौ पिता मात्रेति विकल्पादेकशेषः । आजन्म जन्मप्रभृति अभिविधावव्ययीभावः । निजाङ्के स्वोत्सङ्गे वर्द्धितां पुत्रीं दुहितरं गौरादित्वादीकारः । प्रहित्य हिनोतेः क्त्वो ल्यप् । तथा विषेदतुः विषण्णौ किं नेत्यर्थः सदेर्लिट् । अत एक हलित्यादिना एत्वाभ्यासलोपौ । यथा तौ भैमी पितरौ विनीततया विनयसम्पन्नतया लघुगुणीभवन्तो लघुगुणाः सन्तोषगुणा यस्य तथोक्तं दुहितुः

तडागकल्लोल इवानिलं तटा-
द्धृतानतिर्व्यावृतत विदर्भराट् ॥ ११६ ॥
पितात्मजः पुण्यमनापदः क्षमा
धनं मनस्तुष्टिरथाखिलं नलः ।
अतः परं पुत्रि ! न कोऽपि तेऽहमि-
त्युदस्रुरेष व्यसृजन्निजौरसीम् ॥ ११७ ॥
प्रियः प्रियैकाचरणाच्चिरेण ताम्
पितुः स्मरन्तीमचिकित्सदाधिषु ।

पतिं जामातरं च । समासादविभाषा स्वसृपत्योरिति विकल्पादलुक् विसृज्य विषीदतः ॥ ११५ ॥

निजादिति । स विदर्भराट् भीमो नलमनुव्रज्य निवृत्तौ निवृत्तिसमये चटुलपतीति अति चटुलापश्चाटुवादः सन् अन्यत्र चटुलाः आपः यस्य तत्तथोक्तं चटुलापः सन् ऋक्पूरित्यादिना समासान्तः । तड़ागस्य कल्लोलो महोर्मिः अथोर्मिषु महत्सूल्लोलकल्लोलावित्यमरः । अनिलमनुव्रज्य तटात् धृता स्वीकृता आनतिर्नलनमस्कारः अन्यत्र प्रहृता यस्य स सन् निजात् मण्डलावधेराष्ट्रसीमान्तात् व्यावृतते निवृत्तः ॥ ११६ ॥

पितेति । हे पुत्रि ! आत्मनस्तव पिता जनकः पुण्यं सुकृतम् अनापदः क्षमाः सर्वनिवृत्तिस्थानं धनं वित्तं मनस्तुष्टिर्मनोवृत्तिरथ किं बहुना अखिलमुक्तमन्यच्च सर्वं नलो नलएव अतोऽस्मान्नलात् परमन्यन्नास्ति अहं तु ते तव वरोऽपि यः कश्चिदेवेत्यर्थः इति इत्थमुक्त्वेति शेषः एष भीम उदस्रुः उद्बाष्पः सन् निजामौरसीम् उरसा निर्मितां पुत्रीं उरसोऽन्यतरस्यामित्यण्प्रत्ययः संज्ञाधिकारादभिधेयनियम इति काशिका । व्यसृजत् विससर्ज ॥ ११७ ॥

प्रियइति । प्रियैकाचरणात् केवलेष्टचरणात् तथोपलालनादिति यावत् । पितुः स्मरन्तीं पितरं स्मरन्तीमित्यर्थः । अधीगर्थदयेशां कर्मणीति कर्मणि षष्ठी । तां दमयन्तीं प्रियो नलश्चिरेण आधिषु मनोव्य-

शशाम सोऽम्बाविरहौर्वपावको
न तु प्रियप्रेममहाम्बुधावपि ॥ ११८ ॥
असौ महीभृद्बहुधा तु मण्डित-
स्तया निजोपत्यकयेव कामपि ।
भुवा कुरङ्गेक्षणदन्तिचारयो-
र्बभार शोभां कृतपादसेवया ॥ ११९ ॥
तदेकतानस्य नृपस्य रक्षितुम्
चिरोढया भावमिवात्मनि श्रिया ।
विहाय सापत्न्यमरञ्जि भीमजा
समग्रतद्वाञ्छितपूर्त्तिवृत्तिभिः ॥ १२० ॥

शाम्तु विषये अचिकित्सदुल्लङ्घयामास प्रियरागातिरेकेण कथञ्चित् पितृविरह मसहतेत्यर्थः। कितनिवास इति धातोर्व्याधिप्रतिकारे गुप्तिज्किद्भ्यः सन्निति सन्। सोऽनुभवसिद्धो अम्बाविरह एव और्वपावको वड़वाग्निः प्रियप्रेममहाम्बुधौ प्रियानुरागसमुद्रेऽपि न शशाम समुद्रेणाप्यौर्वस्य दुर्वारत्वादिति भावः कन्यानां पितृतो मातरि वात्सल्याद्विरहो दुःसह इति भावः ॥ ११८ ॥

असाविति। बहुधातु बहुधैव अन्यत्र बहुधातुभि र्गैरिकादिभि र्मण्डितोऽलङ्कृतो महीभृद्राजा पर्वतश्च कुरङ्गस्येव कुरङ्गाणाम् ईक्षणं दन्तिन इव दन्तिनां चारो गतिः स चारश्च तयोर्भुवा स्थानेन कृता पादसेवा प्रत्यन्तपर्वतसन्निकर्षश्च यया तया भैम्या कामस्य अनिर्वाच्यां शोभां कान्तिं बभार ॥ ११९ ॥

तदिति। चिरायजढ़याधृतया परिणतय. च श्रिया राज्यलक्ष्म्या तदेकतानस्य दमयन्त्येकवृत्तेः एकतानोऽनन्यवृत्ति रित्यमरः। नृपस्य नलस्य भावं चित्तवृत्तिम् आत्मनि विषये रक्षितुं स्थिरीकर्त्तुमिवेत्युत्प्रेक्षा सापत्न्यं सपत्नीवैरं विहाय भीमजा भैमी समग्राणां तद्वाञ्छितानां

मसारमालावलितोरणां पुरीम्
निजाद्वियोगादिव लम्बितालकाम् ।
ददर्श पश्यामिव नैषधः पथा-
मथाश्रितोद्ग्रीविकमुन्नतैर्गृहैः ॥ १२१ ॥
पुरीं निरीक्ष्यान्यमना मनागिति
प्रियाय भैम्या निभृतं विसर्जितः ।
ययौ कटाक्षः सहसा निवर्त्तिना
तदीक्षणेनार्द्धपथे समागमम् ॥ १२२ ॥

पूर्त्तिवृत्तिभिः पूरणव्यापारै ररञ्जि रञ्जिता परचित्तानुरञ्जनाय सपत्नीरप्युपासते साध्व्य इति भावः ॥ १२० ॥

मसारेति। अथ नैषधो नलः मसारा निराहारा वलयः इन्द्रनीलमालिका एव तोरणानि यस्याः ताम् अयएव निजाद्वियोगान्नलविरहात् लम्बितालकां संस्काराभावाद्विस्रस्तकुन्तलामिव स्थितामित्युत्प्रेक्षा। उन्नतैर्गृहैः प्रासादैराश्रिता उद्ग्रीविका उद्ग्रीवीभवनं यस्मिन् कर्मणि तद्यथा उद्ग्रीवयतेस्तत्करोतीति ण्यन्ताद्भावार्थनिर्देशे ण्वुल् कात्पूर्वस्येतीकारः पथां नलागमनमार्गाणां सद्योगात्कर्मणि षष्ठी। पश्यतीति पश्यां दृष्टिमिव स्थितामित्युत्प्रेक्षा। पाघ्रादिनाश प्रत्यये पुनरन्येन पाघ्रादिनाऽर्थेः पश्यादेशः। पुरीं पुरं ददर्श प्रोषितभर्त्तृकाः लम्बालकाः पतिमार्गान् प्रतीक्षन्त इति भावः ॥ १२१ ॥

पुरीमिति। मनागीषत् पुरीं निरीक्ष्य अन्यमना अन्यासक्तचित्त इति हेतोः प्रियाय भैम्या निभृतं गूढं विसर्जितः तद्दृष्टिपरिज्ञानाय प्रहितः कटाक्षः सहसानिवर्त्तिना भैमीभयान्निवृत्तेन तदीक्षणेन नलदृष्ट्या सह अर्धपथेन समागमं ययौ उभावप्यन्योन्याभिप्रायं जज्ञतुरित्यर्थः। ईषदपि भर्त्तुरन्यासङ्गं न सहते सा सोऽपि तथैव तामनुवर्त्तत इति भावः ॥ १२२ ॥

अथ नगरधृतैरमात्यरत्नैः
पथि समियाय स जाययाऽभिरामः ।
मधुरिव कुसुमश्रिया सनाथः
क्रममिलितैरलिभिः कुतूहलोत्कैः ॥ १२३ ॥

कियदपि कथयन् स्ववृत्तजातम्
श्रवणकुतूहलचञ्चलेषु तेषु ।
कियदपि निजदेशवृत्तमेभ्यः
श्रवणपथं स नयन् पुरीं विवेश ॥ १२४ ॥

अथ पथि पथि लाजैरात्मनो बहुवल्ली-
मुकुलकुलसकुल्यैः पूजयन्त्यो जयेति ।
क्षितिपतिमुपनेमुस्तन्दधाना जनाना-
मस्तृतजलमृणालीसौकुमार्य्यं कुमार्य्यः ॥ १२५ ॥

अथेति। अथ जायया अभिरामो रमणीयः स नलः कुसुमश्रिया सनाथः पुष्पसम्पदा युक्तो मधुर्वसन्तः क्रमेणानन्तर्येण मिलितैः कुतूहलोत्कैः विनोदोत्सुकैः अलिभिरिव नगरे धृतैः संरक्षिताय स्थितैः ध्रियतेः कर्त्तरि क्तः। अमात्यरत्नैः मन्त्रिवर्य्यैः सह पथि नगरपथे मार्गे समियाय सङ्गतः ॥ १२३ ॥

कियदिति। स नलः श्रवणकुतूहलेन चञ्चलेषु व्यग्रेषु तेष्वमात्येषु विषये स्ववृत्तजातं स्वचरितस्वरूपं कियदपि स्तोकं कथयन् तथा निजदेशवृत्तं स्वराष्ट्रवृत्तान्तम् एभ्यः सकाशात्कियदपि किञ्चिच्छ्रवणपथं नयन् शृण्वन् पुरीं विवेश ॥ १२४ ॥

अथेति। अथ पथि पथि अस्तृतजलस्य या मृणाली विसतन्तुस्तद्वत् सौकुमार्यं दधानाः कोमलाङ्ग्यः कुमार्य्यो नार्य्यः आत्मनो बहुवल्लीनां मुकुलकुलसकुल्यैः मुकुलोत्करतुल्यैर्लाजैर्जयेति जयशब्दपूर्वं पूजयन्त्यः जनानां मध्ये तं क्षितिपतिं नलम् उपनेमुरुपतस्थिर इत्यर्थः ॥ १२५ ॥

अभिनवदमयन्तीकान्तिजालावलोक-
प्रवणपुरपुरन्ध्रीवक्त्रचन्द्रान्वयेन।
निखिलनगरसौधाट्टावलीचन्द्रशालाः
क्षणमिव निजसञ्ज्ञां सान्वयामन्वभूवन् ॥ १२६ ॥
निषधनृपमुखेन्दुश्रीसुधां सौधवाता-
यनविवरगरश्मिश्रेणिनालोपनीताम्।
पपुरतुलपिपासापांशुलत्वोपरागा-
न्यखिलपुरपुरन्ध्रीनेत्रनीलोत्पलानि ॥ १२७ ॥
अवनिपतिरथोर्द्ध्वस्त्रैणपाणिप्रवाल-
स्खलितसुरभिलाजव्याजभाजः प्रतीच्छन्।
उपरि कुसुमवृष्टीरेष वैमानिकाना-
मभिनवकृतभैमीसौधभूमिं विवेश ॥ १२८ ॥

अभिनवेति। निखिलासु नगरे सौधाना मट्टालकपङ्क्तिषु चन्द्रशालाश्चन्द्रशाला शिरोगृहमिति हलायुधः। अभिनवस्य दमयन्त्याः कान्तिजालस्य लावण्यराशेरवलोकप्रवणानां दर्शनतत्पराणां पुरपुरन्ध्रीणां पौराङ्गनानां वक्त्रचन्द्रैरन्वयेन योगेन क्षणं निजां संज्ञां चन्द्रशालाभिधानं सान्वयाम् चन्द्राणां शालेत्येव सुचितार्थां मन्वभूवन्निव ॥ १२६ ॥

निषधेति। अतुलया पिपासया पांशुलत्वं तदेव उपरागः उपप्लवो येषां तान्यखिलपुरपुरन्ध्रीणां पौराङ्गनानां वक्त्रचन्द्रे नेत्राण्येव नीलोत्पलानि सौधवातायनविवरे गच्छन्तीति तद्गास्ताभिः रश्मीनां नयनरश्मीनां श्रेणिभिरेव नालै रुपनीतामाकृष्टामपि निषधनृपस्य मुखेन्दुं तृष्णया सतृष्णं पपुः अद्राक्षुरित्यर्थः ॥ १२७ ॥

अवनीति। एषः अवनीपतिः ऊर्द्ध्वेषु उपरिगृहेषु ये स्त्रैणाः स्त्रीसम्बन्धिनः स्त्रीपुंसाभ्यां नैत्यादिना नैप्रत्ययः। तेभ्यः पाणिप्रवालेभ्यः स्खलिता ये सुरभयः सुगन्धयो लाजा स्तद्व्याजम्भजन्ते तद्भाजः वैमानि-

इति परिणयमित्थं यानमेकत्र याने
दरचकितकटाक्षप्रेक्षितं चानयोस्तत् ।
दिवि दिविषदधीशाः कौतुकेनावलोक्य
प्रणिदधुरिव गन्तुं नाकमानन्दसान्द्राः ॥ १२९ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम् ।
काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत् षोडशः ॥ १३० ॥

कानां विमानैश्चरतां देवानां चरतीति ठक् । उपर्युपरिष्टात् कुसुमवृष्टीः प्रतीच्छन् स्वीकुर्वन्नभिनवकृतां प्रत्यग्रनिर्मितां भैम्याः सौधभूमिं विवेश ॥ १२८ ॥

इतीति । अनयोर्दमयन्तीनलयोरित्येवंविधं परिणयं विवाहमित्थमेकत्र रथे यानं यात्रान्तद्धि पूर्वोक्तं दरचकितमीषद्वक्रस्वभावं कटाक्षप्रेक्षितं कटाक्षवीक्षणं च दिव्याकाशे दिविषदामधीशा देवा अवलोक्य अथानन्दसान्द्राः आनन्दपूर्णाः सन्तः नाकं स्वर्गलोकं गन्तुं प्रणिदधुः चिन्तयामासुः ॥ १२९ ॥

श्रीहर्षमिति । चतुर्दशतयीं चतुर्दशावयवां चतुर्दशविधामित्यर्थः सङ्ख्याया अवयवे तयप् टिड्ढाणञ् द्वयसच् दघ्नञ् मात्रच् तयप्ठक्ठञ्कञ्क्वरप् इत्यादिना ङीप् । विद्यां विदद्भिः विपश्चिद्भिः चतुर्दश विद्यास्थानानि जानद्भिः काश्मीरैः काश्मीरदेशीयैर्विद्वद्भिः महिते पूजिते तद्भुवि श्रीहर्षोत्पन्ने तद्विरचित इत्यर्थः । षोडशानां पूरणः षोडशः पूरणो डट् । गतमन्यत् ॥ १३० ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां जीवातुसमाख्यायां नैषधव्याख्यायां षोडशः सर्गः समाप्तः ॥ १६ ॥

नैषधचरितम् ।

सप्तदशः सर्गः ।

अथारभ्य वृथाप्रायं धरित्रीधावनश्रमम् ।
सुराः सरस्वदुल्लोललीला जग्मुर्यथागतम् ॥ १ ॥
भैमीम्पत्ये भुवस्तस्मै चिरं चित्ते धृतामपि ।
विद्यामिव विनीताय न विषेदुः प्रदाय ते ॥ २ ॥
कान्तिमन्ति विमानानि भेजिरे भासुराः सुराः ।
स्फटिकाद्रेस्तटानीव प्रतिविम्बा विवस्वतः ॥ ३ ॥

अथेति । अथ नागलोकजिगमिषानन्तरं सुरा इन्द्रादयः वृथाप्रायमिति स्वदूक्तिः वृथैवेत्यर्थः धरित्रीधावनश्रमं भूभ्रमणायासमारभ्य कृत्वा सरस्वदुल्लोलानां समुद्रमहोर्मीणां लीलेव लीला येषान्ते सन्तः यथागतं जग्मुः यथा वृथैव सागरतरङ्गास्तटं धावित्वा यथातथं गच्छन्तीति तद्वद्गता इत्यर्थः ॥ १ ॥

भैमी मिति । ते देवाश्चिरं चित्ते धृताम् आकाङ्क्षितामपि तां भैमीं भुवः पत्ये नलाय विनीताय प्रश्रिताय विद्यामिव प्रदाय न विषेदुश्च न हि महान्तो दत्त्वानुतापिनश्च न तेषामदेयमस्ति भावः ॥ २ ॥

कान्तिमन्तीति । भासुराः भास्वराः इन्द्रादयः कान्तिमन्ति दीप्तानि विमानानि व्योमयानानि विवस्वतोऽर्कस्य प्रतिविम्बाः स्फटिकाद्रेः कैलासस्य तटानीव भेजिरे एतेन विमानानां तदधिष्ठातृणां च अतितेजस्वित्व सूक्तम् ॥ ३ ॥

जवावज्जातेन वातेन बलाकृष्टबलाहकैः ।
श्वसनात् स्वस्य शीघ्रत्वं रथैरेषामिवाकथि ॥ ४ ॥
क्रमाद् दवीयसां तेषां तदानीं समदृश्यत ।
स्पष्टमष्टगुणैश्वर्य्यात् पर्य्यवस्यन्निवाणिमा ॥ ५ ॥
ततान विद्युता तेषां रथे पीतपताकताम् ।
लब्धकेतुशिखोल्लेखा लेखा जलमुचः क्वचित् ॥ ६ ॥
पुनः पुनर्मिलन्तीषु पथि पाथोदपंक्तिषु ।
नाकनाथरथालम्बि बभूवाभरणं धनुः ॥ ७ ॥

जवादिति। जवान्निजवेगाज्जातेन वातेन बलादाकृष्टा बलाहका मेघा यैस्तेषामिन्द्रादीनां रथैर्विमानैः स्वस्यात्मनः श्वसनात् शीघ्रत्वं वायुवेगत्व मकथीवेत्युत्प्रेक्षा अन्यथा कथं तथा मेघाकर्षणमिति भावः कथेश्चौरादिकात्कर्मणि लुङ् मित्वाद्ध्रस्वत्वम् ॥ ४ ॥

क्रमादिति। क्रमाद्दवीयसान्दविष्ठानां सतां दूरशब्दादियसुनि स्थूलदूरेत्यादिना यणादिपरलोपः पूर्वगुणश्च। तेषामिन्द्रादीनां तदानीं दूरिभावकाले अणिमा अणुत्वम् अष्टगुण मणिमाद्यष्टमगुणं यदैश्वर्य्यं सामर्थ्यं तस्मात्सकाशात् पर्य्यवस्यत् स्वयमेव परिशिष्यमाणमिव स्पष्टं समदृश्यत सन्दृष्टं दूरे अणुत्वेनावभासादियमुत्प्रेक्षा ॥ ५ ॥

ततानेति। कचित्प्रदेशे जलमुचो मेघस्य लेखा लब्धैः केतुशिखाभिर्ध्वजाग्रै रुल्लेखा विदारणं यस्याः सा सती विद्युता करणेन तेषामिन्द्रादीनां रथे पीताः पीतवर्णाः पताका येषां तेषां भावः स्तत्ता तां ततान ध्वजदण्डाग्रोल्लेखनेनोत्था स्तड़ितो रथेषु पीतपताका इव रेजुरित्यर्थः ॥ ६ ॥

पुनः पुनरिति। नाकनाथरथालम्बि इन्द्ररथस्थं धनुः पथि पुनः पुनर्मिलन्तीषु संसृज्यमानासु पाथोदानां मेघानां पङ्क्तिषु आभरणं बभूव यद्यन्मेघवृन्दं सङ्गच्छते तस्य तस्याभरणं बभूवेत्यर्थः। पूर्वं

जले जलदजालानां वज्रिवज्रानुबिम्बनैः ।
जाने तत्कालजैस्तेषां जाताऽशनिसनाथता ॥ ८ ॥
स्फुटं सावर्णिवंश्यानां कुलच्छत्रं महीभुजाम् ।
चक्रे दण्डभृतश्चुम्बन् दण्डश्चण्डरुचिं क्वचित् ॥ ९ ॥
नलभीमभुवोः प्रेम्णि विस्मिताया वधौ दिवः ।
पाशिपाशः शिरःकम्पस्रस्तभूषश्रवःश्रियम् ॥ १० ॥
पवनस्कन्धमारुह्य नृत्यत्तरकरः शिखी ।
अनेन प्रापि भैमीति भ्रमश्चक्रे नभःसदाम् ॥ ११ ॥

र्त्तिमैन्द्रधनुर्योगेना अद्य सुखेन्द्रधनुर्योगाल्लब्ध इति भावः अथवा तादृशासम्बन्धे सम्बन्धोक्ते रतिशयोक्ति रलङ्कारः ॥ ७ ॥

जल इति। जलदजालानां मेघवृन्दानां जले तत्कालजै स्तत्कालजातैः वज्रिवज्रस्य इन्द्रकुलीशस्यानुबिम्बनैः प्रतिबिम्बै स्तेषां जलदजालानामशनिसनाथता वज्रसाहित्यं रोहितयोगित्व मिति यावत् इन्द्रायुधं शक्रधनु स्तदेव ऋजु रोहितं इत्यमरः। जाता जाने इत्युत्प्रेक्षायाम् ॥ ८ ॥

स्फुटमिति। क्वचित्प्रदेशे दण्डभृतो यमस्य दण्डो गदा चण्डरुचिं सूर्यं चुम्बन् सूर्यमण्डलं स्पृशन्नित्यर्थः सावर्णिः सूर्यमित्रः तद्वंश्यानां महीभुजां कुलस्य छत्रं चक्रे दण्डसंयोगादर्कमण्डलं तद्वंश्यराजकुलस्योद्धृतं छत्रमिव बभौ इत्यर्थः। स्फुटमित्युत्प्रेक्षा ॥ ९ ॥

नलेति। पाशिनो वरुणस्य पाशः पाशवलयं नलभीमभुवोः नलभैम्योः प्रेम्णि अन्यान्यनुरागे विषये विस्मिताया विस्मयाविष्टाया दिवो नभसः शिरःकम्पेन स्रस्तभूषस्य गलितावतंसस्य श्रवसः श्रोत्रस्य श्रियं शोभां दधौ अत्र श्रियमिव श्रियमिति सादृश्याक्षेपान्निदर्शनाभेदः ॥ १० ॥

पवनेति। पवनस्कन्धं वायुस्कन्धाख्यं नभोदेश मारुह्य अतएव नृत्यत्तरा अतिशयेन नृत्यन्तः कराः अंशवो हस्ताश्च यस्य सः शिखी अग्नि

तत्कर्षि भारती दूना विरहाद्भैमजागिराम् ।
अध्वनि ध्वनिभिर्वैणैरनुकल्पैर्व्यनोदयत् ॥ १२ ॥
अथायान्तमवैक्षन्त ते जनौघमसित्विषम् ।
तेषां प्रत्युद्गमप्रीत्या मिलद्व्योमेव मूर्त्तिमत् ॥ १३ ॥
अद्राक्षुराजिहानं ते स्मरमग्रेसरं सुराः ।
अक्षाविनयशिक्षार्थं कलिनेव पुरस्कृतम् ॥ १४ ॥

र्नभःसदां नभश्चराणाम् अनेनाग्निना नूनं भैमी प्रापि प्राप्ता अन्यथा कथमेतज्जन्मण मिति भ्रमं चक्रे भ्रान्तिं जनयामासेत्यर्थः ॥११॥

तदिति । भारती सरस्वती भीमजागिरां विरहादभावाद्दूना परितप्ता तेषां देवानाम् अनुकल्पैः कुशकाशवद्भैमीगिरां प्रतिनिधिभिः मुख्यः स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः इत्यमरः । वैणै वीणासम्बन्धिभिः तस्येदमित्यण् । ध्वनिभिः शब्दैः व्यनोदयत् विनोदितवती ॥ १२ ॥

अथेति । अथ देवा आयान्तमागच्छन्तं असेरिव त्विट् यस्य तमसित्विषम् असिशोभं जनौघं जनसमाजं तेषां देवानां प्रत्युद्गमप्रीत्या कौतुकान्मिलदागच्छन्मूर्त्तिमद्विग्रहवद्व्योममाकाशमिवेत्युत्प्रेक्षा अवैक्षन्त अपश्यन् ॥ १३ ॥

अद्राक्षुरिति । ते सुराः इन्द्रादयः आजिहानमागच्छन्तम् ओहाङ्गताविति धातोर्लटः शानजादेशः । अग्रेसरं सङ्घाग्रवर्त्तिनम् अतएव अक्षाणामिन्द्रियाणां च पाशकाणां च अक्षो रथस्यावयवे पाशकेऽप्यक्षमिन्द्रियमिति विश्वः । अविनयस्य दुर्व्यापारस्य शिक्षार्थमभ्यासार्थं कलिना कलिपुरुषेण पुरस्कृतं पूजितम् अग्रतः कृतमिव स्थितं स्मरं काममद्राक्षु दृशेर्लुङि इरितोवेति विकल्पादङभाव पक्षे सिचि वृद्धिः ॥ १४ ॥

अगस्त्येति । अगस्त्यार्थमगस्त्यागमनार्थमित्यर्थः तृणप्राणाः तृणप्रायप्राणाः प्राणानविगणय्य अगस्त्यागन्तार इत्यर्थः । पृष्ठस्थीकृते

अगस्त्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः।
शम्भलीभुक्तसर्वस्वा जना यत्पारिपार्श्वकाः ॥ १५ ॥
बिभर्त्ति लोकजिद्भावं बुद्धस्य स्पर्द्धयेव यः।
यस्येशतुलयेवात्र कर्तृत्वमशरीरिणः ॥ १६ ॥
ईश्वरस्य जगत्कृत्स्नं सृष्टिमाकुलयन्निमाम्।
अस्ति योऽस्त्रीकृतस्त्रीकस्तस्य वैरमनुस्मरन् ॥ १७ ॥
चक्रे शक्रादिनेत्राणां स्मरः पीतनलश्रियाम्।
अपि दैवतवैद्याभ्यामचिकित्स्यमरोचकम् ॥ १८ ॥

पृष्ठतः कृते भीह्रियौ यैस्ते लज्जाभयवर्जिता इत्यर्थः शम्भलीभिः धात्रीभिर्भुक्तं सर्वस्वं धनं येषान्ते कुट्टनीशम्भलीसमेत्यमरः। एवंविधा जनाः यस्य स्मरस्य पारिपार्श्विकाः परिपार्श्ववर्त्तिनः परिजना इत्यर्थः। परिमुखञ्चेति चकारात् ठक् ॥ १५ ॥

बिभर्त्तीति। यः स्मरो बुद्धस्य सम्बन्धसामान्ये षष्ठी। बुद्धेनेत्यर्थः। स्पर्धयेव लोकजिद्भावं लोकजितत्वं बिभर्त्ति यस्य स्मरस्य ईशतुलया ईश्वरसाम्यापेक्षयेत्यर्थः। शरीरं न भवतीत्यशरीरि तस्यानङ्गस्य सतोऽत्र लोके कर्तृत्वं एकत्र जेतृत्वम् अन्यत्र स्रष्टृत्वं उपादानादिगोचरज्ञानादि मत्वा देवेश्वरस्य कर्तृत्वं शरीरमतन्त्रमिति तार्किकाः। पराभिभूता स्वन्तत्परा तत्साम्यायतिद्वदाचरन्तीति भावः ॥ १६ ॥

ईश्वरस्येति। स्मरः कृत्स्नं जगत् ईदृशीं स्त्रीपुंसात्मिकामित्यर्थः। ईश्वरस्य सृष्टिमाकलयन्नधिगच्छन् तस्य ईश्वरस्य वैरमनुस्मरन् स्त्रियो न भवन्तीत्यस्त्रियो अस्त्राणि कृता अस्त्रीकृताः अभूततद्भावे च्विः अस्त्रीकृता स्त्रियो येन सोऽस्त्रीकृतः सन् नद्यृतः कप्। अस्ति वर्त्तते ईश्वरवैरात् स्त्रीणामीश्वरकृतस्त्रीत्वमस्त्रत्वञ्चाकरोदित्यर्थः ॥ १७ ॥

चक्र इति। स्मरः पीतनलश्रियां साक्षात्कृतनलसौन्दर्याणां

यत्तत् क्षिपन्तमुत्कम्पमुत्थायुकमथारुणम् ।
बबुधुर्विबुधाः क्रोधमाक्रोशक्रोशघोषणम् ॥ १९ ॥
यमुपासन्त दन्तौष्ठक्षतासृक्शिष्यचक्षुषः ।
भ्रुकुटीफणिनीनादनिभनिश्वासफूत्कृताः ॥ २० ॥
दुर्गं कामाशुगेनापि दुर्लङ्घ्यमवलम्ब्य यः ।
दुर्वासोहृदयं लोकान् सेन्द्रानपि दिधक्षति ॥ २१ ॥

शक्रादिनेत्राणामिन्द्रादिचक्षुषां दैवतवैद्याभ्यामचिकित्स्यं चिकित्सितुमशक्यं न रोचयत इत्यरोचकं रोगविशेषं चक्रे नलरूपदर्शिभ्य स्तेभ्यः स्मररूपं नारोचतेत्यर्थः। स्मरादपि रमणीयत्वात्तस्येति भावः ॥ १८ ॥

यदिति। अथ स्मरदर्शनानन्तरं विबुधा देवा यत्तद्यत्किञ्चिद्वस्तु क्षिपन्तं प्रेरयन्तम् उत्कम्पं कम्पितं आक्रोशस्य क्रोशघोषणा उच्चैर्घोषः यस्य तं दूरादाह्वानघोषणं कुर्वाणमित्यर्थः। क्रोधं क्रोधपुरुषं बुबुधुः ददृशुरित्यर्थः। बुधेर्भौवादिकाल्लिट् ॥ १९ ॥

यमिति। यं क्रोधं दन्तैरोष्ठस्य क्षतेन यदसृग्रक्तं तच्छिष्याणि तत्कल्पानि चक्षूंषि येषान्ते भ्रुकुट्येव फणिनी भुजङ्गी तन्नादनिभानि तत्फूत्कारकल्पानि निश्वासफूत्कृतानि येषान्ते ईदृशाः परिजनाः उपासत आसेर्लङ्। तत्सेवका अपि तादृशा एवेत्यर्थः ॥ २० ॥

दुर्गमिति। यः क्रोधः कामाशुगेन कामबाणेनापि दुर्लङ्घ्यं दुरतिक्रमं दुर्वाससो मुने र्हृदयमेव दुर्गमवलम्ब्य सेन्द्रान् सनाथानपि लोकान् दिधक्षति दग्धुमिच्छति दहतेः सन्नन्ताल्लटि ढत्वकत्वभावाः। दुर्लङ्घ्यदुर्गावलम्बनो दुर्जयोऽस्तीति भावः। नित्यक्रुद्धो भगवान् दुर्वासा दुर्द्धर्षश्चेति प्रसिद्धम् ॥ २१ ॥

वैराग्यमिति। यः क्रोधः उच्चैरपि रञ्जनं रागं रक्तवर्णतां जनयन्नपि वैराग्यं तद्राहित्यं करोतीति विरोधः। नैस्पृह्यं करोतीति तदा-

वैराग्यं यः करोत्युच्चैरञ्जनं जनयन्नपि ।
सूते सर्वेन्द्रियाच्छादि प्रज्वलन्नपि यस्तमः ॥ २२ ॥
पञ्चेषुविजयासक्तौ भवस्य क्रुध्यतो जयात् ।
येनान्यविगृहीतारिजयकालनयः श्रितः ॥ २३ ॥
हस्तौ विस्तारयन्निभ्ये बिभ्यदर्धपथस्थवाक् ।
सूचयन् काकुमाकूतैर्लोभस्तत्र व्यलोकि तैः ॥ २४ ॥

भासीकरणाद्विरोधाभासाऽलङ्कारः । क्रुद्धस्य न कुत्राप्यनुराग इति भावः । क्रोधः प्रज्वलन् प्रकाशमानोऽपि अन्तः सन्तापस्य सर्वेन्द्रियाण्याच्छादयतीति तदाच्छादि तदावरकन्तमो मोहमन्धकारञ्च सूते जनयति क्रोधान्धो न किञ्चित्पश्यतीति भावः । अत्र प्रज्वलत्तमः शब्दयोः अर्थभेदेन विरोधपरिहारात् पूर्ववदलङ्कारः ॥ २२ ॥

पञ्चेष्विति । येन क्रोधेन पञ्चेषु विजयासक्तौ स्मरविग्रहसक्तिकाले क्रुध्यतः स्मराय कुप्यतः भवस्य कर्मणि षष्ठी । जयाद्धेतोर्नूनमन्येन कार्य्यान्तरेण विगृहीतस्य विरुद्धस्य अरेर्जये कालनयः श्रितः तत्कालोचितां नीतिमाश्रितः । स्मरसंहारकाले स्मरहरं क्रोधोजिगाय तत्काले तस्य क्रोधवशीकृतत्वादिति भावः । अत्र कामन्दकः बलिना विगृहीतस्य द्विषता कृच्छ्रवर्त्तिनः । कुर्वतापचयं शत्रोरात्मोच्छित्तिविशङ्कयेति ॥ २३ ॥

हस्ताविति । तत्र सङ्घे तैरिन्द्रादिभि रिभ्ये धनिके ईभ्य आढ्यो धनी स्वामीत्यमरः । हस्तौ विस्तारयन् याच्ञामुद्रया प्रसारयन् बिभ्यत्त्रस्यन् अतएवार्द्धपथस्थवागर्द्धोक्तवाक्वाक्यम् आकूतैर्वितर्कैः काकुं विकृतस्वरं सूचयन् गद्गदः सन्नित्यर्थः । लोभो व्यलोकि विग्रहवान् दृष्ट इत्यर्थः ॥ २४ ॥

दैन्येति । यस्य लोभस्यानुजीविनोऽनुचराः दैन्यं कार्पण्यं स्तैन्यं स्तेयं स्तेनाद्यं नलोपश्चेत्यत्र स्तेनादिति योगविभागात्कालिकः ष्यङ्-

दैन्यस्तैन्यमया नित्यमत्याहारामयाविनः ।
भुञ्जानजनसाकूतपश्या यस्यानुजीविनः ॥ २५ ॥
धनिदानाम्बुवृष्टेर्यः पात्रपाणाववग्रहः ।
स्वान् दासानिव हा निःस्वान्विक्रीणीतेऽर्थवत्सु यः ॥ २६ ॥
एकद्विकरणे हेतू महापातकपञ्चके ।
न तृणौ मन्यते कोपकामौ यः पञ्च कारयन् ॥ २७ ॥
यः सव्वेन्द्रियसद्मापि जिह्वां बह्वावलम्बते ।
तस्यामाचार्य्यकं याच्ञापटवे वटवेऽर्जितुम् ॥ २८ ॥

प्रत्ययः । तदुभयमया तत्प्रचुरा नित्यं सर्वदा अत्याहारेण बहुभक्षित्वेनामयाविनो रोगिणः सर्वत्रामयस्येत्युपसङ्ख्यानाद् दीर्घश्च । भुञ्जानाना मश्नतां जनानां साकूतं साभिप्रायं पश्यन्तीति पश्याः द्रष्टारः पाघ्रादिना शप्रत्ययः पश्यादेशश्च ॥ २५ ॥

धनिदानेति । यो लोभः पात्रपाणौ सम्प्रदानीयहस्ते धनिनां दानाम्बुवृष्टेः दानोदकवर्षस्य अवग्रहः प्रतिबन्धकस्वरूपः । तथा निःस्वान् धनहीनान् स्वान् स्वजनान् पुत्रदारादीन् दासानिव अनायासदेयानिव अर्थवत्सु आढ्येषु विक्रीणीते वितरति लोभादिति भावः । हा इति विषादे अहो लोभस्य वैचित्र्यमयी शक्तिरिति ॥ २६ ॥

एकेति । यो लोभो महापातकानां ब्रह्महत्यादीनां पञ्चके पञ्चकमध्ये एकं च द्वे च एकद्वीनि सङ्ख्येयद्वन्द्वे बहुत्वोपजननाद्बहुवचनं । तेषामेकद्विनां करणे यथासङ्ख्यं एकस्य ब्रह्महननस्य द्वयोः पानगमयोः करणे हेतू इत्यर्थः । कोपकामौ स्वयं पञ्चापि पातकानि धारयन् तृणेन मन्यते नाद्रियत इत्यर्थः । न हि बहुकारी स्वल्पकारिणं गणयतीति भावः । कामक्रोधाभ्यामपि पापिष्ठो लोभ इति रहस्यम् ॥ २७ ॥

य इति । यो लोभः सर्वेन्द्रियाणि सद्मान्यो यस्य स सन्नपि जिह्वां बहु प्रचुरमवलम्बते प्रायेण तथैवास्त इत्यर्थः । किमर्थं तत्राह तस्यां

पथ्यां तथ्यामगृह्णन्तं मन्दा बन्धुप्रबोधनाम्।
शून्यमाश्लिष्य नोज्झन्तं मोहमैच्छन्त हन्त ते ॥ २९ ॥
स्वः स्वः स्वप्राणप्रयाणेऽपि न स्मरन्ति स्मरद्विषम्।
मग्नाः कुटुम्बजम्बाले वालिशा यदुपासिनः ॥ ३० ॥
पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम्।
अन्तर्म्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम् ॥ ३१ ॥
ब्रह्मचारिव्रतस्थायियतयो गृहिणां यथा।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः ॥ ३२ ॥

जिह्वाया मध्ययनशालाभूतायामिति भावः। याच्ञापटवे भिक्षानिपुणाय शिष्याय वटवे ब्राह्मणाय आचार्यकं गुरुत्वमर्जितुमिवेत्युत्प्रेक्षा। गुरवस्तु अध्ययनशालायां स्वशिष्येभ्यो विद्याशिक्षां ददतीति प्रसिद्धम्। अतोपमोत्प्रेक्षाभ्यां स्वजातीयकाभ्यां वाक्यार्थयोः शब्दहेतुत्वात् शब्दार्थहेतुककाव्यलिङ्गमलङ्कारो सङ्कीर्य्यते इत्यलङ्कारत्रयस्य परस्परसम्बन्धेनाङ्गाङ्गिभावः ॥ २८ ॥

पथ्यामिति। ते देवाः मन्दा मूढस्वभावाः अतएव पथ्यां हितां तथ्यां सत्यां बन्धुप्रबोधनां सुहृदुपदेशम् अगृह्णन्तमस्वीकुर्वाणं शून्यं यत्किञ्चित्तुच्छं वस्त्वाश्लिष्य आदाय नोज्झन्तं मौढ्यादत्यजन्तं अतएव हन्तेति खेदः मोहं ऐच्छन्त ॥ २९ ॥

स्वः स्वः इति। यदुपासिनो यत्सेवकाः वालिशाः मूर्खा अतएव कुटुम्बजम्बाले पुत्रकलत्रादिपङ्के मग्ना स्वःस्वः परश्वोवेत्यर्थः। प्राणानां प्रयाणे निष्क्रमणे सत्यपि स्मरद्विषमीश्वरं न स्मरन्ति ॥ ३० ॥

पुंसामिति। यो मोहः अलब्धोऽप्राप्तो निर्वाणज्ञानदीपमयः सुखचित्प्रकाशात्मकः आत्मा यैस्तेषाम् अनात्मज्ञानानां पुंसा मुज्ज्वलं निर्मलम् अन्तरन्तःकरण कज्जलवदञ्जनवद्व्यक्तं स्फुटं म्लापयति मोक्षसाधनात्मसाक्षात्कारविघातकेयं दुरात्मतेत्यर्थः ॥ ३१ ॥

ब्रह्मचारीति। ब्रह्मचार्य्यादय स्त्रयः आश्रमा गृहिणं यथा क्रोधादय स्त्रये यं मोह मुपजीवन्तीति मोहमूलास्ते तन्निवृत्तौ निवर्त्तन्त इति भावः ॥ ३२ ॥

जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता ।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः ॥ ३३ ॥
चिह्निताः कतिचिद्देवैः प्राचः परिचयादमी ।
अन्ये न केचनाचूडमेनःकञ्चुकमेचकाः ॥ ३४ ॥
तत्रोदीर्णे इवार्णोधौ सैन्येऽभ्यर्णमुपेयुषि ।
कस्याप्याकर्णयामासुस्ते वर्णान् कर्णकर्कशान् ॥ ३५ ॥
ग्रावोन्मज्जनवद्यज्ञफलेऽपि श्रुतिसत्यता ।
का श्रद्धा तत्र धीदग्धाः ! कामाध्वा यत्खिलीकृतः ॥३६॥

जाग्रतामिति । यो मोहो जाग्रतां प्रबुद्धानाम् अपि निद्रा यः पश्यतां चक्षुष्मताम् अप्यन्धता तद्राहित्यं यः श्रुते शास्त्रे श्रवणे सत्यपि जाड्यं मौढ्यं यः प्रकाशे तेजसि सत्यपि तमश्च निद्रादिचतुष्टयकार्य्यकारित्वात्तद्वज्जागरचक्षुराद्यनिवर्त्यत्वाच्च प्रसिद्धनिद्रादिचतुष्टयविलक्षणे कापि तत्सृष्टिरित्यर्थः ॥ ३३ ॥

चिह्निता इति । कतिचिदमी पूर्वोक्तस्मरादयः अन्ये च आचूडमाशिखमेनसः कञ्चुकेन मेचकाः मलिनाः केचन देवैः कर्त्तृभिः प्राचः परिचयात् पूर्वानुभवजन्यसंस्कारात् चिह्निता लक्षिताः अतएव अमी ते इति प्रत्यभिज्ञाता इति यावत् ॥ ३४ ॥

तत्रेति । उदीर्णे उच्छलिते अर्णोधौ अम्भोधाविव अभ्यर्णमुपेयुषि समीपं गते तत्र तस्मिन् सैन्ये ते देवाः कस्यापि कस्यचित् पुरुषस्य कर्णकर्कशान् कर्णकटून् वर्णान्वाक्यानि आकर्णयामासुः ॥३५॥

अथ सप्तचत्वारिंशता श्लोकैस्तानेव वर्णानाह ग्रावेत्यादि । हे धीदग्धाः ! ज्ञानदग्धाः ! यज्ञफले स्वर्गादौ श्रुतिसत्यता ज्योतिष्टोमादिवेदवाक्यप्रामाण्यं ग्रावोन्मज्जनवत् ग्रावप्लवनवाक्यस्येव तदेतदर्थं तत्र तादृशी श्रुतौ का श्रद्धा को विश्वासः यद्यस्मात्त्वया कामाध्वा तृतीयपुरुषार्थमार्गः खिलीकृतः द्वे खिलाप्रहते समे इत्यमरः । प्रमाणं सिद्धं विहाय तद्विरुद्धे न श्रद्धेयमित्यर्थः ॥ ३६ ॥

केनापि बोधिसत्त्वेन जातं सत्त्वेन हेतुना।
यद्वेदमर्मभेदाय जगदे जगदस्थिरम् ॥ ३७ ॥
अग्निहोत्रं त्रयी तन्त्रं त्रिदण्डं भस्मपुण्ड्रकम्।
प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविकाः ॥ ३८ ॥
शुद्धं वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः।
तदनन्तकुला दोषाददोषा जातिरस्ति का ॥ ३९ ॥

केनेति। बोधिसत्त्वेन बुद्धेन बुद्धस्तु श्रीघनः शास्ता बोधिसत्त्वो विनायक इति यादवः। केनाप्यवाच्यमहिम्ना जातं भावे क्तः। स एव अश्रद्धेयवचन इत्यर्थः। यद्यस्माद्वेदस्य कर्मान्तरभाविफलयोगिनित्यात्मसाधकस्य ते मर्मभेदाय प्रामाण्यभङ्गाय सत्त्वेन हेतुना यत्सत्तत्क्षणिकमित्यनुमानेन जगदस्थिरं क्षणिकं जगदे गदितम् अतो न पारलौकिकसुखाशया हस्तगतमैहिकं सुखं हातव्यमित्यर्थः ॥ ३७ ॥

सम्प्रति बृहस्पतिमतावलम्बेन वैदिकं विडम्बयति अग्निहोत्रमिति। अग्निहोत्रमग्निहोत्राख्यं कर्म त्रयी त्रिवेदी तन्त्रं तदर्थविचारात्मकं मीमांसाशास्त्रं त्रिदण्डं सन्न्यासः पात्रादिपाठान्नपुंसकत्वं। भस्मनः पुण्ड्रकन्तिर्यक्तिलकम् एतानि जीवो बृहस्पतिः प्रज्ञापौरुषाभ्यां निःस्वानान्द्रहितानामित्यर्थः। जीविकाः जीवनोपायान् जल्पति ब्रूते अस्मान्नास्ति परलोक इति निश्चयाद्यथेष्टचेष्टितमेव हितमिति भावः ॥ ३८ ॥

शुद्धमिति। यद्यतः कारणात्पित्रोर्मातापितृपरम्परयोर्मध्ये निर्धारणे सप्तमी वीप्सायां द्विरुक्तिः पिता मात्रेत्येकशेषः। एकशः एकैकस्यैव वंशद्वयोशुद्धौ उभयकुलशुद्धौ सत्यां शुद्धं पुत्रस्य शुद्धता भवति तत्तस्मादनन्तानां कुलानाम् अदोषाद्दोषराहित्यान्निर्दोषा जातिः कास्ति न कुत्रापीत्यर्थः। यथाहुः अनादाविह संसारे दुर्वारे मकरध्वजे। कुले च कामिनीमूले का जातिपरिकल्पनेति ॥ ३९ ॥

कामिनीवर्गसंसर्गैर्न कः सङ्क्रान्तपातकः ।
नाम्नाति स्नाति हा मोहात् कामक्षाममिदं जगत् ॥ ४० ॥
ईर्ष्यया रक्षतो नारीर्धिक् कुलस्थितिदाम्भिकान् ।
स्मरान्धत्वाविशेषेऽपि तथा नरमरक्षतः ॥ ४१ ॥
परदारनिवृत्तिर्या सोऽयं स्वयमनादृतः ।
अहल्याकेलिलोलेन दम्भो दम्भोलिपाणिना ॥ ४२ ॥
गुरुतल्पगतौ पापकल्पनां त्यजत द्विजाः ! ।
येषां वः पत्युरत्युच्चैर्गुरुदारग्रहे ग्रहः ॥ ४३ ॥

कामिनीति। किञ्च कामिनीवर्गस्य स्त्रीजातस्य संसर्गैः सन्निकर्षैः कः पुमान् संक्रान्तपातकोऽपि न सर्वोऽपि पातक्येव अतएवेदं जगत्कामेन कामुकदोषेण क्षामव्रतं क्षीणव्रतं क्षायो मः इति निष्ठातकारस्य मकारः। तथा मोहात् स्ववृत्तानाकलनान्नाम्नाति उपवसति स्नाति गुरुत्ववृद्ध्यैव पुनर्व्रतानि चरतीत्यर्थः। हा इति खेदे किञ्चन व्रतसहस्रेणाप्येकेनैव पातके सर्वनाशात् इति भावः ॥ ४० ॥

ईर्ष्ययेति। स्मरान्धत्वस्य अविशेषे समानेऽपि ईर्ष्यया असहिष्णुतया नारीं स्त्रियं रक्षतो निरुन्धतः तथा तद्वन्नरं पुरुषमरक्षतो अनिवारयतः कुलस्थित्या कुलवृत्तेन दम्भेन कैतवेन चरन्तीति दाम्भिकान्वञ्चकान् चरतीति ठक्। दम्भस्तु कैतवे कल्क इति विश्वः। धिक् धिगुपर्यादिषु इति द्वितीया। स्त्रीदोषादिव पुरुषदोषेऽपि कुलहाने रेकत्वाभिनिवेशे दम्भादप्येको हेतु रिति भावः ॥ ४१ ॥

परेति। या परदारेभ्यो निवृत्तिः सोऽयं दम्भः अहल्याकेलिलोलेन गौतमस्त्रीरतिलालसेन दम्भोलिपाणिनेन्द्रेण स्वयमात्मना अनादृतः अतो न पारदार्यमनाचार इति भावः ॥ ४२ ॥

गुरुतल्पेति। किञ्च हे द्विजाः! गुरुतल्पगतौ गुरुदारगमने तल्पं शय्याट्टदारेषु इत्यमरः। पापकल्पनां पापसम्भावनां त्यजत कुतः

पापात्तापा मुदः पुण्यात् परासोः स्युरिति श्रुतिः ।
वैपरीत्यं ध्रुवं साक्षात्तदाख्यात बलाबले ॥ ४४ ॥
सन्देहेऽप्यन्यदेहाप्तेर्विवर्ज्यं वृजिनं यदि ।
त्यजत श्रोत्रियाः! सत्रं हिंसादूषणसंशयात् ॥ ४५ ॥
यस्त्रिवेदीविदां वन्द्यः स व्यासोऽपि जजल्प वः ।
रामाया जातकामायाः प्रशस्ता हस्तधारणा ॥ ४६ ॥

येषां वः पत्युश्च तस्मात्सोमराजानो ब्राह्मणा इति श्रुतेः । गुरोर्बृहस्पतेर्दारग्रहे तद्भार्य्यागमने अत्युच्चैरतिमहान्महः उत्सवः तस्मादत्रापि न दोषबुद्धिः कार्य्येति भावः ॥ ४३ ॥

पापादिति । परासोर्मृतस्य पुनः पापात्पापाचरणात्तापाः दुःखानि पुण्यात् पुण्याचरणान्मुदः सुखानि स्युरिति श्रुतिः । विधिनिषेधात्मागमस्थं तदित्यर्थः । वैपरीत्यं पानगमनादिपापात् सुखं तथा यज्ञादिपुण्यात् दुःखञ्च विपरीतफलं ध्रुवं सत्यम् एव साक्षात्प्रत्यक्षं तदित्यव्ययं तयोरित्यर्थः । तयोः प्रत्यक्षागमयो बलाबले आख्यात हे द्विजाः! कथयत ग्रावप्लवनवाक्यवत् प्रत्यक्षविरोधश्रुतिरिव दुर्बलेत्यर्थः ॥ ४४ ॥

सन्देह इति । हे श्रोत्रियाः! छान्दसाः! श्रोत्रियच्छान्दसौ समौ इत्यमरः । श्रोत्रियश्छन्दोऽधीते इति छन्दःशब्दात्तदधीत इत्यर्थः । विकल्पेन घ प्रत्ययः श्रोत्रभावयोर्निपातनात् साधुः । अन्यदेहाप्तेर्मृतस्य देहान्तरप्राप्तेः सन्देहेऽपि देहात्मवादिना विप्रतिपत्तेरिति भावः । वृजिनं पारदार्य्यादिपापं कलुषं वृजनैनोऽघमित्यमरः । विवर्ज्यं पाक्षिकदोषस्यापि परिहार्यत्वात् त्याज्यं यदि तर्हि हिंसादूषणसंशयात् वैधहिंसायामपि सांख्यादिभिः प्रत्यवायाङ्गीकारादिति भावः । सत्रं यज्ञं त्यजत पारदार्य्यादेः पुनरहिंसात्मकत्वात्प्रत्युत परतृप्तिकरत्वाच्च न कश्चित्प्रत्यवाय इति भावः ॥ ४५ ॥

य इति । किञ्च यो व्यासस्त्रयाणां वेदानां समाहारस्त्रिवेदी

सुकृते वः कथं श्रद्धा सुरते च कथं न सा ।
तत्कर्म पुरुषः कुर्य्याद्येनान्ते सुखमेधते ॥ ४७ ॥
बलात् कुरुत पापानि सन्तु तान्यकृतानि वः ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥ ४८ ॥
स्वागमार्थेऽपि मा स्मास्मिंस्तीर्थिकाः! विचिकित्सवः ।
तं तमाचरतानन्दं स्वच्छन्दं यं यमिच्छथ ॥ ४९ ॥

त्रिलोकीव प्रक्रिया । तद्विदां त्रयीवृद्धानां वन्द्यः सोऽपि जातकामायाः जाताभिलाषायाः रामाय हस्तधारणा करग्रहणं प्रशस्ता कर्त्तव्येति प्रशस्ता वो युष्माकं जजल्प व्यक्तं सुक्तवान् स्वयं चित्राङ्गदाविचित्रवीर्य्यभार्य्यासु पुत्रोत्पादनादिति भावः । वृद्धाचारोऽप्यत्र प्रमाणमित्यर्थः ॥४६॥

सुकृत इति । सुकृते तपोयज्ञादौ वः कथं श्रद्धा विश्वासः सा श्रद्धा सुरते वः कथं न तत्रैव भवितव्यमित्यर्थः । कुतः पुरुषः तत्कर्म कुर्य्यादेव कर्मणामन्ते कर्मान्ते सुखं कर्म एधते वर्धते सुखार्थं कर्म कुर्य्यादित्यर्थः । तच्च सुरतमेवानुभवसिद्धत्वात् न सुकृतं वैपरीत्यादिति भावः ॥ ४७ ॥

बलादिति । किञ्च बलात् बलात्कारात्पापानि कुरुत बलात्कृतपापानि वो युष्माकमकृतानि सन्तु अकृतान्येव भविष्यन्तीत्यर्थः । कुतः सर्वान् बलकृतानर्थान् व्यापारानकृतान्मनुरब्रवीत् तस्माद्बलाच्चेत् कृतेऽपि दोषो नास्तीत्यर्थः । अत्र मनुः बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् । सर्वान् बलकृतानर्थानकृतान्मनुरब्रवीत् । यद्यपि बलात्कृतं व्यवहारपरावृत्तिपरमेतत् तथापि पापसंकलयता चार्वाकविषयतया प्रलपतीति द्रष्टव्यम् ॥ ४८ ॥

स्वेति । हे तीर्थिकाः! शास्त्रिणः! मत्वर्थीयष्ठन् प्रत्ययः । तीर्थं शास्त्रेऽध्वरक्षेत्रोपायोपाध्यायमन्त्रिष्वित्यमरः । तस्मिन्ननुप्रोक्ते स्वागमार्थे बलात्कारलक्षणे स्वशास्त्रार्थेऽपि विचिकित्सवः सांशा-

श्रुतिस्मृत्यर्थबोधेषु क्वैकमत्यं महाधियाम्।
व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्या सुखोन्मुखी ॥ ५० ॥
यस्मिन्नस्मीति धीर्देहे तद्दाहे वः किमेनसा।
कापि किन्तत् फलं न स्यादात्मेति परसाक्षिके ॥ ५१ ॥
मृतः स्मरति कर्म्माणि मृते कर्मफलोर्मयः।
अन्यभुक्तैर्मृते तृप्तिरित्यलं धूर्त्तवार्त्तया ॥ ५२ ॥

यिकाः विचिकित्सा तु संशय इत्यमरः। कितः सन्नन्तादुप्रत्ययः अस्तेर्लटि धादेशः। किन्तु यं यमानन्दमिच्छथ तं तमानन्दं स्वच्छन्दं यथेच्छमाचरत अनुभवतेत्यर्थः ॥ ४९ ॥

ननु मनुवचनस्य व्यवहारविषयत्वान्न यमर्थं इत्याक्षेपन्त प्रत्याह श्रुतीति। महाधियां चितवृद्धानां पुंसां श्रुतिस्मृत्यर्थानां बोधेष्वैकमत्यं सम्प्रतिपत्तिः क्व न क्वापीत्यर्थः। किन्तु बुद्धिबलापेक्षा ज्ञानशक्त्यनुसारेण व्याख्या प्रतिपादनं सैव निर्णायकेतिशेषः। एवं स्थिते व्याख्या सुखोन्मुखी सुखप्रवणा नोपेक्ष्या सैव ग्राह्येत्यर्थः। अन्यथा भ्रष्टो भवेदिति भावः ॥ ५० ॥

नन्वेवं सुखलौल्यात्पापचरणे परत्रानिष्टं स्यादित्याह यस्मिन्निति। यस्मिन्देहे अस्मीति धीरहं बुद्धिः अस्मीत्यव्ययमस्मदर्थानुवादे अहमर्थेऽपि इति गणव्याख्याने। पादप्रहारमिति सुन्दरि ! नास्मि दूय इत्यादि प्रयोगश्च। तस्य दाहे सति वो युष्माकमेनसा किम् ? न स्यात्। गौरोऽहं कृशोऽहमित्यादि बुद्धिप्रामाण्याद्देहादतिरिक्तः फलभोक्ताऽस्मीत्यभिमानः। तर्हि परसाक्षिके परोक्तिमात्रप्रमाणके न तु वेदवदनुभवसिद्धे इत्यर्थः। आत्मेति आत्मेति कृतनाम क्व कापि कुत्रचित्कल्पितेऽर्थे तस्यैनसः फलं किम् ? नस्यात् अस्तु नाम किञ्चित्फलं वस्तुतस्तूभयमप्यसन्दिग्धमेवेति भावः ॥ ५१ ॥

नन्वत्रागमो बलवदस्ति प्रमाणमत आह मृत इति। मृतः कर्माणि स्वकृतानि स्मरति मृते जन्तौ कर्मणां फलोर्मयः सुखदुःखसन्ताना

एकं सन्दिग्धयोस्तावत् भावि तत्रेष्टजन्मनि ।
हेतूनाहुः समन्त्रादीनसाङ्गानन्यथा विटाः ॥ ५३ ॥
जनेन जानतास्मीति कायं नायं त्वमित्यसौ ।
त्याज्यते ग्राह्यते चान्यदहो स्तुत्यातिधूर्त्तया ॥ ५४ ॥
एकस्य विश्वपापेन तापेऽनन्ते निमज्जतः ।
कः श्रोतस्यात्मनो भीरो ! भरः स्याद् दुरितेन ते ॥ ५५ ॥

भवन्तीति शेषः । अन्यभुक्तैः श्राद्धादिब्राह्मणभोजनैर्मृते तृप्तिरिति धूर्त्तवार्त्तया प्रतारकप्रवादेनालम् आगमोऽपि कस्यचित्प्रलाप एवेत्यर्थः ॥५२॥

धौर्त्यप्रकारमेवाह एकमित्यादि । सन्दिग्धयोरिष्टसिद्ध्योर्मध्ये एकं तावदवश्यम्भावि तत्रेष्टजन्मनि इष्टसिद्धौ सति मन्त्रादीन्मन्त्रादिप्रयोगान् हेतून् कारणमाहुः अन्यथा तदसिद्धौ मन्त्रादिसाङ्गानङ्गविकल्पानाहुः ॥ ५३ ॥

धूर्त्तस्य इदं कर्मकाण्डं विडम्ब्य ज्ञानकाण्डं विडम्बयति जनेनेति । अतिधूर्त्तया अतिप्रतारिकया स्तुत्या कायं देहमस्म्यहमिति जानता देहादावात्मबुद्धिं कुर्वता जनेन प्रयोज्येन अयं कायः त्वमात्मा नेति त्याज्यते मोच्यते अन्यद्देहादन्यद्ब्रह्म ग्राह्यते तत्त्वमस्यादिवाक्यै रङ्गीकार्य्यते सत्यस्य असत्यकरणादसत्यस्य सत्यकरणाच्च अहो इत्याश्चर्य्यकरणम् ॥ ५४ ॥

एकस्येति । एकस्य परमार्थतोऽद्वितीयस्य श्रौतस्य उपनिषदवात्मनः आत्मभूतस्य तथा विश्वपापेन अशेषपापेन अनन्ते तापे दुरन्तदुःखे निमज्जतः ते तव हे भीरो ! दुरितेनैकेन स्त्रीसङ्ग्रहणपापेन को भरः आत्मवाददाक्षिकस्य पापैकफलं परस्य एतेन किमत्रैव वैराग्येणेत्यर्थः ॥ ५५ ॥

किन्ते हस्तहृतात् पुष्पात् तन्मात्रे हि फलत्यदः ।
न्यस्य तन्मूर्द्ध्न्यनन्यस्य न्यास्यमेवात्मनो यदि ॥ ५६ ॥
तृणानीव घृणावादान् विधूनय वधूरनु ।
तवापि तादृशस्यैव का चिरं जनवञ्चना ॥ ५७ ॥
कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम् ।
वेदोऽपि देवकीयाज्ञा तत्राज्ञाः काधिकार्हणा ॥ ५८ ॥

किमिति । हे मूर्ख ! हस्तहृताद्धस्तेनच्छादितात् पुष्पात्ते तव किं न किञ्चिदित्यर्थः । प्रत्युत अदः इदं पुष्पं तन्मात्रे तस्मिन् हस्त एव फलत्यदः फलं सूते अपि सम्भावनायाम् । अथात्मनो देवताधिष्ठितस्य मूर्ध्नि न्यास्यमर्पणीयमेव यदि कुहलोर्यत् । तत्तर्हि स्वस्यैव मूर्ध्नि न्यस्य निधेहि अस्यतर्लोटि सिपि हेर्लुक् । पापोपासनादरं स्वयमुपभोग इति भावः ॥ ५६ ॥

तृणानीति । वधूरनु स्त्रीविषये घृणावादान् हास्येऽस्य सन्दर्शन मक्षियुग्म मच्छुञ्ज्वलं तत्कलुषं वसायाः । स्तनौ च पीनौ पिशितौ च पिण्डौ स्थानान्तरे किं? नरकोऽपि योषिदित्यादि जुगुप्सावादान् घृणा जुगुप्साकृपयोरिति यादवः । तृणानीव विधूनय विसर्जय धृक् प्रियोनुवक्तव्यः । तवापि तादृशस्य जुगुप्सितस्यैव सतश्चिरमत्यन्तं जनवञ्चना विरक्तप्रलापै र्लोकवञ्चना का किमर्था ॥ ५७ ॥

कुरुध्वमिति । हे अज्ञा ! मूढ़ा ! ब्रह्माद्यैरलङ्घितां कामदेवस्याज्ञां कुरुध्वं नचाय मवैदिकाचार इत्याह वेदोऽपि देवस्येयं देवकीयाज्ञा- गहादिभ्यश्चेति छप्रत्यये जनवरयोः कुग्वक्तव्यः देवस्येति कुगागमः । आज्ञा शासनं श्रुतिः स्मृति र्ममैवाज्ञेति भगवद्वचनादिति भावः । तत्र वेदे अधिका अर्हणा पूजा का किं निमित्तेत्यर्थः । इत्थम् अविशेषे कामदेवाज्ञैव कार्य्या ब्रह्माद्यैरप्यलङ्घ्यत्वादिति भावः ॥ ५८ ॥

प्रलापमपि वेदस्य भागं मन्यध्वमेव चेत् ।
केनाभाग्येन दुःखान्न विधीनपि तथेच्छथ ॥५९॥
श्रुतिं श्रद्धध्वं विक्षिप्ताः प्रक्षिप्तां ब्रूथ च स्वयम् ।
मीमांसामांसलप्रज्ञा ! स्तां यूपद्विपदापिनीम् ॥ ६० ॥
को हि वेदास्त्यमुष्मिन् वा लोक इत्याह या श्रुतिः ।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम् ॥ ६१ ॥
धर्म्माधर्मौ मनुर्ज्जल्पन्नदृक्यार्जनवर्जनौ ।
व्याजान्मण्डलदण्डार्थी श्रद्धधायि मुधा बुधैः ॥६२॥

प्रलापमिति । हे मूढाः ! वेदस्य भागमर्थवादाख्यं प्रलापमनर्थकमपि मन्यध्वं जानीथैव चेत् केनाभाग्येन भाग्यविपर्य्ययेण दुःखयन्तीति दुःखाः पचाद्यच् । तान् दुःखकरार्थान् विधीनपि विधिभागमपि तथा प्रलापान्नेच्छथ न मन्यध्वं एकदेशोपहतत्वाच्च राशिवत् कृत्स्नस्यापि अनुपादेयत्वादिति भावः ॥ ५९ ॥

श्रुतिमिति । हे मीमांसया मांसलप्रज्ञाः ! निश्चितबुद्धय इति परिहासोक्तिः विक्षिप्ता भ्रान्ताः सन्तः श्रुतिं वेदं श्रद्धध्वं विश्वसिथ अथ यूपद्विपदापिनीं स्वयूपकलुषु जगद्दक्षिणादां प्रतिपादिकां तां श्रुतिं स्वयमेव प्रक्षिप्तां विप्लुतार्थाञ्च ब्रूथ तत्कुतो वेदस्य प्रामाण्यमित्यर्थः ॥६०॥

कोहीति । किञ्च या श्रुतिः कोहि तद्वेद यदमुष्मिन् लोके परलोको अस्ति वा नवेति फलमितिशेषः । कोहि वेद न कोऽपीत्याह तस्याः एवं सन्दिहानायाः श्रुतेः प्रामाण्यावलम्बनादमुं लोकं परलोकं प्रत्येति विश्वसिति न प्रत्येति वा अतो न प्रतिष्ठावादीति श्रुतिर्न श्रद्धेयेत्यर्थः ॥ ६१ ॥

एवं श्रुतेरप्रामाण्यमुक्त्वा स्मृतेरप्याह धर्मेत्यादि । व्याजाद्धर्माधर्मोपदेशकैतवान्मण्डले राष्ट्रे दण्डार्थी दण्डनार्थी सन् अशक्ये कर्त्तुर-

व्यासस्यैव गिरा तस्मिन् श्रद्धेत्यद्धा स्थ तान्त्रिकाः ।
मत्स्यस्याप्युपदेश्यान् वः को मत्स्यानपि भाषताम् ॥ ६३ ॥
पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः ।
निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान्न किम् ॥ ६४ ॥
न भ्रातुः किल देव्यां स व्यासः कामात् समासजत् ।
दासीरतस्तदासीद्यन्माता तत्राप्यदेशि किम् ॥६५॥

शक्ये अर्जनवर्जने यथासङ्ख्यं करणाकरणे ययोस्तौ धर्माधर्मौ तत्सन्यथासङ्ख्यमर्ज्यत्वेन वर्ज्यत्वेनोपादिशन् बुधैर्विद्वद्भिः सुधैव श्रद्दधायि श्रद्धितमित्यर्थः ॥ ६२ ॥

व्यासस्येति । हे तान्त्रिकाः ! तन्त्रशास्त्रवेदिनः ! तदधीते तद्वेदेति ठक् । व्यासस्य गिरा मनूक्तं ग्राह्यमिति व्यासोक्त्यैव तस्मिन् श्रद्धेत्यद्धा सत्ये स्थ स्थिराः स्थ चेत्तर्हि व्यासोक्तिः मत्स्यपुराणे मत्स्यस्य मत्स्यदेहस्य मीनस्य च उपदेश्याननुशासनीयान् अतएव मत्स्यप्रायान् वो युष्मान् को भाषतां कस्यापि न सम्भाष्या इत्यर्थः । मत्स्य उपदेष्टेति स्वकपोलकल्पितं वदन् व्यासो न श्रद्धेयवचन इत्यर्थः ॥ ६३ ॥

पण्डित इत्यादि । पुनर्व्यासमेव विडम्बयति । पण्डितः पण्डितमानी चाटुपटु श्चाटुवादकुशलः पाण्डवानां कवि र्व्यासोऽपि तेषु पाण्डवेषु निन्दत्सु स निनिन्द किं ? स्तुवत्सु सत्सु नस्तुतवान् किं ? तन्निन्द्यान् निन्दन् स्तुत्यान् स्तुवन् व्यासोऽपि पाण्डवपक्षपाती कश्चित्कविर्न यथार्थवादीत्यर्थः ॥६४॥

कामचारी च स इत्याह नेति । स व्यासो भ्रातुर्विचित्रवीर्य्यस्य देव्यां पत्न्यां कामादनुरागात्समासजदासक्तश्चेत्किल गुर्वनुज्ञानान्न दोषश्चेत् तत्राह तदा तत्काले दासीरतस्य सीहिदुरोत्पादायेति भावः । तत्रापि माता सत्यवत्या अदेशि आदिष्टः किम् ? ॥ ६५ ॥

देवैर्द्विजैः कृता ग्रन्थाः पन्था येषां तदादृतौ ।
गां नतैः किं न तैर्व्यक्तं ततोऽप्यात्माऽधरीकृतः ॥ ६६ ॥
साधु कामुकताभुक्ता शान्तस्वान्तैर्मखोन्मुखैः ।
सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः ॥ ६७ ॥
उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतम् ।
अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥ ६८ ॥
विभ्रत्युपपि यानाय जना जनितमज्जनाः ॥
विग्रहायाग्रतः पश्चाद्गत्वरोरभ्रविभ्रमम् ॥ ६९ ॥

देवैरिति । हे मूढाः ! एषां वः देवैर्ब्रह्मादिभिः द्विजैः व्यासादिभिश्च कृता ग्रन्थाः गां प्रणमेदित्यादिस्मृतयः पन्थाः प्रमाणं तदादृतौ तद्ग्रन्थादरे सति गां धेनुं नतैः प्रणतैस्तैर्भवद्भिः ततो गोरप्यात्मा स्वं व्यक्तमधरीकृतो न किं ? कृत एवेत्यर्थः । पशुप्रणामस्तयोरपि निकृष्टता स्यान्नास्याः किञ्चित्फलमस्तीति भावः ॥ ६६ ॥

साध्विति । प्रेत्य मृत्वापि सारङ्गलोचना मृगाक्ष्य एव सारो मृष्टांशो यस्यां तां दिवं लिप्सुभिः अतएव शान्तस्वान्तैः शुद्धचित्तैः सद्भिर्मखोन्मुखैः कृतप्रवर्ग्यैर्मूढैः कामुकता अभिस्त्रि रतिर्भुक्ता साधु सम्यगिति सिद्धं विहाय साध्य प्रवृत्तेरुपहासः ॥ ६७ ॥

उभयीति । अपवर्गे तृतीयेति भणतः सूत्रयतः पाणिनेर्मुनेरपि उभयी प्रकृतिः स्त्रीपुंसात्मिका या तृतीया पुरुषार्थे सजेत् तृतीया प्रकृतिः पदव्यक्तिरपवर्गे मोक्षाख्ये चतुर्थे पुरुषार्थे सजेदिति मतं स्फुटम् अयमेवास्य सूत्रस्यार्थो न द्वितीयाविभक्तिविधानमित्यर्थः । तथात्र वृथा कामं विहाय अपवर्गे प्रवृत्तमाना यूयं नपुंसका हता स्थेति भावः ॥ ६८ ॥

विभ्रदिति । उपरि यानाय ऊर्ध्वलोकगमनाय जनितमज्जनाः तीर्थेषु कृतमज्जनाः अधो गच्छन्ति इत्यर्थः । ईदृशाः जनाः अग्रतो

कः शमः क्रियतां प्राज्ञाः! प्रियाप्रीतौ परिश्रमः।
भस्मीभूतस्य भूतस्य पुनरागमनं भ्रमः ॥ ६८ ॥
एनसानेन तिर्य्यक् स्यादित्यादिः का विभीषिका।
राजिलोऽपि हि राजेव स्वैः सुखी सुखहेतुभिः ॥ ७१ ॥
हतास्ते दिवि दीव्यन्ति दैत्या दैत्यारिणा रणे।
तत्रापि तेन युद्ध्यन्तां हता अपि तथैव ते ॥ ७२ ॥

विग्रहाय युद्धाय योद्धुमग्रतो गमनायेत्यर्थः। पश्चाद्गत्वराणां पश्चाद्गामिनां गत्वरस्येति करवन्तो निपातः। अभ्राणां मेघानां विभ्रममिव विभ्रमं चेष्टां विभ्रदिति निदर्शनालङ्कारः। स चोर्ध्वगमनाय अधो गच्छन्त इति स्वलिनः स्खलार्थप्रयतरूपविचित्रालङ्कारोत्थापित इति सङ्करः। तेन तेषामविमृश्यकारित्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ६८ ॥

क इति। हे प्रज्ञाः! प्रज्ञावन्त इति सोपहास मामन्त्रितः प्रज्ञाहीना इत्यर्थः। प्रज्ञा श्रद्धेत्यादिना मत्वर्थीयेण्प्रत्ययः। शमः शान्तिः वैराग्यं कः किमर्थं किन्तु प्रियाप्राप्तौ इष्टस्त्रीसङ्गतौ परिश्रमः क्रियतां न च तत्पापेन यातना शरीरप्राप्तिशङ्का कार्येत्याह भस्मीभूतस्य देहस्य पुनरागमनं कुतः पुनरुद्भव इति भ्रमः इति देहातिरिक्तात्मसद्भावाभिमानोऽपि ताहगेवेति भावः ॥ ७० ॥

अस्तु वा यातनाशरीरं तत्रापि सुखमेवेत्याह एनसेति। अनेन एनसा एवं विधपापेन तिर्य्यग्यातनाशरीरं स्यादिति का विभीषिका भित्रासनं विपूर्वाद्भीषयतेर्धात्वर्थनिर्देशेन्युल् कात्पूर्वस्येकारः। हि यस्माद्राजिलो डुण्डुभाख्यस्तिर्यगपि समौ राजिल डुण्डुभावित्यमरः। राजेव स्वैः स्वजात्यनुरूपैः सुखहेतुभिः सुखसाधनैः सुखी सुखवानेव तिरश्चामपि शरीरेन्द्रियाभिमानिनां सुखमेवेति तद्धेतोः पापान्न भेतव्यमिति भावः ॥ ७१ ॥

अन्यच्च शास्त्रं विडम्बयति हताइति। रणे हताः दिवि स्वर्गे दिव्यन्ति क्रीडन्ति चेत्तर्हि दैत्याः असुराः दैत्यारिणा विष्णुना रणे हताः

स्वञ्च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलम् ।
इति स्वोच्छित्तिमुक्त्युक्तिर्वैदग्धी वेदवादिनाम् ॥ ७३ ॥
मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम् ।
गौतमं तमवेतैव यथा वित्थ तथैव सः ॥ ७४ ॥
दारा हरिहरादीनां तन्मग्नमनसो भृशम् ।
किं न मुक्ताः पुनः सन्ति कारागारे मनोभुवः ॥ ७५ ॥

सत्यामपि हननोत्तरकालिन मपीत्यर्थः। तथैव पूर्ववदेव तत्रापि स्वर्गेऽपि तेन विष्णुना सह युध्यन्तां युध्येरन् नचैतदस्ति तस्मादपि शास्त्रं मृषेत्यर्थः ॥ ७२ ॥

अथ मोक्षशास्त्रं विडम्बयति स्वमित्यादि। संसारे संसारावस्थायां स्वं च ब्रह्म च जीवब्रह्मणी केवलमुक्तौ मोक्षावस्थायां तु केवलमेकं ब्रह्म इति स्वस्य जीवस्योच्छित्तिरेव मुक्तिः तस्याः उक्तौ प्रतिपादने वैदग्धी वैदग्ध्यं गुणवचनेत्यादिना ष्यञ्। स्त्रीत्वविवक्षायां षिद्गौरादिभ्यश्चेति ङीष्। सैव वेदवेदिनां वावदूका वदन्तीति भावः ॥ ७३ ॥

अद्वैतमोक्षं दूषयित्वा द्वैतमोक्षं दूषयति मुक्तय इति। यः शास्त्रकर्त्ता सचेतसां प्राणिनां शिलात्वाय नवगुणात्यन्तोच्छेदरूपत्वात् तत्सदृशमुक्तस्वरूपानिर्हरणाय शास्त्रमूचे प्रणिनाय तं तच्छास्त्रकर्त्तारं गौतमं गौतमाख्यं न तु गौतममित्यर्थः। अवेत जानीत अवपूर्वादिणो मध्यमपुरुषबहुवचनम्। एवं च सति यथा वित्थ जानीथ वेत्तेः पूर्ववद्रूपं तथैव सः अथ पुरुषार्थोपदेशाद्गौतमः पशुतमो मूढतम एवेत्यर्थः। गौणोऽयं शब्दो न तु मूढः अदन्तमवन्तविवक्षा चेति भावः ॥ ७४ ॥

हरिहरहिरण्यगर्भोपासनया मुक्तिरिति मतं निरस्यति दारा इति। हरिहरादीनां दारा लक्ष्म्यादयः भृशन्तेषु हरिहरादिष्वेव मग्नमनसो लग्नचित्ता. सन्तोऽपि किं न मुक्ताः प्रत्युत कुतोहेतोर्मनो-

देवश्चेदस्ति सर्व्वज्ञः करुणाभागवन्ध्यवाक्।
तत्किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः॥ ७६॥
भविनां भावयन् दुःखं स्वकर्मजमपीश्वरः।
स्यादकारणवैरी नः कारणादपरेपरे॥ ७७॥
तर्काप्रतिष्ठया साम्यादन्योन्यस्य व्यतिघ्नताम्।
नाप्रामाण्यं मतानां स्यात् केषां सत्प्रतिपक्षवत्॥ ७८॥

भुवः कामस्य कारागारे बन्धनालये कारा स्याद्बन्धनालये इत्यमरः। पुनः सन्ति वसन्ति तद्वशे वर्त्तन्त इत्यर्थः। ततस्तदपि मिथ्यैवेति भावः॥ ७५॥

किञ्च देवोऽपि नास्ति यत्प्रसादान्मुच्येमहीत्याह देव इति। सर्वज्ञः करुणाभाक्कारुणिकः वैषम्यनैर्घृण्यरहित इत्यर्थः। अवन्ध्यवागमोघवचनो देव ईश्वरोऽस्ति चेत्तर्हि किं? किमर्थमर्थिनो मोक्षार्थिनो नः अस्मान्वाग्व्ययमात्रात् उच्चारणमात्रेण न कृतार्थयति न मोचयतीत्यर्थः। अतः सोऽपि नास्तीति भावः॥ ७६॥

नन्वस्त्वेवेश्वरः किं त्वस्मत्कर्मानुसारात् फलं प्रयच्छन्न दुष्यतीत्याशङ्क्याभ्युपेत्य दूषयति भविनामिति। भविनां संसारिणां स्वकर्मजमपि दुःखं भावयन्नौदासीन्यं विहाय निमित्तं भवन्नीश्वरो नोऽस्माकमकारणाद्वैरी स्यात् अपरे परे अन्ये शत्रवः कारणादन्योन्यापकारलक्षणाद्वैरिणः अतः सर्वोऽपि न विश्वसनीय इति भावः॥ ७७॥

किञ्च सर्वाण्यप्यास्तिकमतानि परस्परविरोधादप्रामाण्यान्येवेत्याह तर्केति। तर्कस्य युक्तेरप्रतिष्ठया अप्रतिष्ठत्वेन कारणेन साम्यात्समबलत्वाद्धेतोरन्योन्यस्य व्यतिघ्नतां परस्परं प्रतिरुन्धतां सर्वनाम्नो वृत्तिमात्रे द्वे भवत इति अन्यशब्दस्य द्विरुक्तिः पूर्वपदात्प्रथमैकवचनं शेषे कर्मणि षष्ठी कर्मव्यतीहारे द्योतनार्थोऽप्युपसर्गप्रयोगः इतरेतरान्योन्योपपदाच्चेति प्रतिषेधात्कर्मव्यतीहारेऽप्यात्मनेपदाभावः। केषां मतानां दर्शनानां सत्प्रतिपक्षवत् मिथः प्रतिरुद्धहेतूनामिव अप्रामाण्यं न स्यात् तस्मादेवेत्यर्थः॥ ७८॥

अक्रोधं शिक्षयन्त्यन्यान् क्रोधना ये तपोधनाः ।
निर्धनास्ते धनायैव धातुवादोपदेशिनः ॥ ७९ ॥
किं वित्तं दत्त तुष्टेयमदातरि हरिप्रिया ।
दत्त्वा सर्वं धनं मुग्धो बन्धनं लब्धवान् बलिः ॥ ८० ॥
दोग्धा द्रोग्धा च सर्वोऽयं धनिनश्चेतसा जनः ।
विसृज्य लोभसंक्षोभमेकदा यद्युदासते ॥ ८१ ॥
दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुक्षिवञ्चना ।
स्वाच्छन्द्यस्वच्छतानन्दकन्दलीकन्दमेककम् ॥ ८२।

अक्रोधमिति । क्रोधनाः स्वयं कोपनशीलाः नन्दार्थेभ्यश्चेति युच् । ये तपोधनाः दुर्वासआदयः अन्यानितरानक्रोधं शान्तं शिक्षयन्त्युपदिशन्ति ब्रुविशासीति द्विकर्मकत्वं । ते निर्धनाः स्वयं निःस्वाः सन्तो धनाय धनार्थं धातुवादोपदेशिनः परेषां धातुविद्योपदेष्टार इव तद्वदपहास्याः स्युरिति भावः ॥ ७९ ॥

किमिति । हे वदान्याः ! वित्तं धनं किं किमर्थं दत्त नदत्तेत्यर्थः सम्प्रश्ने लोट् । न चादाने लक्ष्मीक्षोभ इत्याह इयं हरिप्रिया लक्ष्मीरदातरि तुष्टा अदानेनैव तुष्यतीत्यर्थः । तथा हि मूढो दुर्बुद्धिः बलिर्वैरोचनिः सर्वं धनं दत्त्वा बन्धनं प्राप्तवान् वामनाय विष्णवे दत्त्वा त्रिविक्रमेण तेनैव बद्ध इत्यर्थः ॥ ८० ॥

दोग्धेति । अयं सर्वो जनः चेतसा अन्तरङ्गेण धनिनो धनिकान् दोग्धा रीक्तीकर्त्तारश्च स्वायुःकर्षणाय मनसीकृतनिश्चया इत्यर्थः । अतएव द्रोग्धा जिघांसुश्च ताच्छील्ये तृन् अतएव न लोकेत्यादिना षष्ठीप्रतिषेधः । किन्तु लोभसंक्षोभं विकारं याच्ञादैन्यं विसृज्योदासते यदि निःस्पृहास्तिष्ठन्ति यदि एको द्वौ वा एकदा नास्तिकः कश्चिदित्यर्थः । सङ्ख्याव्ययेत्यादिना बहुव्रीहौ डच् समासान्तः ॥ ८१ ॥

दैन्यस्येति । अस्तैन्यमस्तेयं क्वचित्प्रसज्यप्रतिषेधेऽपि नञ् समास

इत्थमाकर्ण्य दुर्वर्णान् शक्रः सक्रोधतां दधे।
अवोचदुच्चैः कस्कोऽयं धर्ममर्माणि कृन्तति ॥ ८३ ॥
लोकत्रयीं त्रयीनेत्रां वज्रवीर्यस्फुरत्करे।
क इत्थं भाषते पाकशासने मयि शासति ॥ ८४ ॥
वर्णसङ्कीर्णतायां वा जात्यलोपेऽन्यथापि वा।
ब्रह्महादेः परीक्षासु भङ्गमङ्ग ! प्रमाणय ॥ ८५ ॥
ब्राह्मण्यादिप्रसिद्धाया गन्ता यन्नेक्षते जयम्।
तद्विशुद्धिमशेषस्य वर्णवंशस्य शंसति ॥ ८६ ॥

इष्यते अहिंसेतिवत्। दैन्यस्य शोचनायाः आयुषे हित मायुष्यं तदर्थ मित्यर्थः। हितार्थे यत्प्रत्ययः। आनन्दकन्दलीकन्दमानन्दाङ्कुरमूलकम् एक मेकाकि असहाये कन्प्रत्ययः। स्वाच्छन्द्यं स्वेच्छाचारित्वं ऋच्छत गच्छत मा वृथा हताः स्थ इत्यर्थः ॥८२॥

इत्थमिति। इत्थमेवं विधान् दुर्वर्णान् दुर्वाक्यानि आकर्ण्य शक्रः सक्रोधतां दधे चुक्रोध कः कोऽयं क इत्यस्य सम्भ्रमे द्विरुक्तिः कस्कादिषु चेति सकारः। धर्ममर्माणि कृन्तति भिनत्तीत्युच्चैस्तार मवोचत् ॥ ८३ ॥

लोकेति। त्रयीनेत्रां वेदचक्षुषं लोकत्रयीं त्रिलोकीं वज्रवीर्येण कुलिशप्रभावेण स्फुरत्करे पाकशासने देवेन्द्रे मयि शासति क इत्थमसत् भाषते प्रलपति ॥ ८४ ॥

ग्रावोन्मज्जनवदित्यादिना शास्त्राप्रामाण्यं प्रलपितं तन्निरस्यन्नाह वर्णेत्यादि। वर्णानां ब्राह्मणादिवर्णानामसङ्कीर्णतायामसाङ्कर्ये अन्यथा वाणिज्यःनिषिद्धवृत्त्यनाश्रयणे सति जात्यलोपे जातिभ्रंशाभावेऽपि विषये ब्रह्महादेः पातकिनः परीक्षासु तुलादिदिव्यशोधनेषु भङ्गं पराजयम् अङ्ग ! भोः ! प्रमाणय प्रमाणीकुरु एतदेव सर्वत्र वर्णसाङ्कर्यादि शास्त्रे प्रामाण्येऽपि दर्शन मित्यर्थः ॥ ८५ ॥

ब्राह्मण्यादीति। किञ्च ब्राह्मणी आदिर्यस्याः प्रसिद्धायाः प्रख्यात-

जलानलपरीक्षादौ सम्वादो वेदवेदिते।
गलहस्तितनास्तिक्यां धिक् धियं कुरुते न ते ॥ ८७ ॥
सत्येव पतियोगादौ गर्भादेरध्रुवोदयात्।
आक्षिप्तं नास्तिकाः! कर्म न किं मर्म भिनत्ति वः ॥ ८८ ॥
याचतः स्वं गयाश्राद्धं भूतस्याविश्य कञ्चन।
नानादेशजनोपज्ञाः प्रत्येषि न कथाः कथम् ॥ ९० ॥

वर्णस्त्रिया गत्वा सम्भोक्ता जयं दिव्यपरीक्षणे विजयं नेक्षत इति यत् तत्पराजयन मेव अशेषस्य वर्णवंशस्य ब्राह्मणादिकुलस्य विशुद्धि मुत्कर्षं शंसति अन्यथा कथं तद्गन्तुः पातकित्वशंसी पराजय इति भावः ॥ ८६ ॥

जलेति। किञ्च वेदवेदिते शास्त्रचोदिते जलानलपरीक्षादौ जलादिदिव्यशोधनादौ आदिशब्दात्कारिर्यादिसंग्रहः। सम्वादः फलप्रत्यभिज्ञा ते तव गलहस्तेन तुल्यं गलहस्तितं नास्तिक्यं यया तां धियम् आस्तिक्यबुद्धिं न कुरुते धिक् तामितिशेषः। धिङ्निर्भर्त्सननिन्दयोः इत्यमरः ॥ ८७ ॥

सतीति। हे नास्तिकाः! नास्तिपरलोकाः! अस्ति नास्ति दृष्टं मतिः इति ठक्। पतियोगादौ भर्तृसम्पर्कादि दुष्कारणसाकल्ये सत्येव आदिशब्दान्मोघोदयादिकारणसंग्रहः। अध्रुवोदयात्कादाचित्कोत्पत्तिकाद्गर्भोदयादिकार्यात् आदिशब्दाद्वृष्ट्यादिकार्य्यसंग्रहः तस्मादाक्षिप्तम् अर्थापत्तिसिद्धकर्मजन्मान्तरा दृष्टं वो युष्माकं नास्तिकानां मर्म हृदयं किं न भिनत्ति एतेनैव अदृष्ट मस्तीति बोद्धव्यमित्यर्थः ॥ ८८ ॥

यदुक्त मन्यद्युक्तेष्यते त्वम्भिरिति अलं धूर्त्तवार्त्तयेति तत्रोत्तरमाह याचत इति। कञ्चन जन माविश्य स्वमात्मनो गयाश्राद्धं याचतो भूतस्य ब्रह्मराक्षसादेः सम्बन्धि नानादेशजनोपज्ञा नानादेशजना एवोपज्ञा ज्ञानं प्रमाणं यासान्तास्तत्प्रमाणका इत्यर्थः। उपज्ञा ज्ञानमाद्यं स्यादित्यमरः। तथा उपाख्यानानि गयाश्राद्धात्तस्य मुक्तिरासीदित्येव रूपाणि

नीतानां यमदूतेन नामभ्रान्तेरुपागतौ ।
श्रद्धत्से संवदन्तीं न परलोककथां कथम् ॥ ९१ ॥
जज्वाल ज्वलनः क्रोधादाचख्यौ चाक्षिपन्नमुम् ।
किमात्थ रे ! किमात्थेदमस्मदग्रे निरर्गलम् ॥ ९२ ॥
महापराक्रिणः श्रौतधर्म्मैकबलजीविनः ।
क्षणाभक्षणमूर्च्छाल ! स्मरन् विस्मयसेऽपि न ॥ ९३ ॥

कथं न प्रत्येषि न विश्वसिषि प्रत्येतव्य एवायमर्थः प्रमाणात्सम्वादादित्यर्थः ॥ ८९ ॥

नीतानामिति । किञ्च यमदूतेन यमकिङ्करेण नाम्ना नामसाम्येन भ्रान्तेरित एव नेतव्या इति भ्रमं नीतानां यमसन्निधिं प्रापितानां वा उपागतौ यूयं निवर्त्तध्वमिति यमाज्ञया सद्यः पुनः स्वदेहसंक्रान्तौ सत्यां सम्वदन्तीं तन्नामकप्रातिवेशिकपुरुषान्तमरणेन प्रत्यभिज्ञायमानार्थां परलोककथां पुनरागतपुरुषोक्तां कायं किन्तु स नेतव्य इति यमाज्ञा जातेति वार्त्तां कथं न श्रद्धत्से न प्रत्येषि श्रद्धयैव सम्वादादित्यर्थः ॥ ९० ॥

जज्वालेति । अथ ज्वलनोऽग्निः क्रोधाज्जज्वाल दिदीपे रे इति तुच्छसम्वोधने अस्मदग्रे निरर्गलं सप्रतिवन्धं किमात्थ किं प्रलपसीत्यर्थः । सम्भ्रमे द्विरुक्तिः इत्याक्षिपन् अमुञ्चार्वाकवन्दितमिति आचख्यौ जगाद ॥ ९१ ॥

अथ यदन्यत्प्रलपितम् अग्निहोत्रं त्रयीत्यादि तं निराचष्टे महापकारिण इति । हे क्षणमभक्षणे अभोजने मूर्च्छाल ! मूर्च्छामापन्न ! म्रियमाणेत्यर्थः । क्षुद्रजन्तूपतापाच्चेति वक्तव्ये लच्प्रत्ययः । श्रौतस्य श्रुतिचोदितस्य धर्म्मस्यैकस्यैव बलेन सामर्थ्येन जीविनः प्राणधारिणः महान्तो ये पराक्रिणो मासोपवासव्रतिनस्तान् स्मरन्नपि न विस्मयसे धर्मोपजीविनो वैदिका नतु दम्भोपजीविन इत्यर्थः ॥ ९२ ॥

पुत्रेष्टिश्येनकारीरीमुखा दृष्टफला मखाः ।
न वः किं धर्म्मसन्देहमन्देहजयभानवः ॥ ९४ ॥
दण्डताण्डवनैः कुर्व्वन् स्फुलिङ्गालिङ्गितं नभः ।
निर्ममेऽथ गिरामूर्म्मीर्भिन्नमर्म्मेव धर्म्मराट् ॥ ९५ ॥
तिष्ठ भोस्तिष्ठ कण्ठोष्ठं कुण्ठयामि हठादयम् ।
अपष्ठु पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥ ९६ ॥

पुत्रेति । हे नास्तिकाः ! पुत्रेष्टिः पुत्रकामेष्टिः श्येनो नाम क्रतुविशेषः कारिरी पुत्रकामेष्टिः सा मुखमादिर्येषां ते तन्मुखा दृष्टफलाः फलसम्पादनान्निश्चितप्रमाणभावादित्यर्थः । अतएव मखाः क्रतवो वो युष्माकं धर्मे अयं सन्देहोऽतएव मन्देहाः सूर्य्येण सहयुध्वानो राक्षसविशेषा स्तेषां जये निरासे भानवः सूर्य्या न किम् ? एकदेशसम्पादैकदेशान्तरेऽपि न सन्दिग्ध मित्यर्थः । सन्देहजये भानव इत्यत्र रक्षांसीह वा पुरोऽनुवाक्यार्थोऽनुसन्धेयः ॥ ९३ ॥

दण्डेति । अथ धर्मराड्यमः भिन्नमर्मा चार्वाकप्रलापैर्विदीर्णमर्मेव स दण्डस्य दण्डयुद्धस्य ताण्डवनैः भ्रमणैर्नभः स्फुलिङ्गालिङ्गितम् अग्निकणाकीर्णं कुर्वन् गिरा मूर्मीः वाक्परम्परा ऊर्मिर्वाक्स्त्रिया मित्यमरः । निर्ममे उवाचेत्यर्थः ॥९४॥

तिष्ठेति । भोः पातकापशद ! तिष्ठ सम्भ्रमे द्विरुक्तिः । अधिगोष्ठि गोष्ठ्यां विभक्त्यर्थे अव्ययीभावः । अपतिष्ठतीत्यपष्ठु प्रतिकूलं प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु चेत्यमरः । अपः दुःसुषु स्थ इति तिष्ठतेः औणादिक उप्रत्यये आतोलोप इटि चेत्याकारलोप उपसर्गात् सुनोति इत्यादिना षत्वं । पाठ्यं पठनीयप्रबन्धं पठतः शठस्य धूर्त्तस्य ते तव कण्ठ ओष्ठौ च कण्ठोष्ठं प्राण्यङ्गत्वात् एकवद्भावः । हठाद्बलात् पार्ष्णिकप्रसभौ हठाविति वैजयन्ती । कुण्ठयामि स्तम्भयामि ॥ ९५ ॥

वेदैस्तद्द्विषिभिस्तद्वत् स्थिरं मतशतैः कृतम् ।
परं कस्ते परं वाचा लोकं लोकायत ! त्यजेत् ॥९७॥
समज्ञानाल्पभूयिष्ठपान्थवैमत्यमेत्य यम् ।
लोके प्रयासि पन्थानं परलोके न तं कुतः ॥ ९८ ॥
स्वकन्यामन्यसात्कर्त्तुं विश्वानुमतिदृश्वनः ।
लोके परत्र लोकस्य कस्य न स्याद्दृढं मनः ॥ ९९ ॥

वेदैरिति । हे लोकायत ! चार्वाक ! वेदैः श्रुतिभिः तद्द्विषिभिर्वेदविरोधिभिर्मतशतैर्बौद्धादिदर्शनशतैश्च स्थिरं कृतं स्थापितं परं लोकं परं केवलं ते तव वाचा कस्त्यजेत् न कोऽपीत्यर्थः । बह्वादृतस्यैव प्रामाणिकत्वादिति भावः ॥ ९६ ॥

समेति । हे नास्तिकाः ! लोके इहलोके समज्ञाना मध्यमज्ञाना अल्पाः किंचिज्ज्ञाः भूयिष्ठा जना अधिकाश्च एषां पान्थाः परलोकपथिकाः आस्तिका इत्यर्थः । तैर्वैमत्यं विरोधमेत्य सर्वसम्मतं मार्गं सन्त्यज्येत्यर्थः । यं पन्थानं कुमार्गं प्रयास्यनुयासि तं पन्थानं परलोकेऽपि कुतो न प्रयासि प्रयास्यन्नेव तत्फलमनुभविष्यसीत्यर्थः । इह प्रच्छन्नपापानां शास्ता वैवस्वतो मतः इति शास्त्रादहमेव नियन्तेति भावः ॥ ९७ ॥

स्वेति । स्वकन्यां स्वदुहितरमन्यसात्कर्त्तुमन्यस्मै दातुमित्यर्थः । देये त्राचेति सातिप्रत्ययः । विश्वानुमतिं दृष्टवानिति तद्दृश्वा तस्य तद्दृश्वनः ब्राह्मे विवाहे आहूय दीयते शक्त्यलङ्कृता । तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् । त्रिख्याङ्क रतिदानानि कन्या पृथ्वी सरस्वती इत्यादि सर्वशास्त्रसम्मतिदर्शकस्य इत्यर्थः ! दृशेः क्वनिप् । कस्य लोकस्य जनस्य मनः परत्र परलोके दृढं न स्यात् स्यादेव न तु तत्प्रलापे चावमित्यर्थः ॥ ९८ ॥

कस्मिन्नपि मते सत्ये हताः सर्व्वमतत्यजः ।
तद्दृष्ट्वा व्यर्थतामात्रमनर्थस्तु न धर्मजः ॥ १०० ॥
क्वापि सर्व्वैरवैमत्यात् पातित्यादन्यथा क्वचित् ।
स्थातव्यं श्रौत एव स्याद्धर्मे शेषेऽपि तत्कृते ॥ १०१ ॥
बभाण वरुणः क्रोधादरुणः करुणोज्झितम् ।
किं न प्रचण्डात् पाषण्डपाश ! पाशाद्बिभेषि नः ॥ १०२ ॥

ननु नास्तिकानामिह तावत् सुखं सिद्धम् आस्तिकानान्तु तन्नास्ति आमुष्मिकन्तु सन्दिग्धं तथा च वृथानुष्ठानक्लेश इति कुतो दार्ढ्यमित्यत्राह कस्मिन्नपीति। आस्तिकमतमध्ये कस्मिंश्चिदपि मते सत्ये प्रमाणे सति सर्वमतत्यजः सर्वास्तिकमतत्याजिनो हताः परलोकभ्रष्टाः स्युः तद्दृष्ट्वा सर्व्वास्तिकमताप्रामाण्येन तु व्यर्थतामात्र मनुष्ठानवैयर्थ्यमेव। धर्मजो धर्मापचारजन्योऽनर्थः परलोकभ्रंशरूपस्तु नास्त्येव एतच्च पाक्षिकत्वमभ्युपेत्योक्तं परमार्थं तु आस्तिकमत मेव ग्राह्यम् इति भावः ॥ ९९ ॥

तत्रापि वैदिकमतमेव ग्राह्यमित्याह क्वापीति। क्वापि कुत्रापि वैदिकमते अवैमत्यात्परलोकं प्रत्यसम्विधानात् अन्यथा करणाच्च पातित्यात्प्रत्यवायात् शेषे अवैदिकाचारेऽपि तत् कृते पातित्या पाताच्च क्वचित् कुत्रापि श्रौत एव धर्मे वैदिकाचारे एव सर्वैः स्थातव्यं स्थितिः स्यात् स एव ग्राह्य इत्यर्थः तयोरेव कृत्यार्थखलर्थाः इति भावे कृत्य स्तव्यप्रत्ययः ॥ १०० ॥

बभाणेति। अथ वरुणः क्रोधादरुणः रक्ताङ्गः सन् करुणोज्झितमुज्झितकरुणं निष्कृपं यथा तथा बभाण तदेवाह याप्यः पाषण्डः पाषण्डपाश ! देवबाह्यापसद ! याप्ये पाशप् ! याप्यः कुत्सितः। हे पाषण्डपाश ! प्रचण्डात् क्रूरान्नोऽस्माकं पाशायुधान्न विभेषि किं? निजपाशेन बध्नाति वरुणः पापकारिण इति किं? न श्रुत मिति भावः ॥ १०१ ॥

मानवाशक्यनिर्म्माणा कूर्म्माद्यङ्कविला शिला ।
न श्रद्धापयते मुग्धा ! स्तिर्थिकाध्वनि वः कथम् ॥ १०३ ॥
शतक्रतूरुजाद्याख्याविख्यातिर्नास्तिकाः ! कथम् ।
श्रुतिवृत्तान्तसम्वादैर्न वश्चमत्चीकरत् ॥ १०४ ॥
तत्तज्जनकृतावेशान् गयाश्राद्धादियाचिनः ।
भूताननुभवन्तोऽपि कथं श्रद्धथ न श्रुतीः ॥ १०५ ॥
नामभ्रमाद्यमं नीतानथ स्वतनुमागतान् ।
सम्वादवादिनो जीवान् वीक्ष्य मा त्यजत श्रुतीः ॥ १०६ ॥

मानवेति । हे मुग्धा ! मूढ़ाः ! मानवानामशक्यनिर्माणा निर्मातुमशक्याः कूर्माद्यङ्कं कूर्मवराहादिचिह्नं यस्य तद्विलं वक्त्रं यस्याः सा शिला शालग्रामशिला वो युष्मान् तिर्ष्टिकाध्वनि श्रोत्रियमार्गे कथं न श्रद्धापयते न विश्वासयति शास्त्रोक्तं लक्षणसम्वादित्वादितिभावः ॥ १०२ ॥

शतेति । हे नास्तिकाः ! शतक्रतूरुजा इति आदिर्यासान्ताः आख्या इन्द्रस्य वैश्यादिवर्णानां समाख्या आदिशब्दात् पुरन्दरि संग्रहः । तासां विख्यातिः प्रसिद्धिः श्रुतिवृत्तान्तसम्वादैः वेदव्यवहारप्रत्यभिज्ञानैः वो युष्मान् कथं न चमत्चीकरत् न व्यसिस्मयत् श्रुतिसम्वादादुपगृहीतव्येऽर्थे कुतो नास्तिवादावकाश इत्यर्थः ॥ १०३ ॥

श्रुतिप्रामाण्यमेव कुत इत्याशङ्क्य द्वाभ्यामुपपादयति तदित्यादि। तेषु तेषु जनेषु कृतावेशान् तन्मुखेन यत्किञ्चिद्याचितुं कृतप्रवेशान् तदाह गयःश्राद्धादियाचिनः पिशाचित्वादिविमोचककर्मयाचकान् भूतान् ब्रह्मराक्षसादिदेवयोनिभेदान् भूतोऽमी देवयोनयः इत्यमरः। अनुभवन्तः प्रत्यक्षेण पश्यन्तोऽपि श्रुत स्तद्विधायकवेदान् कथं न श्रद्धथ नविश्वसिथ ॥ १०४ ॥

नामेति । किञ्च नामभ्रमात् नामसाम्यकृतभ्रान्तेः यमन्नीतान् अथ स्वतनुमागतान् पुनर्यमाज्ञया स्वकार्य्यं प्रविष्टान् सम्वादवादिनो

संरम्भैर्जम्भजैत्रादेः स्तभ्यमानाद्बलाद्बलन् ।
मूर्ध्नि बद्धाञ्जलिर्देवानथैवं कश्चिदूचिवान् ॥ १०७ ॥
नापराधी पराधीनो जनोऽयं नाकनायकाः ! ।
कालस्याहं कलेर्वन्दी तच्चाटु चटुलाननः ॥ १०८ ॥
इति तस्मिन् वदत्येव देवाः स्यन्दनमन्दिरम् ।
कलिमाकलयाञ्चक्रुर्द्वापरञ्चापरं पुरः ॥ १०९ ॥
सन्ददर्शोन्नमद्ग्रीवः श्रीवङ्कत्वक्षताद्भुतान् ।
तत्तत्पापपरीतस्तान्नाकीयान्नारकीव सः ॥ ११० ॥

वेदसम्वादियमलोकवृत्तान्तकथकान् जीवान्मर्त्यान् वीक्ष्य श्रुतीर्वेदान् मा त्यजत एकत्र प्रामाण्यदर्शनादत्राप्यश्रद्धा न कार्य्येत्यर्थः ॥ १०५ ॥

संरम्भैरिति । जम्भजैत्रादेरिन्द्रादिवर्गस्य संरम्भैः कोपैः संरम्भः सम्भ्रमे कोप इति विश्वः । स्तभ्यमानात्प्रतिबध्यमानाद्बलात्सैन्याद्बलं निर्गच्छन् कश्चित्प्रकृतो धूर्त्तः वन्दिमूर्ध्नि बद्धाञ्जलिः सन् देवान्नत्वा नमस्कृत्य एवं वक्ष्यमाणमूचिवानुक्तवान् ध्रुवः कश्चः ॥ १०६ ॥

यदूचिवांस्तदाह । हे नाकनायका देवाः ! पराधीनो नापराधी अहं कलेः कालस्य कलियुगादिदेवस्य तच्चाटुभि स्तत्प्रियवादैः चटुलाननः चपलमुखः स्वामिचित्तानुकूल्य वन्दी न क्षन्तव्य इति भावः ॥ १०७ ॥

इतीति । इति इत्थं तस्मिन् वन्दिनि वदति जल्पत्येव सति देवा इन्द्रादयः स्यन्दनमन्दिरं रथस्थं कलिम् अपरं ततोऽन्यं द्वापरं द्वापरयुगादिदेवञ्च पुरोऽग्रे आकालयाञ्चक्रुः ददृशुः ॥ १०८ ॥

सन्ददर्शेति । तैस्तैः पापैः ब्रह्महत्यादिभिः परीतः परिवेष्टितः स कलिः श्रीवङ्कत्वेन कान्तिभूम्ना क्षताद्भुतान् जनितविस्मयान् तानिन्द्रादीन् नरकोऽस्यास्तीति नारकी नरकस्थः स्यान्नारकस्तु नरकः इत्यमरः । नारकी तान् स्वर्गस्थान् उन्नमद्ग्रीवः उत्कन्धरः सन् सन्ददर्श ॥ १०९ ॥

गुरुव्रीड़ावलीढः प्रागभून्नमितमस्तकः।
स त्रिशङ्कुरिवाक्रान्तस्तेजसैव बिडौजसः॥ १११॥
विमुखान् द्रष्टुमप्येनं जनङ्गम इव द्विजान्।
एष मत्तः सहेलन्तानुपेत्य समभाषत॥ ११२॥
स्वस्ति वास्तोष्पते! तुभ्यं शिखिन्नस्ति न खिन्नता।
सखे! काल सुखेनासि पाशहस्त! मुदस्तव॥ ११३॥
स्वयम्बरमहे भैमीवरणाय त्वरामहे।
तदस्माननुमन्यध्वमध्वने तत्र धाविने॥ ११४॥

गुर्व्विति। प्राक्प्रथमं गुर्व्या व्रीड़या अवलीढो ग्रस्तः व्रीड़ावमाननावज्ञा इत्यमरः। अथ त्रिशङ्कुः वशिष्ठशापदग्धवंश्यो राजा इव विड़ौजस इन्द्रस्य तेजसैव आक्रान्तोऽभिभूतः स कलिः नमितमस्तकोऽभूत्॥ ११०॥

विमुखानिति। जनान् गच्छति जनङ्गम श्चण्डालः चण्डाल प्लव मातङ्ग दिवाकीर्त्तिजनङ्गमाः इत्यमरः। गमश्चेति संज्ञायां खच्प्रत्यय इति क्षीरस्वामी। तं द्रष्टुमपि विमुखान् द्विजानिव एनं कलि मपि विमुखान् किमुत सम्भाषण मितिभावः। तानिन्द्रादीन्मत्तो मदान्धः कलिः सहेलं सावज्ञ मुपेत्य हेलावज्ञा विलासयोः विश्वः। समभाषत सम्भाषितवान्॥ १११॥

स्वस्तीति। वास्तोष्पते! भुवःपते! अधिष्ठातः! वास्तोष्पते इन्द्र वास्तोष्पति गृहमेधाच्छः चेत्यस्मादेव निपातनादलुकि षत्वं। तुभ्यं स्वस्ति क्षेमं स्वस्त्याशीः क्षेम पुण्यादौ इत्यमरः। नमः स्वस्तीत्यादिना चतुर्थी। शिखिन्नग्ने! खिन्नता खेदोन सखे! काल यम! सुखेनापि वर्त्तसे पाशहस्त! वरुण! तव मुदो मोदाः सर्वत्र काकुरनुसन्धेया॥ ११२॥

स्वयमिति। हे देवाः! स्वयम्बरएव महे उत्सवे भैमीवरणाय त्वरामहे तत्तस्मादस्मान् तत्र धाविने स्वयम्बरगामिने अध्वगमनायेत्यर्थः। अनुमन्यध्वम् अनुजानीध्वम्॥ ११३॥

तेऽवज्ञाय तमस्योच्चैरहङ्कारमकारणम् ।
ऊचिरेऽतिचिरेणैनं स्मित्वा दृष्टमुखा मिथः ॥ ११५ ॥
पुनर्वक्ष्यसि मामैवं कथमुद्वक्ष्यसे नु सः ।
दृष्टवान् परमेष्ठी यं नैष्ठिकब्रह्मचारिणम् ॥ ११६ ॥
द्रौहिणं द्रुहिणो वेत्तु त्वामाकर्ण्यावकीर्णिनम् ।
त्वज्जनैरपि वा धातुः सेतुर्लङ्घ्यस्त्वया न किम् ॥ ११७ ॥

त इति । ते देवाः अस्य कलेस्तं पूर्वोक्त मुच्चैरुत्कट मकारण महेतुक महङ्कारं गर्वमवज्ञाया विगणय्य अतएवातिचिरेण अविलम्बेन मिथोदृष्टमुखाः परस्परमुखावलोकिनः सन्तः स्मित्वा ईषद्धसित्वा एनं कलिं ऊचिरे ऊचुः ॥ ११४ ॥

पुनरिति । हे कले ! पुनरेनं मा मा वक्ष्यसि सम्भ्रमे द्विरुक्तिः । नैवं वक्तव्यं यतो न सहिष्यामह इत्यर्थः । अनक्लृप्त्यमर्षयोः किं वृत्त्येऽपीत्यमर्षार्थे वचेर्लृट् । स त्वं कथं नोद्वक्ष्यसे परिणेष्यसि वहेर्लृट् । कुतः यत्त्वां परमे तिष्ठतीति परमेष्ठी पितामहः परमे स्थः किच्चेति निराकरणमिति वक्तव्यात् षत्वं । नैष्ठिकब्रह्मचारिणं यावज्जीवब्रह्मचारिणं दृष्टवान् स चालङ्घ्यातन इति भावः ॥ ११५ ॥

द्रौहिणमिति । अथवा त्वज्जनैस्त्वद्भृत्यैः कामक्रोधादिभिरपि ब्राह्मणः सेतुर्मर्यादानियोग इति यावत् लङ्घ्यो लङ्घयितुं शक्यः शकि लिङ्चेति चकाराच्छक्यार्थे क्यप्रत्ययः । त्वया तत् स्वामिना द्रुहिण किं न लङ्घ्याः ? लङ्घ्या वेत्यर्थः । किन्तु अवकीर्णं स्खलितमनेनेत्यवकीर्णी क्षतव्रतः इष्टादिभ्यश्चेति इनप्रत्ययः । य मवकीर्णिनं अतएव द्रौहिणम् अज्ञालङ्घनापराधीनं त्वामाकर्ण्य द्रुहिणो ब्रह्मैव वेत्तु जानातु यत्कर्त्तव्यं यदित्यर्थः । किं तया अस्माक मित्यर्थः ॥ ११६ ॥

अतीति । किन्तु त्रैलोक्ये यूनां गर्वनुत् गर्वहन्ता स वृत्तान्तः स्वय-

अतिवृत्तः स वृत्तान्तस्त्रैलोक्ययुवगर्वनुत् ।
आगच्छतामुपादानं स स्वयम्वर एव नः ॥ ११८ ॥
नागेषु सानुरागेषु पश्यत्सु दिविषत्सु च ।
भूमिपालं नलं भैमी वरं साववरद्वरम् ॥ ११९ ॥
भुजगेशानसद्वेषान् वानरानितरान् नरान् ।
अमरान् पामरान् भैमी नलं वेद गुणोज्ज्वलम् ॥ १२० ॥
इति श्रुत्वा स रोषान्धः परमश्चरमं युगम् ।
जगन्नाशनिशारुद्रमुद्रस्तानुक्तवानदः ॥ १२१ ॥

म्वर प्रसङ्गो अतिवृत्तो अतीतः कुत आगच्छतां नोऽस्माकं स्वयम्वरएव मुपादान मवस्थानं तत एवागच्छाम इत्यर्थः ॥ ११७ ॥

नागेष्विति। नागेषु नागकुमारेषु च सानुरागेषु अनुरागयुक्तेषु पश्यत्सु सत्सु षष्ठी चानादर इति चकारात् अनादरे सप्तमी। भैमी-भूमिपालं नलं वरं नलमेव वरं वोढ़ारं अववरत् वृणोतिस्म वरयते श्चौरादिकाद्वीप्सायान्तदन्ताल्लङ् अग्लोपत्वेनासन्वद्भावादित्वदीर्घयोर भावः ॥ ११८ ॥

भुजगेति। भैमी भुजगेशान् सद्दानःगानसद्वेषाननाचारवेषानितरान्नलादन्यान् नरेन्द्रान् वानरानमरानिन्द्रादीन् पामरान्नीचान् विवर्णः पामरोनीचः इत्यमरः। वेद वेत्ति विदोलटो वेति णलादेशः नलमेव गुणोज्ज्वलं गुणाढ्यं वेद ॥ ११९ ॥

इतीति। इतीदं श्रुत्वा अतएव रोषेण अन्धः परमः ज्ञानपरवशः चरमं युगं चतुर्युगमपि स कलिः जगन्नाशनिशा कालरात्रिः तत्र रुद्रः कालान्तकः तस्य मुद्रेव मुद्रा प्रकारो यस्य सः तादृशः सन् तानिन्द्रादी नदो वक्ष्यमाणं वाक्यमुक्तवान् ॥ १२० ॥

कयापि क्रीड़तु ब्रह्मा दिव्याः स्त्रीर्दीव्यत स्वयम्।
कलिस्तु चरतु ब्रह्म प्रैतु चातिप्रियाय वः॥ १२२॥
चर्य्यैव कतमेयं वः परस्मै धर्मदेशिनाम्।
स्वयं तत् कुर्वतां सर्वं श्रोतुं यद्बिभितः श्रुती॥ १२३॥
तत्र स्वयम्वरेऽलम्भि भुवः श्रीर्नैषधेन सा।
जगती ह्रीश्च युष्माभिर्लाभस्तुल्याभ एव वः॥ १२४॥

यदुक्तं पुनर्वक्ष्यसीत्यादिना श्लोकद्वयेन तत्रोत्तरं सोल्लुण्ठमाह कयापीत्यादिना श्लोकद्वयेन। हे देवाः! ब्रह्मा कयापि अगम्योऽपीति भावः। प्रजापतिर्वैं स्वान् दुहितरमभ्यगादिति श्रुतेः। क्रीडतु अमृतान् स्वयं यूयञ्च दिव्याः स्त्रीर्दिव्याभिर्वेश्यादिभिरपीति भावः कर्मचेति करणस्य कर्मत्वं। दिव्यत क्रीडत कलिस्तु वो युष्माकम् अतिप्रियाय अत्यन्तप्रियार्थं ब्रह्म चरतु नैष्ठिकं तिष्ठतु प्रैतु म्रियतु म्रियताञ्च॥ १२१॥

ततः किं तत्राह चर्य्यैवेति। परस्मै धर्मदेशिनां स्वयं तु यत्कर्म श्रुती कर्णौ श्रोतुं बिभितः भीयोह्रोऽन्यतरस्यामिति विकल्पादिकारः। सर्वं तत् पारदार्यादिकं कुर्वता अहल्यायै जारेतिश्रुतेः। वो युष्माकं चर्या कतमा कीदृशी अवाच्येत्यर्थः। स्वयमनाचरिणां परोपदेशवचनमविश्वसनीयमिति भावः॥ १२२॥

यदुक्तमिति सवृत्तान्त इत्यादिना श्लोकत्रयेण तत्रोत्तरं प्रपञ्चेनाह तत्रेत्याभिः षोडशभिः। हे देवाः! तत्र स्वयम्बरे भूपश्रीः भूलोकलक्ष्मीः सा भैमी नैषधेन नलेन अलम्भि लब्धा लभेर्यन्तात्कर्मणि लुङि विभाषा चिण्णमुलोः विकल्पान्नुमागमः। युष्माभिस्तु जगतः स्वर्लोकस्य ह्रीः अलम्भि स्वर्लोकलज्जाकरमिदमवमानमिति भावः। एवं लाभो युष्माकं नलस्य च त्यदाद्येकशेषः। तुल्याभः समानस्फूर्त्तिरेकरूप एव लब्धं एवं भिन्नमिति भावः॥ १२३॥

दूरादिति। हे देवाः! दूरान्नोऽस्मान् प्रेक्ष्य युष्माकमियं यौष्माकी

दूरान्नः प्रेक्ष्य यौष्माकी युक्तेयं वक्त्रवक्रणा ।
लज्जयैवासमर्थानां मुखमास्माकमीक्षितुम् ॥ १२५ ॥
स्थितं भवद्भिः पश्यद्भिः कथं भो ! स्तदसाम्प्रतम् ।
निर्दग्धा दुर्विदग्धा किं सा दृशा न ज्वलत्क्रुधा ॥ १२५ ॥
महावंशाननादृत्य महान्तमभिलाषुका ।
स्वीचकार कथं कारमहो सा तरलं नलम् ॥ १२६ ॥
भवादृशैर्दिशामीशैर्लङ्घ्यमाणां स्वगेहनाम् ।
स्वीकुर्वाणः कथं सोढः क्षतव्रीडस्तृणां नलः ॥ १२७ ॥

युष्मदस्मदोरन्यतरस्याम् इत्यण्प्रत्यये तस्मिन्नणि चेत्यादिना युष्माकादेशे टिड्ढाणञित्यादिना ङीप् । इयं वक्त्राणां वक्रणा वक्रीकरणं तिर्यङ्मुखत्वं तत्करोतीति ण्यन्ताद्युच् । लज्जयैव स्वापराधित्वादिति भावः । अस्माकमिदमास्माकं यौष्माकीवत् प्रक्रिया मुखमीक्षितुमसमर्थानां सतां युक्ता ॥ १२४ ॥

स्थितमिति । भो देवाः ! कथं भवद्भिः स्थितमुदासितं भावे क्तः । तदौदासीन्यमसाम्प्रतमयुक्तं किं तर्हि तदकार्य्यं तदाह । दुर्विदग्धा दुर्विनीता सा भैमी ज्वलत्क्रुधा दीप्यमानकोपया दृशा किं न निर्दग्धा दग्धैवेत्यर्थः ॥ १२५ ॥

दाह्यत्वे हेतुमाह महेति । महान्तम् उत्कृष्टपुरुषमभिलाषुका कामयमाना लषपतेत्यादिना उकञ् प्रत्ययः न लोकेत्यादिना षष्ठी प्रतिषेधः । सा भैमी महावंशानुत्कृष्टकुलान्महतो वेणूंश्च वंशो वेणौ कुले वर्गे इति विश्वः । अनादृत्यावधीर्य तरलं चपलं नलं राजानं तृणविशेषञ्च नलः पोटगले राज्ञि इति विश्वः । कथङ्कारं कथमित्यर्थः अन्यथैव कथमित्यादिना णमुल्प्रत्ययः । स्वीचकार वव्रे अहो ! इत्याश्चर्य्येण नदीवेगे सति वेणौ तृणावलम्बनवदपहास्यमिदं चेष्टितमिति भावः ॥ १२६ ॥

भवादृशैरिति । भवादृशै र्भवद्विधै र्दिशामीशैर्दिक्पालै र्लङ्घ्यमाणा

दारुणः कूटमाश्रित्य शिखी साक्षी भवन्नपि ।
नावहत् किं तदुद्वाहे कूटसाक्षिक्रियामयम् ॥ १२८ ॥
अहो महःसहायानां सम्भूता भवतामपि ।
क्षमैवास्मै कलङ्काय देवस्यैवास्ततद्युतेः ॥ १२९ ॥
सा वव्रे यं तमुत्सृज्य मह्यमीर्ष्याजुषः स्थ किम् ।
ब्रूतागःसद्मनस्तस्माच्छद्मनाद्याच्छिनद्मि ताम् ॥ १३० ॥

सन्निध्यमाणां स्वेच्छया भैमीं स्वीकुर्वाणो गृह्णत एव कृतव्रीडो भवतां कृतावज्ञः व्रीड़ावक्राननावज्ञेत्यमरः । तृणं तृणकल्पो नलः कथं सोढः क्षान्तः महद्भिः हि परिभवो न सोढव्य मित्यर्थः ॥ १२७ ॥

दारुण इति । अयं शिखी शिखावानग्निः दारुणः काष्ठस्य कूटं राशिं आश्रित्य साक्षित्वादिति भावः । अन्यत्र दारुणः क्रूरकर्मा सर्वदाहकत्वादिति भावः । अतएव कूटं कपटं आश्रित्य साक्षी भवन्नपि कपटसाक्षिशीलोऽपि सन्निति च गम्यते । तदुद्वाहे तयो र्दमयन्तीनलयो र्विवाहे कूटसाक्षिणः क्रियां अनृतवदनव्यापारं किं नावहत् तदानग्निसाक्षिकोऽयं न सिद्ध्येदिति भावः ॥ १२८ ॥

अहो इति । अहो देवाः ! महःसहायानां तेजस्विनां भवतामस्ततद्युते र्देवस्येन्दोरिव क्षमा क्षान्तिरेव । अन्यत्र क्षितिरेवास्मै स्त्रीपरिभवरूपाय कलङ्काय अपवादाय सम्भूता सञ्जाता क्षतान् स्त्रियोऽपि नगणयन्तीति भावः । क्षितिक्षान्त्योः क्षमा कलङ्कोऽङ्कापवादयोरिति चामरः । चन्द्रेश्यामिका भूच्छायेवेति केचित् ॥ १२९ ॥

सेति । हे देवाः ! सा भैमी नलं वव्रे तम् उत्सृज्य अपराधिनं तं विहाय किं किमर्थं मह्यं मां प्रति क्रुधद्रुहेत्यादिना सम्प्रदानत्वाच्चतुर्थी । ईर्ष्याजुषः स्थ कोपभाजः स्थ ब्रूत अस्तु वा अहमेव आगः सद्मनो अपराधाकरात्तस्मान्नलात् अद्यैव तां भैमीं छद्मना कपटेन आच्छिनद्मि आहरामि सामीप्ये वर्त्तमाननिर्देशः ॥ १३० ॥

यतध्वं सहकर्त्तुं मां पाञ्चाली पाण्डवैरिव।
सापि पञ्चभिरस्माभिः संविभज्यैव भुज्यताम्॥ १३१॥
अथापरिवृढा सोढुं मूर्खतां मुखरस्य ताम्।
चक्रे गिरा शराघातं भारती सारतीव्रया॥ १३२॥
कीर्त्तिं भैमीं वरांश्चास्मै दातुमेवागमन्नमी।
न लीढे धीरवैदग्धीं धीरगम्भीरगाहिनी॥ १३३॥
वाग्मिनीं जडजिह्वस्तां प्रतिवक्तुमशक्तिमान्।
लीलावहेलितां कृत्वा देवानेवावदत् कलिः॥ १३४॥

ततः किमस्माकमत आह यतध्वमिति। पाञ्चाली द्रौपदी पाण्डवैरिव सा भैमी चास्माभिर्मया युष्माभिश्चतुर्भिश्च त्यदाद्येकशेषः। पञ्चभिः संविभज्य भुज्यतां किन्तु मां सह कर्तुं सहायीभवितुं यतध्वम् अतो मामनुसन्यध्वं इति भावः। अत्रानागतत्वं तु प्रवाहनित्यत्वाद्वा कृतयुगे द्वापरपुरुषोपमा॥ १३१॥

अथेति। अथ कलिप्रलापानन्तरं भारती सरस्वती मुखरस्य प्रलपतः कलेस्तां तादृशीं मूर्खतां मूढतां सोढुमपरिवृढा असमर्था सती प्रभौ परिवृढ इति निपातनात् साधुः। सारेण अभिनिवेशेन तीव्रया तीक्ष्णया गिरा वाचैव शराघातं शरप्रहारं चक्रे वाक्सायकेन जघान इत्यर्थः॥
॥ १३२॥

कीर्त्तिमिति। हे शठ! अमी देवाः अस्मै नलाय कीर्त्तिं पुण्यश्लोकतां भैमीं वरं ईप्सितं च दातुमेवागमन्नागताः न तु स्वयन्तां परिग्रहीतुमरिपेतुं गमेर्लुङि इदित्वात् च्लेरङादेशः। तथा हि अगम्भीरावगाहिनी अस्वच्छग्राहिणी धीस्त्वादृशां बुद्धिधीराणां मनीषिणां वैदग्धी मभिप्रायं न लीढे नास्वादयति न वेत्तीति व्याख्याता वैदग्धी॥ १३३॥

वाग्मिनीमिति। जडजिह्वोऽप्रगल्भवाक्कलिः वाग्मिनीं प्रगल्भवा-

प्रौञ्छि वाञ्छितमस्माभिरपि तां प्रति सम्प्रति ।
तस्मिन्नले न लेशोऽपि कारुण्यस्यास्ति नः पुनः ॥ १३५ ॥
वृत्ते कर्मणि कुर्मः किं तदा नाभूम तत्र यत् ।
कालोचितमिदानीं नः शृणुतालोचितं सुराः । ॥ १३६ ॥
प्रतिज्ञेयं नले विज्ञाः ! कलेर्विज्ञायतां मम ।
तेन भैमीञ्च भूमिञ्च त्याजयामि जयामि तम् ॥ १३७ ॥
नैषधेन विरोधं मे चण्डतामण्डितौजसः ।
जगन्ति हन्त गायन्तु रवेः कैरववैरवत् ॥ १३८ ॥

चन्तां भारतीं प्रतिवक्तु मनीश्वरः असक्तः सन् लीलाविशेषेण अवहेलितामवधीरितां कृत्वा अगणयन्निवेत्यर्थः देवानेवावदत् ॥ १३४ ॥

प्रौञ्छीति । सम्प्रत्यस्माभिरपि तां भैमीं प्रति वाञ्छितमिच्छां प्रौञ्छि प्रोञ्छितं उञ्छतेः कर्मणि लुङ् । किन्तु सम्प्रति तस्मिन्नले नोऽस्माकं कारुण्यस्य लेशोऽपि नास्ति ॥ १३५ ॥

अकरुणास्तं हतार्थं किं करिष्यतीत्याशङ्क्याह वृत्त इति । हे सुरा ! देवा ! वृत्ते गते कर्मणि भैमीवरणकर्मणि किं कुर्मः न किञ्चिदित्यर्थः । यद्यस्मात् तदा तत्काले तत्र स्वयम्बरे नाभूम नास्मेत्यर्थः । किन्तु कालोचितमेतत् कालोचितं इदानीम् अस्मिन् काले नोऽस्माकमालोचितं पुनः भावे क्तः । शृणुत ॥ १३६ ॥

प्रतिज्ञेति । हे विज्ञा ! नले विषये कलेर्ममेयं प्रतिज्ञा विज्ञायता मवधार्यतां तामेवाह तेन नलेन प्रयोज्येन भैमीञ्च भूमीञ्च राज्यञ्च त्याजयामि अतएव तं नलं जयामि उभयत्र सामीप्ये वर्त्तमानप्रत्ययः ॥१३७॥

नैषधेनेति । चण्डतामण्डितौजसः क्रौर्य्योपस्कृततेजसो मे कले नैषधेन नलेन सह विरोधं रवेः कैरेवैः कुमुदै वैरवत्तत्तुल्यं जगन्तिलोकाः गायन्तु हन्तेति हर्षे ॥ १३८ ॥

द्वापरः साधुकारेण तद्विकारमदीदिपत्।
प्रणीय श्रवणे पाणिमवोचन्नमुचे रिपुः॥ १३९॥
विस्मेयमतिरस्मासु साधु वैलक्ष्यमीक्षसे।
यद्दत्तेऽल्पमनल्पाय तद्दत्ते ह्रियमात्मने॥ १४०॥
फलसीमां चतुर्वर्गं यच्छतांशोऽपि यच्छति।
नलस्यास्मदुपघ्ना सा भक्तिर्भूतावकेशिनी॥ १४१॥

द्वापर इति। द्वापरः कलेः सहचारियुगविशेषः साधुकारेण साध्वित्यनुकरणेन तस्य कलेर्विकारं प्रलापमदीदिपत् अवीवृधत् दीप्यतेर्णौ चङि भ्राजभासभाषदीपजीवेत्यादिना विकल्पादुपधा ह्रस्वः दीर्घो लघोरित्याभ्यासदीर्घः। अथ नमुचे रिपुरिन्द्रः श्रवणे कर्णौ पाणिं प्रणीय निधाय कर्णौ पिधायेत्यर्थः अवोचत्॥ १३९॥

विस्मयेति। हे कले! विस्मेयमतिर्विस्मयनीयबुद्धिस्त्वं अस्मासु वैलक्ष्यं ह्रीणतामीक्षसे पश्यसि साधु जगतो ह्रीस्तु युष्माभिरिति यदुक्तं तत्साधूक्तमित्यर्थः। कुतः अनल्पाय महार्हाय यद्दत्ते तदल्पदत्तमात्मने दात्रे ह्रियं दत्ते अधिकदानार्हाय अल्पदानं दातुरेव ह्रीकरमित्यर्थः॥ १४०॥

ततः किमत आह फलेति। यच्छतांशो यस्याः भक्तेः शततमांशोऽपि संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वं त्रिभागवत्। फलसीमां फलावधिं चतुर्वर्गं पुरुषार्थचतुष्टयं यच्छति ददाति पाघ्रादिना यच्छादेशः। वयमुपघ्न आश्रयो यस्याः सा अस्मदुपघ्ना उपघ्न आश्रय इति निपातः। सा नलस्य भक्तिरवकं शून्यमिष्ट इत्यवकेशिनी निष्फला ताच्छील्ये निः ऋन्नेभ्यो ङीप्। वन्ध्योऽफलोऽवकेशी चेत्यमरः। भूता तद्भक्तिश्चतुर्वर्गदानमपि न फलं न पर्याप्तं किं पुनर्भैमीदानमिति ऋणीनामस्माकं युक्तैव ह्रीरिति भावः॥ ४१॥

भव्यो न व्यवसायस्ते नले साधुमतौ कले ! ।
लोकपालविशालोऽसौ निषधानां सुधाकरः ॥ १४२ ॥
न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाभृति ।
निश्चिताखिलधर्मे च द्वापरस्योदयं वयम् ॥ १४३ ॥
सा विनीततमा भैमी व्यर्थानर्थग्रहैरहो ।
कथं भवद्विधैर्बाध्या प्रमितिर्विभ्रमैरिव ॥ १४४ ॥
तन्नासत्ययुगं तां वा त्रेता स्पर्द्धितुमर्हति ।
एकप्रकाशधर्माणां न कलिद्वापरौ ! युवाम् ॥ १४५ ॥

नेति। हे कले ! साधुमतौ सद्बुद्धौ नले ते तव व्यवसाय उद्योगो भव्यः स्वन्तो न कुतः निषधानां सुधाकरो असौ नलः लोकपालविशालः अतस्तदपकारो न श्रेयस्कर इति भावः ॥ १४२ ॥

नेति। किञ्च क्षमाभृति क्षान्तिभृति अतएव तस्मिन् नले कलिपुरुषस्य कलहस्य चावकाशं वयं न पश्यामः धर्मेण भूमीं पालयतः क्षान्तस्य कुतः कलिदोषः कलहो वेति भावः। किन्तु निश्चिता अखिलधर्मा येन तस्मिन् नले द्वापरस्य तृतीययुगस्य सन्देहस्य चावकाशं न पश्यामः द्वापरौ युगसंशयौ इत्यमरयादवौ। धर्मसाकल्यनिश्चयज्ञानयोस्तद्विरोधित्वादिति भावः ॥ १४३ ॥

सेति। किञ्च विनीततमा अतिसाध्वी सा भैमी व्यर्थो निष्प्रयोजनोऽनर्थग्रहोऽकार्याभिनिवेशो येषान्तैर्भवद्विधैः युष्मादृशैः प्रमितिः सम्यगनुभूतिः विभ्रमैर्मिथ्याज्ञानैः इव कथं बाध्या बाधितुं शक्या न शक्येत्यर्थः। पातिव्रत्यतेजसो दुर्धर्षत्वादिति भावः। अतएवाहो इत्याश्चर्याविष्कारः ॥ १४४ ॥

तदिति। हे कलिद्वापरौ ! युगविशेषौ ! प्रकाशधर्मा प्रकाशपुण्यस्तेजः स्वभावश्च धर्मादनिच्केवलादन्। धर्माः पुण्ययमन्याय स्वभावाचार सोमपाः इत्यमरः। एकः केवलसङ्काशः प्रकाशधर्मा तमेकप्रकाश

करिष्येऽवश्यमित्युक्त्वा करिष्यन्नपि दुष्यसि ।
दृष्टादृष्टा हि नायत्ताः कार्य्यीया हेतवस्तव ॥ १४५ ॥
द्रोहं मोहेन यस्तस्मिन्नाचरेदचिरेण सः ।
तत् पापसम्भवन्तापमाप्नुयादनयात्ततः ॥ १४६ ॥
युगशेष ! तव द्वेषस्तस्मिन्नेष न साम्प्रतम् ।
भविता न हितायैतद्वैरं ते वैरसेनिना ॥ १४७ ॥
तत्र यामीत्यसज्ज्ञानं राजसं सदिहास्यताम् ।
इति तत्र गतो मा गाः राजसंसदि हास्यताम् ॥ १४८ ॥

धर्माणम् एतत् स्त्रियामपि योज्यं । ईदृशं तं नलं तां दमयन्तीं वा अस्य युगं कृतयुगापेक्षया अधर्मयुगं त्रेता युगविशेषः अग्नित्रयञ्च त्रेताग्नित्रितये युगः इत्यमरः । स्पर्धितुं नार्हति नासत्ययोर्युगमश्विनोर्द्वयञ्च तं नलं स्पर्धितुं नार्हति सौन्दर्य्येणेति च गम्यते ॥ १४५ ॥

करिष्य इति । हे कले ! अवश्यं करिष्ये इत्युक्त्वा सर्वथा पापं करिष्यामीति प्रतिज्ञाय करिष्यन्नपि करिष्यमाणावस्थोऽपि दुष्यसि दुष्टोऽसि किमुत कृत्वेति भावः । तथा हि कार्य्यस्येमे कार्य्यीयाः दृष्टाच्छः । दृष्टादृष्टहेतवो दृष्टादृष्टकारणानि तवायत्ता अधीनाः न किन्तु बलादपि कार्य्यमुत्पादयन्ति तस्माद्दुर्वारस्ते दोषभावः ॥१४६॥

द्रोहमिति । किञ्च यो मोहेन तस्मिन्नले विषये द्रोहमपकारमाचरेत् सोऽचिरेण तत्तस्मादनयाद्दुर्नयाद्धेतोस्तत्पापसम्भवं ततः द्रोहजन्यं पापं तीव्रयातनामाप्नुयात् ॥ १४७ ॥

युगेति । हे युगशेष ! युगाधम ! कले ! तव तस्मिन्नले एष द्वेषो न साम्प्रतं न युक्तं वैरसेनिना नलेन सह एतद्वैरं ते तव हिताय न भविता न भविष्यतीति ॥ १४८ ॥

तत्रेति । हे कले ! तत्र स्वयम्वरे यामि यास्यामीति सामीप्ये वर्त्तमानप्रत्ययः । उत्पद्यमानं राजसं रजःप्रयुक्तमसत् ज्ञानं दुर्बुद्धिरिहे-

अपरेऽपि दिशामीशा वाचमेनां शचीपतिः ।
अन्वमन्यन्त किन्त्वेनां नादत्त युगयोर्युगम् ॥ १५१ ॥
कलिं प्रति कलिं देवा देवान् प्रत्येकशः कलिः ।
सोपहासं समैर्वर्णैरित्थं व्यरचयन्मिथः ॥ १५२ ॥
तवाऽगमनमेवार्हं वैरसेनौ तया वृते ।
उद्वेगेन विमानेन किमनेनापि धावता ॥ १५३ ॥
पुरा यासि वरीतुं यामग्र एव तया वृते ।
अन्यस्मिन् भवतो हास्यं वृत्तमेतत्त्रपाकरम् ॥ १५४ ॥

दानीम् अस्यतां निरस्यताम् अस्यतेः कर्मणि लोट् । इति इत्थं रागात् तत्र गतः सन् राजसंसदि राजसभायां हास्यता मुपहास्यतां मागाः ॥ १४९ ॥

अपर इति । दीशामीशाः अग्न्यादयोऽपि एतां शचीपतेर्वाचमन्वमन्यन्त तेऽपि तथैवोचुः किं त्वेनां वाचं युगयोः कलिद्वापरयोर्युगं युग्मं कर्त्तुं नाददे न स्वीचकार ॥ १५० ॥

कलिमिति । देवाः कलिं प्रति कलिश्च देवान् प्रति एकशः प्रत्येकं वीप्सायां शस् । सोपहासं समैर्वर्णैरुभयसाधारणशब्दै रित्थं वक्ष्यमाणभङ्ग्या मिथः कलिं कलहं व्यरचन् ॥ १५१ ॥

कलहप्रकार मेवाह तवेति । हे मूर्ख ! तया भैम्या वैरसेनौ नले वृते सति तत्र स्वयम्वरे अगमन मप्रयाण मेवार्हम् अतएव उद्वेगेन धावता अनेन विनानेन व्योमयानेन किम् ? अन्यत्र हे देवाः ! तत्र स्वयम्वरे तया नले वृते सति आगमनं ततः प्रत्याहरणम् अर्हं गमेर्ण्यन्ता ल्युँट् तवानेन अपिधा अपिधानम् आतश्चोपसर्गे इण्प्रत्ययः । तद्वता निगूहितेन विमानेन मानोद्वेगेन वृथा व्यर्थमनेन किम् ? अत्र द्वयोः अव्यर्थयोः प्रकृतत्वात्केवलप्रकृतश्लेषः ॥ १५२ ॥

पुरेति । यां भैमीं वरीतुं पुरा यासि यास्यसि यावत्पुरानिपात-

पत्यौ तया वृतेऽन्यस्मिन् यदर्थं गतवानसि।
भवतः कोपरोधस्तादक्षमस्य वृथारुषः ॥ १५५ ॥
यासि स्मरं जयन् कान्त्या योजनौघं महार्वता।
समूढस्त्वं वृतेऽन्यस्मिन् किन्न ह्रीस्तेऽत्र पामर! ॥ १५६ ॥

योर्लट्। तया अग्र एव प्रागेव अन्यस्मिन् वृते सति त्रपाया आकरम् आकरायितम् एतद्भवतः आस्यं मुखं हा शोचामः इत्यर्थः। हा विषादादिष्वित्यमरः। अभितः परितः इत्यादिना हाशब्द योगे द्वितीया ॥ १५३ ॥

पुनः पूर्ववत् श्लोकद्वयेन मिथः कलहमाह। हे कले! यस्यै यदर्थं गतवानसि तया भैम्या अन्यस्मिन् पत्यौ वृते सति अक्षमस्य कार्य्याशक्तस्य अतएव वृथारुषो निष्फलकोपस्य भवतः कोपरोध स्तात् कोपस्य निरोधो अस्तु अस्तेर्लोटि तातङादेशः। अन्यत्र तु हे शक्र! अक्षमस्य भवतस्तव अधस्तात् अधरः कोऽपरः कोऽन्यः त्वत्तोऽधमः कश्चिन्नास्ति इत्यर्थः। समानमन्यत् दिक्शब्देभ्यः सप्तमी इत्यादिना अधर शब्दात् प्रघनार्थे अस्ताति प्रत्ययः अस्तीति चेत्युदादेशः षष्ठ्यतसर्थप्रत्यये नेति तद्योगषष्ठी ॥ १५४ ॥

यासीति। हे पामर! नीच! कले! विवर्णः पामरी नीच इत्यमरः। त्वं महार्वता महाश्वेन विमानेन समूढः सम्यक् जड़ः सन् कान्त्या सौन्दर्य्येण स्मरकायं जयन् तत्कल्पः सन्नित्यर्थः। योजनानां योजनाख्याध्वमानानां ओघं योजनन्तु चतुष्क्रोशमिति भावः। यासि गच्छसि किन्तु अत्र स्वयम्वरे अन्यस्मिन् वृते सति ते ह्रीः न किम्? अन्यत्र तु हे अत्रप! निर्लज्ज! अमर! दैवत! त्वं कान्त्या कामनीयकेन जनौघं जनसङ्घं जयन् यासि अत स्त्वं मूढ़ोऽसि अतएव अमुष्मिन् वृते तव ह्रि किम्? पूर्ववदलङ्कारः ॥ १५५ ॥

नलमिति। अथ देवास्तौर्तीयीकतुरीययोस्तृतीयचतुर्थयोर्युगयो द्वापरकल्योर्युग्मं कनलं प्रत्यनपेताः आर्त्तिः पीड़नेच्छा यस्य

नलं प्रत्यनपेतार्त्ति तार्त्तीयीकतुरीययोः ।
युगयोर्युगलं बुद्ध्वा दिवि देवा धियं दधुः ॥ १५६ ॥
द्वापरैकपरीवारः कलिर्मत्सरमूर्च्छितः ।
नलनिग्राहिणीं यात्रां जग्राह ग्रहिलः किल ॥ १५७ ॥
नलेष्टापूर्त्तसम्पूर्त्तैर्दूरदुर्गानसुं प्रति ।
निषेधन्निषधान् गन्तुं विघ्नः सञ्जघटे घनः ॥ १५८ ॥
कियतापि च कालेन कालः कलिरुपेयिवान् ।
भैमीभर्त्तुरहंमानी राजधानीं महीभुजः ॥ १५९ ॥

तद्बुद्ध्वा दिवि धियं दधुः दिवं गन्तुमैषुरित्यर्थः । तृतीयादौ कः स्वार्थे वक्तव्यः चतुरच्छयतौ वार्त्तिकतुरीय सिद्धिः ॥ १५६ ॥

द्वापरेति । मत्सरमूर्च्छितो मूर्च्छितमत्सरः मत्सरप्रवृद्धवैरः आहिताग्न्यादिषु द्रष्टव्यः । अतएव ग्रहिलः आग्रहवान् पिच्छादित्वान्मत्वर्थीय इलच्प्रत्ययः । कलि द्वापर एकएव परीवारो यस्य तन्मात्रसहः सन्नित्यर्थः नलनिग्राहिणीं नलनिग्रहार्हामित्यर्थः । यात्रां जग्राह किल खलु ॥ १५७ ॥

नलेति । नलस्य इष्टापूर्त्तयोः क्रतुखातादिकर्मणोः त्रिष्वथ क्रतुकर्मेष्टं पूर्त्तं खातादि कर्मणीत्यमरः । सम्पूर्त्तैरभिव्याप्तैः कलिं प्रति दुःखेन गच्छन्त्येष्विति दुर्गेषु दुरोरधिकरणे सुपसङ्ख्यानमिति डप्रत्ययः । तान् दूरदुर्गानतिदुर्गमान्निषधान् देशान् गन्तुं निषेधं गमनं प्रतिबध्नन् घनो निरन्तरो विघ्नः सञ्जघटे घटितवानित्यर्थः । धर्मगुप्ततया निषधदेशाः कलिनापि दुष्प्रवेशा बभूवुरित्यर्थः ॥ १५८ ॥

कियतेति । अथ कियता च कालेन अहंमानी अहङ्कारी कलिः कालः भैमीभर्त्तुः महीभुजो नलस्य राजानो धीयन्तेऽस्यामिति राजधानी नगरी करणाधिकरणयोश्चेत्यधिकरणार्थे ल्युट् । तामुपेयिवान् उपगतः निपातनात्साधुः ॥ १५९ ॥

वेदानुद्धरतां तत्र मुखादाकर्णयन् पदम् ।
न प्रसारयितुं कालः कलिः पदमपारयत् ॥ १६० ॥
श्रुतिपाठकवक्त्रेभ्यस्तत्राकर्णयतः क्रमम् ।
क्रमः सङ्कुचितस्तस्य पुरे दूरमवर्त्तत ॥ १६१ ॥
तावद्गतिर्धृताटोपा पादयोस्तेन संहिता ।
न वेदपाठिकण्ठेभ्यो यावदश्रावि संहिता ॥ १६२ ॥
तस्य होमाज्यगन्धेन नासा नाशमिवाऽगमत् ॥
तत्रातत दृशौ नासौ क्रतुधूमकदर्थिते ॥ १६३ ॥

अथात्र संहितादित्रिविधाध्ययनसम्पत्तिं क्रमादनादरेणाह वेदानिति। तत्र राजधान्यां वेदानुद्धरतामुच्चारयतामधीयानानामित्यर्थः। मुखात्पदं त्वनपराख्यं पदजातमाकर्णयन् पदं प्रसारयितुं नापारयत् नाशक्नोत् ॥ १६० ॥

श्रुतीति। तत्र पुरे श्रुतिपाठकवक्त्रेभ्यो वेदाध्येतृमुखेभ्यः क्रममुभयापराख्यं पदजातमाकर्णयतस्तस्य कलेः क्रमः पादन्यासः सङ्कुचितः सन् दूरमवर्त्तत प्रवेशाशक्त्या दूरे स्थित इत्यर्थः ॥ १६१ ॥

तावदिति। तावत् तत्पर्य्यन्तं तेन कलिना पादयोः धृताटोपा ससम्भ्रमा गतिः संहिता सङ्गता यावद्वेदपाठिनामध्येतृणां कण्ठेभ्यो मुखेभ्यः संहिता नाश्रावि नश्रुता तच्छृणोतेस्तूभय एव पादयोरिति भावः। तदेतदारण्यके श्रुतं अन्नाद्यकामो निर्भुजं ब्रूयात् स्वर्गकामः प्रतृण्णन् उभयकाम उभयमन्तरेणेति ॥ १६२ ॥

तस्येति। तत्र पुरे होमाज्यगन्धेन तस्य कलेर्नासा घ्राणेन्द्रियं नाशमगमदिव असौ कलिः क्रतुधूमेन कदर्थिते अस्वीकृते दृशौ नेत्रे नातत नातनिष्ट नोन्मीलितवानित्यर्थः। तनोतेर्लुङि तङ् तनादिभ्य

अतिथीनां पदाम्भोभिरिमं प्रत्यतिपिच्छिले ।
अङ्गणे गृहिणां यत्र खलेनानेन चस्खले ॥ १६४ ॥
पुटपाकमिव प्राप क्रतुशुष्ममहोष्मभिः ।
तत्प्रत्यङ्गमिवाकर्त्ति पूर्त्तोर्मिव्यजनानिलैः ॥ १६५ ॥
पितृणां तर्पणे वर्णैः कीर्णाद्वेश्मनि वेश्मनि ।
कालादिव तिलात् कालाद्दूरमत्रसदत्र सः ॥ १६६ ॥
स्नातृणां तिलकैर्मेने स्वमन्तर्दीर्णमिव सः ।
कृपाणीभूय हृदयं प्रविष्टैरिव तस्य तैः ॥ १६७ ॥

स्तथासोरिति सिज्लुक् पक्षे अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः ॥ १६३ ॥

अतिथीनामिति । अत्र पुरे अतिथीनां पदाम्भोभिः पादप्रक्षालनोदकैः अमुं कलिं प्रति अतिपिच्छिले अत्यन्तप्रदरे पिच्छादित्वादिलच्प्रत्ययः । गृहिणां गृहस्थानां अङ्गणे खलेन धूर्त्तेन तेन कलिना चस्खले स्खलितं भावे लिट् ॥१६४॥

पुटेति । असौ कलिः क्रतुषु शुष्माणामग्नीनां महोर्मिभिर्महाविदाहै र्वर्हिः शुष्मा कृष्णवर्त्मा इत्यमरः । पुटपाकं गूढ़पाकं प्रापदिवेत्युत्प्रेक्षा । वापी तड़ाकादीना मूर्मयएव व्यजनानि तेषामनिलैः तत्प्रत्यङ्गं तस्य कलेः अङ्गजातं वीप्साया मव्ययीभावः । अकर्त्तीव कृत्तमिवेत्युत्प्रेक्षा कृतिच्छेदन इति धातोः कर्मणि लुङ् ॥ १६५ ॥

पितृणामिति । स कलिः तत्र पुरे वेश्मनि वेश्मनि गृहे गृहे वीप्सायां द्विर्भावः । वर्णैश्चातुर्वर्ण्येन पितृणां तर्पणे तर्पणकर्मणि कीर्णात् विक्षिप्तात् कालात्तिलात् कृष्णतिलात् कालानुस्मृत्योरिव अत्रसत् त्रस्तः कालो मृत्यौ महाकाले यमयोर्यमकृष्णयोः इति विश्वः ॥ १६६ ॥

स्नातृणामिति । तस्य कलेः हृदयं कृपाणीभूय खड्गीभूय प्रविष्टै-

पुमांसं मुमुदे तत्र विन्दन् मिथ्यावदावदम्।
स्त्रियं प्रति तथा वीक्ष्य तमथ म्लानवानयम्॥ १६८॥
यज्ञयूपघनां जज्ञौ स पुरं शङ्कुसङ्कुलाम्।
जनैर्धर्मधनैः कीर्णां व्यालक्रोड़ीकृताञ्च ताम्॥ १६९॥
स पार्श्वमशकद्गन्तुं न वराकः पराकिणाम्।
मासोपवासिनां छाया लङ्घने घनमस्खलत्॥ १७०॥
आवाहितां द्विजैस्तत्र गायत्रीमर्कमण्डलात्।
स सन्निदधतीं पश्यन् दृष्टनष्टोऽभवद्भिया॥ १७१॥

रिव स्थितैः प्रसिद्धैः स्नातृणां स्नायिनां तिलकैः स कलिः स्वमात्मानम् अन्तर्दीर्णमेव मेने॥ १६७॥

पुमांसमिति। अयं कलि स्तत्र पुरे मिथ्या अनृतं तस्य वदावदं वक्तारं चरिचलीत्यादिना द्वित्वमात्वमभ्यासस्येति साधुः। पुमांसं विन्दन् पश्यन् मुमुदे तद्द्वारा प्रविशन्निति भावः। अथ स्त्रियं प्रति तथा मिथ्यावदन्तं वीक्ष्य नर्मोक्तिं ज्ञात्वेत्यर्थः। म्लानवान् म्लानोऽभूत् अत्र दोषाभावादिति भावः। संयोगादे रातोधातो रिति निष्ठा नत्वम्॥१६८॥

यज्ञेति। स कलिः यज्ञयूपैर्घनां निरन्तरां पुरं शङ्कुसङ्कुलां शूलाकीर्णां तां पुरीं व्यालैः सर्पैः श्वापदै र्वा क्रोड़ीकृतां अङ्कार्पितां जज्ञौ तथा दुरासदाममन्यतेत्यर्थः। व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः॥ १६९॥

स इति। वराकस्तुच्छः स कलिः पराकिणां कृच्छ्रविशेषचारिणां द्वादशाहोपवासस्तु पराकः परिकीर्त्तित इति स्मरणात्। पार्श्वं समीपं गन्तुं नाशकत् शक्नोतेर्लृदित्वात् च्लेरङादेशः। मासोपवासिनां तु छायालङ्घने छायाक्रमणे घनं भृशम् अस्खलत् दुरासदत्वात् तपस्विनाम् इति भावः॥ १७०॥

आवाहितामिति। स कलि स्तत्र पुरे द्विजै रावाहितामाहूताम्

स गृहे गृहिणां पूर्णे घने वैखानसैर्वृते।
यत्याधारेऽमरागारे क्वापि न स्थानमानशे ॥ १७२ ॥
हिंसागवीं मखे वीक्ष्य रिरंसुर्धावति स्म सः।
सा तु सौम्यवृषासक्ता खरं दूरान्निरास तम् ॥ १७३ ॥
क्वापि नापश्यदन्विष्यन् हिंसामात्मप्रियामसौ।
स्वमित्रं तत्र न प्रापदपि मूर्खमुखे कलिम् ॥ १७४ ॥

अतएवार्कमण्डलात् सन्निदधतीं सन्निहितां सतीं गायत्रीं गायत्रीदेवीं पश्यन् भिया दृष्टनष्टः पूर्वं दृष्टो अनन्तरनष्टः सद्य एवादर्शनं गतोऽभवत् स्नानानुलिप्तवत् पूर्वकालसमासः ॥ १७१ ॥

स इति। स कलि गृहिणां पूर्णे गृहस्थैः पूर्णे सम्बन्ध सामान्ये षष्ठी। गृहे वैखानसै र्वानप्रस्थैः वैखानसोवने वासी वानप्रस्थश्च तापस इति यादवः। वृते घने निरन्तरे यतिनामाधारे यत्यधिष्ठित इत्यर्थः। अमरागारे देवालये क्वापि स्थानं स्थितं नानशे न लेभे अत आदेरश्नोतेर्श्चेत्यभ्यास दीर्घनुडागमौ ॥ १७२ ॥

हिंसेति। स कलिः मखे हिंसायां गौस्तां हिंसागवीम् अलभ्यार्थामित्यर्थः। गोरतद्धितलुगिति समासान्त टच्। वीक्ष्य रिरंसूरन्तुमिच्छुः विहर्त्तुमिच्छूरमेः सनन्तादुप्रत्ययः। धावति स्म द्रुतमगात् सा गौस्तु सौम्यः सोमयागः सएव वृषोधर्म्म स्तत्र आसक्ता सङ्गता तदर्था सतीत्यर्थः। तरुण वृषभाक्रान्ता चेति गम्यते सुकृते वृषभे वृषः इत्यमरः। अतएव खरं क्रूरं कलिं खरं गर्दभं दूरं निरासे वृषाक्रान्ताया गोः खरनिःसारणं युक्तमिति भावः ॥ १७३ ॥

क्वापीति। असौ कलिः तत्र पुरे क्वाप्यात्मनः प्रिया मिष्टाम् अन्विष्यन्नापश्यत् मूर्खमुखे मूढवक्त्रेऽपि स्वस्य मित्रमनुकूलं कलिं कलहञ्च न प्रापत् प्रजानां तथा नियमनादिति भावः ॥ १७४ ॥

मौनेन व्रतनिष्ठानां स्वाक्रोशं मन्यते स्म सः ।
वन्द्यवन्दारुभिर्जज्ञौ स्वशिरश्च पदाहतम् ॥ १७५ ॥
मुनीनां स वृसीः पाणौ पश्यन्नाचामतामपः ।
मेने घनैरमी हन्तुं शमुं मामद्भिरुद्यताः ॥ १७६ ॥
मौञ्जीभृतो धृताषाढानाशशङ्के स वर्णिनः ।
रज्वामी बद्धुमायान्ति हन्तुं दण्डेन मां ततः ॥ १७७ ॥
दृष्ट्वा पुरः पुरोडाशमासीदुत्त्रासदुर्मनाः ।
मन्वानः फणिनीस्तत्र स मुमोचाम्बु च स्रुचः ॥ १७८ ॥

मौनेनेति। सः कलिः व्रतनिष्ठानां मौनेन वाग्यमनेन स्वाक्रोशं शापं मन्यते स्म मामयं शपतः इत्यमन्यतेत्यर्थः। वन्द्यानभिवाद्यान् वन्दारुभिरभिवादकैः शृवन्द्योरारुः। स्वशिरः पदेनाहतं जज्ञौ मेने तत् सर्वं तस्य तादृग्दुःखजनकं जातमित्यर्थः ॥१७५॥

मुनीनामिति। स कलिर्मुनीनां पाणौ वृसीरासनानि उपवेशनार्थं गृहीता इत्यर्थः। व्रतिनामासनं वृसी इत्यमरः। तथा आचमतामुपस्पृशतामेषां पाणौ अपश्च पश्यन् अमी मुनयो माद्गनैः मुद्गरैर्हन्तुं द्रुघणे मुद्गरे घनाविति वैजयन्ती। अद्भिः शमुश्चोद्यता इति मेने तादृग्दुःखं प्रापेत्यर्थः ॥ १७६ ॥

मौञ्जीति। स कलि मौञ्जीभृतोर्मुञ्जीविकारमेखलाधारिणः धृताषाढान् धृतपलाशदण्डान् पालाशो दण्ड आषाढ इत्यमरः। विशाखा धर्मोऽस्य दण्डयो रित्यण्प्रत्ययः। वर्णिनो ब्रह्मचारिणः वर्णाद् ब्रह्मचारिणीति इनिप्रत्ययः। मां रज्वा पाशेन बद्धुं ततो बन्धनानन्तरं दण्डेन हन्तुञ्चायान्तीत्याशशङ्के तथा विव्यथ इत्यर्थः ॥ १७७ ॥

दृष्टेति। स कलिः पुरोऽग्रे पुरोडाशं पिष्टपिण्डविशेषं दृष्ट्वा उत्त्रासेन भयेन दुर्मना विह्वल आसीत् स्वघातार्थं पाषाणभ्रमादिति

आनन्दन्मदिरादानं विन्दन्नेष द्विजन्मनः ।
दृष्ट्वा सौत्रामणीमिष्टिं तं कुर्वन्तमदूयत ॥ १७९ ॥
अपश्यद्यावतो ब्रह्मविदां ब्रह्माञ्जलीनसौ ।
उदडीयन्त तावन्तस्तस्यास्राञ्जलयो हृदः ॥ १८० ॥
स्नातकं घातकं जज्ञे जज्ञौ दान्तं कृतान्तवत् ।
वाचंयमस्य दृष्ट्यैव यमस्यैव बिभाय सः ॥ १८१ ॥

भावः । स्रुचो जुह्वादिपात्राणि फणिनी भुजङ्गीर्मन्वानः तस्य आसीत् अस्रु वाष्पञ्च मुमोच अत्र स्रुचु फणिनीभ्रान्त्या भ्रान्तिमदलङ्कारः ॥१७८॥

आनन्ददिति । एष कलि र्द्विजन्मनो ब्राह्मणस्य मदिराया आदानं सुरापहं विन्दन्निवानन्दत् अनाचारबुद्ध्या मुमुदे अथ तं ब्राह्मणं सौत्रामणीं सुत्रामगणाख्याम् इष्टिं कुर्वन्तं दृष्ट्वा ज्ञात्वा अदूयत पर्यतप्यत सुरापहविधानात्स पाप स्तत्र निराशोऽभूदित्यर्थः ॥ १७९ ॥

अपश्यदिति । असौ कलिः ब्रह्मविदां ब्रह्माध्यायिनां यावतो ब्रह्माञ्जलीनध्ययनकालीन मञ्जलिं संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः इति स्मरणात् । पाठे ब्रह्माञ्जलिः इत्यमरः । अपश्यत् तावतः तस्य कलेः अस्राञ्जलयो रक्ताञ्जलयो हृदः कलिहृदयादुदडीयन्त उड्डीना इत्यर्थः ॥ १८० ॥

स्नातकमिति । सः कलिः स्नातकं समाप्तवेदं स्नातकाद्वेदसमाप्ताविति कन्प्रत्ययः । तं घातुकं हन्तारं लषपतेत्यादिना उकञ्प्रत्ययः । जज्ञौ मेने दान्तं तपस्विनं तपःक्लेशसहो दान्त इत्यमरः । कृतान्तवत् कृतान्ततुल्यं जज्ञौ वाचं यच्छतीति वाचयमो मौनव्रती वाचि यमो व्रत इति खच्प्रत्ययः । वाचंयमपुरन्दरौ चेति निपातनात्साधुः । यमस्य यमस्येव दृष्ट्या दर्शनेनैव बिभाय भीतवान् भियो लिट् । सर्वत्रैषां तपसो दुर्धर्षत्वाद्भीतिरिति द्रष्टव्यम् ॥ १८१ ॥

स पाषण्डजनान्वेषी प्राप्नुवन् वेदपण्डितम्।
जलार्थीवानलं प्राप्य पापस्तापादपासरत् ॥ १८२ ॥
तत्र ब्रह्महणं पश्यन्नतिसन्तोषमानशे।
निर्वर्ण्य सर्वमेधस्य यज्वानं ज्वलति स्म सः ॥ १८३ ॥
यतिहस्तस्थितैर्यस्य राम्भैरारम्भि तर्जना।
दुर्जनस्याजनि क्लिष्टिर्गृहिणां वेदयष्टिभिः ॥ १८४ ॥
मण्डलत्यागमेवैच्छद्वीक्ष्य स्थण्डिलशायिनः।
पवित्रालोकनादेष पवित्रासमविन्दत ॥ १८५ ॥

स इति। पापः क्रूरः स कलिः पाषण्डजनान्वेषी सन् वेदपण्डितं वैदिकं प्राप्नुवन् जलार्थी अनलं प्राप्यैव तापात् तत्प्राप्तिजन्य सन्तापाद्धेतोरपासरत् अपसृतः ब्रह्मतेजसः पाषण्डदाहकत्वादिति भावः ॥१८२॥

तत्रेति। एषः कलिः तत्र पुरे ब्रह्महणं ब्राह्मणं हतवन्तं ब्रह्मभ्रूण वृत्रेति क्विप्। पश्यन् सन्तोष मानशे प्राप अथ तं ब्रह्महणं सर्वमेधाख्ययागस्य यज्वानं तद्याजिनं निर्वर्ण्य निश्चित्य ज्वलति स्म सन्तप्तोऽभूत् ब्रह्मणे ब्राह्मणमालभत इति श्रुत्या सर्वमेधे ब्राह्मणादिसर्वलम्भविधानात्तस्य धर्मत्वादिति भावः ॥ १८३ ॥

यतीति। दुर्जनस्य यस्य यतीनां मस्करिणां हस्तेषु स्थितै राम्भैर्वैणुदण्डैः त्रिदण्डेन कमण्डलुरिति स्मृतेरिति भावः। तर्जना ताडनमारम्भि कृतेत्यर्थः। तथा गृहिणां वेदयष्टिभिः सन्दर्भवेणुदण्डैश्च वेणुमान् स कमण्डलुरिति स्मृतेरिति भावः। क्लिष्टिः क्लेशोऽजनि जनिता जनेर्ण्यन्तात्कर्मणि लुङ्। यतिः पाराशरोभीमस्तत् कर्म मस्करीयतिः। बद्धदर्भा वेदयष्टिर्दम्भोराम्भस्तु वैणवः इति सर्वत्र यादवः ॥ १८४ ॥

मण्डलेति। एषः कलिः स्थण्डिलशायिनः अथ शयेन व्रतिनः व्रत इति णिनिः। यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ इत्यमरः। वीक्ष्य मण्डलत्यागं देशत्यागमेव ऐच्छत् पवित्राणां कुशानामालोकनात्

अपश्यज्जिनमन्विष्यन्नजिनं ब्रह्मचारिणम् ।
क्षपणार्थी सदीक्षस्य स चाक्षपणमैक्षत ॥ १८६ ॥
जपतामक्षमालासु वीजाकर्षणदर्शनात् ।
स जीवाकृष्टिकष्टानि विपरीतदृगन्वभूत् ॥ १८ ॥
त्रिसन्ध्यं तत्र विप्राणां स पश्यन्नघमर्षणम् ।
वरमैच्छद् दृशोरेव निजयोरपकर्षणम् ॥ १८८ ॥
अद्राक्षीत् तत्र कश्चिन्न कलिः परिचितं क्वचित् ।
भैमीनलव्यलीकाणुप्रश्नकामः परिभ्रमन् ॥ १८९ ॥

पवेः कुलिशात्त्रासमविन्दत यथा शक्रकरे वज्रं तथा विप्रकरे कुशा इति स्फुटे रिति भावः। अस्त्री कुशं कुशो दर्भः पवित्र मथ कत्तृणम् इत्यमरः ॥ १८५ ॥

अपश्यदिति। स कलिः जिनं जिनाख्यं वाह्यदैवत मन्विषन् ब्रह्मचारिण मजिनं कृष्णाजिनं जिनराहित्यञ्चापश्यत् किञ्च क्षपणार्थी क्षपणकान्वेषी सदीक्षस्य दीक्षितस्य राज्ञोऽक्षपण मक्षदेवनं क्षपणकराहित्यम् ऐक्षत राजसूये अभिषेचनीये अष्टावक्षैर्दिव्यन्तीति श्रवणादिति भावः। तदुभय मप्यस्य दुःसहमिति भावः॥ १८६ ॥

जपतामिति। विपरीतदृग्वेदविरुद्धदर्शी सः कलिर्जपता मक्षमालासु वीजानां पद्मादिवीजानां जपसङ्ख्यानार्थाना माकर्षणस्य दर्शनात् जीवाकृष्टिकष्टानि प्राणाकर्षणदुःखानि अन्वभूत् ॥ १८७ ॥

त्रिसन्ध्यमिति। त्रिसन्ध्यं सन्ध्यात्रये समाहारैकत्वे वा तस्येति नपुंसकत्वम् अत्यन्त संयोगे द्वितीया। विप्राणा मघमर्षणं मन्त्रसाध्यं पापहरं स्नानकर्म पश्यन् निजयोर्दृशोराकर्षण मुत्पाटनमेव परम् अप्रिय मैच्छत् ॥ १८८ ॥

अद्राक्षीदिति। तत्र कलिर्भैमीनलव्यलीकाणोः दोषलेशस्य प्रश्नं

तपःस्वाध्याययज्ञानामकाण्डद्विष्टतापसः ।
स्वविद्विषां श्रियं तस्मिन् पश्यन्नुपतताप सः ॥ १९० ॥
कम्रं तत्रोपनम्राया विश्वस्या वीक्ष्य तुष्टवान् ।
स मम्लौ तं विभाव्याथ वामदेव्याभ्युपासकम् ॥ १९१ ॥
वैरिणी शुचिता तस्मै न प्रवेशं ददौ भुवि ।
न वेदध्वनिरालम्बमम्बरे विततार च ॥ १९२ ॥
दर्शस्य दर्शनात् कष्टमग्निष्टोमस्य चानशे ।
जुघूर्णौ पौर्णमासेक्षी सौमं सोऽमन्यतान्तकम् ॥ १९३ ॥

कामयत इति तत्काम· शिलिकामभिक्षाचरिभ्यो णः । परिभ्रमन् क्वचित् किञ्चिदपि परिचितं नाद्राक्षीत् ॥ १८९ ॥

तप इति । अकाण्डे अनवसरे द्विष्टा विरुद्धा तापसा येन सः कलिः तस्मिन् पुरे स्वविद्विषां स्वविरोधिनां तप श्चान्द्रायणादिचर्या स्वाध्यायो वेदपाठः यज्ञाः सोमादयः तेषां श्रियं समृद्धिं पश्यन्नुपतताप शत्रुवृद्धेर्दुर्वारत्वादिति भावः ॥ १९० ॥

कम्रमिति । स कलि स्तत्र पुरे उपनम्रायाः स्वयमागतायाः विश्वस्याः सर्वस्याः स्त्रियाः कम्रं कमितारं रन्तारमित्यर्थः । नमिकम्पीत्यादिना रप्रत्ययः । वीक्ष्य तुष्टवान् तुतोष अथ तं कम्रं वामदेवो नाम देवता विशेषः । तस्याभ्युपासकं वीक्ष्य विमृश्य मम्लौ तदुपासकानां न काञ्चन स्वयमागतानां परिहरेदिति श्रुते रुपगमस्य धर्मत्वादिति भावः ॥ १९१ ॥

वैरिणीति । वैरिणी विरोधिनी शुचिता शुद्धता तस्मै भुवि प्रदेशं न ददौ अम्बरे वा नभसि च वेदध्वनिः ब्रह्मघोषः आलम्बन मवकाशं न विततार ॥ १९२ ॥

अनन्तरश्लोकद्वयं प्रक्षिप्तमिति पूर्वैं रुपेक्षितं तथापि स्थितत्वाद् व्याख्यायते दर्शस्येत्यादि । सः कलि र्दर्शस्य दर्शस्येष्टेः अग्निष्टोमस्य सोमयागविशेषस्य च दर्शनात्कष्टं महद्दुःखमानशे प्राप तथा पौर्णमासं

तेनादृश्यन्त वीरघ्नो न तु वीरहणो जनाः ।
नापश्यत् सोऽभिनिर्मुक्तान् जीवन्मुक्तानवैक्षत ॥ १९४ ॥
स तुतोषाश्नतो विप्रान् दृष्ट्वा स्पृष्टपरस्परान् ।
क्षोमशेषीभवत्सोमभुजस्तान् वीक्ष्य दूनवान् ॥ १९५ ॥
दृष्ट्वा जनं रजोजुष्टं तुष्टिं प्राप्नोत् झटित्यसौ ।
तं पश्यन् पावनस्नानावस्थं दुःस्थस्ततोऽभवत् ॥ १९६ ॥
अधावत् क्वापि गां वीक्ष्य हन्यमानामयं मुदा ।
अतिथिभ्यस्तु तां बद्धा मन्दं मन्दो न्यवर्त्तत ॥ १९७ ॥

पूर्णमासेष्टिं ईक्षत इति ईक्षी तद्दर्शी सन् जुघूर्णे भ्रान्तोऽभूत् सौमं सोमयागमन्तकं मृत्यु समन्यत ॥ १९३ ॥

तेनेति । तेन कलिना वीरघ्ना रणे वीरघातिनो जनाः अमनुष्यकर्तृकेचेति चकारादच् अतएव क्वचिन्मनुष्यकर्तृकेचेति कौमारं सूत्रम् अदृश्यन्त वीरहणः क्षत्रियघातिनः भट्टभास्कराः अग्नित्यागिनो वा विरहा वा एष देवानां योऽग्नि मुद्वासयत इति श्रुते रित्यनेन अदृश्यन्त स कलि रभिनिर्मुक्तान् यान् सुप्तान् अभि सूर्योऽस्तमेति ते अभिनिर्मुक्ताः मुञ्चतेः कर्मणि क्तः । तान् पापिष्ठान्नापश्यत् किन्तु जीवन्मुक्तानात्मारामान् पुरुषानवैक्षत ॥ १९४ ॥

स इति । स कलिः स्पृष्टं परस्परं यैस्तान् स्पृष्टपरस्परं अश्नतो भक्षयतो विप्रान् दृष्ट्वा तुतोष क्षोमशेषोभवन्तं सोमं भजतस्तान् वुभुक्षयिषूनित्यर्थः । वीक्ष्य ज्ञात्वा म्लानवान् परितप्तवान् सोमभक्षणे परस्पर्शदोषाभावादिति भावः ॥ १९५ ॥

दृष्ट्वेति । रजोभिर्जुष्टं जनं दृष्ट्वा झटिति द्राक्तुष्टिं असौ प्राप ततोऽनन्तरं रजोभि धूसरं जनं पावनस्नानावस्थं पश्यन्वायव्यस्नानतिष्ठं जानन् दुःस्थो दूनोऽभवत् ॥ १९६ ॥

अधावदिति । मन्दो मूढोऽयं कलिः क्वापि देशे हन्यमाना मालभ्यमानां गां वीक्ष्य मुदा अधावत् किन्तु तां गां अतिथिभ्यो ऽतिथ्यर्थं

हृष्टवान् स द्विजं दृष्ट्वा नित्यनैमित्तिकत्यजम्।
यजमानं निरूप्यैनं दूरं दीनमुखोऽद्रवत् ॥ १९८ ॥
आनन्द निरीक्ष्यायं पुरे तत्रात्मघातिनम्।
सर्वस्वारस्य यज्वानमेनं दृष्ट्वाऽथ विव्यथे ॥ १९९ ॥
क्रतौ महाव्रते पश्यन् ब्रह्मचारीत्वरीरतम्।
जग्लौ यज्ञक्रियामज्ञः स भाण्डाकाण्डताण्डवम् ॥ २०० ॥
यज्वभार्य्याश्वमेधाश्वलिङ्गालिङ्गिवराङ्गताम्।
दृष्ट्वाचष्ट स कर्त्तारं श्रुतेर्भण्डमपण्डितः ॥ २० ॥

हन्यमानां बुद्धा मन्दं सखेदं वर्त्तेत महोच्चं वा महाजन्या मोत्विधा योऽपकल्पयेत् इति विधानादिति भावः ॥ १९७ ॥

हृष्टवानिति। स कलि र्नित्यनैमित्तिकत्यजं दानहोमादिकर्मत्यागिनं क्विप्। द्विजं दृष्ट्वा हृष्टवान् अथैनं द्विजं यजमानं दीक्षितं निरूप्य निश्चित्य दीनमुखो विवर्णमुखः सन् दूरमदुद्रुवत्पलायत न ददाति न जुहोति न वदतीति दीक्षितस्य तं निषेधे तेन दोषाभावादिति भावः ॥ १९८ ॥

आनन्देति। अयं कलि स्तत्र पुरे आत्मघातिनं निरीक्ष्य आनन्द अयैन मात्मघातिनं सर्वस्वारो नामात्माहुतिको यागविशेषः। तथा रघुवंशेऽप्युक्तं यो मन्त्रपूतान्तनुमप्यहौषीदिति तस्य यज्वानं दृष्ट्वा तद्याजिनं विदित्वा स कलि र्विव्यथे ॥ १९९ ॥

क्रताविति। स कलि र्महाव्रते महाव्रताख्ये क्रतौ ब्रह्मचारिण इत्वर्याः कुलटायाश्चरतं ब्रह्मचारी पुंश्चल्यः सम्वाद इति श्रुतिविहितं ग्राम्यभाषणम् असती कुलटेत्वरीत्यमरः। इनुजि वर्त्तिस्थः करम्। पश्यन् यज्ञक्रियां भाण्डानां ग्राम्यभाषिणाम् अकाण्डताण्डवम् अनेकान्तत्वादसमयविजृम्भणं जग्लौ भग्नचेष्टित ममन्यतेत्यर्थः ॥ २०० ॥

यज्वेति। अपण्डितो मूर्खः स कलि र्यज्वभार्यायाः यजमानस्य पत्न्या अश्वमेधे अश्वस्य लिङ्गेन मेहनेन आलिङ्गितवराङ्गतां संयोजितयो-

अथ भीमजया जुष्टं व्यलोकत कलिर्नलम् ।
दुष्टदृग्भिर्दुरालोकं प्रभयेव प्रभाविभुम् ॥ २०२ ॥
तयोः सौहार्दसान्द्रत्वं पश्यन् शल्यमिवानशे ।
मर्मच्छेदमिवानर्च्छ स तन्नर्मोक्तिभिर्मिथः ॥ २०३ ॥
अमर्षादात्मनो दोषात्तयोस्तेजस्वितागुणात् ।
स्प्रष्टुं दृशाप्यनीशस्तौ तस्मादप्यचलत् कलिः ॥ २०४ ॥
अगच्छदाश्रयान्वेषी नलद्वेषी स निश्वसन् ।
अभिरामं गृहारामं तस्य रामसमश्रियः ॥ २०५ ॥

नितां निरायत्यास्वस्य शिश्नं मद्विष्युपस्थे निधत्ते इति श्रुतिविहितामिति भावः । दृष्ट्वा श्रुतेः कर्त्तारं वेदप्रणेतारं अखण्डमाचष्ट केनचिद्वखण्डेन प्रणीता वेदा इत्यमन्यतेत्यर्थः ॥ २०१ ॥

अथेति । अथ कलि र्भीमजया भैम्या जुष्टं सेवितं दुष्टदृग्भिः पापदृष्टिभिरन्यत्र रोगोपहतदृष्टिभि र्दुरालोकं दुर्दर्शनं नलं प्रभया दीप्त्या जुष्टं प्रभाविभुं सूर्य्यमिव व्यलोकत अपश्यत् ॥ २०२ ॥

तयोरिति । सः कलि स्तयो र्भैमीनलयोः सुहृदोर्भावः सौहार्दं प्रेम युवादिभ्योऽण् हृद्भगेत्यादिना उभयपदवृद्धिः । तेन सान्द्रत्वं वद्रवत्वं पिच्छिलत्वं पश्यन् शल्यमानशे इव प्रापेव तथाविधपरस्परनर्मोक्तिभिः परिहासविशेषैः मर्मच्छेद मानर्च्छेव प्रापेव ॥ २ ३ ॥

अमर्षादिति । सः कलिरमर्षात् क्रोधादात्मनो दोषात् पिशुनत्वदोषात्तयो र्भैमीनलयो स्तेजस्वितागुणाच्च तौ दृशापि स्प्रष्टुं द्रष्टुमप्यनीशः सन् तस्मादपि देशादचलत् पलायत ॥ २०४ ॥

अगच्छदिति । नलद्वेषी सः कलि राश्रयान्वेषी सन् अतएव तदलाभान्निश्वसन् रामसमश्रियो रामचन्द्रसमानकान्तेः तस्य नलस्याभिरामं रमणीयं गृहाराम मगच्छत् ॥ २०५ ॥

रक्षिलक्षवृतत्वेन बाधनं न तपोधनैः
मेने मानी मनाक् तत्र स्वानुकूलं कलिः किल ॥ २०६ ॥
दलपुष्पफलैर्देवद्विजपूजाभिसन्धिना ।
स नलेनार्जितान् प्राप तत्र नाक्रमितुं द्रुमान् ॥ २०७ ॥
अथ सर्व्वोद्भिदासक्तिपूरणाय स रोपितम् ।
विभीतकं ददर्शैकं कुटं धर्म्मेऽप्यकर्मठम् ॥ २०८ ॥
स तं नैषधसौधस्य निकटं निष्कुटध्वजम् ।
बहु मेने निजं तस्मिन् कलिरालम्बनं वने ॥ २०९ ॥

रक्षीति । रक्षिणां गृहपालानां लक्षेण शतसहस्रावृतत्वेन तत्र गृहारामे तपोधनैः कर्तृभिः बाधनं नास्ति तस्येति शेषः । अतएवोभयप्राप्तौ कर्मणीति षष्ठी न कर्त्तरि । तथैवं निर्बाधत्वात् मानी आपद्दी कलिः स्वस्यानुकूलं निवासयोग्यं मेने किल तमाराम मितिशेषः ॥ २०६ ॥

दलेति । सः कलि तत्रारामे दलैः पत्रैः पुष्पैः फलैश्च देवानां द्विजानाञ्च पूजाया अभिसन्धिना तदर्थाभिप्रायेण नलेनार्जितान् द्रुमान् आक्रमितुम् अधिष्ठातुं न प्राप क्षमत्वं न प्रापेत्यर्थः । उदीच्यानां प्रायेणायं भावानुसारिप्रयोगः ॥ २०७ ॥

अथेति । असौ कलिः सर्वेषामुद्भिदान्तरगुल्माद्यङ्कुराणामासक्तेः सम्बन्धस्य पूरणाय रोपितम् अङ्कुरोऽभिनवोद्भिद इत्यमरः । कर्मणि घटत इति घटं क्षमं कर्मठः कर्मणि घटोऽठच् । धर्मेऽप्यकर्मठ मनुपयुक्तं विभीतकं नाम एकं कुटं वृक्षं ददर्श अनोकहः कुटः शालः इत्यमरः ॥ २०८ ॥

स इति । स कलि तत्र वने निजमात्मीयमालम्बनम् आश्रयं सौधस्य नलप्रासादस्य निकटं नेदिष्ठं निष्कुटस्य गृहारामस्य ध्वजं चिह्नं गृहारामस्तु निष्कुटः इत्यमरः । तं विभीतकं बह्वधिकं यथा तथा मेने ॥ २०९ ॥

निष्पदस्य कलेस्तत्र स्थानदानाद्विभीतकः ।
कलिद्रुमः परं नासीदासीत् कल्पद्रुमोऽपि सः ॥ २१० ॥
ददौ पदेन धर्मस्य स्थातुमेकेन यत् कलिः ।
एकः सोऽपि तदा तस्य पदं मन्येऽमिलत्ततः ॥ २११ ॥
उद्भिद्विरचितावासः कपोतादिव तत्र सः ।
राज्ञः साग्नेर्द्विजात्तस्मात् सन्त्रासं प्राप दीक्षितात् ॥२१२॥
विभीतकमधिष्ठाय तथाभूतेन तिष्ठता ।
तेन भीमभुवोऽभीकः स राजर्षिरधर्षि न ॥ २१३ ॥

निष्पदस्येति। स विभीतकः अक्षवृक्षो निष्पदस्य निराश्रयस्य कले स्तत्रारामे स्थानदानादावासदानात्कलिद्रुमः परं कलिद्रुम एव नासीत् किन्तु कल्पद्रुमोऽप्यासीत् सङ्कल्पार्थदानादिति भावः। भूतावासः कलिद्रुमः इत्यमरः ॥ २१० ॥

ददाविति। यद्यस्मात्कलिः धर्मस्यैकेन पदेन स्थातुं ददौ इत्यर्थः। पूर्ववत् मनागितस्ततः कारणात्स तरुरप्येकएव तस्य कलेः पदं स्थानममिलत् एकपदस्थानदानादेकवृक्षस्थानं प्राप्तमित्यर्थः। दानानुरूपं फलमभूत इति भावः ॥ २११ ॥

उद्भिदिति। उद्भिदि वृक्षे विरचितावासः कल्पितस्थितिः सः कलिः साग्नेराहिताग्नेः सजाठराग्नेश्च द्विजात् द्विजातेर्वर्णिकादण्डजाच्च दीक्षितात् कृतदीक्षात् अन्यत्र उभयत्रापि वा ईक्षिताद्दृष्टात् तस्माद्राज्ञो नलात्कपोतादुलूकाद्वायस इव तापं प्राप प्रापेति लिट् प्रापदिति पदच्छेदे लुङ् ॥ २१२ ॥

विभीतकमिति। विभीतकमक्षमधिष्ठाय तिष्ठता तथाभूतेन नलरन्ध्रान्वेषिणा सता तेन कलिना भीमभुवो भैम्या अभिकामयत इत्यभी

तमालम्बनमासाद्य वैदर्भीनिषधेशयोः।
कलुषं कलिरन्विष्यन्नवात्सीद्वत्सरान् बहून् ॥ २१४ ॥
यथासीत् कानने तत्र विनिद्रकलिका लता।
तथा नलच्छलासक्तिविनिद्रकलिकालता ॥ २१५ ॥
दोषं नलस्य जिज्ञासुर्बभ्राज द्वापरः क्षितौ।
न दोषः कोऽपि लोकस्य सुखेऽस्तीति दुराशया ॥२१६॥

कः कमिता अनुको ऽभीकः कमितेति कच्प्रत्ययान्तो निपातनात्साधुः। स राजर्षिर्नलो नाधर्षि नाभ्यभावि तं जनमाविष्टेन भीतेन पिशाचेन भीमभुवोऽयं करस्थानादभीको निर्भीकः कश्चिद्दुष्टमन्त्रवादिनाऽधर्षीति ध्वनिः। तेन च राजमन्त्रवादिनोरौपम्यं गम्यते ॥ २१३ ॥

तमिति। कलिस्तं छद्ममालम्बनमासाद्य वैदर्भीनिषधेशयोः भैमीनलयोः कलुषमशुचित्वमन्विष्यन् बहून्वत्सरान् अत्यन्तसंयोगे द्वितीया। अवात्सीदुवास वसेर्लुङि सिचि सस्यार्धधातुकेति तत्वं वदव्रजेत्यादिना वृद्धिः ॥ २१४ ॥

यथेति। तत्र कानने वने यथा विनिद्रकलिका उन्निद्रकोरका लता आसीत्तथा नलस्य छले छलने आसक्त्याऽभिनिवेशेन विनिद्रो जागरूकः कलिः कालपुरुषितः यस्मिन् तस्य भावस्तत्ता आसीत् अर्थभेदेऽपि विनिद्रकलिकालतेति शब्दमात्रसाम्यात्तथेत्युक्तम् ॥ २१५ ॥

दोषमिति। अथ द्वापरोऽपि नलस्य दोषमनाचारं जिज्ञासुर्लोकस्य सुखे याचि अदोषो निर्दोषः कोऽपि नास्तीति दुराशया लोको हि सर्वत्र दोषदृष्टिपरत्वात्सर्वथा दोषलेशं द्रक्ष्यति वक्ष्यति चेति दुराग्रहेण क्षितौ बभ्राज ॥ २१६ ॥

अमुष्मिन्नारामे सततनिपतद्दोहदतया
प्रसूनैरुन्निद्रैरनिशममृतांशुप्रतिभटे ।
असौ बद्धालम्बः कलिरजनि कादम्बविहग-
च्छदच्छायाभ्यङ्गोचितरुचितया लाञ्छनमृगः ॥ २१७ ॥

स्फारे तादृशि वैरसेनिनगरे पुण्यैः प्रजानां घनम्
विघ्नं लब्धवतश्चिरादुपनतिस्तस्मिन् किलासीत् कलेः ।
एतस्मिन् पुनरन्तरेऽन्तरमितानन्दः स भैमीनला-
वाराद्धुं व्यधित स्मरः श्रुतिशिखावन्दारुचूडं धनुः ॥२१८॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम् ।

अमुष्मिन्निति । सततं निपतद्दोहदतया मिलद्धूपादिसंस्कारतया तरुगुल्मलतादीनामकाले कुशलैः कृतं पुष्पाद्युत्पातकं द्रव्यं दोहदं स्यात्तु तत्क्रियेति शब्दार्णवे । उन्निद्रैर्विकसितैः प्रसूनैरनिशममृतांशुप्रतिभटे चन्द्रकल्पे अमुष्मिन्नारामे बद्धालम्बः कृताश्रयोऽसौ कलिः कादम्बविहगस्य धूमपक्षिविशेषस्य च्छदच्छायाभ्यङ्गोचितरुचितया चितप्रभालेपयोग्यवर्णतया लाञ्छनमृगोऽजनि जनितः चन्द्रस्यायं कलङ्कोऽभूदित्यर्थः ॥ २१७ ॥

स्फार इति । प्रजानां पुण्यैर्धर्म्मैरेव तादृशि तथा नीरन्ध्रे वैरसेनेर्नलस्य नगरे घनं निरन्तरं विघ्नं कार्य्यप्रतिबन्धं लब्धवतः प्राप्तवतः कलेश्चिरकालमुपनतिः स्थितिरभूत्किल एतस्मिन् घने निरन्तरे अस्मिन्नवकाशे अन्तरन्तःकरणे अमितानन्दः अतिहृष्टः स स्मरो भैमीनलावाराद्धुं वशीकर्त्तुं श्रुतिशिखां कर्णौ वन्दारुरुपनम्रा चूडा कोटिर्यस्य तद्धनुः व्यधित विहितवान् कलिविप्लवात्प्राग्यथाकामं कामसुखमन्वभूतामित्यर्थः ॥ २१८ ॥

यातः सप्तदशः स्वसुः सुसदृशि छन्दप्रशस्तेर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥२१८॥

श्रीहर्षमिति । स्वसुः सोदर्याः छन्दोनाम राजा तत्प्रशस्तेः सुकृतेः सुसदृशि अत्यन्तसदृशि तस्माच्छ्रीहर्षाद्भवतीति तद्भुवि एककर्तृत्वादेकोदरत्वव्यपदेशः गतमन्यत् ॥ २१८ ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां सप्तदशसर्गः समाप्तः ॥ १७ ॥

नैषधचरितम् ।

अष्टादशः सर्गः ।

सोऽयमित्थमथ भीमनन्दिनीं दारसारमधिगम्य नैषधः ।
तां तृतीयपुरुषार्थवारिधेः पारलम्भनतरीमरीरमत् ॥ १ ॥
आत्मवित् सह तया दिवानिशं भोगभागपि न पापमाप सः ।
आहृता हि विषयैकतानता ज्ञानधौतमनसं न लिम्पति ॥ २ ॥

सोऽयमिति । सोऽयं नैषधो नलः इत्थं स्वयं परमार्गेण दारसारं दारेषु सारं स्थिरांशं सारो बले स्थिरांशे च इति विश्वः । अतएव पुंलिङ्गनिर्देशः । भीमनन्दिनीं भैमीं नन्दादित्वात् ल्युट् प्रत्ययः । अधिगम्य प्राप्य अथ तृतीयपुरुषार्थवारिधेः शृङ्गारसारस्य पारलम्भनेन परतीरप्राप्तौ तरीं नावन्तां दमयन्ती मरीरमत् रमयामास रमेर्णौ चङ् अस्मिन् सर्गे रथोद्धतावृत्तं योनराविह रथोद्धतालगाविति लक्षणात् ॥ १ ॥

आत्मेति । आत्मविदात्मज्ञानी स नलस्तया भैम्या दिवानिशमहर्निशं द्वन्द्वैकवद्भावः अत्यन्तसंयोगे द्वितीया । भोगभागपि सम्भोगवानपीत्यर्थः । भजो ण्विः । पापं नाप ननु नियच्छाच्चेन्द्रियाणान्तु नरः पतन ऋच्छतीति निषेधात् कथं दिवानिशं विषयलोलुपस्य न पापमत आह । आहृतेति तथा हि आहृता विकृता विषयेषु शब्दादिष्वेकतानता एकनिष्ठत्वं ज्ञानेन धौतमनसं क्षालितान्तःकरणं न लिम्पति न पातयतीत्यर्थः । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनेति भगवद्वचनादितिभावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तर न्यासः ॥ २ ॥

न्यस्य मन्त्रिषु स राज्यमादरादारराध मदनं प्रियासखः।
नैकवर्णमणिकोटिकुट्टिमे हेमभूमिभृति सौधभूधरे ॥३॥
वीरसेनसुतकण्ठभूषणीभूतदिव्यमणिपंक्तिशक्तिभिः।
कामनोपनमदर्थतागुणाद्यस्तृणीकृतसुपर्व्वपर्व्वतः ॥ ४ ॥
धूपितं यदुदराम्बरं चिरं मेचकैरगुरुसारदारुभिः।
जालजालधृतचन्द्रचन्दनक्षोदमेदुरसमीरशीतलम् ॥ ५ ॥
क्वापि कामशरवृत्तवर्त्तयो यं महासुरभितैलदीपिकाः।
तेनिरे वितिमिरं स्मरस्फुरद्दोःप्रतापनिकराङ्कुरश्रियः ॥ ६ ॥

न्यस्येति। स राजा मन्त्रिषु राज्यं न्यस्य राज्यभारं निधाय नैकवर्णा अनेकवर्णा नञर्थस्य न शब्दस्य सुप्सुपेति समासः। ता मणिकोटयो यस्मिन् तादृशं कुट्टिमं यस्मिन्। तयोक्ते हेमभूमिभृति सुवर्णभूसम्भृते भृञः क्विप्। सौध एव भूधरस्तस्मिन् प्रियासखः भैमीसहितः सन्नादरात् मदनमाराराध सिषेवे शच्या सह मेराविन्द्र इव सः भैम्या सह तत्र सौधे स इति भावः ॥ ३ ॥

अथ चतुर्विंशतिश्लोक्या सौधं वर्णयति वीरेत्यादयः। सौधा वीरसेनसुतस्य नलस्य कण्ठभूषणीभूताया दिव्याया मणिपङ्क्तेर्मणिमालिकाया शक्तिभिः चिन्त्यप्रभावैः कामनया सङ्कल्पमात्रेण उपनमदर्थता समाप्तेष्टार्थता सैव गुण उत्कर्षः तस्मात्तृणीकृतः सुपर्वपर्वतोऽवधीरितसुराचलः न केवल मौन्नत्येनापि तु सम्पदापि मेरोरधिक इत्यर्थः ॥ ४ ॥

धूपितमिति। यस्य सौधस्य उदराम्बरमभ्यन्तराकाशश्चिरं नित्यं मेचकैः कृष्णै रगुरुणः सारदारुभिः सारयुक्तकाष्ठै धूँपितं तद्धूमवासितमित्यर्थः। किञ्च जालजालेषु गवाक्षसमूहेषु धृतैः स्थितैः चन्द्रचन्दनक्षोदैः कर्पूरश्रीखण्डनचूर्णैः मेदुरेण सान्द्रेण समीरेण वायुना शीतलम् ॥ ५ ॥

कापीति। कामशरः कर्पूर इति प्रसिद्धेः तेन वृत्ताः निष्पन्ना

कुङ्कुमैणमदपङ्कलेपिताः क्षालिताश्च हिमवालुकाम्बुभिः ।
रेजुरध्वततशैलजस्रजो यस्य मुग्धमणिकुट्टिमा भुवः ॥ ७ ॥
नैषधाङ्गपरिमर्द्दमेदुरामोदमार्द्दवमनोज्ञवर्णया ।
यद्भुवः क्वचन सूनशय्ययाऽभाजि भालतिलकप्रगल्भता ॥ ८ ॥
क्वापि यन्निकटनिष्कुटस्फुटत्कोरकप्रकरसौरभोर्म्मिभिः ।
सान्द्रमभ्रियत भीमनन्दिनी नासिकापुटकुटीकुटुम्बिताम् ॥ ९ ॥

वर्त्तयो दशा यासान्ताः । अन्यत्र कामबाणात्मना इत्यर्थः । महान्ति सुरभितैलानि यासान्ता दीपिकाः स्मरस्य स्फुरतो दोःप्रतापनिकरस्य भुजतेजोमण्डलस्याङ्कुराणां श्रीरिव श्रीर्यासान्ताः सत्यः यं सौधं क्वापि वितिमिरन्तमोरहितन्तेनिरे चक्रिरे ॥ ६ ॥

कुङ्कुमेति । कुङ्कुमैणमदयोः काश्मीरकस्तूरिकयोः पङ्केन लेपिताः दिग्धाः हिमवालुकाम्बुभिः कर्पूरोदकैः क्षालिता धौताः सिताभ्रो हिमवालुकेति कर्पूरपर्य्यायेत्यमरः । अध्वसु प्रवेशमार्गेषु तता विस्तृता शैलजस्य शैलेयस्य शिला कुसुमाख्यगन्धद्रव्यस्य स्रजो यासु ताः यस्य सौधस्य मुग्धाः सुन्दरा मणीनां कुट्टिमाः कुट्टिमरूपभुवः कुट्टिमोऽस्त्री निबद्धा भूरिति यादवः । चूतवृक्षवत् सामान्ये विशेषभावाद पौनरुक्त्यं समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारः ॥ ७ ॥

नैषधेति । नैषधस्य नलस्याङ्गपरिमर्द्देन मेदुराः सान्द्राः आमोदो मार्द्दवं मनोज्ञं वर्णाश्च यस्याः तया क्वचन स्थितः सूनशय्यया कुसुमशयनेन यस्य सौधस्य भुवो भालतिलकप्रगल्भता ललाटिकालक्ष्मीरभाजि प्राप्तेति निदर्शनालङ्कारः ॥ ८ ॥

क्वापीति । क्वापि क्वचित्प्रदेशे यस्य सौधस्य निकटे निष्कुटे गृहारामे स्फुटतां कोरकप्रकराणां कलिकानिवहानां सौरभोर्म्मिभिः परिमलपरम्पराभिः भीमनन्दिनी भैमी नासिकापुटानां कुटीकुटुम्बितां गार्हस्थ्यं सान्द्रं निरन्तरमभ्रियत अधारि नन्दनविहारसुखमनुभूयते तयेति भावः ॥ ९ ॥

ऋद्धसर्व्वऋतुवृक्षवाटिकाकीरलूनसहकारशीकरैः।
यज्जुषः स्वकुलमुख्यमाशुगो घ्राणवातमुपदाभिरर्च्चति ॥१०॥
कुत्रचित् कनकनिर्मिताखिलः क्वापि यो विमलरत्नजः किल।
कुत्रचित् रचितचित्रशालिकः क्वापि चाऽस्थिरविधैन्द्रजालिकः ॥११॥
चित्रतत्तदनुकार्य्यविभ्रमाधायिनैकविधरूपरूपकम्।
वीक्ष्य यं बहु धुवन् शिरो जरा वातकी विधिरकल्पि शिल्पिराट् ॥१२॥
भित्तिगर्भगृहगोपितैर्जनैर्यः कृताद्भुतकथादिकौतुकः।
सूत्रयन्त्रजविशिष्टचेष्टयाऽऽश्चर्य्यसञ्जिबहुशालभञ्जिकः ॥१३॥

ऋद्धेति। आशुगः पवनस्पर्शाविति यादवः। स्वकुलमुख्यं स्वकुलश्रेष्ठं यज्जुषः सौधसेविनो जनस्य घ्राणवातं निश्वासमारुतं रुद्धा अवरुद्धा रुध्यतेः कर्म्मणि क्तः। ऋद्धाः समृद्धा वा ऋद्धतेः कर्त्तरि क्तः। ते सर्वे ऋतवो यस्यां ऋत्यक इति प्रकृतिभावः। तस्य वृक्षवाटिकायां कीरैः शुकैः लूनानां खण्डितानां सहकाराणां शीकरैरेवोपपदाभिः उपायनैरर्च्चति पूजयति स्म ॥१०॥

कुत्रचिदिति। यः सौधः कुत्रचित् प्रदेशे कनकनिर्मितमखिलं यस्य सः क्वापि प्रदेशे विमलरत्नेभ्यो जातः स तज्जः किल कुत्रचिद्भागे रचिताश्चित्राः शालिका यस्य सः क्वापि च भागे क्वापि च भागान्तरे अस्थिरविधाभिः क्षीणप्रकारैरिन्द्रजालिक इन्द्रजालवान् मत्वर्थीयष्ठन्। प्रतिक्षणमन्ययान्यथा न्यथा प्रतीयमान इत्यर्थः ॥११॥

चित्रेति चित्रेषु आलेख्येषु तेषां अनुकार्य्याणां अभिनयानां राजर्षिमनुष्यादीनां विभ्रमं विलासि आधायीनि उत्पादकानि रूपानि नानाप्रकारस्वरूपाणि रूपकाणि प्रतिमा यस्मिन् तं यं सौधं वीक्ष्य बहु यथा तथा शिरोधुवन् कम्पयन्। शिल्पिराट् राजशिल्पी विधिः स्रष्टा जरया वातकी वातरोगी वातातिसाराभ्यां कुकच् इतीनिप्रत्ययः कुगागमश्च। अकल्पि अतर्कि आश्चर्य्यावेशात् तदाशिरः कम्पित मित्यर्थः ॥१२॥

भित्तीति। यः सौधो भित्तिगर्भेषु ये गृहास्तेषु गोपितैः गुप्तैर्जनैः

तामसीष्वपि तमीषु भित्तिगैरत्नरश्मिभिरमन्दचन्द्रिकः ।
यस्तपेऽपि जलयन्त्रपातुकासारदूरधुततापतन्द्रिकः ॥ १४ ॥
यत्र पुष्पशरशास्त्रकारिका शारिकाध्युषितनागदन्तिका ।
भीमजानिषधसार्वभौमयोः प्रत्यवैक्षत रते कृताकृते ॥ १५ ॥
यत्र मत्तकलविङ्कशारिकाश्लेष्यकेलिपुनरुक्तिवत्तयोः ।
क्वापि दृष्टिभिरवापि वापिकोत्तंसहंसमिथुनस्मरोत्सवः ॥ १६ ॥

कृतमद्भुतकथादिकौतुकः चित्रकथावर्णनादिविनोदो येन सः स्वयमेव सौधः कथयतीति भ्रान्तिकर इत्यर्थः । कौतूहलं विनोदः स्यात् कुतुकञ्च कुतूहलं इति हलायुधः । किञ्च सूत्राणां यन्त्रेण जाता तया तज्जया विशिष्टचेष्टया हसितनिमेषोन्मेषादिचेष्टाविशेषेणाश्चर्यं सञ्जयन्ति कुर्वन्तीति तत्सञ्जिन्यो बह्व्यः शालभञ्जिका दारुपुत्त्रिकाः यस्य सः ॥१३॥

तामसीष्विति । यः सौधः तामसीषु तमस्विनीष्वपि अण् प्रकरणे ज्योत्स्नादिभ्य इत्युपसङ्ख्यानान्मत्वर्थीयोऽण्प्रत्ययः । तमीषु रात्रिषु भित्तिगैः कुड्यगतैरत्नरश्मिभिः मणिप्रभाभिः अमन्दा चन्द्रिका यस्य सः यस्तपेऽपि ग्रीष्मेऽपि जलयन्त्रेभ्यः पातुकैः पतनशीलैः आसारैः सम्पातैर्दूरंधुता तापतन्द्रिका यस्य सः ॥१४॥

यत्रेति । यत्र सौधे पुष्पशरशास्त्रस्य कारिका कर्त्री शारिकाभिः पक्षिविशेषैः । वाचाला मुखरा शारीति यादवः । अध्युषिता अधिष्ठिता नागदन्तिका भित्तिनिर्गता दारुविशेषो यस्य दन्तिका नागदन्ताः स्युरिति यादवः । भैमीनलयोरते कृताकृते प्रत्यवैक्षत इदं कृतमिदं सुकृतमिति अनुसन्दधे ॥ १५ ॥

यत्रेति । यत्र सौधे क्वापि प्रदेशे तयो भैमीनलयोः दृष्टिभिर्वापिकोत्तंसानां दीर्घिकालङ्काराणां हंसमिथुनानां स्मरोत्सवः सुरतकेलिः मत्तैः कलविङ्कैः चटकैः शारिकाभिश्च आश्लेष्य केलिभिः ग्राम्यक्रीडाभिः पुनरुक्तवत् पुनरुक्तिमद्यथा तथा अपि वा तत्तुल्यमदर्शीत्यर्थः ॥ १६ ॥

यत्र वैणरववैणवस्वरै र्झङ्कृतैरुपवनीपिकालिनाम्।
कङ्कणालिकलहैश्च नृत्यतां गोपितं सुरतकूजितं तयोः॥ १७॥
कृष्णसारमृगशृङ्गभङ्गुरा स्वादुरुज्ज्वलरसैकसारणिः।
नानिशं त्रुटति यत्र पुरः पुरा किन्नरीविकटगीतिझङ्कृतिः॥१८
भित्तिचित्रलिखिताखिलक्रमा यत्र तस्थुरितिहाससङ्कथाः।
पद्मनन्दनसुतारिरंसुतामन्दसाहसहसन्मनोभुवः॥ १९॥

यत्रेति। यत्र सौधे वैणैर्वीणासम्बन्धिभी रवैः वैणवैः वेणुसम्बन्धिभिः स्वरैः उपवन्या आरामेऽपि पिकानामलिनां भृङ्गाणाञ्च झङ्कृतैः झङ्कारैश्च नृत्यतां नर्त्तकीजनानां कङ्कणालिकलहैः भूषणकलहैः भूषणावलीकलकलैश्च तयोर्दम्पत्योः सुरतकूजितं मणितादिकूजितं गोपितं तिरस्कृतम् अतो न विस्रम्भविघात इति भावः॥ १७॥

कृष्णेति। कृष्णसारमृगस्य शृङ्गवद्भङ्गुरा भङ्गवती एकत्र तयोच्चारणादन्यत्र स्वभावादितिभावः। अतएवोज्ज्वलरसस्य शृङ्गाररसस्य शृङ्गारः शुचिरुज्ज्वल इत्यमरः। एका मुख्या सारणिः कुल्या किन्नरीणां प्रवीणगायकानां विकटा विपुला गीतस्य झङ्कृतिः झङ्कारात्मस्वरः अनुकारिशब्दोऽय मनिशं नित्यं पुरा न त्रुटति न त्रुटिता न विच्छिन्नेत्यर्थः। पुरा लुङ् च स्म इति भूते लुङ् अत्र गीतझङ्कृतेः शृङ्गाररसस्मरणीयत्वेन रूपणाद्रूपकालङ्कारः॥ १८॥

भित्तीति। पद्मनन्दनस्य ब्रह्मणः सुतया रिरंसुता रन्तुमिच्छुता सैवानन्दं महत्साहसं तेन हसन् स्वप्रयाससाफल्यसन्तोषात् स्मयमानो मनोभूः कामो यासु ताः इतिहाससङ्कथा इतिहासोक्तवृत्तान्ता यत्र सौधे भित्तिषु चित्रलिखिताः अखिलाः क्रमा विशेषा यावन्ताः सत्यस्तस्थुः॥ १९॥

पुष्पकाण्डजयडिण्डिमायितम् यत्र गौतमकलत्रगामिनः ।
पारदारिकविलाससाहसं देवभर्तुरुदटङ्कि भित्तिषु ॥ २० ॥
उच्चलत्कलरवालिकैतवाद्वैजयन्तविजयार्जिता जगत् ।
यस्य कीर्त्तिरवदायति स्म सा कार्त्तिकीतिथिनिशीथिनीस्वसा ॥ २१
गौरभानुगुरुगेहिनीस्मरोद्भूतभावमिति वृत्तमाश्रिताः ।
रेजिरे यदजिरेऽभिनीतिभिर्नाटिकाभरतभारतीसुधा ॥ २२ ॥
शम्भुदारुवनसम्भुजिक्रियामाधवव्रजवधूविलासयोः ।
गुम्फितैरुशनसा सुभाषितैर्यस्य हाटकविटङ्कमङ्कितम् ॥ २३ ॥

पुष्पेति । पुष्पकाण्डस्य पुष्पेषोः जयडिण्डिमायितं तद्वदाचरितम् उपमानादाचरक्यजन्तात्कर्तरि क्तः । गौतमकलत्रगामिनोऽहल्यागन्तुर्देवभर्तुरिन्द्रस्य परदारान् गच्छतीति पारदारिकः गच्छतौ परदारादिभ्य इत्युपसङ्ख्यानात् ठक् । तस्य विलासो विजृम्भणं तदेव साहसं यत्र सौधभित्तिषु उदटङ्कि उट्टङ्कित मुन्मीलितम् ॥ २० ॥

उच्चलदिति । कृत्तिकाभिर्नक्षत्रेण युक्ता पौर्णमासी कार्त्तिकी नक्षत्रेण युक्तः काल इत्यण् । सैव तिथि स्तस्या निशीथिनी रात्रिस्तस्याः स्वसा भगिनी सदृशीत्यर्थः । वैजयन्तस्येन्द्रप्रासादस्य विजयेनार्जिता स्यात् प्रासादो वैजयन्त इत्यमरः । उच्चलत्कलरवाणां उड्डीनपारावतानां आलिकैतवाच्छ्रेणीव्याजादित्यपह्नवभेदः । यस्य कीर्तिः कान्तिः जगदवदायति स्म तेऽपि तावन्त स्तत्र सन्तीति भावः दैपो लटि त्वास्यायादेशः ॥ २१ ॥

गौरिति । गौरभानोश्चन्द्रस्य गुरुगेहिन्यां बृहस्पतिपत्न्यां स्मरस्योद्भूतभावन्तुच्छं खलत्वं तदेवेति वृत्तं वर्ण्यत्वमाश्रितास्तद्वर्णनपरा इत्यर्थः । भरतभारतीसुधाः भरतशास्त्रसारभूताः नाटिकाः रूपकविशेषाः चतुरङ्कात नाटिकेति उक्तलक्षणात् । यस्य सौधस्याजिरे प्राङ्गणे अभिनीतिभिरभिनयैः रेजिरे शुशुभिरे ॥ २२ ॥

शम्भ्विति । यस्य सौधस्य हाटकस्य विटङ्कं हिरण्मयकपोत-

अह्नि भानुभुवि दासदारिकां यच्चरः परिचरन्तमुज्जगौ।
कालदेशविषयासहस्मरादुत्सुकं शुकपितामहं शुकः ॥ २४ ॥
नीतमेव करलभ्यपारतामप्रतीर्य्य मुनयस्तपोऽर्णवम्।
अप्सरःकुचघटावलम्बनात् स्थायिनः क्वचन यत्र चित्रगाः ॥२५॥
यत्र वीक्ष्य नलभीमसम्भवे मुह्यतोर्रतिरतीशयोरपि।
स्पर्द्धयेव जयतोर्ज्जयाय ते कामकामरमणी बभूवतुः ॥ २६ ॥

पालिका हिरण्यं हेम हाटकं कपोतपालिकायान्तु विटङ्कं पुंनपुंसकमिति चामरः। शम्भोर्दारुवने देवदारुवने सम्भुजिक्रिया सम्भोगविहारः माधवस्य कृष्णस्य व्रजवधूविलासो गोपाङ्गनाविहारः व्रजो गोभूमिषु इति यादवः। तयोर्विषये उशनसा गुम्फितैः विरचितैः सुभाषितैः सूक्तैरङ्कितं शुक्रविरचितशिवकृष्णाचरितं तत्र लिखितमित्यर्थः ॥ २३ ॥

अह्नीति। यच्चरो यः सौधचारी शुकः कीरः कालदेशविषयाणामसहात् योग्यायोग्यविचाराक्षमात् स्मरात् कामवशादुत्सुकमासक्तमतएव अह्नि न रात्रौ भानुभुवि यमुनायां न विविक्ते कालिन्दी सूर्यतनया यमुना शमनस्वसा इत्यमरः। दासदारिकां कैवर्तकन्यां सत्यवतीमित्यर्थः। नतु कुलीनां कैवर्ते दास धीवरावित्यमरः। परिचरन्तं रमयन्तं शुकपितामहं पराशरमुज्जगौ गायति स्म शुको व्याससुते कीर इति विश्वः ॥ २४ ॥

नीतमिति। करलभ्यपारतां करप्राप्यपारत्वं आसन्नफलत्वञ्च नीतमेव तीर्णप्रायमेव तपोऽर्णवमप्रतीर्य्य तरणाद्विरत्येत्यर्थः। अप्सरसां कुचएव घटाः कुचघटाः घटः कुचनिभावस्त्रीत्यमरः। तेषामवलम्बनात् स्थायिनो विश्रान्ताः तरणश्रान्ताः घटादिकमवलम्ब्य विश्राम्यन्तीति भावः। एवम्भूता मुनयो यत्र सौधे क्वचन प्रदेशे चित्रगाः स्थिता इत्यर्थः ॥ २५ ॥

यत्रेति यत्र सौधे नलभीमसम्भवे नलभैम्यौ वीक्ष्य मुह्यतो रसूयतोः

तत्र सौधसुरभूधरे तयोराविरासुरथ कामकेलयः।
ये महाकविभिरप्यवीक्षिताः पांशुलाभिरपि ये न शिक्षिताः॥२७॥
पौरुषं दधति योषिता नले स्वामिनि श्रिततदीयभावया।
यूनि शैशवमतीर्णया कियत् प्रापि भीमसुतया न साध्वसम् २८
दूत्यसङ्गतिगतं यदात्मना प्रागशिश्रवदियं प्रियं गिरः।
तं विचिन्त्य विनयव्ययं ह्रिया न स्म वेद करवाणि कीदृशम्२९

अतएव स्पर्द्धया मत्सरेणैव जयतोरभिभवतोः रतिरतीशययोरपि जयायाभि भवाय ते नलदमयन्त्यौ कामकामरमणी बभूवतुः तज्जयाय स्वयमन्ये ततोऽप्युत्कृष्टे कामतद्रमण्यौ बभूवतुः ते अतिशय्य स्थिते इत्यर्थः अभूततद्भावे च्विः॥ २६॥

तत्रेति अथ तत्र सौधसुरभूधरे प्रासादमेरौ तयोः भैमीनलयोः कामकेलयः कामक्रीडाविहाराः आविरासुः आविर्बभूवुः प्रादुराविः शब्दयोः कृभ्वस्तिपरनियमात्त्वाप्रत्ययवत् कृभ्वस्तिग्रहणसामर्थ्यात् नास्ति भूभावः। ये केलयः अस्त्री केलिः परिहारः स इति यादवः। महाकविभिर्वात्स्यायनशास्त्रज्ञै रप्यवीक्षिताः अदृष्टा ये पांशुलाभिः साधारणीभिरपि न शिक्षिता नाभ्यस्ताः॥ २७॥

पौरुषमिति। पौरुषं पुरुषत्वं युवादित्वादण्प्रत्ययः। दधति दधाने स्वामिनि पत्यौ यूनि नले विषये क्रमाद्योषितां श्रित स्तदीयभाव स्तदधीनत्वं यया तया अस्वतन्त्रया शैशवमतीर्णया अद्याप्यनि.शेषितबाल्यया कर्तरि क्तः। भीमसुतया साध्वसं सङ्गमभयं कियच्च प्रापि महदेव प्रापीत्यर्थः। तच्च रसीभवतः स्थायिनः कार्य्यं पत्युरत्यानन्दकरञ्चेति प्रपञ्चितं कुमारसम्भवसञ्जीवन्यां भावसाध्वसपरिग्रहादित्यत्र। अत्र भयहेतुनाऽनागतपौरुषादीनां त्रयाणां भैमीगतस्त्रीत्वादीनां त्रयाणाञ्च यथासङ्ख्यं सम्बन्धाद्यथासङ्ख्यालङ्कारः॥ २८॥

दूत्येति। प्राक् पूर्वं दूत्ये दूत्यकर्मणि सङ्गतिगत मिन्द्रदूत्यावस्था-

यत्तया सदसि नैषधः स्वयं प्राग्वृतः सपदि वीतलज्जया ।
तन्निजं मनसिकृत्य चापलं सा शशाक न विलोकितुं नलम् ॥३०
आसने मणिमरीचिमांसले यां दिशं स परिरभ्य तस्थिवान् ।
तामसूयितवतीव मानिनी न व्यलोकयदियं मनागपि ॥ ३१ ॥
ह्रीसरिन्निजनिमज्जनोचितं मौलिदूरनमनं दधानया ।
द्वारि चित्रयुवतिश्रिया तया भर्तृहूतिशतमश्रुतीकृतम् ॥ ३२ ॥

मागतं प्रियं नलमात्मनोगिरः अशिश्रवत् श्रावयति स्मेति श्रावयतेर्णौ चङ्युपधाया ह्रस्वे सन्वद्भाववचःस्रुतिः शृणोतीत्यादिना विकल्पादभ्यासस्येत्वम् । तं विनयव्ययं विनयलोपं विचिन्त्यानुस्मृत्य ह्रिया सा भैमी कीदृशं करवाणीति न वेद स्म इति इतिकर्तव्यतामूढाभवत् ॥ २९ ॥

यदिति । किञ्च प्राक् पूर्वं सपदि वीतलज्जयाविलज्जया तया भैम्या सदसि नैषधः स्वयं वृत इति यन्निजमात्मीयं तत् स्वयम्वरणरूपं चापलं मनसिकृत्य हृदि निधाय अनित्याधाना उरसि मनसीति समासे ल्यबादेशः । सा भैमी नलं विलोकितुं न शशाक ॥ ३० ॥

आसन इति । स नलो मणिमरीचिभिः मांसले सान्द्रे आसने मणिपीठे यां दिशं परिरभ्य तस्थिवान् । यद्दिशाभिमुख्येनास्थित इत्यर्थः । मानिनी इयं दमयन्तीति तां प्रियपरिरब्धां दिशमसूयितवतीव, सापत्न्यादीर्ष्यतीवेत्युत्प्रेक्षा । मनागीषदपि न व्यलोकयत् नलं तु किमु वक्तव्यमिति भावः ॥ ३१ ॥

ह्रीति । ह्रीसरिदिति निजं निमज्जनं तस्योचितं तदनुभावत्वात्तस्येति भावः । मौलेर्मूर्ध्नो दूरनमनं दधानया द्वारि द्वारदेशे चित्रयुवतेः श्रीरिव श्रीर्यस्यास्तया तद्वन्निश्चलयेत्यर्थः । तया भैम्या भर्तुर्नलस्य हूतिशतमाह्वानशतमश्रुतीकृतम् अभूततद्भावे च्विः । ह्रिया प्रियं न किञ्चिदप्युवाचेत्यर्थः ॥ ३२ ॥

वेश्म पत्युरविशन्न साध्वसाद् वेशितापि शयनं बभाज न ।
भाजितापि सविधं न सास्वपत् स्वापितापि न च सम्मुखाभवत्३३
आत्मनापि हरदारसुन्दरी यत् किमप्यभिललाष चेष्टितुम् ।
स्वामिना यदि तदर्थमर्थिता मुद्रितस्तदनया तदुद्यमः ॥ ३५ ॥
ह्रीभराद्विमुखया तया भियं सञ्चितामननुरागशङ्किनि ।
स स्वचेतसि लुलोप संस्मरन् दूत्यकालकलितं तदाशयम् ॥३५॥
पार्श्वमागमि निजं सहालिभिस्तेन पूर्व्वमथ सा तयैकया ।
क्वापि तामपि नियुज्य मायिना स्वात्ममात्रसचिवावशेषिता॥३६

वेश्मेति। सा भैमी साध्वसात्पत्युर्वेश्म नाविशन् वेशिता कथञ्चित् सखीभिः प्रवेशिता शयनं तल्पं न बभाज न भेजे भाजिता प्रापितापि सविधं समीपं अत्यन्तसंयोगे द्वितीया। नास्वपत् न निदद्रौ स्वापितापि समीपे निद्रापितापि संमुखा अभिमुखो नाभवन्न बभूव एतेन नवोढाया मौग्ध्यात् लज्जाविजितमन्मथत्व मुक्तम् ॥ ३३ ॥

आत्मनेति। हरदाराः पार्व्वतीव सुन्दरी सा आत्मना स्वयमपि यत्किमपि चेष्टितुं यत्किञ्चन कर्तुमभिललाष स्वामिना पत्या तदर्थं तत्कारणार्थं मर्थिता यदि प्रार्थिता चेत्तर्हि अनया भैम्या तदुद्यमस्तस्य नलस्योद्यमो मुद्रितः प्रतिबद्धो भवति स्वयं विकीर्षितमपि न करोतीत्यर्थः ॥ २४ ॥

ह्रीभरादिति। स नलः ह्रीभराद्विमुखया तया भैम्या अननुरागशङ्किनि वैमुख्यदर्शनादनुरागाभावशङ्किनि स्वचेतसि सञ्चितां संक्रामितां भियं दूत्यकाले कलित मवगत तस्या आशयं चित्तवृत्तं संस्मरन् लुलोप तदनुरागस्यानुसन्धानेन भयं नुनोदेत्यर्थः ॥ २५ ॥

पार्श्वमिति। मायिना कपटपटुना तेन नलेन सा भैमी पूर्व्वसालिभिर्वह्लीभिः सखीभिः सह निजं पार्श्वं समीपमागमि आगमिता

सन्निधावपि निजे निवेशितामालिभिः कुसुमशस्त्रशास्त्रवित् ।
आनयद्व्यवधिमानिव प्रियामङ्कपालिवलयेन सन्निधिम् ॥ ३७ ॥
प्रागचुम्बदलिके ह्रियानतां तां क्रमाद्दरनतां कपोलयोः ।
तेन विश्वसितमानसां झटित्यानने स परिचुम्ब्य सिस्मिये ॥ ३८ ॥
लज्जया प्रथममेत्य हुङ्कृतः साध्वसेन बलिनाथ तर्जितः ।
किञ्चिदुच्छ्वसित एव तद्धृदि न्यग्बभूव पुनरर्भकः स्मरः ॥ ३९ ॥
वल्लभस्य भुजयोः स्मरोत्सवे दित्सतोः प्रसभमङ्कपालिकाम् ।
एककश्चिरमरोधि बालया तल्पयन्त्रणनिरन्तराङ्गया ॥ ४० ॥

गमेर्ण्यन्तात्कर्मणि लुङ् मित्त्वाद्ध्रस्वत्वम् । अथैकया तया आल्या सद्भावशेषिता अथ तामेकामपि क्वापि नियुज्य स्वात्ममात्रं स्वयमेव सचिवोऽन्तिकचरो यस्याः सा अवशेषिता विविक्तमकरोदित्यर्थः ॥ ३६ ॥

सन्निधाविति । कुसुमशस्त्रशास्त्रवित् कामशास्त्रपारगः स आलीभिर्निजे सन्निधौ निवेशितामपि प्रियां विविच्य व्यवधिमानिवासन्निहित इव अङ्कपालिः प्रयोज्यः तद्वलयेन तत्रापि चालिङ्गनपूर्वमानयदिति कामशास्त्रादिति भावः ॥ ३७ ॥

प्रागिति । प्राक् पूर्वं अलिके ललाटपट्टके अचुम्बत् अतः ह्रिया नतां नम्रमुखीं क्रमात् दरनतां किञ्चिदुन्नमितमुखीमित्यर्थः । तां कपोलयोश्च गण्डयोः अचुम्बत् तेन विश्वसितमानसां विस्रब्धचित्तां तां दमयन्तीं झटिति द्रागानने मुखे परिचुम्ब्य सिस्मिये स्मितवान् अतु प्रवेशलाभादिति भावः ॥ ३८ ॥

लज्जयेति । स्मर एवार्भकोऽडिम्भः अप्रगल्भावस्थत्वात्तथा रूपणम् । तस्याः हृदि किञ्चिदुच्छ्वसित एव पूर्वोक्तचुम्बनद्युपलालनेन किञ्चिदुच्छ्वसितः सन्नेव पुनर्लज्जया ह्रिया एत्यागत्य हुङ्कृतः हुङ्कारेण वारितः अथ तथाप्युच्छ्वसने बलिना ततोऽपि प्रबलेन साध्वसेन त्रासेन ध्वंसा तर्जितो भर्त्सितः सन् न्यग्बभूव सञ्चुकोच ॥ ३९ ॥

वल्लभस्येति । स्मरोत्सवे सुरते प्रसभं बलात् अङ्कपालिका मालिङ्गनं

हारसाध्विमविलोकने मृषाकौतुकं किमपि नाटयन्नयम्।
कण्ठमूलमदसीयमस्पृशत् पाणिनोपकुचधाविना धवः॥ ४१॥
यत्त्वयास्मि सदसि स्रजाञ्चितस्तन्मयाऽपि भवदर्हणार्हति।
इत्युदीर्य निजहारमर्पयन्नस्पृशत् स तदुरोजकोरकौ॥ ४२॥
नीविसीम्नि निहितं स निद्रया सुभ्रुवो निशि निषिद्धसम्विदः।
कम्पितं शयमपासयन्निजं दोलनैर्जनितबोधयाऽनया॥ ४३॥

संपरीरम्भ आश्लेषो परिष्वङ्ग उपगूहनम्। आलिङ्गनमपि क्रोड़ीकरणं चाङ्कपाल्यपीति यादवः। दित्सतोर्दातुमिच्छतो रालिङ्गनप्रवृत्तयो रित्यर्थः। ददातेः सनन्तात्लटः शत्रादेशः सनि मीमेत्यादिना इत्वेऽभ्यासलोपः। वल्लभस्य भुजयोरेकक एकाकी भुजः असहाये कन्प्रत्ययः। तल्पयन्त्रणे तल्पाश्लेषणे निरन्तरालया अव्यवधानया निरन्तराश्लिष्टतल्पयेत्यर्थः। बालया चिरमरोधि निरुद्धः तल्पमाश्लिष्य करमरुणदित्यर्थः ॥४०॥

हारेति। धवः पतिरयं नलः हारस्य साध्विम्नो रमणीयकस्य विलोकने किमपि मृषा कौतुकं नाटयन्नुपकुचं कुचसमीपे धावतीति तद्धाविना कुचसङ्घर्षिणा पाणिना अमुष्या इदम् अदसीयं त्यदादित्वाद्वृद्धाच्छः। कण्ठमूलमस्पृशत् ॥ ४१ ॥

यदिति। हे प्रिये! यद्यस्मात्त्वया सदसि स्रजा वरणमालया अञ्चितः पूजितोऽस्मि अञ्चेः पूजायामितीडागमः नाञ्चेः पूजायामित्यनुनासिकलोपप्रतिषेधः। तन्मयापि भवत्या अर्हणा पूजा सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। अर्हति युज्यते इत्युदीर्य निजं हारं समर्पयन् स नलस्तस्या उरोजकोरकौ कुचकुड्मलावस्पृशत् ॥ ४२ ॥

नीवीति। स नलो निशि निद्रया निषिद्धसंविदो लुप्तसंज्ञायाः सुभ्रुवः प्रियायाः नीविसीम्नि नीवीप्रदेशे निहितं कम्पितं कम्पमिति सात्त्विकोक्तिः। निजं शयं पाणिं दोलनैः पाणिव्यापारैः जनितबोधया प्रबुद्धया अनया प्रियया प्रयोज्यया अपासयत् निरासयामास ॥ ४३ ॥

स प्रियोरुयुगकञ्चुकांशुके न्यस्य दृष्टिमथ सिस्मिये नृपः।
आववार तदथाम्बराञ्चलैः सा निरावृतिरिव त्रपावृता॥ ४४ ॥
बुद्धिमान् व्यधित तां क्रमादयं किञ्चिदित्थमपनीतसाध्वसाम्।
किञ्चि तन्मनसि चित्तजन्मना ह्रीरनामि धनुषा समं मनाक् ॥ ४५
सिस्मिये हसति तेन न स्म सा प्रीणितापि परिहासभाषणैः।
स्वे हि दर्शयति ते परेण काऽनर्घ्यदन्तकुरुविन्दमालिके ॥ ४६ ॥
वीक्ष्य भीमतनयास्तनद्वयं मग्नहारमणिमुद्रयाङ्कितम्।
सोढकान्तपरिरम्भगाढता सा त्वमानि सुमुखी सखीजनैः ॥ ४७ ॥

स इति। स नृपः प्रियाया ऊरुयुगस्य कञ्चुके वर्मभूते अंशुके दृष्टिं न्यस्य सिस्मिये स्मितवान् तदेव दृष्टवानिति भावः। अथ सापि निरावृतिरिव आवरणरहितेव साक्षाद्दृष्टोरुयुगेवेत्यर्थः। अतएव त्रपावृता लज्जामग्ना इति तदूरुयुगमम्बराञ्चलैर्वस्त्रान्तैराववार आवृतमप्यनावृतमितीवावृणोदिति त्रपातिशयोक्तिः ॥ ४४ ॥

अथ शनैर्मौग्ध्यत्यागात् मध्यमावस्थां प्रापितेत्याह बुद्धिमानिति। बुद्धिमानुपायज्ञोऽयं तां प्रियां क्रमादित्थं सूक्तरीत्या किञ्चिदपनीतसाध्वसामपसारितभयां व्यधित विहितवान् किञ्च चित्तजन्मना कामेन तस्या मनसि ह्रीर्धनुषा समं मनागनामि मित्वाभावपश्चाद्वृद्धिः। शनैर्लज्जान्यथाकारेण कामः स्वयम् उत्थित इत्यर्थः। अत्र हि नमनधनुर्नमनयोः कार्यकारणयोः पौर्वापर्य्येण सहोक्त्यलङ्कारः ॥ ४५ ॥

सिस्मिय इति। सा तेन परिहासभाषणैः परिहासोक्तिभिः प्रीणिता हर्षितापि प्रीङो ण्यन्तात्कर्मणि क्तः धूञ्प्रीञोर्नुक्वक्तव्यः। सिस्मिये न तु हसति स्म स्मितमेवाकरोत् न तु हसितमिति गाम्भीर्य्योक्तिः। हसितं लक्ष्यदशनं स्मितमिति भेदः। तथा हि का स्त्री दन्ता एव कुरुविन्दाः पद्मरागाः कुरुविन्दस्तु मुक्तायां पद्मरागे द्वे। अनर्घ्ये सुशोभने तन्मालिके स्वे आत्मीये ते द्वे परेण दर्शयति ॥ ४६ ॥

वीक्ष्येति। भग्नानां निष्पीडनादन्तःप्रविष्टानां हारमणीनां

याचते स्म परिधापिकाः सखीः सा स्वनीविनिविडक्रियां यथा।
अन्वमिन्वत तथा विहस्य ता वृत्तमत्र पतिपाणिचापलम् ।४८।।
कुर्व्वती निचुलितं ह्रिया कियत् सौहृदाद्विवृतसौरभं कियत् ।
कुड्मलोन्मिषितसूनसेविनीं पद्मिनीं जयति सा स्म पद्मिनी।४९।
नाविलोक्य नलमासितुं स्मरो ह्रीर्न वीक्षितुमदान्मृगीदृशः ।
तद्दृशः पतिदिशाचलन्नथ व्रीडिताः समकुचन्मुहुः पथः ॥५०॥

मुद्रया पदेनाङ्कितं भीमतनयस्तनद्वयं वीक्ष्य सखीजनैः सुमुखी सा भैमी सोढः कान्तस्य यः परिरम्भस्तस्य गाढता दार्ढ्यं यया सा सत्यमानि गाढं परिरब्धेति अनुमितेत्यर्थः ॥ ४७ ॥

याचत इति। यया परिधापिकाः वस्त्रबन्धिनीः सखीः स्वस्यात्मनो नीवेर्निविड़क्रियां दृढ़बन्धं याचते स्म तथा ताः सख्योविहस्य अत्र नीविदेशे पत्युः पाणिचापलमाकर्षणं वृत्तं भूतमन्वमिन्वत अनुमितवत्यः। अन्यथैतत्प्रार्थनानुपपत्तेरिति भावः मिनोतेर्लङि तङ् ॥ ४८ ॥

कुर्वतीति। पद्मिनी पद्मिनीजातिः स्त्री कमलिनी च सा भैमी कियद्रात्रिवृत्तं ह्रिया निचुलितं निगूहितं कियत् सुहृदयस्य भावात्सौहार्दात् स्नेहाद्युवादित्वादण्प्रत्ययः। हृदयस्य हृल्लेख यदण्लासेषु इति हृद्भावान्नोभयपदवृद्धिः। विवृतं सौरभं मनोज्ञत्वं सौगन्ध्यञ्च यस्य तच्च कुर्वती कुड्मलोन्मीषितानि च सूनानि सेवत इति तत्सेविनीं तद्वन्तीं पद्मिनीं कमलिनीं जयति स्म तद्वद्भावित्यर्थः ॥ ४९ ॥

नेति। स्मरः मृगीदृशः सुभ्रुवो भैम्याः नलम् अविलोक्यासितुं नादात् ह्रीः वीक्षितुं नादात् तदा तस्याः दृशो दृष्टयः पत्युर्दिशा तन्मार्गेण मुहुरचलन् अथ व्रीड़िताः सत्यः पथस्तन्मार्गात्समकुचन् सङ्कुचिताः ॥ ५० ॥

नेति। अनया भैम्या पतिर्नेत्रयोर्लक्ष्यतां विषयतामपि नानायि न नीतः तथा परोक्षतां विषयतामपि नानायि कुतः यद्यस्माद्विलोकने

नानया पतिरनायि नेत्रयोर्लक्ष्यतामपि परोक्षतामपि ।
वीक्ष्यते स खलु यद्विलोकने तत्र तत्र नयने ददानया ॥ ५१ ॥
वासरे विरहनिःसहा निशां कान्तयोगसमयं समैहत ।
सा ह्रिया निशि पुनर्दिनोदयं वाञ्छति स्म पतिकेलिलज्जिता ५२
तत् करोमि परमभ्युपैषि यन्मा ह्रियं व्रज भियं परित्यज ।
आलिवर्ग इव तेऽहमित्यमूं शश्वदाश्वसनसूचिवान्नलः ॥ ५३ ॥
येन तन्मदनवह्निना स्थितं ह्रीमहौषधिनिरुद्धशक्तिना ।
सिद्धिमद्भिरुदतेजि तैः पुनः स प्रियप्रियवचोऽभिमन्त्रणैः ॥ ५ ॥

निमित्ते तत्र तत्र नयने ददानया तेषु तेषु विषयेषु दत्तदृष्ट्या तया वीक्ष्यते स्म खलु अवर्जनीयतया वीक्षितएव प्राय इति भावः ॥ ५१ ॥

वासर इति । सा भैमी वासरे विरहस्य निःसहा इति पचाद्यच् । ह्रिया कान्तयोगसमयं प्रियसमागमकालं निशां समैहत ऐच्छत निशि पुनः पत्युः केलिषु लज्जिता सती दिनोदयं दिनप्रादुर्भावं वाञ्छति स्म ॥ ५२ ॥

तदिति । हे प्रिये ! तत्प्रियं तदेव करोमि यदभ्युपैषि अङ्गीकरोषि ह्रियं न व्रज भियं परित्यज अहन्ते आलिवर्गः सखीजनइव इत्यमूं प्रियां नलः शश्वन्मुहुर्मुहुः पुनः पुनः शश्वदित्यमरः । आश्वसनं सान्त्ववचन सूचिवान् ॥ ५३ ॥

येनेति । येन तन्मदनवह्निना तस्याः कामाग्निना ह्रीरेव महौषधिस्तया निरुद्धशक्तिना प्रतिबद्धशक्तिना सता स्थितं तस्थे भावे क्तः । स कामाग्निः सिद्धिमद्भिः सिद्धिशक्तिकैस्तैः पूर्वोक्तैः प्रियस्य पत्युः प्रियवचोभिरेवाभिमन्त्रणैर्मन्त्रप्रयोगैः पुनरुदतेजि उत्तेजितन्तिजनिशातन इतिधातोर्ण्यन्तात् कर्मणि लुङ् । औषधप्रतिबद्धोऽग्निः प्रतिमन्त्रेण प्रकृतिस्थो भवतीति भावः रूपकालङ्कारः ॥ ५४ ॥

यद्विधूय दयितार्पितं करं दोर्द्वयेन पिदधे कुचौ दृढम्
पार्श्वगं प्रियमपास्य सा ह्रिया तं हृदि स्थितमिवालिलिङ्ग तत्५५
अन्यदस्मि भवतीं न याचिता वारमेकमधरं धयामि ते ।
इत्यसिस्वददुपांशुकाकुवागुपमर्द्दं हठवृत्तिरेव तम् ॥ ५६ ॥
चुम्बनादिषु बभूव नाम किं तद्वृथा भयमिहापि मा कृथाः ।
आलपन्निति तदीयमादिमं स व्यधत्त रसनावलिव्ययम् ॥५७॥
अस्तिवाम्यभरमस्तिकौतुकं सास्तिघर्मजलमस्तिवेपथु ।
अस्तिभीति रतमस्तिवाञ्छितं प्रापदस्तिसुखमस्तिपीडनम् ॥५८॥

यदिति । सा भैमी दयितेनार्पित करं विधूय दोर्द्वयेन भुजयुगेन कुचौ दृढं यथा तथा यत्पिदधे आच्छादयामास तत्तस्मात् ह्रिया पार्श्वगं वहिःसमीपस्थं प्रियं अपास्य निरस्य हृदि स्थितन्तमालिलिङ्गेव आलिङ्गवती किमित्युत्प्रेक्षा ॥ ५५ ॥

अन्यदिति । हे प्रिये ! भवती मन्यत्किमपि याचिता अर्थयिता त्वन् दुह्यादित्वाद्द्विकर्मता । नास्मि किन्तु एकवारं सकृतं ते तवाधरं धयामि पिवामि धेटः प्रार्थनायां लोटोमिप् । इतीत्थमुपांशु मन्दङ्काकुवागविकृतस्वरोक्तिः सोऽयं नलः उपमर्द्दे हठवृत्तिर्बलात्कारवृत्तिर्यस्य स एव सन् तमधरमसिस्वदत् स्वादितवान् स्वदेर्णौ चङ्युपधाया ह्रस्वः ॥ ५६ ॥

चुम्बनेति । हे प्रिये ! चुम्बनादिषु कृतेषु किं नामानिष्ट बभूव न किञ्चिदित्यर्थः । तत्तस्मादिह करिष्यमाणेऽपि वृथा भियं माकृथाः, इत्युदीर्य अयं नलः मृगदृशः प्रियायाः आदिममाद्यं आदेश्चेति वचनान्मप्रत्ययः । रशनावलिव्ययं काञ्चीमोचनञ्चकार ॥ ५७ ॥

अस्तीति । सा भैमी अस्तिवाम्यस्य सर्वत्र वक्रतायाः भरः आत्यन्तिकत्वं यस्मिन् तत् सम्बन्धिकारे अस्तिक्षीरादिवचनमिति बहुव्रीहिः । एवमुत्तरत्रापि द्रष्टव्यं कौतुकमौत्सुक्यं घर्मजलं स्वेदः वेपथुः कम्पः सा-

ह्रीस्तवेयमुचितैव यन्नवस्तावके मनसि मत्समागमः।
तत्तु निस्त्रपमजस्रसङ्गमाद्व्रीडमावहति मामकं मनः ॥५९॥
इत्युपालभत सम्भुजिक्रियारम्भविघ्नघनलज्जितैर्जिताम्।
तां तथा स चतुरोऽथ सा यया त्वमुमेव तमनु त्रपामयात् ॥६०॥
प्रातरात्मशयनाद्विनिर्यतीं सन्निरुध्य यदसाध्यमन्यदा।
तन्मुखार्पणसुखं सुखं भुवोजम्भजित्क्षितिशचीमचीकरत् ॥६१॥

ष्विकमात्रोपलक्षणं एतद्धि विदितं ममेदं मामकं मनस्तु सपत्नीवसङ्गमाद्वाञ्छितं मनोरथसुखमालिङ्गनादौ पीड़ितं नखदन्तक्षतादिएवम्भूतरतं प्रापत् ॥ ५८ ॥

ह्रीरिति। हे प्रिये! तवेयं ह्रीरुचितैव यद्यस्मात्तावके मनसि मत्समागमो मत्सङ्गति र्नवः साम्प्रतिकः तत् निस्त्रपं निर्लज्जं मामकं मदीयं मनः अजस्रसङ्गमान्नित्यसमागमादेव व्रीडमावहेति ॥ ५९।

इतीति। सम्भुजिक्रियारम्भस्य सम्भोगव्यापारोपक्रमस्य विघ्नैः प्रतिबन्धकैः घनलज्जितैर्निविड़व्रीडैः भावे क्तः। जितान्तां प्रियाञ्चतुरः स नवस्तथा उपालभत यथा सा प्रिया तमनु तं प्रति त्वमुमेव उदित्वा द्विकलादिदभावः। त्रपाभयात् उक्तोपालम्भभयात् त्रपाञ्जहावित्यर्थः ॥ ६० ॥

प्रातरिति। भुवो जम्भजित् भूदेवेन्द्रो नलः प्रातरात्मशयनाद्विनिर्यतीं निर्गच्छन्तीं क्षितिशचीम्भूलोकेन्द्राणीन्तां प्रियां संनिरुध्य अन्यदा अनन्तरक्षणे असाध्यमलभ्यं सखीमेलनादिति भावः। तदनुभूतचरं सुखार्पणसुखं सुखचुम्बनप्रमुखं सुखमचीकरत् तथा कारयामासेत्यर्थः। करोतेर्णौ च ङ्युपधाह्रस्वादिकोऽन्यतरस्यामिति विकल्पादणिकर्तुः कर्मत्वं ॥ ६१ ॥

नायकस्य शयनादहर्मुखे निर्गता मुदमुदीक्ष्य सुभ्रुवाम् ।
आत्मना निजनवस्मरोत्सवस्मारिणीयमहृणीयत स्वयम् ॥६३॥
तां मिथोऽभिदधतीं सखीं प्रियस्यात्मनश्च स निशाविचेष्टितम् ।
पार्श्वगः सुरवरात् पिधां दधद् दृश्यतां श्रुतकथो हसन् गतः ॥६४॥
चक्रदारविरहेक्षणक्षणे बिभ्यती धवहसाय साभवत् ।
क्वापि वस्तुनि वदत्यनागतं चित्तमुद्यदनिमित्तवैकृतम् ॥६५॥

नायकस्येति । अहर्मुखे जषसि रोः सुपीत्यह्नो नकारस्य रेफादेशः । नायकस्य शयनान्निर्गता इत्थं भैमी सुभ्रुवां सखीनां मुदं स्वसम्भोगदर्शनजन्य मितिभावः । उदीक्ष्य आत्मना मनसा निजं नवं स्मरोत्सवं विस्रम्भसम्भोगं स्मरतीति तत् स्मारिणी सती स्वयमेवाहृणीयत तत्प्रकाशनादजिहत् त्रपायां ह्रीश्चेति जिह्रेति लज्जते हृणीयते इति भट्टमल्लः । कण्ड्वादियगन्तत्वाल्लङ् । तत्र हृणीङिति ङित्करणादात्मनेपदम् ॥ ६३ ॥

तामिति । स नलः प्रियस्य पत्युरात्मनश्च निशाविचेष्टितं रात्रिवृत्तं मिथोरहसि सखीरभिदधती सखीभ्यः कथयन्ती ब्रुवेरर्थवत्त्वाद् द्विकर्मकत्वम् । तां प्रियां पार्श्वगः समीपस्थो हसन् सुराणामिन्द्रादीनां वराद्वरप्रसादात् पिधामन्तर्धां आतश्चोपसर्गे इत्यङ् प्रत्ययः । वष्टि भागुरिरल्लोप मित्यकारलोपः । दधत् श्रुतकथः श्रुतप्रियावचनः सन् दृश्यतां गतः ॥ ६४ ॥

अथास्याः प्रियविरहासहिष्णुतामाह चक्रेति । चक्रदाराणां रात्रौ चक्रवाकवनितायाः विरहेक्षणक्षणे वियोगदर्शनकाले बिभ्यती स्वयं त्रसन्ती सा भैमी धवस्य प्रियस्य हसायाभवत् अकाण्डत्रासाज्जहासेत्यर्थः । स्वनहसोर्वेति विकल्पादप्प्रत्ययः । अथवा युक्तं भयमित्यत आह । क्वापीति । क्वापि कुत्र विजने अनागतं वस्तु आगाम्यर्थ एव उद्यदुत्पद्यमानमनिमित्तवैकृतमाकस्मिकविकारो यस्य तत्तादृक् चित्तं

चुम्बितुं न मुखमाचकर्ष यत् पत्युरन्तरमृतं ववर्ष तत्।
सा नुनोद न भुजं यदर्पितं तेन तस्य किमभून्न तर्पितम् ॥६६॥
नीतयोः स्तनपिधानतां तया दातुमाप भुजयोः करं परम्।
वीतबाहुनि ततो हृदंशुके केवलेऽप्यथ स तत्कुचद्वये ॥६७॥
याचनान्न ददतीं नखार्पणं तां विधाय कथयान्यचेतसम्।
वक्षसि न्यसितुमात्ततत्करः स्वं बिभेद मुमुदे स तन्नखैः ॥६८॥
स प्रसह्य हृदयापवारकं हर्त्तुमक्षमत सुभ्रुवो बहिः।
ह्रीमयं न तु तदीयमान्तरं तद्विनेतुमभवत् प्रभुः प्रभुः ॥ ७९ ॥

वदतीत्यर्थः। चक्रविरहदर्शनात् बुद्ध्या स्फुटोनिज आगामिप्राभातिकविरहएव हेतुभूत इतितात्पर्य्यार्थः ॥ ६५ ॥

चुम्बितुमिति। सा प्रिया चुम्बितुं मुखं न आचकर्ष इति यत्तदनाकर्षणं पत्युरन्तरन्तःकरणे अमृतं ववर्ष तत्तुल्यमित्यर्थः। अर्पितमुपरिन्यस्तं भुजं न नुनोद न निरास तेनाङ्गीकारेण तस्य नलस्य सम्बन्धि किं न तर्पितमभूत् नाप्यायितं सर्वाङ्गसन्तर्पणमभूदित्यर्थः ॥ ६६ ॥

नीतयोरिति। स नलः तया स्तनपिधानतां नीतयोस्तद्दोर्युगे ततो नीतबाहुन्यपसारितभुजे हृदंशुके स्तनोत्तरीये अथ केवले अपसारितांशुके तत्कुचद्वयेऽपि परं भृशं करं दातुमर्पयितुमाप करदानमापेत्यर्थः। अत्रैकस्य करस्य क्रमादनेकेषु भुजांशुककुचेषु वृत्तिकथनात्क्रमेणैकमनेकस्मिन्नित्याद्युक्तलक्षणः पर्यायालङ्कारभेदः ॥ ६७ ॥

याचनादिति। याचनादर्थनान्नखार्पणं न ददतीं नखक्षतमकुर्वन्तीं प्रियां कथया केनचित्कथाव्याजेन चितिपूज्येत्यादिना अङ् प्रत्ययः। अन्यमानसां व्यासक्तचित्तां विधाय वक्षसि स्वोरसि न्यसितुमात्ततत्करो गृहीतप्रियाकरः सन् तन्नखैः प्रियानखैः स्वमात्मानं बिभेदाभिनत् व्यदारयत् ननन्द च ॥ ६८ ॥

स इति। प्रभुः स्वामी स नलः सुभ्रुवः बहिर्बाह्यहृदयापवारक-

स स्मरेण बलिनाप्यहापिता ह्रीक्षमे भृशमशोभताबला।
भाति चापि वसनं विना न तु व्रीडधैर्य्यपरिवर्जने जनः ॥७०॥
आत्थ नेति रतयाचितं न चेन्मामतोऽनुमतवत्यसि स्फुटम्।
इत्यमुं तदभिलापनोत्सुकं धूनितेन शिरसा निरास सा ॥७१॥
या शिरोविधुतिराह नेति ते सा मया न किमियं समाकलि।
तन्निषेधसमसङ्ख्यताविधिर्व्यक्तमेव तव वक्ति वाञ्छितम् ॥७२॥

मुत्तरीयं प्रसह्य हर्तुं अक्षमत तदीयं दमन्तीय मान्तरं अन्तर्वर्त्ति ह्रीमयं नतु तद्धृदयापवारकं विनेतु मनुनेतुं प्रभुः समर्थोऽभवत् ॥ ६९ ॥

सेति। बलिना स्मरेण ह्रीक्षमे लज्जाधैर्य्ये अहापिता अत्याजिता जहातेर्ण्यन्तात् सन्वद्भावे द्विकर्मकादप्रधाने कर्मणि क्तः। सा अबला भृशमशोभत तथा हि जनो वसनं विनापि भाति व्रीड़धैर्य्ययोः परिवर्जने परित्यागे तु न भाति इति न शोभते नतु निर्लज्जधैर्य्या इति भावः ॥ ७० ॥

आत्थेति। हे प्रिये! रतयाचितं सुरतभिक्षां मां नेति नात्थ न च ब्रवीषि चेत् ततः प्रतिषेधात् स्फुटं व्यक्तमनुमतवत्यसि अप्रतिषिद्ध मनुमतं भवतीति न्यायात् इति भावः। इतीत्थं तस्या अभिलापने उत्सुकममुं प्रियं सा भैमी धूनितेन कम्पितेन धूङ्प्रीञोर्नुग्वक्तव्यः। शिरसा निरास अहो अत्यन्ताभिमतार्थेऽपि निषेधशीलता स्त्रीणामिति भावः ॥ ७१ ॥

येति। हे प्रिये! या ते शिरोविधुतिः कर्त्री नेत्याह निषेधं ब्रूते सेयं शिरोविधुतिर्मया समकलि गृहीतार्थैवेत्यर्थः। कलयतेः कर्मणि लुङ्। तस्य शिरोविधुतिरूपस्य निषेधस्य समसङ्ख्यता विषमेतरसङ्ख्यता सैव विधिः द्वौ नञौ प्रकृतमर्थं ब्रूत इति न्यायात्तव वाञ्छितमभिलाषं व्यक्तमेव वक्ति वचेर्लट् निषेधार्थमपि शिरोविधूननं व्यर्थमेव भवतीत्यर्थः ॥ ७३ ॥

नात्थ नात्थ शृणवानि तेन किं ते न वाचमिति तां निगद्य सः।
सास्म दूत्यगतमाह तं यथा तज्जगाद मृदुभिस्तदुक्तिभिः ॥७३॥
नीविसीम्नि निबिडं पुरारुणत् पाणिनाथ शिथिलेन तत्करम्।
सा क्रमेण न न नेति वादिनी विघ्नमाचरदमुष्य केवलम् ॥७४॥
रूपवेषवसनाङ्गवासनाभूषणादिषु पृथग्विदग्धताम्।
सान्यदिव्ययुवतिभ्रमक्षमा नित्यमेत्य तमगान्नवा नवा ॥७५॥

नेति। हे प्रिये! नात्थ नात्थ नालपसि सम्भ्रमे द्विरुक्तिः। तेनानालपनेन ते तव वाचं न शृणवानि किं न शृणुयां किं शृणुयामेवेत्यसम्भावनानिषेधः। तां प्रियां निगद्य स नलः सा प्रिया दूत्यगतं दूत्यावस्थां गतं तमात्मानं यथा येन प्रकारेणाह स्म उक्तवती तत् सर्वं मृदुभिस्तस्याः उक्तिभिः जगादेत्यर्थः। तदा तथा निःशङ्कत्वमालम्ब्य सम्प्रति किमर्थं त्वया सङ्कुचसीत्यर्थः ॥ ७३ ॥

नीवीति। सा प्रिया नीविसीम्नि वस्त्रग्रन्थिदेशे तत्करं प्रियहस्तं पुरा प्रथमं पाणिना निबिडं भृशं अरुणत् रुद्धवती रुन्धतेः कर्त्तरि लङ्। क्रमेण केवलं अथ शिथिलेन मनाक् चलितेन पाणिना नननेति वादिनी वाचिकनिषेधमेव कुर्वती अमुष्य प्रियकरव्यापारस्य विघ्नमाचरत् क्रमात् प्रियकरव्यापारमसहिष्टेत्यर्थः। अत्रैकस्मिन् नीविदेशे क्रमादनेकव्यापारसम्बन्धोक्तिपर्यायालङ्कारभेदः ॥ ७४ ॥

रूपेति। रूपं सौन्दर्यं वेषं नेपथ्यं वसनं वस्त्रं अङ्गवासना धूपादिना शरीरसंस्कारः भूषणं कङ्कणादि तान्यादि येषां तेषु शोभासाधनेषु पृथग्विदग्धतां विलक्षणशोभां नित्यमेत्य अतएव नवा नवा आभीक्ष्ण्ये नित्यार्थे द्विर्भावः। सा भैमी अन्या काचित् दिव्या युवतिरिति भ्रमे भ्रान्तिजनने क्षमा समर्था सेति तं नलम् अगात् इणो गा लुङ् ॥ ७५ ॥

इङ्गितेनेति। सा भैमी इङ्गितेन कटाक्षवीक्षणादिचेष्टितेन निजं रागसागरं चटुभिः प्रियवादैः गुणज्ञतां पतिगुणाभिज्ञतां परिचर्यया

इङ्गितेन निजरागसागरं संविभाव्य चटुभिर्गुणज्ञताम् ।
भक्तताञ्च परिचर्य्ययानिशं साधिकाधिकवशं व्यधत्त तम् ॥७६॥
स्वाङ्गमर्पयितुमेत्य वामतां रोषितं प्रियमथानुनीय सा ।
आतदीयहठसम्बुभुक्षुतां नान्वमन्यत पुनस्तमर्थिनम् ॥७७॥
आद्यसङ्गमसमादराण्यधाद्वल्लभाय दधती कथञ्चन ।
अङ्गकानि घनमानवामताव्रीड़लम्भितदुरापतानि सा ॥७८॥
पत्युरागिरिशमातरु क्रमात् स्वस्य चागिरिजमालतं वपुः ।
तस्य चार्हमखिलं पतिव्रता क्रीड़ति स्म तपसा विधाय सा ॥७९॥

भक्ततां भक्तिमत्त्वञ्चानिशं संविभाव्य सम्यग्ज्ञापयित्वा ण्यन्तासिचिरूपं। तं प्रियम् अधिकाधिकवश मत्यन्तवशंम्वदं प्रकारे गुणवचनस्येति द्विरुक्तिः कर्मधारयवद्भावात् सुपोलुक् । व्यधत्त इङ्गिताद्यनुमितैः रागा-द् द्विगुणै स्तस्याः सोऽत्यन्तवशम्वदोऽभूदित्यर्थः ॥ ७६ ॥

स्वाङ्गमिति। सा दमयन्ती स्वाङ्ग मर्पयितुं वामतां वक्रता मेत्याथ रोषितं प्रियमनुनीय प्रसाद्य अथार्थिन मङ्गार्पणकाङ्क्षिणं तं प्रियं तदीया प्रियसम्बन्धिनी या हठाद्बलात् संबुभुक्षुता सम्भोक्तुमिच्छा तावत्पर्यन्त मातदीयहठसम्बुभुक्षुताम् आङ्मर्यादाभिविध्योरित्यव्ययीभावेन नपुंसकह्रस्वत्वम्। नान्वमन्यत रुष्टप्रियप्रसादनमात्रे स्वयं प्रवृत्तिः न सम्भोगे सत्यपि रागवेग इति भावः ॥ ७७ ॥

आद्येति। सा प्रिया घनै र्निविडैर्मानवामताव्रीडैः कोपवक्रतामन्दाक्षैर्लम्भिता प्रापिता दुरापता दौर्लभ्यम् येषां तानि दुर्लभान्यङ्गानि कथञ्चन कृच्छ्रेण वल्लभाय दधती धारयन्ती आद्यसङ्गमेन हेतुना सादराणि तल्पाकाङ्क्षाण्यधात् दधार अर्पितवतीत्यर्थः ॥ ७८ ॥

पत्युरिति। पतिव्रता सा दमयन्ती तपसा अस्खलितचारित्ररूपेण क्रमात्पत्युर्नलस्य आगिरिशं गिरिशं ईश्वर मारभ्य आतरु तरुपर्यन्तं स्वस्यात्मनश्च आगिरिजं गिरिजा मम्बिकाम् आरभ्य आलतं

न स्थली न जलधिर्न काननं नाद्रिभूर्न विषयो न विष्टपम्।
क्रीड़िता न सह यत्र तेन सा सा विधैव न यया यया न वा॥८०॥
नम्रयांशुकविकर्षिणि प्रिये वक्त्रवातहृतदीप्रदीपया।
भर्तृमौलिमणिदीपितास्तया विस्मयेन ककुभो निभालिताः॥८१॥
कान्तमूर्ध्नि दधती पिधित्सया तन्मणेः श्रवणपूरमुत्पलम्।
रन्तुमर्चनमिवाचरत् पुरः सा स्ववल्लभतनोर्मनोभुवः॥८२॥
तं पिधाय मुदिताथ पार्श्वयोर्वीक्ष्य दीपमुभयत्र सा स्वयोः।
चित्तमाप कुतुकाद्भुतत्रपातङ्कसङ्कटनिवेशितस्मरम्॥ ८३॥

लतापर्य्यन्तं सर्वत्राभिविधावव्ययीभावः । वपुर्देवगन्धर्वोरगनगविहगादिद्वन्द्वशरीरं तथा तस्य वपुषोऽर्हं मनुरूप मखिलं क्रीड़ायाः साधनञ्च विधाय निर्माय क्रीड़ति स्म निरङ्कुशमहिमत्वात्पतिव्रतानामिति भावः॥ ७९ ॥

नेति। सा भैमी तेन नलेन सह यत्र न क्रीडिता न क्रीडितवती कर्त्तरि क्तः। सा स्थली अकृत्रिमभूमिः नास्ति जानपदेत्यादिना अकृत्रिमार्थे ङीप्। एवं स जलधिर्नास्तीति योज्यं। विषयो देशः किञ्च सा विधा प्रकारः न नास्ति यया विधया क्रीडितवती नवा धेनुकादिमन्यप्रकारेण तेन सह विजहारेत्यर्थः॥ ८० ॥

नम्रेति। प्रिये अंशुकविकर्षिणि सति नम्रया नतया वक्त्रवातेन फुत्कारेण हृतदीप्रदीपया तया भैम्या भर्त्तृमौलिमणिना दीपिता प्रकाशिताः ककुभो दिशो विस्मयेन निभालिताः दृष्टाः॥ ८१ ॥

कान्तेति। सा प्रिया तस्य मणेः पिधित्सया पिधातुमिच्छया कान्तस्य मूर्ध्नि श्रवणपूरमुत्पलं दधती सती रन्तुं रतिकर्म कर्त्तुं पुरः कर्मादौ स्ववल्लभएव तनुर्यस्य तस्य नलमूर्त्तेर्मनोभुवः कामस्य रत्यधिदैवतस्यार्चन माचरदिवेत्युत्प्रेक्षा॥ ८२ ॥

तमिति। सा भैमी तं शिरोमणिं पिधाय कर्णोत्पलेनाच्छाद्य मु-

एककस्य शमने परं पुनर्जाग्रतं शमितमप्यवेक्ष्य तम् ।
जातवह्निवरसंस्मृतिः शिरः सा विधूय निमिमील केवलम् ॥८४॥
पश्य भीरु ! न मयापि दृश्यसे यन्निमेषितवती दृशावसि ।
इत्यनेन परिहस्य सा तमः सन्निधाय समभोजि लज्जिता॥८५॥
चुम्ब्यसेऽयमयमङ्क्यसे नखैः श्लिष्यसेऽयमयमर्प्यसे हृदि ।
नो पुनर्न करवाणि ते गिरं ङं त्यज त्यज तवास्मि किङ्करा ८६

दिता अथ स्वयोरुभयतोभयोः पार्श्वयोर्दीपं वीक्ष्य कुतुकं कौतुकम् अद्भुतालोकनादद्भुतञ्च निर्वापितस्य पुनः प्रादुर्भावात्त्रपा वस्त्राकर्षणात् आतङ्कः शङ्का भीतिर्वा पुरुषसन्निधानात् तेषां सङ्कटः सम्बाध स्तत्र निवेशितः निरुद्धः स्मरो यस्मिन् तत्तादृक् चित्तम् आप तथा प्रवृद्धोऽपि काम स्तदा किञ्चित् सङ्कुचित इवासीदित्यर्थः ॥ ८३ ॥

एककेति । एककस्य दीपस्य शमने निर्वापणे सति शमितमपि पूर्ववन्निर्वापितमपि पुनर्जाग्रतं नवं मायया ज्वलन्तं नाभ्यस्ताच्छतुरिति नुमः प्रतिषेधः । अपरन्तं दीप मवेक्ष्य सा जाता वह्नेर्वरस्य या दाहपाकौपयिकी तनु रित्यादिनोक्तवरदानस्य संस्मृतिर्यस्याः सा सती शिरो विधूय कम्पयित्वा दुर्वारत्वं निश्चित्येत्यर्थः । निमिमील केवलं स्वयं निमीलिताक्षी जाता भीरूणामेष स्वभाव इति भावः ॥ ८४ ॥

पश्येति । हे भीरु ! भयशीले ! भियः क्रुक्लुकनाविति क्रुप्रत्ययः । मयापि न दृश्यसे पश्य यद्यस्माद्दृशौ निमेषितवती निमीलितवती असि तदितीत्यमनेन नर्मेन परिहस्य लज्जिता सा तमः अन्धकारं सन्निधाय समभोजि सम्भुक्ता अन्यथा भुक्तानां दुराराध्यत्वादिति भावः ॥ ८५ ॥

अथान्धकारकल्पनायाः फलं युग्मेनाह चुम्ब्यस इत्यादि । मायिनी वचनचतुरा सा भैमी अयं चुम्ब्यसे नखै रङ्क्यसे चिह्न्यसे अयं श्लिष्यसे अयं हृदि हृदये अर्प्यसे पुनस्ते तव गिरमाज्ञां न नो करवाणि करवाण्येव ङमिति निवारणे त्यज त्यज तव किङ्करा दास्यस्मि किं यत्तत् वङ्क्षु वर्जविधान मित्यङ्प्रत्यये टाप् ॥ ८६ ॥

इत्यलीकरतकातरा प्रियं विप्रलभ्य सुरते ह्रियं च सा।
चुम्बनादि विततार मायिनी किं विदग्धमनसामगोचरः ॥८७॥
स्वेप्सितोद्गमितमात्रलुप्तया दीपिकाचपलया तमोघने।
निर्विशङ्करतजन्मतन्मुखाकूतदर्शनसुखान्यभुङ्क्त सः ॥८८॥
यद्भ्रुवौ कुटिलिते तया रते मन्मथेन तदनामि कार्मुकम्।
यत्तु हुं हुमिति सा तदा व्यधात्तत् स्मरस्य शरमुक्तिहुङ्कृतम्॥८९
ईर्ष्यितोपदिशतीव नर्तितुं तत्क्षणोदितमुदं मनोभुवम्।
कान्तदन्तपरिपीडिताधरा पाणिधूननमियं वितन्वती ॥९०॥

इति। इतीत्थं अलीकं यथा तथा रतकातरा रतकातर्यं नाटयन्ती ह्रियं प्रियञ्च विप्रलभ्य प्रतार्य सुरते चुम्बनादि विततार ददौ तथा हि विदग्धमनसां कुशलधियां किमगोचरः अविषयः किं किमसाध्यमित्यर्थः। प्रियवाक्यभीतेर्विस्रब्धं विजहार आपत्काले नास्ति मर्यादेति न्यायादिति भावः ॥ ८७ ॥

स्वेति। स नलः तमएव घनो मेघस्तस्मिन् स्वेप्सितेन स्वेच्छया उद्गमितैवोत्पादितैवोद्गमितमात्रा सा च सा लुप्ता च तया तथोक्तया क्षणिकया दीपिकैव चपला विद्युत् विद्युच्चञ्चला चपलापि चेति यादवः। तया निर्विशङ्करताज्जन्म येषां तेषां तस्याः सुखाकूतानां सुखचेष्टितानां दर्शनाद्यानि सुखानि तान्यभुङ्क्त स्थिरप्रकाशे तद्विस्रम्भविघातभयात् क्षणिकप्रकाशेन तच्च अन्वभुङ्क्त दर्शनसुखमन्वभूदित्यर्थः ॥ ८८ ॥

अथ चेष्टितान्येवाह यदित्यादि। तया रते भ्रुवौ कुटिलिते नखदन्तादिपीडनेषु वक्रिते तदेव मन्मथेन कार्मुकमनामि नमितं सा तदा तत्काले हुंहुमिति यदकरोत् सुखातिरेककृततद्धुङ्कृतं स्मरस्य शरमुक्तिहुङ्कृतं बाणमोचकालहुङ्कारं तत्सर्वं तस्योद्दीपकमभूदित्यर्थः ॥ ९० ॥

ईर्ष्यितेति। कान्तस्य दन्तैः परिपीडिताधरा अतएव पाणिधूननं

सा शशाक परिरम्भदायिनी गाहितुं वृहदुरः प्रियस्य न ।
चक्षमे स च न भङ्गुरभ्रुवस्तुङ्गपीनकुचदूरतां गतम् ॥ ९१ ॥
वाहुवल्लिपरिरम्भमण्डली या परस्परमपीड़यत्तयोः ।
आस्त हेमनलिनीमृणालजः पाश एव हृदयेशयस्य सः ॥ ९२ ॥
वल्लभेन परिरम्भपीडितौ प्रेयसीहृदि कुचाववापतुः ।
केलतीमदनयोरुपाश्रये तत्र वृत्तमिलितोपधानताम् ॥ ९३ ॥

वितन्वती इयं दमयन्ती तत्क्षणे विधूननक्षणे उदितमुदं सञ्जातहर्षं मनोभुवं नर्तितु सुपदिशती नृत्यं कुर्वित्युपदिशन्तीव स्थिता आच्छिन्नद्योतुमिति विकल्पानुभवः [illegible] ॥ ९० ॥

सेति । परिरम्भदायिनी आश्लिष्यन्ती सा प्रियस्य वृहद्विशालमुरः अतएव गाहितुम् अभिव्याप्तुं न शशाकेत्याद्याश्रयाधिक्येनाधिकालङ्कारभेदः । स नलस्य भङ्गुरभ्रुवः प्रियाया तुङ्गपीनकुचाभ्यां दूरताङ्गतमुरो गाहितुं न चक्षमे न शशाकेति सम्बन्धेऽप्यसम्बन्धरूपातिशयोक्तिः ॥ ९१ ॥

वाह्विति । तयोः सम्बन्धिनीभ्यां वाहुवल्लिभ्यां परिरम्भः स एव मण्डली वेष्टनं परस्परमपीडयत् स हेमनलिनीमृणालाज्जातस्तज्जः हृदये शेत इति हृदयेशयः कामः अधिकरणे शेतेरित्यच्प्रत्ययः । शयवासवासिष्वकालादित्यलुक् । तस्य पाशः पाशाख्यो बन्ध एवास्त स्थित इत्युत्प्रेक्षा ॥ ९२ ॥

वल्लभेनेति । वल्लभेन प्रियेण परिरभ्याश्लिष्य पीड़ितौ मण्डलीकृतौ कुचौ एव केलती मदनयोरतिकामयो रुपाश्रये अवष्टम्भविशेषे आसन्दिमञ्चकः खट्वोपाश्रयो मत्तवारण इति यादवः । तत्र प्रेयस्याः हृदि वक्षसि वृत्ते वर्त्तुले मिलिते सङ्गते उपधाने उपवर्हे उपधानं तूपवर्हमित्यमरः । तयोर्भावस्तत्ता तां गण्डोपधानतां अवापतुरित्युत्प्रेक्षा ॥ ९३ ॥

तत्प्रियोरुयुगलं नलार्पितैः पाणिजस्य मृदुभिः पदैर्बभौ ।
उत्प्रशस्ति रतिकामयोर्जयस्तम्भयुग्ममिव शातकुम्भजम् ॥९४॥
बह्वमानि विधिनापि तावकं नाभिमूरुयुगमन्तराङ्गकम् ।
स व्यधादधिकवर्णकैरिदं काञ्चनैर्यदिति तां पुराह सः ॥९५॥
पीडनाय मृदुनी विगाह्य तौ कान्तपाणिनलिने स्पृहावती ।
तत्कुचौ कलशपीननिष्ठुरौ हारहासविहृते वितेनतुः ॥ ९६ ॥
या कुरङ्गमदकुङ्कुमाञ्चितौ नीललोहितरुचौ वधूकुचौ ।
स प्रियोरसि तयोः स्वयम्भुवोराचचार नखकिंशुकार्चनम् ॥९७

तदिति । तत्तादृशं प्रियायाः ऊरुयुगलं नलेनार्पितैर्न्यस्तैः मृदुभिः अनातञ्चतैः पाणिजस्य नखस्य पदैश्चिह्नैरुन्नता प्रशस्तिर्यस्य तदुत्प्रशस्ति शातकुम्भजं हिरण्मयं रतिकामयोर्जयस्तम्भयुग्ममिव बभौ इत्युत्प्रेक्षा ॥ ९४ ॥

बह्वीति । हे प्रिये ! नाभिमूरुयुगं चान्तरा तन्मध्यवर्त्ति अन्तरान्तरेण युक्त इति द्वितीया अन्तराशब्दो मध्यमाधेयप्रधानमाचष्ट इति काशिका । तावकमङ्गं वराङ्गं विधिना वेधसापि बह्वमानि बहु मतं कृतः यद्यस्मादिदमङ्गकमधिवर्णकैरुत्कृष्टवर्णैः काञ्चनैः सुवर्णैः व्यधात् किमिति तां प्रियां स नलः पुराह उक्तवान् पुरा लङ् चस्मे इति भूते लट् ॥९५॥

पीड़नायेति । कलशवत्पीनौ निष्ठुरौ कठिनौ च तस्याः कुचौ कर्त्तारौ मृदुनी कोमले तथापि तौ तादृक् कुचौ विगाह्य प्राप्य पीड़नाय पीडनं कर्त्तुं स्पृहावती व्याप्रियमाणेत्यर्थः । कान्तस्य पाणिनलिने करकमले कर्मणी हारएव हासस्तेन विहृते तिरस्कृते वितेनतुश्चक्रतुः अशक्यार्थप्रवृत्ताः परिहासास्पदम्भवन्तीति भावः ॥ ९६ ॥

येति । कुरङ्गमदकुङ्कुमाभ्यां कस्तूरिकाश्मीराभ्यां अञ्चितौ लेपितौ अतएव नीला च सा लोहिता च वर्णो वर्णेनेति तत्पुरुषसमासः । सा रुग्ययो स्तौ नीलः कण्ठे लोहितः केशेष्विति नीललोहितः तस्य रुगिव

अम्बुधेः कियदनुत्थितं विधुं स्वानुबिम्बमिलितं व्यडम्बयत् ।
चुम्बदम्बुजमुखीमुखं तदा नैषधस्य वदनेन्दुमण्डलम् ॥८९॥
पूगभोगबहुताकषायितैर्वासितैरुदयभास्करेण तौ ।
चक्रतुर्निधुवनेऽधरामृतैस्तत्र साधु मधुपानविभ्रमम् ॥ ९९ ॥
आह नाथवदनस्य चुम्बतः सास्म शीतकरतामनक्षरम् ।
सीत्कृतानि सुदती वितन्वती सत्त्वदत्तपृथुवेपथुस्तदा ॥ १०० ॥

रुग्ययो स्तौ वधूकुचौ प्रियायाः उरसि स्वयम्भुवोः स्वत उत्पन्नयोः ईश्वरमूर्त्योश्च तयोः कुचयोः स नलो नखैः नखक्षतैरेव किंशुकैः पलाशकुसुमै रर्चनमाचचारेति गम्योत्प्रेक्षा ॥ ९७ ॥

अम्बुधेरिति । तस्याः अम्बुजमुख्याः प्रेयस्याः मुखं चुम्बत् पिबत् नैषधस्य वदनेन्दुमण्डलं तथा अम्बुधेः कियत् किञ्चिदनुत्थित मीषन्न्यून सुदितं स्वानुबिम्बेन स्वप्रतिबिम्बेन मिलितं यत्तं विधुं इन्दुं व्यडम्बयदनुचकार तथा मुखयोर्मिथः संश्लेषात् कार्त्स्न्येनादृश्यमानत्वादिदमुपमीतम् ॥ ९८ ॥

पूगेति । तौ कामिनौ तत्र निधुवने रते व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतं पूगः क्रमुक इन्दीरिति चामरः । पूगभोगः क्रमुकभक्षणं ताम्बूलचर्वणमिति यावत् । तस्य बहुतया बाहुल्येन कषायितैः सञ्जातकषायरसैः उदयभास्करेण कर्पूरविशेषेण वासितैः सुरभितैः अधरामृतैः साधु मधुपानस्य विभ्रममिव विभ्रमं लीलाञ्चक्रतुरिति सादृश्याक्षेपान्निदर्शनालङ्कारः ॥ ९९ ॥

आहेति । तदा अधरपानकाले सीत्कृतानि वितन्वती वेदनया सीत्कारान् कुर्वती सत्त्वेन दत्तः सर्वगुणक्षतः पृथुवे पथुः कम्पाख्यः सात्त्विको यस्याः सा सुदती भैमी चुम्बतः स्वयं पिबतो नाथवदनस्य प्रियमुखस्य शीतकरतां शीतांशुत्वं शीतकारित्वञ्च कृञो हेत्वित्यादिना ताच्छील्ये टप्रत्ययः । अनक्षर मशब्दमेवाह स्म ज्ञापयामासेत्यर्थः । अन्यथा कथं सीत्कारादिकार्य्यमिति भावः ॥ १०० ॥

चुम्बनाय कलितप्रियाकुचं वीरसेनसुतवक्त्रमण्डलम् ।
प्राप भर्तु ममृतैः सुधांशुना सक्तहाटकघटेन मित्रताम् ॥१०१॥
वीक्ष्य वीक्ष्य पुनरैक्षि सामुना पर्यरम्भि परिरभ्य चासकृत् ।
चुम्बिता पुनरचुम्बि चादरात्तृप्तिरापि न कथञ्च नापि च ॥१०२॥
छिन्नमप्यतनु हारमण्डलं मुग्धया सुरतलास्यकेलिभिः ।
न व्यतर्कि सुदृशा चिरानपि स्वेदविन्दुकितवक्षसा हृदि ॥१०३॥
यत्तदीयहृदि हारमौक्तिकैरासि तत्र गुण एव कारणम् ।
अन्यथा कथममुत्र वर्तितुं तैरशाकि न तदा गुणच्युतैः १०४॥

चुम्बनायेति। चुम्बनायाधरामृतपानाय कलितोहस्तगृहीतः प्रियाकुचोयेन तन्नलमुखविम्बं कर्त्तृ, अमृतैः भर्त्तुं पूरयितुं सक्तो हस्तगतो हाटकस्य कनकस्य घटो यस्य तेन सुधांशुना चन्द्रेण मित्रतां सदृशतां प्राप अमृतसम्भरणार्थं कनककलशहस्त आगतः साक्षादमृतांशुरिवेत्युत्प्रेक्षयामृतकरत्वं व्यज्यत इति अलङ्कारेण वस्तुध्वनिः॥ १०१॥

वीक्ष्येति। असुना नलेन सा प्रिया वीक्ष्य वीक्ष्य मुहुर्वीक्ष्यापि पुनरैक्षि ईक्षिता सा असकृत्परिरभ्यापि पुनः पर्यरम्भि परिरब्धा रभेरशब्लिटोरितिनुमागमः। सा असकृत् चुम्बिताप्यादरात् पुनरचुम्बि चुम्बिता कथञ्चनापि तृप्तिस्तु नापि रागातिरेकादितिभावः सर्वत्र कर्मणि लुङ्॥१०२॥

छिन्नमिति। सुरतान्येवलास्यानि तैरेव केलिभिः छिन्नमप्यतनु महत् हारमण्डलं मुक्ताकलापः स्वेदविन्दवएव विन्दुकाः स्वार्थे कः ते अस्य सञ्जाताः स्वेदविन्दुकितं तारकादित्वादितच्। तद्वक्षो यस्या स्तया मुग्धया सुदृशा भैम्या चिरादपि हृदि चित्ते न व्यतर्कि न व्यभावि स्वेदविन्दुषु हारभ्रमादिति भावः अतएव भ्रान्तिमदलङ्कारः॥ १०३॥

यदिति। तदीये भैमीसम्बन्धिनि हृदि वक्षसि हारमौक्तिकैर्मुक्ताहारैरासि आच्छादीति यत् आसेर्भावे लुङ्। तत्र स्थितौ गुणः

एकवृत्तिरपि मौक्तिकावलिश्छिन्नहारवितती तदा तयोः ।
छाययान्यहृदयेऽपि भूषण श्रान्तिवारिभरभाविते ऽभवत् ।१०७॥
वामपादतललुप्तमन्मथश्रीमदेन मुखवीक्षिणाऽनिशम् ।
भुज्यमाननवयौवनामुना पारसीमनि चचार सा मुदाम् ॥१०८॥
आन्तरानपि तदङ्गसङ्गमैस्तर्पितानवयवानमन्यत ।
नेत्रयोरमृतसारपारणां तद्विलोकनमचिन्तयन्नलः ॥ १०९ ॥

सूत्रं कान्त्यादिश्च सएव कारणम् अन्यथा गुणच्युतैः गुणभ्रष्टैर्हारमौक्तिकै स्तदा तस्मिन् समये अस्तुवास्मिन्वचसि वर्त्तितुं कथं नाशाकि न शक्ताश्च ततोगुणएवात्रकारणं अन्यथापतनप्रसङ्गादनुपादेयत्वाच्चेति भावः ॥ १०६ ॥

एकेति । तदा तत्काले तयोरुभयोर्मध्ये एकस्मिन्नलएव वृत्तिर्यस्याः सापि मौक्तिकावलिः छिन्ना हारविततिर्मुक्ताकलापो यस्य तस्मिन् पुंस्त्वात् पुंवद्भावः । श्रान्तिवारिभरेण स्वेदपूरेण भाविते प्लाविते अन्यस्याः भैम्याः हृदये सर्वनाम्नो वृत्तिमात्रे पूर्ववदस्य पुंवद्भावः । छायया प्रतिविम्बेन विभूषणमभवत् अत्रैकस्यैव हारस्योभयत्र भूषणत्वेनासम्बन्धेऽपि सम्बन्धोक्ते स्तद्रूपातिशयोक्ति रलङ्कारः ॥ १०७ ॥

वामेति । वामपादस्य तलेनाधःप्रदेशेन लुप्तीकृतो मन्मथस्य श्रियो मदः सौन्दर्य्यदर्पो येन तेनानिशं मुखवीक्षिणा अनाकृष्टदृष्टिना अमुना नलेन भुज्यमानं नवयौवनं यस्याः सा भैमी मुदामानन्दानां पारसीमनि चचार परमानन्दमापेत्यर्थः ॥ १०८ ॥

आन्तरानिति । नल स्तस्याः अङ्गसङ्गैर्वाह्यावयवसम्पर्कैरान्तरानवयवांस्तर्पितानाप्यायितानमन्यत तस्याः विलोकनं साक्षात्कारं नेत्रयोः स्वाक्ष्णोरमृतसारपारणाममृतविशेषास्वादमचिन्तयदभावयत् ॥ १०९ ॥

वह्व मन्यतविदर्भजन्मनो भूषणानि सदृशा च चेतसा।
तैरभावि कियदङ्गदर्शने यत्पिधानमयविघ्नकारिभिः॥ ११०॥
योजनानि परिरम्भणेऽन्तरं रोमहर्षजमपि स्म वोधतः।
तौ निमेषमपि वीक्षणे मिथो वत्सरव्यवधिमध्यगच्छताम् ॥१११॥
वीक्ष्य भावमधिगन्तुमुत्सुकां पूर्वमच्छमणिकुट्टिमे मृदुम्।
कोऽयमेत्युदितसम्भ्रमीकृतां स्वानुविम्बमददर्शदेष ताम्॥ ११२॥

वह्विति। स नलो विदर्भजन्मनो वैदर्भ्याः भूषणानि दृशा दृष्ट्या वह्वमन्यत तदीयत्वादिति भावः। चेतसा वह्वमन्यत कुतः यद्यस्मात्तैर्भूषणैः कियताञ्चित् अङ्गानां दर्शने पिधानमयं छादनरूपं विघ्नं कुर्वन्तीति तत्कारिभि रभावि भूतम् अतोभूषणवहुमानी नाति पुष्कल इति भावः॥ ११०॥

योजनानीति। तौ भैमीनलौ परिरम्भणे रोमहर्षाज्जातं तज्जं तन्मात्रमप्यन्तरं योजनानि वोधतः स्म योजनव्यवधान मबुद्धतामित्यर्थः। वोधते र्भौवादिकाद्भूते लट् स्म। इति मिथोऽन्योन्यं वीक्षणे निमेषमपि वत्सरव्यवधिं व्यवधानम् अध्यगच्छतां मन्येते स्म॥ १११॥

अथानयोः च्युतिसुखं पञ्चभिर्वर्णयति वीक्ष्येत्यादि। एष नैषधः मृदुं स्लथावयवाम् अतएव पूर्वमात्मनः प्राक्भावच्युरतिसुखापराख्यकलापात्तसुख मधिगन्तुं प्राप्तुमुत्सुकामिच्छन्तीं तां वीक्ष्य लिङ्गैर्ज्ञात्वा कोऽयमित्युक्तेतिशेषः। उदितः सम्भ्रमो यस्याः सा आतता कृता सम्भ्रमीकृताम् अभूततद्भावे च्विः। तां प्रियाम् अच्छे मणिकुट्टिमे स्वानुविम्बं स्वप्रतिविम्बमददर्शत् दर्शितवान् सत्प्रतिविम्बदर्शनात् भ्रान्त मनयतेति तस्या त्रासमपाचकारेत्यर्थः। दृशेर्णौ चङि णिचश्चेति तङ्। अभिवादि दृशोरात्मनेपद उपसङ्ख्यानादणि कर्त्तुः कर्मत्वम् उभययुगपद्भावप्राप्तये तस्याः प्राक् प्राप्तिव्यासङ्गेन प्रत्यवक्षात् अन्यथा वैरस्यादिति भावः॥ ११२॥

तत्क्षणावहितभावभावितद्वादशात्मसितदीधितिस्थितिः ।
स्वां प्रियानभिमतक्षणोदयां भावलाभलघुतां नुनोद सः ॥११३॥
स्वेन भावभजने स तु प्रियां वाहुमूलकुचनाभिचुम्बनैः ।
निर्ममे रतरहः समापनाशर्मसारसमसंविभागिनीम् ॥ ११४ ॥
विश्लथैरवयवैर्निमीलया लोमभिर्द्रुतमितैर्विनिद्रताम् ।
सूचितं श्वसितसीत्कृतैश्च तौ भावमक्रमजमध्यगच्छताम् ॥११५॥

तदिति। स नलस्तस्मिन् क्षणे अवहितभावेनावहितत्वेन भाविता ध्याता द्वादशात्मसितदीधित्योः सूर्याचन्द्रमसोः स्थितिर्येन सः सन् आत्मनोऽनभिमतक्षणे असंभृतकाले उदयः प्रादुर्भावो यस्यास्तां भावलाभस्य च्युतिसुखप्राप्तेर्लघुतामाशुभावितां नुनोद निवारयामास तत्काले हृदि सोमार्कधारणा सिद्धिरिति रतिरहस्ये अत्र पुंसएव शक्त्याधिक्योक्त्या योषितो वहुशक्तिप्रयुक्तरसाभासशङ्कापि समूलकाषकषितेति द्रष्टव्यम् ॥ ११३ ॥

स्वेनेति। किन्तु स नलो भावभजने स्वस्य च्युतिसुखे प्रसक्ते प्रियां वाहुमूलयोः कुचयोर्नाभौ च चुम्बनैरुपायैः तेन स्वेन सह रतरहसः सुरतरहस्यस्य समापनाशर्मसारे च्युतिसुखोत्कर्षे समसम्विभागिनीं निर्ममे समप्रविभागिनीञ्चक्रे एतेन तयोर्विप्रलम्भवत् सम्भोगस्यापि समानशक्तित्वमुक्तम्भवतीत्यनुसन्धेयम् ॥ ११४ ॥

विश्लथैरिति। तौ द्वौ विश्लथैः शिथिलप्रायैरवयवैः निमीलया निमीलनेन भिदादित्वादङ्। द्रुतं हठाद्विनिद्रतामितैः विकासं प्राप्तैः लोमभिः श्वसितैः निश्वासैः सीत्कारैश्च सूचितं ज्ञापितं स्तब्धता वपुषि मीलनं दृशौ मूर्च्छना चरति लाभलक्षणम्। श्लेषयत् स्वजघनं घनं मुहुः सीत्कृतानि गलगर्जितानि चेत्युक्तत्वादितिभावः। अक्रमं युगपज्जात मक्रमजम्भावस्मात्सुखमध्यगच्छतां प्राप्तवन्तौ एवञ्चोभयोः समरागता सम्भवति अन्यथा पूर्वच्युतस्योत्तरच्याविनि वैराग्येन तद्भङ्गप्रसङ्ग इति भावः ॥ ११५ ॥

आस्त भावमधिगच्छतोस्तयोः सम्मदेषु करजप्रसर्पणा ।
फाणितेषु मरिचावचूर्णना सा स्फुटं कटुरपि स्पृहावहा ॥११६॥
अर्द्धमीलितविलोलतारके सा दृशौ निधुवनक्लमालसा ।
यन्मुहूर्त्तमवहन्न तत् पुनस्तृप्तिरास्त दयितस्य पश्यतः ॥ ११७॥
तत्क्लमस्तमदिदीक्षत क्षणं तालवृन्तचलनाय नायकम् ।
तद्विधाधिभवदैवतं प्रिया वेधसोऽपि विदधाति चापलम् ॥११८॥

आस्तेति। भावं च्युतिसुख मधिगच्छतो स्तयोः सम्मदेष्वानन्दलाभेषु करजप्रसर्पणा नखक्षतकरण मास्त स्थिता सा नखक्षतक्रिया कटुस्तीक्ष्णापि कटुरसापि च रसे कटुः कटु कार्य्ये त्रिषु मत्सरतीक्ष्णयोः इत्यमरः। स्पृहावहा रुचिकरी फाणितेषु विकारेषु मत्स्यण्डी फाणितं खण्डविकार इत्यमरः। मरीचस्यावचूर्णना चूर्णैरवध्वंसना तच्चूर्णक्षेप इत्यर्थः। स्फुटं सत्यापादि ण्यन्तात् ण्यासंश्रथे युच्। येयं सम्मदेषु नखार्पणा सा फाणितेषु मरिचार्पणा तद्वदिष्टैवाभूदित्यर्थः। अत्र वाक्यार्थयो स्तदासयोगेन सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धलक्षणो वाक्यार्थवृत्तिनिदर्शनाभेदोऽलङ्कारः ॥ ११६ ॥

अर्द्धेति। निधुवनक्लमालसा सुरतश्रान्तिमन्थरा सा प्रिया अर्द्धमीलिते इव विलोलतारके च तारकाक्ष्णः कनीनिकेत्यमरः। तादृशौ दृशौ यन्मुहूर्त्त मीषत्काल मवहत्तदवस्थे दृशावित्यर्थः। पश्यतो दयितस्य पुनस्तृप्तिर्नास्त नासीदित्यर्थः ॥ ११७ ॥

तदिति। तस्याः क्लमस्तं नायकं नलं क्षणं तालवृन्तचलनाय व्यजनवीजनाय व्यजनं तालवृन्तक मित्यमरः। अदिदीक्षत दीक्षयति स्म प्रावर्त्तयदित्यर्थः। तथाधिभवदैवतं संसाराधिदेवता अधिश्लाघ्येत्यर्थः तद्विधा तादृशी उक्तप्रकारा क्रिया सुरतश्रान्तिचेष्टा वेधसोऽपि चापलं विदधाति जनयति किमुतान्यस्येतिभावः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ११८ ॥

स्वेदविन्दुकितनासिकाशिखं तन्मुखं सुखयति स्म नैषधम् ।
प्रोषिताधरशयालुयावकं तद्वद्विलुप्तपुलकं कपोलयोः ॥ ११९ ॥
ह्रीणमेव पृथु सस्मरं कियत् क्लान्तमेव वहु निर्वृतं मनाक् ।
कान्तचेतसि तदीयमाननं तत्तदालभत लक्षमादरात् ॥ १२० ॥
स्वेदवारिपरिपूरितं प्रियारोमकूपनिवहं यथा यथा ।
नैषधस्य दृगपात् तथा तथा चित्रमापदपतृष्णतां न सा १२१ ॥
वान्तमाल्यकचहस्तसंयमन्यस्तहस्तयुगया स्फुटीकृतम् ।
वाहुमूलमनया तदुज्ज्वलं वीक्ष्य सौख्यजलधौ ममज्ज सः॥१२२॥

स्वेदेति। स्वेदविन्दुकिता सञ्जातस्वेदविन्दुका नासिका शिखा नासाग्रं यस्य तत्प्रोषिताधरशयालुयावकं पानान्निवृत्तौष्ठगतारक्तकं कपोलयोर्विलुप्ततिलकं विलुप्तकपोलतमालपत्रं तमालपत्रं तिलकचित्रकाणि विशेषक मित्यमरः। तस्याः मुखं नैषधं सुखयति स्म ॥ ११९ ॥

ह्रीणमिति। पृथु भूयिष्ठं ह्रीणं लज्जितमेव कियत्सस्मरं वहुक्लान्तमेव मनागेव निर्वृतं सुखितं तत्तदीयम् आननं प्रियामुखं तदा तत्काले कान्तचेतसि आदरादासक्तेर्लक्षं लक्षसङ्ख्यामलभत वहुमत मभूदित्यर्थः। सर्वावस्थामनोहरं तन्मुखमिति भावः ॥ १२० ॥

स्वेदेति। नैषधस्य सा दृक्दृष्टिः स्वेदवारिणा परिपूरितं प्रियाया रोमकूपानां निवहं समूहं यथा यथा अपात् पिवति स्म पिवतेर्लुङि गातिस्थेत्यादिना सिचो लुक्। तथा तथा अपतृष्णतां नापत् वितृष्णा नाभूदित्यर्थः। चित्रं वहुकूपं सम्भृतोदकपानेऽपि तृष्णा नापैति विरुद्ध मित्यर्थः। लोकोत्तरवस्तुदर्शने तृष्णा वर्द्धत एवेति विरोधाभासोऽलङ्कारः ॥ १२१ ॥

वान्तेति। स नलः वान्तमुदीर्णं माल्यं येन तस्य कचहस्तस्य केशपाशस्य संयमने वन्धने न्यस्तं विक्षिप्तं हस्तयुगं यया तया अनया प्रियया स्फुटीकृत मुज्ज्वलं वाहुमूलं वीक्ष्य सौख्य जलधावानन्दसागरे ममज्ज ॥१२२॥

वीक्ष्य पत्युरधरं कृशोदरी बन्धुजीवमिव भृङ्गसङ्गतम् ।
मञ्जुलं नयनकज्जलैर्निजैः संवरीतुमशकत् स्मितं न सा ॥१२३॥
तां विलोक्य विमुखस्मितस्मितां पृच्छतो हसितहेतुमीशितुः ।
ह्रीमती व्यतरदुत्तरं वधूः पाणिपङ्करुहि दर्पणार्पणाम् ॥१२४॥
लाक्षयाऽऽत्मचरणस्य चुम्बनाच्चारु भालमवलोक्य तन्मुखम् ।
सा ह्रिया नतनतानना ऽस्मरच्छेषरागमुदितं पतिं निशः ॥१२५॥
स्वेदभाजि हृदयेऽनुबिम्बितं वीक्ष्य मूर्त्तमिव हृद्गतं प्रियम् ।
निर्ममे धुतरतश्रमं निजैर्ह्रीनताऽतिमृदुनासिकाऽनिलैः ॥१२६॥

वीक्ष्येति। सा कृशोदरी निजैर्नयनकज्जलैर्नेत्रचुम्बनसंक्रान्तैरिति भावः। मञ्जुलं मनोहरम् अतएव भृङ्गसङ्गतं बन्धुजीवं बन्धूकपुष्पमिव स्थितं पत्युरधरं वीक्ष्य स्मितं मन्दहासं सम्वरीतुं निरोद्धुं नाशकत् हासः प्रसक्तएवेति भावः ॥ १२३ ॥

तामिति। विमुखन्तिर्यग्यथा तथा स्मितस्मितां कृतस्मितां तां विलोक्य हसितहेतुं स्मितकारणं पृच्छतः ईशितुः पत्युः ह्रीमती वधूः नवोढा सापि पाणिपङ्करुहि पाणिपद्मे दर्पणार्पणमेवोत्तरं व्यतरत् ॥ १२४ ॥

लाक्षयेति। सा प्रिया आत्मचरणस्य स्वाङ्घ्रेश्चुम्बनात् प्रणामकाले सम्पर्काद्धेतोः लाक्षया चारुभालं रम्यललाटं तस्य मुखम् अवलोक्य ह्रिया नतनतानना अतिनम्रमुखी सती शेषराग मुदितं निशो निशायाः पद्दन्नादिना निशायाः निश्भावः। पतिं चन्द्रमस्मरदिति स्मरणालङ्कारः ॥ १२५ ॥

स्वेदेति। स्वेदभाजि स्विन्ने हृदये वक्षस्यनुबिम्बितं प्रतिबिम्बितम् अतएव मूर्त्तं मूर्त्तिमन्तं हृद्गतमिव स्थितं प्रियं वीक्ष्य ह्रीनता लज्जानता निजैः अतिमृदुभिर्नासिकानिलैर्निश्वासमारुतैर्धुतो निरस्तो रतश्रमो यस्य तं निर्ममे चकार तस्य श्रममपनुदतीव स्थितेत्युत्प्रेक्षा ॥ १२६ ॥

सूनसायकनिदेशविभ्रमैरप्रतीततरवेदनोदयम् ।
दन्तदंशमधरेऽधिगामुका सास्पृशन्मृदु चमच्चकार च ॥१२७॥
वीक्ष्य वीक्ष्य करजस्य विभ्रमं प्रेयसार्जितमुरोजयोरियम् ।
कान्तमैक्षत हसस्पृशं कियत् कोपसङ्कुचितलोचनाञ्चला ॥१२८॥
रोषभूषितमुखीमिव प्रियां वीक्ष्य भीतिदरकम्पिताक्षरम् ।
तां जगाद स न वेद्मि तन्वि! तं ब्रूहि शास्मि तव कोपरोपणम्॥१२९
रोषकुङ्कुमविलेपनान्मनागन्ववाचि कृशतन्ववाचि ते ।
भूदयुक्तसमयैव रञ्जना मानने विधुविधेयमानने ॥ १३० ॥

सूनेति। सूनसायकस्य कामस्य निदेशविभ्रमैराज्ञाविलासै रप्रतीततरो वेदनोदयो यस्मिंस्तं मदनपारवश्यादज्ञायमानदुःखमित्यर्थः। अधरे दन्तदंशं अधिगामुका प्राप्ता लषपतेत्यादिना उकञ् नलोकेत्यादिना षष्ठी प्रतिषेधः। सा भैमी कियत्किञ्चिच्चमत्कृता तापिता सती मृदु मन्दमस्पृशत् करतलेन दंशं परामृशदित्यर्थः॥ १२७॥

वीक्ष्येति। इयं भैमी प्रेयसा प्रियतमेन उरोजयोः कुचयो रर्जितं करजस्य विभ्रमं नखक्षतं वीक्ष्य वीक्ष्य दर्शं दर्शङ्कियत्किञ्चित्कोपेन सङ्कुचिता मुकुलिता विलोचनाञ्चलाः कटाक्षाः यस्याः सा सती हसं स्पृशतीति तत्स्पृशं हसन्तं कान्त मैक्षत॥ १२८॥

रोषेति। रोषेण भूषितमुखी मिव स्थितां प्रियां वीक्ष्य स नलो भीत्या दरकम्पिताक्षरमीषच्चलाक्षरं यथा तथा तां जगाद किमिति हेतन्वि! तव कोपरोपणं कोपजनक मपराधिनं न वेद्मि तं ब्रूहि शास्मि दण्डयामि॥ १२९॥

रोषेति। ननु कृशतनु! कृशाङ्गि! सम्बुद्धौ नदीह्रस्वः। अवाच्यवनते अवपूर्वादञ्चतेः क्विन्। अवाचि वाचंयमे विधोरपि विधेया मानना पूजा यस्य तस्मिन्विधोरपि पूज्ये ते तवानने अयुक्तसमया अप्राप्तकाला रोषएव

क्षिप्रमस्यतु रुजा नखादिजाः तावकीरमृतशीकरं किरत्।
एतदर्थमिदमर्जितं मया कण्ठचुम्बि मणिदाम कामदम् ॥१३१॥
स्वापराधमलुपत् पयोधरे मत्करः सुरधनुःकरस्तव।
सेवया व्यजनचालनाभुवा भूय एव चरणौ करोतु वा ॥१३२॥
आननस्य मम चेदनौचिती निर्दयं दशनदंशदायिनः।
शोध्यते सुदति! वैरमस्य तत् किं त्वया वद विदश्य नाधरम्॥१३

कुङ्कुमं तस्य विलेपनान्नागीषद्रञ्जना माभूदेव निष्कलङ्के मुखे रोषकलङ्को माभूदित्यर्थः ॥ १३० ॥

क्षिप्रमिति। हे प्रिये! कण्ठचुम्बि कण्ठसङ्गि कामदमभीष्टदं मणिदाम मणिमालिका नखादिजाः नखदन्तक्षतादिजन्याः तावकीस्त्वदीयाः रुजाः पीडाः भिदादित्वादङ्प्रत्ययः। क्षिप्रमस्यतु निरस्यतु इदं मणिदाम मया एतदर्थम् एतत्पीडानिरासार्थं सेवार्जितं सम्पादितम् ॥ १३१ ॥

स्वेति। हे प्रिये! तव पयोधरे स्तने मेघे च स्त्री स्तनाब्दौ पयोधरावित्यमरः। सुरधनुर्नखाङ्कविशेष इन्द्रधनुश्च करोतीति तत्करः। दिवाविभादिनाटप्रत्ययः। मत्करो व्यजनस्य वाहनचालनया धूननेन भवतीति तद्भुवा सेवया स्वापराधमलुम्पत् नुनोद लुम्पेर्ङीत्वात् च्लेरङादेशः। भूयएव पुनरपि चरणौ करोतु सेवतां वा सामान्येन विशेषलक्षणा ॥ १३२ ॥

आननस्येति। हे प्रिये! निर्दयं यथा तथा दशनदंशं ददातीति तद्दायिनो दष्टवतो ममाननस्य मन्मुखस्यानौचिती अनौचित्यं चेत्तर्हि हे सुदति! सुदशने! त्वया अधरं विदश्य अस्याननस्य वैरं किं न शोध्यते न निर्यात्यते यद्दशनदंशस्य प्रतिदंशनमेव प्रतीकार इति भावः ॥ १३३ ॥

दीपलोपमफलं व्यधत्त यस्तेपटाहृतिषु मच्छिखामणिः ।
नो तदागसि परं समर्थना सोऽयमस्तु पदपातुकस्तव ॥ १३४ ॥
इत्थमुक्तिमुपहृत्य कोमलां तल्पचुम्बिचिकुरश्चकार सः ।
आत्ममौलिमणिकान्तिभङ्गिनीं तत्पदारुणसरोजसङ्गिनीं १३५॥
तत्पदाखिलनखानुबिम्बनैः स्वैः समेत्य समतामियाय सः ।
रुद्रभूमविजिगीषया रतिस्वामिनोपदशमूर्त्तिताभृता ॥ १३६ ॥
आख्यतैष कुरु कोपलोपनं पश्य नश्यति कृशा मधोर्निशा ।
एवमेव तु निशान्तरे वरं रोषशेषमनुरोत्स्यसि क्षणम् ॥ १३७ ॥

दीपेति। हे प्रिये! पटाहृतिषु वस्त्राकर्षणेषु मच्छिखामणिस्ते तव कर्त्र्याः दीपलोपं दीपनिर्वापणमफलं यच्चकार निष्फलीचकार तदागसि तस्मिन्नपराधे समर्थना समाधानं नो परं नास्त्येव किन्तु सोऽयं शिखामणिः तव पदपातुकः पादपाती लषपतेति उकञ् अस्तु प्रणिपात एवात्र प्रतीकारः ॥ १३४ ॥

इत्थमिति। स नलः इत्थमुक्तप्रकारेण कोमलां ललितपदां उक्तिं वाणीं उपहृत्य उपायनीकृत्य तल्पचुम्बिनः शय्यावलम्बिनश्चिकुराः स्वकेशा यस्य सः, आत्ममौलिमणिकान्तिरेव भङ्गिनीन्तरङ्गिणीं तत्पदे भैमीचरणे एव अरुणसरोजे कोकनदे तत्सङ्गिनीं तद्युक्तां चकार नमश्चकारेत्यर्थः। नद्योहि रक्तनीलकमलादियुक्ता भवन्तीति प्रसिद्धम् ॥ १३५ ॥

तदिति। सः नलः स्वैरखिलेषु पदयोः दशसु नखेषु अनुविम्बनैः प्रतिविम्बैः समेत्य दशभिर्मिलित्वा रुद्रेभ्य एकादशभ्यो भीतेर्विजिगीषया परिजिहीर्षया उप समीपे दशानामुपदशाः एकादशेत्यर्थः। सङ्ख्याव्ययेत्यादिना बहुव्रीहौ समासान्तो डच् टिलोपः। उपदश मूर्तयो यस्य तस्य भावस्तत्ता तद्भृता एकादशमूर्तिभृता रतिस्वामिना कामेन समतां सादृश्य मियाय एकादशरुद्रजिगीषया एकादशमूर्तिधारी साक्षात्काम इवालक्ष्यतेत्युत्प्रेक्षा ॥ १३६ ॥

आख्यतैष इति। हे प्रिये! कोपस्य लोपनं निवर्तनङ्कुरु मा कुप्यस्वेत्यर्थः।

साऽथ नाथमनयत्कृतार्थतां पाणिगोपितनिजाङ्घ्रिपङ्कजा।
तत्प्रणामधुतमानमाननं स्मेरमेव सुदती वितन्वती ॥ १३८ ॥
तौ मिथो रतिरसायनात् पुनः सम्बुभुक्षुमनसौ बभूवतुः।
चक्षमे न तु तयोर्मनोरथं दुर्जनी रजनिरल्पजीविता ॥ १३९ ॥
स्वप्नमात्तशयनीययोस्तयोः स्वैरमाख्यत वचः प्रियां प्रियः।
उत्सवैरधरदानपानजैः सान्तरायपदमन्तरान्तरा ॥ १४० ॥

मधोर्वसन्तस्य निशा उत्तरायणरात्रिः क्षपा अल्पा पश्य नश्यति निर्याति किन्तु निशान्तरे हेमन्तादिरात्रावेव क्षणं तत्रापि न चिरमिति भावः। रोषणेव मनुरोत्स्यसि अनुसरिष्यसि वरं किञ्चित् प्रियमितीत्यमेव नलः आख्यत आह स्म चक्षिङो लुङि ख्याञादेशे तङ् अस्यति वक्ति ख्यातिभ्योऽङ् इति च्लेरङादेशः ॥ १३७ ॥

अथ प्रियप्रणामानन्तरं पाणिभ्याङ्गोपिते तच्छिरःस्पर्शभयाच्छादिते निजाङ्घ्रिपङ्कजे यया सा तस्य प्रणामेन धुतमानं निरस्तकोपम् अतएवाननं स्मेरं सस्मितमेव वितन्वती सा सुदती भैमी नाथं कृतार्थतां पूर्णकाम मनयत् ॥ १३८ ॥

ताविति। तौ द्वौ मिथो रतिरन्योन्यानुरागः सैव रसायनमौषधविशेषः यज्जराव्याधिविध्वंसि भेषजं तद्रसायनमिति वाभटः। तस्मादुत्पत्तिहेतोः पुनः सम्बुभुक्षुणी सम्भोक्तुमिच्छुनी मनसी ययोः सम्भोक्तुकामौ बभूवतुः किन्तु दुर्जनी दुष्टजन्मा परशुभद्वेषित्वादिति भावः। अल्पजीविता गतरात्रीणामतिह्रासादचिरस्थायिनी रजनि स्तयोर्मनोरथं न चक्षमे न सेहे दुर्जनः परशुभासहोऽल्पजीवी चेति युक्तमिति भावः। अल्पावशिष्टत्वान्निद्रासम्भोगयोरपर्याप्ततेति तात्पर्यम् ॥ १३९ ॥

स्वप्नमिति। स्वप्नं निद्रातुम् आत्तशयनीययोः प्राप्ततल्पयोस्तयोः प्रिययोः मध्ये प्रियः प्रियामधरयोरन्योन्यकोपयोरन्योन्यदान

देवदूत्यमुपगत्य निर्दयं धर्म्मभीतिकृततादृशागसः ।
अस्तु सेयमपराधमार्जना जीवितावधि नलस्य वश्यता ॥ १४१ ॥
स क्षणः सुमुखि ! यत्त्वदीक्षणं तच्च राज्यमुरु येन रज्यसि ।
तन्नलस्य सुधयाऽभिषेचनं यस्त्वदङ्गपरिरम्भविभ्रमः ॥ १४२ ॥
शर्म किं हृदि हरेः प्रियार्पणं किं शिवार्द्धघटनं शिवस्य वा ।
कामये तव महेषु तन्वि ! तं नन्वयं सरिदुदन्वदन्वयम् ॥ १४३ ॥

पानाभ्यां जातैस्तज्जैरुत्सवैरानन्दैरन्तरान्तरा मध्ये मध्ये सान्तरायाणि सप्रतिबन्धानि विच्छिद्य विच्छिद्य प्रयोज्यमानानि पदानि पदाख्यशब्दा यस्मिंस्तद्वचो वाक्यं स्वैरं यथेच्छमास्यतावोचत् ॥ १४० ॥

किम् तद्वाक्यं तदेवाष्टभि राचष्टे देवेत्यादि । हे प्रिये ! देवदूत्यं दूतकृत्यमुपगम्य निर्दयं यथा तथा धर्मभीत्या धर्मलोपभीत्या कृतं तादृक् तथा प्रतिकूलाचरणरूपमागोऽपराधो येन तस्यापराद्धुर्नलस्य मम सम्बन्धिनी सेयं जीवितावधि जीवितान्तं यथा तथा वश्यता वशवर्तिता वशङ्गत इति यत्प्रत्ययः । अपराधस्य मार्जना परीहारः अस्तु यावज्जीवं दास्यमेवास्य प्रतीकारं भवत्वित्यर्थः ॥ १४१ ॥

स इति । हे सुमुखि ! नलस्य स क्षणः उत्सवः क्षण उद्धर्षो मह उद्धवेत्यमरः । यत्त्वदीक्षणं त्वद्दर्शनम् उरु महद्राज्यञ्च तत् येन त्वं रज्यसि रक्ताभवसि कुषि रञ्जीत्यादिना श्यन् परस्मैपदञ्च । तदेव सुधया अभिषेचन ममृताभिषिक्तस्य यत्त्वदङ्गस्य परिरम्भविभ्रम आलिङ्गनलीला तत्सम्बन्धं विना मे न किञ्चिद्रोचत इत्यर्थः ॥ १४२ ॥

शर्मेति । हरेर्विष्णोः हृदि वक्षसि प्रियार्पणं लक्ष्मीधारणं किं शर्म शिवस्य शिवायाः गौर्याः अर्द्धे अर्द्धाङ्गे घटनं किं शर्म नेति भावः । किन्तु ननु तन्वि ! कृशाङ्गि ! इहेदानीं तव मया सह तं प्रसिद्धं सरिदुदन्वतोः सरित्समुद्रयोरन्वयं मेलनमय महङ्कारं कामये मिथुनान्तरसम्भेदवत् सिन्धुसङ्गमे भेदानवभासादिति भावः ॥१४३॥

दीयतां मयि दृढा ममेति धीर्वक्तुमेवमवकाश एव कः ।
यद्विधूय तृणवद्दिवस्पतिं क्रीतवत्यसि दयापणेन माम् ॥१४४॥
शृण्वता निभृतमालिभिर्भवद्वाग्विलासमसकृन्मया किल ।
मोघराघवविसर्ज्यजानकीश्राविणी भयचलासि वीक्षिता ॥१४५॥
छुमपत्रविनिमीलितक्षुपात् कच्छपस्य कृतचापलात्पलात् ।
त्वत्सखीषु सरटाच्छिरोधुतः स्वं भियोऽभिदधतीषु वैभवम् ॥१४६॥
त्वं मदीयविरहान्मया निजां भीतिमीरितवती रहःश्रुता ।
नोज्झितास्मि भवतीं तदित्ययं व्याहरद्वरमसत्यकातरः ॥१४७॥

दीयतामिति । हे प्रिये ! मयि विषये ममेति धीर्ममत्वबुद्धिर्दृढं यथा तथा दीयतामित्येवं वक्तुम् अवकाश एव कः यद्यस्माद्दिवस्पतिमिन्द्रं तृणवद्विधूय निरस्य दययैव पणेन मूल्येन मां क्रीतवती स्वीकृतवत्यसि क्रीतदासोऽस्मीति भावः ॥ १४४ ॥

शृण्वतेति । हे प्रिये ! आलिभिः सखीभिः सह भवत्याः वाग्विलासं सर्वनाम्नोवृत्तिमात्रे पुंवद्भावः । असकृदनेकशो निभृतं गूढं शृण्वता मया मोघं व्यर्थमेव राघवस्य विसर्ज्यां त्याज्यां जानकीं सीतां शृणोतीति तच्छ्राविणी अतएव भयेन चला कम्पा सती सीतावृत्तान्तश्रवणेन स्वयं तथाभूता वीक्षिता दृष्टासि किल ॥ १४५ ॥

अथ युग्मेनाह छुम्रेत्यादि क्षुम्रेति क्वचित्पाठः । छूविच्छुपिस्पर्शनार्थौ वनिटौ क्षुम्रेन स्पर्शेन पत्रेषु विनिमीलति सङ्कुचति यस्तस्मात् क्षुपात् ह्रस्वशाखाशिफः क्षुप इत्यमरः । तथा कृतचापलात् कच्छपस्य पलात् मांसात् सरटात् कृकलासात् शिरोधुतः कम्पितशीर्षः सन् त्वत्सखीषु स्व वीर्यं भियो वैभव भयातिरेकमभिदधतीषु वर्णयन्तीषु सतीषु ॥ १४६ ॥

त्वमिति । त्वञ्च मदीयविरहान्निजाम्भीतिं रहो रहसीरितवती उक्तवती रहः श्रुता मया श्रुतासि किन्तु तत्तस्माद्वाक्यश्रवणात्कारणात् भवतीं नोज्झितास्मि न त्यक्ष्यामि उज्झतेः लुटिमिप् । इतीत्यमसत्यकातरो

सङ्गमय्य विरहेऽस्मि जीविका यैव वामथ रताय तत्क्षणम् ।
हन्त दत्थ इति रुष्टयावयोर्निद्रयाद्य किमु नोपसद्यते ॥ १४८ ॥
ईदृशं निगदति प्रिये दृशौ सम्मदात् कियदियं न्यमीलयत् ।
प्रातरालपति कोकिले कलं जागरादिव निशः कुमुद्वती॥१४८॥
मिश्रितोरु मिलिताधरं मिथः स्वप्नवीक्षितपरस्परक्रियम् ।
तौ ततोऽनु परिरम्भसम्पुटे पीडनां विदधतौ निदद्रतुः ॥१४९॥
तद्वातायातरंहस्स्खलकलितरतिश्रान्तिनिश्वासधारा-
जस्रव्यामिश्रभावस्फुटकथितमिथः प्राणभेदव्युदासम् ।

ऽन्तभीः अयं नलः वरं व्याहरत् अपरित्यागवरं ददावित्यर्थः । उक्तसखीवचनादिभयश्रवणात् त्वया विरहभीतासि तथापि न भेतव्यमित्यर्थः ॥ १४७ ॥

सङ्गमय्येति । यैवाहं विरहे विरहदशायां वां युवां सङ्गमय्य स्वप्नसङ्गतिसुखमनुभाव्य जीविका जीवितवत्यस्मि अथेदानीन्तस्याः मम क्षणोऽवकाश उपरतिरूपस्तं रताय सुरतायैव तद्दत्थः तंप्रपद्यथः । ददातेर्लटि थस् । हन्त इति रुष्टया क्रुद्धया किमु तदित्युत्प्रेक्षा । निद्रया अद्य आवयोः नोपसद्यते न सन्निकृष्यते सीदतेर्भावे लट् ॥ १४८ ॥

ईदृशमिति । प्रिये नले ईदृशमीदृग्वाक्यं निगदति सति तदा प्रातरुषसि कोकिले कलं यथातथा आलपति सति निशः सम्बन्धिनो जागराद्रात्रिजागराद्धेतोः कुमुद्वतीव इयं भैमी सम्मदात्सन्तोषात्कियद्दृशौ न्यमीलयत्मीलयति स्म भ्राजभासेत्यादिना विकल्पादुपधादीर्घो लघोरित्यभ्यासदीर्घः ॥ १४९ ॥

मिश्रितेति । ततोदृङ्निमीलनानन्तरन्तौ मिथः परस्परं मिश्रितावूरू यस्मिन् मीलितावधरौ यस्मिन् कर्मणि तत्स्वप्नवीक्षिताः वासनावशात् स्वप्नदृष्टाः परस्परक्रियाः चुम्बनादिव्यापाराः यस्मिन् कर्मणि तद्यथा

बालावक्षोजपत्राङ्कुरकरिमकरीमुद्रितोर्वीन्द्रवक्ष-
श्चिह्नाख्यातैकभावोभयहृदयमयाद्वन्द्वमानन्दनिद्राम् ॥१५०॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम्।
यातोऽस्मिन् शिवशक्तिसिद्धिभगिनी सौभ्रात्रभव्ये महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमष्टादशः ॥ १५१ ॥

तथा परिरम्भसंपुटे आलिङ्गनपञ्जरे पीड़नं मिथः संश्लेषं विदधतौ कुर्वन्तौ निदद्रतुः निद्रासुखमनुबभूवतुः ॥ १५० ॥

तदिति। यातायातानां गतागतानां रंहसो वेगस्य च्छलेन कलिता ज्ञापिता रतिश्रान्तिर्याभिस्तासां निश्वासधाराणां निश्वासपरम्पराणां अजस्रव्यामिश्रभावेनानवरतसंवलनेन स्फुटं कथितो मिथः प्राणभेदस्य व्युदासोऽभावो यस्य तद्बालायाः प्रियायाः वक्षोजयोः कुचयो र्याः पत्राङ्कुरकरिमकर्य्यः ताभिर्मुद्रितेनोर्वीन्द्रस्य वक्षसैव चिह्नेन लिङ्गेनाख्यातो व्याख्यात एकभावः ऐक्यं ययोस्ते उभये हृदये यस्मिंस्तत् एकचिह्नत्वादेकमितिभावः। वृत्तिविषये उभशब्दस्थाने उभयशब्दप्रयोग इत्युक्तं प्राक्। तद्द्वन्द्वं आनन्दनिद्रां सुखशायिकां अगात् ॥ १५१ ॥

श्रीहर्षमित्यादि। शिवशक्तिसिद्धिर्नाम काचित् स्वकृतिः सैव भगिनी तया सह सौभ्रात्रं सुभ्रातृत्वं युवादित्वादण् प्रत्ययः। भ्राता च भगिनी च भ्रातरौ भ्रातृभगिन्यौ भ्रातरावित्यमरः। भ्रातृपुत्रौ स्वसृदुहितृभ्यामित्येकशेषः। तेन सौभ्रात्रेण भव्ये एककर्तृकत्वादित्थं निर्देशः। अष्टौ च दश च अष्टादश द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योरित्यात्त्वन्तेषां पूरणोऽष्टादशः तस्य पूरणे डट् टिलोपः गतमन्यत् ॥ १५२ ॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां जीवातुसमाख्यायां नैषधव्याख्यायां अष्टादशः सर्गः ॥ १८ ॥

नैषधचरितम्।

ऊनविंशः सर्गः।

निशि दशमितामालिङ्गन्त्यां विबोधविधित्सुभि-
र्निषधवसुधामीनाङ्कस्य प्रियाङ्कमुपेयुषः।
श्रुतिमधुपदस्रग्वैदग्धीविभावितभाविक-
स्फुटरसभृशाभ्यक्ता वैतालिकैर्जगिरे गिरः॥ १॥

अथ काव्ये प्रयोगे वैचित्यस्याप्यलङ्कारत्वादस्मिन् सर्गे तद्वैचित्यमाश्रित्य प्रभातवर्णनमारभते। निशीति। निशि निशायां पद्दन्नादिना निशादेशः। दशमो वयोऽवस्थाविशेषोऽस्याः अस्तीति दशमी वृद्धा वर्षीयान् दशमीज्यायानित्यमरः। वयसि पूरणादितीण् प्रत्ययः। तस्याभावस्तत्ता दशमिता त्वतलोर्गुणवचनस्य पुंवद्भावः। तामालिङ्गन्त्यां प्राप्नुवन्त्यां प्रभातकल्पायां सत्यामित्यर्थः। प्रियाया अङ्कमुत्सङ्गमुपेयुषः प्राप्तस्य निषधवसुधामीनाङ्कस्य निषधदेशमन्मथस्य नलस्य विबोधविधित्सुभिः विधातुमिच्छुभिर्गम्यादिपाठात् द्वितीया समासः। वैतालिकैर्बोधकरैर्वन्दिभिः वैतालिका बोधकरा इत्यमरः। श्रुतिमधुपदस्रजां श्रवणमधुपदपङ्क्तीनां वैदग्धी यद्रचनाचातुर्यं कौशिक्यादिवृत्तिसम्पत्तिः तया विभाविताः व्यञ्जिताः भावाः अस्य सन्तीतिभावः रसबोधकविभावादिचतुर्विधविभाववान् मत्वर्थीयष्टन् प्रत्ययः। अतएव स्फुटोऽभिव्यक्तः सवामत्वं प्राप्तइत्यर्थः। एवं विशेषणविशेषेण रसेन शृङ्गारादिना भृशमभ्यक्ताः रसभरिता इत्यर्थः। गिरो गीतवाचो वक्ष्यमाणाः जगिरे गीयन्ते स्म गायतेः कर्मणि लिट्।

जय जय महाराज ! प्राभातिकीं सुषमामिमाम्
सफलयतमां दानादक्ष्णोर्दरालसपक्ष्मणोः ।
प्रथमशकुनं शय्योत्थायं तवास्तु विदर्भजा
प्रियजन सुखाम्भोजात्तुङ्गं यदङ्ग ! न मङ्गलम् ॥ २ ॥

वरुणगृहिणीमाशामासादयन्तममुं रुची-
निचयसिचयांशांशभ्रंशक्रमेण निरंशुकम् ।
तुहिनमहसं पश्यन्तीव प्रसादमिषादसौ
निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित् ॥ ३ ॥

अस्मिन् सर्गे हरिणीवृत्तं रसयुगहयैर्नसौम्रौस्लौभेयैजसौम्लसौ गो यदा हरिणी तदेति लक्षणात् ॥ १ ॥

जयजयेति। हे महाराज ! नल ! जयजय अभीक्ष्णं सर्वोत्कर्षेण वर्त्तस्व नित्यादौ द्विर्भावः। इमां पुरोवर्त्तिनीं प्राभातिकीं सुषमां परमां शोभां दरमीषदलसानि पक्ष्माणि ययोस्तयोः अल्पार्थेत्वव्ययं दरमिति यादवः। अक्ष्णोर्दानाद्दृष्टिक्षेपात् सफलयतमां अतिशयेन सफलय तिङव्ययादामुप्रत्ययः। तव ते विदर्भजा वैदर्भी शय्यायाः सत्वरमुत्थाय शय्योत्थायं अपादाने परीप्सायामिति णमुल्। परीप्सा त्वरा स्त्रियः।प्रथमोत्थानं लभ्यते। अतएव प्रथमशकुनं प्रथममङ्गलमस्तु तदा तस्यामेव प्रथमाक्षिपातादितिभावः। कुतइत्यत आह अङ्ग ! भो ! यद्यस्मात्प्रियजनस्य मुखाम्भोजात्तुङ्गमधिकं मङ्गलं नास्तीत्यर्थान्तरन्यासः ॥ २ ॥

वरुणेति। असौ हरेरिन्द्रस्य महिषी हरित्प्राचीदिक् वरुणगृहिणीमाशां प्रतीचीन्दिशमासादयन्तं सङ्गच्छन्तममुं पुरस्थं रुचिनिचयोंऽशुसमूहः कृदिकारादिति ङीष्। सएव सिचयः पटः सिचयो वस्त्र वसन मंशुकमिति यादवः। तस्य अंशांशस्य भ्रंशः वीप्सायां द्विरुक्तिः। क्रमेण निरंशुकं नीरुचिं शैषिकः कप्। विवसनञ्च तुहिनमहसं चन्द्रं

अमहतितरास्तादृक् तारा न लोचनगोचरा-
स्तरणिकिरणा द्यामञ्चन्ति क्रमादपरस्पराः ।
कथयति परिश्रान्तिं रात्रीतमः सहयुध्वना-
मयमपि दरिद्राणप्राणस्तमीदयितस्त्विषाम् ॥ ४ ॥
स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः
पुरुसितगरुच्चञ्चच्चञ्चूपुटस्फुटचुम्बितः ।

पश्यन्तीव प्रसादमिषात् प्राभातिकवैशद्यच्छलात् स्मेरं यस्मिन् तत् स्मेरं निजमुखं धत्त इव अत्र मिषशब्देन प्रसादरूपापह्नवेन पराङ्गनासङ्गतपुरुषदर्शनजन्मस्मितत्वोत्प्रेक्षणात् सापह्नवोत्प्रेक्षा ॥ ३ ॥

अमहतीति । अतिशयेन महत्यो महतितराः प्रियादिषु पुंवद्भावप्रतिषेधः रूपकल्पेत्यादिना ङ्यो ह्रस्वः । ततोनञ् समासे अमहतितराः सूक्ष्माः तारा स्तारकाः तादृक् पूर्ववल्लोचनस्य गोचराः विषयाः नभवन्ति प्रत्येक् विषयत्वासम्भवात् बहुदोषापत्तौ वा ता न प्रसभादनेकवचनत्वनिर्बन्धेन तरणेरर्कस्य किरणाः अपरे परे च सततक्रिया अपरस्पराः सन्तः अपरस्पराः क्रिया सातत्य इति निपातनात् साधुः । क्रमाद् द्यामाकाशमञ्चन्ति गच्छन्ति अयन्तमीदयितो निशापतिः दरिद्राणप्राणः क्षीणबलः सन् दरिद्रातेः कर्त्तरि ल्युट् । बलान्तर्यामिनोः प्राच इति यादवः । रात्रेस्तमांसि कृदिकाराद्वाङीप् । तैः सह युध्वनां सह युद्धतां सहे चेति क्वनिप् । वनोन स हरति वक्तव्यात् इति पाठः । वनो रचेति ङीप् प्रत्ययो नास्ति । त्विषाम्भासां परिश्रान्तिं कथयति शोभासमुच्चयोऽलङ्कारः ॥ ४ ॥

स्फुरतीति । तिमिरस्तोमस्तमोराशिः पुरु भूयिष्ठं यथा तथा सितगरुतां हंसानां हंसास्तु श्वेतगरुत इत्यमरः । चञ्चद्भिश्चञ्चूपुटैः स्फुटचुम्बितः विलोलितः उच्चकैर्महान् पङ्कप्रपञ्चः पङ्कराशिरिव स्फुरतीत्युपमा । कालि-

अपि मधुकरी कालिंमन्या विराजति धूमल-
च्छविरिव रवेर्लाक्षालक्ष्मीं करैरभिपातुकैः ॥ ५ ॥
रजनिवमथुप्रालेयाम्भःकणक्रमसंभृतैः
कुशकिशलयस्याच्छैरग्रेशयैरुदबिन्दुभिः ।
सुषिरकुशलेनायःसूचीशिखाङ्कुरसङ्करम्
किमपि गमितान्यन्तर्मुक्ताफलान्यनुमेनिरे ॥ ६ ॥
रविरुचिऋचामोङ्कारेषु स्फुटामलबिन्दुताम्
गमयितुममूरुच्चीयन्ते विहायसि तारकाः ।

सात्मानं मन्यत इति कालिम्मन्या अतिकृष्णेत्यर्थः। वर्णाज्जानपदादिति ङीप् कालिशब्दोपपदात् मन्यते रात्ममाने खजित्यनव्ययस्येति ह्रस्वः। अरुर्द्विषदित्यादिना मुमागमः। सा मधुकरी भृङ्ग्यपि लाक्षालक्ष्मीं अलक्तकशोभामभिपातुकैरभिकामुकैर्लषपतेत्यादिना उकञ्, न लोकेत्यादिना षष्ठीप्रतिषेधात्कर्मणि द्वितीया। रवेः करैः धूमलच्छविः कृष्णलोहितकान्तिरिव विराजति धूम्रधूमलौ कृष्णलोहितावित्यमरः। अत्र काल्या भृङ्ग्या रविकरैर्लौहित्यादिविकारात् तद्गतेन तदुत्थापिता धूमलत्वोत्प्रेक्षेति सङ्करः ॥ ५ ॥

रजनीति। रजनेः रात्रेः वमथवः करशीकराद्युद्भवा वमथुः करशीकर इत्यमरः। तेच ते प्रालेयाम्भसो हिमजलस्य ये कणाः तैः क्रमेण सम्भृतैरारब्धैः कुशकिशलयस्य जातावेकवचनं दर्भाङ्कुराणामित्यर्थः। अग्रे शेरत इति अग्रशयैरग्रस्थैरधिकरणे शेतेरित्यच्। सुषिरे छिद्रविधाने कुशलानामयसो लोहस्य सूचीनां शिखाङ्कुरं परमाग्रभागसङ्करं सङ्गं किमपि किञ्चिद्गमितान्यन्तर्मुक्ताफलान्यनुमेनिरे अनुचक्रुरिति सादृश्यलक्षणा। अत्र दर्भाग्रबिन्दूनां वेधसूच्यग्रलग्नमुक्ताफलैरुपमा प्रालेयाम्भःकणेषुवमथुत्वरूपणाद्रजनेः करिणीत्वरूपणसिद्धिरेकदेशावर्तक इत्यनयोरङ्गाङ्गिभावात्संसृष्टिः ॥ ६ ॥

रवीति। रवेः रुचयएव ऋचो मन्त्रविशेषाः क्रतुभिः पर्वाह्णे दिवि-

स्वरविरचनायासामुच्चैरुदात्ततयाहृताः
शिशिरमहसो बिम्बादस्मादसंशयमंशवः ॥ ७ ॥
व्रजति कुमुदे दृष्टा मोहं दृशोरपिधायके
भवति च नले दूरं तारापतौ च हृतौजसि ।
लघु रघुपतेर्जायां मायामयीमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्तिराट् ॥ ८ ॥

देवे इयत इति तत्त्वावेशकस्तन्मयत्वस्तुतेरिति भावः। तासामृचां ॐकारेषु स्फुटा व्यक्ता अमलाः स्वच्छाः बिन्दवोऽन्त्यवर्णाः यस्मात्ताङ्गमयितुं विहायसि अमूस्तारका उच्चीयन्ते संगृह्यन्ते किञ्च आसामृचां स्वरविरचनायोदात्ताख्यस्वरसम्पादनार्थमुच्चैरत्यन्तमुदात्ततया हृद्यतया उच्चैरुदात्त इत्युक्तलक्षणस्वरविशेषतया च उदात्तः स्वरभेदे स्यात्काव्यालङ्कारहृद्ययोरिति विश्वः। अस्मात् शिशिरमहसश्चन्द्रस्य बिम्बादंशव आहृता अनेनेति शेषः अन्यथा स्वांशवस्तारकाश्च गता इति भावः। असंशयमित्युत्प्रेक्षायामर्थाभावेऽव्ययीभावः ॥ ७ ॥

व्रजतीति। कुमुदे कैरवे कपिविशेषे च कुमुदः कैरवे रक्तपङ्कजे कुमुदः कपाविति विश्वः। दृष्टा हिंसां कर्तुं दृष्टा मोहं सङ्कोचं मूर्च्छां च व्रजति तथा नले भवति नैषधे त्वयीव दृशोरपिधायके निद्रया निमीलिताक्षे इत्यर्थः। अन्यत्र नले कपिविशेषे दृशोरपिधायके भवति सति नलो योगे नले राज्ञि पितृदेवे कपीश्वर इति विश्वः। तथा तारापतौ चन्द्रे सुग्रीवे च ऋक्षाक्षिमध्ययोस्तारा सुग्रीवगुरुयोषितोरिति विश्वः। दूरमत्यन्तं हृतौजसि निस्तेजस्के सति मायामयीं मायाकल्पितां रघुपतेर्जायां सीतां रावणस्यापत्यं रावणिः इन्द्रजित् इञ्। लघु क्षिप्रं गभस्तिराट् सूर्यो रात्रिन्तिमिराण्येव चिकुरास्तेषु गृहीत्वा तिमिरचिकुरग्राहं स्वाङ्गे उपपदे णमुल्भावः हिनस्ति ॥ ८ ॥

त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते
निधुवनधुतस्रग्भागश्रीभरं ग्रहसङ्ग्रहः।
मृदुतरकराकारैः स्तूलोत्करैरुदरम्भरिः
परिहरति नाखण्डो गण्डोपधानविधां विधुः॥ ९॥
दशशतचतुर्वेदीशाखाविवर्त्तनमूर्त्तयः
सविधमधुनाऽलङ्कुर्वन्ति ध्रुवं रविरश्मयः
वदनकुहरेष्वध्येतॄणामयं तदुदञ्चति
श्रुतिपदमयस्तेषामिव प्रतिध्वनिरध्वनि॥ १०॥

त्रिदशेति। ग्रहेत्युपलक्षणं ग्रहसङ्ग्रहस्तारकागणः त्रिदशमिथुनानां देवद्वन्द्वानां क्रीड़ातल्पे विहायस्याकाशे निधुवने सुरते धुतस्रग्भागानां निर्माल्यानां श्रीभरं शोभाव्यतिरेकं गाहते किञ्चाखण्डो विधुः मृदुतरकरा एवाकारो येषान्तैस्तदाकारैस्तद्रूपै स्तूलोत्करै स्तूलपटलैरुदरं विभर्त्ति इति उदरम्भरिरुदरेण पूरितमध्यः व्याप्तोदरः सन्नित्यर्थः फलेग्रहिरात्मम्भरिश्चेति चकारात्सिद्धः। गण्डोपधानस्य कपोलोपबर्हस्य उपधानन्तूपबर्हं त्यमरः। विधां प्रकारं न परिहरति गण्डोपधानत्वमभजत इत्यर्थः अत्र श्रियमिव श्रियं विधामिव विधामिति सादृश्याक्षेपात् उभयत्र निदर्शनोत्थानात् सजातीयसंसृष्टिः॥ ९॥

दशेति। दश शता यासु ताः सहस्रसंख्या इत्यर्थः। ताश्च ताश्चतुर्वेदीशाखाश्चेति विशेषणसमासः अन्यथोभयद्विगुप्राप्तौ वड्ड स्यादिति तासां विवर्तनं मूर्त्तिर्येषान्ते तद्विवर्त्तनरूपा रवेः रश्मयो ध्रुवं सविधमलङ्कुर्वन्ति समीपङ्गच्छन्ति कुतस्तत् तस्मात्तत्सामीप्यादेव तेषां रश्मीनामेवायं श्रुतिपदमयो वेदाक्षरमयः प्रतिध्वनिरध्येतॄणां सूर्यशिष्याणां वदनकुहरेषु उदञ्चत्युद्गच्छति अध्वनि सूर्यशिष्याध्ययनध्वनिव्याजेन तेषामेव वेदरश्मीनान्तेषु प्रतिध्वनीनां प्रापणात्तत्सान्नाय्य उन्नीयत इत्यर्थः॥ १०॥

नयति भगवानम्भोजस्यानिबन्धनबान्धवः
किमपि मघवत्प्रासादस्य प्रघाणमुपन्नताम् ।
अपसरदरिध्वान्तप्रत्यग्वियत्प्रथमण्डली-
लगनफलदश्रान्तस्वर्णाचलभ्रमविभ्रमः ॥ ११ ॥

नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्रिणा-
मिह विहरणैः श्येनम्पातां रवेरवधारयन् ।
शशविशसनत्रासादाशामयाच्चरमां शशी
तदधिगमनात्तारापारावतैरुदडीयत ॥ १२ ॥

नयतीति। अम्भोजस्य पद्मकुलस्यानिबन्धनबान्धवो निर्व्याजबन्धुर्भगवान् सूर्यः अपरसन्त्यरीणि विरोधीनि ध्वान्तानि यस्यास्तस्याः प्रत्यक्वियत्प्रथमण्डल्यां पश्चिमाकाशमार्गे देशे लगनात् ध्वान्तोदयध्वंसनादित्यर्थः फलदः फलीभवन् अश्रान्तस्वर्णाचलभ्रमे विभ्रमो निरन्तरमेरुप्रदक्षिणीकरणप्रयासो यस्य स सन् किमपि कस्यापि हेतोर्मघवत्प्रासादस्य वैजयन्तस्य प्रघाणमलिन्दं प्रघाणप्रघणालिन्दा वहिर्द्वारप्रकोष्ठक इत्यमरः। अगारैकदेशे प्रघणः प्रघाणश्चेति निपातः। उपन्नतामाश्रयतां नयति प्रघाणमाश्रितवानित्यर्थः। सूर्य इवान्धकारं निरस्य क्षणादुदयाद्रिमाश्रित इत्यर्थः ॥ ११ ॥

नभसीति। ध्वान्तानामेव ध्वांक्षाणां वायसानां प्रमापणे मारणे पत्रिणां श्येनानां ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपि अथ शशादनः पत्री श्येन इति चामरः। महसान्तेजसां नभसि विहरणैः विजृम्भणैः रवेः श्येनपातोऽस्यां श्रयति श्येनं श्येनंपाता श्येना खेटः घञः सास्यां क्रियेति श्येनतिलस्य पाते ददति सुखागमः। तामवधारयन् निश्चिन्वन् शशी स्वाङ्कस्थस्य विशसनत्रासात्तद्भयात् चरमां पश्चिमां आशामगात् तस्यां दृष्ट्वा तस्यावगमनात् तद्वृत्तान्तज्ञानात् ताराभिरेव पारावतैः पक्षिविशेषैः पारा

भृशमबिभरुस्तारा हारा च्युता इव मौक्तिकाः
सुरसुरतजक्रीडालूनाद्युसद्वियदङ्गणम् ।
बहुकरकृतात्प्रातः सम्मार्जनादधुना पुन-
र्निरुपधिनिजावस्थालक्ष्मीविलक्षणमीक्ष्यते ॥ १३ ॥

प्रथममुपहृत्यार्द्धं तारैरखण्डिततण्डुलै-
स्तिमिरपरिषद्दूर्वापर्वावलीशबलीकृतैः ।
अथ रविरुचां ग्रासातिथ्यं नभः खविहारिभिः
सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः ॥ १४ ॥

वतः कलरवः कपोत इत्यमरः । उदड्डीयत उड्डीनं भावे लङ् रूपकालङ्कारः ॥ १२ ॥

भृशमिति । ताराः तारकाः सुराणां सुरद्वन्द्वानां पुमान् स्त्रियेत्येकशेषः । सुरतजया क्रीडया विहारेण लूनाच्छिन्नात् हारा च च्युता मुक्ता एव मौक्तिकाः स्वार्थे कप्रत्ययः स्वात्कात्पूर्वस्येतीकारः । ता इवेत्युत्प्रेक्षा। द्युसद्वियदङ्गणं नभः प्राङ्गणं भृशमबिभरुः अपूरयन् डुधाङ् धारण पोषणयोरित्यस्य लङ् रूपं लङ् शाकटायनस्येति झेर्जुसादेशः । अधुनापुनः इदानीं तु बहुकरेण सहस्रकरेण खलपूःस्यात् बहुकर इत्यमरः । कृतात्प्रातः संमार्जनादाच्छादनान्निःशेषीकरणादित्यर्थः ! निरुपधि निर्व्याजं कपटोऽस्त्रीव्याजदम्भोपधयश्छद्मकैतवे इत्यमरः । तस्या निजावस्थाया निजस्वरूपस्य लक्ष्म्याः शोभाया विलक्षणमीक्ष्यते खलपूपरिष्कृद्वत्बहुकरद्धमन्तरीक्षमपि पूर्वविलक्षणमलक्ष्मकमलक्ष्यतेत्यर्थः ॥१३॥

प्रथममिति । नभः कर्तृ रविरुचां प्रथमं तिमिरपरिषत् तमोवृन्दं सैव दूर्वापर्वणां दूर्वावृन्दानामावलिः तया शबलीकृतैः चित्रीकृतैः तारैः उडुभिरेव उडुदध्यक्षतयोरिति दाराशब्दार्थे यादवः । अखण्डिततण्डुलैः अर्द्धं मुपहृत्य दद्यादथ खविहारिभिः शिशिरक्षोदश्रेणीमयैः हिमशीकरपुञ्जरूपैरुदसक्तुभिः मन्थोदनेत्यादिना उदकशब्दस्योदादेश

असुरहितमप्यादित्योत्थां विपत्तिमुपागतम्
दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्तमः।
पठति लुठतीं कण्ठे विद्यामयं मृतजीवनीम्
यदि न वहते सन्ध्यामौनव्रतव्ययभीरुताम् ॥ १ ॥

उदयशिखरिप्रस्थान्यङ्का रणेऽत्र निशः क्षणे
दधति विहरत्पूषाण्युष्मद्रुताश्मजतुस्रवान् ।
उदयदरुणप्रह्वीभावादरादरुणानुजे
मिलति किमु तत्सङ्गाच्छङ्का नवेष्टकवेष्टना ॥ १६ ॥

इत्यर्थः। ग्रासातिथ्यं अतिथ्यर्थं अतिथेरर्थः। स ग्रासरूपमातिथ्यं सृजति सम्पादयति रूपकालङ्कारः ॥ १४ ॥

असुरेति। दितिसुतानां दैत्यानां गुरुः शुक्रः असुभिः प्राणैः रहितं अचेतनमपि अन्यत्वासुरेभ्योहितमपि चतुर्थी तदर्थेत्यादिनासमासः आदित्योत्थां सूर्य्योत्थाञ्चपक्षे देवोत्थां तथा प्रवृत्तिभूतत्वात् तदुत्थत्वव्यपदेशः। विपत्तिमुपागतं तमोऽन्धकारं कचवत् चैनां बृहस्पतिपुत्त्रसञ्जीवनीविद्यार्थं शुक्रमुपागतः स दैत्यहतः पुनः शुक्रेणोज्जीवितइति भारतीकथा। तं कचमिव प्राणैर्योक्तुं कण्ठे च लुठतीं परिवर्तमाना मार्च्छनद्योरिति विकल्पान्नुमभावः। मृतजीविनीं विद्यां न पठति किं पठेदेव किं त्वयं शुक्रस्तत्काले सन्ध्यामौनव्रतव्ययाद्भयात् भीरुतां न वहते न धत्ते यदि अन्यथा कथमीदृग्विद्यावान् पुरोवर्तिन मन्धकारकर्तारमुपेक्षते इति भावः ॥ १५ ॥

उदयेति। अत्रास्मिन् क्षणे निशोनिशाया अङ्का दिवसेन रणे सति विहरत्पूषाणि सञ्चरत्सूर्य्याणि उदयशिखरप्रस्थानि सानूनि प्रस्थोऽस्त्री सानुमानयोरिति यादवः। ऊष्मणा द्रुतानां विलीनानामश्मजतूनां धातुविशेषाणां स्रवान् दधति रक्तप्रवाहादिति भाव·। य उदयत उद्य-

रविरथहयानश्वस्यन्ती ध्रुवं वडवा बल-
प्रतिबलबलावस्थायिन्यः समीक्ष्य समीपगान्।
निजपरिवृढं गाढप्रेमा रथाङ्गविहङ्गमी
स्मरशरपराधीनस्वान्ता वृषष्यति सम्प्रति ॥ १७ ॥
निशि निरशनाः क्षीरस्यन्तः क्षुधाऽश्वकिशोरका
मधुरमधुरं ह्रेषन्त्येते विलोलितबालधि।

च्छतोऽरुणस्यानूरोः प्रह्वीभावादरात्प्रणामसम्भ्रमभरात् अरुणानुजे गरुडे मिलति सङ्गच्छति सति तत्सङ्गाद्गरुडमिलनाद्धेतोर्नवा दृष्टका यस्यां सा वेष्टना परिधिः शङ्क्या शङ्कास्पदं किन्तु यद्युक्तहेतुना न सङ्गच्छेत् तदादन्तपक्षव्याप्तिरुद्रयाद्रिणा नवेष्टकावेष्टना कस्मादिति सम्भावनयोत्प्रेक्षा ॥ १६ ॥

रवीति। बलप्रतिबलस्य बलप्रतिपक्षस्येन्द्रस्य बलेषु सैनेष्ववतिष्ठन्त इति तदवस्थायिन्यो वडवास्तुरङ्ग्यः समीपगान् रविरथहयान् समीक्ष्य अश्वस्यन्ती कामयत इत्यर्थः। गाढप्रेमा दृढानुरागा अतएव स्मरशराणां पराधीनस्वान्ता परतन्त्रचित्ता रथाङ्गविहङ्गमी चक्रवाकी जातेरस्त्रीत्यादिना ङीप्। निजपरिवृढं स्वकान्तं सम्प्रति उषःकाले वृषस्यति कामयत इत्यर्थः। ध्रुवमित्युत्प्रेक्षायाम्। सुप आत्मनः क्यच् अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचीत्यनुरागादेशः अश्ववृषयोर्मैथुनेच्छायां वक्तव्यमित्यर्थनियमः ॥ १७ ॥

निशीति। हे महाराज! निशि निरशना निराहारा अतएव क्षीरस्यन्तः क्षीरमात्मनो भक्षमिच्छन्तः ते तवाश्वकिशोरकाः अश्वबालकाः बालः किशोर इत्यमरः। विलोलितबालधि व्यालोलितपुच्छं यथा तथा क्षुधा मधुरमधुरं मधुरप्रकारं ह्रेषन्ति स्वनन्ति किञ्च मणिमन्थभूधरः मणिमन्थाचलः तद्भवानां शिलानां लवणोपलविशेषाणां लेहायास्वादाय ईहाचण ईहितवित्तः तेन वित्तं चञ्चुचणपाविति

तुरगसमजः स्थानोत्थायं क्वणन्मणि मन्यभू-
धरभवशिलालेहायेहाचणो लवणस्यति ॥ १८ ॥

उडुपरिषदः किं नार्हन्त्वं निशः किमु नौचिती
पतिरिह न यत्ताभ्यां दृष्टो गणेयरुचीगणः ।
स्फुटमुडुपतेराश्मं वचः स्फुरन्मलिनाश्मन-
च्छवि यदनयोर्विच्छेदेऽपि स्रुतं वत न द्रुतम् ॥ १९ ॥

चणप् प्रत्ययः । तुरगाणां समजः समूहः पशूनां समज इत्यमरः । समुदोरजः पशुष्वित्यप्प्रत्ययः । क्वणन्मणि क्वणत्किङ्किणीकं यथा तथेत्यर्थः । स्थानादुत्थाय स्थानोत्थायं अपादाने परीप्सायामिति णमुल् । लवणस्यति लवणमात्मन मिच्छति अश्वक्षीरेत्यादिना क्षीरलवणयोर्लालसायामसुगागमः लालसा तृष्णातिरेकः ॥ १८ ॥

उड्विति । उडुपरिषदस्तारागणस्यार्हतोभावः अर्हन्त्वं मौचिती न किं ब्राह्मणादित्वात् ष्यञ्प्रत्यये अर्हतोनुमिति नुमागमः षित्वाद्बाहुलकात् ईकार इति वामनः यस्येति लोपः यस्य हल इति यकारलोपः । एतेनौचिती व्याख्याता । मम भावस्तु विशेषः निशोऽपिनौचितोकिन्तु अनौचित्यमेवाह यद्यस्मात् इह समये गणेयरुचीगणः परिगणेयकान्तिचयः परिक्षीणकिरण इत्यर्थः । गणेरेय इत्यौणादिक एयप्रत्ययः । ईदृशः पतिश्चन्द्रः ताभ्यामुडुनिशाभ्यामपि न दृष्टः क्षीणां पत्युः क्षीणावस्थाने ईक्षणमनुचितमित्यर्थः । किञ्च अश्मन इयमाश्मनी तस्येदमित्यण् अणिति प्रकृतिभावः । स्फुरन्ती मलिना आश्मनी च्छविर्यस्य तन्नीलाश्मनः सच्छायं उडुपतेर्वचः अश्मविकार आश्मं आश्ममयं विकारार्थेऽण्प्रत्ययः । अश्मनोविकार उपसङ्ख्यानमितिलोपः । स्फुटं सत्यं कुतः यद्यस्मादनयोः स्वकान्तयोर्विच्छेदे वियोगेऽपि द्रुतं शीघ्रं नस्रुतं वतेति खेदे उभावन्योन्यानुरागविरुद्धकारिणावित्यर्थः ॥ १९ ॥

अरुणकिरणे वह्नौ लाजानुडूनि जुहोति या
परिणयति तां सन्ध्यामेतामवैमि मणिर्दिवः।
इयमिव स एवाग्निभ्रान्तिं करोति पुरा यतः
करमपि न कस्तस्यैवोत्कः सकौतुकमीक्षितुम् ॥ २० ॥
रतिरतिपतिद्वैतश्रीकौ ! ध्रुवं विश्रमस्तमाम्
प्रियवचसि यन्नग्नाचार्य्यौ वदामतमां ततः।
अपि विरचितो विघ्नः पुण्यद्रुहः खलु नर्मणः
परुषमरुषे नैकस्यै वामुदेतु मुदेऽपि तत् ॥ २१ ॥

अरुणेति। या सन्ध्या अरुणस्यानूरोः किरणे तेजस्येव वह्नौ उडून्येव लाजान् जुहोति सन्ध्यां वधूं दिवोमणिः सूर्य्योवरः परिणयति उपगच्छति अवैमि वाक्यार्थः कर्म इत्युत्प्रेक्षेत्यर्थः। किञ्च इयं सन्ध्या वधूरिव वरः सूर्य्योऽपि भ्रान्तिमारुण्यात् अग्निविभ्रमं जलहोमानन्तरकार्य्यमग्निप्रदक्षिणं भ्रमणञ्च। पुरा करोति करिष्यत्येव यावत् पुरानिपातयोर्लट्। किञ्च तस्यैव परिणेतुर्द्युमणेः करमंशुं हस्तमपि बलिहस्तांशवः करा इत्यमरः। सकौतुकं सकुतूहलं यथातथा सूत्रञ्च कौतुकं विषयाभोगे हस्तसूत्रे कुतूहल इति यादवः। ईक्षितुं को नोत्को नोत्सुकः सर्वेऽप्युत्सुका एवेत्यर्थः ॥ २० ॥

रतीति। हे रतिरतिपत्योर्द्वैतस्य द्वित्वस्येव श्रीः ययोः तौ द्वितीयौ रतिकामौ ! प्रियवचसि चाटुवदे ध्रुवं विश्रमस्तमां स्तोत्रमतिशयेन विश्रमः तथापि यद्यस्मान्नग्नेषु आचार्य्यौ उपदेशादिकारिणौ नग्नं क्षपणवन्दिनो रित्यमरः। ततोवदामतमा मवश्यं वदाम इत्यर्थः। उभयत्रापि तिङव्ययादाम्प्रत्ययः। पुण्यद्रुहः सुकृतविरोधिनो नर्मणः सुखविहारस्य विघ्नोविरचितः खल्वपि अतः परुषं निष्ठुरं मुदे हर्षाय तदपि वक्ष्यमाणं वचो वां युवयोर्मध्ये एकस्यै भैम्यै अरुषे रुषोऽ

भव लघु युताकान्तः सन्ध्यामुपास्स्व तपोमय !
त्वरयति कथं सन्ध्येयं त्वां न नाम निशानुजा ।
द्युतिपतिरथावश्यङ्कारी दिनोदयमासिता
हरिपतिहरित्पूर्णभ्रूणायितः कियतः क्षणान् ॥ २२ ॥
मुषितमनसश्चित्तं भैमि ! त्वयाद्य कलागृहै-
र्निषधवसुधानाथस्यापि श्लथश्लथता विधौ ।

भावाय क्वचित्प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते । नोदेति न जायते किन्तूष एवेत्यर्थः । अप्रियमपि हितं वाच्यमेवेत्यतो वदाम इत्यर्थः ॥ २१ ॥

भवेति । हे तपोमय ! तपोनिष्ठ ! महाराज ! लघु शीघ्रं युता पृथक्भूता कान्ता प्रिया यस्य सः । युताकान्तः विसृष्टकान्तो भव कान्ताशब्दस्य प्रियादिपाठात् स्त्रियाः पुंवदित्यादिना पूर्वपदस्य न पुंवद्भावः अप्रियादिष्विति प्रतिषेधात् । सन्ध्यामुपास्स्व सेवस्व इयं निशानुजा सन्ध्या प्रातःसन्ध्या त्वां कथं नाम न त्वरयति तथा हि अथानन्तरन्दिनोदयन्दिनप्रादुर्भावमवश्यङ्कारी स्वयन्दिनकर्त्ता स सन्नित्यर्थः । आवश्यकाधमर्ण्ययोरित्यावश्यकार्थे णिनिः मयूरव्यंसकादित्वात्समासः । आवश्यकार्थत्वादिह भविष्यतीत्यर्थः । अकेनोर्भविष्यदधमर्ण्ययोरितीकारान्तोक्तषष्ठीप्रतिषेधः सम्भवति अतएवात्र प्रत्युदाहरणं काशिकायां अवश्यं कारी कटस्येति तस्माद्दीनावयमिति द्वितीयाप्रयोगश्चिन्त्यः तद्योगषष्ठ्या दुर्वारत्वादिति । द्युतिपतिः सूर्यः हरिरिन्द्रः पतिर्यस्य तस्या हरितः प्राच्याः पूर्णभ्रूणः सम्पूर्णगर्भः गर्भो भ्रूण इमौ समावित्यमरः । सैवाचरितः उपमानक्यजन्तात्कर्तरि क्तः । कियतः क्षणान् अत्यन्तसंयोगे द्वितीया । आसिता न क्षणमपीत्यर्थः । अतः सत्वरमुत्तिष्ठेति तात्पर्यम् ॥ २२ ॥

मुषितेति । हे भैमि ! अद्य कलागृहैः कामकलानिवासैर्गृहाः पुंसि च भूम्नि चेत्यमरः । त्वया मुषितमनसो हृतचित्तस्य निषधवसुधानाथस्य नलस्य विधौ अनुष्ठाने श्लथश्लथता अतिशिथिलता कर्मधारयवत्पु

अजगणदयं सन्ध्यां वन्ध्यां विधाय न दूषणम्
नमसितुमना यन्नाम स्यान्न संप्रति पूषणम् ॥ २३ ॥
न विदुषितरा कापि त्वत्तस्ततो नियतक्रिया-
पतनदुरिते हेतुर्भर्त्तुर्मनस्विनि ! मा स्म भूः ।
अनिशमभवदत्यागादेनं जनः खलु कामुकी-
सुभगमभिधास्यत्युद्दामापराङ्कवदावदः ॥ २४ ॥
इह सहचरीमेतां राजन्नपि स्त्रितरां क्षणम्
तरणिकिरणैः स्तोकोन्मुक्तैः समालभते नभः ।

वद्भावात् सुपो लुक् । चिरमयं नलः सन्ध्यां वन्ध्यां शून्यां विधायानुपास्येत्यर्थः । दूषणं दोषं नाजगणत् न गणयति स्म यद्यस्मात् सम्प्रति पूषणं सूर्यं इन्हन् पूषार्यम्णां शाविति नियमान्नात्र सर्वनामस्थाने दीर्घः । नमसितुमना नमस्कर्त्तुकामः नमो वरिवश्चित्रङः क्यङित्यजन्तात् तुगागमः क्यस्य विभाषेति क्यलोपः तुं काममनसोरपीति मकारलोपः नस्यान्नाम भवेदित्यर्थः ॥ २३ ॥

नेति । हे मनस्विनि ! त्वत्तः प्रभृति पञ्चमी । अतिविदुषी विदुषितरा घरूपेत्यादिना ह्रस्वः । कापि नास्ति ततो नैयास्तुष्माद्धेतोः भर्तुर्नियतक्रियापतनदुरिते नित्यकर्मभ्रंशपापे हेतुर्मा भूः स्म स्मोत्तरे लङ् चेति चकारात् लुङ् माङ्योगादडभावः । तथा हि उद्दाम उच्छृङ्खलः अतएवापरेषामङ्कस्य कलङ्कस्य वदावदो वक्ता चरीत्यादिना वदेर्द्विरुक्तिः अभ्यासस्यागागमश्च । जनो लोको ऽनिशमभयत्या कर्त्र्या अत्यागादमोचनाद्धेतोः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । एनं सुभगं कामुकी इच्छवन्ती वल्लभमभिधास्यति स्त्रीलोलं वक्ष्यतीत्यर्थः । तस्मादेनं क्षणं मुञ्चेति भावः । इच्छवन्तीव कामुकीत्यमरः । जानपदादीनां मैथुनेच्छायां ङीष् ॥ २४ ॥

इहेति । हे राजन् ! स्त्रितरामुत्कृष्टस्त्रियमपि स्त्रीशब्दस्य जाति-

उदधिनिरयद्भास्वत्स्वर्णोदकुम्भदिदृक्षुताम्
दधति नलिनं प्रस्थायिन्यः श्रियः कुमुदान्मुदा ॥ २५ ॥
प्रथमककुभः पान्थत्वेन स्फुटेक्षितवृत्रहा-
ण्यनुपदमिह द्रक्ष्यन्ति त्वां महांसि महः पतेः ।

वाचित्वेऽपि तन्निष्ठगुणगतातिशयविवक्षया तरप्प्रत्यय इति भगवान् भाष्यकारः। नद्याः शेषस्यान्यतरस्यामिति ह्रस्वः। सहचरीं सहचारिणीं पचादिषु चरडितिटित्करणेन ङीप्। एतां प्रियां क्षणं रह त्यज रहति त्यजति त्याग इति भट्टमल्लः। रहे र्भौवादिकाल्लोटि सिप्। नभः कर्त्तृ-स्तोकेन लेशेन मुक्तैः स्तोकोन्मुक्तैः करणे चेति शेषः कर्मणि क्तः कर्म कर्तरि वा क्तः। स्वयं मुक्तैरित्यर्थः तरणिकिरणैः करणैः समालभते आत्मानमनुलिम्पतीत्यर्थः। यच्च शक्यं समालम्भनमित्यपीत्यनुलेपनपर्याय इति यादवः। किञ्च कुमुदात् अपादानात् नलिनं पद्मं प्रति गम्यमानोपदेशेन क्रियापेक्षया कर्मत्वं। प्रस्थायिन्यः प्रतिष्ठमानाः ग्रह्यादित्वात् णिनिः अत्र गमिगाम्यादिपाठादकेनोरिति षष्ठीप्रतिषेधात्कर्मणि द्वितीयेति केचित्। तत्प्रतिष्ठते कर्मकत्व मनालोच्यत इत्युपेक्षणीयं। श्रियः शोभया मुदा हर्षेण उदकानि धीयन्तेऽस्मिन्नित्युदधिः कर्मण्यधिकरणे चेति किप्रत्ययः। शयवासिवासवाहहृदयेषु चेत्युदादेशः। तस्मान्निरयन् निर्गच्छन् अयतेर्लटः शत्रादेशः। स चासौ भास्वांश्च स एव स्वर्णस्योदकुम्भः एकहलादौ पूरयितव्योऽन्यतरस्यामित्युदादेशः। तद्दिदृक्षुतां नलोकेत्यादिना षष्ठीप्रतिषेधे गमिगाम्यादिपाठात् द्वितीयासमासः। तासां भावस्तत्ता तां दधति दिदृक्षन्त इत्यर्थः। नवमन्दिरप्रदेशे पूर्णकुम्भदर्शनस्य मङ्गलावहत्वादिति भावः॥ २५॥

प्रथमेति। प्रथमककुभः इन्द्रदिशः पन्थानं गच्छतीति पान्थो नित्यपथिकः पथोर्णैतीन्प्रत्ययः पन्थादेशश्च। तत्त्वेन इन्द्रदिग्गतत्वेनत्यर्थः स्फुटमीक्षितो वृत्रहा यैस्तानि इन्हन्नित्यादिना शौ सर्वनामस्थाने दीर्घः। महःपतेः सूर्यस्य महांसि अनुपदं इन्द्रेक्षणानन्तरमिह देशे त्वां द्रक्ष्यन्ति

पटिमवहनादूहापोहक्षमाणि वितन्वता
महह युवयोस्तावल्लक्ष्मीविवेचनचातुरीम् ॥ २६ ॥
अनतिशिथिले पुम्भावेन प्रगल्भबलाः खलु
प्रसभमलयः पाथोजास्ये निविश्य निरित्वराः ।
किमपि सुखतः कृत्वा नीतं वितीर्य सरोजिनी-
मधुरसमुषोयोगे जायां नवान्नमचीकरन् ॥ २७ ॥
मिहिरकिरणाभोगम्भोक्तुं प्रवृत्ततया पुरः
कलितचुलुकापोशानस्य ग्रहार्थमियं किमु ।

ततः किं तत्राह पटिमवहनात् तीक्ष्णतायाज्ञातव्यस्य च वहनात् धारणात् । पटुस्तु तारतीक्ष्णयोरिति शाश्वतः । ऊहापोहयोः सदसद्ग्रहत्यागयोः क्षमाणि शक्तानि तानि महांसि तस्येन्द्रस्य तव च युवयोः त्यदादीनि सर्वैर्नित्यमिति त्यदाद्येकशेषः । तावल्लक्ष्मीविवेचनचातुरीं तावत्साकल्येन वितन्वता उभयदर्शिन मुभयतारतम्यं विवेक्तुं युक्तमित्यर्थः । अहहेत्यद्भुते ॥ २६ ॥

अनतीति । पुम्भावेन पुंस्त्वेन हेतुना प्रगल्भबलाः स्त्रीभ्योऽपि प्रबला अलयो भृङ्गा अनतिशिथिले ईषद्विकसिते पाथोजं पद्ममेवास्यं तस्मिन् प्रसभं बलात् निविश्य निरित्वरा निर्गच्छन्त इण्नशजिसर्त्तिभ्यः करप् । सुखतः सुखे कृत्वा सरोजिनीमधुरसं नलिनीरसस्वरूपमास्वाद्यं उषोयोगे प्रात वितीर्य्य दत्त्वा जायां स्वकान्ता मलिनीं किमप्यवाच्यं नवान्न मचीकरन् कारयामासुः भोजयामासुरित्यर्थः । करोतेर्णौ चङ्युपधाया ह्रस्वः हृक्रोरन्यतरस्यामिति अणि कर्त्तुः कर्मत्वं । बली पुमान् स्त्र्यन्तरमुखान्तर्गतमपि स्पष्टमन्नं बलादाच्छिद्य स्वस्त्रियै प्रयच्छतीति भावः ॥ २७ ॥

मिहिरेति । सरोजिनी दिनोदये प्रातःकाले प्राग्विकसितेनैकेन हेतुना मिहिरकिरणा भुज्यन्त इत्याभोगं भोज्यं भोक्तुं प्रवृत्ततया इयं

इति विकसितेनैकेन प्रागदलेन सरोजिनी
जनयति मतिं साक्षात्कर्तुर्जनस्य दिनोदये ॥ २८ ॥
तटतरुखगश्रेणीसांराविणैरिव साम्प्रतम्
सरसि विगलन्निद्रामुद्राऽजनिष्ट सरोजिनी ।
अधरसुधया मध्ये मध्ये वधूमुखलब्धया
धयति मधुपः स्वादुङ्कारं मधूनि सरोरुहाम् ॥ २९ ॥
गतचरदिनस्यायुर्भ्रंशे दयोदयसङ्कुच-
त्कमलमुकुलक्रोडान्नीडप्रवेशमुपेयुषाम् ।
इह मधुलिहां भिन्नेष्वम्भोरुहेषु समायताम्
सह सहचरैरालोक्यन्तेऽधुना मधुपारणाः ॥ ३० ॥

सरोजनी अपोशान मपोशनं नाम कर्म पृषोदरादित्वात्साधुः । तस्य गृह्यधर्माचरणार्थं पुरः पूर्वं कलितो हृतचुलुकः पाणिबन्धनविशेषो यस्याः सा किल । इति मतिमुत्प्रेक्षया साक्षात्कर्तुर्द्रष्टुर्जनस्य जनयति ॥२८॥

तटेति । साम्प्रतं सम्प्रति सरसि सरोजिनी तटतरुषु खगश्रेणीनां सांराविणैः समन्ताद्रावैरिवेत्युत्प्रेक्षा । अभिविधौ भावइन्नितिस्वार्थे इनुण्प्रत्ययः । विगलन्निद्रामुद्रा विवर्तमाननिद्रा अजनिष्ट जाता जनेः कर्तरि लुङ् । मधुपः सरोरुहां मधूनि मकरन्दान् मध्ये मध्ये वधूमुखे स्वकान्तामुखे लब्धया अधरसुधया स्वादुङ्कारं स्वादूकृत्य स्वादुनि णमुलिति णमुल्प्रत्ययः । मान्तनिर्देशादेव मकारान्तदीर्घभावः धयतीति धेटो लट् ॥ २९ ॥

गतेति । गतचरं गतपूर्वं भूतपूर्वं चरट् । तस्य जनस्यायुर्भ्रंशे जीवितावसाने सति दयोदयात् कृपाविर्भावादिव सङ्कुचतां म्लानानां कमलमुकुलानां क्रोडेष्वभ्यन्तरेष्वेव नीडेषु कुलायेषु कुलायो नीडमस्त्रियां । न नाक्रोडं भुजान्तरमिति चामरः । प्रवेशमुपेयुषामन्तः प्रविशतामित्यर्थः

तिमिरविरहात्पाण्डूयन्ते दिशः कृशतारकाः
कमलहसितैः श्वेनीवोन्नीयते सरसी न का ।
शरणमिलितध्वान्तध्वंसिप्रभादरधारणा-
द्गगनशिखरं नीलत्येकं निजैरयशोभरैः ॥ ३१ ॥
सरसिजवनान्युद्यत्सखार्यमाणि हसन्तु न
क्षतरुचिसुहृच्चन्द्रं तन्द्रामुपैतु न कैरवम् ।

इह अम्भोरुहेषु भिन्नेषु सत्सु सहचरैः सह सम्प्रत्यागतैरिति भावः। समायतान्निपततां इणो लटः शत्रादेशः। मधुलिहां मधुपानामिदानीं मधूनां पारणाः पानान्यालोक्यन्ते सखियो दृश्यन्त इत्यर्थः ॥ ३० ॥

तिमिरेति। दिशस्तिमिरेण विरहात्कृशाः क्षीणास्तारका नक्षत्राणि कनीनिका यासान्ताः सत्यः कनीनिकायां नक्षत्रे तारके चेति विश्वः। पाण्डूयन्ते पाण्डुवर्णानि भवन्ति विरहिधर्मत्वादिति भावः। वर्णादनुदात्तान्तोपदात्तोन इति ङीप्प्रत्ययः। तकारस्य न चकारः नोन्नीयते सर्वाप्युन्नीयत एवेत्यर्थः। एतद्गगनशिखरं नभोमण्डलं शरणमिलितानि शरणागतानि ध्वान्तानि ध्वंसयन्तीति तद्ध्वंसिन्यः स्त्रियाः पुंवदित्यादिना पुंवद्भावः। तासां प्रभाणामादरेण धारणाद्भरणात् हेतोर्निजैरयशोभरैर्नीलति नीलं भवति नीलवर्णे इति धातोर्भौवादिकाल्लट्। शरणागतानादरात् हेतोर्निजैरयशोभरैः नीलति शरणागतापालनात्कीर्तिलोपादिव खमेकं नीलमदृश्यतेत्यर्थः ॥ ३१ ॥

सरसिजेति। उद्यत्सखः सहायभूतोऽर्यमा येषां तानि सरसिजवनानि न हसन्त्विति काकुः हसन्त्वेवेत्यर्थः। क्षतरुचिः शीर्णद्युतिः सुहृच्चन्द्रो यस्य तत् कैरवं कर्तृ तन्द्रां प्रमीलां नोपैतु अत्रापि काकुः उपैत्वेवेत्यर्थः। किं वायो अनन्तरं पाथोरुहैः पद्मैः कर्तृभिः हिमगिरिदृषद्दायादया सदृश्या श्रिया वैशद्यसम्पदा प्रतीतमुदः प्रकटहर्षस्य रात्रौ तथा हृष्टस्येत्यर्थः। कुमुदविपिनस्य सम्बन्धिन्या निजनिद्रया सम्प्रति

हिमगिरिदृषद्दायादश्रीप्रतीतमदः स्मितम्
कुमुदविपिनस्यायो पाथोरुहैर्निजनिद्रया ॥ ३२ ॥

धयतु नलिने माध्वीकं वा न वाऽभिनवागतः
कुमुदमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः ।
इह तु लिहते रात्रीतर्षं रथाङ्गविहङ्गमा-
मधु निजवधूवक्त्राम्भोजेऽधुनाऽधरनामकम् ॥ ३३ ॥

जगति मिथुने चक्रावेव स्मरागमपारगौ
नवमिव मिथः सम्भुञ्जाते वियुज्य वियुज्य यौ ।

कुमुदवनगामिन्याः स्वनिद्राया निमित्तेन स्मितं विकसितं भावे निष्ठा। तदा तथा दृष्ट्वा मिदानीं मन्निद्रा हृतानि पद्मानि हसन्तीवेत्युत्प्रेक्षाव्यञ्जकाप्रयोगाद्गम्या ॥ ३२ ॥

धयत्विति। कुमुदमकरन्दानामोघैः कुक्षिम्भरिः कुक्षिपूरकः फलेग्रहिरात्मम्भरिश्चेति चकारात् कुक्षिम्भरिः सिद्धः। भ्रमरोत्करो भृङ्गसङ्घः सएवाभिनवागतोऽतिथिः नलिने माध्वीकं मकरन्दं धयतु वा रात्रावप्युदरपूरं पीतत्वादिति भावः। रथाङ्गविहङ्गमाः चक्रवाकास्तु रात्रिं तृषित्वा रात्रितर्षन्तर्षणैरात्रिं नीत्वेत्यर्थः। कस्तितृषोः क्रियातिरेकात्तृषिति णमुल्प्रत्ययः। इहाधुना निजवधूवक्त्राम्भोजे अधरनामकं मधु मकरन्दं लिहते आस्वादयन्ति ॥ ३२ ॥

जगतीति। जगति लोके मिथुने मिथुनेषु निर्धारणे सप्तमी जातावेकवचनं। चक्रौ चक्रवाकावेव स्मरागमपारगौ कामशास्त्रतत्त्वज्ञौ कामोपभोगे चतुरावित्यर्थः। अत्यन्ताङ्गे डप्रत्ययः। कुत. यौ चक्रौ मिथो वियुज्य वियुज्य पुनः पुनः विश्लेष्य विश्लेष्य नवमिव इदं प्रथममिव सम्भुञ्जाते अन्यथा अरोचकभयादिति भावः। अत्र दृष्टान्तमाह यद्यस्माद्विभुः प्रतीकारसमर्थः अस्तभुजाम् अस्तहारिणां भर्त्ता अग्रेसरः

सततममृतादेवाहाराद्यदापदरोचकम्
तदमृतभुजां भर्त्ता शम्भुर्विषं बुभुजे विभुः ॥ ३४ ॥
विशति युवतित्यागे रात्रीमुचं मिहिकारुचम्
दिनमणिमणिं तापे चित्तान्निजाच्च यियासति ।
विरहतरलजिह्वा बह्वाह्वयन्त्यतिविह्वला-
मिह सहचरीं नामग्राहं रथाङ्गविहङ्गमाः ॥ ३५ ॥
स्वमुकुलमयैर्नेत्रैरन्धम्भविष्णुतया जनः
किमु कुमुदिनीं दुर्व्याचष्टे रवेरनवेक्षिकाम् ।

शम्भुः सततम् अमृतस्याहारात् अशनात् न रोचत इत्यरोचकं कर्म तदाख्यं रोगमापत् तत्तस्मादेव विषं बुभुजे विजातीयभोगेनारुचिनिवृत्तिरिति भावः ॥ ३४ ॥

विशतीति । इह समये रथाङ्गविहङ्गमाः पुंश्चक्रवाका युवतित्यागे कान्तावियोगे रात्रीमुचं रात्रीत्यागिनं मुचेः क्विप् कृदिकारादीकारः। मिहिकारुचं चन्द्रं विशति सति तापे सन्तापे च निजचित्तादपादानात् दिनमणिमणिम् यियासति यातुमिच्छति सति यातेः सनन्ताल्लट् शत्रादेशः। विरहेण तरलन्त्यस्तरलायमाना आचारार्थे क्विबन्ताल्लट् शत्रादेशः। ता जिह्वा येषान्ते तथा सन्तः अतिविह्वलाम् अतिविवशां सहचरीं प्रियां नामग्राहं नाम गृहीत्वा सन्ध्यातिदेशे गृह्णोति णमुल्प्रत्ययः बहु वारम्वारमाह्वयन्ति ॥ ३५ ॥

स्वेति । जनोलोकः स्वमुकुलमयैः निजमुकुलरूपैः निमीलितैरित्यर्थः। नेत्रैरन्धम्भविष्णुतया अन्धीभूतया कर्त्तरि भुवः खिष्णुच् इत्यभूततद्भावे कर्त्तरि खिष्णुच्प्रत्ययः खित्यनव्ययस्येति ह्रस्वः अरुर्द्विषदित्यादिना मुमागमः। रवेरनवेक्षिकामनवेक्षणीं ण्वुल्। त्वचाविति ण्वुलि कात् पूर्वस्येकारः। कुमुदिनीं किमु किमिति दुर्व्याचष्टे दुर्वदति एका

लिखितपठिता राज्ञो दाराः कविप्रतिभासु ये
शृणुत शृणुतासूर्यम्पश्यां न सा किल भाविनी ॥ ३६ ॥
चुलुकिततमःसिन्धोर्भृङ्गैः करादिव शुभ्यते
नभसि विसिनीबन्धोरन्ध्रच्युतैरुदविन्दुभिः ।
शतदलमधुस्रोतः कच्छद्वयीपरिरम्भणा-
दनुपदमदः पङ्काशङ्काममी मम तन्वते ॥ ३७ ॥

भार्या प्रकृतिकठिना चञ्चला च द्वितीया पुत्रोऽनङ्गस्त्रिभुवनजयी मन्मथः पञ्चवाणः । शेषः शय्यावसतिरुदधिर्वाहनं पन्नगारिः स्मृत्वा स्मृत्वा स्वगृहचरितं काष्ठभूतो मुरारिः । अपवदतीत्यर्थः । ननु सूर्यावेक्षणस्य विहितत्वादिति भावः । कविप्रतिभासु विद्याव्यवहारेषु ये राज्ञः चन्द्रस्य नृपस्य दारा राजा प्रभौ नृपे चन्द्रे इति विश्वः । लिखिताश्च ते पठिताश्चेति विशेषणसमासः । राजदारा प्रसिद्धा इत्यर्थः । सा राजदारा कुमुदिनी सूर्यं न पश्यतीत्यसूर्यम्पश्या न भाविनी भविष्यति किल भविष्यति गम्यादय इति साधुः । शृणुत शृणुताकर्णयताकर्णयताक्रोशे सम्भ्रमे वा द्विरुक्तिः । असूर्यम्पश्या राजदारायति राजनीत्यनुसारेण दृष्टप्रागल्भ्यात् कुमुदिन्या अपि राजदारत्वात् सूर्यानवेक्षणं युक्तमिति भावः । परमार्थतस्तु कैमुत्यन्यायेन पुरुषान्तरदर्शननिषेधपरमेतत् न सूर्यदर्शननिषेधपरम् इति द्रष्टव्यम् अतएव काशिकागुप्तिपरश्चैतदित्यादित्यसूर्यललाटयोर्दृशितपोरिति खट्प्रत्ययः । पाघ्रेत्यादिना दृशेः पश्यादेशः असूर्येभ्यः समर्थः समासः । सदृशीनां सम्बन्धत्वात् सूर्यं निषेधे त्वनभिधानप्रत्ययोऽभिधानलुप्तवृत्त्यनुसामर्थ्ये विषयत्वात्समासोऽस्मादेव वचनादिति सकारः ॥३६।

चुलुकितेति । नभसि भृङ्गैः चुलुकित चुलुकीकृतः तमः सिन्धुर्येन तथा विसिनीबन्धोः सूर्यस्य करा अंशवो हस्ताश्च रन्ध्रच्युतैरवयवान्तरालगलितैः उदविन्दुभिरिव शुभ्यत इत्युत्प्रेक्षा शुभेर्भावे लट् ।

घुसृणसुमनःश्रेणिश्रीणामनादरिभिः सरः-
परिसरचरैर्भासां पत्युः कुमारतरैः करैः।
अजनि जलजामोदानन्दोत्पतिष्णु मधुव्रता-
वलिशवलनाद्गुञ्जापुञ्जश्रियं ग्रहयालुभिः ॥ ३८ ॥
रचयति रुचिः शोणीमेतां कुमारितरा रवे-
र्यदलिपटली नीलीकर्त्तुं व्यवस्यति पातुका।
अजनि सरसी कल्माषी तद्ध्रुवं धवलस्फुट-
त्कमलकलिकाषण्डैः पाण्डूकृतोदरमण्डला ॥ ३९ ॥

धर्मित्वाद्गुणभावः। किञ्चामी भृङ्गाः शतदलमधुस्रोतसः कुशेशयमकरन्दप्रवाहस्य कच्छद्वयीपरिरम्भणादभिव्याप्तेरनुचरणमनुपदमस्याः कच्छिद्वयः पङ्काशङ्कां मम तन्वते ॥ २७ ॥

घुसृणेति। घुसृणमनःश्रेणीश्रीणां कुङ्कुमकुसुममालाशोभानां वामीति नदीत्वपरामुडागमः। कुङ्कुमं घुसृणं वर्णमिति हलायुधः। अनादरिभिः अनादरकर्तृभिः तत्सदृशैरित्यर्थः। सरःपरिसरचरैः सरःप्रान्तवर्तिभिः कुमारतरैः बालकैर्भासां पत्युरर्कस्य करैः कर्तरीणि। जलजामोदेन कमलपरिमलेन य आनन्दः तस्मादुत्पतिष्णव उत्पातुकाः अलङ्कृञित्यादिना इष्णुच्। तेषां मधुव्रतानामावल्या शवलनाच्चित्रवर्णहेतोः गुञ्जापुञ्जस्य गुञ्जा तु कृष्णलेत्यमरः। श्रियमिव श्रियं शोभामिति निदर्शनाभेदः। नलोकेत्यादिना षष्ठीप्रतिषेधः। ग्रहयालुभिः ग्राहकैः अजनि भावे लुङ्। स्पृहि गृहीत्यादिना आलुच् ग्रहणं इत्यदन्ता चौरादिकारास्मिन्न। गुञ्जाबीजानां नीलमुखत्वादलिकुलयोगेनांशुकिशोरकास्तद्बभुरित्यर्थः ॥ २८ ॥

रचयतीति। यद्यस्मादतिकुमारी कुमारितरा बालतरा घरूपेत्यादिना ङीह्रस्वः। रवेरुचिरेतां सरसीं शोणीं रचयति शोणवर्णां करोति शोणात् प्राचामिति विकल्पादीकारः। पातुका पतयालुः लषपतेत्यादिना

कमलकुशलाधाने भानोरहो पुरुषव्रतम्
यदुपकुरुते नेत्राणि श्रीगृहत्वविवक्षुभिः ।
कविभिरुपमादानादम्भोजतां गमितान्यसा-
वपि यदतथाभावान्मुञ्चत्युलूकविलोचने ॥ ४० ॥

उकङ्। अलीनां पटली मण्डली नीलीकर्त्तुं अभततद्भावे च्विः। व्यवस्यति व्याप्रियते तस्मात्सरसी धवलैः स्फुटद्भिः विकसद्भिश्च कमलकलिकानां षण्डैः कदम्बैः कदम्बे षण्डमस्त्रियामित्यमरः। पाण्डूकृतं धवलीकृतम् अभूततद्भावेच्विः। तदुदरमण्डलं मध्यभागो यस्याः सा सती कल्माषी चित्रवर्णा गौरी गौरादित्वादीङ् ङीषिति भोजराजः। अजनि जाता दीपजनेत्यादिना कर्तरि लुङ् चिण्। ध्रुवमित्युत्प्रेक्षायाम् अत्र सरस्याः स्वगुणत्यागेन काणाद्यनुगुणस्वीकारात्तद्गुणालङ्कारस्तावत् तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणा इति लक्षणात् तत्रैकगुणसंक्रान्तिपरिचयात् षण्डपुण्डरीकपाण्डुसंक्रमद्वारा कल्माषस्वीकारोत्प्रेक्षणात्तद्रूपणोत्प्रेक्षयो रङ्गाङ्गिभावेन सङ्करः ॥ ३९ ॥

कमलेति। कमलानां कुशलाधाने क्षेमविधाने भानोः पुरुषाभिमानिनः व्रतं पुरुषव्रतं दृढनियम इत्यर्थः। अहो चित्रम् अथवा अहो पुरुषाभिमानवान् पुरुष इति मयूरव्यंसकादिषु कैयटः। तस्य व्रतं दृढमित्यर्थः। कुतः यद्यस्मादसौ श्रीगृहत्वं नेत्राणां शोभाश्रयत्वं विवक्षुभिः वक्तुमिच्छुभिः योगविभागात् द्वितीयासमासः। कविभिरुपमानात्सादृश्यमात्रादम्भोजतां गमितानि अम्भोजत्वेन रूपितानि नेत्राण्यप्युपकुरुते विकासयतीत्यर्थः। यदपि यद्यस्माच्च अतथाभावादौपमानिकाम्भोजस्याप्यभावादित्यर्थः। नञर्थस्य नशब्दस्य सुप्सुपेति समासः। उलूकस्य पेचकस्येति विलोचने मुञ्चति। अन्नदो जलदश्चैव विप्रो व्याधिचिकित्सकः। त्रयः स्वर्गाय गच्छन्ति विना यज्ञेन पार्थिव !। शीतत्वेन मीलिताक्षत्वादिति भावः। अन्वयव्यतिरेकाभ्याम् अम्भोजसदृशस्यैव सहस्र-

यदतिमहती भक्तिर्भानौ तदेनमुदित्वर-
न्त्वरितमुपतिष्ठस्वाध्वन्य त्वमध्वरपद्धतेः।
इह हि समये मन्देहेषु व्रजन्त्युद्वज्रता-
मभिरविमुपस्थानोत्क्षिप्ता जलाञ्जलयः किल ॥ ४१ ॥
उदयशिखरिप्रस्थावस्थायिनी खनिरक्षया
शिशुतरमहोमाणिक्यानामहर्मणिमण्डली।
रजनिदृषदं ध्वान्तश्यामां विधूय पिधायिकां
न खलु कतमेनेयं जाने जनेन विमुद्रिता ॥ ४२ ॥

करस्य देवस्याम्भोजबन्धोरम्भोजक्षेमङ्करत्वं किमु वाच्यमित्यर्थः। तथा चाम्भोजवल्लोकलोचनाम्भोजान्यपि विकासयामासेत्यर्थः ॥ ४० ॥

यदिति। हे महाराज! यद्यस्माद्भानौ अति महती भक्तिः अनुरागविशेषो यस्य स, भक्तिः महाभक्तिः भक्तिशब्दस्य शेषे षष्ठी। तस्मादध्वरस्य यज्ञस्य पद्धतेः पथः हे अध्वन्य पान्थ! अध्वन्यशब्दो अध्वनो यत्खाविति यत्प्रत्ययः। ये चाभावकर्मणोरिति प्रकृतिभावः। त्वमुदित्वरमुद्यन्तं इण्नशीत्यादिना क्वरप्। एनम्भानुं त्वरितमुपतिष्ठस्व उपासस्व पूजेत्यादिना देवपूजायामात्मनेपदम्। कुतः हि यस्मात्कारणादिह समये उदयकाले रविमभि अभिरविं लक्षयित्वा उद्दिश्येत्यर्थः। अभिरभाग इति लक्षणार्थे कर्मप्रवचनीयत्वात्तद्योगे द्वितीया। उपस्थाने उपासनायां उत्क्षिप्ताः ऊर्ध्वं क्षिप्ताः आप ऊर्ध्वं विक्षिपन्तीति श्रुतेः। जलाञ्जलयः मन्देहेषु मन्देहाख्येषु राक्षसेषु उद्वज्रतां वज्रायुधत्वं मन्थौदनेत्यादिनोदादेशः, व्रजन्ति किल गमेत्यागमे गणव्याख्याने गम्लृचिव्याकरणसम्भावनाहेत्वलङ्कारेषु केवलेतिव्याख्या वा अत्र श्रुतिः, तदु ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्र्याभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति तानिता आपो वज्रीभूत्वा तानि रक्षांसि मन्देहारुणे द्वीपे प्रक्षिपन्तीति ॥ ४१ ॥

उदयेति। अहर्मणिमण्डली उदयशिखरिणः उदयाद्रेः प्रस्थावस्थायिनी सानुनिष्ठा अक्षया शिशुतराणि बालतराणि महांसीव

सुरपरिवृढः कर्णात् प्रत्यग्रहीत् किल कुण्डल-
द्वयमथ खलु प्राच्यै प्रादान्मुदा स हि तत्पतिः ।
विधुरुदयभागेकं तत्र व्यलोकि विलोक्यते
नवतरकरस्वर्णस्रावि द्वितीयमहर्मणिः ॥ ४३ ॥

दहनमविशद्दीप्तिर्याऽस्तङ्गते गतवासर-
प्रथमसमयप्राप्ते पत्यौ विवस्वति रागिणी ।

माणिक्यानि पद्मरागाः तेषां खनिराकरम् । ध्वान्तेन श्यामां पिधायिकामाच्छादिकां रजनिमेव दृषदं शिलां विधूय कतमेन जनेन विमुद्रिता न जाने खलु अत्र सूर्यमण्डलादिषु खनित्वाद्यारोपाद्रूपकालङ्कारः ॥ ४२ ॥

सुरेति । सुराणां परिवृढ इन्द्रः प्रभौ परिवृढ इति निपातनात् साधुः । कर्णाद्राधेयात् कुण्डलद्वयं ताटङ्कयुगं प्रत्यग्रहीत्किल ततो निकृत्य गात्राणि शस्त्रेण निशितेन सः । प्रायच्छद्देवराजाय दिव्यं वर्म सकुण्डलमिति भारतवचनात् । तत्रोत्प्रेक्ष्यते अथ प्रतिग्रहानन्तरं प्राच्यै दिशे मुदा प्रादात् हि यस्मात्स इन्द्रः तस्याः प्राच्याः पतिः ततो दानं युक्तमित्यर्थः । तत्र तयोर्मध्ये उदयं भजतीत्युदयभाक् उद्यन्भजोण्विः । विधुरेकं कुण्डलं व्यलोकि विलोक्यते स्म नवतरान् प्रत्यग्रतरान् करानेव च स्वर्णान् स्रावयति विदारयतीति तत्स्रावि अहर्मणिः दिनमणिः रोरितिरेफादेशः । द्वितीयं कुण्डलम् ॥ ४३ ॥

दहनमिति । रागिणी रक्तवर्णा अनुरागिणी च या दीप्तिर्गतवासरप्रथमसमयन्दिनावसानं अत्यन्तसंयोगे द्वितीया । पत्यौ स्वामिनि भर्तरि च विवस्वति सूर्ये अस्तमस्ताद्रिमदर्शनङ्गते सति अस्तस्तु चरमः क्ष्माभृदस्तमदर्शनमिति चामरः । दहनमग्निमविशत् अग्निं वादित्यः सायं प्रविशतीतिश्रुतेरितिभावः । अतोऽनन्तरं हठाद्बलादधरभुवनादधोलोकात् पातालान्नरकाच्चोद्धृत्य तरणेः पत्युरर्कस्य सता अमरपति-

अधरभुवनात् सोद्धृत्यैषा हठात्तरणेः कृता-
ममरपतिपुरप्राप्तिर्धत्ते सतीव्रतमूर्त्तिताम् ॥ ४४ ॥

बुधजनकथा तथ्यैवेयं तनौ तनुजन्मनः
पितृशितिहरित्पर्णाद्याहारजः किल कालिमा ।
शमनयमुनाक्रोडैः कालैरितस्तमसां पिवा-
दपि यदमलच्छायात् कायादभूयत भास्वतः ॥ ४५ ॥

अभजत चिराभ्यासं देवः प्रतिक्षणदात्ययम्
दिनमयमयं कालं भूयः प्रसूय तथा रविः ।

पुरप्राप्तिः इन्द्रनगरप्राप्तिः स्वर्गप्राप्तिश्च यया सा तीव्रतया सह वर्त्तत इति सतीव्रता पतिव्रताधर्मश्च मूर्त्तिः यस्यास्तस्या भावस्तत्ता तां सतीव्रतमूर्त्तितां धत्ते। मूलग्राहितया सर्वं बलादुद्धरते यथा। तदुद्धृत्य च सा नारी तेनैव सह मोदत इति स्मरणादितिभावः। अत्र प्रस्तुतदीप्तिविशेषणसाम्यादप्रस्तुतप्रतीतेः समासोक्तिरलङ्कारः ॥ ४४ ॥

बुधेति। तनोर्जन्म यस्य तनुजन्मनोऽपत्यस्य अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः। तनौ शरीरे कालिमा श्यामता पितुर्जनकस्य शितिहरितौ पीतहरितौ पर्णौ यस्याहारस्य स आदिर्यस्य तस्मादाहाराज्जातस्तज्ज इतीयं बुधजनकथा विद्वज्जनगोष्ठी तथ्यैव सत्यैव। कुतः यद्यस्मादमलच्छायादतिस्वच्छकान्ते स्तमसां तद्योगात् कर्मणि षष्ठी। पिवतीति पिवात् पातुः प्राघ्रेत्यादिना शप्रत्ययः, पिवादेशश्च इतोऽस्माद्भास्वतः सूर्यस्य कायात् शमनयमुनाक्रोडैः यमकालिन्दीशनैश्चरैः कृष्णवर्णैरभूयत भूतं भावे लङ्। अत्र शमनादिकालिम्नस्तत्पितृतिमिरभारपरिणतिपूर्वकत्वोत्प्रेक्षा ॥ ४५ ॥

अभजतेति। अयं देवः रविः प्रतिक्षणदात्ययं प्रतिरात्रमव्ययीभावसमासस्तृतीयासप्तम्योर्बहुलमिति विकल्पात्सप्तम्यामम्भावः। दिनमयं दिनरूपं कालं समयं कृष्णरूपञ्च कालो मृत्यौ महाकाले समये यमकृष्णयोरिति

न खलु शकिता शीलं कालप्रसूतिरसौ पुरा
यमयमुनयोर्जन्माधानेऽप्यनेन यथोज्झितुम् ॥ ४६ ॥

रुचिरचरणः सूतोरुश्रीसनाथरथः शनिम्
शमनमपि स त्रातुं लोकानसूत सुताविति ।
रथपदकृपासिसिन्धुर्बन्धुर्दृशामपि दुर्जनै-
र्यदुपहसितो भास्वान्नास्मान् हसिष्यति कः खलः ॥ ४७ ॥

शिशिरजरुजां घर्मं शर्मोदयाय तनूभृता-
मथ खरकराख्यानास्थानां प्रयच्छति यः पयः ।

विश्वः । भूयः पुनः पुनः प्रसूय जनयित्वा तथाचिराभ्यास मभजत तथादौ कालस्यानेहसः कृष्णस्य च प्रसूतिः जननं पुरा पूर्वकाले यमयमुनयो र्जन्माधाने जननेऽप्यनेन रविणा उज्झितुन्त्यक्तु' न शकिता न शक्ता कर्मणि क्तः । कर्मणि निष्ठाया मिड़ागमः । तत्र कालशब्दे वाच्यप्रतीयमानयो रभेदाध्यवसायेन भगवतो भानोः प्रत्यहं कालप्रसूत्याभ्यासादपत्येष्वपि शमनयमुनादिषु कालप्रसवितृत्वमुत्प्रेक्ष्यते तत्र कालयोः कृष्णानेहसोरभेदाध्यवसायइति तयोरेकत्वेनात्र सङ्करः ॥ ४६ ॥

रुचिरेति । रथपदेषु रथाङ्गनामपक्षिषु यः कृपासिन्धुश्चक्रवाकानां त्रातेत्यर्थः । तथा दृशां लोकचक्षुषां बन्धुः प्रकाशक ईदृशोभास्वानपि रुचिरचरणः सन् वस्तुतस्तु विपरीतवृत्तिः सन्तापकादित्वादिति । सदयं सूतया प्रसूतया ऊर्व्या श्रिया सूतस्य सारथेरुरुश्रिया शोभया च सनाथः सहितोरथो यस्य सः सक्थि क्लीवे पुमानूरु सूतः पक्षं च सारथि रिति चामरः । स देवः शनिं शनैश्चरं क्रूरग्रहमितिभावः । शमनं च सुतौ पुत्त्रौ लोकांस्त्रातुं असूतेति दुर्जनैः यस्मादुपहसितः परिहसितः अस्मान् खलः को न हसिष्यति कैमुत्येनार्थान्तरापादानादर्थापत्तिरलङ्कारः ॥ ४७॥

शिशिरेति । शिशिरजा हिमजा रुक् पीड़ा येषां तेषान्तनूभृतां शरीरिणां शर्मोदयाय सुखाविर्भावाय एवमुत्तरवाक्येऽप्यनुषञ्जनीयं घर्मं

जलभयजुषां तापं तापस्पृशां हिममित्यय-
स्परहितमिलत्कृत्यावृत्तिः स भानुरुदञ्चति ॥ ४८ ॥
इह न कतरश्चित्रं धत्ते तमिस्रततीर्दिशा-
मपि चतसृणामुत्सङ्गेषु श्रिता धयतां क्षणात्।
तरुशरणतामेत्य च्छायामयं निवसत्तमः
शमयितुमभूदानैश्वर्यं यदर्यमरोचिषाम् ॥ ४९ ॥
जगति तिमिरं मूर्च्छामब्जव्रजेऽपि चिकित्सतः
पितुरिव निजादस्माद्दस्रावधीत्य भिषज्यतः।

निदाघं प्रयच्छति आतपेन जलं शोषयतीत्यर्थः। तापस्पृशां सन्तापभाजां हिमं प्रयच्छतीति इत्थं परहितेन मिलन्ती युज्यमानाकृत्यावृत्ति व्यापाराभ्यासो यस्य स भगवान् भानुरुदञ्चत्युदेति क्रियसमुच्चयोऽलङ्कारः ॥ ४८ ॥

इहेति। चतसृणान्दिशामपि न तिसृचतसृष्विति निषेधान्नामि दीर्घो न। उत्सङ्गेषूपरिभागेषु अनातपप्रदेशेष्वित्यर्थः। श्रिता स्थितास्तमिस्रस्य ततीस्तिमिरसम्बाधानि क्षणात् धयतां पिबतां धेटोलटः शत्रादेशः। अर्यमरोचिषां घर्मांशुतेजसामन्तरवएव शरणं त्रातारो यस्य तद्भावं तत्तामेत्य प्राप्य निवसच्छायामयमनातपरूपं तमः शमयितुं संहर्तुमनीश्वरस्य भावमनैश्वर्यमसामर्थ्यं नञः शुचिरीत्यादिनोभयपदवृद्धिः। अभूदिति यत् इहास्मिन्नर्थे कतरश्चित्रमाश्चर्यं न धत्ते तदस्मिन् तमोविघातिनोदेवस्याल्पविषयैः सामर्थ्यविघातः सूर्यमभितस्तस्य तरुशरणत्वं तरूणां ददात्त्वमिति विरोधात्कोवा विस्मय इत्यर्थः। आवृत्तिषु तेजसो नत्र प्रवेशादविरोधाद्विरोधाभासोऽलङ्कारः ॥ ४९ ॥

जगतीति। दस्रावश्विनौ जगति लोके तिमिरं तमो नेत्ररोगं च तिमिरं ध्वान्तं नेत्रामयेऽपि चेति विश्वः। अब्जव्रजे पद्मषण्डे मूर्च्छां निमिलनं रोगविशेषणं च चिकित्सतः प्रतिकुर्वाणात्कितः सनन्ता-

अपि च शमनस्यासौ तातस्ततः किमनौचिती
यदयमुदयः कह्लाराणामुदेत्यपमृत्यवे ॥ ५० ॥
उडुपरिवृढः पत्यामुक्तां सतीं यदपीडय-
यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती ।
तदुभयमतः शङ्के सङ्कोचितं निजशङ्कया
प्रसरति नवार्के कर्कन्धूकणारुणरोचिषि ॥ ५१ ॥
अतिमयतनोर्भानोर्जानेऽवनेरधराध्वना
विहरणकृतः शाखाः साक्षाच्छतानि दश त्विषाम् ।

लटः शत्रादेशः गुप्तिच्किद्भ्यः सन् निन्दाक्षमा प्रतीकारे सन्निष्यते। निजात्पितुरस्मात् सूर्यादधीत्य चिकित्सामस्य भिषज्यतइव चिकित्सतः किमित्युत्प्रेक्षा। कण्ड्वादौ भिषजेति पाठाद्यगन्ताल्लटितङ् उल्लाघयति भैषज्ये चिकित्सति भिषज्यतीति भट्टमल्लः। अपिचासौ सूर्यः शमनस्य यमस्य तातो जनकस्ततः किमित्युत्प्रेक्षा। अयम्भानुरुदयः सन् कह्लाराणां सौगन्धिकन्तु कह्लारमित्यमरः। अपमृत्यवे अकालमरणाय उदेति सा अनौचिती अनौचित्यं तयोः पितृवत्सर्वोपकारित्वमुचितं पितुस्तु रवेरक्तकमलहारित्वमनुचितं इत्यर्थः ॥ ५० ॥

उडुरिति। उडुपरिवृढश्चन्द्रः पत्या भर्त्रा भानुना मुक्तां सतीं साध्वीं बिसिनीं यदपीडयत् कुमुद्वती कुमुदिनी कुमुदनड्वेतसेभ्यः ड्मतुप्। भानोर्जायां बिसिनीमपि जहास। अतोऽस्मात्कारणात्कर्कन्ध्वाः कर्कन्धूः पक्ववदरीफलमित्यर्थः। कण् प्रत्ययः। तत्कणावदरुणरोचिषि नवार्के बालार्के प्रसरति सति तयोः कुमुद्वतीचन्द्रयो रुभयं द्वन्द्वं निजशङ्कया स्वाभिभवहेतुना सङ्कोचितन्निस्तेजितं शङ्के इत्युत्प्रेक्षा सर्वथा सन्दुष्टेष्वात्मानं कलुषयतीति भावः ॥ ५१ ॥

अतीति। अवनेरधराध्वनाऽधोमार्गेण च एतच्च वर्णस्थानमात्रोपलक्षणं

निशि निशि सहस्राभ्यां दृग्भिः शृणोति सहस्वराः ।
पृथगहिपतिः पश्यत्यस्य क्रमेण च भास्वराः ॥ ५२ ॥
वज्र न खरता येषामग्रे खलु प्रतिभासते
कमलसुहृदस्तेऽमी भानोः प्रवालरुचः कराः ।
उचितमुचितं जालेष्वन्तः प्रवेशिभिरायतैः
कियदवयवैरेषामालिङ्गिताङ्गुलिवल्गुता ॥ ५३ ॥

अधरोह्यूर्द्धहीन इतियान्वयः। विहरणकृतो विहारकृतः सञ्चरत आविर्भवतश्च श्रुतिमयतरोर्वेदात्मकवृक्षस्यास्य भानोस्त्विषां रश्मीनां दशशतानि सहस्राणि सहस्रमेव सहस्ररश्मिरूपेण परिणता इत्यर्थः। स्वरैरुदात्तादिभिरनुवर्त्तन्त इति सहस्वराः सस्वराः वोपसर्जनस्येति सहशब्दस्य विकल्पात्सहभावः। पृथक् साङ्कर्येण भास्वराः भासनशीलाः भ्राजभासेत्यादिना रः। शाखाः वेदभागान् शीर्षांश्च शाखा वेदप्रभेदेषु बाह्वोः पार्श्वद्रुमाङ्गयोरिति यादवः। अहिपतिः शेषः निशिनिशि प्रतिनिशं वीप्सायां द्विर्भावः। एतल्लोकापेक्षया निशीत्युक्तं। तत्र तदा सूर्यसञ्चारेण निशाभावात् सहस्राभ्यां सहस्रसङ्ख्याभिः दृग्भिरक्रमेण यौगपद्येन साक्षादपरोक्षं शृणोति पश्यति शेषस्य चक्षुःश्रवस्त्वात् शाखानां बाह्वात्मकत्वं न श्रावणत्वोपदेशात् रश्मिपरिणामेन चाक्षुषत्वाच्चेतिभावः। जाने इत्युत्प्रेक्षा रूपकसङ्कीर्णा चेयमुत्प्रेक्षेति व्युत्क्रमेण एकेन दृक् सहस्रेण शृणोति अपरेण दृक्सहस्रेय पश्यतीति विश्वेश्वरभट्टारकव्याख्यानं चिन्त्यं। दृशां प्रत्येकमुभयशक्तियुक्तानां शक्तिप्रविभागयोगात् तस्मात् ग्राहकस्योभयशक्तिमत्त्वाद्ग्राह्यस्य च तेजः शब्दोभयात्मकत्वात्सर्वाभिरेव दृग्भिः सर्वाश्च शाखा युगपत् पश्यति शृणोति चेति रमणीयम् ॥ ५२ ॥

वज्रीति। येषां कराणां अंशूनां हस्तानामग्रे प्रत्ययावस्थायां वज्रिति न खरता अतीक्ष्णता प्रतिभासते एतस्याग्रे अग्रभागे वज्रनखरता वज्रनखरत्वं प्रतिभासते नखोऽस्त्री नखरोऽस्त्रियामित्यमरः। कमलानां

नय नयनयोर्द्राक् पेयत्वं प्रविष्टवतीरमू-
र्भवनवलभीजालान्नाला इवार्ककराङ्गुलीः ।
भ्रमदणुगणक्रान्ता भान्ति भ्रमन्त्य इवाशु याः
पुनरपि धृताः कुन्दे किं वा न वर्द्धकिना दिवः ॥ ५४ ॥
दिनमिव दिवाकीर्त्तिस्तीक्ष्णात् क्षुरात् सवितुः करात्-
तिमिरकवरीलूनां कृत्वा निशां निरदीधरत् ।

सुहृदो बन्धवः अन्यत्र तत्सदृशाः प्रवालरुचः उभयत्र विद्रुमभासः अमीभानोः करा अंशवो हस्ताश्च खलु जालेषु गवाक्षविवरेषु कियत् स्तोकं अन्तः प्रवेशिभिः प्रविष्टैरायतै दीर्घैरवयवैः एकदेशैरेषां कराणां अङ्गुलीनां करशाखानां अङ्गुल्यः करशाखा इत्यमरः । वल्गुता चारुता आलिङ्गिता प्राप्तेति विशेषणसङ्कीर्णानिदर्शनाभेदः । अङ्गुलिशब्दोदेशीत्याङः उचितमुचितं कराणामङ्गुलित्वमत्यन्तोचितमित्यर्थः । आभीक्ष्ण्ये द्विरुक्तिः ॥ ५३ ॥

नयेति । भवनवलभीनां गृहविशेषाणां जालात् प्रविष्टवतीरन्तः प्रविष्टास्ता इव स्थिताः कमलकाण्डायिता इत्यर्थः । अमूः पुरोवर्तिनीः अर्कस्य करा इव करा हस्ताः श्लिष्टरूपकं बलिहस्तांशवः कराः इत्यमरः । तेषामङ्गुलीः करशाखाः तन्नयनयोः पेयत्वं नय पश्येत्यर्थः । अथासां दर्शनीयतामुत्प्रेक्षया दर्शयति याः कराङ्गुलयः भ्रमद्भिरणुगणैः त्रसरेणुजालैः क्रान्ता वेष्टिताः सत्यः आशु भ्रमन्त्य इव भान्तीत्युत्प्रेक्षा । भ्रमणे कारणमुत्प्रेक्षते पुनरपि दिवःस्वर्गस्य वर्द्धकिना विश्वकर्मणा तक्षा तु वर्द्धकिस्त्वष्टेत्यमरः । कुन्दे चक्रभ्रमे शर्म कुन्दस्य यन्त्रकमिति यादवः । धृता वा न किं पुराः किल सन्ध्यादेव्या स्वर्गे सूर्यभार्य्यया दुष्प्रापश्च मातरश्चेत्यतोल्लोखेन सुप्रापश्चकारेति पौराणिकी कथा चानुसन्धेया ॥५४॥

दिनमिति । दिनं कर्त्ते रात्रौ निषेधात् दिवाकीर्त्यत इति दिवाकीर्त्तिर्नापितस्य क्षुरी मुण्डी दिवाकीर्तिर्नापिता स्तापसा नरा इत्यमरः ।

स्फुरति परितः केशस्तोमैस्ततः पतयालुभिः
भ्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥ ५५ ॥
ब्रूम ! शङ्खं तव नलः यशः श्रेयसे दृष्टशब्दम्
यत्सोदर्यः स दिवि लिखितः स्पष्टमस्ति द्विजेन्द्रः।
श्रद्धा श्रद्धाकरमिह करच्छेदमप्यस्य पश्य
म्लानिश्यामं तदपि नितरां हारिणेयः कलङ्कः ॥ ५६ ॥

करात् किरणादेव क्षुरात् वापनशस्त्रात् क्षुरोऽस्य वापनं शस्त्रमिति यादवः। निशां रात्रिं तिमिरमेव कवरी केशपाशस्तत्त्वां लूनां लूनकेशीं ज्ञानपादेत्यादिना कवरात् ङीप्, पूजाकारा सख दिश्यः परवचनमिति लूनेति निष्ठायाः परनिपातः ल्वादिभ्यश्चेति निष्ठान्तत्वं बहुव्रीहिस्वान्तोदात्तादिति ङीप्। निरदीधरत् निष्कासयामास किमित्युत्प्रेक्षा। दधाते णौ चङ्युपधाया ह्रस्वः। ततो वपनादेककाराणि तेषां तेषां गृहादीनां छाया तत्तच्छायत्वं विभाषा सेनेत्यादिना नपुंसकत्वं। तेषां छलादित्य पह्नवः। परितः पतयालुभिः पतनशीलैः स्पृहि गृहीत्यादिना आलुच्। केशस्तोमैः केशव्यतिकरैः अवनीतलमधवलमसितं स्फुरति भ्रुवमित्युत्प्रेक्षायाम् ॥ ५५ ॥

ब्रूम इति। हे नल ! महाराज ! श्रेयसे मङ्गलाय दृष्टशब्दं शङ्खं धत्ते मङ्गलव्यवहारत्वात्। अन्यत्र श्रेयसे स्वर्गाय दृष्टशब्दं शङ्खं कम्बुं यशो ब्रूमः यशस्तुल्यं ब्रूम इत्यर्थः। समानमुदरं यस्य स समानोदरे शयितः सोदर्यो भ्राता उभयोरपि समुद्रजन्यत्वादिति। विभाषोदर इत्यादिना समानशब्दस्य प्रागेव समानोदराद्यतीति यत्प्रत्ययः। यशसस्तु सोदर्यः सदृशत्वाभिमानी इह काले अश्रद्धाकर मनादराबहं तस्य चन्द्रस्य करच्छेदसंशुनाशमपि पश्य किन्तु स्फुटस्य हारिणो हरिणकेतोर्यः कलङ्कस्तदपि नितरां म्लानेर्दैन्यस्य स्थानं सास्पदन्तस्मान्न समान इत्यर्थः। अन्यच्च श्रेयसे धर्मोपदेशाय दृष्टशब्द मम्प्रतिमस्तुतिमन्यं शङ्खं शङ्खाख्यं मुनिं न तव

ताराशङ्खविलोपकस्य जलजं तीक्ष्णत्विषो भिन्दतः
सारम्भं चलता करेण निविडां निष्पीडनां लम्भितः।
छेदार्थोपहृताम्बुकम्बुजरजोजम्बालपाण्डूभव-
च्छङ्खच्छित्करपत्रतामिह वहत्यस्तंगताङ्गो विधुः॥ ५७॥
यत्पाथोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमान्
दृष्टीःपूरयति स्म यज्जलरुहामच्छा सहस्रं हरिः।

यशस्तुलं ब्रूमः यस्य शङ्खस्य सोदर्यो भ्राता स प्रसिद्धो लिखितो लिखिताख्यो द्विजेन्द्रो ब्राह्मणोत्तमः दिवि स्वर्गेऽस्ति अर्थात्सत्यं। किञ्चेह लोके श्रद्धाकरं विश्वासजनकम् अस्य लिखितस्य करच्छेदमपि पश्य इह हारिणो यस्य कलङ्कोपहार माप कलङ्को नितरां म्लाने दण्डस्य स्थानं कारणम् अत्र शान्तिपर्वणि सुद्युम्नोपाख्यानं ततः स पृथिवीपालो लिखितस्य महात्मनः। करौ प्रच्छेदयामास धृतदण्डो जगाम स इति। अत्र विशेषणविशेष्ययोरपि श्लिष्टत्वादभिधायाः प्रकृतार्थक्रियार्थत्वात् प्रकृतार्थध्वनिरेवेति सङ्क्षेपः मन्दाक्रान्तावृत्तम्॥ ५६॥

तारेति। तारास्तारकाएव शङ्खाः तेषां विलोपकस्य विनाशकस्य छेदकस्य जलजं पद्मं शङ्खञ्च जलजं शङ्खपद्मयोरिति विश्वः। छिन्दतो नयतः छेदकस्य तीक्ष्णत्विषस्तीग्मांशोः सारम्भं सप्रयत्नं चलतास म्रियमाणेन करेणासिना हस्तेन च निविड़ां गाढां निष्पीडनां स्तम्भनामरोधनञ्च लम्भितः प्रापितः अस्तमदर्शनगतमङ्गं यस्य स विधुरस्मात् स्तम्भितचन्द्रछेदार्थं शीघ्रमुच्छेदसिध्यर्थमुपहृतमर्पितपदमम्बुकम्बुजं छिद्यमानं शङ्खजं यद्रज स्तदेव जम्बालः कर्दमस्तेन पाण्डूभवच्छुभ्रीभवत् शङ्खं छिनतीति शङ्खच्छित् तत्करपत्रं क्रकचः क्रकचोऽस्त्री करपत्रमित्यमरः। तस्य भाव स्तत्तां वहति चेत्युत्प्रेक्षा॥ ५७॥

यदिति। यद्यस्मादंशुमानर्कः पाथोजविमुद्रणप्रकरणे पद्मविकासप्रस्तावे दृष्टीर्दृशो निर्निद्रयति विकासयति यद्यस्माच्च हरिर्विष्णुः जल-

साजात्यं सरसीरुहामपि दृशामप्यस्ति तद्वास्तवं
यन्मूलाऽऽद्रियतेतरां कविदृग्भिः पद्मोपमा चक्षुषः॥ ५८॥

अवैमि कमलाकरे निखिलयामिनीयामिक
श्रियं श्रयति यत् पुरा विततपत्रनेत्रोदरम्।
तदेव कुमुदं पुनर्दिनमवाप्य गर्भभ्रम-
द्द्विरेफरवघोरणाघनमुपैति निद्रामुदम्॥ ५९॥

रुहां शिवपूजाकमलानां सहस्रसङ्ख्याम् अक्ष्णा स्वनेत्रेण पूरयति स्म पूर्णां चकार युक्तं हरिस्तेसाहस्रं कमलबलिमादाय विधिना यदेकोनं तस्मिन् निजमुदहरन्नेत्रकमलमिति। तस्मात् सरसीरुहामपि वास्तवं पारमार्थिकं, स वस्तुजमन्यथा पद्मोल्लासप्रकरणबाधः द्विजातीयत्वेन त्रपुणा कनकमयपूरणवदक्षिकमलसङ्ख्यापूरणायोगाच्चेति भावः। कविदृग्भिः कविभिस्तु यत्साजात्यमलङ्करणं यस्याः मूला चक्षुषः पद्मैरुपमा औपम्यमाद्रियतेतरां सत्क्रियतेतरां तिङ् व्ययादामुप्रत्ययः। वैभाव्येन सद्वस्तुनोरपि सुवर्णरजतपरोपमायोगादिति भावः॥ ५८॥

अवैमीति। यत्कुमुदं कर्त्तृ कमलाकरे सरसि विततानि विस्तृतानि पत्राण्येव नेत्राणि उदराणि यस्य तत्तादृशं सन्निखिलायां यामिन्यां यामिको जागरिता तत् श्रियमिव श्रियमिति सादृश्याक्षेपान्निदर्शनाभेदः। पुरा श्रयति श्रयति स्म पुरा लुङ् चेति चकाराद्भूते लट्। तदेव कुमुदं पुनः दिनमवाप्य गर्भे अन्तः भ्रमतां द्विरेफाणां भ्रमराणां रवघोरणा शब्दाधिक्यं यस्यां तां घोरशब्दइति तौदादिकाद्भावे ल्युट्। निद्रामुदं निद्रासुखं पुनरुपैति रात्रौ जागरितो हि दिवा निद्रागीतिभावः। अवैमीत्यत्रच्छायास् एकस्मिन् कुमुदे अनेकयो र्निद्राजागरयोः क्रमेण प्रत्यभिधानादेकस्मिन् अथवा अनेक मित्युक्तलक्षणपर्यायालङ्कारेण पूर्वोक्तनिदर्शनसङ्कीर्णा। पृथिवीवृत्तं जसौ जसयलावसुग्रहयतिश्च पृथिवी गुरुरिति लक्षणात्॥ ५९॥

इह किमुषसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनैष पृष्टः।
भण फणिभवशास्त्रे तातङः स्थानिनौ का-
विति विहिततुहीवागुत्तरः कोकिलोऽभूत्॥ ६०॥

दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत् कोऽप्यधीती कपोतः
कण्ठे शब्दौघसिद्धिक्षतबहुकठिनीशेषभूषानुयातः।
सर्वं विस्मृत्य दैवात् स्मृतिमुषसि गतां घोषयन्यो घुसंज्ञाम्
प्राक्संस्कारेण सम्प्रत्यपि धुवति शिरः पट्टिकापाठनेन॥ ६१॥

इहेति। इहोषसि पृच्छां शंसतीति पृच्छाशंसी प्रश्नवाचकः प्रश्नोऽनुयोगः पृच्छा चेत्यमरः। तस्य किं शब्दस्य रूपे रूपविशेषे काविति विप्रलम्भप्रथमाद्विवचनान्ते प्रतिनियमितमिति व्यक्तवाचा व्यक्तवाक्येन तेन काविति व्यक्तवाक्येनेत्यर्थः। वायसेन काकेन फणिनोभवे तस्य शास्त्रे पाणिनीये तातङः तातङादेशस्य स्थानिनौ देशिनौ कौ भणेति पृष्टः कोकिलः विहिता प्रयुक्ता च तुहि इति वाक् सैवोत्तरं प्रतिवचनं यस्य सकाविति तुहीति कोकिलकूजितेन पूर्वोक्तप्रश्नोत्तरत्व मुत्प्रेक्ष्यते॥ ६०॥

दाक्षीति। दाक्षीपुत्रस्य पाणिनेस्तन्त्रैः शास्त्रैः अधीतमनेनाधीती दाक्षीपुत्रतन्त्र इत्यर्थः। इष्टादिभ्यश्चेतीनिप्रत्ययः सप्तमीविभागेनोक्तस्य विषयस्य कर्मण्युपसङ्ख्यानात् सप्तमी कोऽपि विद्वानयं कपोतः मूढः यः कपोतः कण्ठे शब्दौघेषु सिद्धौ अभिव्यक्त्यर्थं क्षता धर्षणेन चूर्णिता वह्वी या कठिनी खटी टीपणविशेषः कठिना कठिनायान्तु कठिने तु प्रयुज्यत इत्यर्थः। तस्याः शेषोऽक्षरक्षिप्तचूर्णशेषः सएव भूषा तयाऽ-

पौरस्त्यायां घुसृणसुमनःश्रीजुषो वैजयन्त्याः
स्तोमैश्चित्तं हरति हरिति क्षीरकण्ठैर्मयूखैः।
भानुर्जाम्बूनदरुचिरसौ शक्रसौधस्य कुम्भः
स्थाने पानं तिमिरजलधेर्भाभिरेतद्भवाभिः ॥ ६२ ॥

द्वित्रैरेव तमस्तमालगहनग्रासे दवीभावुकै-
रुस्रैरस्य सहस्रपत्रसदसि व्यश्राणि वस्त्रोत्सवः।
धर्माणां रयचुम्बितं वितनुते तत् पिष्टपिष्टीकृत-
क्ष्मादिग्व्योमतमोऽघमोघमधुना मोघं निदाघद्युतिः ॥ ६३ ॥

क्षुयातो तृषितः सन् सर्वं विस्मृत्य तिर्यग्योनेस्तु सम्बन्धादिति भावः। पट्टिकापाठनेन पट्टिकापाठजनकफलपाठजन्येन प्राक्संस्कारेण प्राक्भवीयवासनया दैवात् कथञ्चित् स्मृतिं गतां घुसंज्ञां दाधास्वदाविति सूत्रोक्तां घोषयन् घुशब्दमुच्चै रुच्चारयन् सम्प्रत्युषसि शिरो धुवति धूनयतीत्युत्प्रेक्षा ॥ ६१ ॥

पौरस्त्यायामिति। भानुः पुरोभवा पौरस्त्या दक्षिणापश्चात् पुरसस्त्यक् तस्यां हरिति प्राच्यां दिशि घुसृणस्य कुङ्कुमस्य सुमनसां वा श्रीः शोभा तज्जुषस्तद्भवायाः वैजयन्त्याः पताकायाः स्तोकैरपत्यैस्तद्भवै रित्यर्थः। अपत्यं स्तोकं तयोः समेत्यमरः। क्षीरकण्ठै र्बालैर्मयूखैश्चित्तं हरति मनोहरोभवतीत्यर्थः। किञ्च जाम्बूनदरुचिरुदयरागात् कनककान्ति रसौ भानुः शक्रस्य सौधस्य वैजयन्तस्य कुम्भः सौधाग्रवर्तिकलश इति रूपकं। एतद्भवतीति एतद्भवाभिः कुम्भभवाभिः भाभिः प्रभाभिस्तिमिरजलधेः पानं उभयप्राप्तौ कर्मणीति कर्मणि षष्ठी। स्थाने युक्तं युक्तं द्वे साम्प्रतं स्थान इत्यमरः। कुम्भसम्भवस्य जलधिपान मुचितमिति भावकालङ्कारः ॥ ६२ ॥

द्वित्रैरिति। द्वौ वा त्रयो वा द्वित्राः सङ्ख्याव्ययेत्यादिना बहुव्रीहिः

दूरारूढस्तिमिरजलधेर्वाडवश्चित्रभानु-
र्भानुस्ताम्यद्वनरुहवनीकेलिवैहासिकोऽयम् ।
न स्वात्मीयं किमिति दधते भास्वरश्वेतिमानम्
द्यामद्यापि द्युमणिकिरणश्रेणयः घोषयन्ति ॥ ६४ ॥
प्रातर्वर्णनयाऽनया निजवपुर्भूषाप्रसादानदा-
द्देवी वः परितोषितेति निहितामान्तः पुरीभिः पुरः ।

बहुव्रीहौ डच्समासान्तः । तैस्तन्मात्रैरेव तमएव तमालगहनं तस्य ग्रासे गिलने दवीभावुकैर्वह्नीभवद्भिः दवदावौ वनानलावित्यमरः । अभूततद्भावे च्विः अस्य च्वाविति ईकारः लषपतेत्यादिना उकञ् प्रत्ययः । अस्य निदाघद्युतेरुस्रैः करैः सहस्रपत्रसरसि पद्माकरेषु घस्रोत्सवो व्यश्राणि विश्राणितः श्रणु दाने कर्मणि क्त इति क्तः । तस्मान्निदाघद्युतिः सूर्यः पिष्टपिष्टीकृतं कृतकरणात्तत्प्रायीकृतं क्ष्मादिग्व्योमतमोऽघमतएव अघम् एनः अंहः दुःखव्यसनेष्वघमित्यमरः । रयचुम्बितं रयव्याप्तं घर्माणामातपानामोघ मधुना मोघं व्यर्थमेव वितनुते ॥ ६३ ॥

दूरेति । तिमिरजलधेर्वाड़वश्चित्रभानुर्वडवाग्निः तिमिरसंहर्त्तेत्यर्थः । ताम्यन्त्या क्लाम्यन्त्या वनरुहवन्याः पद्मवनस्य केलिषु क्रीड़ासु विहासः प्रयोजनं यस्य वैहासिको दीनो प्रयोजनमिति ठञ् । अयं भानुर्दूरमारूढो दूरारूढः द्युमणेः किरणश्रेणयोऽद्यापि द्यामाकाशं घोषयन्ति घोषां कुर्वन्ति किमिति स्वात्मीयं निजं भास्वरं श्वेतिमानं श्वैत्यं सितभास्वरत्वं न दधते न धारयन्ति तस्मादुत्थातुमय सुचितः कालइत्यर्थः ॥ ६४ ॥

प्रातरिति । हे वन्दिनः ! अनया प्रातर्वर्णनया प्रभातवर्णनया परितोषिता देवी वोयुष्मभ्यं निजवपुषो भूषणान्येव प्रसादान् पारितोषिकाख्यादात् इत्यमुक्तेतिशेषः गम्यमानार्थत्वात् अप्रयोगः । आन्तःपुरिकाभि

सूता मण्डनमण्डलीं परिदधुर्माणिक्यरोचिर्मय-
क्रोधावेगसरागलोचनरुचा दारिद्र्यविद्राविणीम् ॥ ६५ ॥
आगच्छन्नभणतामुषः क्षणमथातिथ्यं दृशोरानये
स्वर्गङ्गाम्बुनि वन्दिनां कृतदिनारम्भाप्लुतिर्भूपतिः ।
आनन्दादतिपुष्पकं रथमधिष्ठाय प्रियायौतुक-
प्राप्तं तैरपरागतैरविदितप्रासादतो निर्गमः ॥ ६६ ॥

अन्तःपुरे नियुक्ताभिः तत्र नियुक्तया ठञ् । पुरेऽग्रे निहितां माणिक्यरोचिर्मय्यार्मणिमय्याः पद्मरागप्रभायाः क्रोधावेगेन क्रोधरसेन सरागया लोचनरुचा दारिद्र्यस्य विद्राविणी मुच्चाटनीं तपस्विनी मित्युत्प्रेक्षा मण्डनमण्डलीं आभरणराशिं सूता वन्दिनः सूतः पारद वन्दिनोरिति विश्वः । परिदधुर्धारयामासुः ॥ ६५ ॥

आगच्छन्निति । अथ भूपतिर्नलः स्वर्गङ्गाम्बुनि मन्दाकिनीप्रवाहे कृतदिनारम्भाप्लुतिः कृतप्रातःस्नानः सन् प्रियायाः यौतके उपाहरणे प्राप्तं भीमदत्तमतिक्रान्तपुष्पकमतिपुष्पकमिति अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गताप्रतिषेधः । तं रथमधिष्ठायास्थायागच्छन् प्रत्यागच्छन् उषःक्षणं भणत तथैव प्रातःकालं वर्णयतएव मर्थिनां वन्दिनां दृशो र्दृशामित्यर्थः । आतिथ्य मानये प्राप्तस्तैः दृष्ट इत्यर्थः । अजादेरित्यभ्यासदीर्घः अश्नोतेश्चेति नुडागमः अपरागतैरनपेतैः तत्रैव स्थितैरपीत्यर्थः । तैर्वन्दिभिः प्रसादतः निर्गमोऽविदितोयेन सः अतएव पूर्वश्लोके देव्येव पारितोषिकं दत्तमित्युक्तम् ॥ ६६ ॥

श्रीहर्षमिति । एकां मुख्यां नवार्थघटनामपूर्वार्थस्फूर्तिं त्यजतो अस्य विंशतेः परणोडट् तस्य पूरणोडदिति विंशतेर्डतीति शब्दलोपः

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यम् ।
एकां न त्यजतो नवार्थघटनामेकान्नविंशो महा
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥६७॥

एकोनऊनविंशः एकान्नविंशः एकोनविंश इत्यर्थः। ऊनार्थे चात्र नञ् तत इति काशिका विंशशब्देन समासः एकादिश्चैकस्य चाटुगिति नञः प्रकृतिभावः एकशब्दस्य उगागमश्च गतमन्यत् ॥ ६७ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचल-
मल्लिनाथविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां
एकोनविंशतिः सर्गः ।

नैषधचरितम् ।

विंशः सर्गः ।

सौधाद्रिकुट्टिमानेकधातुकाधित्यकातटम् ।
स प्राप रथपाथोभृद्वातजातजवो दिवः ॥ १ ॥
ततः प्रत्युद्गाद्भैमी कान्तमायान्तमन्तिकम् ।
प्रतिची सिन्धुवीचीव दिनोद्गारे सुधाकरम् ॥ २ ॥
स दूरमादरं तस्या वदने मदनैकदृक् ।
दृष्टमन्दाकिनीहेमारविन्दश्रीरविन्दत ॥ ३ ॥

सौधेति । वातवत् वाताज्जातजवो वातवेगः स पूर्वोक्तो रथएव पाथोभृत् जलधरः दिवः स्वर्गादाकाशाद्वा द्यौश्च स्वर्व्योममार्गयोरितिविश्वः । सौधस्याट्टेषु उपरिगृहेषु यत्कुट्टिमः बद्धभूमिः कुट्टिमोऽस्त्री निबद्धा भूरित्यमरः । तदेवानेकधातुद्रव्यं शैषिकः कप् । अधित्यका ऊर्द्ध्वभूमिप्रदेशः तस्यास्तटं प्राप ॥ १ ॥

ततइति । ततो नलप्रवेशानन्तरम् अन्तिकमायान्तं कान्तं दिनस्योद्गारे प्रारम्भे दिनोद्गारे ओमाङोश्चेति पररूपत्वम् ! अन्तिकमायान्तं सुधाकरं प्रतिची सिन्धोर्वीचिरूर्म्मिरिव प्रत्युदगात् इणोगालुङि इति गादेशः । गातिस्था इत्यादिना सिचोलुक् ॥ २ ॥

सइति । दृष्टा मन्दाकिनीहेमारविन्दस्य श्रीर्येन सदृशदर्शनजातप्रियामुखारविन्दस्फूर्ति रित्यर्थः । मदनैकदृक् कामैकशरणः स नव

तेन स्वर्देशसन्देशसमर्पितं सा करोदरे ।
बभ्राज बिभ्रती पद्मं पद्मेवोन्निद्रपद्मदृक् ॥ ४ ॥
प्रियेणाल्पमपि प्रत्तं बहु मेनेतरामसौ ।
एकलक्षतया दध्यौ यत्तमेकवराटकम् ॥ ५ ॥
प्रेयसाऽवादि सा तन्वी त्वदालिङ्गनविघ्नकृत् ।
समाप्यतां विधिः शेषः क्लेशश्चेतसि चेन्न ते ॥ ६ ॥
क्वैतावान्नर्ममर्माविद्विद्यते विधिरद्य ते ।
इति तं मनसा रोषादवोचद्वचसा न सा ॥ ७ ॥

स्तस्याः प्रियाया वदने दूरमत्यन्तमादरमविन्दत तृष्णां प्रापेत्यर्थः ॥ ३ ॥

तेनेति । तेन प्रियेणार्पितं दत्तं स्वर्देशस्य सन्देशं सूचकं स्वर्गः भूमौ स्वयमागत इति ज्ञापयन्तमित्यर्थः । पद्मं हेमारविन्दं करोदरे करतले बिभ्रती तथा उन्निद्रपद्मदृक् विकचारविन्दलोचना पद्मेव पद्मोपमा-साक्षादेव लक्ष्मीरिव बभ्राज रेजे फणाञ्च सप्तानामपि विकल्पादेत्वाभ्यासलोपाभावः ॥ ४ ॥

प्रियेणेति । असौ भैमी प्रियेण कान्तेनेष्टजनेन च प्रत्तं दत्तम् अच उपसर्गात्तः इति दत्वादेशः । अल्पमपि वस्तु बहु मेनेतरां आतिशयिकं पूज्यं च मेनेतरां तिङव्ययत्वादामुप्रत्ययः । कुतः यद्यस्मात्कारणादेको मुख्यो वराटकः । वा पुंसि पद्मं नलिनमित्यमरः । एकवराटकं कपर्दञ्च कपर्दो वराटक इति हलायुधः । एकलक्षतया तदेकलक्षत्वेन लक्षगुणितधनत्वेन दध्यौ मेने लक्षञ्च सङ्ख्यायामिति विश्वः । प्रियदत्तं वराटकमपि रत्नादतिरिच्यत इति भावः ॥ ५ ॥

प्रेयसेति । सा तन्वी कृशाङ्गी प्रेयसा प्रियतमेनावादि कथिता तदेवाह हे ! प्रिये ! ते तव चेतसि क्लेशो न चेत्त्वदालिङ्गनस्य विघ्नकृत् शेषो विधिरनुष्ठानं समाप्यतां समाप्तिरनुज्ञायतामित्यर्थः ॥ ६ ॥

क्वेति । शर्मणः क्रीडासुखस्य मर्माविद् मर्मविद्यतीति मर्माभिघातको

क्षणविच्छेदकादेव विधेर्मुग्धे ! विरज्यसि।
विच्छेत्ताऽहं चिरं न त्वा हृदाऽऽह स्म तदा कलिः ॥ ८ ॥
सावज्ञेवाथ सा राज्ञः सखीं पद्ममुखीमगात्।
लक्ष्मीः कुमुदकेदारादारादम्भोजिनीमिव ॥ ९ ॥
समासावपि मा सम्भूत् कलिद्वापरवत्परः।
इतीव नित्यसत्त्वे तां स त्रेतां पर्य्यहूतुषत् ॥ १० ॥

नहि इत्यादिना पूर्वस्य दीर्घः। क्व एतावान्विधिरद्य ते विद्यते कुत्रास्तीति सा रोषादस्तीति सारेण तन्मनसावोचत् वचसा नावोचत् लज्जादाक्षिण्यादितिभावः ॥ ७ ॥

क्षणेति। हे मुग्धे ! हे मूढे ! भैमि ! क्षणविच्छेदकात् क्षणमात्रविघ्नकारिणो विधेरनुष्ठानादेव विरज्यसि किन्तु त्वामौ द्वितीयाया इति त्वादेशः। चिरं चिरकालं विच्छेत्ताहं विच्छेत्स्यामि च्छिदः स्वरितेत्वाल्लुटि तङि तानेष्टेरे एतेति सकारस्य हकारः। इति कलिः कलिपुरुषो हृदा आह स्म किन्तु रन्ध्रान्वेषी तिष्ठामीति भावः ॥ ८ ॥

सावज्ञेति। अथ सा भैमी सावज्ञेव स्वकर्मण्युक्तिभावादेव वभ्राजेवेत्यर्थः सा राज्ञो राजानं विहाय कर्मणि ल्यब्लोपे पञ्चमी। पद्ममिव च मुखं यस्यास्तां आत्मसमीपे सखीं लक्ष्मीः कुमुदकेदारादारात् कुमुदाकरात् आरात् तां विहायाम्भोजिनी मिवागात् अवज्ञाता हि विहाय गच्छन्तीति भावः ॥ ९ ॥

समेति। कलिद्वापरवत्कलिद्वापराविवासौ त्रेतापि परोऽन्यः ऋतुर्मा सम्भूत् माजनिष्ट माङ्योगादड़भावः। इतीवेति मत्वेव नित्यसत्त्वे नित्ययज्ञे अग्निहोत्रे तस्य तयाग्निहोत्रस्तुत्या नित्यत्वावगमाश्रयादित्यर्थः। सत्त्वमाच्छादने यज्ञमित्यमरः। स नलस्तां त्रेतामग्नित्रयं तृतीययुगं त्रेतात्वग्नौ त्रयीयुग इत्यमरः। पर्यहूतुमत् हविषा परितोषयामास उत्कर्षणि पतय इत्यादिना विकल्पेनोपधाया ह्रस्वः ॥ १० ॥

क्रियां प्राह्णेतनीं कृत्वा निषेधन् पाणिना सखीम् ।
कराभ्यां पृष्ठगस्तस्या न्यमीमिलदसौ दृशौ ॥ ११ ॥
दमयन्त्या वयस्याभिः सहासाभिः समीक्षितः ।
प्रसृतिभ्यामिवायामं मापयन् प्रेयसीदृशोः ॥ १२ ॥
तर्किताऽऽलि ! त्वमित्यङ्कवाणीका पाणिमोचनात् ।
ज्ञातस्पर्शान्तरा मौनमानशे मानसेविनी ॥ १३ ॥
साऽवादि सुतनुस्तेन कोपस्तेनायमौचिती ।
त्वां प्रापं यत्प्रसादेन प्रिये ! तन्नाद्रिये तप. ॥ १४ ॥

क्रियामिति । असौ नलः प्राह्णेतनीं प्राह्णेभवां सायं चिरमित्यादिना ट्युट्प्रत्ययः । तस्मादेव निपातनात्प्राह्णेतनीं इत्येवं क्रिया मनुष्ठानं कृत्वा सखीं पाणिना हस्तसंज्ञया निषेधन् तस्या भैम्याः पृष्ठगश्च स्थितः कराभ्यां पाणिभ्यां दृशौ लोचने न्यमीलयत् मीलयति स्म भ्राजभासेत्यादिना एकत्वेनोपधाया ह्रस्वः ॥ ११ ॥

दमयन्त्या इति । प्रसृतिभ्यां निकुब्जपाणिभ्यां प्रयोज्याभ्यां पाणिर्निकुब्जः प्रसृतिरित्यमरः । प्रेयसी दृशोरायामन्दैर्घ्यं लोचने न्यमीलयत् मापयन्निव स्थितः माते माङोणा ण्यन्तात् लटः शत्रादेशः । स नलः सहासाभिः दमयन्त्या वयस्याभिः सखीभिस्समीक्षितः सहासम् ऐक्षतेत्यर्थः ॥ १२ ॥

तर्कितेति । हे आलि ! त्वं तर्किता अवधारिता इति ह्रस्वः । इति अङ्की मां जहीहीत्येवं रूपा वाणी यस्याः सा शैषिकः कप् मानसेविनी पाण्योर्मोचनादपादानात् ज्ञातं स्पर्शान्तरं यया सा निश्चितप्रियपाणिस्पर्शासतीत्यर्थः । मौन मानशे न किञ्चिदूचे कोपादिति भावः ॥ १३ ॥

सेति । सुतनूर्भैमी तेन नलेनावाचि उक्ता वचेः कर्मणि लुङ् वदेवाह । हे प्रिये ! अयं कोपस्तव नौचिती अनौचित्यमिति भावः ।

निश्चि दास्यङ्गतोऽपि त्वां स्नात्वा यन्नाभ्यवीवदम्।
तं प्रवृत्ताऽसि मन्तुं चेन्मन्तुं तद्वद वन्द्यसे ॥१५॥
इत्येतस्याः पदासत्त्यै पत्यैषा प्रेरितौ करौ।
रुद्ध्वा सकोपं सातङ्कं तङ्कटाक्षैरमूमुहत् ॥ १६ ॥
अवोचत ततस्तन्वीं निषधानामधीश्वरः।
तदपाङ्गचलत्ताराज्झलत्कारवशीकृतः ॥ १७ ॥
कटाक्षकपटारब्धदूरलङ्घनरंहसा।
दृशा भीत्या निवृत्तं ते कर्णकूपं निरूप्य किम् ॥ १८ ॥

तथा हि यस्य तपसः प्रसादेन त्वां प्रापं प्राप्तवानस्मि आप्नोतेर्लुङ् पुषादिनामिपोमादेशः। तत्तपो नाद्रिये अत्र काकुः ॥ १४ ॥

निश्चीति। हे प्रिये! निश्चि दास्यं दासत्वं गतोऽपि त्वां स्नात्वा स्नानादागत्य नाभ्यवीवदन्नाभिवादितवानस्मीति यत् वदेरभिधानार्थाच्चौरादिकाण्यन्ताल्लुङि णौ चङ्युपधाया ह्रस्वः। तं प्रणामं मन्तुमपराधं आगोऽपराधो मन्तुश्चेत्यमरः। मनेरौणादिकस्तुन् प्रत्ययः। मन्तुं ज्ञातुं मन्यतेस्तु तुन् प्रत्ययः। प्रवृत्तासि दासस्याप्रणतेरपराधत्वादिति भावः। तद्वद वन्द्यसे प्रणिपातप्रतीकारत्वात्तस्येति भावः ॥ १५ ॥

इतीति। इतीत्थमेतस्याः पदासत्त्यै पादग्रहणाय पत्या प्रियेण प्रेरितौ प्रसारितौ करावेव रुद्ध्वा निरुध्य सरोषमनर्हकरणात्सातङ्कं सभयं तं प्रियं कटाक्षैरमूमुहत् मोहयति स्म किञ्च किञ्चित्तमिस्रादर्शनाद्रागपरवशोऽभूदिति भावः ॥ १६ ॥

अवोचतेति। ततः कटाक्षवीक्षणानन्तरं तस्याः प्रियायाः अपाङ्गे नेत्रान्ते चलता प्रसरता ताराझलत्कारेण कनीनिकास्फुरितेन वशीकृतो निषधानामधीश्वरो नलस्तन्वीं प्रियामवोचत ब्रुवो लुङि रूपम् ॥ १७ ॥

कटाक्षेति। कटाक्षकपटेनापाङ्गदर्शनव्याजेनारब्धमुपक्रान्तं

सरोषाऽसि सरोजाक्षि ! त्वमुदेषि मुदे मम ।
तप्ताऽपि शतपत्रस्य सौरभायैव सौरभा ॥ १९ ॥
छेत्तुमिन्दौ भवद्वक्त्रबिम्बविभ्रमविभ्रमम् ।
शङ्के शशाङ्कमानङ्के भिन्नभिन्नविधिर्विधिः ॥ २० ॥
ताम्रपर्णीतटोत्पन्नैर्मौक्तिकैरिन्दुकुक्षिजैः ।
बद्धस्पर्द्धतरा वर्णाः प्रसन्नाः स्वादवस्तव ॥ २१ ॥

दूरलङ्घनरंहो यया तथा ते दृशा कर्णएव कूपस्तन्निरूप्य निरीक्ष्य भीत्या कूपदर्शनभिया निवृत्तं किं निरस्तम् ॥ १८ ॥

सरोषेति । हे सरोजाक्षि ! सरोषा रुष्टासि त्वं रुष्टाचेति वाच्यमिति भावः । मम मुदे हर्षाय उदेषि भवसि तथा हि तप्ता उष्णापि सूर्य्यस्येयं सौरी सूर्य्यसम्बन्धिनी अगस्त्यमत्स्यानाम् उपधा इत्यत्र सूर्य्यतिष्ययोर्यकारलोपः । सौरी च सा भा च सौरभा सूर्य्यप्रभा स्त्रियाः पुंवदित्यादिना पुंवद्भावः । शतपद्मस्य सौरभायैव सुरभित्वायैव न तु मानतायै दृष्टान्तालङ्कारः ॥ १९ ॥

छेत्तुमिति । भिन्नभिन्नोऽत्यन्तविलक्षणोविधिर्निर्माणव्यापारी यस्य सएव लक्षदृष्टशिरा विधिरिन्दौ भवत्या वक्त्रबिम्बं मुखमण्डलं सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । तस्य यो विभ्रमोविलासः विभ्रमः संशये भ्रान्तौ शोभायाञ्चेति यादवः । तत्र विभ्रमं भ्रान्तिं छेत्तुं तुमुनादेशः । शशाङ्कं शशचिह्नमानङ्के अङ्कितवान् अकि लक्षणे इति धातोर्भौवादिकाल्लिटि तनु तस्मान्नट् द्विहलइतोडागमः ॥ २० ॥

ताम्रेति । प्रसन्नाः स्वस्थाः स्वादवोमधुराश्च तव वर्णा अक्षराणि ताम्रपर्ण्या नद्यास्तटे तटविशेषे उत्पन्नैरिन्दुकुक्षिजैरिन्द्रगर्भोत्पन्नैश्च मौक्तिकैः बद्धस्पर्द्धतरा अतिशयेन बद्धस्पृहा तत्र पूर्वं स्वास्थ्यमुत्तरं माधुर्यञ्चेति द्रष्टव्यम् ॥ २१ ॥

त्वद्गिरः क्षीरपाथोधेः सुधयैव सहोत्थिताः।
अद्य यावदहो धावद्दुग्धलेपलवस्मिताः॥ २२॥
पूर्वपर्वतमाश्लिष्टचन्द्रिकश्चन्द्रमा इव।
अलञ्चक्रे स पर्यङ्कमङ्कसङ्क्रमितप्रियः॥ २३॥
प्रावृडारम्भणाम्भोदः स्निग्धो द्यामिव स प्रियः।
परीरभ्य चिरायास विश्लेषायासमुक्तये॥ २४॥
चुचुम्बास्यमसौ तस्या रसमग्नः स्मितस्मितम्।
नभोमणिरिवाम्भोजं मधुमध्यानुबिम्बितः॥ २५॥

त्वदिति। हे प्रिये! त्वद्गिरः सुधया सहैव क्षीरपाथोधेः क्षीरसागरादुत्थिताः अद्य यावत् अद्यपर्य्यन्त मपीत्यर्थः। धावन्ति वहिर्निर्गच्छन्ति दुग्धलेपिनां क्षीरसेकानां लवाः स्मितानि यासान्ता अहोस्मितव्याजेन क्षीरलेपदर्शनात्त्वद्गिरां सुधया क्षीरेण सार्धं क्षीरसागरोत्पन्नत्व मुन्नीयते अन्यथा वैयर्थ्यादिति भावः॥ २२॥

पूर्वेति। आश्लिष्टा चन्द्रिका येन सएव चन्द्रमाः पूर्वपर्वत मुदयाद्रिमिवाङ्कसंक्रमिता अङ्कारोपिता प्रिया येन सोऽङ्कसंक्रमितप्रियः अप्रियादिष्विति वचनान्न प्रिया परस्य पूर्वपदस्य स्त्रियाः पुंवदित्यादिना पुंवद्भावः। नलः पर्य्यङ्कं शयनमलञ्चक्रे॥ २३॥

प्रावृडिति। स्निग्धोऽनुरक्तो मसृणश्च स नलः आरम्भणे वर्षाप्रारम्भे अम्भोदो मेघो द्यान्नभःस्थलीमिव प्रियां परीरभ्य विश्लेषायासमुक्तये वियोगक्लेशपरिहाराय चिराय स चिरमास विश्लेषभिया चिरमास्थित आश्लिष्यावस्थित इत्यर्थः। आसेति निरूपक मिति प्रकटायनः वामनश्च। असगतिदीप्त्यादानेष्विति धातोरित्याह आसेत्याह आसेत्यासेरिति॥ २४॥

चुचुम्बेति। रसमग्नो रागमग्नो नलः स्मितस्मितं प्राप्तमदहासं

अथाहूय कलां नाम पाणिना स प्रियासखीम् ।
पुरस्ताद्वेशितामूचे कर्त्तुं नर्म्मणि साक्षिणीम् ॥ २६ ॥
कस्मादस्माकमज्ञास्या वयस्या दयते न ते ।
आसक्ता भवतीष्वन्यं मन्ये न बहु मन्यते ॥ २७ ॥
अन्वग्राहि मया प्रेयान्निशि स्वोपनयादिति ।
न विप्रलभते तावदालीरियमलीकवाक् ॥ २८ ॥
आह स्मैषा नलादन्यं न जुषे मनसेति यत् ।
यौवनानुमितेनास्यास्तन्मृषाऽभून्मनोभुवा ॥ २९ ॥

प्राप्तविकासञ्च आस्यं मधुमध्ये अनुविम्बितोनभोमणी रक्ताम्भोजमिव चुचुम्ब ॥ २५ ॥

अथेति। नथ नलः कलान्नाम प्रियासखीं पाणिना संज्ञया आहूय नर्मणि विनोदे साक्षिणीं कर्त्तुं पुरस्तादग्रे निवेशिता मुपवेशिता मूचे ॥ २६ ॥

कस्मादिति। हे कले! अज्ञास्या वोवयस्या सखी कस्मात् अस्माकं न दयते अस्मान्नानुकम्पते अधीगर्थेत्यादिना कर्मणि षष्ठी अथवा भवतीष्वासक्ता सती अन्यम् अन्यजनञ्च न बहुमन्यते न गणयतीति मन्ये ॥ २७ ॥

अन्वग्राहीति। अलीकवागनृतवागियं वः सखी मया निशि स्वोपनयादात्मसमर्पणात्प्रेयान् प्रियतमः अन्वग्राहि अनुगृहीत इत्येवं तावदालीर्न विप्रलभते न वाचयति काकुः। तस्मात्तदेव न श्रद्धेयमित्यर्थः ॥ २८ ॥

आहेति। एषा सखी नलादन्यञ्जनमपि न जुषे न सेव इति यदाह स्म ऊचे तद्वचनं यौवनानुमितेन यौवननिश्चितेन मनोभुवा मृषाभूत्

आस्यसौन्दर्य्यमेतस्याः शृणुमो यदि भाषसे ।
तद्धि लज्जानमन्मौलेः परोक्षमधुनाऽपि न ॥ ३० ॥
पूर्णयैव द्विलोचन्या सैषालीरवलोकते ।
द्राग्दृगन्ताणुना मान्तु मन्तुमन्तमिवेक्षते ॥ ३१ ॥
नालोकते यथेदानीं मामियन्तेन कल्पये ।
योऽहं दूत्येऽनया दृष्टः सोऽपि व्यस्मारिषीदृशा ॥ ३२ ॥
रागं दर्शयते सैषा वयस्याः सूनृतामृतैः ।
मम त्वमिति वक्तुं मां मानिनी मौनिनी पुनः ॥ ३३ ॥

अत्र मुख्याकारेणान्यसेवाया दुर्वचनत्वात् अन्यथा सिद्धकामः सेवां छलेनोक्त्वा परिहरतीति तात्पर्य्यार्थः ॥ २९ ॥

आस्येति । हे कले ! एतस्याः आस्यसौन्दर्य्यं यदि भाषसे शृणुमो हि यस्माल्लज्जया नमन्मौले नम्रशिरसोऽस्यास्तदास्यसौन्दर्य्यमधुनापि परोक्षन्न प्रत्यक्षं यथैतल्लाभस्तथा क्रियतामिति ॥ ३० ॥

पूर्णयेति । सैषा पूर्णया द्वयोर्लोचनयोः समाहारेण द्विलोचन्या त्रिलोकीवत्प्रक्रिया । आलीः सखीरवलोकते मान्तु मन्तुम-पराधिनमिव द्राक् क्षणिकं दृगन्ताणुना कटाक्षलेशेन अन्तं ईक्षते न तु स्थिरया पूर्णयेत्यर्थः ॥ ३१ ॥

नेति । यस्मादिदानीमियं नावलोकते तेनानालोकनेन कल्पये जहे तदेवाह योऽहं दूत्ये दूत्यकाले अनया दृष्टः सोऽह मीदृशा मामपश्यता नयनेन व्यस्मारिषि विस्मृतोऽस्मि स्मरतेः कर्मणि लुङ् । चिण्वति दृग्भिः अविस्मरणे पूर्ववत्सादरं पश्येदिति भावः ॥ ३२ ॥

रागमिति । सैषा प्रिया सूनृतामृतैः सत्यवाक्यामृतैः सूनृतं प्रियं सत्यमित्यमरः । वयस्याः सखीः रागं दर्शयते ताभ्यो विस्रब्धं कथयतीत्यर्थः । अभिवदिदृशोरात्मनेपद मुपसङ्ख्यानाद्विकल्पादणिकर्त्तुः कर्मत्वं णिचश्चे-

कां नामन्त्रयते नाम नामग्राहमियं सखी।
कले! नलेति नास्माकीं स्पृशत्याह्वां तु जिह्वया ॥ ३४ ॥
अस्याः पीनस्तनव्याप्ते हृदयेऽस्मासु निर्दये।
अवकाशलवोऽप्यस्ति नात्र कुत्र विभर्त्तु नः ॥ ३५ ॥
अधिगत्येदृगेतस्या हृदयं मृदुतामुचोः।
प्रतीम एव वैमुख्यं कुचयोर्युक्तवृत्तयोः ॥ ३६ ॥
इति मुद्रितकण्ठेऽस्मिन् सोल्लुकण्ठमभिधाय ताम्।
दमयन्तीमुखाधीतस्मितयाऽसौ तया जगे ॥ ३७ ॥

त्यात्मनेपदम्। मम त्वमिति मां पुनर्वक्तुं मदीयस्त्वम् इत्येतावन्मात्रं वक्तुं मानिनी मौनिनी वाचंयमा ॥ ३३ ॥

कामिति। हे कले! इयं ते सखी कान्नाम गृहीत्वा नाम ग्राह-न्नाम्ना दृशिग्रहोरिति णमुल् नामन्त्रयते नाम न सम्बोधयति नाम सर्वं अस्या मन्त्रयन्त एवेत्यर्थः। अस्माकमियमस्माकी युष्मदस्मदोरित्यादिना ई प्रत्ययः। तस्मिन्नणि चेत्यादिना अस्मकादेशः टिड्ढाणञित्यादिना ङीप् नलेति आह्वां त्वामाख्यातम् आख्याह्वे अभिधानं चेत्यमरः। जिह्वया नतु स्पृशति ॥ ३४ ॥

अस्या इति। अस्याः सम्बन्धिन्याः पीनाभ्यां स्तनाभ्यां व्याप्ते आक्रान्ते अतएवास्मासु विषये निर्दये हृदये अवकाशलवोऽपि नास्ति अत्र हृदये कुत्र नोऽस्मान् विभर्त्तु न कुत्रापीत्यर्थः ॥ ३५ ॥

अधिगत्येति। एतस्या हृदयमीदृक्कठिनमधिगत्य ज्ञात्वा मृदुतामुचोस्तावत्काठिन्यभाजोरित्यर्थः। अन्यथा दुर्नीतिरिति भावः। युक्तौ मिथःश्लिष्टौ वृत्तौ वर्त्तुलौ तयोर्युक्तवृत्तयोर्विशेषणसमासः। तथा साधुचरित्रयोश्च कुचयोर्वैमुख्यमनभिव्यक्तमुखत्वमौदासीन्यं प्रतीमो जानीम एव वयन्तु निश्चेतुमत्र शक्नुमो द्वया कौटिल्यादिति भावः ॥ ३६ ॥

इतीति। अस्मिन्नले कान्ते सोल्लुण्ठं सोपहासमिति तां कलामभिधाय

भावितेयं त्वया साधु नवरागा खलुत्वयि ।
चिरन्तनानुरागार्हं वर्त्तते नः सखीः प्रति ॥३८॥
स्मरशास्त्रविदा सेयं नवोढा नस्त्वया सखी ।
कथं सम्भुज्यते बाला कथमस्मासु भाषताम् ॥ ३९ ॥
नासत्यवदनं देव ! त्वा गायन्ति जगन्ति यम् ।
प्रिया तस्य सरूपा स्यादन्यथालपना न ते ॥ ४० ॥

सोल्लुण्ठनन्तु सोत्प्राश. सोपहासास्त्रयः समा इति यादवः। मुद्रित कण्ठे निवृत्तवाचि तुष्णीम्भूते सति दमयन्तीमुखाधीतस्मितया तां दृष्ट्वा विस्मयमानयेत्यर्थः। तया असौ नलो जगे जगदे नलो गदित इत्यर्थः क्रियाग्रहण मिति क्रियया अभिप्रायात्सम्प्रदानत्वं तथा च विवक्षितकर्मत्वाद्भावे लिट् ॥ २७ ॥

यदुक्तं पूर्णयापीत्यादि तत्र तावदुत्तरमाह भावितेति। इयं भैमी त्वया साधु भाविता किन्तु त्वयि नवरागा नूतनपरिचया खलु अत स्तदनुरूपं वर्तते सखीः प्रति चिरन्तनस्य चिरन्तनानुरागस्यार्हं मनुरूपं वर्तते अतोऽय सुपालम्भ उचित इति भावः॥ २८ ॥

यदुक्त मन्यथाहीत्यनेन तत्रोत्तरं श्लोकद्वयेनाह स्मरेत्यादिना बाला विदग्धा नोऽस्माकं नवं सुचिरमेवोढ़ा परिणीता सेय मिदं प्रथमसङ्गमा बाला सुभगा सखी नः स्मरशास्त्रविदा कामतन्त्रवेदिना चिराच्चिरं वा सम्भोगविरुद्धेनेत्यर्थः। त्वया कथं सम्भुज्यते विरुद्धं सम्भोक्तुं शक्यते कथंचास्मासु अस्मानधिकृत्य भाषतां कथमस्माकं स्वचेष्टितं कथयिष्यतीत्यर्थः। तस्मादसौ भाविन्यर्थे कामशास्त्रवेदिनस्तवोपालम्भ उचित इति भावः॥ ३९॥

अत्रैव यद्विशेषितवानलीकवागिति तत्रोत्तरमाह नासत्येति। हे देव! महाराज! जगन्ति लोका यंत्वान्नासत्ययोरश्विनी कुमारयोरिव वदनमास्यं यस्य गायन्ति। तस्य महानुभावस्य ते तव सरूपा सुन्दरी

मनोभूरस्ति चित्तेऽस्याः किं नु देव ! त्वमेव सः ।
त्वदवस्थितिभूर्यस्मान्मनः सख्या दिवानिशम् ॥४१॥
सतस्तेऽथ सखीचित्ते प्रतिच्छाया स मन्मथः ।
त्वयास्य समरूपत्वमतनोरन्यथा कथम् ॥४२॥
कः स्मरः कस्त्वमत्रेति सन्देहे शोभशोभयोः ।
त्वय्येवार्थितया सेयं धत्ते चित्तेऽथवा युवाम् ॥४३॥

प्रिया कान्ता अन्यथा प्रतिकूलमालपनं भाषणं यस्या स्तादृशीस्यात् न भवितेति तात्पर्य्यम् स्वामिदृग्दोषसम्भावनयापीतिभावः ॥ ४० ॥

यदुक्तमाह स्मेत्यादिश्लोके तस्योत्तरं श्लोकत्रयेणाह मनोभूरित्यादि । हे देव ! राजन् ! देवः परिधने राज्ञीति विश्वः । अस्याश्चित्ते मनोभूरस्ति किन्तु स मनोभू स्त्वमेव कुतः यद्यस्मात्सख्या दिवानिशं सदा-त्वदवस्थितिभूस्त्वदवस्थानस्याश्रयः मनोभूराश्रयो यस्येति व्युत्पत्त्या त्वमेव मनोभूः मनसि भवतीति व्युत्पत्तौ त्वदभिलाषिण्याः परत्वदुभयथापि न पुरुषान्तरसेवाशङ्कालव इति भावः ॥ ४१ ॥

सत इति । अथेति पक्षान्तरे अथवा सः मन्मथ सखीचित्ते सतो वर्तमानस्य ते तव प्रतिच्छाया प्रतिविम्बं अन्यथा इत्थं न चेत् अतनोरशरीरस्यास्य त्वया समरूपत्वं कथ धर्म्यभावे धर्मानवकाशात् पूर्ववदेवाभिप्रायः ॥ ४२ ॥

क इति । अथवा हे देव ! उभयोर्युवयोः शोभया समानधर्मेण हेतुना अत्रानयोर्मध्ये स्मरः कस्त्वमपि क इति सन्देहे सति सेयं भैमी त्वय्येवार्थितया चित्ते युवां त्वां कामञ्च त्वदाद्येकशेषः । धत्ते त्वयि मन्मथयोः कतरस्त्वमिति सन्देहे तदुच्छेदस्योभयोः सन्निधानादनुपेक्ष्यत्वं उभावपि चित्ते धत्ते न त्वं स्यादित्यर्थः ॥ ४३ ॥

त्वयि न्यस्तस्य चित्तस्य दुराकर्षत्वदर्शनात् ।
शङ्कया पङ्कजाक्षी त्वां दृगंशेन स्पृशत्यसौ ॥४४॥
विलोकनात् प्रभृत्यस्या लग्न एवासि चक्षुषोः ।
स्वेनालोकय शङ्का चेत् प्रत्ययः परवाचि कः ॥४५॥
परीरम्भेऽनयारब्ध कुचकुङ्कुमसङ्क्रमम् ।
त्वयि मे हृदयस्यैवं राग इत्युदितैव वाक् ॥४६॥
मनसाऽयं भवन्नामकामसूक्तजपव्रती ।
अक्षसूत्रं सखीकण्ठसुम्भत्येकावलिच्छलात् ॥४७॥

यदुक्तं नालोकत इत्यादि श्लोकत्रये तत्रोत्तरमाह । त्वयीति । पङ्कजाक्षी असौ दमयन्ती भैमी त्वयि न्यस्तस्य चित्तस्य दुराकर्षत्वदर्शनात् त्वां दृगंशेनापाङ्गेन शङ्कया स्पृशति अतोनोपालम्भावकाश इति भावः ॥ ४४ ॥

विलोकनादिति । विलोकनात्प्रभृति दूत्यकालदर्शनादारभ्य काम्पिल्यात्प्रभृत्यादिति भाष्यकारप्रयोगादेव प्रभृतितत्प्रयोगात् पञ्चमीति कैयटः । अस्याश्चक्षुषोर्लग्न एवासि शङ्काचेत् मदुक्तावविश्वासश्चेत् सत्यं परवाचि परोक्तौ कः प्रत्ययः का श्रद्धा किन्तु स्वेनालोकय स्वयमेव पश्य पुरस्थसदृशवस्तुनः कनीनिकायाः साक्षित्वान्नालोकत इत्यादि वाची युक्तिरयुक्ति रित्यर्थः ॥ ४५ ॥

अथ यदुक्तं रागं दर्शयता इत्यादि श्लोके तत्रोत्तरमाह परीरम्भ इति । अथानया प्रेषितया परीरम्भे आलिङ्गनकर्मणि कुचकुङ्कुमस्य संक्रमं संक्रान्तिमारभ्य तमादिं कृत्वा त्वयि विषये मे हृदयस्य राग एव मे मम वागेव उदितैव उक्तैव अतः सखीष्वनुरक्ता न मयीति नोपालम्भ इत्यर्थः ॥ ४६ ॥

काञ्चासन्नयत इति श्लोके यदुक्तन्तस्योत्तरमाह मनसेति । अयमिति

अध्यासिते वयस्याया भवता महता हृदि ।
स्तनावन्तरसम्भान्तौ निष्क्रान्तौ ब्रूमहे वहिः ॥४८॥
कुचौ दोषोज्झितावस्याः पीडितौ व्रणितौ त्वया ।
कथं दर्शयतामास्यं बृहन्तावावृतौ ह्रिया ॥४९॥
इत्यसौ कलया सूक्तैः सिक्तः पीयूषवर्षिभिः
ईदृगेवेति पप्रच्छ प्रियामुन्नमिताननाम् ॥५०॥

हस्तेन पुरोवर्तिनिर्देशः सखीकण्ठो भैमीकण्ठनालः मनसा भवन्नामैव कामसूक्तं कामदेवप्रकाशकमन्त्रः तस्य जप एव व्रतमस्यास्तीति तद्व्रती सर्ववाचिकजपानां मानसिकजपस्य सहस्रगुणत्वान्मनोग्रहणम् एकावलिच्छलादेकयष्टिकहारव्याजात् अक्षसूत्रं जपसङ्ख्यानार्थमक्षरमक्षमालां चुम्बति स्पृशति धारयतीत्यर्थः । अथ सखीनामग्रहस्य कैवल्यात् त्वन्नामग्रहस्य नैरन्तर्यादयं उपालम्भात् सम्भवतीति भावः ॥ ४७ ॥

अस्याः पीनस्तनेत्यादिश्लोकोक्त सुक्तवैपरीत्यापादनेन परिहरति अध्यासित इति । वयस्यायाः सख्याः हृदि महता भवता अध्यासिते अधिष्ठिते सति स्तनावन्त रसम्भान्तावसम्भवन्तौ अनवकाशौ वहिर्निष्क्रान्ताविति ब्रूमहे अतोऽत्र यानैकशरणौ महाराज इति भावः ॥ ४८ ॥

अधिगत्येत्यादि श्लोकोक्त कुवचनैर्दुःख्योपालम्भस्योत्तरमाह कुचाविति । बृहन्तौ महान्तौ दोषौ तौ दोषोज्झितौ दोषवर्जितावस्याः कुचौ त्वया पीडितौ बाधितौ व्रणितौ क्षतौ दूषितौ च व्रणशब्दात् तत्करोतीति णयन्तात् कर्मणि क्तः णाविष्टवद्भावात् चिखतो लुक् । अतो ह्रिया हेतुना आवृतौ आस्य कथं दर्शयतां दोषोदये लज्जया न परस्मै मुखं प्रदर्शयतीतिभावः । अयमपि स्वयं कृतापराध एवेत्यर्थः दृशेर्ण्यन्तात्कर्मणि लोटि तामादेशः ॥ ४९ ॥

इतीति । इतीत्थमसौ राजा कलया प्रियायाः सख्या पीयूष-

बभौ च प्रेयसीवक्त्रं पत्युरुन्नमयन् करः ।
चिरेण लब्धसन्धानमरविन्दमिवेन्दुना ॥५१॥
ह्रीणा च स्मयमाना च नमयन्ती पुनर्मुखम् ।
दमयन्ती मुदे पत्युरत्युच्चैरभवत्तदा ॥५२॥
भूयोऽपि भूपतिस्तस्याः सखीमाह स्म सस्मितम् ।
परिहासविलासाय स्पृहयालुः सहप्रियः ॥५३॥
क्षन्तुं मन्तुं दिनस्यास्य वयस्येयं व्यवस्यतात् ।
निशीव निक्षिधात्वर्थं यदाचरति नात्र नः ॥५४॥

वर्षिभि रमृतस्यन्दिभिः सूक्तैः सिक्तः सन् उन्नमितं स्वपाणिना उन्नतमाननं मुखं यस्य तां प्रियाम् ईदृगेवेति मिष्टमेवेति ज्ञात्वा पप्रच्छ ॥५०॥

बभाविति । प्रेयसीवक्त्रं मुखं उन्नमयन् पत्युः करश्चिरेण महता कालेनेन्दुना लब्धं सन्धानं योगो येन तदरविन्दमिव बभौ अभूतोपमेति च अत्यन्त मसम्भव सम्बन्धोक्ते रतिशयोक्तिभेद इत्यपरे ॥ ५१ ॥

ह्रीणेति । तदा तत्काले ह्रीणा ह्रीता विकल्पात् निष्ठानत्वं । स्मयमाना मन्दं हसन्ती च पुन र्मुखं नमयन्ती दमयन्ती पत्युरत्युच्चैस्तरायै मुदे आनन्दायाभवत् ॥ ५२ ॥

भूय इति । प्रियया सह वर्तत इति सहप्रियः तेन सहेत्यादिना बहुव्रीहिः । भूपतिः परिहासविलासाय स्पृहयालुः केलिहरणमपच्छृत् स्पृहेरीप्सित इति सम्प्रदानत्वाच्चतुर्थी स्पृहि गृहीत्यादिना आलुच् । भूयोऽपि तस्याः प्रियायाः सखीं कलां सस्मितमाह स्म ॥ ५३ ॥

क्षन्तुमिति । इयं वो वयस्या सखी अस्य दिनस्य मन्तु मपराधं क्षन्तुं व्यवस्यतात् प्रवर्ततां तातङादेशः । यद्यस्मान्निशीव रात्राविवात्र दिने नोऽस्माकं निक्षिधात्वर्थः निक्षिधातोर्निक्षिः चुम्बन इति धातोरर्थं चुम्बनं नाचरति तत्र न किञ्चिन्निमित्तं पश्याम इति भावः ॥ ५४ ॥

दिनेनास्या मुखस्येन्दुः सखा यदि तिरस्कृतः ।
तत्कृताः शतपत्राणां तन्मित्राणामपि श्रियः ॥ ५५ ॥
लज्जितानि जितान्येव मयि क्रीडितयाऽनया ।
प्रत्यावृत्तानि तत्तानि पृच्छ सम्प्रति कम्प्रति ॥५६ ॥
निशि दष्टाधरायापि सैषा मह्यं न रुष्यतु ।
क्व फलं दश्यते विम्बीलता कीराय कुप्यति ॥५७ ॥
सृणीपदसुचिह्ना श्रीश्चोरिता कुम्भिकुम्भयोः ।
पश्यैतस्याः कुचाभ्यान्तन्नृपस्तौ पीडयामि न ॥५८ ॥

दिनेनेति । अथ दिनेनास्याः वः सख्या मुखस्येन्दुः सखा सदृङ्मात्रश्चेद्यदि तिरस्कृतो यदि अधमःस हि तस्य मुखस्य मित्राणां शतपत्राणामपि श्रियश्च तत्कृताः ईदृशएव ह्यङ्कः सहस्रपत्रमित्राण्येवोपकृतानि रात्रौ तु विपत्रमित्यहो महान् विवेक इति भावः ॥ ५५ ॥

लज्जितानीति । अथ दिनेनास्या वः सख्यामपि लज्जितानीति किञ्च क्रीडतया रात्रौ क्रीडितवत्या कर्तरि क्तः । अनया वः सख्या लज्जितानि क्रीडितानि भावे क्तः । तानि निरस्तान्येव सम्प्रति कं प्रति क मुद्दिश्य तानि लज्जितानि प्रत्यावृत्यानि प्रत्यागतानि तत्प्रत्यावृत्ते र्निमित्तं पृच्छ ॥ ५६ ॥

निशोति । सैषा प्रिया निशि दष्टोऽधरो येन तस्मै अपि मह्यं न कुप्यति क्रुध द्रुहेत्यादिना सम्प्रदानत्वाच्चतुर्थी विम्बीलता रक्तविम्बीफलं विम्बीलता चिर्ञ्चिलिका पीलुपर्ण्येत्यमरः । फलं स्वफलं दश्यते दन्तैः पीयते कीराय शुकाय कुप्यति न क्वापीति दृष्टान्तालङ्कारः ॥ ५७ ॥

यदुक्तं कलया कुचौ दोषोज्झितावस्याः पीडितौ व्रणितौ त्वयेति तत्रोत्तरमाह सृणीति । एतस्याः कुम्भिकुम्भयो र्गजकुम्भयोः सम्बन्धि सृणीपदान्यङ्कुशक्षतान्येव सुचिह्नानि यस्याः सा श्रीः शोभा सम्पत्तिश्च

अधरामृतपानेन ममास्यमपराध्यतु।
मूर्ध्ना किमपराद्धं यत्पादौ नाप्नोति चुम्बितुम् ॥५९॥
अपराद्धं भवद्वाणीश्राविणा पृच्छ किं मया।
वीणाऽऽह परुषं यन्मां कलकण्ठी च निष्ठुरम् ॥ ६० ॥
सेयमालिजने स्वस्य त्वयि विश्वस्य भाषताम्।
ममताऽनुमताऽस्मासु पुनः प्रस्मर्य्यते कुतः ॥ ६१ ॥
अथोपवदने भैम्याः स्वकर्णोपनयच्छलात्।
सन्निधाप्य श्रुतौ तस्या निजास्यं सा जगाद ताम् ॥ ६२ ॥

चोरिता अपहृता तत्तस्माच्चौर्यौत्थितो नृपोऽहन्तौ कुचौ पीड़यामि दुष्टनिग्रहाधिकारत्वात् राज्ञा मिति भावः ॥ ५८ ॥

अधरेति। ममास्य मधरामृतपानेन हेतुनापराध्यतु अनिष्टाचरणादपराध्यस्तु। मूर्ध्ना किमपराद्धं कोऽपराधः यो मूर्द्धा पादौ चुम्बितुं स्प्रष्टुं न प्राप्नोति पदाहतिन्न लभत इत्यर्थः। प्रकृतभावान्नाद्यापि विस्रम्भसम्भोगसुखलाभ इति भावः ॥ ५९ ॥

अपराद्धमिति। हे कले! पृच्छ सखी मितिशेषः। भवद्वाक्यं शृणोतीति तत् श्राविणा मया किमपराद्धं न किञ्चिदपराद्ध मित्यर्थः। कुतः यद्वयस्याद्वीणा मां परुषमाह स्म कलकण्ठ्यपि कोकिला च निष्ठुरमाह अतस्तयोः पारुष्यदोषादरुच्या त्वद्वाणी शुश्रूषयिषुरहं सम्भाषणेनानुकम्पनीय इति भावः ॥ ६० ॥

सेति। हे कले! सेयं प्रिया स्वस्यालिजने त्वयि विश्वस्य विस्रभ्य भाषतां तत् किं नानुमन्यते किं त्वस्मासु विषये ममता अनुमता ममतामभाय मित्यभिमानः कुतो हेतोः पुनः प्रस्मर्य्यते सन्तोषस्तुष्टिर्मनागल्पोऽपि वरं अन्यथा तु कथं जीवेयमिति भावः ॥ ६१ ॥

अथेति। अथ राजवाक्यानन्तरं सा कला भैम्या उपवदने

अहो मयि रहोवृत्तं धूर्त्ते किमपि नाभ्यधाः ।
आस्व सत्यमिमं तत्ते भूपमेवाभिधापये ॥ ६३ ॥
स्मरशास्त्रमधीयाना शिक्षिताऽसि मयैव यम् ।
अगोपि सोऽपि कृत्वा किं दाम्पत्यव्यत्ययस्त्वया ॥ ६४ ॥
मौनिन्यामेव सा तस्यां तदुक्तीरिव शृण्वती ।
वादं वादं मुहुश्चक्रे हुंहुमित्यन्तरान्तरा ॥ ६५ ॥

वदनसमीपे सामीप्येऽव्ययीभावः तृतीयासप्तम्योर्बहुलमिति विकल्पात् सप्तम्यां नाम्भावः। स्वकर्णस्योपनयच्छलादुपकर्णव्याजात् तस्या भैम्याः श्रुतौ कर्णौ निजास्यं स्वमुखं सन्निधाप्य सन्निहितं कृत्वा तां भैमीं जगाद ॥ ६२ ॥

अहो इति। हे धूर्त्ते ! वञ्चने ! मयि विषये रहोवृत्तं रहस्यचेष्टितं किमपि नाभ्यधाः आस्व तिष्ठ सत्यमिमम्मति भूपमेव तत्ते चेष्टित मभिधापये भूपमेव ख्यापयिष्यामीत्यर्थः। गति बुद्धीत्यादिना शब्दकर्मत्वादणि कर्त्तुः कर्मत्वम् ॥ ६३ ॥

स्मरेति। स्मरशास्त्रं वात्स्यायनादिकामतन्त्रमधीयाना मत्तोऽभ्यस्ती त्वं यं मयैव शिक्षिता उपदिष्टाऽसि ब्रुविशासीति शासेर्धर्मयङ्पक्षी द्विकर्मकत्वम् अप्रधानो दुहादीना मप्रधाने कर्मणि क्तः। स कोपः दाम्पत्यव्यत्ययः पूज्यभावस्त्वया किं कृत्वा किं मत्वा किमर्थ मित्यर्थः। शास्त्रशब्देन विशेषलक्षणैरपि आगोऽप्यपराधोऽपि किमिति न कृतः कृतोनोच्यते तद्ब्रूहीत्यर्थः ॥ ६४ ॥

यदुक्तं भूपमेवाभिधापय इति तदर्थ मुपोद्घातत्वेन किञ्चित् चपला मित्याह मौनिन्यामिति। सा कला तस्यां भैम्यां मौनिन्यां तूष्णीम्भूतायामेव तदुक्तीस्तद्वाक्यानि शृण्वती चान्तरान्तरा मध्ये मध्ये वादं वादं प्रत्युत्तरमिव चोदित्वा आभीक्ष्ण्येन णमुल् मुहुः पुनः पुनः हुंहुमिति चक्रे हुङ्कारेण तद्वाक्याङ्गीकारं चकारेत्यर्थः ॥ ६५ ॥

अथासावभिसृत्यास्या रतिप्रागल्भ्यशंसिनी ।
सख्या लीलाम्बुजाघातमनुभूयालपन्नृपम् ॥ ६६ ॥
दृष्टं दृष्टं महाराज ! तदर्थाभ्यर्थना क्रुधा ।
यत्ताड़यति मामेवं यद्वा तर्जयति भ्रुवा ॥ ६७ ॥
वदत्यचिह्नि चिह्नेन त्वया केनैष नैषधः ।
शाङ्के शक्रः स्वयं कृत्वा मायामायातवानयम् ॥ ६८ ॥
स्वर्णदीस्वर्णपद्मिन्याः पद्मदानं निदानताम् ॥
नयतीयं त्वदिन्द्रत्वे दिवश्चागमनञ्च ते ॥ ६९ ॥

अथेति। अथैवं कल्पनानन्तर मस्या भैम्या रति प्रागल्भ्यं शंसत इति तत् शंसिनी असौ नलः सख्या भैम्याः सकाशाल्लीलाम्बुजानामाघातं ताड़न मनुभूय प्राप्याभिसृत्योपसृत्य नृपमालपत् ॥ ६६ ॥

तदेवाह षड्भिः दृष्टमित्यादि हे महाराज ! दृष्टं दृष्टं सम्भ्रमे द्विरुक्तिः। किं दृष्टं तत्राह त्वदर्थस्य त्वदपेक्षितार्थस्याभ्यर्थना क्रियतामिति प्रार्थिते सति क्रुधा यदेव मान्ताड़यति यद्वा यच्च मां तर्जयति तदुभयं दृष्टं खल्वित्यर्थः। एतस्य स्ववाक्यश्रवणार्थमिति भावः। तर्जतेरनुदात्तत्वेऽपि च स्यादुदात्तेष्वपि टितत्करणे नानित्यता ज्ञापनात् तच्च परस्मैपदमपि अतएव तर्जयते भर्त्सयते तर्जयतीत्यपि च दृश्यते इति भट्टमल्लः ॥ ६७ ॥

किं तद्वाक्यं तदाह त्रिभिर्वदतीत्यादि। हे राजन् ! भैमी वदति आत्मान मितिशेषः तदेवाह। हे कले ! त्वया एष पुरुषः केन चिह्नेन स नैषधइत्यचिह्नि चिह्नितः प्रत्यभिज्ञातः किन्त्वयं स्वयं शक्रएव मायां नलवेषं कृत्वा आयातवानिति शङ्के ॥ ६८ ॥

स्वरिति। किञ्च हे महाराज ! इयं भैमी ते तव स्वर्णद्यामाकाशगङ्गायां स्वर्णपद्मिन्याः पद्मस्य दानं दिवोऽन्तरीक्षादागमनञ्च त्वदिन्द्रत्वे

भाषते नैषधच्छाया मायाऽमायि मया हरेः।
आह चाहमहल्यायां तस्याकर्णितदुर्नया॥ ७०॥
सम्भावयति वैदर्भी दर्भाग्राभामतिस्तव।
जम्भारित्वं कराम्भोजाद्दम्भोलिपरिरम्भिणः॥ ७१॥
अनन्यसाक्षिकाः साक्षात्तद्व्याख्याय रहःक्रियाः।
शङ्कातङ्कं नुदैतस्या यदि त्वं तत्त्वनैषधः॥ ७२॥
इति तत्सुप्रयुक्तार्थं निह्नुतीकृतकैतवाम्।
वाचमाकर्ण्य तद्भावि संशयालुः शशंस सः॥ ७३॥

निदानतान्मूलकारणतान्नयति अनिर्दिश्यैतदुभयं न सम्भवतीति भावः॥ ६९॥

भाषत इति। हे महाराज! भैमी भाषते किमिति हे नल! नैषधच्छाया नलाकारो हरेरिन्द्रस्य माया मया अमायि अनुमिता माङः कर्मणि लुङ् चिणि युगागमः आह चान्यच्चाहेत्यर्थः। अहल्यायां तस्येन्द्रस्याकर्णितो दुर्नयो दुश्चेष्टितं यया सा सापेक्षत्वेऽपि गमकत्वात् समासः। पारदार्यपरा भीतिरप्यस्य नास्ति उपसर्गादसमासवीणोपदेशस्येति भावः॥ ७०॥

सम्भावयतीति। किञ्च दर्भाग्राभा कुशाग्रसङ्काशा मतिर्यस्याः सा सूक्ष्मबुद्धिर्वैदर्भी दम्भोलिर्वज्रायुधं वज्ररेखाञ्च परिरभ्यते यत्तजात् परिरम्भिणः कराम्भोजादालिङ्गनात्तव जम्भारित्वं इन्द्रत्वं सम्भावयति अनुमीयते वज्रहस्तः पुरन्दर इतिस्तुतेरिति भावः॥ ७१॥

अनन्येति। हे राजन्! तत्त्वनैषधः परमार्थनलो यदि तर्हि अनन्यसाक्षिकाः स्वमात्रसंवेद्या रहःक्रिया रहस्यव्यापारान् साक्षात् स्वयमेव व्याख्यायोक्त्वा एतस्याः शङ्काया इन्द्रोत्प्रेक्षाया आतङ्कं भयं नुद निवर्तय॥ ७२॥

इतीति। इतीत्थन्तया वाचया सुप्रयुक्तार्थं युक्तयुक्तत्वेन निह्नुती-

स्मरसि च्छद्मनिद्रालुर्मया नाभौ शयार्पणात् ।
यदानन्दोल्लसल्लोमा पद्मनाभीभविष्यसि ॥ ७४ ॥
जानासि ह्रीभयव्यग्रा यन्नवे मन्मथोत्सवे ।
सामिभुक्तैव मुक्ताऽसि मृद्वि ! खेदभयान्मया ॥ ७५ ॥
स्मर जित्वाऽऽजिमेतत्त्वां करे मत्तद्धाविनि ।
अङ्गुलीयुगयोगेन यदाश्लिष्यं घने जने ॥ ७६ ॥

कृतकैतवान्निह्नुतकपटशङ्कां वाचमाकर्ण्य तस्या भैम्या भावे अभिप्राये संशयालुः किं मयेन्द्रत्वं शङ्कितं स्यादिति संशयानः सन् स नलः शयंस संशयोच्छेदकं वाक्यमुवाचेत्यर्थः ॥ ७३ ॥

अथैतदेव विद्वान् विंशत्याः श्लोकैः प्रपञ्चेनाह स्मरसीत्यादि हे प्रिये! छद्मना कपटेन निद्रालुः सुप्ता स्पृहि गृहीत्यादिना निपूर्वाद्द्रातेरालुच् । तदा मया नाभौ शयस्य पाणेरर्पणात् आनन्देन स्पर्शसुखेनोल्लसल्लोमा प्रहृष्यल्लोमा सती पद्मं नाभौ यस्याः पद्मनाभिः पाणेरेव पद्मत्वादिति भाव. । पद्मनाभो विष्णुस्स सोऽपि छद्मनिद्रालुरिति भावः । योगविभागात् समासान्तोऽप्रत्ययः, उभयत्राप्यभूततद्भावे च्विः पद्मनाभीभविष्यसि यत् पद्मनाभीभूतासीति यदित्यर्थः तत्तु स्मरसि तत्प्रत्यभिजानासि किमित्यर्थः । अभिज्ञाने च न लडिति अभिज्ञानवचनयोगाद्भूतार्थे लट् ॥ ७४ ॥

जानासीति । हे मृद्वि ! कोमलाङ्गि ! अतिपीडां न सहत इत्यर्थः । नचेन्मन्मथोत्सवे प्रथमसमागमे ह्रीभयाभ्यां व्यग्रा श्रान्ता खेदः सत्वक्षयस्तद्भयात् सामिभुक्ता अर्धभुक्तैव मया मुक्तासि अन्यथा वैरस्यादिति भावः । तदुक्तं रतिरहस्ये सहसा वाप्युपक्रान्ता कन्याचित्तमविन्दता । भयान्वितसमुद्वेगमङ्गोद्वेषञ्च गच्छति । सा प्रीतियोगमप्राप्य दिनोद्वेगेन दूषिता । पुरुषद्वेषिणी वास्तु द्विविधा वा ततोऽन्यथेति तज्जानासि स्मरसि किमित्यर्थः ॥ ७५ ॥

वेत्थ मानेऽपि मत्त्यागदूना त्वं माञ्च तन्मिथः ।
मद्दृष्टाऽऽलेख्य पश्यन्ती व्यवधा रेखयाऽन्तरा ॥ ७७ ॥
प्रस्मृतस्त्वया तावद्यन्मोहनविमोहितः ।
अतृप्तोऽधरपानेषु रसनामपिवन्तव ॥ ७८ ॥
त्वत्कुचार्द्रनखाङ्कस्य मुद्रामालिङ्गनोत्थिताम् ।
स्मरेः स्वहृदि यत् स्मेरः सखीं शिल्पं तवाब्रुवम् ॥ ७९ ॥

स्मरेति । हे प्रिये ! आजिं युद्धं कृत्वः एतः समागतोऽहं जने घने बहुले सति गात्रालिङ्गनप्रतिबन्धोक्तेः मत्पादं प्रतिधाविनि करे अङ्गुलियुगयोगेन अङ्गुलिद्वययोजनया यदाश्लिष्यं आश्लिष्टवानस्मि तत्स्मर ॥ ७६ ॥

वेत्थेति । हे प्रिये ! माने प्रणयकोपे मत्त्यागदूना मद्विरहतप्ता मिथो रहसि मिथोन्योन्यं वा रहस्यपीत्यमरः । स्वमात्मानं माञ्चालेख्य चित्रे लिखित्वा पश्यन्ती मद्दृष्टा मया वीक्षिता सती अन्तरा लिखितयोर्मध्ये रेखया व्यवधा अवाप्य विहितावकाशः तत्रापि कोपः प्रकटित इत्यर्थः । व्यवपूर्वाद्दधातेर्लुङ् सिपि गास्थेत्यादिना सिचोलुक् वेत्थ इति काकुः ॥ ७७ ॥

प्रस्मृतमिति । हे प्रिये ! मोहने सुरते विमोहितः सन्नहः अधरपानेषु अतृप्तस्तावन्मात्रेणातृप्तः सम्बन्धसामान्ये षष्ठी पूरणेत्यादिना षष्ठीसमासनिषेध ख्यापनात् षष्ठीति केचित् । तव रसनां यदपिबन् तत्तावत्त्वया प्रस्मृतं काकुः ॥ ७८ ॥

त्वदिति । हे प्रिये ! स्वस्यात्मनो मे हृदि वक्षस्यालिङ्गनेनोत्थितां उत्पन्नां सङ्क्रान्तामित्यर्थः । त्वत्कुचयोरार्द्रनखाङ्कस्य मुद्रां सन्निवेशं स्मेरः सस्मितः सन् सखीं प्रति तव शिल्पं शिल्पनिर्माणं संक्रमणरूपमद्भुतमब्रुवं तत् स्मरेः ॥ ७९ ॥

त्वयेति । हे प्रिये ! मध्ये मधुगोष्ठ्यां मध्ये मधुगोष्ठि पानगोष्ठीमध्य इत्यर्थः । पारे मध्ये षष्ठ्या वेत्यव्ययीभावः गोस्त्रियो रुप सर्जनस्येति

त्वयाऽन्याः क्रीड़यन्मध्येसधुगोष्ठि रुषेरितः।
वेत्सि तासां पुरो मूर्द्ध्ना त्वत्पादे यत्किलास्खलम् ॥ ८० ॥
वेत्थ मय्यागते प्रोष्य यत्त्वां पश्यति हार्दिनि।
अचुम्बीरालिमालिङ्ग्य तस्यां केलिमुदा किल ॥ ८१ ॥
जागर्त्ति तत्र संस्कारः स्वमुखाद्भवरानने।
निक्षिप्यायाचिषं यत्त्वां न्यायात्ताम्बूलफालिकाः ॥ ८२ ॥
चित्ते तदस्ति कच्चित्ते नखजं मयि यत् क्रुधा।
प्राग्भवाभिगमागःस्थे त्वया शम्बाकृतं क्षतम् ॥ ८३ ॥

हस्त्वं अन्याः स्त्रियः क्रीडयन् विनोदयन् अहं त्वया रुषा रोषेणेरितः सन् तासां पुरोऽग्रे त्वत्पादे यत् आस्खलम् किल खलु तत् वेत्सि स्मरसि किमित्यर्थः ॥ ८० ॥

वेत्थेति। हे प्रिये! हृदयस्य कर्म हार्दं प्रेम प्रेमा ना प्रियता हार्दमित्यमरः। हार्दिनि मयि प्रोष्य प्रत्यागते त्वां पश्यति सति आलिं सखीमालिङ्ग्य तस्यां केलिमुदा क्रीड़ाहर्षेणाचुम्बीस्त्वमितिभावः ॥ ८१ ॥

जागर्त्तीति। हे प्रिये! ताम्बूलफालिका नागवल्लीदलवल्लिका ताम्बूलवल्लीताम्बूलीनागवल्ली त्यपीत्यमरः। स्वमुखात् मवदानने निक्षिप्य न्यस्य तास्ताम्बूलवल्लिकाः न्यायात् निक्षिप्य द्रव्यप्रत्यर्पणधर्माद्यदयाचिषं तत्र याचनं संस्कारोपासना जागर्ति उत्पद्यते स्मरसि किमित्यर्थः ॥ ८२ ॥

चित्त इति। हे प्रिये! मयि प्राग्भवेन प्रथमभावाभिगमनातिसुखलाभेनागसि तिष्ठतीत्यागःस्थे अपराधे सति त्वया क्रुधा क्रोधेन नखजं क्षतं शम्बाकृतं द्विगुणीकृतं आनुलोम्यप्रातिलोमाभ्यां द्विकृष्टं क्षेत्रं शम्बाकृतमुच्यते द्विगुणीकृते तु सर्वं पूर्वं शम्बाकृतमपीत्यमरः। कृञो द्वितीयतृतीयशम्बबीजात्कृष्विति डाच्प्रत्ययः। सम्मुखन्तु शुभकरणं ते तव चित्तेऽस्ति कच्चित् ॥ ८३ ॥

स्वदिग्विनिमयेनैव निशि पार्श्वविवर्त्तिनोः ।
स्वप्नेष्वप्यस्तवैमुख्ये सख्ये सौख्यं स्मरावयोः ॥ ८३ ॥
क्षणं प्राप्य सदस्येव नृणां विमनितेक्षणम् ।
दर्शिताधरसद्दंशा ध्याय यन्मामतर्ज्जयः ॥ ८५ ॥
तथाऽवलोक्य नीलाब्जनालभ्रमणविभ्रमात् ।
करौ योजयताऽध्येहि यन्मयाऽसि प्रसादिता ॥ ८६ ॥
ताम्बूलदानं सन्न्यस्तकरजं करपङ्कजे ।
न मम स्मरसि प्रायस्तव नैव स्मरामि तत् ॥ ८७ ॥

स्वेति । हे प्रिये ! स्वदिशोः स्वस्व शयनदेशयोर्विनिमयेनैव विपरीतप्रवर्तनायैवेति पार्श्ववर्तिनोः पूर्वावस्थायीव पार्श्वे विवर्तते न त्वन्यथा वैमुख्यप्रसङ्गादिति भावः । तयोरावयोः स्वप्नेषु स्वापकालेष्वप्यस्ते उक्तरीत्या निरस्ते वैमुख्ये पराङ्मुखत्वे मेलने सख्ये सौख्यं सुखं स्मर ॥ ८४ ॥

क्षणमिति । हे प्रिये ! सदसि तिष्ठतीति सदस्येव सखीसमागमतैव नृणां सखीजनानां विमनितानि विमानितानि विमनशब्दात्तत् करोति ण्यन्तादिष्टवद्भावे टिलोपः, कर्मणि क्तः । तानीक्षणानि यस्मिन् तमासक्तजनदृष्टिकाङ्क्षणमवसरं प्राप्य दर्शिताधरे सद्दंशा सत्कृतदंशनं यया सा सती यन्मामतर्ज्जयः तत् स्मरः ॥ ८५ ॥

तथेति । हे प्रिये ! तथा तर्ज्जनमवलोक्य लीलाब्जनालस्य भ्रमणमेव विभ्रमो विलासस्तस्मात्तद्व्याजादित्यर्थः । करौ पाणी योजयता अञ्जलिं बध्नता मया यत्प्रसादिता प्रसन्नीकृता तदध्येहि स्मर ॥ ८६ ॥

ताम्बूलेति । हे प्रिये ! तव करपङ्कजे त्वत्पाणिपद्मे सन्न्यस्तकरजं विरचितनखाङ्कं कर्म कर्तृ स्ताम्बूलदानम्बिटिकार्पणं प्रायः प्रायेण न स्म-

तदध्येहि स्मरोद्यं मां हित्वा यत्र गता सखी।
तत्रापि मे गतस्याग्रे लीलयैवाच्छिनस्तृणम् ॥ ८८ ॥
स्मरसि प्रेयसि! प्रायो यद्द्वितीयरतासहा।
शुचिरात्रीत्युपालब्धा त्वं मया पिकनादिनी ॥ ८९ ॥
भुञ्जानस्य नवं निम्बं परिवेविषती मधौ।
सपत्नीष्वपि मे रागं सम्भाव्य रुरुषः स्मरेः ॥ ९० ॥
स्मर शार्करमास्वाद्य त्वया राद्धमिति ब्रुवन्।
स्वनिन्दा रोषरक्तात्तु यद्भैषं तवाधरात् ॥ ९१ ॥

रसि तव च न ताम्बूलदानं नैव स्मरामि स्मरास्येव उभयत्र काकुः उभय उभावपि स्मराव एवेत्यर्थः ॥ ८७ ॥

तदिति। हे प्रिये! स्मरोद्यं मां हित्वा सखी गता तत्रापि गतस्य ममाग्रे लीलया विनोदेनैव तृणमाच्छिनः तच्छेदितमध्येहि स्मर इति स्मरस इतिधातोरदादित्वाल्लोटि हिरादेशः ॥ ८८ ॥

स्मरसीति। प्रेयसि! हे प्रिये! प्रियतमे! द्वितीयस्य रतस्यासहा दुर्बलत्वादक्षमा अन्यत्र पर्याप्ता पिकवन्नदतीति पिकनादि इत्यामिति च पिकनादिनी त्वं मया शुचि रात्री ग्रीष्मरात्री इदिकारादीकार इति। यदुपलब्धा तत्कल्यासीत्याक्षिप्ता तत्प्रायः प्रायेण स्मरसि ॥ ८९ ॥

भुञ्जानस्येति। हे प्रिये! भुञ्जानस्याभ्यवहरतो जनस्य मधौ चैत्रे सति पुंसि चेति पुंल्लिङ्गतो नवन्निम्बं पिचुमर्दं पिचुमर्दस्तु निम्ब इत्यमरः। परिवेविषतीति ददती ईर्ष्यापारवती त्वं सपत्नीष्वपि मे रागमनुरागं सम्भाव्य कल्पयित्वा स्थिता इति शेषः। स्मरस रुषो रोषान् स्मरेः च द्रागिणो मे सपत्नीति कल्पयन्त्या मधुरागिणः पिचुमर्द परिवेषिणः स कोपो न युक्त इति भावः ॥ ९० ॥

स्मरेति। हे प्रिये! त्वया राद्धन्निष्पादितं शर्करया विकारं शार्करं

मुखादारभ्य नाभ्यन्तं चुम्बं चुम्बं न तृप्तवान् ।
न प्रापं चुम्बितुं यत्ते धन्या तच्चुम्बतु स्मृतिः ॥ ९२ ॥
कमपि स्मरकेलिं तं स्मर यत्र भवन्निति ।
मया विहितसम्बुद्धि व्रीडिता स्मितवत्यसि ॥ ९३ ॥
नीलदाचिवुकं यत्र मदाक्तेन श्रमाम्बुना ।
स्मर हारमणौ दृष्टं स्वमास्यं तत्क्षणोचितम् ॥ ९४ ॥

पानकादिकं आस्वादयेति ब्रुवन् स्वनिन्दारोषेणैव रक्तात् अरुणात्तवाधराद्यदभैषम्भीतोऽहं इतिस्मृत्यभिप्रायेणापि निन्दार्हत्वादिति भावः। विभेतेर्लुङ् मचोमादेशश्च तु तच्च स्मर ॥ ९१ ॥

मुखादिति। मुखादारभ्य नाभ्यन्तं नाभिपर्यन्तं कुचादिकमङ्गञ्चुम्बं चुम्बं चुम्बित्वा चुम्बित्वा आभीक्ष्ण्ये णमुल् न तृप्तवानतृप्तः सन्नपि ते तव यदङ्गं चुम्बितुं नप्रापं यच्चुम्बनं न प्राप्तमित्यर्थः। पापिष्ठानिषेधादिति भावः। तत्ते धन्या भाग्यवती स्मृति श्चुम्बतु। तत्रेति वह्लादितिभावः, तच्चुम्बनं स्मरेदित्यर्थः ॥ ९२ ॥

कमिति। हे प्रिये! किमप्यत्राच्यन्तं स्मरकेलिं कामक्रीडां स्मरकेलिः परीहासवदिति यादवः। यत्र यस्मिन् नरके तं मया भवन्निति पुंलिङ्गनिर्देशेऽपि विहितसम्बुद्धिः कृतामन्त्रणा सती व्रीडिता लज्जिता स्मितवतीचासि पुम्विभागात् व्रीडा हर्षात् स्मितम् ॥ ९३ ॥

नीलदिति। हे प्रिये! यत्र क्षणे मदाक्तेन कस्तूरीकलुषितेन मदो रेतसि कस्तूर्यामिति विश्वः। श्रमाम्बुना स्वेदेन चिवुकं ओष्ठाधः प्रदेशपर्यन्तं ओष्ठपर्यन्तं अधरमधस्तात् चिवुकमित्यमरः। नीलन्नीलीभवन्नीलवत् इतिधातोर्लट् शत्रादेशः स्वमास्यं हारमणौ स्वस्येति भावः। दृष्टन्तत्क्षणमास्यदर्शनक्षणः तस्योचितस्तदुचितमत्यन्तदृङ्मुखदर्शनरूपमेव स्मर ॥ ९४ ॥

वनकेलौ स्मराश्वत्थदलं भूपतितं प्रति ।
देहि मह्यमुदस्येति मद्गिरा व्रीडिताऽसि यत् ॥ ९५ ॥
इति तस्या रहस्यानि प्रिये शंसति सान्तरा ।
पाणिभ्यां पिदधे तस्याः श्रवसी ह्रीवशीकृता ॥ ९६ ॥
कर्णौ पीड़यती सख्या वीक्ष्य नेत्रासितोत्पले ।
अप्यसीदयतां भैमीकरकोकनदे नु तौ ॥ ९७ ॥
तत्प्रविष्टं सखीकर्णौ पत्युरालपितं ह्रिया ।
पिदधाविव वैदर्भी स्वरहस्याभिसन्धिना ॥ ९८ ॥

वनेति। किञ्च वनकेलौ प्रमदवनविहारकाले भूपतितमश्वत्थदलं प्रत्युदस्योद्धृत्य मह्यं देहीति मद्गिरा मदुक्त्या व्रीडितासीति सरहस्याङ्गदानेन याचनाभिप्रायज्ञानादिति भावः। तत् स्मर अत्र सामुद्रिकाः अश्वत्थदलसङ्काशं गुह्यं गूढमनिश्चितं। यस्याः सा सुभगा कन्या पूर्वपुण्यैरवाप्यत इति ॥ ९५ ॥

इतीति। इतीत्थं तस्या भैम्या रहस्यानि रहस्यचेष्टितानि प्रियेनले शंसति कथयति सति सा भैमी अन्तरा कथामध्ये ह्रीवशीकृता लज्जापरवशा सती तस्याः कलायाः श्रवसी कर्णौ पाणिभ्यां पिदधे च्छादयामास ॥ ९६ ॥

कर्णाविति। भैम्या करावेव कोकनदे रक्तोत्पले कर्तृणि अथ रक्तसरोरुहे रक्तोत्पलं कोकनदमित्यमरः। विशिष्टपद्मोत्पल साधारणत्वेऽप्यसितोत्पलप्रतियोगित्वेन प्रयोग इत्युत्पलपर्यायएव ग्राह्यः। कर्णौ पीडयती कर्णान्तविश्रान्ते इत्यर्थः। सख्याः कलाया नेत्रे एवासितोत्पले वीक्ष्य स्वयमपि समत्सरावेव तौ कर्णावेवासीदयतामित्युत्प्रेक्षा लोके हि यत्सजातीयाः कुर्वन्तीतिभावः ॥ ९७ ॥

तदिति। वैदर्भी भैमी सखीकर्णावेव प्रविष्टन्तत्पत्युरालपितं रह-

तमालोक्य प्रियाकेलिं नले सोल्लुण्ठहासिनि ।
आरात्तत्त्वमबुद्ध्वाऽपि सख्यः सिस्मियिरेऽपराः ॥ ९९ ॥
दम्पत्योरुपरि प्रीत्या ता धराप्सरसस्तयोः ।
ववृषुः स्मितपुष्पाणि सुरभीणि मुखानिलैः ॥ १०० ॥
तदस्य हसिताज्जातं स्मितमासामभासत ।
आलोकादिव शीतांशोः कुमुदश्रेणिजृम्भणम् ॥ १०१ ॥
प्रत्यभिज्ञाय विज्ञाऽय स्वरं हासविकस्वरम् ।
सख्यस्तासु स्वपक्षायाः कला जातबलाऽजनि ॥ १०२ ॥

स्वभाषितं ह्रिया स्वरहस्याभिसम्बन्धिना विगूढाभिप्रायेणैव पिदधौ स्वरहस्य गोपनाय कर्णपिधानमित्युत्प्रेक्षा ॥ ९८ ॥

तमेति । तं पूर्वोक्तं प्रियायाः केलिं सखीकर्णपिधानविनोदमालोक्य नले सोल्लुण्ठं सपरिहासं हसतीति आरात् दूरादपराः सख्यः तत्त्वमबुद्ध्वा सिस्मियिरे चपलचिचपलचेष्टामात्रदर्शनाज्जहसुरित्यर्थः ॥ ९९ ॥

दम्पत्योरिति । धराप्सरसो भूलोकाप्सरसः सख्यस्तयोर्दम्पत्योरुपरि मुखानिलैर्निश्वाससमारुतैः सुरभीणि सुगन्धीनि स्मितान्येव पुष्पाणि ववृषुः सिषेचुः ॥ १०० ॥

तदिति । तस्य नलस्यास्ये हसिताज्जातमासां सखीनां स्मितं शीतांशोरालोकात् प्रकाशाज्जातं कुमुदश्रेणीनां जृम्भणमिव अभासत ॥ १०१ ॥

प्रत्यभिज्ञायेति । अथ सखीहासानन्तरं विज्ञा अभिज्ञा कला तासु सखीषु मध्ये सपक्षायाः समानाया एकस्याः सुहृद्भूताया इत्यर्थः । पक्षः पार्श्वगरुत् सहाय भयेष्विति यादवः । छन्दसि स्यादसूत्रे समानस्येति योगविभागात् सपक्षादिषु समानशब्दस्य सभावः । सख्याः सम्बन्धिनं हासेन विकस्वरन्तं स्वरं ध्वनिं प्रत्यभिज्ञाय स्वसखीस्वरोऽयमिति निश्चित्य जातबला जातसामर्थ्या अजनि जाता जनेः कर्तरि लुङ् । दीपजनेत्यादिना चिणि लुकि रूपम् ॥ १०२ ॥

साऽऽह्वयोच्चैरथोचे तामेहि स्वर्गेण वञ्चिते ! ।
पिब वाणीः सुधावेणीर्नृपचन्द्रस्य सुन्दरि ! ॥ १०३ ॥
साऽशृणोत्तस्य वाग्भागमनत्यासत्तिमत्यपि ।
कल्पग्रामाल्पनिर्घोषं वदरीव कृशोदरी ॥ १०४ ॥
अथ स्वपृष्ठनिष्ठायाः शृण्वन्त्या नैषधाभिधाः ।
नलमौलिमणौ तस्या भावमाकलयत् कला ॥ १०५ ॥
प्रतिबिम्बेङ्गितैः सख्या मुखकूतक्षतानुमा ।
तद्व्रीडाद्यनुकुर्व्वाणा शृण्वती चान्वमायि सा ॥ १०६ ॥

सेति । अथ स्वप्रत्यभिज्ञानानन्तरं सा कला तां सखी मुच्चैराह्वय हे स्वर्गेण स्वर्गसुखेन वञ्चिते ! प्रतारिते ! सुन्दरि ! एह्यागच्छ नृपचन्द्रस्य राजेन्दोः सम्बन्धिनीः सुधावेणीरमृतरससारिणीर्वाणीः पिब यथेच्छमाकर्ण्य इत्यूचे उवाच ॥ १०३ ॥

सेति । कृशोदरी कृशाङ्गी सा आहूता सखी अनत्यासत्तिमत्यपि ईषद्दूरस्थापि तस्य नलस्य वाग्भागं वाक्यखण्डं कल्पग्रामस्य वदरिसमीपवर्तिनः कल्पाख्यस्य ग्रामस्याल्पनिर्घोषं मन्दध्वनिं वदरीव वदरिकाश्रमस्था प्रागेवाशृणोत् अत्र प्रकृष्टेष्वग्रामेषु परस्परमालापाः श्रूयन्ते तद्वदश्रौषीदित्यर्थः ॥ १०४ ॥

अथेति । अथ सखीनियोगानन्तरं कला स्वपृष्ठनिष्ठायाः स्वपश्चाद्भागस्थितायाः सत्या नैषधस्य नलस्याभिधीयत इत्यभिधा वचनानि आतश्चोपसर्ग इति अण् प्रत्ययः । शृण्वन्त्यास्तस्याः भावञ्चेष्टान्नलस्य मौलिमणौ आकलयदपश्यत् पुरोवर्तितया तत्र तस्याः प्रतिफलनत्वादिति भावः ॥ १०५ ॥

प्रतीति । प्रतिबिम्बेर मौलिमणिगतसखीप्रतिबिम्बेन इङ्गितैर्दृष्टैः सुखाकूतैः सखीसुखचेष्टितैः लिङ्गैः क्षतानुमा इदमिदमयं वक्तीति कृतानुमाना तथा तस्याः सख्या व्रीडा प्रेमचेष्टितमनुकुर्वाणा अनुकरयन्ती

कारङ्कारं तथाकारमूचे साऽशृणवन्तमाम् ।
मिथ्या वेत्थ गिरश्चेत्तद्व्यर्थाः स्युर्मम देवताः ॥ १०७ ॥
मत्कण्ठभूषणानान्तु राजन्निविडपीडनात् ।
व्यथिष्यमाणपाणिस्ते निषेद्धुमुचिता प्रिया ॥ १०८ ॥
इति सा मोचयाञ्चक्रे कर्णौ सख्याः करग्रहात् ।
पत्युराश्रवतां यन्त्या मुधायासनिषेधिनः ॥ १०९ ॥
श्रुतिसंरोधजध्वानसन्ततिच्छेदतालताम् ।
जगाम झटिति त्यागस्वनस्तत्कर्णयोस्ततः ॥ ११० ॥

सती ताच्छील्ये चानश् इत्यन्यथानुपराभ्यां कृञ इति परस्मैपदप्रसङ्गात् सा कला शृण्वतीव साक्षादाकर्णयन्तीवान्वमायि अनुमिता तटस्थैरिति शेषः ॥ १०६ ॥

कारङ्कारमिति । सा कला तथाकारं तादृगनुमितार्थानुकरणं कृत्वा कृत्वा आभीक्ष्ण्ये णमुल् अशृणवन्तमां सम्यगाकर्णयत् शृणोते र्लङि मिपोऽमादेशः तिङव्ययादामु प्रत्ययः । इत्यूचे गिरः अशृण्वमिति वाचोमिथ्या वेत्थ चेत् मम देवता मदुपास्यदेवता व्यर्था विफलाः स्युः ॥ १०७ ॥

मदिति । किन्तु हे राजन् ! महाराज ! मत्कण्ठभूषणानां निविडपीडनाद्व्यथिष्यमाणपाणिस्तोत्स्यमानपाणिस्ते प्रिया भैमी निषेद्धुं कर्णापिधानान्निवारयितुमुचिता मया स्वरहस्यस्य सर्वस्यापि श्रुतत्वात् कर्णपिधानस्य स्वपाणिपीडानादतिरिक्तफलं नास्तीत्यर्थः ॥ १०८ ॥

इतीति । इतीत्थं सा कला मुधायासं वृथा प्रयासन्निषेधति माकुर्विति वारयतीति तन्निषेधिनः पत्युः नलस्य आश्रवतां वाक्यकारित्वं यान्त्याः वचनेऽस्थित आश्रव इत्यमरः । सख्या भैम्या करग्रहात् करसंरोधात् कर्णौ मोचयाञ्चक्रे मोचयामास ॥ १०९ ॥

श्रुतीति । ततः कर्णमोचनानन्तरन्तस्याः कलायाः कर्णयोर्झटितित्यागेन स्वनस्त्यागजन्योध्वनिः श्रुतिसंरोधेन जातायाः ध्वानसन्तते ध्वं नि-

साऽपसृत्य कियद्दूरं मुमुदे सिस्मिये ततः ।
इदञ्च तां सखीमेत्य ययाचे काकुभिः कला ॥ १११ ॥
अभिधास्ये रहस्यं तद्यदश्रावि मयाऽनयोः ।
तत्त्वयाकर्णितं मह्यमेह्यालि ! विनिमीयताम् ॥ ११२ ॥
वयस्याभ्यर्थनेनास्याः प्राकूटश्रुतिनाटने ।
विस्मितौ कुरुतः स्मैतौ दम्पती कम्पितं शिरः ॥ ११३ ॥
तयाऽऽलिमालपन्तीं तामभ्यधान्निषधाधिपः ।
आस्व तद्वञ्चितौ स्व स्वेन्मिथ्याशपथसाहसात् ॥ ११४ ॥

सन्तानस्य च्छेदे तालतां समापनतालतां जगाम त्यागध्वनिर्निवृत्त इत्यर्थः ॥ ११० ॥

सेति। सः कला ततः कियत् किञ्चित् दूरमपसृत्य छद्मना प्रार्थना व्याजेन सिस्मिये मन्दं जहास तामाहूतसखीमेत्य सखीं काकुभिर्दीनैर्वाक्यैरिदं वक्ष्यमाणं ययाचे प्रार्थयामास ॥ १११ ॥

अभीति। हे आलि ! सखि ! एहि अनयो भैमीनलयोः सम्बन्धियद्रहस्यम्मया अश्रावि श्रुतं अभिधास्ये कथयिष्यामि आकर्णितं त्वया श्रुतञ्च मह्यं वर्णय कथय विनिमीयतां उक्तिविनिमयः क्रियतां बुद्धिव्यावर्तकं वस्तु विपरीतवर्तनं विनिमय. क्रियतां बुद्धिविनिमयः अन्यथा न प्रत्ययः ॥ ११२ ॥

वयस्येति। अस्या वयस्यायाः एतौ दम्पती भैमीनलौ हे देव ! त्वामामन्त्र्य तेन तासां गिरां वैयर्थ्यं समर्थये सत्यसिद्धान्तत्वेन प्रतिपादयामि कलावाः सम्बन्धिना प्रार्थनेनोक्तिविनिमयप्रार्थनया प्राक् कण्ठपिधानावस्थायां कूटे मिथ्यैव सतो श्रवणनाटिते विस्मितौ शिरः कम्पितं कुरुतः स्म शिरः कम्पयाञ्चक्रतुरिति विस्मयभावोक्तिः ॥ ११३ ॥

तथेति। तथा तेन प्रकारेणालिमाहूतसखीमालपन्तीं सम्भाषमाणान्तां कलान्निषधाधिपो नलोऽभ्यधादवोचत्किमितिः हे धूर्ते ! मिथ्याश-

प्रत्यलापीत् कलाऽपीमं कलङ्कः शङ्कितः कुतः ।
प्रियापरिजनोक्तस्य त्वयैषाऽद्य मृषोद्यता ॥ ११५ ॥
सत्यं खलु तदाश्रौषं परं धुसुधुमारवम् ।
शृणोमीत्येव चावोचं ननु त्वद्वाचमित्यपि ॥ ११६ ॥
आमन्त्र्य देव ! तेन त्वां तद्वैयर्थ्यं समर्थये ।
शपथः कर्कशोदर्कः सत्यं सत्योऽपि दैवतः ॥ ११७ ॥
असम्भोगकथारम्भैर्वञ्चयेथे कथन्नु मां ।
हन्त सेयमनर्हन्ती यत्तु विप्रलभे युवाम् ॥ ११८ ॥

पथसाहसात् व्यर्थाः खुर्मभदेवता इति कृत्वा तत्कपटशपथसाहसाद्वञ्चितौ स्तश्चेत्तर्हि आस्व तिष्ठ क्व गमिष्यसीत्यर्थः ॥ ११४ ॥

प्रत्यलापीदिति । कलापीमं नलं प्रत्यलापीत् प्रत्यवोचत् लपेर्लुङि अतोहलादेर्लघोरिति निषेधविकल्पात् सिचिवृद्धिः । हे राजन् ! त्वया प्रियापरिजनेनोक्तस्यैतस्य वचनस्य मृषोद्यता मृषावादित्वं राजसूय सूर्यमृषा पूर्वाद्वदेः क्यबन्तोनिपातः । स्वकलङ्कोदोषः कुतः शङ्कितः परिजनोक्तेषु नैष दोष इत्यर्थः ॥ ११५ ॥

सत्यमिति । अथवा तदा कर्णरोधसमये परं केवलं धुसुधुमारवं अश्रौषन्तत्सत्यं खलु तथाहि शृणोमीत्येव चावोचं त्वद्वाचमित्यपि तु नावोचं यावत् शृणोमीत्युक्तं तावत् सत्यमेव यदसत्यन्न शृणोमीत्युक्तं तस्मान्न मृषोद्यतादोष इत्यर्थः ॥ ११६ ॥

आमन्त्र्येति । हे देव ! तेन त्वामामन्त्र्य सम्भाष्य तस्य वैयर्थ्यं सन्यघाभावं समर्थये पश्यामि कर्कशोदर्कः शपथः तत्सत्यं दैवतोऽपि सत्यः सत्यफलः किञ्च मिथ्या वेदार्थगिरश्चेत्यन्यर्थाः खुर्मभदेवता इत्यत्र देव ! राजफलोदुरन्तः सत्यं सत्येनापि शपेद्यस्तु देवाग्निगुरुसन्निधौ तस्य वैवस्वतो राजा धर्मस्यार्द्धं निकृन्ततीति । स्मरणात् उदर्कः उत्तरमित्यमरः ॥ ११८ ॥

असम्भोगेति । असम्भोगकथानां सम्भोगाभावोक्तीनामारम्भैः प्रसङ्गैः मां कथं नु वञ्चयेथे अहं युवां यद्विप्रलभे वञ्चयामि सेयं वञ्चना

कर्णौ कर्णौ ततः सख्या श्रुतमाचख्यतुर्मिथः ।
मुहुर्विस्मयमाने च स्मयमाने च ते बहु ॥ ११९ ॥
अथाख्यायि कला सख्या कुप्य मे दमयन्ति ! मा ।
कर्णाद्द्वितीयतोऽप्यस्याः सङ्गोप्यैव यदब्रुवम् ॥१२०॥
प्रियः प्रियामथाचष्ट दृष्टं कपटपाटवम् ।
वयस्ययोरिदं तस्मान्मा सखीष्वेव विश्वसीः ॥१२१ ॥
आलापि कलयाऽपीयं पतिर्नालपति क्वचित् ।
वयस्येऽसौ रहस्यं तत्सभ्ये विस्रब्धमीदृशि ॥ १२२ ॥

अनीतिक्रमः मद्वचनं युवयोः युक्तमेव मम तु भवद्वचनमयुक्तमहो आश्चर्यन्धूर्तयोरिति भावः । अनर्हन्ती ब्राह्मणादित्वात् षङ् प्रत्यये अर्हतो नेति नुगागमः पित्वाद्दाङ्कलकरं कारइति वामनः । यस्येति लोपे यस्यहलेति यकारलोपे चार्हन्ती सिद्धान्ते सन्ध्यसमासः ॥ ११८ ॥

कर्णौ क इति । ततोऽनन्तरं मुहुर्मुहुर्यथा तथा विस्मयमाने विस्मयमाविशन्त्यौ स्मयमाने मन्दं हसन्त्यौ च सत्यौते मिथोरहसि श्रुतं कर्णे कर्णौ अन्योन्यं कर्णे आचख्यतुः कथयामासतुः ॥ ११९ ॥

अथेति । अथान्योन्यकथनानन्तरं कला सख्या आख्यायि किमिति हे दमयन्ति! मे मह्यं त्वं मा कुप्य क्रुध द्रुहेत्यादिना सम्प्रधारणत्वाच्चतुर्थी । यद्यस्मादेवं द्वितीयतो द्वितीयात् कर्णादपि संगोप्य अस्याः कलाया अब्रुवमेव रहस्यं भित्वापि न भेदितव्यमिति प्रलपेदित्यर्थः ॥ १२० ॥

प्रिय इति । प्रियो नलः प्रियां भैमीं आचष्ट किमिति हे प्रिये! वयस्ययोः सख्योरिदं कपटपाटवं वञ्चनाचातुर्यं दृष्टं खल्विदं काकुः । तस्मात् सखीषु मा विश्वसीर्विश्वासम्माकुरु श्वसेर्माङि लुङि स्नोत्तरत्वाभावाइपधा स्नेति नात्र लग्नाख्यसंमतेत्यादिना वृद्धि प्रतिषेधति सिद्धावः ॥१२१॥

आलपीति । कलया इयं भैमी आलापि आलपिता हे दमयन्ति! त्वत्प्रियः क्वचिन्नालपति ईदृशि सभ्ये वयस्ये सख्यौ तत् रहस्यं विस्रब्धं

इति व्युत्तिष्ठमानायां तस्यामूचे नलः प्रियाम्।
भण भैमि! बहिः कुर्वे दुर्विनीते! गृहादमू ॥ १२३ ॥
शिरःकम्पानुमत्याऽथ सुदत्या प्रीणितः प्रियः।
चुलुकं तुच्छमुत्क्षिप्य तस्याः सलिलमक्षिपत् ॥ १२४ ॥
तस्मिन्दत्तचित्ताभ्यामुच्चैः सिचयसेचनं।
ताभ्यामलम्भि दूरेऽपि नलेच्छापूरिभिर्जलैः ॥ १२५ ॥
वरेण वरुणस्यायं सुलभैरम्भसां भरैः।
एतयोः स्तिमितीचक्रे हृदयं विस्मयैरपि ॥ १२६ ॥

नैवेति तात्पर्य्यार्थः। ततो बहुलमिति भावेक्तस्य प्रत्ययः तस्याकित्वान्नकारलोपः ॥ १२२ ॥

इतीति। इतीत्यन्तस्यां कलायां व्युत्तिष्ठमानायां विरोधमाचरन्त्यां उदोऽनूर्ध्वकर्मणोरित्यात्मनेपदम्। नलः प्रियामूचे किमिति हे भैमि! दुर्विनीते उद्धते! अमू सख्यौ गृहाद्बहिः कुर्वे निर्वासयामीति काकुः भण ॥ १२३ ॥

शिर इति। अथ प्रियो नलः सुदत्या भैम्याः शिरःकम्पेनैवानुमत्या प्रीणितः तोषितः सन् तुच्छं रिक्तं चुलुकं प्रसृतं पाणिस्तत्सख्योरुत्क्षिप्य सख्युपरीत्यर्थः। तस्याः कलायाः सलिलमक्षिपदकिरत् ॥ १२४ ॥

तदिति। तस्मिन् चित्ते ताभ्यां दत्तचित्ताभ्यां सखीभ्यां नलस्येच्छां पूरयन्तीति तत्पूरिभिर्जलैर्दूरे उच्चैः अतिमात्रं सिचयसेचनं वस्त्रसेचनं पटोऽस्त्री सिचयो वस्त्रमिति यादवः। अलम्भि विभाषाचिण्णमुलोरिति नुमागमः ॥ १२५ ॥

वरेणेति। अयं नलो वरुणस्य वरेण वरदानेन सुलभैरम्भसां भरैरोघैः विस्मयैरप्याश्चर्यरसैः एतयोः सख्योः हृदयं हृदयं वक्षसि स्वान्त इति विश्वः। स्तिमितीचक्रे निश्चलीचक्रे अभूततद्भावे च्विः अत्र स्तिमितहृदयमिति विशेषणविशेष्ययोः द्वयोरपि हृदययोः प्रकृतत्वात् श्लेषः ॥ १२६ ॥

तेनापि नापसर्पन्त्यौ दमयन्तीमयं ततः।
हर्षेणादर्शयत् पश्य नन्विमे तन्वि! मे पुरः ॥ १२७ ॥
क्लिन्नीकृत्याम्भसा वस्त्रं जैनप्रव्रजितीकृते।
सख्यौ सक्षौमभावेऽपि निर्विघ्नस्तनदर्शने ॥ १२८ ॥
अम्बुनः शम्बरत्वेन मायैवाविरभूदियम्।
तत्पटावृतमप्यङ्गमनयोः कथयत्यदः ॥ १२९ ॥
वाससो वाऽम्बरत्वेन दृश्यतेयमुपानसत्।
चान्द्रहारमणिश्रेणितारवीक्षणलक्षणा ॥ १३० ॥

तेनेति। ततो जलसेचनानन्तरमयत्नलब्धेन सेचनेनापि नापसर्पन्त्यौ नापगच्छन्त्यौ तेन अनपसरणकर्मणा ननु तन्वि! प्रिये! मे मम पुर पुरःस्थिते पश्येति हर्षेण दमयन्तीमदर्शयत् दमयन्त्यै दर्शयामासेत्यर्थः। अत्राभिवदिदृशोरात्मनेपद उपसङ्ख्यानं इति परस्मैपदन्दमयन्तीमित्यणिकर्तुः कर्मत्वं चिन्त्यम् ॥ १२७ ॥

क्लिन्नीकृत्येति। असौ वस्त्रं अम्भसा क्लिन्नीकृत्य आर्द्रीकृत्य जैनप्रव्रजितीकृते दिगम्बरीकृते इत्यर्थः। अभूततद्भावे च्विः सख्यौ सक्षौमभावेऽपि सक्षौमत्वेऽपि निर्विघ्नमप्रतिबाधनं स्तनदर्शनं ययोस्ते दृष्टवस्त्रत्वेन सर्वाङ्गव्यक्तेरितिभावः ॥ १२८ ॥

अम्बुन इति। अम्बुनो जलस्य शम्बरत्वेन शम्बरासुरत्वेन च दैत्यो ना शम्बरोऽम्बुन इति वैजयन्ती। इयं मायैव शाम्बर्य्यैव स्यान्माया शाम्बरी मायेत्यमरः। अद इदं पटावृतमनयोरङ्गं तत्कथयत्याविष्करोति अन्यथा कथं व्यावृत्तस्य दृश्यतेतिभावः ॥ १२९ ॥

वासस इति। अथवा चान्द्रीहारमणिश्रेण्यएव तारा नक्षत्राणि तासां वीक्षणं दर्शनमेव लक्षणं लक्ष्म यस्याः सा इयं वाससोऽम्बरत्वेन सवस्त्रत्वेनाकाशत्वेन चोपानसत् उन्नतं आकाशस्यानाकारत्वादिति भावः अम्बरं व्योम्नि वाससीत्यमरः ॥ १३० ॥

ते निरीक्ष्य निजावस्थां ह्रीणेनिर्ययतुस्ततः ।
तयोर्वीचारसात् सख्यः सर्वा निश्चक्रमुः क्रमात् ॥ १३१ ॥
ता वहिर्भूय वैदर्भीमूचुर्नीतावधीतिनि ! ।
उपेक्ष्ये ते पुनः सख्यौ मर्मज्ञे नाधुनाप्यमू ॥ १३२ ॥
उच्चैरूचेऽथ ता राजा सखीयमिदमाह वः ।
श्रुतं मर्म समैताभ्यां दृष्टं मर्म मया तयोः ॥ १३३ ॥
मद्विरोधितयोर्वाचि न श्रद्धातव्यमेतयोः ।
अभ्यषिञ्चदिमे मायामिथ्यासिंहासने विधिः ॥१३४ ॥

ते इति । ते सख्यौ निजावस्थां दशान्निरीक्ष्य ह्रीणे लज्जिते सत्यौ ततो देशान्निर्ययतुः तयोः वीचारसाद्वीक्षणेच्छातः सर्वाः सख्यः क्रमान्निश्चक्रमुः निष्क्रान्ताः ॥ १३१ ॥

ता इति । ता सख्यो वहिर्भूय वहिर्निर्गत्य वैदर्भीमूचुः किमिति हे नीतावधीतिनि ! अधीतनीतिशास्त्रे ! इष्टादित्वादीनि प्रत्ययः तस्येन्विषयस्य कर्मसप्तमी । अमू मर्मज्ञे सख्यौ अधुनापि ते तव पुनर्नोपेक्ष्ये मर्मज्ञं न प्रकोपयेदिति न्यायादितिभावः । कृत्यानां कर्तरि चेति कर्तरि षष्ठी ॥ १३२ ॥

उच्चैरिति । अथ राजा ताः सखीरूचे उवाच उच्चैरूवाचिरे राज्ञेति पाठान्तरं । किमिति इयं सखी दमयन्ती वो युष्माकमिदमाह किमिति यद्दे ताभ्यां मर्म श्रुतं मया त्वेतयोस्तत् मर्म रहस्यं दृष्टं मर्मश्रवणाद्दर्शनं दुःसहमिति भावः ॥ १३३ ॥

मदिति । किञ्च हे सख्यो ! मया विरोधितयोर्विप्रकृतयोरेतयोर्वाचि वचने किं किमिति श्रद्धातव्यं तथा हि विधिर्ब्रह्मा इमे दूत्यौ माया मिथ्या कपटोऽनृतं तयोः सिंहासने अभ्यषिञ्चत् अभिषिक्तवान् तस्माद्विधिप्रलापो न श्रद्धेय इत्यर्थः ॥ १३४ ॥

धौतेऽपि कीर्त्तिधाराभिश्चरिते चारुणि द्विषः।
श्ववाक्शीलवैर्लक्ष्म लेखितुं के न शिल्पिनः॥ १३५॥
ते सख्यावाचचक्षाते नकिञ्चिद्ब्रूमहे बहु।
वक्ष्यावस्तत्परं यस्मै सर्व्वे निर्व्वासिता वयम्॥ १३६॥
स्थापत्यैर्न स्म विन्तस्ते वर्षीयस्त्वचलत्करैः।
क्षतामपि तथा वाचि करकम्पेन वारणाम्॥ १३७॥
अपयातमितो धृष्टे! धिग्वामश्लीलशीलताम्।
इत्युक्ते चोक्तवन्तश्च व्यतिद्राते स्म ते भिया॥ १३८॥

धौतेऽपीति। कीर्तिधाराभिर्धौतेऽपि चारुणि द्विषो द्वेषिणः चरिते श्वपाकशीलवैर्लक्ष्म कलङ्कं लेखितुमुत्पादयितुं के न शिल्पिनः कुशला न सर्वेऽपि कुशला इत्यर्थः॥ १३५॥

तद्इति। ते सख्या वाचचक्षाते ऊचतुः किमिति किमपि बहु भूरि ब्रूमहे किन्तु तत्परं तदेव वक्ष्यावः यस्मै वयं सर्वेऽपि निर्वासिताः॥ १३६॥

स्थापत्यैरिति। ते सख्यौ वर्षीयस्त्वेन वृद्धत्वेन प्रियस्थिरेत्यादिना वृद्धशब्दस्य ईयस्वादेशः। चलत्करैः कम्पहस्तैः स्थपतेरिमे भावाः स्थपत्याः कञ्चुकिनः स्थापत्यः सौविदल्लाः कञ्चुकिन इत्यमरः। तैः क्षतामपि तथावाचि तादृक् क्षतवाक्ये करकम्पेन वारणान्निवारणं न विन्तः स्म न जानीतः स्म जराकम्पभ्रमादितिभावः॥ १३७॥

अपयातमिति। हे धृष्टे! वराक्यौ! इतोऽस्माद्देशात् अपयातं गच्छतं वां युवयोरश्लीलशीलतां ग्राम्यभाषणशीलत्वं धिक्। इत्युक्ते भर्त्सिते ते उभे [व्यतिद्राते स्म परस्परव्यतिहारेण पलायेते इतीत्थमुक्तवन्तः भर्त्सितवन्त स्ते व्यतिद्राते स्म परस्परव्यतिहारेण पलायिताः द्रा कुत्सायां गतावित्ति धातोर्लटि कर्तरि कर्मव्यतिहार इत्यात्मनेपदम् अदादित्वा

आह स्म तद्गिरा ह्रीणां प्रियां नतमुखीं नलः ।
ईदृग्भण्डसखी काऽपि निस्त्रपा न मनागपि ॥१३९॥
अहो नापत्रपाकान्ते जातरूपमिदं मुखम् ।
नातितापार्ज्जनेऽपि स्यादितो दुर्वर्णनिर्गमः ॥ १४० ॥
तामथैष हृदि न्यस्य ददौ तल्पतले तनुम् ।
निमील्य च तदीयाङ्गसौकुमार्य्यमसिस्वदत् ॥ १४१ ॥

लुक् सर्वत्र द्वित्वे प्रथमपुरुषस्य द्विवचनेषु समानं रूपम् एवन्ते इत्यत्रापि स्त्रीत्वात् द्वित्वे पुंसि बहुत्वेऽपि समानरूपम् ॥१३८॥

आहेति। अथ नलः तयोः सख्यो गिरा वक्ष्यमाणया वक्ष्याव स्तत्परमित्यादिकया ह्रीणां लज्जिता मतएव नतमुखीं प्रियां आह स्म उवाच किमित्याकाङ्क्षायां सार्द्धश्लोकेनाह ईदृगित्यादिकया ह्रीणां ईदृश्यौ भण्डे निर्लज्जे सख्यौ यस्या स्तादृशी सखी का नद्यृतश्चेति कप् समासान्तः। सापि त्वं मनागपि निस्त्रपा निर्लज्जा नासि नं दोषलेशोऽपि नास्तीति चित्रमित्यर्थः ॥ १३९ ॥

अहो इति। अहो जातरूपं सम्पन्नसौन्दर्य्यं इति। सुवर्णञ्चामीकरं जातरूप मित्यमरः। इदन्ते मुखमपगता त्रपा यस्य तदपत्रपं शैषिकः कप् प्रत्ययः तन्नभवतीति नापत्रपाकं नापत्रपं नञ्समासः अन्यपत्रस्य पत्रीकृतस्य द्रवीकारितस्य पाकः पत्रपाकः तद्रहितमपत्रपाकं न भवति नापत्रपाकं पत्रपाकसंस्कृत मेवेत्यर्थः। अतितापार्जनेऽप्यत्यन्त दाहकरणेऽपि इतोऽस्मात् सुवर्णात् निर्वर्णनिर्गमः श्यामिकानिर्गमः न स्यादिति विरोधः। अतएवाहो आश्चर्य्यं सखी प्रबला इति दुःखोत्पातेऽपि मुखाद्दुरक्षरनिर्गमनं न स्यादिति विरोधाद्विरोधाभासोऽलङ्कार इति चित्रम् ॥ १४० ॥

तामिति। अथैष नल स्तां प्रियां हृदि वक्षसि न्यस्य निधाय तल्पतले शय्योपरि तनुं स्वदेहं ददौ शयितवानित्यर्थः। तदीयाङ्गस्य प्रिया-

न्यस्य तस्याः कुचद्वन्द्वे मध्येनीवि निवेश्य च ।
स पाणेः सफलं चक्रे तत्करग्रहणश्रमम् ॥ १४२ ॥
स्थापितामुपरि स्वस्य तां मुदा मुमुदे वहन् ।
तदुद्वहनकर्तृत्वमाचष्ट स्पष्टमात्मनः ॥ १४३ ॥
स्विद्यत्कराङ्गुलीलुप्तकस्तूरीलेपमुद्रया ।
फूत्कार्य्यपीडितौ चक्रे स सखीषु प्रियास्तनौ ॥ १४४ ॥
तत्कुचे नखमारोप्य चमत्कुर्व्वंस्तयेञ्चितः ।
सोऽवादीत्त्वां हृदिस्थन्तेकिं मामभिनदेष न ॥ १४५ ॥

शरीरस्य सौकुमार्य्यं मार्द्दवं निमील्य चक्षुषी निमील्येत्यानन्दानुभवोक्तिः । असिस्वदत् स्वदेर्णौ चङ्युपधाह्रस्वः ॥ १४१ ॥

न्यस्येति । नलः तस्याः कुचद्वन्द्वे पाणिं न्यस्य निधाय मध्येनीवि नीवीमध्ये पारेमध्ये षष्ठ्या वेत्यव्ययीभावः । निवेश्य प्रवेश्य च अर्थात्पाणेः कर्मत्वं पाणेः स्वकरस्य तत्करग्रहणश्रमं तत्पाणिग्रहणप्रयासं सफलञ्चक्रे तादृग्विधः प्रियास्पर्शस्तस्य महदानन्दफलमित्यर्थः ॥ १८२ ॥

स्थापितामिति । स मुदा हर्षेण स्वस्योरसि स्थापितां प्रियां वहन् धारयन् मुमुदे आननन्द आत्मनस्तस्या भैम्याः उद्वहने विवाहे कर्तृत्वं स्पष्ट माचष्ट अनुद्वहत एव उरसि वहनायोगादिति भावः ॥ १४३ ॥

स्विद्यदिति । स नलः प्रियायाः स्तनौ स्विद्यन्तीभिः कराङ्गुलीभिः लुप्तः प्रमृष्टो यः कस्तूरीलेपः सएव मुद्रा चिह्नं तया कृत्वा सखीषु विषये फूत्कारेणोच्चैस्तरमुखानिलेन तादृक् पीडितं पीडनं ययोः तौ फूत्कार्य्यपीडितौ चक्रे कस्तूरीलेपमुद्रया सखीभ्यः कुचयोः करपीडनं रचयामास ॥ १४४ ॥

तदिति । नल स्तत्कुचे नख मारोप्य निखाय चमत्कुर्वन् तया ईर्ञ्चितः सन् तव हृदिस्थं सुपिस्थ इति कप्रत्ययः । हृद्द्युभ्याङ्ङेरुपसङ्ख्या-

अहो अनौचितीयन्ते हृदि शुद्धेऽप्यशुद्धवत् ।
अङ्कः खलैरिवाकल्पि नखैस्तीक्ष्णमुखैर्मम ॥ १४६ ॥
यच्चुम्बति नितम्बोरू यदालिङ्गति च स्तनौ ।
भुङ्क्ते गुणमयं तत्ते वासः शुभदशोचितम् ॥ १४७ ॥
लीनचीनांशुकं स्वेदि दरालोक्यं विलोकयन् ।
तन्नितम्बं स निश्वस्य निनिन्द दिनदीर्घताम् ॥ १४८ ॥

नमिति समासस्यालुक्। तमन्तर्गतमां नाभिनत् न व्यदारयदिति तां प्रियां अवादीत् अत्र क्षत्ये नखरोपात् नखदर्शनचमत्कार इत्यसङ्गत्यलङ्कारः कार्य्यकारणयोर्भिन्नदेशताया सङ्गतिरिति लक्षणात् ॥ १४५ ॥

अहो इति। हे प्रिये ! मम तीक्ष्णमुखैः निशितायैः निष्ठुरवाग्भिश्च नखैः खलैः धूर्त्तैरिव शुद्धे अदुष्टेऽपि ते हृदि हृदये अशुद्धवत् दुष्टइव तत्र तस्यैवेति वतिप्रत्ययः। अङ्कश्चिह्नं कलङ्कश्चाकल्पि इति कल्पित इयन्निर्दोषे दोषकल्पना अनौचिती। अहो इति प्रगृह्यप्लुताप्रगृह्याचीति प्रकृतिसन्धिः ॥ १४६ ॥

यदिति। हे प्रिये ! गुणमयं तन्तुमयं सौशिल्यादिमयञ्च ते तव वासः नितम्बौ ऊरू च नितम्बोरू प्राण्यङ्गत्वाद् द्वन्द्वैकवद्भावः। यच्चुम्बति स्पृशति ते तव स्तनौ यदालिङ्गत्याश्लिष्यति तत् शुभदशायां शोभनानन्दानां ज्योतिःशास्त्रप्रसिद्धशुक्रादिशुभावस्थानां ते उचितमर्हं भुङ्क्ते दशावस्थायां वस्त्रान्ते स्याद्दशा अपीति विश्वः। शुभग्रहदशायां हि भुङ्क्ते जन्म शुभं फलम्। तथा पटादिवञ्चितं प्रान्तं प्रियं भवेदिति प्रसिद्धमिति भावः ॥ १४७ ॥

लीनेति। स नलः स्वेदि सात्त्विकोदयात् स्वेदवत् अतएव लीनचीनांशुकं सौष्टववस्त्रमतएव दरालोक्यमीषल्लक्ष्यं तस्या नितम्बं विलोकयन् पश्यन् निश्वस्येति विषादानुभवोक्तिः दिनस्य दीर्घतामाधिक्यं निनिन्द ॥ १४८ ॥

देशमेव ददंशासौ प्रियदन्तच्छदान्तिकम् ।
चकाराधरपानस्य तत्रैवालीकचापलम् ॥ १४९ ॥
न क्षमे चपलापाङ्गि ! सोढुं स्मरशरव्यथाम् ।
तत्प्रसीद प्रसीदेति स तां प्रीतामकोपयत् ॥ १५० ॥
नेत्रे निषधनाथस्य प्रियाया वदनाम्बुजम् ।
ततस्तनतटौ ताभ्यां जघनं घनमीयतुः ॥ १५१ ॥
इत्यधीरतया तस्य हठवृत्तिविशङ्किनी ।
झटित्युत्थाय सोत्कण्ठमसावन्वसरत्सखीः ॥ १५२ ॥

देशमिति । असौ नलः प्रियादन्तच्छदस्याधरस्यान्तिकं देशमुपान्तभागमेव ददंश दष्टवान् तत्रैवदेशे अधरपानस्य अलीकचापलं चकार तत्रैव रतिकाले सुखं स्त्रीणां शुद्धमाखेटके शुना मिति स्मृत्या तस्य कालान्तरे तस्याशुद्धत्वादितिभावः ॥ १४९ ॥

अथास्य कालक्षेपत्वलक्षणमौत्सुक्यमेव श्लोकद्वयेनाह नेत्यादि । हे चपलापाङ्गि ! हे चञ्चलाक्षि ! स्मरशरैर्व्यथां तत्कृतां पीडां सोढुं न क्षमे न शक्नोमि तत् तस्मात् प्रसीद प्रसीद भृशमजस्रं भणन्नेवं स नलः प्रीताम्मुदिताम् अपि तां प्रियाम् अकोपयत् । अनवसरचापलेन कोपयामास ॥ १५० ॥

नेत्रे इति । निषधनाथस्य नेत्रे दृशौ प्रियाया वदनाम्बुजम् ईयतुः प्रापतुस्ततो वदनाम्बुजात् स्तनतटौ कुचोत्सङ्गभागावीयतुस्ताभ्यां स्तनतटाभ्यां घनं जघनमीयतुः अत्र नेत्रयोः क्रमेणैकमनेकस्मिन्नित्युक्तलक्षणात् पर्यायालङ्कारः ॥ १५१ ॥

इतीति । तस्य स्वप्रियस्याधीरतया कातरतया हठवृत्तिं बलात्कारप्रवृत्तिं विशङ्कत इति तत् शङ्किनी असौ भैमी झटिति सहसोत्थाय सोत्कण्ठं सानुरागं सखी रन्वसरदनुससार ॥ १५२ ॥

न्यवारीव यथाशक्ति स्यन्दमन्दं वितन्वता ।
भैमी कुचनितम्बेन नलसम्भोगलोभिना ॥ १५३ ॥
अपि श्रोणिभरस्वैरां धर्त्तुं तामशकन्न सः ।
तदङ्गसङ्गजस्तम्भो गजस्तम्भोरुदोरपि ॥ १५४ ॥
आलिङ्गालिङ्ग तन्वङ्गि ! मामित्यर्द्धगिरं प्रियम् ।
स्मित्वा निवृत्य पश्यन्ती द्वारपारमगादसौ ॥ १५५ ॥
प्रियस्याप्रियमारभ्य तदन्तर्दूनयाऽनया ।
शेके शालीनयाऽऽलिम्भो न गन्तुं न निवर्त्तितुम् ॥ १५६ ॥

न्यवारीव । भैमी नलसम्भोगलोभिना तद्गृनेन अतएव स्यन्दं गमनं मन्दम् वितन्वता मन्थरं कुर्वता गतिं प्रतिबध्नतेत्यर्थः । कुचौ नितम्बश्च तेन कुचनितम्बेन प्राण्यङ्गत्वादेकवद्भावः । यथाशक्ति न्यवारीव निवारितेवेत्युत्प्रेक्षा ॥ १५३ ॥

अपीति । स नलः गजस्तम्भावालाने इव ऊरू महान्तौ दोषौ भुजौ यस्य स महाभुजः सन्नपि भुजबाहू प्रवेष्टोदोरित्यमरः । श्रोणिभरेण स्वैरां मन्दां मन्दंगमनामपि मन्दस्वच्छन्दयोः स्वैर मित्यमरः । तां प्रियां तदङ्गसङ्गेन जात स्तम्भः स्तम्भोनिष्क्रियाङ्गलक्षणसात्त्विकविकारो यस्य स सन् धर्त्तुं स नाशकत् । स्वयं निर्व्यापारस्य किं सहकारी सम्पद्येतेति भावः ॥ १५४ ॥

आलिङ्गेति । हे तन्वि ! कृशाङ्गि ! मामालिङ्ग आलिङ्गेति अर्द्धोक्तिर्गीर्यस्य तं प्रियं सा भैमी स्मित्वा मन्दं हसित्वा निवृत्य पश्यन्ती द्वारस्य पारम्परभागमगात् द्वारमतिचक्रामेत्यर्थः ॥ १५५ ॥

प्रियस्येति । प्रियस्य पत्युः अतिक्रमरूपमप्रियमारभ्यारचय्यान्तरन्तःकरणे दूनया परितप्तया ओदितश्चेति निष्ठानत्वं शालीनतया अधृष्टतया अनया भैम्या आलिम्भो गन्तुमपि गत्यर्थकर्मणि द्वितीया चतुर्थीतिवीप्साया

अकथयदथ वन्दिसुन्दरी द्वाः-
सविधमुपेत्य नलाय मध्यमह्नः।
जय नृप! दिनयौवनोष्मतप्ता-
प्लवनजलानि पिपासति क्षितिस्ते ॥ १५७ ॥
उपहृतमधिगङ्गमम्बु कम्बु-
च्छवि तव वाञ्छति केशभङ्गिसङ्गात्।
अनुभवितुमनन्तरं तरङ्गा-
समयमनस्वसृमिश्रभावशोभाम् ॥ १५८ ॥
तपति जगत एव मूर्ध्नि भूत्वा
रविरधुना त्वमिवाद्भुतप्रतापः।

मनध्वमोति चतुर्थी। न शेके न शक्तं भावे लिट्। निवर्त्तितुं प्रियं प्रतिगन्तुञ्च न शेके लज्ज विषादाभ्यामुभयत आक्षिप्यमाणत्वादिति भावः ॥ १५६ ॥

अकथयदिति। अथास्मिन्नवसरे वन्दिसुन्दरी वैतालिकस्त्री द्वाःसविधं द्वारसमीपमुपेत्य नलाय अह्नो मध्यमकथयत् अवददित्यर्थः। हे नृप! जय दिनयौवनस्योष्मणा तप्ता क्षिति स्ते प्लवनजलानि स्नानोदकानि पिपासति पातुमिच्छति तापस्यापि पिपासाहेतुत्वादिति भावः। माध्याह्निकस्नानकालोऽयमवधार्य्यतामिति तात्पर्य्यार्थः ॥ १५७ ॥

उपेति। किञ्च उपहृतं कलशेनेरितं कम्बुच्छवि शङ्खच्छायं शुभ्रमित्यर्थः। अधिगङ्गं गङ्गायां विभक्त्यर्थेऽव्ययीभावः। अम्बु गाङ्गं केशभङ्ग्याः केशसंस्थापनायाः सङ्गात् सङ्गमाद्धेतोरनन्तरं यथा तथा तरङ्गैः रसमयाः शमनस्वसुर्यमुनाया मिश्रभावस्य मेलनस्य शोभामिति निदर्शनालङ्कारः। अनुभवितुं वाञ्छति इच्छति ॥ १५८ ॥

तपतीति। एष रविरधुना त्वमिवाद्भुतप्रतापः सन् जगतो मूर्ध्नि भूत्वा स्थित्वा तपति प्रकाशते अनन्तरं पुरमथनं सदाशिवमुपास्य त्वदीयैः

पुरमथनमुपास्य पश्य पुण्यै-
रधरितमेनमनन्तरं त्वदीयैः ॥ १५९ ॥

आनन्दं हठमादरन्निव हरध्यानार्चनादिक्षण-
व्यासक्तावपि भूपतिः प्रियतमाविच्छेदखेदालसः ।
पश्चाद्द्वारदिशं प्रति प्रतिमुहुर्द्राङ्निर्गतप्रेयसी-
प्रत्यावृत्तिधिया दिशन् दृशमसौ निर्गन्तुमुत्तस्थिवान् ॥ १६०

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
अन्याक्षुण्णरसप्रमेयभणितौ विंशस्तदीये महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥ १६१ ॥

पुण्यैः तत्सेवानुकृतै रधरितं एनं पश्य पुरहरप्रसादात् सूर्याभ्यधिकप्रतापीष्णा भवेदित्यर्थः ॥ १५९ ॥

आनन्दमिति । असौ भूपतिर्नलो हरध्यानस्यार्चनादिक्षणस्य तत्कालस्यासत्तौ सन्निकर्षे प्रियतमाविच्छेदखेदेन वियोगदुःखेनालसोजडः सन् अतएव द्राङ् निर्गताया प्रेयस्याः प्रत्यावृत्तिधिया आनन्दं सुखं हठं आदरन् आदरमाददान इव पश्चाद्द्वारदिशं प्रति दिशन् दृशं निर्गन्तुं निर्यातुं उत्तस्थिवान् स्वयमुत्थितः ॥ १६१ ॥

श्रीहर्षमिति । अन्यैरक्षुण्णा अपूर्वा रसाः शृङ्गारादयः प्रमेया वाक्यार्थाश्चया यासु भणितिषु तस्मिन्निह काव्ये । तृतीयादिषु भाषितपुंवदित्यादिना पुंवद्भावः विंशतीति शब्दस्य लोपः गतमन्यत् ॥ १६१ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां जीवातुसमाख्यायां नैषधव्याख्यायां विंशः सर्गः ॥ २० ॥

नैषधचरितम् ।

एकविंशः सर्गः ।

तं विदर्भरमणीमणिसौधादुज्जिहानमनुदर्शितसेवैः ।
अर्पणान्निजकरस्य नरेन्द्रैरात्मनः करदता पुनरूचे ॥ १ ॥
तस्य चीनसिचयैरपि बद्धा पद्धतिः पदयुगात् कठिनेति ।
तां व्यधत्त शिरसां खलु माल्यै राजराजिरभितः प्रणमन्ती ॥ २ ॥
द्रागुपाह्रियत तस्य नृपैस्तद्दृष्टिदानबहुमानकृतार्थैः ।
स्वस्वदेश्यमथ रत्नमपूर्व्वं यत्नकल्पितगुणाधिकचित्रं ॥ ३ ॥

तमिति । विदर्भरमण्या वैदर्भ्या मणिसौधान्मणिमयप्रासादात् उज्जिहानं निर्गच्छन्तं तं नल मनु प्रति तस्मै दर्शितसेवैरित्यर्थः । अतो लक्षणार्थे कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । नरेन्द्रैः निजकरस्यार्पणात् अवस्थावलम्बनात् आत्मनः स्वस्य करं हस्तं बलिं च ददातीति करदाः बलिहस्तांशवः करा इत्यमरः । तेषां भावस्तत्ता सा पुनः बलिदानादेव करदत्वे सिद्धे पुनर्हस्तदानेन साधनवैरस्यात्पुनरुक्तिरित्यर्थः ॥ १ ॥

तस्येति । राजराजिः नृपपङ्क्तिः अभितः समन्तात्प्रणमन्ती चीनसिचयैः पट्टवस्त्रैः बद्धा आच्छादितापि पद्धतिर्मार्गः । तस्य नलस्य पदयुगात्कठिनेति हेतोः पञ्चमी विभक्त इति पञ्चमी । तां दस्मतीं शिरसा माल्यैः मालाभिः साधनैः व्यधत्त पिहितवती खलु ॥ २ ॥

द्रागिति । अथ प्रणामानन्तरं तस्य नलस्य दृष्टिदानबहुमानेन कृतार्थैः नृपैः स्वस्वां स्वस्वान्दिशि साधु स्वस्वदिश्यं रत्न साधुरिति

अङ्गुलीचलनलोचनभङ्गिभ्रूतरङ्गविनिवेदितदानम् ।
रत्नमन्यनृपढौकितमन्ये तत्प्रसादमलभन्त नृपास्तत् ॥ ४ ॥
तानसौ कुशलसूनृतसेकैस्तर्पितानथ पितेव विसृज्य ।
अस्त्रशस्त्रखुरलीषु विनिन्ये शैष्यकोपनमितानमितौजाः ॥ ५ ॥
मर्त्यदुःष्प्रचरमस्त्रविचारश्चारु शिष्यजनतामनुशिष्य ।
स्वेदविन्दुकितगोधिरधीरं स श्वसन्नभवदाप्लवनेच्छुः ॥ ६ ॥
यक्षकर्द्दमदृढोन्मृदिताङ्गं प्राक्कुरङ्गमदमीलितमौलिम् ।
गन्धवारिभिरनुबन्धितभृङ्गैरङ्गना सिषिचुरुच्चकुचास्तम् ॥ ७ ॥

यप्रत्ययः । यत्नेन कल्पितैः सम्पादितैर्गुणैरधिकं चित्र माश्चर्यमपूर्वं रत्नं तस्य नलस्य द्राक् शीघ्रमुपाह्रियत उपहृतम् ॥ ३ ॥

अङ्गुलीति । अङ्गुलीचलनेन लोचनभङ्ग्या च भ्रूतरङ्गेन विनिवेदितं ज्ञापितं दानं यस्य अन्यैर्नृपैर्ढौकितमुपहृतं तस्य नलस्य प्रसादं अनुग्रहं अन्ये नृपा रत्नं अलभन्त ॥ ४ ॥

तानिति । अमितमोजो यस्यासौ नलः कुशलस्य वादस्य सूनृतस्य प्रियस्य वचनसेकैस्तर्पितान् तान् पितेव विसृज्य शैष्यकेन शिष्यत्वेन योपधाद्गुरूपोत्ताद्वुञ् । उपनमितान् समेतान् अस्त्रेष्वाग्नेयादिषु शस्त्रेषु धनुरादिषु खुरलीषु भ्रमणविशेषेषु विनिन्ये शिक्षितवान् ॥ ५ ॥

मर्त्येति । स नलः मर्त्यदुष्प्रचरं दुरनुमानमस्त्रविचारमस्त्रशिक्षां शिष्यजनतां शिष्यसमूहं चारु यथा भवति तथानुशिष्य शिक्षयित्वा स्वेदेन विन्दुकिता सञ्जातविन्दुका गोधिर्ललाटं यस्य ललाटमलिकं गोधिः स्त्री तत्प्रान्ते तु गोधिकेति यादवः । स तादृशः सन् अधीरमधिकं यथा भवति तथा श्वसन् आप्लवनं स्नानमिच्छुरभवत् ॥ ६ ॥

यक्षेति । प्राक् प्रथमं यक्षकर्दमेन कर्पूरादियोगजेन कर्पूरागुरुकस्तूरी तक्कोलैर्यक्षकर्दम इत्यमरः । दृढं यथा तथा उन्मृदितं घर्षितमङ्गं यस्य कुरङ्गमदेन कस्तूर्यादिना मीलितः सङ्कलितः मौलिर्यस्य तं नलं.

भूभृतं पृथुतपोघनमाप्तस्तं शुचिः स्नपयति स्म पुरोधाः ।
स्यन्दवज्जलधरस्खलदोघस्तीर्थवारिलहरीरुपरिष्टात् ॥ ८ ॥
प्रेयसीकुचवियोगहविर्भुग्जन्मधूमविततीरिव बिभ्रत् ।
स्नायिनः करसरोरुहयुग्मं तस्य गर्भधृतदर्भमराजत् ॥ ९ ॥
कल्पमानममुनाचमनार्थं गाङ्गमम्बु चुलुकोदरचुम्बि ।
निर्मलत्वमिलितप्रतिबिम्बाद्यामयच्छदुपनीय करे नु ॥ १० ॥

उच्चाः कुचा यासान्ता अङ्गना अनुबन्धिता आहृता भृङ्गा यैस्तैर्गन्धवारिभिर्गन्धोदकैः साधनैः सिषिचुः सिक्तवत्यः ॥ ७ ॥

भूभृतमिति । तदनन्तरं शुचिः शुद्ध आप्त इष्ट जनः जलधरात् घटात् स्खलन्नोघः प्रवाहो यासान्ता स्तीर्थवारीणां लहरीस्तरङ्गान् उपरिष्टादुपरि उपर्युपरिष्टादिति निपातनात्साधुः । स्यन्दवत्स्यन्दवानः सन् पृथुना महता तपसा घनं सान्द्रं भूभृतं नलं स्नपयतिस्म स्नापितवान् । इत्यमन्यत्र आप्तः प्राप्तः शुचिराषाढः शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोरपीति विश्वः । जलधरेभ्यो मेघेभ्यः स्खलन्नोघो यासान्ता स्तीर्थवारि जलवारि उपरिष्टात्स्यन्दवत्स्यन्दवानं पृथोर्वैण्यस्य पृथुर्वैण्ये कृष्णोरज्वां पृथु महत्यपीति विश्वः । तपसानुभावेन घनं शिथिलं प्रसिद्धं भूभृतं पर्वतं स्नपयतीति भूभृद्भूमिधरे नृपे इति विश्वः ॥ ८ ॥

प्रेयसीति गर्भे धृतानि दर्भाणि येन तत् स्नायिनः स्नातस्य नलस्य करयोरेव सरोरुहयोर्युग्मं प्रेयस्या दमयन्त्याः कुचाभ्यां वियोगहविर्भुजः विरहवह्नेः सकाशाज्जन्म यस्य तस्य धूमस्य विततीः सन्ततीर्बिभ्रदिवाराजत् नूतनदर्भाणां श्यामवर्णत्वात् धूमसाम्यम् ॥ ९ ॥

कल्पमानमिति । अमुना नलेन चमनार्थं कल्पमानं चुलुकोदरं चुम्बति स्पृशति यत्तद्गाङ्गं-गङ्गासम्बन्धि अम्बु कर्तृ निर्मलत्वेन मिलितः प्रतिबिम्बो यस्याः द्यामाकाशं स्वर्गञ्च करे अयच्छत् द्यौः स्वर्गसुरवर्त्मनो रित्यमरः । द्यौः शब्दस्य स्वर्गाकाशवाचित्वाच्छब्दच्छलेनोक्तिः ॥१०॥

मुक्तमाप्य दमनस्य भगिन्या भूमिरात्मदयितं धृतरागा ।
अङ्गमङ्गमनु किं परिरेभे तं मृदो जलमृदु ग्रहयालुम् ॥ ११ ॥
मूलमध्यशिखरश्रितवेधः शौरिशम्भुकरकाङ्घ्रिशिरस्थैः ।
तस्य मूर्ध्नि चकरे शुचिदर्भैः वारि वान्तमिव गाङ्गतरङ्गैः ॥ १२ ॥
प्राणमायतवतो जलमध्ये मज्जिमानमभजन्मुखमस्य ।
आपगापरिवृढोदरपूरे पूर्व्वकालमुदितस्य सुधांशोः ॥ १३ ॥
मर्त्यलोकमदनः सदृशत्वं बिभ्रदभ्रविशदद्युतितारम् ।
अम्बरं परिदधे विधुमौले स्पर्द्धयेव दशदिग्वसनस्य ॥ १४ ॥

मुक्तमिति। दमनस्य भगिन्या भैम्या मुक्तां परित्यक्तां मृदो मृत्तिका ग्रहयालुं गृहीतारं आत्मनोदयितं नलं आप्य धृतोरागो रक्तवर्णश्च रागोऽनुरक्तौ मात्सर्ये क्लेशेच लोहितादिष्विति विश्वः। एतादृशी सती अत्र स्मृतिः विप्रो गौरमृदः प्रोक्ताः क्षत्रा रक्ताः प्रकीर्तिता इति। नलेन मृदु भूमि रङ्ग मङ्गं प्रत्यवयवं परिरेभे परिरब्धवती ॥ ११ ॥

मूलमिति। मूलमध्यशिखराणि दर्भाणामादिमध्याग्राणि श्रितानां प्राप्तानां यथाक्रमं वेधः शौरिशम्भूनां ब्रह्मविष्णुरुद्राणां कराङ्घ्रिशिरःसु करपादजटाजूटेषु तिष्ठन्तो अत्र स्मृतिः कुशमूले स्थितो ब्रह्मा कुशमध्येतु केशवः। कुशाग्रे शङ्करं विद्यादिति। तै र्गाङ्गै र्गङ्गासम्बन्धिभि स्तरङ्गै र्वान्तं निष्ठ्यूतमिव शुचि निर्मलं वारि दर्भैः कर्तृभि स्तस्य नलस्य मूर्ध्नि चकरे कीर्णं कॄ विक्षेप इति धातोः कर्मणि लिट् ॥ १२ ॥

प्राणमिति। जलस्य मध्ये प्राणमायतवतः प्राणायामकृतवतः तस्य नलस्य मुखं कर्तृ आपगापरिवृढस्य समुद्रस्योदरपूरे मध्ये जलवृद्धौ पूर्वकाल मुदयात्प्रागुदितस्य स्थितस्य सुधांशो श्चन्द्रस्य मज्जिमान मभजत् ॥ १३ ॥

मर्त्यलोकमिति। मर्त्यलोकमदनः नलः सदृशत्वं बिभ्रदभ्रस्येव विशदा

भीमजामनुचलत्प्रतिवेलं संयियंसुरिव राजऋषीन्द्रः।
आववार हृदयं स समन्तादुत्तरीयपरिवेषमिषेण ॥ १५ ॥
स्नानवारिघटराजदुरोजा गौरमृत्तिलकविन्दुमुखेन्दुः।
केशशेषजलमौक्तिकदन्ता तं वभाज सुभगाप्लवनश्रीः ॥ १६ ॥
श्वैत्यशैत्यजलदैवतमन्त्रस्वादुताप्रमुदितां चतुरक्षीम्।
वीक्ष्य मोघहृतसौरभलोभं घ्राणमस्य सलिलघ्रमिवाभूत् ॥ १७ ॥

द्युति र्यस्य तत्तारं महत्त्वं अभ्रेषु मेघेषु विभ्रान्ताः अत एव द्युतयो दीप्तिरहिता स्तारा नक्षत्राणि यस्य तच्चाम्बरं वस्त्रमाकाशञ्च अम्बरं व्योम्नि वाससीत्यमरः। दशदिशः वसनं वस्त्रं यस्य विधुमौलेः शम्भोः स्पर्धयेव परिदधे परिहृतवान् ॥ १४ ॥

भीमजामिति। राजर्षिषु ऋत्यक इति प्रकृतिभावः। इन्द्रः श्रेष्ठः स नलः भीमजा मात्मप्रियां दमयन्ती मनु लक्षीकृत्य प्रतिवेल मनुचलद् हृदयं संयियंसुरिव संयन्तु मिच्छुरिव उत्तरीयस्य यः परिवेष स्तस्य मिषेण व्याजेन समन्तादाववार आवृतवान् ॥ १५ ॥

स्नानेति। स्नानवारिघटाविव राजन्तावुरोजौ कुचौ यस्याः सा गौरः पीतवर्णो मृत्तिलकविन्दुरिव मुखेन्दुर्यस्याः सा केशशेषाणि जलान्येव मौक्तिकानि दन्ता यस्याः नासिकोदरेत्यादिना पक्षे ङीपोऽ विधानादन्यत्र षङ् सा सुभगा रम्या आप्लवनस्य श्रीः शोभा तं नलं भेजे ॥ १६ ॥

श्वैत्येति। श्वैत्येन श्वेततया शैत्येन शीतत्वेन जलं दैवतं यस्य तेन मन्त्रेण स्वादुतया माधुर्येण च प्रमुदितां चतुरक्षीं चतुर्णामक्षाणां यथाक्रमं नयनत्वक्श्रोत्ररसनाख्याना मिन्द्रियाणां समाहारं वीक्ष्य मोघं व्यर्थं यथा भवति तथा हृतं सौरभेन लोभं येन तदस्य नलस्य घ्राणं घ्राणेन्द्रियं सलिलं जिघ्रति यत्तत्सलिलघ्रं स्वतोरूप सर्गे कः तादृश मभूदिव ॥ १७ ॥

सम्यगस्य जपतः श्रुतिमन्त्राः सन्निधानमभजन्त कराब्जे ।
शुद्धबीजविशदस्फुटवर्णाः स्फाटिकाक्षवलयच्छलभाजः ॥ १८ ॥
पाणिपर्व्वणि यवः पुनराख्यद्दैवतर्पणयवार्पणमस्य ।
न्युप्यमानजलयोगितिलौघैः स द्विरुक्तकरतालुतिलोऽभूत् ॥१९॥
पूतपाणिचरणः शुचिनोच्चैरध्वनाऽनितरपादहतेन ।
ब्रह्मचारिपरिचारिसुरार्चावेश्म राजऋषि रेषविवेश ॥ २० ॥

सम्यगिति । श्रुतिमन्त्राः शुद्धैर्बीजैर्विशदानि निर्मलानि स्फुटवर्णानि अक्षराणि येषान्ते शुद्धबीजाश्च ते विशदस्फुटवर्णाश्चेति विशेषणसमासः । श्रुतिमन्त्राः स्फाटिकस्याक्षवलयस्याक्षमालायाः छलं व्याजं भजन्ति ये स्फटिकाक्षवलयमपि शुद्धवलयमपि शुद्धबीजविशदवर्णा च भवति ते तादृशाः सन्तः सम्यग् यथा तथा जपतोऽस्य नलस्य कर एवाब्जे सन्निधानमभजन्त प्राप्ताः ॥ १८ ॥

पाणिरिति । अस्य नलस्य पाणेः पर्वणि यवः यवाकारा सद्रेखा देवे दैवसम्बन्धि तर्पणे यवानामर्पणं कर्म पुराख्यत् पुनरुक्त मकोरत् न्युप्यमानेन पितृभ्यो दीयमानेन पितृदानं निवापः स्यादित्यमरः । जलेन युज्यन्ते ये तैस्तिलानामोघैः समूहैर्द्विरुक्तः करतालुतिलः तिलाकाररेखा यस्य सोऽभूत् भाग्यवतां हस्ते यवाकाराश्च तिलाकाराश्च रेखा दृश्यन्ते ॥ १९ ॥

पूतपाणिरिति । एष राजर्षि र्नलः ऋत्यक इति प्रकृतिभावः । पूतौ पाणिचरणौ यस्य स तादृशः सन् ब्रह्मचारिव्यतिरिक्तानां पादैर्हतः क्षुण्णः इतरपादहत स्तादृशो न भवतीत्यनितरपादहतः तेन शुचिना शुद्धेन उच्चै रुन्नतेनाध्वना साधनेन ब्रह्मचारिणः परिचारका यत्र तत्सुरार्चावेश्म देवपूजागृहं विवेश प्रविष्टवान् ॥ २० ॥

क्वापि यन्नभसि धूपजधूमैर्मेचकागुरुभवैर्भ्रमराणाम्।
भूयते स्म सुमनः सुमनः स्रग्दामधामपटलेपटलेन ॥ २१ ॥
साङ्कुरेव रुचिपीततमा यैर्यैः पुरास्ति रजनीरजनीव।
ते धृता वितरितुं त्रिदशेभ्यो यत्र हेमलतिका इव दीपाः ॥२२॥
अङ्कचुम्बिघनचन्दनपङ्कं यत्र गारुडशिलाजममत्रम्।
प्राप केलिकवलीभवदिन्दोः सिंहिकासुतमुखस्य सुखानि ॥२३॥

क्वेति। यस्य सुरार्चावेश्मनो नभसि क्वापि कस्मिंश्चित्प्रदेशे सुमनःसुमनसां जातिकुसुमानां मालत्यां पण्डिते पुष्पे देवे चेतिविश्वः स्रग्दामभिनिर्मितस्य धाम्नो गृहस्य पटले तीव्रे मेचकागुरुभवैः धूपजधूमैः भ्रमराणां पटलेन समूहेन भूयते स्म भूतम् ॥ २१ ॥

साङ्कुरेति। रजनी रात्री यै र्दीपैः शुचिभि र्दीप्तिभिः साधनैः पीतं ग्रस्तं तमः अन्धकारं यस्यां सा रुचिपीततमा सती साङ्कुरा तेजोऽङ्कुरसहितेव पुरास्ति आसीत् पुरालुङ् स्म इति भूते लट्। रजनी रात्रि यै र्दीपैः रुचिभि र्दीप्तिभिः पीततमा अत्यर्थं पीतवर्णा सती साङ्कुरा न सप्ररोहा हरिद्रेव रजनी पुरास्ति रजनी नीतिकाचा हरिद्रायामिति विश्वः। हेमलतिका इव स्थिता स्ते दीपाः यत्र वेश्मनि त्रिदशेभ्यो वितरितुं धृता अर्पिताः ॥२२॥

अङ्केति। यत्र वेश्मनि अङ्के अन्तिके गारुडशिलाजं मरकतशिलाजं अमत्रं पात्रं अङ्कं चुम्बति स्पृशति यः घनः सान्द्रः चन्दनपङ्को यस्य तत्तादृशः सत् केलिना क्रीडया कवलीभवदिन्दोः तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति पुंवद्भावः। सिंहिकासुतमुखस्य राहुमुखस्य राहुकानन्दनो राहु रिति साधुः सुखानि प्राप प्राप्तवान् ॥ २३ ॥

गर्भमेणमदकर्द्दमसान्द्रं भाजनानि रजतस्य भजन्ति ।
यत्र साम्यमगमन्नमृतांशोरङ्करङ्ककलुषीकृतकुक्षेः ॥ २४ ॥
उज्जिहानसुकृताङ्कुरशङ्का यत्र धर्म्मगहने खलु तेने ।
भूरिशर्करकरम्भवलीनामालिभिः सुगतसौधसखानाम् ॥२५॥
खर्व्वमाख्यदमरौघनिवासं पर्व्वतं क्वचन चम्पकसम्पत् ।
मल्लिकाकुसुमराशिरकार्षीद् यत्र च स्फटिकसानुमनुच्चम् ॥२६॥
स्वात्मनः प्रियमपि प्रतिगुप्तिं कुर्व्वती कुलवधूमवजज्ञौ ।
हृद्यदैवतनिवेद्यनिवेशाद्यत्र भूमिरवकाशदरिद्रा ॥ २७ ॥

गर्भमिति। यत्र वेश्मनि रजतस्य भाजनानि एणमदकर्दमेन कस्तूरीयपङ्केन सान्द्रं गर्भं मध्यप्रदेशं भजन्ति प्राप्नुवन्ति अङ्केन चिह्नेन रङ्कुणा मृगेण कलुषीकृतः कुक्षि र्यस्यामृतांशो श्चन्द्रस्य साम्यं समतामगमन् गतानि ॥ २४ ॥

उज्जिहानेति। धर्मगहने धर्मारण्ये यत्र वेश्मनि सुगतस्य बुद्धस्य सौधानां चैत्यानां सखायः सदृशाः सुगतसौधसखाः राजाहःसखिभ्यष्टच्। तेषां भूरयः शर्कराः सितायेषु करम्भाणां दधिसक्तूनामेव करम्भा दधिसक्तव इत्यमरः। वलीनामालिभिः पङ्क्तिभिः कर्तृभिरुज्जिहानेषूद्गच्छत्सु सुकृताङ्कुरेषु पुण्यप्ररोहेषु शङ्का तेने कृता खलु ॥ २५ ॥

खर्वमिति। अत्र वेश्मनि क्वचन प्रदेशे चम्पकानां सम्पत्समृद्धिः अमरौघस्य देवसमूहस्य निवासं पर्वतं मेरुं खर्वं ह्रस्वं नाख्यत् उक्तवती मल्लिकाकुसुमानां राशिः स्फटिकसानुं कैलासं अनुच्चं ह्रस्व मकार्षीत् ॥ २६ ॥

स्वात्मन इति। यत्र वेश्मनि भूमिः पृथिवी हृद्यानां मनोज्ञानां दैवतानि देव्यानां देवोपहाराणां निवेशनात् स्थापनाद्धेतोरवकाशदरिद्रा निरवकाशा सती स्वात्मनः प्रियं भर्तारमपि प्रत्युद्दिश्य गुप्तिं गोपनं कुर्वन्ती कुलवधूमवयज्ञे ज्ञातवती तत्सदृशी जातेत्यर्थः ॥ २७ ॥

यत्र कान्तकरपीडितनीलग्रावरश्मिचिकुरासु विरेजुः ।
गातृमूर्द्धविधुतेरनुविम्बात् कुट्टिमक्षितिषु कुट्टमितानि ॥ २८ ॥
नैकवर्णमणिभूषणपूर्णे स क्षितीन्दुरनवद्यनिवेद्ये ।
अध्यतिष्ठदमलं मणिपीठं तत्र चित्रसिचयोच्चयचारौ ॥ २९ ॥
सम्यगर्चति नलेऽर्कमतूर्णं भक्तिगन्धिरसुनाऽकलि कर्णः ।
श्रद्दधानहृदयं प्रति चान्तः साम्बमम्बरमणिर्निरचैषीत् ॥ ३० ॥

यत्रेति । कान्तस्य चन्द्रकान्तस्य वल्लभस्य च कान्तोऽश्मनि प्रिये चापीति विश्वः । करेण किरणेन च बलि हस्तांशवः करा इत्यमरः । पीडितानां अनीलग्राव्णां इन्द्रनीलानां रश्मय एव दीप्तय एव चिकुराः केशा येषां तासु यत्र वेश्मनि कुट्टिमक्षितिषु निबद्धभूमिषु गातुर्गायकस्य मूर्द्धविधुतेः शिरःकम्पस्यानुबन्धाद्धेतोः कुट्टमितानि शृङ्गारचेष्टाविशेषा विरेजुः अत्र भरतमुनिः । केशस्तेनादरादिग्रहणेऽपि हर्षसम्भ्रमोत्थं कुट्टिमितमिति विज्ञेयं सुखं विदुः कोपचारिणेति ॥ २८ ॥

नैकेति । नैकवर्णैरनेकच्छायैः च्छाया सूर्यप्रिया कान्तिरित्यमरः । मणिभूषणैश्च पूर्णे अनवद्यानि निर्दोषाणि विनिवेद्यानि यत्र तस्मिन् चित्राणां सिचयानामुच्चयेन समूहेन चारौ चारुणि तत्र सुरार्चनवेश्मनि क्षितीन्दुः स नलः अमलं मणिपीठं अध्यतिष्ठत् अधिष्ठितवान् अधिशीङ्स्थासामपि करणस्य कर्मसंज्ञा ॥ २९ ॥

सम्यगिति । अतूर्णमव्यग्रं यथा भवति तथा नले अर्कं सम्यगर्चति असुना अर्केण कर्णो राधेयो भक्ते गन्धो लेशो यस्मिन् गन्धो गन्धक आमोदे लेशे सम्बन्धे गन्धयोरिति विश्वः । स भक्तिगन्धिरल्पभक्तिरकलि अल्पाख्यायामिति समासान्तः । अम्बरमणिः सूर्यः साम्बं कृष्णसुतञ्च श्रद्धानहृदयं प्रति चान्तः ईषद्दधानहृदयं सुपि नामार्थ इत्यव्ययीभावः निरचैषीत् ॥ ३० ॥

तत्तदर्य्यमरहस्यजपेषु स्रङ्मयः शयममुष्य बभाज ।
रक्तिमानमिव शिक्षितुमुच्चै रक्तचन्दनजवीजसमाजः ॥ २१ ॥

अर्चयन् हरकरं स्मितभाजा नागकेसरतरोः प्रसवेन ।
सोऽयमापयदतिर्य्यगवाग्दिक्पालपाण्डुरकपालविभूषाम् ॥२२॥

नीलनीररुहमाल्यमयीं स न्यस्य तस्य गलनालविभूषां ।
स्फाटिकीमपि तनुं निरमासीन्नीलकण्ठपदसान्वयतायै ॥२३॥

प्रीतिमेष्यति कृतेन ममेदृक्कर्म्मणा पुररिपुर्मदनारिः ।
तत्पुरः पुरमतोऽयमधाक्षीद्धूपरूपमथ कामशरञ्च ॥ २४ ॥

तदिति । तेषामर्यम्णः सूर्यस्य रहस्यानां मन्त्राणां जपेषु स्रङ्मयो मालामयो रक्तचन्दनजानां कुङ्कुमचन्दनोद्भवानां वीजानां नीलपर्णीत्व रक्ताङ्गं चन्दनन्तु कुचन्दन मित्यमरः । समाजः समूहः उच्चैरधिकं रक्तिमानं शिक्षितुमिव अमुष्य नलस्य शयं हस्तं बभाज प्राप्तवान् ॥ २१ ॥

अर्चयन्निति । सोऽयं स्मितभाजा नागकेसरतरोः वृक्षविशेषस्य प्रसवेन कुसुमेन साधनेन हरस्य शम्भोः करं हस्तं अर्चयन् तिरश्चिभ्यो दिग्भ्यः अवाच्याश्च दिशः अधरस्या अन्यां अतिर्यगवाचितां दिश मूर्ध्वां पालयति यः तस्य ब्रह्मणः पाण्डुरं कपालं तस्य भूषा मापयत् प्रापितवान् ॥ ३२ ॥

नीलेति । स नल स्तस्य हरस्य नीलनीररुहमाल्यमयी इन्दीवरदाम गलनालस्य विभूषां न्यस्य समर्प्य स्फाटिकीं स्फटिकमयी मपि तनुं शरीरं नीलकण्ठ इति पदस्य सान्वयतायै अन्वर्थत्वाय निरमासीत् कल्पितवान् माङ्माने इति धातो र्भौवादिकाल्लुङ् ॥ ३३ ॥

प्रीतिमिति । पुररिपुर्मदनारिः शम्भुः कृतेन ममेदृक्कर्मणा यतः प्रीतिमेष्यति अतः कारणादयं नल स्तस्य पुररिपो र्मदनारेश्च पुरः अग्रतः यथाक्रमं धूपरूपं गुग्गुलरूपं असुरपुरञ्च . पुरं पुरी शरीरे च

तन्मुहूर्त्तमपि भीमतनूजाविप्रयोगमसहिष्णुरिवायम् ।
शूलिमौलिशशिभीततयाऽभूद्ध्यानमूर्च्छननिमीलितनेत्रः ॥३५॥
दण्डवद्भुवि लुठन् स ननाम त्र्यम्बकं शरणभागिव कामः
आत्मशस्त्रविशिखासनबाणान् न्यस्य तत्पदयुगे कुसुमानि ॥३६॥
त्र्यम्बकस्य पदयोः कुसुमानि न्यस्य सैष निजशस्त्रनिभानि ।
दण्डवद्भुवि लुठन् किमु कामस्तं शरण्यमुपगम्य ननाम ॥३७॥
व्यापृतस्य शतरुद्रियजप्ये पाणिमस्य नवपल्लवशीलम् ।
भृङ्गभङ्गिरिव रुद्रपराक्षश्रेणिराश्रयत रुद्रपरस्य ॥ ३८ ॥

गुग्गुलौ मधुरः पुर इति विश्वः । अथानन्तरं कामशरं कर्पूरं मदनबाणञ्च अधाक्षीत् दग्धवान् ॥ २४ ॥

तदिति । अयं नलस्तं मुहूर्तं तस्मिन् मुहूर्ते कालाध्वनोरत्यन्तसंयोगे द्वितीया । शूलिनः शम्भोर्मौलिशशिनः सकाशाद्भीततया भीतत्वेन हेतुना भीमतनूजया दमयन्त्या विप्रयोगं विरहमसहिष्णुरिव ध्यानेनैव मूर्च्छनेन विनिमीलिते नेत्रे यस्य सोऽभूत् ॥ ३५ ॥

दण्डवदिति । आत्मनः स्वस्य शस्त्रमायुधं विशिखासनं धनुश्च बाणान्विशिखान् च कुसुमानि त्र्यम्बकस्य पदयोर्युगे न्यस्य शरणभाक्काम इव स नलो दण्डवद्भुवि लुठन् त्र्यम्बकं ननाम प्रणतवान् ॥ ३६ ॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह त्र्यम्बकस्येति । सएष कामः सएष मदनः सोऽचि लोपे चेत्पादपूरणमित्यत्र श्लोकपादस्यापि ग्रहणमिष्यत इति सोलोप वृद्धिः । निजशस्त्रनिभानि स्वायुधसदृशानि त्र्यम्बकस्य पदयोर्न्यस्य समर्प्य भुवि दण्डवल्लुठन् मनसिजेन शरण्यं त्र्यम्बकमुपगम्य प्राप्य ननाम किमु ? ॥ २७ ॥

व्यापृतस्येति । रुद्रपरस्य रुद्रपरायणस्य शतरुद्रियस्य मन्त्रस्य नामादे पदे त्यघो शतरुद्राः सन्त्यस्येति यत् जप्ते जपे नपुंसके भावे क्तः घाविश्चेति चकारादिव स्वदादिजयश्चारीत्यत्र जप्तं त्वादितश्चेति चकार-

उत्तमं स महति स्म महीभृत् पूरुषं पुरुषसूक्तविधानैः ।
द्वादशापि च स केशवमूर्त्तीर्द्वादशाक्षरमुदीर्य्य ववन्दे ॥ ३९ ॥
मल्लिकाकुसुमडुण्डुभकेन स भ्रमीवलयितेन कृते तम् ।
आसने निहितमैक्षत साक्षात् कुण्डलीन्द्रतनुकुण्डलभाजम् ॥४०॥
मेचकोत्पलमयी बलिबन्धुस्तद्बलिस्रगुरसि स्फुरति स्म ।
कौस्तुभाख्यमणिकुट्टिमवास्तुश्रीकटाक्षविकटायितकोटिः ॥ ४१ ॥

स्यात्तुल्यसत्त्वयार्थत्वादस्वत्ववदित्याहुरिति भट्टक्षीरस्वामी। तथा च जपिवमिस्यां वेति महोपाध्यायवर्धमानसूत्रम्। व्यापृतस्य व्यापारवतोऽस्य नलस्य नवपल्लवस्येव लीला विलासो यस्य तं पाणिं रुद्रपरात्तु परेषा सुपरितनानामक्षराणां श्रेणी रुद्राक्षमाला भृङ्गाणां भङ्गिः प्रकारो मालेवाश्रयत श्रितवती ॥ ३८ ॥

उत्तममिति। स महीभृन्नलः उत्तमं पूरुषं पुरुषसूक्तस्य विधानैः विधिभिर्महति स्म पूजितवान् स नलो द्वादशाक्षरं मन्त्रमुदीर्य द्वादशापि च केशवस्य मूर्तीर्ववन्दे ॥ ३९ ॥

मल्लिकेति। स नलो भ्रमी वलयितेन वलयीकृतेन मल्लिकाकुसुमानां डुण्डुभकेन डुण्डुभाकारया मालया समौ राजिलडुण्डुभावित्यमरः। कृतेति कृताविति कनृ। मल्लिकाकुसुमडुण्डुभकेन भ्रमीवलयितेन कृते तमित्यत्र पादान्तगुरुत्वं छन्दःशास्त्रेऽभ्युपगम्यते कृते आसने निहितं उत्तमं पुरुषं कुण्डलीन्द्रस्य शेषस्य सम्बन्धिन्या तनोः शरीरस्य कुण्डलं वलयं भजति प्राप्नोति यस्तं साक्षादैक्षत ॥ ४० ॥

मेचकेति। बलेरसुरविशेषस्य बन्धुः सखा तस्य बलिनः बन्धोः स्रक् विष्णोरुरसि मेचकोत्पलमयी तस्य नलस्य बलिस्रक् पूजामाल्यं बलिः पूजोपहारः स्यात् बलिर्दैत्ये बलिः कर इति विश्वः। कौस्तुभाख्यं कौस्तुभरत्नमेव मणिकुट्टिमं मणिनिबद्धं वास्तु वेश्मभूर्यस्यास्तस्याः श्रियो

स्वर्णकेतकशतानि स हेम्नः पुण्डरीकघटनां रजतस्य ।
मालयाऽरुणमणेः करवीरं तस्य मूर्ध्नि पुनरुक्तमकार्षीत् ॥४२॥
नाल्पभक्तबलिरन्ननिवेद्यैस्तस्य हारिणमदेन स कृष्णः ।
शङ्खचक्रजलजातवदर्चः शङ्खचक्रजलपूजनयाऽभूत् ॥ ४३ ॥
राज्ञि कृष्णलघुधूपजधूमाः पूजयत्यहिरिपुध्वजमस्मिन् ।
निर्ययुर्भवष्टता भुजगा श्रीदुर्यशोमलिनिता इव जालैः ॥ ४४ ॥

लक्ष्म्याः कटाक्षेणापाङ्गदर्शनेन विकटायिताः विशालीभूताः कोटयो यस्याः सा तादृशी सती स्फुरतिस्म शुशुभे ॥ ४१ ॥

स्वर्णेति । तस्य विष्णोर्मूर्ध्नि स्वर्णकेतकानां शतानि हेम्नः सुवर्णस्य मालया पुण्डरीकाणां सिताम्भोजानां घटनां रचनां रजतस्य मालया करवीरं कुसुमं अरुणमणेः पद्मरागस्य मालया साधनेन पुनरुक्तमकार्षीत् कृतवान् पुनरुक्तां पुनरुक्तञ्चेति नपुंसकमनपुंसकेत्यादिना एकवद्भावः ॥ ४२ ॥

नेति । नाल्पभक्तोऽधिकभक्तो बलिरसुरविशेषो यस्य स विष्णुरन्ननिवेद्यैरुपहारैः नाल्पो महान् भक्तः बलिरन्नोपहारो यस्य भक्तमन्धोऽन्नमित्यमरः । सोऽभूत् नाम्ना कृष्णः स विष्णुः हारिणमदेन कस्तूर्या कृष्णः कृष्णवर्णोऽभूत् कृष्णोवर्णे हरौ ध्वांक्षे पिके व्यासे एकोऽर्जुन इत्यजयपालः । शङ्खं चक्रं सुदर्शनं जलजातं पद्मञ्च तद्वदर्चा प्रतिमा यस्य स विष्णुः शङ्खानां चक्रे समूहे चक्रे सैन्ये रथाङ्गे च राष्ट्रे दम्भान्तरे च ये । आयुधाः सलिलावर्ता इत्युभयथाप्यजयपालः । जलेन या पूजना तया शङ्खचक्रजलेन जातश्चेति अर्चा पूजा अर्चा यस्य अर्चा पूजा प्रतिमयोरिति विश्वः । सोऽभूत् ॥ ४३ ॥

राज्ञीति । अस्मिन् राज्ञि नले अहिरिपुर्गरुडो ध्वजो लाञ्छनं यस्य तं विष्णुं पूजयति सति अहिरिपुभिया यद्दुर्यशः तेन मलिनिता

अर्घ्यनिस्वमणिमाल्यविमिश्रैः स्मेरजातिमयदामसहस्रैः ।
तं पिधाय विदधे बहुरत्नक्षीरनीरनिधिमग्नमिवैषः ॥ ४५ ॥
अक्षसूत्रगतपुष्करवीजश्रेणिरस्य करसङ्गमेत्य ।
शौरिसूक्तजपितुः पुनरापत् पद्मसद्मचिरवासविलासम् ॥ ४६ ॥
कैटभारिपदयोर्नतमूर्द्धा सञ्जिता विचकिलस्रगनेन ।
जह्नुजेव भुवनप्रभुणाऽभात् सेविताऽनुनयताऽऽयतमाना ॥ ४७ ॥
स्वानुरागमनघः कमलायां सूचयन्नपि हृदि न्यसनेन ।
गौरवं व्यधित वागधिदेव्याः श्रीगृहोर्ध्वनिजकण्ठनिवेशात् ॥४८

मलिनीकृता भवेन शम्भुना धृता भुजगा इव कृष्णा लघवो धूपजा धूमाः जालैः गवाक्षै र्निर्ययु र्निर्गताः ॥ ४४ ॥

अर्घ्येति । एष नलोनिस्वानां मूल्यदरिद्राणां मणिमाल्यानां माल्यैः विमिश्रैः मिश्रणितैः स्मेराणां विकसितानां जातिमयदाम्नां मालतीकुसुमस्रजां सहस्रैः तं विष्णुं पिधायाच्छाद्य बहुरत्नक्षीरनीरनिधौ दुग्धाब्धौ मग्नमिव विदधे ॥ ४५ ॥

अक्षसूत्रेति । शौरिसूक्तस्य जपितुर्नलस्य करसङ्गं सम्बन्धमेत्य अक्षसूत्रगतानां पुष्करवीजानां श्रेणिर्माला पद्ममेव सद्म तत्र चिरनिवासस्य बहुकालावस्थिते र्विलासं पुनरापत् प्राप्तवती ॥ ४६ ॥

कैटभारीति । सञ्जिता समर्पिता कैटभारे र्विष्णोः पदयोश्चरणयो रायतं दीर्घं मानं प्रमाणं आयतो दीर्घोमान ईर्ष्याकोपश्च यस्या मान प्रमाणे मायादौ मान श्चित्तोन्नतौ स्मृत इति विश्वः । सा विचकिलस्रक् मल्लिकामाला नतो मूर्द्धा यस्य तेनानुनयता प्रसादयता अनेन भुवनप्रभुणा लोकनाथेन नलेन जलेश्वरेण समुद्रेण च भुवनं विपिने तोय इवि विश्वः । सेविता सती जह्नुजेवाभात् ॥ ४७ ॥

स्वेति । अनघो निर्दोषो विष्णुः हृदि वक्षसि न्यसनेनार्पणेन कमलायां लक्ष्म्यां स्वानुरागं सूचयन्नपि श्रीगृहाल्लक्ष्मीनिवासादुच्चः ऊर्द्ध्वे निजे

इत्यवेत्य वसुना बहुनाऽपि प्राप्नुवन्न मुदमर्चनया सः।
सूक्तिमौक्तिकमयैरथ हारैर्भक्तिमैहत हरेरुपहारैः ॥ ४९ ॥
दूरतः स्तुतिरवाग्विषयस्ते रूपमस्मदभिधास्तव निन्दा।
तत् क्षमस्व यदहं प्रलपामीत्युक्तिपूर्वमयमेतदवोचत् ॥ ५० ॥
स्वप्रकाश ! जड एव जनस्ते वर्णनं यदभिलष्यति कर्त्तुम्।
नन्वहर्पतिमहः प्रति स स्यान्न प्रकाशनरसस्तमसः किम् ॥ ५१ ॥
नैव वाङ्मनसयोर्विषयो भूस्त्वां पुनर्न कथमुद्दिशतां ते।
उल्कचातकयुगस्य घनः स्यात् तृप्तये घनमनाप्नुवतोऽपि ॥ ५२ ॥

कण्ठे निवेशाद्धेतोर्वागधिदेव्या वाग्देवतायाः गौरवं पूजां व्यधित कृतवान् ॥ ४८ ॥

इतीति। स नलः इति पूर्वोक्तप्रकारेणावेत्य ज्ञात्वा बहुनापि वसुना धनेन च मुदं प्रीतिं नाप्नुवन् सूक्तिमौक्तिकमयैर्हारैरुपहारैश्च भक्तिमैहत हरिभक्तिमैच्छत् ॥ ४९ ॥

दूरत इति। इति स्तुतिः दूरतः दूरे तव रूपमवाग्विषयः अस्मदभिधा अस्मदीया स्तुतिर्निन्दा तत्तस्मात्कारणादहं प्रलपामि अनर्थकं वच्मि ततः क्षमस्वेत्युक्तिः पूर्वं यस्मिन् तद्यथा भवति तथा अयं नलः एतद्वक्ष्यमाणमवोचत् उक्तवान् ॥ ५० ॥

स्वेति। हे स्वप्रकाश ! स्वयंप्रकाश ! विष्णो ! जडो मूढ एव जनः ते तव वर्णनं कर्तुं अभिलष्यति वाञ्छति ननु विष्णो ! अहर्पतेः सूर्यस्य महः तेजः प्रति लक्षीकृत्य तमसः अन्धकारस्य प्रकाशने रसो वाञ्छा न स्यात्किं अपितु स्यादेवेत्यर्थः ॥ ५१ ॥

नेति। हे विष्णो ! मम वाङ्मनसयोरचतुरेत्यादिना साधुः। विषयो गोचरो नैव भूः तथापि ते वाङ्मनसे त्वां कथं न उद्दिशतां न वर्णयतां दिश अतिसर्ज्जने इत्यस्माद्धातोर्लोटि रूपं। तथा हि घनं

छद्ममत्स्यवपुषस्तव पुच्छास्फालनाज्जलमिवोद्धृतमब्धेः ।
श्वैत्यमेत्य गगनाङ्गणसङ्गादाविरस्ति विबुधालयगङ्गा ॥५३॥
भूरिसृष्टिधृतभूवलयानां पृष्ठसीमनि किणैरिव चक्रैः ।
चुम्बिताऽवतु जगत् क्षितिरक्षाकर्म्मठस्य कमठस्तव मूर्त्तिः ॥५४
दिक्षु यत्खुरचतुष्टयमुद्रामभ्युपैमि चतुरोऽपि समुद्रान् ।
तस्य पोत्रिवपुषस्तव दंष्ट्रातुष्टयेऽस्तु मम वास्तु जगत्याः ॥ ५५ ॥
उद्धृतिस्तव यदिलापरिरम्भाल्लोमभिर्बहिरितैर्बहुहृष्टैः ।
ब्राह्ममण्डमभवद्विलनीपं केलिकोल ! तव तत्र न मातुः ॥ ५६॥

मेयं अनाप्नुवतः अलभमानस्यापि उत्कयोद्वृत्तकयो सातकयो र्युगस्य द्वन्द्वस्य तन्मये घनो मेघः स्यात् ॥ ५२ ॥

छद्मेति । हे विष्णो ! छद्मना कपटेन मत्स्यो मीनो वपुः शरीरं यस्य तव पुच्छस्यास्फालनात्ताड़नाद्धेतो रब्धे रूर्ध्वमुद्धृत मुत्क्षिप्तं जलं कर्त्तृ गगनस्याङ्गणेन सङ्गात् श्वैत्यं श्वेतत्वमेत्य विबुधालयगङ्गा स्वर्णदी भूत्वा आविरस्ति प्रादुर्भवतीति उद्धृता ह्यापो धवला दृश्यन्ते ॥ ५३ ॥

भूरीति । पृष्ठसीमनि पृष्ठप्रदेशे भूरिषु बह्वीषु सृष्टिषु धृतानां भूवलयानां किणैर्मांसग्रन्थिभिरिव चक्रैः चक्राकारराजिभिः चुम्बिता स्पृष्टा क्षितेरक्षायां कर्म्मठस्य कुशलस्य कर्म्मणि घटोरच्। तव कमठो मूर्त्ति र्जगदवतु रक्षतु ॥ ५४ ॥

दिक्ष्विति । हे विष्णो ! दिक्षु चतसृषु चतुरश्चतुःसङ्ख्याकानपि समुद्रान् खुराणां चतुष्टयस्य पद मभ्युपैमि जानामि तस्य पोत्रिणो वराहस्य वपुष स्तव जगत्या मम वास्तु वेश्मस्थानं दंष्ट्रातुष्टये मम अस्तु ॥ ५५ ॥

उद्धृताविति । केलिकोल ! क्रीड़ावराह । तत्र ब्रह्माण्डे न मातुरवकाशमलभमानस्य मनः षष्ठ्येकवचनरूपं । तवोद्धृतौ उद्धरणे स्खलन्त्या

दानवौघगहनप्रभवस्त्वं सिंह ! मा भव रवैर्घनघोरैः ।
वैरिदारिदिविषत्सुकृतास्त्रग्रामसम्भवभवन्मनुजार्द्धः ॥ ५७ ॥
दैत्यभर्त्तुरुदरान्धुनिविष्टां शक्रसम्पदमिवोद्धरतस्ते ।
पातु पाणिरुहपञ्चकमस्मांश्छिन्नरज्जुनिभलग्नतदन्त्रम् ॥५८॥
स्वेन पूर्यत इयं सकलाशा भो ! बलेन मम किं भवतेति ।
त्वं वटुः कपटवाचि पटीयान् देहि वामन ! मनःप्रमदं नः ॥५९॥

इलाभूमेरुर्व्याः परिरम्भाद्धेतोः बद्धं यथा भवति तथा हृष्टैर्विकसितैः बहिर्ब्रह्माण्डस्य बहिर्गतैः लोमभिः साधनैः ब्राह्मखण्डं ब्रह्माण्डं बलिनीपं पूजाकदम्बकुसुमं अभवत् ॥५६॥

दानवेति । हे सिंह ! विष्णो ! वैरिणः शत्रून् दानवान् दारयन्ति यानि तेषां दिविषत्सुकृतानां देवपुण्यानामेवास्त्राणां आयुधानां ग्रामे समूहे संसदि च सम्भव उत्पत्तिर्यस्य स भवतस्तत्र मनुजस्य नरस्य अर्द्धो भागो यस्य तत्तादृशः सन् दानवानां ओघः समूह एव गहने प्रभव उत्पत्तिर्यस्य स त्वं घनैः सान्द्रैर्घोरैः भयङ्करैः रवैर्ध्वनिभिर्मा भव रव ॥ ५७ ॥

दैत्येति । हे नरसिंह ! दैत्यभर्तुर्हिरण्यकशिपोः उदर एवान्धौ कूपे पुंस्येवान्धुः प्रहिः कूप इत्यमरः । निविष्टां शक्रसम्पदं उद्धरत एव ते तव छिन्नरज्जुनिभानि खण्डितदामसदृशानि तस्य लग्नानि तस्य दैत्यभर्तुरन्त्राणि यस्य औणादिकः क्रुप्रत्ययः । अन्त्रम्पुरीतदित्यमरः । तत्पाणीनामेव सृणीनामङ्कुशानां पञ्चकम्पातु कूपे हि पतितानां न्युदञ्चनादीन्यङ्कुशाकारेणोद्ध्रियन्ते ॥ ५८ ॥

स्वेनेति । भो ! बलेन सकला इयमाशा मनोरथो भवता त्वया स्वेन धनेन पूर्यते अवश्यं पूरणीयेत्यर्थः । अन्यच्च भो ! राजन्नियं सकला सर्वाशा दिशा तृष्णा दिशोः प्रोक्तेति विश्वः । स्वेनात्मीयेन बलेन सामर्थ्येन कर्त्रा पूर्यते मम भवता किं प्रयोजनमित्येवं रूपायां कपटवाचि छद्मवचने

दानवारिरसिकाय विभूतेर्वश्मि तेऽस्मि सुतरां प्रतिपत्तिम् ।
इत्युदग्रपुलकं बलिनोक्तं त्वां नमामि कृतवामनमायम् ॥ ६० ॥
भोगिभिः क्षितितले दिविवासं बन्धमेष्यसि चिरं ध्रियमाणः ।
पाणिरेष भुवनं वितरेति छद्मवाग्भिरव वामन ! विश्वम् ॥ ६१ ॥
आश्रयस्य विहृतिः क्रियते किं दित्सुरस्मि हि भवच्चरणेभ्यः ।
विश्वमित्यभिहितो बलिनाऽस्मान् वामन ! प्रणतपावन ! पायाः॥६२

पटीयान् पटुः त्वं हे वामन ! विष्णो ! नः अस्माकं मनसः प्रमदं हर्षं देहि कुरु ॥ ५८ ॥

दानवारीति। हे वामन ! दानस्य वारिणोरसिकाय वाञ्छकाय ते तुभ्यं विभूतेः सम्पत्तेः प्रतिपत्तिं दानं सुतरामत्यर्थमप्यहम् अस्मीत्येतदव्ययं अस्मि त्वमहमर्थेऽस्मि कामये वश कान्तावित्यस्य लडुत्तमपुरुषैकवचनम्। अन्यच्च, हे वामन ! त्वं दानवानामसुराणां अरिः शत्रुर्विष्णुरसि सुतरामत्यर्थन्ते कार्यं विभूतेः सम्पत्तेः प्रतिपत्तिं ज्ञानञ्चास्मि । अहमस्मि कामये इत्यनेन प्रकारेण उदग्राः पुलकाः यस्मिन् तद्यथा भवति तथा बलिना दानवेन्द्रेणोक्तं कृता वामनरूपा माया येन तं त्वां नमामि ॥ ६० ॥

भोगिभिरिति। हे बले ! क्षितितले भूलोके दिवि स्वर्गे चिरं बहुकालं वासं ध्रियमाणस्तिष्ठन् धृङ् अवस्थाने इत्यस्य रूपं येन चिरम्भोगिभिः भोगः सुखं तद्वद्भिः सह सम्बन्धं सख्यमेष्यसि एष पाणिर्हस्तो भुवनं जलं वितर देहि अन्यच्च, हे बले ! क्षितितले रसातले पाताल एव दिवि स्वर्गे भोगिभिः सर्पैर्वासं अधः स्वरूपयोरस्त्री तलमित्यमरः। चिरं स्थितिमेष्यसि एष पाणिर्भुवनं लोकं भुवनं विष्टपे तोय इत्यजयपालः। वितरेत्यनेन प्रकारेण छद्मवाग्भिः कपटवचनैः हे वामन ! विश्वमव रक्ष ॥ ६१ ॥

आश्रयस्येति। हे वामन ! श्रयस्य हस्तस्य विहृतिर्विस्तृतिः आः क्रियते किं आ इति वाक्योपक्रमे आः प्रगृह्य स्मृतौ वाक्येऽपीत्यमरः। भवतश्चरणेभ्य स्त्रिभ्यश्चरणेभ्यो विश्वं जगत् दित्सुर्दातुमिच्छुरस्मि हि अन्यच्च. हे

क्षत्रजातिरुदियाय भुजाभ्यां या तवैव भुवनं सृजतः प्राक् ।
जामदग्न्यवपुषस्तव तस्यास्तौ लयार्थमुचितौ विजयेताम् ॥६३॥
पांशुला बहुपतिर्नियतं या वेधसाऽरचि रुषा नवखण्डा ।
तां भुवं कृतवतो द्विजभुक्तां युक्तकारितरता तव जीयात् ॥६४॥

वामन ! आशयस्य अभिप्रायस्छन्द आशय इत्यमरः । विवृतिः विवरणं किमर्थं क्रियते भवच्चरणेभ्यः पूजिताय भवते विश्वं दित्सुरस्मि इत्यनेन प्रकारेण बलिना दानवेन्द्रेण अभिहितः उक्तः त्वं प्रणतानां पावन ! हे वामन ! अस्मान् पायाः पारक्षण इत्यस्य आशिषि लिङि मध्यमपुरुषैकवचनम् ॥ ६२ ॥

क्षत्रेति । हे विष्णो ! प्राग्भुवनं सृजतस्तव दोर्भ्यां द्विभुजाभ्यां सकाशात् या क्षत्रजातिरुदियाय उद्भूता बाहुभ्योराजन्यः कृत इति श्रुतेः । जामदग्न्यः परशुरामो वपुर्यस्य तव तस्याः क्षत्रजातेर्लयार्थं उचितौ कार्यं हि कारणे लीनं भवतीत्यौचित्यन्तौ भुजौ विजयेतां विपराभ्याञ्जेस्तङादेशः ॥ ६३ ॥

पांशुलेति । हे जामदग्न्य ! विष्णो ! या भूः पांशुला रजोयुक्ता स्वैरिणी च नग पांशु पाण्डुभ्यश्चेति मत्वर्थीयो लच् । स्वैरिणी पांशुला च स्यादित्यमरः । नियतन्ध्रुवं बहवः पतयः पारिचारिकाः पक्षे काराश्च यस्याः सा बहुपतिः सती वेधसा ब्रह्मणा रुषा कोपेन हेतुना नवसङ्ख्याकानि खण्डानि भारतादीनि वर्षाणि शकलानि यस्याः सा अरचि रचिता तां भुवं द्विजैः ब्राह्मणैः पक्षिभिश्च दन्तविप्राण्डजा द्विजा इत्यमरः । भुक्ताम् अनुभूतां कृतवतस्ते तव युक्तकारितरता जीयात् जयतु बहुपतिबन्धका हि स्त्री भर्त्रा खण्डशः कृत्वा क्षिप्ता पक्षिभिः खाद्यते अत्र स्मृतिः गुरुन् दारयति गुरुर्निजापत्यप्रमापिणी । विकला करनासौष्ठी कृत्वा गोभिः प्रमापयेदिति ॥ ६४ ॥

कार्तवीर्येति । हे रैणुकेय ! रेणुकापत्य ! विष्णो ! स्त्रीभ्योढक् । कार्तवीर्यस्य भिदुरेण नाशकेन भिदः कर्तरि कुरच् । भवता दशास्य

कार्त्तवीर्य्यभिदुरेण दशास्ये रैणुकेय ! भवता सुखनाश्ये ।
कालभेदविरहादसमाधिं नौमि राम ! पुनरुक्तिमहं ताम् ॥ ६५ ॥
हस्तलेखमसृजत् खलु जन्मस्थानरेणुकमसौ भवदर्थम् ।
राम ! रामसधरीकृततत्तल्लेखकः प्रथममेव विधाता ॥ ६६ ॥
उद्भवाज तनुजादज ! कामं विश्वभूषण ! न दूषणमत्र ।
दूषणप्रशमनाय समर्थं येन देव ! तव वैभवमेव ॥ ६७ ॥
नो ददासि यदि तत्त्वधियं मे यच्छ मोहमपि तं ! रघुवत्स !
येन रावणचमूर्युधि मूढा तन्मयं जगदपश्यदशेषम् ॥ ६८ ॥

रावणे सुखमनायासं यथा भवति तथा नाश्ये सति रावणञ्जितवतः कार्तवीर्यस्य योजेता तस्य रावणः सुखनाश्य एव भवति कालभेदस्य विरहादसमाधिं परिहारहीनन्ते तव रामेण दाशरथिना पुनरुक्तिमहं नौमि ॥ ६५ ॥

हस्तेति। हे राम ! दाशरथे ! अधरीकृतास्तिरस्कृतास्ते ते लेखकाः लिपिकारा लेखा देवाश्च येन सः अधरीकृततत्तल्लेखकः देवपक्षे शेषाद्विभाषेति कप् समासान्तः। तादृशोऽसौ विधाता जन्मस्थानं रेणुर्यस्य तं रामं परशुरामं भवदर्थं हस्तलेखमसृजत् सृष्टवान् खलु लेखको हि कौशलसिद्ध्यर्थमादौ लेखान्तराणि लिखित्वा क्षिपति ॥ ६६ ॥

उद्भवेति। न जायत इत्यज ! विष्णो ! अजस्य पुत्रस्य तनूजाद्दशरथात् कामं यथेच्छ उद्भव जायस्व भवतेर्लोटि सिपि रूपं। हे विश्वभूषण ! अत्रास्मिन्नजस्य तव तनुजोद्भवनेन दूषणं नास्ति कुत इत्याशयेन हेतुना देव ! तव वैभवमेव दूषणस्य कलङ्कस्य राक्षसविशेषस्य प्रशमनाय तापनाय समर्थम् ॥ ६८ ॥

नेति। हे रघुवत्स ! रघुनन्दन ! विष्णो ! मे मह्यं तत्त्वे ब्रह्मणि धियं बुद्धिं नो ददासि तर्हि येन मोहेन युधि युद्धे रावणस्य चमूः सेना मूढा भ्रान्ता अशेषं जगत् तन्मयं रामात्मकमपश्यत् तं मोहमपि मे मह्यं यच्छादेहि ॥ ६९ ॥

आज्ञया च पितुरज्ञभिया च श्रीरहीयत महीप्रभवा द्विः ।
लङ्घितश्च भवता किमु न द्विर्वारिराशिरुदकाङ्कगलङ्कः ॥ ६९ ॥
कामदेवविशिखैः खलु नेशं साऽर्पयज्जनकजामिति रक्षः ।
दैवतादमरणे वरवाक्यं तथ्ययत् स्वमपुनाद्भवदस्त्रैः ॥ ७० ॥
तद्यशो हसति कम्बुकदम्बं शम्बुकस्य न किमम्बुधिचुम्बि ।
नामशेषितससैन्यदशास्यादस्तमाप यदसौ तव हस्तात् ॥ ७१ ॥
इष्टदारविरहौर्वपयोधिस्त्वं शरण्य ! शरणं स ममैधि ।
लक्ष्मणक्षणवियोगकृशानौ यः स्वजीविततृणाहुतियज्वा ॥ ७२ ॥

आज्ञयेति। हे विष्णो! राम! पितुर्दशरथस्याज्ञया वनं गच्छेत्येवंरूपया च अज्ञभिया मिथ्यापवादकरेभ्यो मूढेभ्यः सकाशाद्भिया च महीप्रभव उत्पत्तिस्थानं यस्याः सा श्रीराज्यलक्ष्मीः सीता च द्विर्द्विवारं ना हीयत परित्यक्ता एव उदकस्याङ्कं समीपं गच्छन्ती या सा लङ्का यस्य स वारिराशिः शतसमूहश्च भवता द्विर्न लङ्घितः किमु? अपि तु लङ्घितएव ॥ ६९ ॥

कामेति। हे राम! विष्णो! जनकजां सीतामर्पयद्ददत् यदहं कामदेवस्य मन्मथस्य विशिखैर्बाणैर्मा नेशं मा ग्लानिं प्रापं नशेः पुषादित्वान्नशिमन्योरचि एत्वं वक्तव्यात् नमाङ्योग इत्यड्भावः। दैवतादमरणे मरणाभावे विषये वरवाक्यं दैवस्य सर्गस्य वध्यत्वं न गमिष्यसीत्येवं रूपं तथ्ययत्तथ्यं कुर्वद्रक्षो रावणो भवतः तव अस्त्रैः स्वमात्मानमपुनात् पूतवान् ॥ ७० ॥

तदिति। हे राम! विष्णो! नामशेषितः कथामात्रशेषितः ससैन्यः सैन्यसहितः दशास्यो रावणो येन तस्मात्तव हस्तादसौ शम्बुकोयदस्तमदर्शनं नाश माप शम्बुकस्य शूद्रमुनिविशेषस्य अम्बुधिचुम्बि यशः कम्बूनां कदम्बं कर्म न हसति किं अपितु हसत्येवेत्यर्थः ॥ ७१ ॥

इष्टेति। हे शरण्य! राम! यस्त्वं लक्ष्मणस्य सौमित्रेः क्षणवियोगएव कृशानौ अग्नौ स्वजीवितस्यैव तृणस्याहुत्या यज्वा इष्टवान्

क्रौञ्चदुःखमपि वीक्ष्य शुचा यः श्लोकमेकमसृजत् कविराद्यः ।
स त्वदुत्थकरुणः खलु काव्यं श्लोकसिन्धुमुचितं प्रववन्ध ॥७३॥
विश्रवःपितृकयाशुमनर्हं सश्रवस्त्वमनयेत्युचितज्ञः ।
त्वं चकर्त्तिथ न शूर्पणखायाः लक्ष्मणेन वपुषा श्रवसी वा॥७४
ते हरन्तु निर्ऋतिव्रततिं मे यैः स कल्पविटपी तव दोर्भिः ।
छद्मयादवतनोरुदपाटि स्पर्द्धमान इव दानमदेन ॥ ७५ ॥

रघुजोः कनिष् स त्वमिष्टदाराणां सीतायाः सम्बन्धि विरहस्य और्वस्येव पयोधिः सन् मम शरणं रक्षिता एधि भव प्रेयसीभ्यो भ्रातृस्नेहो गरीयानिति तात्पर्य्यम् ॥ ७२ ॥

क्रौञ्चेति । हे राम ! विष्णो ! आद्यः कविः वाल्मीकिः क्रौञ्चयोर्दुःखमपि वीक्ष्य शुचा एकं श्लोकं मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत् क्रौञ्चमिथुनादेकमवधीः काममोहितमिति असुं श्लोकमसृजत् सृष्टवान् स आद्यः कविः त्वदुत्था भवदुद्भवा करुणा यस्य तादृशः सन् काव्यं श्लोकसिन्धुमुचितं यथा भवति तथा प्रववन्ध ॥ ७३ ॥

विश्रव इति । हे राम ! विष्णो ! विश्रवाः पिता तस्याः सा विश्रवःपितृका नद्यृतश्चेति कप् समासान्तः । तया अनया शूर्पणखया सश्रवस्त्वं श्रोत्रसहितत्वं आप्तुमनर्हमित्युचितज्ञः सन् लक्ष्मणेन वपुषा शूर्पणखायाः श्रवसी श्रोत्रे किं वा न चकर्तिथ किं न कृत्तवानसि ॥ ७४ ॥

त इति । हे विष्णो ! कृष्ण ! छद्मयादवतनोः लीलास्वीकृतयादवशरीरस्य तव यैर्दोर्भिः दानमदेन त्यागदर्पेण हेतुना स्पर्धमान इव स्थितः सन् कल्पविटपी पारिजातः उदपाटि उत्पाटितः ते दोषौ भुजौ मे मम सम्बन्धिनि निर्ऋतिमलक्ष्मीमेव व्रततिलतां स्यादलक्ष्मीस्तु निर्ऋतिरित्यमरः । वल्लीतु व्रततिर्लतेत्यमरः । हरन्तु । कृष्णेनोत्पाटितः पारिजात इति पौराणिकी कथात्रानुसन्धेया ॥ ७५ ॥

बालकेलिषु तदा यदलावीः कर्परीभिरभिहत्य तरङ्गान् ।
भाविबाणभुजभेदनलीलासूत्रपात इव पातु तदस्मान् ॥ ७६ ॥
कर्णशक्तिविफलां खलु कर्तुं सज्जितार्जुनरथाय नमस्ते ।
केतनेन कपिनोरसि शक्तिं लक्ष्मणं कृतवता हृतशल्यम् ॥ ७७ ॥
नापगेयमनयः सशरीरं द्यां वरेण नितरामपि भक्तम् ।
मा स्म भूत् सुरवधूसुरतज्ञो दिव्यपि व्रतविलोपभियेति ॥ ७८ ॥

बालेति । हे विष्णो ! कृष्ण ! तदा तस्मिन् समये बालकेलिषु शिशुक्रीडासु कर्परीभिः कलशलवैः अपचयविवक्षायां स्त्रीत्वं। स्त्री स्यात्काचिन्मृणाल्यादि विवक्षापचये यदिति । अभिहत्य तरङ्गानूर्मीन् यदलावीः लूनवानसि शिशवो हि खर्परखण्डैस्तरङ्गान् छिन्दन्ति तत्तरङ्गलवनकर्त्तृ भाविन्या भविष्यन्त्या बाणस्यासुरविशेषस्य भुजानां भेदनस्येव लीलायाः सूत्रपात इव स्थितमस्मान् पात्ववतु ॥ ७६ ॥

कर्णेति । हे विष्णो ! कृष्ण ! उरसि शक्तिरायुधविशेषो यस्य तं आमूर्धमस्तकात् स्वाङ्गादकाम इति सप्तम्यलुक् । च यं सौमित्रिं हृतं शल्यं यस्मात्तं कृतवता केतनेन लाञ्छनेन कपिना हनूमता कर्णस्य राधेयस्य शक्तिं कासू सामर्थ्ययोः शक्तिरित्यमरः । अफलं वन्ध्यं कर्तुं सज्जितोऽर्जुनरथो येन तस्मै ते तुभ्यं अर्जुनस्य सारथये नमोऽस्तु ॥ ७७ ॥

नेति । हे विष्णो ! कृष्ण ! व्रतस्य ब्रह्मचर्यस्य भीष्मो हि यावच्छरीरे ब्रह्मचर्यं सङ्कल्पितवान् विलोपात् तत्सकाशाद्भिया हेतुना दिवि स्वर्गेऽपि सुरवधूनां रम्भादीनां सुरतस्य सम्भोगस्य ज्ञः अभिज्ञः मास्मभूदिति विचार्य अत्र करणे दयालुः कारुणिकः सन् स्पृहिगृहीत्यादिना आलुच्प्रत्ययः नितरां भक्तं आपगेयं गाङ्गेय भीष्मं सशरीरं वरेण द्यां स्वर्गं त्वमनयः नीतवान् ॥ ७८ ॥

घातितार्कतनुजं दयालुर्जैत्रितेन्दुकुलपार्थकृतार्थः ।
अर्द्धदुःखसुखमभ्यनयस्त्वं साम्बुभानुविहसद्विधुनेत्रः ॥ ७९ ॥
प्राणवत्प्रणयिराध ! न राधापुत्रशत्रुसखता सदृशी ते ।
श्रीप्रियस्य सदृगेव तव श्रीवत्समात्महृदि धर्त्तुमजस्रम् ॥ ८० ॥
हृद्यगन्धवह ! भोगवतीशः शेषरूपमपि बिभ्रदशेषः ।
भोगभूतिमदिरारुचिरश्रीरुल्लसत्कुमुदबन्धुरुचिस्त्वम् ॥ ८१ ॥

घातितेति । घातितो योऽर्कसुतः कर्णस्तस्मिन् दयालुः जैत्रितेन जैत्रकेन इन्दुकुलेन चन्द्रान्वयजातेन पार्थेनार्जुनेन कृतार्थः सन् साम्बुः सवाष्पो भानुः सूर्यश्च विहसन् विधुश्चन्द्रश्च नेत्रे दक्षिणादक्षिणे यस्य स त्वं दुःखं सुखञ्च दुःखसुखं अर्द्धं नपुंसकमित्येकशेषः। अभ्यनयः अभिनीतवान् ॥ ७९ ॥

प्राणेति । प्राणवत्प्रणयिनी प्रेयसी कृता राधा श्रीविशेषो यस्य तस्य सम्बुद्धिः प्राणवत्प्रणयिराध ! कृष्ण ! ते तव राधापुत्रस्य कर्णस्य शत्रुरर्जुनस्तस्य सखा राधापुत्रशत्रुसखः तस्य भावस्तत्ता सा सदृशी योग्या तव श्रीः प्रिया लक्ष्मीः यस्य तस्य तव श्रीवत्सलाञ्छनविशेषं श्रियो लक्ष्म्याः वत्सं शिशुञ्च अजस्रं सर्वदा आत्मनो हृदि धर्तुं सदृक् सदृशमेव राधाप्रियस्य राधासुखद्वेषिणि सख्य मनुचितं श्रीप्रियस्य हृदि श्रीवत्सधारणं युक्तमिति राधाश्रीवत्सशब्दाभ्यां छद्मनोक्तिः ॥ ८० ॥

हृद्येति । हृद्यस्य मनोहरस्य गन्धस्य सौरभस्य वहो हृद्यगन्धवहः तस्य सम्बोधनं हे हृद्यगन्धवह ! त्वं भोगवत्याः ककुद्मिकन्याया ईशः भर्ता भोगस्य सम्भोगस्य भूतिः समृद्धिः भूतिकारिणीत्यर्थः। भोगभूत्या मदिरायाः सुरायाः रुचिं दीप्तिं राति ददाति या सा श्रीः शरीरशोभा यस्य मदिरापाने हि नेत्रं लोहितं भवति। अतः परभागलोभात् रुचिरश्रीकत्वं उल्लसन्ती प्रकाशमाना कुमुदानां कैरवाणां बन्धोश्चन्द्रस्य रुचिः शरीर-

रेवतीश ! सुषमा किल नीलस्याम्बरस्य रुचिरा तनुभासा ।
कामपाल ! भवतः कुमुदाविर्भावभावितरुचेरुचितैव ॥ ८२ ॥
अर्द्धचक्रवपुषाऽर्ज्जुनबाहून् योऽलुनात् परशुनाऽथ सहस्रम् ।
तेन किं सकलचक्रविलूने वाणवाहुनिचयेऽस्त्वति चित्रम् ॥८३॥

कान्तिर्यस्य स तादृशः सन् शेषस्यानन्तस्य रूपं शरीरं बिभ्रदपि अशेषः सर्वात्मकोऽसि बलभद्र एव हि शेष इति प्रसिद्धिः यो हि शेषः स कथमशेष इति शब्दतो विरोधः । अन्यच्च हे विष्णो ! हृद्यो हृदिस्थो गन्धवहो वायु राहारो यस्य सर्पा हि वाताशना भवन्ति । भोगवत्या नागानां फणानां भोगः सुखेऽस्त्र्यादिभृता वहेश्च फणकाययो रित्यमरः । ईशः स्वामी हृद्यगन्धवहश्चासौ भोगवतीशश्चेति विशेषणसमासः । भोगानां फणानां भोगः भूतिबाहुल्यमस्यास्तीति भोगभूतिमान् इलायाः भूमेः इरा भूवाक्सुराप्सु स्यादित्यमरः । रुचि मिच्छां राति ददातीति यो विशेषो भूमे र्भर्ता तस्य श्रीः शोभा यस्य स इरारुचिरश्री भोगभूतिमांश्चासौ इरारुचिरश्रीश्चेति कर्मधारयः । उल्लसन्ती कुमुदे कुमुदाख्ये सर्पे कुमुदं कैरवे रक्तपङ्कजे कुमुदः कपौ । दैत्यान्तरे च दिङ्नागनागयोः परिकीर्त्तित इत्युभयत्रापि विश्वः । बन्धौ स्वजने रुचिः प्रीतिर्यस्य स तादृशस्य शेषस्यानन्तस्य रूपं बिभ्रदपि त्वमशेषोऽसि सर्वात्मकत्वाद्विष्णो रितिभावः ॥ ८१ ॥

रेवतीति । रेवत्याः कन्यायाः ककुद्मिकन्यायाः ईशो भर्ता तस्य सम्बोधनं रेवतीश ! भोः कामपाल ! कामपालो हलायुध इत्यमरः । कोः पृथिव्याः गोप्ता कुः पृथिवी पृथ्वीत्यमरः । मुदः प्रीतेः आविर्भावाय भाविता रुचिः प्रीतिर्यस्य तस्य भवतः तनुभासा देहशोभया नीलस्याम्बरस्य रुचिरा रुचिं रातीति रुचिरा सुषमा उचितैव ॥ ८२ ॥

अर्द्धेति । हे विष्णो ! यः परशुरामः चक्रस्यार्द्धं अर्द्धचक्रं वपुः

पाञ्चजन्यमधिगत्य करेणापाञ्चजन्यमसुरानिव वच्चि ।
चेतनाश्च किल पश्यत किं नाचेतनोऽपि मयि युक्तविरोधः ॥ ८४॥
तावकोरसि लसद्वनमाले श्रीफलद्विफलशाखिकयेव ।
स्थीयते कमलया त्वदजस्रस्पर्शकण्टकितयोत्कुचया च ॥ ८५॥

शरीरं यस्य तेन परशुना साधनेन सहस्रमर्जुनस्य कार्तवीर्यस्य ककुभवृक्षस्य च अर्जुनः ककुभे पार्थे कार्तवीर्यमयूखयोरिति विश्वः । बाहून् भुजान् अथशब्दः कात्स्न्ये अथो अथतूह्व स्म इति तथाचामरसिंहः मङ्गलानन्तरारम्भ प्रश्नकात्स्न्येष्वथो अथेति । लुनात् तेन सकलेन सम्पूर्णेन चक्रेण सुदर्शनेन विलूने छिन्ने बाणस्य बाणासुरस्य कुरण्टकवृक्षस्य च बाणौ दानवभेदे तु शरे दासीकुरण्टकइत्यजयपालः । बाहूनां निचये समूहे विषये तव किञ्चित्त्वं नास्तीत्यर्थः । ककुभच्छेदिनः कुरण्डकच्छेदो नाश्चर्यं विहृत्यैतदप्यनुसन्धेयम् ॥ ८३॥

पाञ्चजन्यमिति । हे विष्णो ! पाञ्चजन्यं शङ्खं वह्निर्देवपञ्चजनेभ्यश्चेति वक्तव्यात् । शङ्खो लक्ष्मीपतेः पाञ्चजन्य इत्यमरः । पाञ्चजन्यञ्जलानाञ्च सम्पाद्य सततं करेण हस्तेनाधिगत्य प्राप्य सुरान् वच्चि ब्रवीषि वच परिभाषायां इत्यस्मादादादिकस्य लटि सिपि रूपं । किमित्याह हे असुराश्चेतनाश्च चैतन्यवन्तोऽभवन् किल अचेतनः अपाञ्चजन्योऽपि मयि पूर्वोक्तप्रकारेण युक्तो विरोधो येन स किं न पश्यत ॥ ८४॥

तावकेति । लसन्ती वनमाला यस्मिन् अनेन वनमालाया आवदालयलयत्वं सूचितं । तस्मिन् तावके त्वत्सम्बन्धिन्युरसि तवाजस्रं स्पर्शेन कण्टकितया उद्गतौ कुचौ यस्यास्तया कमलया लक्ष्म्या श्रीफलस्य मालूरवृक्षस्य मालूरश्रीफलावपीत्यमरः । द्वे फले यस्यां सा या शाखिका अल्पा शाखिका तयेव स्थीयते भावे लकारः ॥ ८५॥

त्यज्यत इति । हे विष्णो ! उच्चैर्महत्सुभगभूयं सुभगत्वं भुवो भाव इति क्यप् । पिच्चिलमिव ते तव करो जलजेन पद्मेन न त्यज्यते कुमुदानां

त्यज्यते न जलजेन करस्ते शिक्षितुं सुभगभूयमिवोच्चैः।
आननञ्च नयनायितबिम्बः सेवते कुमुदहासकरांशुः ॥ ८६ ॥
ये हिरण्यकशिपुं रिपुमुच्चै रावणञ्च कुरुवीरचयं च।
हन्त हन्तुमभवंस्तव योगास्ते नरस्य च हरेश्च जयन्ति ॥ ८७ ॥
केयमर्द्धभवता भवतो हे मायिना ननु भवः सकलस्त्वम्।
शेषतामपि भजन्तमशेषं वेद वेदनयनो हि जनस्त्वाम् ॥ ८८ ॥
प्राग्भवैरुदगुदम्भवगुम्फान्मुक्तियुक्तिविहृताविव तावत्।
नापरः स्फुरति कस्यचनापि त्वत्समाधिमवधूय समाधिः ॥ ८९ ॥

कैरवाणां हासकरा हासकारिणः करा अंशवो यस्य स चन्द्रश्च नयनायितं नयनवदाचरितं बिम्बं मण्डलं यस्य चन्द्रो हि विष्णोर्वामाक्षित्वेन वर्तते स तादृशः सन्नुच्चैः सुभगभूयं शिक्षितुमिवाननं सेवते ॥ ८६ ॥

यदिति। हे विष्णो! उच्चैर्महान्तं हिरण्यकशिपुं रावणं कुरुवीरचयं च दुर्योधनप्रभृतीनाञ्च समूहन्तु यथाक्रमं नरस्य मनुष्यस्य हरेः सिंहस्य नरस्य मनुष्यस्य दाशरथेर्हरेः कपेः सुग्रीवस्य च अर्ज्जुनस्य हरेः कृष्णस्य च नरस्य च नरोऽर्जुने मनुष्ये चेति यादवः। यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमरः। योगाः सम्बन्धविशेषा अभवन्। जयन्ति। हन्तेति हर्षे ॥ ८७ ॥

केति। हे विष्णो! मायिना मायाविना व्रीह्यादित्वादिनिः। भवता त्वया केयं भवस्य शम्भोः संहारस्य च अर्द्धमर्द्धभवः तस्य भावस्तत्ता ना ऊहे ऊढा किं शब्द आक्षेपे सकलः कृत्स्नो भवः संसारस्त्वं ननु इति प्रसिद्धौ शेषतामनन्ततामुपयुक्तादन्यत्वं च शेषः सङ्कर्षणे नन्ते उपयुक्तोऽन्तरेऽवधावपीति विश्वः। भजन्तं प्राप्नुवन्तमपि त्वां वेदं पुरुष एवेदं सर्वमित्यादि नयनं यस्य स जनो वेदज्ञोऽशेषं सकलमनन्तादन्यञ्च वेद जानाति हि ॥ ८८ ॥

प्रागिति। हे विष्णो! प्राग्भवैः पूर्वजन्मभिः उदगुदग्भवानामु-

ऊर्द्ध्वदिक्कदलनाद् द्विरकार्षीः किं तनुं हरिहरीभवनाय।
किञ्च तिर्य्यगभिनो नृहरित्वे कः स्वतन्त्रमनु नन्वनुयोगः॥९०॥

आप्तकाम! सृजसि त्रिजगत् किं किं छिनत्सि यदि निर्म्मितमेव।
पासि चेदमवतीर्य्य मुकुन्दः किं स्वात्मनाऽपि यदवश्यविनाश्यम्॥९१

जाह्नवीजलजकौस्तुभचन्द्रान्
पादपाणिहृदयेक्षणवृत्तीन्।
उत्थिताऽब्धिसलिलात्त्वयि लोला
श्रीः स्थिता परिचितान् परिचिन्त्य॥ ९२॥

त्तरोत्तरजन्मनां गुम्फाद्गुम्फनाद्धेतोः भुक्तेर्मोक्षस्य युक्तेश्च ताभ्यां विहतौ विघ्ने सत्यामिह संसारे तावत् त्वत्समाधिं ध्यानमवधूय परित्यज्य कस्यचन कस्यचिदपि अपरः समाधिः समर्थनं न स्फुरति समाधिर्नियमे ध्याने नीवारे च समर्थने इति विश्वः॥ ८९॥

ऊर्द्ध्वेति। हे विष्णो! हरिहरीभवनाय विष्णुशङ्करीभावाय परमेश्वरस्य हि हरिहरात्मकं शरीरमस्ति। ऊर्द्ध्वा दिग्यस्मिन् तस्मात्-कदलनाद्विभागाद्धेतोः किं किमर्थन्तनुं शरीरं द्विः द्विधा अकार्षीः कृतवानसि किञ्च नृहरित्वे नरसिंहभावे तिर्य्यग्यथा भवति तथा तनुमभिनः भिन्नवानसि ननु विष्णो! स्वतन्त्रं पुरुषमनु कोऽनुयोगः प्रश्नः प्रश्नोऽनुयोगः पृच्छा चेत्यमरः॥ ९०॥

स्वतन्त्रमेव स्फुटयति आप्तेति। आप्तकाम! कृतकृत्य! विष्णो! त्रिजगत् त्रयाणां जगतां समाहारः। किं किमर्थं सृजसि आप्तकामस्य तदनुचितमिति भावः। यदि त्रिजगन्निर्मितमेव तर्हि न किं छिनत्सि यत्र जगत् स्वात्मनैव अवश्यविनाश्यं अवश्यं विनाशनीयं तस्येदवश्य नियमः कृत्य इति शेषः। तदिदं त्रिजगत् मुकुन्दरवतीर्य किं किमर्थं पासि रक्षसि अवश्यविनाशस्य रक्षणमनुपयुक्तमिति भावः॥ ९१॥

जाह्नवीति। हे विष्णो! अब्धिसलिलादुत्थिता लक्ष्मीः पादपाणिहृदयेक्षणे वृत्तिर्वर्त्तनं येषां तान् परिचितानभ्यस्तान्यथाक्रमं जाह्नवीज-

वस्तु वास्तु घटते न भिदानां यौक्तनैकविधबाधविरोधैः ।
तत्त्वदीहितविजृम्भिततत्तद्भेदमेतदिति तत्त्वनिरुक्तिः ॥ ९३ ॥
वस्तु विश्वमुदरे तव दृष्ट्वा बाह्यवत् किल मृकण्डुतनूजः ।
स्वं विभिन्नमुभयं न विचिन्वन्निर्ययौ स कतरस्त्वमभेष ॥ ९४ ॥
ब्रह्मणोऽस्तु तव शक्तिलतायां मूर्ध्नि विश्वमथ पत्युरहीनाम् ।
बालतां कलयतो जठरे वा सर्व्वथाऽसि जगतामवलम्बः ॥ ९५ ॥
धर्म्मबीजसलिला सरिदङ्घ्रावर्थमूलमुरसि स्फुरति श्रीः ।
कामदैवतमपि प्रसवस्ते ब्रह्ममुक्तिरसि स्वयमेव ॥ ९६ ॥

रजकैस्तुनचन्द्रान् परिचिन्त्य पर्यालोच्य त्वय्यासक्ता सतो स्थित किं लोका लोको हि बन्धुसमीपे सस्तमास्ते ॥ ९२ ॥

वस्त्विति । हे विष्णो ! यौक्तैर्युक्तिपरैर्नैकविधैरनेकप्रकारैर्विरोधैर्विरोधहेतुभिर्भिदानां वास्त्वाश्रयो वस्तु पदार्थो न घटते तत्तस्मात्कारणादेतद्वस्तु घटपटादिरूपं त्वदीहितेन भवदिच्छया विजृम्भितो विलसितः स चः भेदो विशेषो यस्य तदिति तत्त्वस्य वस्तुतत्त्वस्य निरुक्तिर्निर्वचनम् ॥ ९३ ॥

वस्त्विति । हे विष्णो ! मृकण्डुतनूजो मार्कण्डेय स्तवोदरे बाह्यवत् बाह्यमिव बहिः षष्ठीलोपोयत् । विश्वं वस्तु दृष्ट्वा विभिन्नमुभयं स्वमात्मानं न विचिन्वन् विवेक्तुमशक्नुवन्निर्ययौ निर्गतवान् किल उदर निर्गतवान् स मृकण्डुतनूजः कतर इति त्वमेवैषि जानासि नान्य इत्यर्थः ॥ ९४ ॥

ब्रह्मण इति । हे विष्णो ! ब्रह्मणो विधातुस्तव शक्तौ माययामेव लतायां विश्वमस्तु अथवा अहीनां पत्युः शेषस्य तव मूर्ध्नि विश्वमस्तु अथवा बालताङ्कलयतो दधानस्य तव जठरे विश्वमस्तु सर्वथा सर्वप्रकारेणापि त्वं जगतामवलम्ब आश्रयोऽसि ॥ ९५ ॥

धर्मेति । हे विष्णो ! धर्मस्य बीजं सलिलं यस्याः सा सरित् गङ्गा तव अङ्घ्रौ स्फुरति अर्थस्य मूलं श्रीर्लक्ष्मीस्तवोरसि स्फुरति

लीलयाऽपि तव नाम जना ये गृह्णते नरकनाशकरस्य ।
तेभ्य एव नरकैरुचिता भीस्ते तु बिभ्यतु कथं नरकेभ्यः ॥९७॥
मृत्युहेतुषु न वज्रनिपाताद् भीतिमर्हति जनस्त्वयि भक्तः ।
यत् तदोच्चरति वैष्णवकण्ठान्निष्प्रयत्नमपि नाम तव द्राक् ॥९८॥
सर्वथाऽपि शुचिनि क्रियमाणे मन्दिरोदर इवावकिरा ये ।
उद्भवन्ति भविचेतसि तेषां शोधनीभवदनुस्मृतिधारा ॥ ९९ ॥

कामदैवतं कामदेवोऽपि ते तव प्रसवः पुत्रः स्वयमेव मुक्तिदं ब्रह्मासि पुरुषार्थचतुष्टयाकाङ्क्षी इति त्वमेव सेवनीयोऽसीति भावः ॥ ९६ ॥

लीलयेति । हे विष्णो ! नरकस्य रौरवादेरसुरविशेषस्य च नरको निरये दैत्य इति विश्वः । नाशङ्करोति यस्तस्य तव नाम नामधेयं लीलया विनोदेनापि ये जना गृह्णते कीर्तयन्ति तेभ्यो जनेभ्य एव नरकैर्भीर्भय उचिता अभ्यस्ता उचितं प्रोक्तमभ्यस्तमिते ज्ञाते समं जन इति विश्वः । ते जनास्तु नरकेभ्यः सकाशात्कथं बिभ्यतु त्रस्यन्तु न कथञ्चिदित्यर्थः ॥ ९७ ॥

मृत्युष्विति । हे विष्णो ! त्वयि भक्तो जनो मृत्युषु हेतुषु मरणकारणेषु मध्ये वज्रनिपातात् मृत्युहेतोः सकाशाद्भीतिं अर्हति । नास्ति कुतइत्याह यद्यस्मात्कारणात् तदा वज्रपातसमये वैष्णवस्य विष्णुभक्तस्य कण्ठात्तव नाम नामधेयं द्राक्शीघ्रं निष्प्रयत्नमबुद्धिपूर्वमुच्चरति निष्क्रामति । अनभिसन्धीनां विष्णुनामोच्चारणे मृतस्य नरकपातो नास्तीति भावः ॥ ९८ ॥

सर्वथेति । हे विष्णो ! सर्वथा सर्वप्रकारेणापि शुचिनि निर्मले क्रियमाणेऽपि भविनां संसारिणाञ्चेतसि मन्दिरोदरे गृहाभ्यन्तरइव ये अवकिरा रजांसि सम्मार्जनी शोधनी स्यात्सङ्करोऽवकिरस्तथेत्यमरः । उद्भवन्ति जायन्ते तेषामेव कारणत्वात् तव कर्मभूतस्यानुस्मृतिधारा ध्यानपरम्परा शोधनी सम्मार्जनी ॥ ९९ ॥

अस्मदाद्यविषयेऽपि विशेषे राम ! नाम तव धाम गुणानाम्।
अन्वबन्धि भवतैव तु कस्मादन्यथा ननु, जनुस्त्रितयेऽपि ॥१००॥
भक्तिभाजमनुगृह्य दृशा मां भास्करेण कुरु वीततमस्कम्।
अर्पितेन मम नाथ ! न तापं लोचनेन विधुना विधुनासि ॥१०१॥
लङ्घयन्नहरहर्भवदाज्ञामस्मि हा विधिनिषेधमयीं यः।
दुर्लभं स तपसाऽपि गिरैव त्वत्प्रसादमहमिच्छुरलज्जः ॥१०२॥
विश्वरूप ! कृतविश्व ! कियत् ते वैभवाद्भुतमणौ हृदि कुर्वे।
हेम नह्यति कियन्निजचीरे काञ्चनाद्रिमधिगत्य दरिद्रः ॥१०३॥

अस्मदिति। हे राम ! विष्णो ! विशेषे अस्मद दीनामविषये सत्यपि गुणानान्धाम आश्रय कुत इत्यह अन्यथा अथैवं नोचेज्जनुषाञ्जननानां त्रितयेऽपि भवतैव तु कस्मात् कुतो हेतोरन्वबन्धि अनुबन्धं नीतम् ॥१००॥

भक्तीति। हे नाथ ! विष्णोर्भक्तिभाजं मां अनुगृह्य भास्करेण दृशापि तं तमस्तमोगुणो तिमिरञ्च तमोध्वान्तं गुणे तम इत्यमरः। यस्मात् त्वं वीततमस्काङ्कुरु अर्पितेन विधुना चन्द्रेण लोचनेन मम तापं न विधुनासि नापनयसि अत्र काकुः धूङ् कम्पन इत्यस्मात् क्रियादिकाबादिसिपिस्व दीनां ह्रस्वः ॥१०१॥

लङ्घयन्निति। हे विष्णो ! अहरह नित्यं विधिनिषेधमयी विधिर्वषन्ते वसन्ते ज्योतिष्टोमेन यजेतेत्यादिः निषेधो न सुरां पिबेन्न कलञ्जं भक्षयेदित्यादिकः तन्मयीं भवदाज्ञां श्रुतिस्मृतिरूपां लङ्घयन् मोचयन् हा खेदे सोऽहमलज्जः सन् तपसापि दुर्लभन्त्वत्प्रसादं भवदनुग्रहं गिरा वचनेनैव इच्छुरभिलाषुकोऽस्मि ॥१०२॥

विश्वेति। हे विश्वरूप ! कृतविश्व ! सर्वात्मक ! विश्वस्रष्टः ! ते तव वैभवस्याद्भुतमणौ हृदि कियत्कुर्वे अल्पमेव कलयामि। तथाहि दरिद्रः काञ्चनाद्रिमधिगत्य निजे चीरे कियद्धेम नह्यति बध्नाति णह बन्धन इति धातुः ॥१०३॥

इत्युदीर्य्य स हरिं प्रति सम्प्रज्ञातवासिततमः समपादि ।
भावनावशविलोकितविष्णोः प्रीतिभक्तिसदृशानि चरिष्णुः ॥१०४॥

विप्रपाणिषु भृशं वसुवर्षी पावकसात्कृतपितृक्रतुकव्यः ।
श्रेयसा हरिहरौ प्रतिपूज्य प्रह्व एष शरणं प्रविवेश ॥ १०५ ॥

माध्यन्दिनादनुविधेर्वसुधासुधांशु
रास्वादितास्ततमयौदनमोदमानः ।
प्राचं सचित्रमविदूरितवैजयन्तम्
वेश्माचलं निजरुचीभिरलञ्चकार ॥ १०६ ॥

भीमात्मजाऽपि कृतदैवतभक्तिपूजा
पत्यौ च भुक्तवति भुक्तवती ततोऽनु ।

इतीति। इति पूर्वोक्तप्रकारेण हरिं विष्णुं उदीर्य स नलः सम्प्रज्ञातेन साकारध्यानेन हेतुना वासिततमोऽतिशयेन सञ्जातवासनः सन् भावनावशेन संस्कारपाटवेन विलोकिते साक्षात् कृते विष्णौ विषये प्रीतिभक्त्याः सदृशान्यानन्दवाष्पादीनि चरिष्णुः समपादि सम्पन्नः चिण् ते पदइति कर्तरि चिण् ॥ १०४ ॥

विप्रेति। एष नलो विप्राणां पाणिषु भृशं वसु वर्षति यः स तादृशः सन् पावकसात्कृतं पितृक्रतौ पितृयज्ञे कव्यं पित्र्यं वस्तु येन हव्यकव्ये दैवपित्र्ये इत्यमरः। स तादृशः सन् श्रेयसा समीचीनवस्तुना हरिहरं प्रतिपूज्य प्रह्वः सन् शरणं गृहं प्रविवेश शरणं गृहरक्षित्रोरित्यमरः ॥१०५॥

माध्यन्दिनादिति। वसुधाविषयस्थान् भूलोकसूर्यः नलः माध्यन्दिनाद्विधेरनु अनुष्ठानात्पश्चादास्वादितेनास्ततमयेनौदनेन मोदमानः सन् प्राचं प्राचीनं चित्रमाश्चर्यमविदूरितो निकटीकृतः वैजयन्त इन्द्रप्रासादो येन तं वेश्माचलं निजाभिः रुचीभिः अलञ्चकार ॥ १०६ ॥

भीमेति, भीमात्मजा दमयन्त्यपि कृता दैवतस्य भक्तियुक्ता पूजा यया सा तादृशी सती पत्यौ नलेच भुक्तवति ततः पतिभोजनमनु पश्चात्

तस्याङ्कमङ्कुरिततत्परिरिप्सु मध्य-
मध्यास्त भूषणभरादतितरालसाङ्गी ॥ १०७ ॥

तामन्वगादशितबिम्बविपाकचञ्चोः
स्पष्टं शलाटुपरिणत्युचितच्छदस्य ।
कीरस्य काऽपि करवारिरुहे वहन्ती
सौन्दर्य्यपुञ्जमिव पञ्जरमेकमाली ॥ १०८ ॥

कूजायुजा बहुलपक्षशितिम्नि सीम्ना
स्पष्टं कुहूपदपदार्थमिथोऽन्वयेन ।
तिर्य्यग्धृतस्फटिकदण्डकवर्त्तिनैका
तामन्ववर्त्तत पिकेन मदाधिकेन ॥ १०९ ॥

शक्तवती सती तथा भूषणभरेणातितरामलसाङ्गी विवशा अङ्कुरिता उद्भूता तस्याः कर्मभूताया लिप्सा आलिङ्गनेच्छा यस्य सनिमीमेत्यादिना सनन्तादुः अत्र लोपोऽभ्यासस्येति अभ्यासलोपः। तत्तादृश मध्यः परिभागो यस्य तं तस्य नलस्याङ्कमुत्सङ्गमध्यास्त ॥ १०७ ॥

तामिति। अशितस्य भक्षितस्य बिम्बस्य फलस्य विपाकः परिपाक इव चञ्चुस्त्रोटिर्यस्य तस्य स्पष्टं यथा भवति तथा शलाटुनः आमफलस्य आमे फले शलाटुः स्यादित्यमरः। सम्बन्धिन्याः परिणतेः परिणामस्योचितौ च्छदौ पक्षौ यस्य कीरस्य शुकस्य सौन्दर्यपुञ्जमिवैकं पञ्जरकरएव वारिरुहे वहन्ती काप्यालिस्तां दमयन्तीमन्वगात् ॥ १०८ ॥

कूजेति। कूजायुजा कूजनसहितेन गुरो हल इत्यकारप्रत्ययः। बहुलपक्षस्य कृष्णपक्षस्य शितिम्नि कालिम्नि सीम्ना मर्यादया स्पष्टं यथा भवति तथा कुहूपदस्य पदार्थस्य कुहूशब्दवाच्यस्यामावास्यायाः कोकिलालापस्य च कुहूः स्यात्कोकिलालापनष्टेन्दुकलयोरपीत्यमरः। मिथः परस्परं अन्वयो यत्र तेन तिर्यक् धृतेन स्फटिकमयेन दण्डेन वर्तते

शिष्याः कलाविधिषु भीमभुवो वयस्या
वीणामृदुक्वणनकर्म्मणि याः प्रवीणाः ।
आसीनमेनमुपवीणयितुं ययुस्ता
गन्धर्वराजतनुजा मनुजाधिराजम् ॥ ११० ॥

तासामभासत कुरङ्गदृशां विपञ्ची
किञ्चित्पुरः कलितनिष्कलकाकलीका ।
भैमी तथा मधुरकण्ठलतोपकण्ठे
शब्दायितुं प्रथममप्रतिभावतीव ॥ १११ ॥

सा यद्धृताखिलकलागुणभूमभूमी
भैमीतुलाधिगतये स्वरसङ्गताऽऽसीत् ।

यस्तेन मदाधिकेनात्यन्तमत्तेन पिकेन उपलक्षिता सती एका तां दमयन्तीमन्ववर्तत ॥ १०९ ॥

शिष्या इति । वीणाया मृदुक्वणनकर्म्मणि प्रवीणाः निपुणा या गन्धर्वराजतनुजाः कलाविधिषु शिल्पविद्याभ्यासेषु भीमभुवो दमयन्त्याः शिष्याः सत्यो वयस्या अभवन् ताः आसीनमेनं मनुजाधिनाथं नलमुपवीणयितुं वीणया उपगातुं ययुः प्राप्तवत्यः ॥ ११० ॥

तासामिति । कुरङ्गदृशां तासां गन्धर्वराजतनूजानां विपञ्ची वीणा किञ्चिदल्पं पुरः प्रथमं कलिता स्वीकृता निष्कला निर्विशेषा सती काकली मधुरास्फुटः सूक्ष्मस्वरो यस्याः काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुट इत्यमरः । सा किञ्चित्पुरः कलितनिष्कलकाकलीका सती नद्यृतश्चेति कप्समासान्तः । भैम्यास्तथाविधाया मधुरायाः कण्ठलतायाः उपकण्ठे समीपे शब्दायितुं शब्दं कर्तुं शब्दवैरेत्यादिना क्यङ् तुमुन् । प्रथममादावप्रतिभावती स्त्री प्रतिभारहितेवाभासत विद्याधिकानां पुरतोऽल्पविद्यस्य कण्ठो न भासत इत्यर्थः ॥ १११ ॥

सेति । अखिलानां कलानां यो गुणभूमा तस्य भूमिः तस्या भैम्या

तं प्रागसावविनयं परिवादमेत्य
लोकेऽधुनाऽपि विहिता परिवादिनीति ॥ ११२ ॥

नादं निषादमधुरं ततमुज्जगार
साऽभ्यासभागवनिभृत्कुलकुञ्जरस्य ।
स्तम्बेरमीव कृतसंस्तुतिमूर्द्धकम्पा
वीणा विचित्रकरचापलमाभजन्ती ॥ ११३ ॥

आकृष्य सारमखिलं किमु वल्लकीनाम्
तस्या मृदुस्वरमसर्जि न कण्ठनालम् ।

तुलाधिगतये प्राक् वीणा स्वरसङ्गता आसीत् असौ वीणा तं अविनयं अविनयरूपं परिवादं एत्य अधुना स्फुटं परिवादिनीति विहिता विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनीत्यमरः ॥ ११२ ॥

नादमिति । सा वीणा अवनिभृत्कुलकुञ्जरस्य राजवंशश्रेष्ठस्य तस्य नलस्याभ्यासं समीपं भजति या सा तादृशी सती स्तम्बेरमी हस्तिनीवस्तम्बकर्णयोरमिजयोरित्यच् हलन्ताः सप्तम्याः संज्ञायामलुक् जातेरस्त्रीविषयादित्यादिना ङीप् । कृतसंस्तुतीनामभिज्ञानां संस्तुतेः श्रोत्रसहितस्य च मूर्द्ध्नः शिरसः कम्पो यया सा तादृशी विचित्रं नानाविधं करस्य पाणेः शुण्डायाश्च चापलञ्चापल्यं भजन्ती या सा भवन्ती निषादेन स्वरविशेषेण मधुरन्ततं विस्तृतं नादमुज्जगार स्तम्बेरमो हि निषादं बृंहते गज इति ॥ ११३ ॥

आकृष्येति । तस्या दमयन्त्याः कण्ठनालं वल्लकीनां वीणानामखिलं सारमाकृष्य मृदुस्वरो यस्य तदसर्जि तत्सृष्टं किमु? तेन कारणेनान्तरमन्तरे भवन्तरलभावञ्चाञ्चल्यमवाप्य वीणा विपञ्ची क्षीणा लज्जिता सती लयेषु साम्येषु वाद्यानां साम्यमित्यमरः । आलयेषु गृहेषु च कोणं वादनं दण्डटङ्कं वीणा वाद्यप्रभेदे स्यात् कोणोऽस्त्री लगुडेऽर्कजे । वीणादिवादने

तेनान्तरं तरलभावमवाप्य वीणा
ह्रीणा न कोणममुचत् किमु वा लयेषु ॥ ११४ ॥

तद्दम्पतिश्रुतिमधून्यथ चाटुगाथा
वीणास्तया जगुरतिस्फुटवर्णबन्धम् ।
इत्थं यथा वसुमतीरतिगृह्यकस्ताः
कीरः किरन्मुदमुदीरयति स्म विश्वाः ॥ ११५ ॥

अस्माकमुक्तिभिरवेष्यथ एव बुद्धे
र्गाधं युवामतिमती स्तुमहे तथापि ।
ज्ञानं हि वागवसरावचनाद्भवद्भ्या
मेतावदप्यनवधारितमेव न स्यात् ॥ ११६ ॥

भूभृद्भवाङ्कभुवि राजशिखामणेः सा
त्वञ्चास्य भोगसुभगस्य समः क्रमोऽयम् ।

वा स्यादेकदेशे गृहस्य चेति विश्वः। नामुचत् किन्तु अपहृत[illegible]रो ह्रीणः सन् गृहस्य कोणमाश्रित्य तिष्ठति ॥ ११४ ॥

तदेति। अथानन्तरं-वसुमतीरतेः दमयन्त्याः गृह्यकः पञ्जरादौ स्थापितः पदास्वैरित्यादिना कप् स्वार्थे कप्। गृह्यासक्ताः पक्षिमृगाश्छेकाः स्युर्गृह्यकाश्च त इत्यमरः। कीरः शुकः मुदं किरन् उत्पादयन्नित्यर्थः। इत्थं वक्ष्यमाणेन प्रकारेण ताश्च चाटुगाथा वर्णनश्लोकान्। तथा वीणाः कर्त्र्यः तयोर्दम्पत्योर्दमयन्तीनलयोः श्रुतिमधूनि श्रोत्रक्षौद्राणि चाटुगाथा अतिस्फुटवर्णबन्धं जगुर्गीतवत्यः ॥ ११५ ॥

अस्माकमिति। अत्यधिका मतिर्ययोस्तयोः सम्बोधनं हे अतिमती! दमयन्तीनलौ! युवामस्माकं एतावदल्पं ज्ञानं वागवसरे अवचनाद् भवद्भ्यां युक्ताभ्यां यद्यपि उक्तिभिरेव बुद्धेर्गाधं प्रकटार्थत्वं अवेष्यथ अनवधारितमनिश्चितमेव स्यात् तथापि स्तुमहे ॥ ११६ ॥

भूभृदिति। हे दमयन्ति! राज्ञां शिखामणेः श्रेष्ठस्य राजचन्द्रस्य

यन्नाकपालकलनाकलितस्य भर्त्तु-
रत्नापि जन्मनि सती भवती स भेदः ॥ ११७ ॥
एषा रतिः स्फुरति चेतसि कस्य यस्याः
सूते रतिं द्युतिरथ त्वयि चातनोति ।
नैष्यत्त्वीक्षणखिलीकृतनिर्जरत्व-
सिद्धायुरध्वमकरध्वजसंशयं कः ॥ ११८ ॥
एतां धरामिव सरिच्छविहारिहारा
मुल्लासितस्वमिदमाननचन्द्रभासा ।

शिखामणिः शिरोरत्नञ्च यस्य राजा मृगाङ्के क्षत्रिये नृप इत्यमरः । तस्य भोगैः स्रक्चन्दनादिभिः सर्पशरीरैश्च भोगः सुखेऽस्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । सुभगस्यास्य नलस्य भूभृतो राज्ञः पर्वतस्य च भूभृद्भूमिधरे नृप इत्यमरः । भवति या सा भूभृद्भवा त्वं पार्वती चायं क्रमः समस्तुल्यः भवती त्वमत्रापि जन्मनि नाकपालकलनया इन्द्रस्येन विदितस्य जातस्य कपालस्य ब्रह्मकर्परस्य कलनया विदितो न भवतीत्यकपालकलनाविदितः तादृक् न भवतीति नाकपालकलनाविदितः तस्य च भर्त्तुर्नलस्य सती पतिव्रता दक्षसुता च सती दक्षसुते त्यजयपालः स भेदोऽन्तरम् ॥ ११७ ॥

एषेति । हे नल ! एषा दमयन्ती कस्य चेतसि रतिर्मदनवधूः सती न स्फुरति सर्वस्य स्फुरत्येवेत्यर्थः कुत इत्याह । तस्या दमयन्त्या द्युतिरेव रतिं प्रीतिं मदनवधूञ्च स्मरप्रियाञ्च रागे च सुरते रतिरितिविश्वः । सूते जनयति अथानन्तरं त्वयि वा तैर्य्यक्षेण शिवसम्बधिना नैवास्यामित्यागमः । वीक्षणेन चक्षुषा खिलीकृतः द्वे खिलाप्रहते समे इत्यमरः । निर्जरत्वेन देवत्वेन सिद्धमायुरेवाध्वा मार्गो यस्य तस्मिन्मकरध्वजे संशयं मकरध्वज इति भ्रान्तिं तथातनोति तस्य मृतत्वादितिभावः ॥ ११८ ॥

एतामिति । सरितो नद्याश्छविः शोभा सरिच्छविरिव हारी

विभ्रद्विभासि पयसामिव राशिरन्त
र्वेदिश्रियं जनमनःप्रियमध्यदेशाम्॥ ११९॥
दत्ते जयं जनितपत्रनिवेशनेयम्
साचीकृतेन्दुवदना मदनाय तन्वी।
मध्यस्थदुर्बलतमत्वफलं किमेत
द्भक्तिर्यदत्र तव भर्त्सितमत्स्यकेतोः॥ १२०॥
चेतोभवस्य भवती कुचपत्रराज
धानीयकेतुमकरा ननु राजधानी।

मनोहारी च हारोमुक्ता यस्या स्तामन्तर्वेद्या अन्तरिव अन्तर्वेद्या देशविशेषस्य यस्याः जन्मना हिमवद्विन्ध्ययोरन्तर्यः प्राग्विनशनादपि। प्रत्यगेन प्रयागाच्च मध्यदेशः प्रकीर्तित इति। तामेतां दमयन्तीं विभ्रद्धानस्त्वं पयसांराशिः समुद्र इवास्या दमयन्त्या आननस्यैव-चन्द्रभासा उल्लासितो विभासितः सागरो हि चन्द्रभासा उल्लासितो भवति॥ ११९॥

दत्तइति। हे नल! जनितं कृतं पत्रस्य तिलकस्य जयपत्रस्य निवेशनमर्पणं यया सा साचीकृतं लोचनीकृत मिन्दुरिव वदनं यया सा साक्षाद्दृष्टव्यक्तता इन्दुवदना चन्द्रमुखीयं तन्वी दमयन्ती मदनाय जयं दत्ते भर्त्सितोऽधिकृतो मत्स्यकेतु र्मदनो येन तस्य तवास्यान्तरां दमयन्त्यां यद्भक्तिर्भोगः तदेतन्मध्यस्थितस्यावलग्नस्थितस्य मध्यस्थानां सखीनाञ्च दुर्बलतमत्वस्यात्यन्तकार्श्यस्यात्यन्तदौर्बल्यस्य च फलं किं एते साक्षिषु च समुबलात्कारेण या भक्तिः सा सख्यानामेव दौर्बल्यं ज्ञायते इत्येतदप्यनुसन्धेयम्॥ १२०॥

चेतइति। ननु दमयन्ति! कुचयोः पत्रराजधानीयो निवेशनीयः केतुः ध्वजो मकरो यस्याः सा भवती त्वञ्चेतोभवस्य कामस्य राजधानी नगरी मीनकेतोः कामस्य महोदयमहस्पृश्यादिपत्योत्सवस्पृषि च कान्यकु-

अस्यां महोदयमहस्पृशि मीनकेतोः
के तोरणं तरुणि ! न ब्रुवते भ्रुवौ ते ॥ १२१ ॥

अस्या भवन्तमनिशं भवतस्तथैनाम्
कामः श्रमं न कथमृच्छतु तामगच्छन् ।
छायेव वामथ गतागतमाचरिष्णो-
स्तस्याध्वजश्रमहरा मकरध्वजस्य ॥ १२२ ॥

स्वेदद्रवप्रणयिनी तव रोमराजी
रत्यै यदाचरति जागरितव्रतानि ।
आभासि तेन नरनाथ ! मधूत्यसान्द्र-
मग्नासमेषुशरकेसरदन्तुराङ्गः ॥ १२३ ॥

अशोभास्पृशि च महोदयः कन्यकुब्जेऽप्यादिपत्यापवर्गयोरिति विश्वः । महश्चोत्सवतेजसोरित्यमरः । अस्यां राजधान्यां भवत्यां हे तरुणि ! ते भ्रुवौ के जनास्तोरणं वन्दनमालिकां न ब्रुवते सर्व एव ब्रुवत एवेत्यर्थः ॥ १२१ ॥

अस्या इति । हे नल ! कामोऽस्या दमयन्त्याः सकाशात् भवन्तं त्वां अनिशङ्गच्छंस्तथा भवतः सकाशादेनां दमयन्तीमगच्छन् श्रममायासं कथं नेच्छति न प्राप्नोति इच्छत्येवेतर्थः । अथ गतागतमाचरिष्णोस्तस्य मकरध्वजस्य यां युवयोः छाया दीप्तिरनातपश्च छाया सूर्य्य प्रियाकान्तिः प्रतिबिम्ब मनातप मित्यमरः । अध्वजं श्रमं हरति या सा भवति सच्छाये हि पथि पान्थो न श्राम्यति ॥ १२२ ॥

स्वेदेति । हे नरनाथ ! नल ! तव रोमराजिः रोमसमूहः स्वेदद्रवे घर्मजलस्यन्दने प्रणयोऽस्यास्तीति स्वेदद्रव प्रणयिणी रत्यै सुरताय जागरितानि जागरणाण्येव व्रतानि यदाचरति तेनाचरणेन हेतुना मधूत्येन सुपि स्य इत्यत्र योगविभागात् समासः । सान्द्रैर्बहुलैर्मग्नानामसमेषोः कामस्य शराणां केशरैः दन्तुराणि निम्नोन्नतान्यङ्गानि अवयवा यस्य स तादृशः सन्नाभासि ॥ १२३ ॥

प्राप्ता तवापि नृप ! जीवितदेवतेयम्
घर्म्माम्बुशीकरकरम्बनमम्बुजाक्षी ।
ते ते यथा रतिपतेः कुसुमानि बाणाः
स्वेदस्तथैव किमु तस्य शरक्षतास्रम् ॥ १२४ ॥
रागं प्रतीत्य युवयोस्तमिमं प्रतीची
भानुश्च किं द्वयमजायत रक्तमेतत् ।
तद्वीक्ष्य वां किमिव केलिसरित्सरोजैः
कामेषुतोचितसुखत्वमधीयमानम् ॥ १२५ ॥
अन्योन्यरागवशयोर्युवयोर्विलास-
स्वच्छन्दताच्छिदपयातु तदालिवर्गः ।

प्राप्तेति । हे नृप ! नल ! तव जीवितस्य देवतेयमम्बुजाक्षी दमयन्ती अपि घर्माम्बुनः स्वेदजलस्य शीकरैः कणैः करम्बनं मिश्रणं कुसुमानि रतिपतेः कामस्य ते तव प्रसिद्धा स्ते बाणा यदा आसन् तथैव स्वेदो घर्मस्तस्य कामस्य शराणां क्षतेषु अस्रं किमु ? ॥ १२४ ॥

रागमिति । हे दमयन्ति ! नलौ युवयोस्तमिमं रागं प्रतीत्य ज्ञात्वा प्रतीची पश्चिमा दिग्भागं सूर्य्यश्च तद्द्वयं रक्तं रक्तवर्णेन युक्तमनुरक्तं रक्तंस्यात् कुङ्कुमे ताम्रे प्राचीनामलकस्त्रजि । अनुरागान्वि नील्यादिरञ्जिते लोहितेऽन्यवदितिविश्वः । इह समये वां युवां वीक्ष्य केलिसरिति सरोजैस्तं प्रसिद्धं कामेषुतायाः कामबाणत्वस्य उचितं सुखं येषान्तेषां भावस्तत्त्वं कामेषुतोचितसुखत्वमधीयमानमभ्यस्यमानम् किम् ? ॥ १२५ ॥

अन्येति । हे दमयन्ति ! अन्योऽन्यस्मिन् रागस्यानुरागस्य वशयोर्युवयोः विलासतां स्वच्छन्दतां स्वाच्छन्द्यं छिनत्ति यः स आलिवर्गः सखीसमूहस्तस्मात्कारणादपयातु निर्गच्छतु तथाहि मदनः कामः स्वीयं

अत्याजयत् सिचयमाजिमकारयन्वा
दन्तैर्नखैश्च मदनो मदनः कथं स्यात् ॥ १२६ ॥

इति पठति शुके मृषा ययुस्ता
बहुनृपकृत्यमवेत्य सान्ध्यवेलम् ।
कुपितनिजसखीदृशार्द्धदृष्टाः
कमलतयेव तदा निकोचवत्यः ॥ १२७ ॥

अकृत परभृतः स्तुहि स्तुहीति
श्रुतवचनस्रगनूक्तिचुञ्चुचञ्चुः ।
पठितनलनुतिं प्रतीव कीरम्
तमिव नृपं प्रति जातनेत्ररागः ॥ १२८ ॥

वस्त्रमत्याजय मोचयत् दन्तैर्नखैश्चाजिं युद्धमकारयच्चा कथं मदनो मदनो मदयिता स्यात् न कथञ्चिदित्यर्थः ॥ १२६ ॥

इतीति । इति पूर्वोक्तप्रकारेण शुके पठति सति ता आल्यः सान्ध्यवेलं सन्धिवेलायां सन्ध्यासमये भवं सन्धिवेलाद्येम नक्षत्रेभ्योऽन् । बह्वनेकं नृपकृत्यं राजकार्य्यं स्वानुष्ठेयमवेत्य ज्ञात्वा कमलतया पद्मत्वेनैव तदा तस्मिन् समये निकोचः सङ्कोचो यस्यास्तया निकोचवत्याः कुपितायाः सखीनिर्गमने निजसख्या दमयन्त्याः सम्बन्धिन्या दृशा चक्षुषा अर्धदृष्टाः सत्यो निर्ययुः ॥ १२७ ॥

अकृतेति । परभृतः कोकिलः तं नृपं नलं प्रति जातो नेत्रयो रागो रक्तवर्णोऽनुरागश्च रागोऽनुरक्तो मात्सर्ये क्लेशादौ लोहितादिष्विति विश्वः । स तादृशः सन् श्रुतानां वचनस्रजामनूक्तानुवचनेन वित्तोऽनूक्तिचुञ्चुः तेन वित्तश्चुञ्चुप्चणपौ । तादृशी चञ्चुस्त्रोटीर्यस्य तं पठिता नलस्य नुतिस्तुतिर्येन तं कीरं शुकं प्रति लक्ष्यीकृत्य स्तुहि स्तुहीत्यकृत ॥ १२८ ॥

तुङ्गेति । अथ तुङ्गे प्रासादे वासादवस्थिते हंतोर्ध्वं ग्रं लघता यस्य स्तःमायतां दीर्घामर्कबिम्बस्य प्रतिहतमणिना प्रतिबिम्बेनैव मणिना राज-

तुङ्गप्रासादवासादथ भुवमवगतामायतीं केलिकुल्या-
मद्राक्षीदृक्षविम्बप्रतिकृतमणिना भीमजा राजमानाम् ।
वक्रं वक्रं व्रजन्ती फणियुवतिरिति त्रस्नुभिर्व्यक्तमुक्ता-
ऽन्योन्यं विद्रुत्य तीरे रथपदमिथुनैः सूचितामार्त्तिरुत्या ॥ १२९ ॥

अथ रथचरणौ विलोक्य रक्ता-
वतिविरहौ सतताहताविवास्त्रैः ।
अपि तमकृत पद्मसुप्तिकालम्
श्वसनविकीर्णसरोजसौरभं सा ॥ १३० ॥

अभिलपति पतिम्प्रति स्म भैमी
सदय ! विलोकय कोकयोरवस्थाम् ।
मम हृदयमिमौ च विन्दतीं हा
क इव विलोक्य नरो न रोदितीमाम् ॥ १३१ ॥

मानां वक्रं वक्रं यथा तथा व्रजन्ती गच्छन्ती फणियुवतिः सर्पस्त्रीति हेतोस्त्रस्नुभिरभिव्यक्तं यथा तथा मुक्तं अन्योन्यं यस्मिन् तद्यथा भवति तथा तीरे विद्रुत्य पलाय्य रथ पदानां चक्रनाम्नां मिथुनैः कर्तृभिरार्त्तिरुत्या दुःखस्वनेन साधनेन सूचितां केलिकुल्यां क्रीडाकृत्रिमसरितं कुल्याल्पा कृत्रिमा सरिदित्यमरः । भीमजां दमयन्तीमद्राक्षीत् ॥ १२९ ॥

अथेति । अथ सा दमयन्ती अतिविरहौ विरहस्यासहतयाहतौ हिंसाभूताविति अस्त्रैरक्ताविव रक्तवर्णौ रथचरणौ चक्रौ विलोक्य त पद्मानां सुप्तिकालं सायंसमयमपि श्वसनेन दुःखनिश्वासेन विकीर्णं विक्षिप्तं सरोजसौरभं पद्मसौगन्ध्यं यस्य तमकृत कृतवती ॥ १३० ॥

अभिलपतीति । भैमी नलं प्रत्युद्दिश्य अभिलपति स्म किमित्याह । हे सदय ! दयालो ! कोकयोश्चक्रयोरवस्थां दुर्दशां विलोक्य मम हृदयमिमौ कोकौ च विन्दन्तीं विन्दानां अवस्थां विलोक्य कोवा नरो विलोक्य रोदनं न करोति सर्वोऽपि करोत्येवेत्यर्थः हा खेदे ॥ १३१ ॥

कुमुदमुदमुदेष्यतीमसोढा
रविरविलम्बितुकामतामतानीत् ।
प्रतितरु विरुवन्ति किं शकुन्ताः
स्वहृदि निवेशितकोककाकुकुन्ताः ॥ १३२ ॥
अपि विरहमनिष्टमाचरन्ता-
वधिगमपूर्व्वकपूर्व्वसर्व्वचेष्टौ ।
इदमहह निदर्शनं विहङ्गौ
विधिवशचेतनचेष्टितानुमाने ॥ १३३ ॥
अङ्घ्रिस्थारुणिमेष्टकाविसरणैः शोणे कृपाणः स्फुटं
कालोऽयं विधिना रथाङ्गमिथुनं विच्छेत्तुमन्विच्छता ।

कुमुदेति। रविर्भानुरुदेष्यतीं जनिष्यमाणां कुमुदानां मुदं असोढा असहिष्णुः सन् सहेः सोढ़व्यमिति ढत्वदत्वढ्लोपेषु सहिवहो रोदवर्णस्य। अविलम्बितुं कामो यस्य तस्य भावस्तत्तामतानीत् कृतवान् प्रतितरु तरुं प्रति यथार्थेऽव्ययीभावः। शकुन्ताः पक्षिणः स्वहृदि निवेशितोऽर्पितः कोकानाञ्चक्रवाकानाङ्काकुरार्तस्वर एव कुन्तः प्रासो येषां प्रासस्तु कुन्त इत्यमरः। तादृशाः सन्तो विरुवन्ति शब्दायन्ते किं वितर्के किं शब्दः ॥ १३२ ॥

अपीति। अनिष्टमनीप्सितमपि विरहमाचरन्तौ कुर्वन्तावधिगमो ज्ञानं पूर्वं यस्याः साधिगमपूर्विका: पूर्वसर्व्वचेष्टा ययोस्तौ अधिगमपूर्वकसर्वचेष्टा विरह समये विधेर्ब्रह्मणो वशेन चेतनानां प्राणिनाञ्चेष्टितेन चेष्टाया अनुमानविषये इदं निदर्शनं दृष्टान्तो हि ॥ १३२ ॥

अङ्घ्रीति। रथाङ्गयोश्चक्रवाकयोर्मिथुनं विच्छेत्तुं अन्विच्छता विधिना ब्रह्मणा अङ्घ्रिः किरणः पादश्च तत्र तिष्ठन्तीति अङ्घ्रिस्थो योऽरुणिमा आरुण्यन्तैरेव इष्टकाविसरणैः शोणवर्णैरासीत् टङ्कादि यत्नेन

रश्मिग्राहिमरुत्सदग्रजसमारब्धाविरामभ्रमो
दण्डभ्राजिनि भानुशाणवलये संसज्य किं निज्यते ॥१३४॥

इति स विधुमुखीमुखेन मुग्धा
लपितसुधासवमर्पितं निपीय ।
स्मितशबलवलन्मुखोऽवदत् तां
स्फुटमिदमीदृशमीदृशं यथात्थ ॥ १३५ ॥

स्त्रीपुंसौ प्रविभज्य जेतुमखिलावापादितौचित्ययो
र्नम्रां वेद्मि रतिप्रसूनशरयोश्चापद्वयीं त्वद्भ्रुवौ ।

मरुत्सनाग्रजेनारुणेन समारब्धाः प्रक्रान्ताविरसा विच्छिन्ना भ्रमिर्भ्रमण यस्य तस्मिन् दण्डेन चण्डांशुपार्श्ववर्तिना भ्राजिनि शाणस्थेन वर्तुलेन भासेन दण्डोयमोमानभेदेच अङ्कुरे दम सैन्ययोः। अभिमाने पदेचेति विश्वः। भानौ सूर्य एव शाणवलये शास्त्रोत्तेजनं यत्र मण्डले संसज्य आरोप्य कालः सायंसमयः कृष्णवर्णश्च कालो मृत्यौ महाकाले समये यमकृष्णयोरिति विश्वः। स्फुटं यथा भवति तथा निज्यते तेजनिशातने चमायाञ्चेत्यस्मात् भौवादिकात्कर्मणि यकि रूपम्। असिधारिणो हि अङ्घ्रिस्पेटकया सज्जीकृतेन वलयेन कृपाणादिकमुत्तेजयन्ति ॥ १३४ ॥

इतीति। इत्यनेन प्रकारेण स नलो विधुमुख्या चन्द्राननाया दमयन्त्या मुखेन अर्पितं मुग्धं लपितसुधासवं निपीय स्मितेन शबलञ्चितं वलत् चलत् मुखं यस्य स तादृशः सन् तान्दमयन्तीमवदत् कथमित्याह। हे दमयन्ति! यथा येन प्रकारेण त्वमात्थ ब्रूषे इदं ईदृशमीदृशं स्फुटम् ॥ १३५ ॥

स्त्रीपुंसाविति। हे दमयन्ति! त्वद्भ्रुवौ अखिलौ स्त्रीपुंसौ प्रविभज्य जेतुं आपादितौचित्ययोः रतिप्रसूनशरयोः नम्राञ्चापद्वयीं वेद्मि नालीकमुक्त्येषिणोः नालिकानां शराणां मुक्तिं मोचनमिच्छतो र्ययोर्द्वयो नालीकयोः समाहारः द्विनलिकीं द्विनलीकृतां त्वन्नासाच्छलेन

त्वन्नासाच्छलनिह्नुतां द्विनलिकीं नालीकसृतये विधो
स्त्वन्निश्वासलतं मधुश्वसनजं वायव्यमस्त्रं तयोः ॥ १३६ ॥
पीतो वर्णगुणस्तवातिमधुरः कायेऽपि सोऽयं यथा
यं बिभ्रत् कनकं सुवर्णमिति कैराहत्य नोत्कीर्य्यते ।
का वर्णान्तरवर्णना धवलिमा राजैव रूपेषु य
स्तद्योगादपि यावदेति रजतं दुर्वर्णतादुर्यशः ॥ १३७ ॥
खण्डक्षोदमृदि स्थले मधुपयःकादम्बिनीतर्पणात्
कृष्टे रोहति दोहदेन पयसां पिण्डेन चेत् पुण्ड्रकः ।
स द्राक्षाद्रवसेचनैर्यदि फलं धत्ते तदा त्वद्गिरा-
मुद्देशाय ततोऽप्युदेति मधुराधारस्तमप्प्रत्ययः । १३८ ॥

निह्नुतां गोपितां वेद्मि तव निश्वासावेव लते तयोरतिस्मरयोः मधुश्वसनजं वायव्यमस्त्रम् ॥ १३६ ॥

पीतो वर्णेति । मधुरोऽत्यन्तवर्ण्यश्च सोऽयं पीतोवर्णः काये त्वदीये शरीरेऽप्यस्ति स पीतवर्णं बिभ्रत् कनकं कैः सुवर्णं शोभनोवर्णो यस्य तदित्याहत्य नोत्कीर्य्यते सर्वैरपि स्तूयत इत्यर्थः । वर्णान्तराणां नीलपीतादीनां पीतव्यतिरिक्तानां वर्णानां स्तुतिः का वा कुत इत्याह यो धवलिमा धवलत्वं रूपेषु राजा उत्कृष्टये एतस्य धवलिम्नो योगात् सम्बन्धादपि रजतं कर्तृ यावत्साकल्येन दुर्वर्णना दुर्यशः कर्मभूतमेति प्राप्नोति ॥ १३७ ॥

खण्डेति । हे दमयन्ति ! मधु क्षौद्रमेव पयांसि यस्यास्तस्याः कादम्बिन्या मेघमालिकायाः कर्त्र्याः कादम्बिनी मेघमालेत्यमरः । तर्पणात् पूरणाद्धेतोः खण्डस्य शर्कराविशेषस्य क्षोदमृदि चूर्णमृत्तिकारूपे स्थले पिण्डेन पाकविशेषेण पिण्डीभूतेन पयसा क्षीरेणैव दोहदेन वृक्षादिवृद्धिकरेण वस्तुना साधनेन पुण्ड्रकः इक्षुविशेषः रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादय इत्यमरः । रोहति प्रभवति चेत् स पुण्ड्रको द्राक्षारससेचनैः सेकै-

उन्मीलद्गुडपाकतन्तुलतया रज्वा भ्रमीरर्जयन्
दानान्तस्मृतशर्कराचलमथस्तेनामृतान्धः स्मरः ।
नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत् सा भव-
ज्जिह्वायाः कृतिमाह्वयेत परमां मत्कर्णयोः पारणां ॥ १३९ ॥
शोकश्चेत् कोकयोस्त्वां सुदति ! रुदति तद्व्याहराज्ञाकरस्ते
गत्वा कुल्यामनस्तं व्रजितुमनुनये भानुमितज्जलस्थम् ।
बद्धे यद्यञ्जलावप्यनुनयविमुखः स्यान्ममैकग्रहोऽयं
दत्त्वैवाभ्यां तदम्भोऽञ्जलिमिह भवतीं पश्य मामेष्यमाणां ॥१४०॥

यदि फलं धत्ते । तदा मधुरस्य रसस्याधारः आश्रयः मधुरतरा गीः त्वद्गिरां भवद्वचनानां उद्देशाय कथनायोदेति ॥ १३८ ॥

उन्मीलदिति । हे दमयन्ति ! अमृतमेवान्धोऽन्नं यस्य सोऽमृतान्धो देवः सएव धाता शर्कराचमनदानमुक्तं मथीमन्थदण्डस्य पथिमथ्यृभुक्षो टिलोपः । उन्मीलन्त्या विकसन्त्याः गुडस्य पाकादुद्भूतं यातन्तुलतयैव रज्वा प्रग्रहेण साधनेन भ्रमीः भ्रमणानि स्वेनात्मनैव अर्जयन् सम्पादयन् क्षोरस्योदधेः सकाशात् नव्यां सुधां यद्युत्थापयेत् तदा सुधा मत्कर्णयोः परमां पारणाम्भवज्जिह्वायाः त्वद्रसनायाः सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः । कृतिं कार्यं गिरमाह्वयेत प्रतिभटीकुर्यात् स्पर्धायाह्वेङ् तङ् । महाभारते गरुड़स्यामृताहरणार्थोऽनुसन्धेयः ॥ १३९ ॥

शोकइति । हे सुदति ! दमयन्ति ! कोकयोश्चक्रवाकयोः शोकस्त्वां रुदति चेत्तर्हि व्याहर ब्रूहि कुल्याङ्गत्वा एतस्याः कुल्याया जलस्थं सूर्यमनस्तं प्रापितु मह्यमनुनये अभ्यर्थये मया अञ्जलौ बद्धेऽपि एको ग्रहो यस्य स एकश्चन्द्रादिषु मुख्यग्रहश्च निबन्धोपरागार्कादयो ग्रहइत्यमरः । अयं भानुरनुनयाद्विमुखो यदि स्यात्तर्हि आभ्यां कोकाभ्यां अम्भो जलं दत्त्वैव इह प्रासादे भवन्तीं त्वां एष्यमाणं इण् गतावित्यस्य शानचि रूपं मां पश्य ॥ १४० ॥

तदानन्दाय त्वत्परिहसितकन्दाय भवती
निजालीनां लीनां स्थितिमिह मुहूर्त्तं स्थगयताम्।
इति व्याजात् कृत्वाऽऽलिषु वलितचित्तां सहचरीं
स्वयं सोऽयं सायन्तनविधिविधित्सुर्बहिरभूत् ॥ १४१ ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
तस्यागादयमेकविंशगणनः काव्येतिनव्ये कृतौ
भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्ज्वलः ॥ १४२ ॥

हे दमयन्ति! तत्तस्मात्कारणान्निजानामात्मीयानामालीनां इह प्रासादे लीनां गूढां स्थितिं त्वं परिहसितस्य परिहासस्य कन्दायानन्दाय भवति त्वं मुहूर्तं स्थगयतामन्विष्यतु इति व्याजादालिषु सखीषु दमयन्तीं वलितचित्तामासक्तमनस्कां कृत्वा सोऽयं नलः स्वयं सायन्तनं विधिं कर्तुं विधित्सुर्विधातुमिच्छुः सन् बहिरभूत् ॥ १ १ ॥

श्रीहर्षमिति। भैमीभर्तुर्नलस्य यच्चरितं तद्वर्णनमये काव्ये भव्ये नूतने अत्रास्मिन् श्रीहर्षस्य कृतौ एकविंशतिर्गणना यस्यां सोऽयं सर्गोऽगात् समाप्तः ॥ १४२ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां एकविंशतिः सर्गः।

नैषधचरितम्।

द्वाविंशः सर्गः।

उपास्य सान्ध्यं विधिमन्तिमाशारागेण कान्ताधरचुम्बिचेताः।
अवाप्तवान् सप्तमभूमिभागे भैमीधरं सौधमसौ नरेन्द्रः ॥ १ ॥
प्रत्युद्व्रजन्त्या प्रियया विमुक्तां पर्य्यङ्कमङ्कस्थितसज्जशय्यम्।
अध्यास्य तामप्यधिवास्य सोऽयं सन्ध्यामुपश्लोकयति स्म सायं॥२

मल्लिनाथविरचितया जीवातुसमाख्याया व्याख्यायाः दौर्लभ्यात् द्वाविंशसर्गव्याख्यानाय सुतरां नारायणीटीका सन्निवेश्यते।

इदानीं पूर्वसर्गान्तप्रस्तावितं सायङ्कालं वर्णयिष्यन् कविर्द्वाविंशं सर्गमुपक्रमते। उपास्येति। असौ नरेन्द्रो नलः सन्ध्याप्रान्तभावेनान्तिमाशायाः प्रतीच्या अ.श.या दिशो रागेण रक्तवर्णेन हेतुना कान्ताया अधरचुम्बि अधरोष्ठस्मारि चेतो यस्य तादृशः सन्ध्यारागसदृशभैम्यधरस्मारी सन् तद्विरहासहिष्णुतया वहिरवस्थातुमशक्तो यत्र सा विद्यते तं सप्तमे भूमिभागे कक्षायां स्थितं भैम्याः धरं पर्व्वतरूपं सौधं हर्म्यं प्रासादस्य सप्तमीमुपकारिकामवाप्तवान् प्राप। किं कृत्वा। सान्ध्यं सन्ध्यासम्बन्धिनं सन्ध्याजपादिविधिमुपास्य कृत्वा ॥ १ ॥

प्रतीति। सोऽयं नलः सायङ्कालसम्बन्धिनीं सन्ध्यां रात्रिन्दिनसम्बन्धिनं मुहूर्तं भैम्याः पुरउपश्लोकयति स्म श्लोकैः स्तौति स्म। किं कृत्वा। प्रत्युद्व्रजन्त्या सम्मुखमागच्छन्त्या प्रियया विमुक्तमङ्के मध्ये स्थिता सज्जा आस्तृता शय्या तूलिका यत्र तं पर्य्यङ्कमध्यास्य स्वयमधिष्ठाय तां

विलोकनेनानुगृहाण तावद्दिशं जलानामधिपस्य दारान्।
अचालि लाक्षापयसेव येयमपूरि पङ्कैरिव कुङ्कुमस्य ॥ ३ ॥
उच्चैस्तरादम्बरशैलमौले च्युतो रविर्गैरिकगण्डशैलः।
तस्यैव पातेन विचूर्णितस्य सन्ध्यारजोराजिरिहोज्जिहीते ॥४॥

भैमीमपि अधिवास्य तत्रोपवेश्य। पर्य्यङ्कं अधिशीङ् इति कर्मत्वम्। अधिवास्य ण्यन्ताद्वसेर्ल्यप् तस्य धात्वन्तरत्वात् उपान्वध्याङ्वस इति कर्म्मत्वाप्राप्तेस्तामधिवास्येत्यत्र सामर्थ्यात्तत्रैवेति ज्ञेयम्। उपश्लोकयति सत्यापपाशेति णिचि स्म योगे भूते लट् ॥ २ ॥

विलोकनेनेति। हे भैमि! त्वं जलानामधिपस्य वरुणस्य दारान् भार्य्यां पश्चिमां दिशं विलोकनेनानुगृहाण कृतार्थीकुरु तावदादौ विलोकनेनानुगृहाण वर्णनया तु पश्चादित्यर्थः। यावच्चन्द्रोदयादिना प्राच्यां रामणीयकं भवति पश्चिमां दिशं विलोकयेति वा तावच्छब्दार्थः। जलाधिपस्य च भार्य्या दुःखिता विलोकनादिना अनुगृहीतुमर्हा भवतीत्युक्तिः। येयं पश्चिमा दिक् लाक्षापयसाऽलक्तरसेन कृत्वा केनापि अचालीव चालितेव। तथा कुङ्कुमस्य पङ्कैः कृत्वा केनापि अपूरीव। एवंविधा रक्ता दृश्यते यतस्तस्माद्रमणीयामेतां विलोकयेत्यर्थः।

उच्चैरिति। हे प्रिये! रविरेव गैरिकाख्यधातुविशेषसम्बन्धी गण्डशैलः उच्चैस्तरादत्युन्नतादम्बरशैलस्य गगनगिरेर्मौलेः शिखरात् सकाशाच्च्युतः पतितः स्थूलपाषाण एवाधः पतितोऽयच सन्निहितः पातेनोच्चतरगिरिशिखरादधः पतनेन हेतुना विचूर्णितस्य विशेषेण सूक्ष्मचूर्णीकृतस्य तस्यैव गैरिकगण्डशैलस्य सम्बन्धिनी सन्ध्यैव रजोराजिः सन्ध्यासम्बन्धी राग इत्यर्थः। इह सायङ्काले पश्चिमदिशि वा उज्जिहीते उपरिष्टात् प्रसरति। अस्तसमये सूर्य्यस्य रक्तत्वाद्गगनगिरिशिखराच्च्युतत्वाच्च गैरिकगण्डशैलत्वम्। उच्चतरात् प्रदेशात् पतितो गण्डशैल-

अस्ताद्रिचूडालयपक्कणालिच्छेकस्य किं कुक्कुटपेटकस्य ।
यामान्तकूजोल्लसितैः शिखौघैर्दिग्वारुणी द्रागरुणीकृतेयं ॥५॥
पश्य द्रुतास्तङ्गतसूर्य्यनिर्यत्करावलीहैङ्गुलवेत्रयाऽत्र ।
निषिध्यमानाहनि सन्ध्ययाऽपि रात्रिप्रतीहारपदेऽधिकारम् ॥६॥

चूर्णीभवति। चूर्णीभूतस्य रजोराजिरूर्द्ध्वं प्रसरति। तद्रजोराजिरेव सन्ध्यारागः प्रायेणोर्द्ध्वं गच्छति प्रसरतीत्यर्थः ॥ ४ ॥

अस्तेति। हे प्रिये ! कुक्कुटानां पेटकस्य समूहस्य यामान्ते प्रहरान्ते या कूजा शब्दितं तद्वशादुल्लसितैः प्रकाशमानैः किञ्चिदुच्चीभूतैः उत्फुल्लजपाकुसुमतुल्यैः शिखानां शिरसि रक्तचर्म्ममयकेसराणामोघैर्वृन्दैः किमियं वारुणी दिक् द्राक् अकस्मादरुणीकृता रक्तीकृतेत्युत्प्रेक्षा। किम्भूतस्य। अस्ताद्रेश्चूडा शिखरं सैव लयः स्थानं यस्य स च पक्कणः शवरगृहं तस्यालिः समूहस्तत्र च्छेकस्यासक्तस्य शवरैर्गृहेषु सङ्गृहीतस्य, कुक्कुटानां कूजने उन्नमितशिखत्वं जातिः, ते च यामान्ते कूजन्ति सायं समये कूजनादुत्फुल्लशिखावृन्दसम्बन्धादरुणीभवनसम्भवार्थं यामान्तेत्याद्युक्तम् । पक्कणः शवरालयः। गृहासक्ताः पक्षिमृगाश्छेकास्ते इत्यमरः। पेटकं पुस्तकादीनां मञ्जूषायां कदम्बकमिति विश्वः ॥ ५ ॥

पश्येति। सन्ध्ययाऽत्र सायं समये चन्द्रस्य नायिका रात्रिः तत्सम्बन्धिनः प्रतीहारस्य दौवारिकस्य पदेऽधिकारमासादमपि पश्य विलोकय। किम्भूतया। द्रुतं शीघ्रं अस्तङ्गतस्य सूर्य्यस्य निर्यन्ती वहिर्निर्गच्छन्ती करावली किरणपरम्परैव हैङ्गुलं हिङ्गुलख्यं रञ्जकरक्तद्रव्यविशेषेण रक्तं वेत्रं दण्डविशेषोऽस्यास्तया। किम्भूते पदे। निषिध्यमानं निवार्य्यमाणप्रवेशं अह्नो दिनं यस्मिन्। स्त्रिया हि दौवारिकी स्त्र्येव युक्तेति सन्ध्यैव रात्रेर्दौवारिकी जातेत्यर्थः। सूर्य्योऽस्तमितो दिनं गतं रात्रिरागतेति सायंसन्ध्यया ज्ञाप्यत इति भावः। दौवारिक्यपि हैङ्गुलवेत्रपाणिः सती प्रविशन्तं कमपि प्रतिषेधयति। तिर्य्यक्करावलीति पाठे तिर्य्यक् प्रसारिणश्च ते कराश्चेति। अहनीत्यत्र तत्पुरुषत्वाभावाट्टजभावः ॥ ६ ॥

भूषास्थिदाम्नस्त्रुटितस्य नाट्यात् पश्योडुकोटीकपटं वहद्भिः।
दिङ्मण्डलं मण्डयतीव खण्डैः सायं नटस्तारकराट्किरीटः॥८
कालः किरातः स्फुटपद्मकस्य वधं व्यधाद्यस्य दिनद्विपस्य।
तस्यैव सन्ध्या रुचिराऽस्रधारा ताराश्च कुम्भस्थलमौक्तिकानि॥९
सन्ध्यासरागः ककुभो विभागः शिवाविवाहे विभुनाऽयमेव।
दिग्वाससा पूर्व्वमवैमि पुष्पसिन्दूरिकापर्व्वणि पर्य्यधायि॥१०॥

भूषेति। हे भैमि! तारकराट् चन्द्रः किरीटे यस्य स शम्भुः सायं नटति सायं नटनर्त्तकः सन् उद्धतात् नाट्यात् नृत्ताद्धेतोस्त्रुटितस्य भूषास्थिदाम्नो भूषणास्थिमालाया उच्छलितैः खण्डैः शकलैः तैरेव उडुकोटीकपटं कोटिसङ्ख्यानक्षत्रव्याजं वहद्भिर्धारयद्भिरिह सायंसमये दिङ्मण्डलं मण्डयति पश्य। एतानि नक्षत्राणि न किन्तु ताण्डवत्रुटितास्थिमालोच्छलच्छकलान्येव दिक्षु शोभन्त इत्यर्थः। अन्योऽपि चन्द्रतुल्यकिरीटो नटी नृत्यंस्त्रुटितहारखण्डैस्तावृन्दं मण्डयति। मण्डयतीवेति पाठे उत्प्रेक्षा॥ ८॥

कालेति। हे प्रिये! कालः सन्ध्यासमय एव किरातोऽथ च कृष्णवर्णो हिंसकत्वान्मृत्युरूपो वा कालो गिरिमहारण्यसञ्चारी शबरः स्फुटानि विकसितानि पद्मानि यस्मिन्, अथ च प्रकटीभूतशुण्डदण्डाग्रे प्रकाशमानं पद्मकं रक्तविन्दुवृन्दं यस्मिन् तादृशस्य दिनरूपस्य द्विपस्य वधं व्यधादकरोत्। तस्यैवेह तस्य करिणो रुचिरा रम्या सन्ध्याऽस्रधारा रुधिरधारा। ताराश्च नक्षत्राणि विदारिततदीयकुम्भस्थलमौक्तिकानि, सन्ध्यारागो रक्तधारा ताराश्च स्थूलमुक्ता इव शोभन्त इत्यर्थः। स्फुटपद्मकस्येति बहुव्रीहौ कप्॥ ९॥

सन्ध्येति। विभुना प्रभुणा हरेण पूर्वं शिवायाः पार्व्वत्याः विवाहावसरे सन्ध्यया सरागो रक्तवर्णोऽयमेव ककुभः पश्चिमाशाया विभागः प्रदेशः पुष्पसंयुक्ता सिन्दूरिका रक्तवस्त्रं तत्सम्बन्धिनि तद्योगात् पुष्प-

महानटः किं नु स भानुरागे सन्ध्याय सन्ध्यां कुनटीमपीशाम्।
तनोति तन्वा वियताऽपि तारश्रेणिस्रजा साम्प्रतमङ्गहारम्॥ ७

इदानीं सन्ध्यानक्षत्रयोगं वर्णयति। महानट इति। अङ्ग! हे भैमि! महान् सन्ध्योपासनादिविषयेऽतिप्रशस्तस्तथाऽटति गच्छतीत्येवम्भूतः कालः स प्रकृतः सायन्तनी, यद्वा महान् परमेश्वरो नटो नर्त्तको यस्मिन्, सन्ध्याकाले हि ईश्वरो नृत्यति स प्रकृतः सायंसन्ध्यासमयः। भानोः सूर्य्यस्य रागे लौहित्ये सति अस्तमयानन्तरं सूर्य्यस्य रागमात्रेऽवशिष्टे सति सन्ध्यां सन्ध्याकान्तिं किञ्चित् पीतरक्तवर्णत्वात् कुनटीं, नेपाली कुनटीगोलेत्याद्यभिधानान्मनःशिलारूपां, तथा ईशमपि स्वकालस्वामिनीं वा अथ पितृप्रसूरूपब्रह्मत्वाद्देवतारूपां, अथ च समृद्धिमतीं सन्ध्याय सम्यग्विचिन्त्य साम्प्रतमिदानीं तन्वा किञ्चिदुन्नतया सन्ध्यारागतिरोहितकान्तितया वा कृशया किञ्चिद्दृश्यया। तथा वियताऽपि गगनरूपया लक्षणया यावद्गगनं विस्तीर्णया च। यद्वा आसामस्त्येन व्याप्तं वियद्यया गगनव्यापिन्या च तारश्रेण्या नक्षत्रपरम्परारूपया स्रजा पुष्पादिमालया हारं तनोति विरचयति किं। यद्वा ताराणां शुभ्रमौक्तिकानां श्रेणिर्यत्र तादृश्या ग्रथितमौक्तिकमालया हारविरचनं युक्तमिति सन्ध्याकालः सन्ध्यामेवम्विधां सञ्चिन्त्य नक्षत्रपरम्परामेव विरचयति किमित्यर्थः। सन्ध्यारागः क्रियानवशिष्टोऽस्ति शुक्लातुल्यानि नक्षत्राणि च किञ्चिद्दृश्यानि जातानीति भावः। तथा तारश्रेणिस्रजोपलक्षितेन तद्युक्तेन वियता गगनेनैव हारं तनोतीति वा। सन्ध्यामेवम्विधां विज्ञाय तूष्णीम्भूत, इति न किन्त्वौचित्याद्विशिष्टया तारश्रेणिस्रजा हारमपि विरचयतीत्यर्थ इति वा अपि शब्दार्थः। अथ च स प्रसिद्धो महानटस्ताण्डवनृत्तकर्त्ता शिवः भानोः सूर्य्यस्य रागे सति अस्तमितार्द्धे सूर्य्ये सतीति यावत्। तत्र सन्ध्यासमये मनःशिलातुल्यवर्णां अचिरस्थास्नुत्वात् कुत्सितनर्तकीरूपां वा ईशां देवीं सन्ध्याय सम्यग् ध्यात्वा सायं सन्ध्यावन्दनं कृत्वाऽष्टमूर्त्तिषु मध्ये तारापरम्परैव माला यस्यां तया गगनरूपयाऽपि अमूर्त्तयाऽपि तन्वा इदनीं सन्ध्यावन्दनानन्तरं अङ्गहार मुख-

करपार्श्वीयाङ्गानां विक्षेपं करोति किमिति वितर्कौ । अमूर्त्तस्याङ्गहारकरणं विचित्रमिति विरोधार्थोऽपिशब्दः । न केवलं चन्द्रसूर्य्यभोगादिभूषितयैव तन्वाऽङ्गहारं करोति किन्तु वियताऽपि तन्वेति समुच्चयार्थो वा । ईश्वरोऽपि सायं समये नृत्यति । भानुरागे मनःशिलातुल्यवर्णां सन्ध्यामपीशां सहचरीं पार्व्वतीं विचिन्त्य विशिष्टया वियद्रूपयाऽपि तन्वाऽङ्गहारं तनोति । पार्व्वतीसमीपेऽपीश्वरो नृत्यति । अथ च महानतिप्रवीणो नटः कुत्सितां नटीं नृत्तेऽनतिचतुरामपि सन्ध्यां वयःसन्धौ वर्त्तमानां तरुणीं रसभावसन्धौ वर्त्तमानां वा रसभावज्ञाम् । अत एव सभायां अनुरागे ईशां सन्ध्यानुरागजनने समर्थां सञ्चिन्त्य वियत्तुल्ययाऽतिविशालया शुद्धमौक्तिकपरम्परारूपया मालयोपलक्षितया तन्वा अङ्गहारं तनोति तदसाम्प्रतं किन्तु रसभावादिजनयन्त्या तया सन्ध्यानुरागे समुत्पादितेऽपि नृत्तकर्म्मकौशलेनापि सभ्यानुरागार्थं स्वयमङ्गहारं तनोतीति युक्तमेवेत्यर्थः । अथ च महानर्त्तको वयःसन्धौ वा वर्तमानां तया समृद्धिमतीमपि स्त्रियं कुत्सितां नटीं नृत्तानभिज्ञां ज्ञात्वा सभानुरागे निमित्ते विशिष्टया तन्वा स्वयमङ्गहारं तनोति तदसाम्प्रतं किंतु अपि तु तस्या नृत्तकौशलाभावान्नृत्तेन सभानुरञ्जने सामर्थ्याभावात् सभानुरञ्जनार्थं स्वयमेव निपुणं नृत्यतीति युक्तमेवेत्यर्थः । अथ वा अन्योऽपि महानतिसमृद्धो अटति सर्व्वत्र गच्छति तादृशोऽतिचञ्चलोऽतिप्रसिद्धो नटः कुनटीमपि नृत्तविद्यायामपि मया कान्त्या कृत्वाऽपि योऽनुरागलक्षिपये ईशां सौन्दर्य्यातिशयेनैव रागमुत्पादयन्तीं तथा शैशवतारुण्ययोः सन्धौ वर्त्तमानां प्रादुर्भूतयौवनां रसभावसन्धिस्थत्वाद्रसभावज्ञां वा सञ्चिन्त्य कायकान्त्याऽनुरागे सति कुनटीमपि तरुणीं रसभावज्ञां वा तद्वेशां सम्पन्नाञ्च विचिन्त्य तन्वा तदीयशरीरस्यातिविशिष्टतया शुद्धमौक्तिकमालया हारं विरचयति तत्रानुरक्तः सन् तस्यै मुक्ताहारं वितरतीत्यर्थः । एवमन्या अपि योजनाः सुधियोहनीयाः । सभानुरागैः सन्ध्ययेति पाठो बहुषु पुस्तकेष्वदृष्टत्वादुपेक्ष्यः । नटः पचाद्यच् । सन्ध्या दिगादित्वाद्यत् । तारशब्दस्य नक्षत्रकनीनिकाभिधायित्वं दशमसर्गे एवोक्तम् ॥ ७ ॥

सतीमुमामुद्वहता च पुष्पसिन्दूरिकार्थं वसने सुनेत्रे ।
दिशौ द्विसन्ध्यीमभि रागशोभे दिग्वाससोभे किमलम्भिषातां ॥११॥

सिन्दूरिकाख्ये पर्व्वण्युत्सवे पर्य्यधायि परिहितः। यतो दिग्वलयमेव वासो यस्य तेन रक्तवस्त्रपरिधानावसरेऽपि दिग्वसनादौचित्यात् रक्तदिग्भाग एव परिहित इत्येवमभि शङ्के। विवाहस्य चतुर्थे दिने प्रथमदिनपरिहितानि वस्त्राणि प्रक्षालनार्थं परित्यज्य पुष्पसिन्दूरकाख्यपर्व्वणि कौसुम्भादिरक्तवस्त्राणि वधूवरेण परिधीयन्त इति वृद्धाचारः। ततेशस्य दिग्वसनत्व इतः पश्चिमभाग एवानेन परिहित इत्यर्थः। वर्णकभूतपुष्पस्थाने ताराः सिन्दूरिकास्थाने सन्ध्यारागः पश्चिमदिग्भाग इति भावः ॥ १० ॥

प्रातः सायंसन्ध्ययोः प्राचीप्रतीच्योर्द्वयोरपि तुल्यवर्णत्वात् सायंसन्ध्यारक्तपश्चिमदिश एव पुष्पसिन्दूरिकात्वं कथं वर्ण्यत इत्याक्षेपे तस्य परिहारार्थं प्राच्या अपि तद्भावमाह। सतीमिति। हे सुनेत्रे ! सतीं दाक्षायणीमुमां पार्व्वतीं च उद्वहता परिणयता दिग्वाससा हरेण पूर्व्वोक्तपुष्पसिन्दूरिकार्थं द्विसन्ध्यीमभि द्वे अपि प्रातःसायंसन्ध्ये लक्षीकृत्य द्वे प्राचीप्रतीच्यौ दिशावेव रागेण रक्तवर्णेन शोभा ययोस्ते रक्तवर्णेन शोभेते इति वा। तादृशे रक्ते उभे द्वे वसनेऽलम्भिषातां प्राप्ते किम्। विवाहद्वये सन्ध्याद्वयरक्तदिग्द्वयमेव दिग्वसनत्वाद् रक्तवस्त्रद्वयं शिवेन लब्धमित्यहं मन्य इत्यर्थः। शिवेन द्वे दिशावेव वस्त्रे द्वे सन्ध्ये लक्षीकृत्य रागेण रञ्जकद्रव्येण कृत्वा ये शोभे कर्मभूते ते प्रापिते किम्। विवाहे वस्त्रं रञ्जनाय कस्यचित् करे समर्प्यते तस्माच्छिवेन दिग्द्वयरूपे मम वस्त्रे भवतीभ्यां रक्तशोभे प्रापनीये इति सन्ध्याद्वयं आज्ञप्तं स दिग्द्वयं रक्तशोभं चकारेत्यर्थ इति वा। सुनेत्रीति पाठे संयोगोपधादिति निषेधात् ङीष् चिन्त्यः। द्विसन्ध्यी समाहारे द्विगोरेकत्वे आबन्तो वेति स्त्रीत्वे च द्विगोरिति ङीपि सन्ध्याशब्दस्य तद्धितान्तपदत्वाद्धलस्तद्धितस्येति यलोपः, अभिरभागे इत्यभेः कर्मप्रवचनीयत्वात् तद्योगे द्वितीया। गत्यर्थत्वाद्णौ कर्त्तुः कर्मत्वम् ॥ ११ ॥

आदाय दण्डं सकलासु दिक्षु योऽयं परिभ्राम्यति भानुभिक्षुः।
अब्धौ निमज्जन्निव तापसोऽयं सन्ध्याभ्रकाषायमधत्त सायम् ।१२
अस्ताचलेऽस्मिन्निकषोपलाभे सन्ध्याकषोल्लेखपरीक्षितो यः।
विक्रीय तं हेलिहिरण्यपिण्डम् ताराबराटानियमादित द्यौः ।१३

आदायेति। योऽयं भानुरेव भिक्षुः परिव्राट् दण्डं पारिपार्श्विकमेव वैष्णवयष्टिमादाय सकलासु दिक्षु परिभ्रमति सोऽयं तापसः परिव्राट् सायङ्काले अब्धौ निमज्जन् पातालं प्रविशन्नथ च बहुजले जलाशये स्नानं कुर्वन् सन्ध्यायामभ्रं गगनं तदेव काषायं रक्तवस्त्रमधत्तेव, उपरि खस्योर्द्ध्वभागः अथ चोच्छ्रितस्योपरि दण्डस्योपरि वा निजमस्तकोपरि वा छत्त्रानिव। एव यतिरपि बहुकालावस्थानस्य निषिद्धत्वादुक्तलक्षणः सन् परिभ्रमन् काषायं वस्त्रं धारयति। काषायया इव सन्ध्यया शोभत इत्यर्थः। माठरः पिङ्गलो दण्डः, भिक्षुः परिव्राट् कर्मन्दीति चामरः। काषायं तेन रक्तं इत्यण् ॥ १२ ॥

अस्तेति। यः सूर्य्यः अस्मिन् प्रतीच्यां वर्त्तमाने निकषोपलाभे सुवर्णपरीक्षापाषाणतुल्येऽस्ताचले सन्ध्याराग एव कषोल्लेखः घर्षणोल्लेखस्तेन परीक्षित इयं द्यौस्तं हेलिं सूर्य्यमेव हिरण्यपिण्डं विक्रीय विनिमयेन कस्मैचिद्दत्त्वा तारारूपान् वराटकान् कपर्द्दकान् अदित जग्राह। उत्तमं सुवर्णं रक्तपीतं भवति तथा च रक्तपीतसुवर्णसूर्य्यगोलकस्य निकषपरीक्षितसुवर्णरेखेव सन्ध्या दृश्यते। ताराश्च वराटका इव दृश्यन्त इत्यर्थः। द्यौरिति लोकव्यवहारानभिज्ञत्वद्योतनार्थं स्त्रीलिङ्गनिर्देशः। स्त्री हि सुवर्णं दत्त्वा मूर्खतया वराटकान् गृह्णाति धूर्त्तेन वञ्च्यते च। वराटकस्य व्यवहारे देशे सुवर्णमपि दत्त्वा वराटक एव गृह्यते ॥ १३ ॥

पचेलिमं दाडिममर्कविम्बमुत्तार्य्य सन्ध्या त्वगिवोज्झिताऽस्य ।
तारामयं वीजभुजाऽदसीयं कालेन निष्ठ्यूतमिवास्थि यूथम् १४
ताराततिर्वीजमिवादमादमियं निरष्ठीवि यदस्थियूथम् ।
तन्निष्कुलीकृत्य रविं त्वगेषा सन्ध्योज्झिता पक्त्रिमदाडिमं वा १५
सन्ध्यावशेषे कृतताण्डवस्य चण्डीपतेर्यत्पतनाभिघातात् ।
कैलासशैलस्फटिकाश्मखण्डैरमण्डि पश्योत्पतयालुभिर्द्यौः ॥१६

पचेलिममिति । दाडिमं वीजभुजा कालेन रक्तमर्कविम्बमेव पचेलिमं तरोरुपर्य्येव स्वयं पक्वं दाडिमफलमुत्तार्य्य गगनतरोस्त्रोटयित्वा वीजग्रहणार्थं भित्त्वा वा सन्ध्यारूपा त्वगिव अस्य दाडिमस्य पक्वत्वाद्रक्तकान्तिरेवोज्झिता परित्यक्ता, तद्वीजभक्षणार्थमुपरितनवीजकोशवत् सन्ध्या पृथक् कृता । तथा वीजभक्षणानन्तरं तारामयं तारारूपं अदसीयममुष्य दाडिमस्य अमीषां वीजानां वा सम्बन्धि अस्थ्नां वीजमध्यस्थले श्वेतकणानां यूथं वृन्दं निष्ठ्यूतमिवोद्गीर्णमिव, वीजानि भक्षयित्वा गृहीतं रसमन्तर्गतश्वेतकणावृन्दं पुनः फूत्कृतमिव । न हि कालादृते सूर्य्यदाडिमं भक्षितुं समर्थः । अन्योऽपि दाडिममुत्तार्य्य तत्त्वचं परित्यज्य वीजान्यास्वाद्य गृहीतरसान् वीजकणान् फूत्कृत्य त्यजति ॥ १४ ॥

तारेति । सामर्थ्यात् कालेन कर्त्रा रविमेव तत् पक्त्रिमं पचेलिमं दाडिमं निष्कुलीकृत्य निर्गतवीजकुलं कृत्वा वीजरूपं सारं गृहीत्वा तदीया त्वगेवैषा सन्ध्या उज्झिता, वाशब्दः सम्भावनायामुज्झिता किमित्यर्थः । तत्किमित्याशङ्क्याह । वीजानि आदमादं भक्षयित्वा अस्य सूर्य्यरूपस्य पक्वदाडिमस्य संवन्धि अस्थियूथमिव इयं तारातति: निरष्ठीवि निष्ठ्यूता । जग्ध्वाजग्ध्वा इति आदमादं अदेराभीक्ष्ण्येन द्विर्वचनञ्च । निरष्ठीवि कर्मणि चिण् निष्कुलीकृत्य निष्कूलान्निष्कोषणे इति डाच् । क्षेपकोऽयं श्लोकः ॥ १५ ॥

सन्ध्येति । हे प्रिये ! सन्ध्यावशेषे सन्ध्यावन्दनान्ते कृतं ताण्डवं नृत्यं येन तस्य चण्डीपतेः पदोश्चरणयोर्द्वयतलेनाभिघाताद्धेतोः उत्पत-

इत्थं ह्रिया वर्णनजन्मनेव सन्ध्यामपक्रान्तवतीं प्रतीत्य ।
तारातमोदन्तुरमन्तरिक्षम् निरीक्षमाणः स पुनर्बभाषे ॥ १७ ॥
रामेषुमर्मव्रणजार्त्तिवेगाद्रत्नाकरः प्रागयमुत्पपात ।
ग्राहौघकिर्मीरितमीनकम्बु नभो न भोः कामशरासनभ्रूः ॥ १८

यालुभिरुत्पतनशीलैरुच्छलितैः कैलासशैलसम्बन्धिस्फटिकात्मना खण्डैः शकलैः द्यौरमण्डि अलङ्कृता पश्य, कैलासस्फटिकखण्डा एव गगने ताराक्पेण शोभन्ते। उत्पतयालुभिः स्पृहि गृहीत्यालुच् ॥ १६ ॥

इत्थमिति। स नलः पुनर्भैमीं बभाषे। किम्भूतः। इत्युक्तप्रकारेण वर्णनजन्मना स्तुतिजातया ह्रियेव अपक्रान्तवतीं निर्गतां सन्ध्यां प्रतीत्य निश्चित्य अन्तरिक्षं गगनं तारातमोभ्यां दन्तुरितं मिश्रितं निरीक्षमाणः। अन्योऽप्युत्तमो निजवर्णनजातलज्जयाऽपक्रामति ॥ १७ ॥

रामेति। भोः! हे कामशरासनभ्रूः! कामशरासनमेव भ्रुवौ यस्याः भ्रूदर्शनमात्रेण कामोद्गमकारिणि! भैमि! रामस्य राघवस्य जामदग्न्यस्य वा इषवो मर्मणो व्रणनाद्भेदनाद्धेतोरुत्पन्ना आर्त्तिः पीडा तस्या वेगादाधिक्याद्धेतोर्निजस्थाने स्थातुमशक्तः सन् भीत्या रत्नाकर एवायं प्राक् तस्मिन्नवसरे उत्पपात ऊर्द्ध्वमागात्, नेदं नभो यः पूर्वमुत्पपात सः श्यामजलः स्फुटरत्नगर्भो रत्नाकर एवायं न त्वेतन्नभ इत्यर्थः। कीदृशः। ग्राहाणां जलचारिणां जन्तूनामोघैः किर्मीरिता मिश्रिता तत्सहिता मीनाः कम्बवः शङ्खाश्च यस्मिन्। नभस्तु ग्रहसम्बन्धि ओघः शुक्रबृहस्पत्यादिताराग्रहसमूहो ध्रुवमण्डलग्रहसम्बन्धी समूहो वा, तेन मिश्रितौ मीनाख्यो राशिः कम्बुः शङ्खाकारविशाखानक्षत्रञ्च यस्मिन्। रघुनाथेन किल सेतुबन्धसमये शरेण समुद्रो भेत्तुमारब्ध इति तावन्मात्रेण पीड़ाविषय उत्पतित इत्युच्यते। परशुरामेणापि निजवसत्यर्थं समुद्रो बाणेन परास्तः सन्नुत्पतितः, समुद्रजलस्यैवायं कालिमा न तु गगनस्येत्यर्थः। समुद्रस्याधोदेशे स्थितानि रत्नग्राहादीनि अधःस्थितेन

मोहाय देवाप्सरसां विमुक्तास्तारा: शरा: पुष्पशरेण शङ्के ।
पञ्चास्यवत् पञ्चशरस्य नाम्नि प्रपञ्चवाची खलु पञ्चशब्दः ॥ १९ ॥
नभोनदीकूलकुलायचक्रीकुलस्य नक्तं विरहाकुलस्य ।
दृशोरपां सन्ति पृषन्ति तारा: पतन्ति तल्लक्ष्मणानि धारा:२०

जलेन सुखेन द्रष्टुं शक्यन्ते । मकरकर्कटादयः साक्षान्मीनादय एव । न तु राश्यादिभूताः शिष्टाश्च ताराः समुद्रमौक्तिकान्येव न तु तारा इत्यादि ज्ञातव्यम् । शरासनभूरित्युवङ्स्थानत्वान्नदीत्वाभावाद्ध्रस्वत्वाभावः । ह्रस्वपाठस्तु सहैकवंशप्रभवन्निति वत् समर्थनीयः । यद्वा शिष्टकविप्रयोगदर्शनाद् ज्ञातव्यम् ॥ १८ ॥

मोहायेति । हे भैमि ! पुष्पशरेण कामेन देवानामप्सरसाञ्च मोहायान्योन्यमत्यन्तानुरागसञ्जननार्थं देवादीनामुपरि वर्त्तमानत्वाद्विमुक्ता ऊर्द्धं क्षिप्ताः, शुभ्रपुष्परूपाः शरा एव तारा इत्यहं शङ्के । ननु कामस्य पुष्पशरत्वेऽपि पञ्चवाणत्वात् ताराणां बहुतरत्वात् कथं कामवाणत्वमित्याशङ्क्य समर्थयते । खलु यस्मात् पञ्चशरस्य नाम्नि पूर्वपदत्वेन वर्त्तमानः पञ्चशब्दः प्रपञ्चवाची प्रकृष्टः पञ्चो विस्तारः तद्वाचकः, न तु सङ्ख्यावाचकः, पचि विस्तारवचने इति स्वार्थणिजन्ताद्धातोः पचाद्यचि पञ्चयन्ति विस्तृता भवन्ति पञ्चाः शरा यस्येति विग्रहो न तु पञ्चसङ्ख्याकाः शरा यस्येति, तस्मात् पुष्पवाणत्वं ताराणां युक्तमेवेत्यर्थः । कस्येव । पञ्चास्यवत् "सिंहो मृगेन्द्रः पञ्चास्यः" इति सिंहाभिधायिनि पञ्चास्यशब्दे सिंहस्य पञ्चसङ्ख्यमुखत्वाभावात् पञ्चयति विस्तृतं भवति पञ्चं विस्तृतमास्यं यस्यासौ पञ्चास्य इति व्युत्पत्त्या पञ्चशब्दो यथा विस्तारवाची तथेति व्यासः । प्रपञ्चो विस्तार इति हलायुधः ॥ १९ ॥

नभ इति । नक्तं विरहेणाकुलस्य पीड़ितस्य नभोनद्या मन्दाकिन्याः कूलमेव कुलायः स्थानं यस्य तस्य चक्रीकुलस्य चक्रवाकीसमूहस्य दृशोर्नेत्रयोरपामश्रुजलानां पृषन्ति विन्दवः सन्ति त एव तारका अधः-

अमूनि मन्ये सुरनिर्झरिण्या यादांसि गोधा मकरः कुलीरः ।
तत्पूरखेलत्सुरभीतिदूर मग्नान्यधः स्पष्टमितः प्रतीमः ॥२१
स्मरस्य कम्बुः किमयञ्चकास्ति दिवि त्रिलोकीजयवादनीयः ।
कस्यपरस्योडुमयैः प्रसूनैर्वादित्रसृष्टिर्घटते भटस्य ॥ २२ ॥

स्थितैर्जनैर्दृश्यन्ते। तथा तासां ताराणां सङ्क्रमणानि पुण्यक्षयवशाद्भूमिं प्रत्यागमनानि गलद्बाष्पजलानां धारा एव पतन्ति। द्वयोः सन्ति चिरस्थितिमन्ति यानि वाष्पवृषन्ति तानि तारा इति वा। तत्सङ्क्रमणानि स्थितताराप्रतिबिम्बभूतानि तत्तुल्यानि पतन्त्यधःपातीनि यानि वृषन्ति तानि धारा अम्बुप्रवाहाः तासां ताराणां सङ्क्रमणानि वीथयो मेषादिसङ्क्रान्तयो वा। धारा अश्रूणां प्रवाहा इति वा। स्त्रियो हि विरहमसहमाना रुदन्ति पतन्तीति तिङन्तं। वृषद्विशेषण वा ॥ २० ॥

अमूनीति। हे प्रिये! गोधाख्यास्तारा गोधा मकरराशिसम्बन्धिन्यस्ताराः मकरः कुलीरः कर्कटराशिस्तत्सम्बन्धिन्यस्तारा अमूनि प्रत्यक्षदृश्यानि अमरनिर्झरिण्या मन्दाकिन्या यादांसि जलजन्तव एवेत्यहं मन्ये। गोधा मत्स्याः कर्कटा अपि जले वर्त्तन्ते उपरि च दृश्यन्ते तस्माद्देवनद्या यादांस्येवैतानीत्यर्थः। तर्हि उपरिवर्त्तमानेन द्रष्टुं योग्या न त्वधःस्थितेनेत्यत आह तस्या नाकनद्याः पुरे प्रवाहे खेलन्तः क्रीडन्तः सुरास्तेभ्यः सकाशाद्भीत्या दूरतलपर्य्यन्तमग्नानि, अत एव जलतलगामित्वादधोभागे इतो भूदेशादपि स्पष्टं सुखेन जानीमः। भूभागे स्थिता अपि जलगामित्वाद्गोधादियादांसि व्यक्तं जले पश्याम इत्यर्थः। गोधाकारं ध्रुवमण्डलं, गोधा ज्येष्ठा वा ॥ २१ ॥

स्मरस्येति। त्रिलोकीविजये वादनीयो वादनार्हः स्मरस्य सम्बन्धी अयं प्रत्यक्षदृश्यो विशाखानक्षत्ररूपः कम्बुः शङ्खः दिवि चकास्ति किम्। उच्चतरदेशे वादितवाद्यं सर्व्वलाकर्ण्यत इति गगने स्थापितो लोकत्रयविजयवादनार्हः कामस्यैव कम्बुः किमित्यर्थः। यस्मादपरस्य कस्य भटस्योडुमयैस्तारारूपैः प्रसूनैः कृत्वा वादित्रसृष्टिः वाद्यनिर्माणं घटते,

किं योगिनीयं रजनी रतीशम्
याऽजीजिवत् पद्मममूमुहच्च।
योगर्द्धिमस्या महतीमलग्न-
मिदं वदत्यम्बरचुम्बि कम्बु॥ २३॥
प्रबोधकालेऽहनि बाधितानि
ताराः खपुष्पाणि निदर्शयन्ती।

स्मरस्यैव धनुषः पुष्परूपत्वदर्शनात् तदीयस्यैव वाद्यस्य पुष्परूपत्वसम्भावनायुक्तत्वात्। ताराकुसुमरूपः कामशङ्ख एवाऽयं गगने शोभते न त्वन्यदीय इत्यर्थः॥ २२॥

किमिति। इयं रजनी योगिनी स्त्रीपुंसयोगवती, अथ च शाक्तमन्त्रसिद्धा मारणोच्चाटनाद्यभिज्ञा स्त्री किम्। या रतीशं दिवा निर्जीवमिव बीजसन्निधेरजीजिवत् सञ्जीवं चक्रे, पद्ममसूमुहत् पद्मानि च समकोचयत्। रात्रौ च स्त्रीपुंसयोगे काम उद्दीप्तो भवति पद्मानि च सङ्कुचन्ति। अलग्नं निराधारं अम्बरचुम्बि आकाशवासि तारामालात्मकत्वादलग्नमराशिभूतं वा इदं प्रत्यक्षरूपं कम्बु ताराङ्गपः शङ्खोऽस्या रात्रियोगिन्या महतीं योगर्द्धिं वदति, दिवा दर्शनाभावादिदानीं दृश्यमानः शङ्खो रात्रिर्जातेति कथयति। योगशक्तिं विना निराधारं वस्तु कथं स्थापयेत्। योगिन्यपि मृतमपि जीवयति किञ्चिच्च मोहयति मूर्च्छां प्रापयति भ्रान्तं करोति वा, तस्माद्योगिनी किमित्युत्प्रेक्षा। कम्बुशब्दस्य नपुंसकत्वमप्यस्तीति पूर्वमेवोक्तं स्मर्त्तव्यम्। अजीजिवदमूमुहदिति णौचङ्गीत्युपधा ह्रस्वः॥ २३॥

प्रबोधेति। हे प्रिये! प्रबोधकाले जागरणसमयेऽथ सम्यग्ज्ञानोत्पत्तिसमयेऽहनि दिवा बाधितानि सूर्यदीप्तिध्वस्तकान्तीनि ताराः नक्षत्ररूपाणि खपुष्पाणि गगनसम्बन्धीनि कुसुमानि नितरां दर्शयन्ती प्रकाशयन्ती, अथ च दृष्टान्तीकुर्वती शून्याध्वनि बौद्धाध्वनि शून्यादिदर्शने विषमयोगिनी काचित् प्रव्रजितेवेयं निशा स्फुटामतितरां दृष्टमपि

निशाऽऽह्व शून्याध्वनि योगिनीयम्
मृषा जगद्दृष्टमपि स्फुटाभम् ॥ २४ ॥
एणः स्मरेणाङ्कमयः सपत्री-
कृतो भवद्भ्रूयुगधन्वना यः।
मुखे तवेन्दौ लसता स तारा-
पुष्पालिबाणानुगतो गतोऽयम् ॥ २५ ॥
लोकाश्रयो मण्डपमादिसृष्टि-
ब्रह्माण्डमाभात्यनुकाष्ठमस्य।

प्रत्यक्षेण प्रतीयमानमपि स्थावरजङ्गमात्मकं सकलं जगन्मृषाऽसत्यमाह ब्रूते। बौद्धादिदर्शने हि ज्ञानस्यैव घटाद्याकारस्यानतिरिक्तं सर्वं मिथ्येति बोध्यते। योगिन्यपि प्रपञ्चो मिथ्येति दर्शयति तथेयमपि रात्रिरह्न्यपि पुष्पतुल्यानि नक्षत्राणि निजयोगात् गगने दर्शयतीति भावः। निदर्शनं करोति वेति प्रतीयमानोत्प्रेक्षा ॥ २४ ॥

एण इति। हे भैमि! तव मुखे एवेन्दावाह्लादकत्वादिगुणयोगाच्चन्द्रे लसता प्रकाशमानेन, तथा भवद्भ्रूयुगमेव धनुर्यस्य तेन स्मरेण तव मुखेन्दौ विमतो मृगवांश्चन्द्रत्वात् सम्प्रतिपन्नवदित्यनुमानप्रसिद्धो योऽङ्कमयः कलङ्करूप एणो मृगः सपत्रीकृतः मुखे, तच्चापदर्शनाज्जठरावस्थितपत्रस्यैव बाणस्यापरपार्श्वे निर्गमनं यथा भवति तथा व्यथितः, स एव मृगः तारापुष्पालिर्नक्षत्ररूपपुष्पपङ्क्तिस्तल्लक्षणो बाणस्तेनानुगतः सन् सहित एव पलाय्य गतोऽयं गगने दृश्यते किम्। चन्द्रे मृगेण भाव्यं स चात्र नास्ति, स चापः कामस्य मुखे लसति, गगने च मृगशिरो नक्षत्रं मृगाख्यबाणाकारपुष्पतुल्यतारानुगतं दृश्यते, तर्हि कामेन विध्यन्तर्गतपत्रपार्श्वबहिर्निर्गतबाणसहितो व्यथितः पलाय्य गतः स एषोऽयं मृगो दृश्यते किमिति प्रतीयमानोत्प्रेक्षा। सपत्रनिष्पत्रादतिव्यथन इति डाच् ॥२५॥

लोकेति। हे भैमि! ब्रह्माण्डं आदौ सर्व्वस्मादपि पूर्व्वं सृष्टिनिर्म्माणं यस्य, अथ च चिरकालनिर्म्मितं पुराणं मण्डपमिति आभाति

स्वकान्तिरेणूत्करवान्तिमन्ति
घुणव्रणद्वारनिभानि भानि ॥ २६ ॥
शचीसपत्न्यां दिशि पश्य भैमि !
शक्रेभदानद्रवनिर्झरस्य ।
पोप्लूयते वासरसेतुनाशा-
दुच्छृङ्खलः पूर इवान्धकारः ॥ २७ ॥

तत्र दिवः शोभत इत्यर्थः। यतस्त्रयाणामपि लोकानामाश्रयः ब्रह्माण्डाधारत्वाज्जगतां मण्डपोऽपि लोकानामाश्रयः तच्छायानिवासित्वाल्लोकानामाश्रयनामत्वाच्च तस्य। अत एवास्य ब्रह्माण्डमण्डपस्यानुकाष्ठं दिशि दिशि एतत्सम्बन्धिनीषु सर्व्वासु दिक्षु, अथ चैतत्सम्बन्धीनि काष्ठानि दारूणि लक्षीकृत्य तेषु भानि नक्षत्राणि स्वकान्तिरूपस्य उत्खातरेणूत्करस्य सम्बन्धीनि वान्तिरुद्गारस्तद्वन्ति सन्ति घुणाख्यकीटनिर्म्मितो व्रणः छिद्रन्तस्य द्वारं मुखं तन्निभानि तत्तुल्यानि घुणोत्कीर्णदारुरजोयुक्तानि दारुच्छिद्रमुखानीव दृश्यन्त इत्यर्थः। जनाश्रयनामा मण्डपोऽप्यतिजीर्णो यदा भवति तदा तदीयकाष्ठेषु घुणाः पतन्ति घुणोत्कीर्णगलद्रजोयुक्तानि घुणकृतच्छिद्रमुखानि वृत्तानि च दृश्यन्ते तानीव भानीति भावः। मण्डपोऽस्त्री जनाश्रय इत्यमरः। अनुकाष्ठं वीप्सायामव्ययीभावः ॥ २६ ॥

इदानीं सर्व्वदिग्व्यापितमोवर्णनं प्राच्यादिक्रमेणोपक्रमते। शचीति। हे भैमि ! अन्धकारः शच्याः सपत्नी दिक् प्राची तस्यां वासररूपस्य सेतोः सूर्य्यस्य प्रभामर्य्यादाया नाशादुच्छृङ्खलो निरर्गलः शक्रेभस्य दानद्रवो दानोदकं तस्य निर्झरः प्रवाहस्तस्य, श्यामः पूर इव पोप्लूयते भृशं प्रसरति प्राचीं प्राप्नोतीत्यर्थः। त्वं पश्य प्राच्यामेव चैरावतदानजलप्रवाहपूरसम्भवः जलपूरोऽपि बन्धापगमादप्रतिहतप्रसरः सन्नितरां प्रसरति। लुङ् सर्पण इत्यस्माद्धात्वर्थे यङ् द्विर्वचनम् ॥ २७ ॥

रामालिरोमावलिदिग्विगाहि
ध्वान्तायते वाहनमन्तकस्य।
यद्वीक्ष्य दूरादिव विभ्यतः स्वा-
नश्वान् गृहीत्वाऽपसृतो विवस्वान्॥ २८॥

पक्वं महाकालफलं किलासीत्
प्रत्यग्गिरेः सानुनि भानुविम्बम्।
भिन्नस्य तस्यैव दृषन्निपाता-
द्वीजानि जानामितमां तमांसि॥ २९॥

दक्षिणदिग्व्यापितमो वर्णयति। रामेति। श्रीरामस्यालिः सेतुः सेतुबन्ध एव श्यामत्वाद्रोमावलिर्यस्यास्तस्या दक्षिणस्या दिशो विगाहि नितरां व्यापकं अन्तकस्य दिक्पतित्वाद्दक्षिणदिक्स्थं तद्वाहनं महिष एव ध्वान्तायते कज्जलनीलोऽन्धकार इवाचरति। विवस्वान् सूर्यः यद्यमवाहनं दूराद् वीक्ष्य सहजाश्वमहिषवैरस्मरणाद्बिभ्यतः सभयान् स्वानश्वान् गृहीत्वाऽपसृतः पलायित इव। दक्षिणदिशि तिमिरं यममहिषवच्छोभत इत्यर्थः। अन्तकपदेन तद्वाहनस्य दारुणत्वं सूचितं, अत एव ततोऽप्यश्वानां भयं युक्तम्। ध्वान्तायते उपमानादाचारे कर्त्तुः क्यङिति क्यङन्तात् तङ्। सेतुरालौ स्त्रियां पुमानित्यमरः॥ २८॥

प्रतीचीव्यापितमो वर्णयति। पक्वमिति। भानुविम्बं प्रत्यग्गिरेः प्रतीच्यां वर्त्तमानस्यास्ताचलस्य सानुनि कालवशात् पक्वं महाकालस्यैन्द्रवारुण्याः फलमासीत् किलैवमहं मन्य इत्यर्थः। तथाऽहमतिपक्वत्वादतिशयत्वादुच्चतरदेशादधस्तात् दृषदि शिलायां निपातात् तदभिघाताद्धेतोर्भिन्नस्य विदीर्णस्य तस्य भानुविम्बरूपस्य महाकालफलस्य कृष्णतमानि वीजान्येव तमांसीति जानामितमां नितरां मन्ये। पर्व्वतादिकठिनभूस्पृष्टत्वं जम्बीरवर्तुलं पक्वं मदतिरिक्तकृष्णवीजं महाकालफलं गृहोपसर्गनिवारणार्थं गृहद्वारे दृढैर्बध्यते। अस्तसमयसम्बन्धात् परिणतकालं रक्तं महतः कालस्य फलभूतञ्च भानुविम्बं महाकालफलमिव। तमांसि

पत्युर्गिरीणामयशः सुमेरु-
प्रदक्षिणाज्ञास्खलनाद्गतस्य ।
दिशस्तमश्चैत्ररथान्यनाम-
पत्रच्छटाया मृगनाभिशोभि ॥ ३० ॥
ऊर्द्धं धृतं व्योम यदुष्णरश्मे
दिवा सहस्रेण करैरिवासीत् ।
पतत्तदेवांशुमता विनेदं
नेदिष्ठतामेति कुतस्तमिस्रम् ॥ ३१ ॥

विदीर्णस्य तस्य कृष्णतमानि वीजानीव प्रसरन्तीत्यर्थः। अन्यदिगपेक्षया प्रतीच्यां सायंसमये सूर्य्यसम्बन्धिनः प्रकाशस्यासन्नत्वादल्पान्धकारसूचनार्थं तमसां वीजत्वेन निरूपणम् ॥ २९ ॥

उदीचीव्यापितमो वर्णयति। पत्युरिति। चैत्ररथं कुवेरवनं तदेवान्यनाम यस्यास्तादृशी पत्रच्छटा पत्रवल्ली यस्याश्चैत्ररथाख्यवनरूपपत्रवल्लिकाया उत्तरस्या दिशो मृगनाभिः पत्रवल्लीरचनासाधनभूता कस्तूरी तद्वच्छोभते एवं शीलं कृष्णतमं तमो गिरीणां पत्युर्हिमाचलस्यायश एव, यतः सुमेरोः प्रदक्षिणीकरणाज्ञास्खलता सूर्य्येणानादृतस्यावज्ञातस्य हिमाद्रिर्यद्यपि गिरीणां पतिस्तथापि सूर्य्येणानादृतत्वाद्धीन एव। मेरुरेव महान्। यक्षोद्यानं चैत्ररथमित्यमरः ॥ ३० ॥

ऊर्द्धदिग्व्यापितमो वर्णयति। ऊर्द्धमिति। तमाच्छन्नं यद्व्योम दिवा सहस्ररश्मेः सहस्रसंख्यैः करैः किरणैरथ च हस्तैरूर्द्धं दूरोच्चप्रदेशे धृतमिवासीत्, तन्नभ एवेदं तमाच्छन्नं अंशुमता विना सायंसमये सूर्य्यविनाशाद्धारकेणानेन विनाऽधः पतत् सत्, नेदिष्ठतामतितमां नैकट्यमेति, तमिस्रं कुतः कस्मात्कस्मादागतमपि तिमिरं नाम किमपि नास्ति, किन्तु निकटीभवद्गगनमेव तमिस्रमित्यर्थः। पतद्व्योमैव तमिस्रं

ऊर्द्धार्पितन्युब्जकटाहकल्पे
यद्व्योम्नि दीपेन दिनाधिपेन ।
न्यधायि तद्भूमिलद्गुरुत्वं
भूमौ तमः कज्जलमस्खलत् किम् ॥ ३२ ।
ध्वान्तैणनाभ्या शितिनाऽम्बरेण
दिशः शरैः सूनशरस्य तारैः ।

कुतो भूमौ निकटतामेति, न तु तदतिरिक्तं नभोऽस्तीति वा । अन्यदपि यत् कस्यचित् कराभ्यामूर्द्धं धार्यते तदभावेऽधः पतत्येव । नेदिष्ठतां अतिशयेन इष्ठनि, अन्तिकबाढयोरिति नेदादेशः । कुतः । पक्षे सार्वविभक्तिकस्तसिः ॥ ३१ ॥

अधोदिग्व्यापितमो वर्णयति । ऊर्द्धेति । सामर्थ्याद्विधिना ऊर्द्धं सूर्यदीपस्यैवोपरिभागेऽर्पितो न्युब्जः कज्जलधारणार्थमधोमुखोऽतितमां महाकटाहः कर्परं तत्कल्पे तत्तुल्ये कृष्णतमे व्योम्नि अधिकरणे प्रकाशकारिणा कज्जलधारणार्थेन दिनाधिपेनैव दीपेन करणेन यत् कज्जलं न्यधायि न्यस्तं तत्कज्जलमेव तमो भूम्ना क्रमसञ्जातबाहुल्येन मिलद् युक्तं भवत् पतनाख्यकार्यकारणं गुरुत्वं यस्य तादृशं सत् भूमावस्खलत् किं, अतिभारेण पतितं किम् । गुरुत्वाद्धि पतनं युक्तम् । तत् कज्जलमेव भूमौ पतितं किम्, अपि तु तमो नाम न किञ्चिदित्यर्थ इति वा । कज्जलमपि कर्परे धृतं क्रमेण बहु भवद् गुरुत्वादधः पतति । कटाहः कर्परे तथेति निघण्टुः । ईषदसमाप्तौ कल्पप्रत्ययः ॥ ३२ ॥

ध्वान्तेति । ध्वान्तेनैवैणनाभ्या कस्तूर्या तथा शितिना नीलेनाम्बरेण गगनेनाथ च वस्त्रेण । यद्वा । ध्वान्तैणनाभ्या लत्वा नीलेन गगनेनोपलक्षितास्तथा निशित्वात् पुष्पतुल्यरूपत्वाच्चोज्ज्वलैस्तारैर्नक्षत्रैरेव सूनशरस्य कामस्य शरैरुपलक्षिताः, अथ च तारैरुज्ज्वलैः पुष्पैरुपलक्षितास्तथा प्रकाशाभावान्मन्दाक्षैर्मन्दनयनैर्नरैर्लक्ष्या लक्षणीयाः अथ च मन्दाक्षस

मन्दाक्षलक्ष्या निशि मामनिन्दौ
सेर्ष्या भवायान्त्यभिसारिकाभाः ॥ ३३ ॥
भास्वन्मयीं मीलयतो दृशं द्राङ्
मिथोमिलद्द्व्यञ्चलमादिपुंसः ।
घ्नाचक्ष्महे तन्वि ! तमांसि पक्ष्म-
श्यामत्वलक्ष्मीविजितेन्दुलक्ष्म ॥ ३४ ॥

लज्जाया विषयभूताः सलज्जा अत एवाभिसारिकाभाः स्वैरिणीतुल्याः दिशः, अनिन्दौ चन्द्ररहितायां अनुदितचन्द्रत्वाच्छायायां निशि मामायान्ति प्रत्यागच्छन्ति तस्मात् सपत्नीभ्रान्त्या त्वं सेर्ष्या भव। अभिसारिका अपि शुभ्रायां रात्रौ शुभ्रवस्त्राद्याभरणाः, कृष्णायाञ्च रात्रौ कृष्णवस्त्राद्याभरणाः समायान्तीति। ता अपि कस्तूरीकृताङ्गरागा नीलवसनाः प्रच्छन्नधृतपुष्पाः कामबाणपीडिताः सलज्जाः सत्यः कामुकं प्रति समायान्ति तदीयनायिकाश्च सेर्ष्या भवन्ति, तथा दिशोऽपीत्यर्थः। सर्व्वा अपि दिश एकत्र मिलिता इति प्रतीतिः। तिर्य्यग्व्याप्ततमो वर्णितमनेन। कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिकेत्यमरः। मन्दाक्षमन्दा इति पाठे मन्दनयनानामल्पदृश्यास्तमोबाहुल्यात्। अथ च तमोबाहुल्यान्मन्दाक्षा अत एव मन्दगमनाः, लज्जया वा मन्दगमना इत्यर्थः। तारशब्दः पूर्व्ववत् ॥ ३३ ॥

भास्वदिति। हे तन्वि ! कृशाङ्गि ! भास्वन्मयीं रविरूपां दक्षिणां दृशमस्तमयव्याजेन द्राक् शीघ्रं मीलयतः सङ्कोचयतः आदिपुंसः श्रीविष्णोर्मिथोऽन्योन्यं मिलन्तौ द्वावप्यञ्चलावूर्द्ध्वाधःपुटे यस्य निमीलनवशादन्योन्यसंलग्नपुटत्वान्निविडरोमकं, अत एव श्यामत्वलक्ष्म्या विजितं नितरां पराभूतं इन्दुलक्ष्म येन तादृशं पक्ष्म नेत्रसम्बन्ध्यूर्द्ध्वाधःपुटे पुनर्घनीभूतरोमाण्येव तमांसि वयमाचक्ष्महे ब्रूमः, न तु ततोऽन्यानि तमांसीत्यर्थः। तिमिरव्याप्तत्वात् किमपि न दृश्यत इति भावः। पक्ष्मेति जात्यैकवचनम् ॥ ३४ ॥

विवस्वताऽनायिषतेव मिश्राः
स्वगोसहस्रेण समञ्जनानाम् ।
गावोऽपि नेत्रापरनामधेया-
स्तेनेदमान्ध्यं खलु नान्धकारैः ॥ ३५ ॥
ध्वान्तस्य वामोरु ! विचारणायाम्
वैशेषिकं चारु मतं मतं मे ।

विवस्वतेति । विवस्वता नेत्रमित्यपरनामधेयं यासां तास्तद्रूपा जनानां गावोऽपि स्वस्य गवां किरणानां सहस्रेण समं सह मिश्रा दिने निमीलिताः सत्यः अनायिषतेव नीता इव यस्मात् तेन खलु तेनैवेदमान्ध्यं प्रकाशाभावान्नेत्रापगमाच्च रूपाग्रहणं, न त्वन्धकारैः कृत्वेदमान्ध्यं, तमोवशात् किमपि न दृश्यत इति भावः । अन्येनापि गोपालेन स्वगोसहस्रेण मिश्रिताः परेषामपि गावो नीयन्त इति ॥ ३५ ॥

ध्वान्तस्येति । हे वामोरु ! अतिसुन्दरोरु ! ध्वान्तस्य विचारणायां तमःस्वरूपनिरूपणे विषये वैशेषिकं मतं षट्पदार्थसाधर्म्यवैधर्म्यनिरूपणात्मकं काणाददर्शनं चारु सदुपपत्तिकं न त्वन्यदिति मे मतं सम्मतम् । खलु यस्मात् कारणात् सम्प्रदायविदः तद्दर्शनं वैशेषिकं शास्त्रमौलूकमाहुर्वदन्ति । अत एव तमस्तत्त्वनिरूपणाय अनारोपितस्वरूपनिरूपणाय क्षमं समर्थमुलूकस्य घूकस्य सम्बन्धि, दृश्यते अनेनेति दर्शनं, चारु सदुपपत्तिकं न त्वन्यदिति मे मतं सम्मतम् । खलु यस्मात्कारणात् तद्दर्शनं वैशेषिकं शास्त्रमौलूकमाहुर्वदन्ति । वैशेषिकमप्युलूकापरनाम्ना काणादमुनिना प्रोक्तमित्यौलूकदर्शनं, ततश्चैतदपि तमस्तत्त्वनिरूपणाय समर्थमिति युक्तमित्यर्थ इति शब्दच्छलम् । वैशेषिकदर्शने च किमिदं तमो भावरूपं, अभावरूपं वेति सन्देहे भासामभाव एव तम इति सूत्राविरोधेन व्योमशिवाचार्य्यादयः षट्पदार्थवैधर्म्येणाभावरूपमेव तमो न्यरूपयन् । श्रीधराचार्य्यास्त्वारोपितं भूरूपमेव तम इति निर्वर्ण्य भाभावे

औलूकमाहुः खलु दर्शनं तत्
क्षमं तमस्तत्त्वनिरूपणाय ॥ ३६ ॥
म्लानिस्पृशः स्पर्शनिषेधभूमेः
सेयं त्रिशङ्कोरिव सम्पदस्य ।
न किञ्चिदन्यत् प्रति कौशिकीये
दृशौ विहाय प्रियमातनोति ॥ ३७ ॥

सत्येव तमः प्रतीतिर्भाभाव एव तम इत्युक्तमिति सूत्रविरोधं पर्य्यहार्षुः। एतदसहमानाः श्रीमदुदयनाचार्य्यादयः पुनर्भासःमभावमेव तमस्त्वेन निरनैषुः, यस्मात्तदौलूकं दर्शनं वैशेषिकशास्त्रं तमस्तत्त्वनिरूपणाय क्षममाहुरिति वाऽन्वयः। महत्यन्धकारे सत्यपि घटादिपदार्थं को वा पश्यतीति ध्वान्तविचारणायां क्रियमाणायां घूकनेत्रमेव चारु सर्वेभ्योऽप्यधिकमिति मे मतं पुनः पुनः सम्मतमित्यर्थः। उलूकनेत्रमेव महान्धकारे घटादिविलोकयितुं समर्थं, अन्यदीयनेत्राणां त्वान्ध्यमेव जातमिति भावः। यतो वैशेषिकं घटादीन् विशेषान्वेति तादृशं महान्धकारे घूकनेत्रमेव घटादीन् भेदेन जानाति न त्वन्यदीयं नेत्रं, तस्मात् तदेव चार्व्विति। तत्र दृढसम्मत्यर्थमुत्तरार्द्धम्। उलूकवृत्त्या कणानत्तीति कणादस्यैवोलूक इति नाम तेन प्रोक्तत्वादौलूकम्। वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे, इति विश्वः। वामोरु संहितशफेत्यादिना ऊङ् नदीत्वाद्ध्रस्वः। औलूक तेन प्रोक्तं इत्यण् पक्षे तस्येदमिति च ॥ ३६ ॥

म्लानीति। म्लानिस्पृशः कालिमस्पर्शिनः श्यामस्य च वैडावत्वान्मालिन्ययुक्तस्य निःश्रीकस्य तथाऽभावरूपत्वात् स्पर्शगुणनिषेधस्य भूमेः स्थानस्याथ च चण्डालत्वादेवास्पृश्यस्यास्य तमसः राज्ञस्त्रिशङ्कोरिव सेयं प्रसिद्धा प्रत्यक्षेण गृह्यमाणा च सम्पद् बाहुल्येन स्वरूपलाभोऽथ च राज्यसमृद्धिः कौशिकीये औलूकेऽथ च वैश्वामित्रदृशौ नेत्रे विहायान्यत् किञ्चित्प्रति अपरं किमपि वस्तु लक्षीकृत्य प्रियं हितं नातनोति, किन्तु तदीय एव नेत्रे लक्षीकृत्य हितं करोति। अन्यप्रति किञ्चिदल्पमपि

मूर्द्धाभिषिक्तः खलु यो ग्रहाणाम्
तद्भासमास्कन्दितऋक्षशोभाम्।
दिवाऽन्धकारं स्फुटलब्धरूप-
मालोकतालोकमुलूकलोकः ॥ ३८ ॥

प्रियं नातनोतीति वा। अन्धकारे ह्युलूकनेत्रे एव पदार्थान् पश्यत इति तत्सम्मतयोः प्रिया। त्रिशङ्कोश्च सम्पद्विश्वामित्रस्यैव नेत्रयोः प्रिया नान्यस्य। एतदुपाख्यानं रामायणादौ प्रसिद्धम्। कौशिकीये दृष्टान्तः॥३७॥

मूर्द्धेति। यो रविर्नवानां ग्रहाणां मध्ये खलु निश्चितं मूर्द्धाभिषिक्तो राजा, उलूकानां लोकः सङ्घः तस्य रवेर्भयाद् दीप्त्या समास्कन्दिता नितरां पराभूता ऋक्षशोभा नक्षत्रकान्तिर्यस्मिन् तत्तथा स्फुटं उपलब्धानि अन्यजनेन दृष्टानि घटादिस्वरूपाणि यस्मिंस्तादृशमपि दिवा कर्म्मीभूतं दिनमन्धकारमेवावलोकत, अपश्यत् दिने तस्य दर्शनाशक्तेः दिनमन्धकाररूपत्वेनैव मेन इत्यर्थः। तथा व्यक्तं लब्धानि घटादिरूपाणि यत्र तादृशमन्धकारमेवालोकमपश्यद्दर्शनसहकारिप्रकाशरूपत्वेनैव मेने, अर्थाद्रात्रावित्यर्थः। अन्धकारं स्फुटलब्धरूपमित्यावृत्त्या योज्यं तेन तमसा विपरीतदृश एव भवन्तीति व्यज्यते। एवंविधमन्धकारञ्च स्फुटमतिप्रसिद्धं शुक्लभास्वरात्मकं लब्धं रूपं येन तादृशमालोकमेवापश्यत्। कृष्णरूपमपि तमः शुक्लभास्वरालोकत्वेनापश्यदिति विरुद्धमित्यर्थः। अथ च यो ग्रहराजः सूर्यः, आक्रान्तनक्षत्रलक्ष्मीकान्तद्भासं सूर्यदीप्तिमेवायमुलूकलोको दिवा दिनेऽन्धकारमपश्यत्, रात्रौ चान्धकारमालोकमपश्यत्, दिने सूर्यालोक एव तमो रात्रौ च तम एव सूर्यालोक इति ददर्शेत्यर्थः। कीदृशीं तद्भासं कीदृगन्धकारं स्फुटमुपलब्धानि घटादिरूपाणि यस्यामन्यजनेन तादृशीं स्फुटं सञ्जातस्वरूपलाभञ्चेत्यन्धकारस्य नपुंसकत्वान्नपुंसकैकशेषेकवद्भावेन वा व्याख्येयं सूर्यदीप्त्याऽसमास्कन्दिताऽपराभूता नक्षत्रलक्ष्मीर्यत्र तं, अन्धकारविशेषणं वा। रात्रौ सूर्यदीप्तेरभावादतिरस्कृतनक्षत्रशोभमित्यर्थः। सूर्यदीप्तेरेव समास्कन्दनसामर्थ्यात्

दिने मम द्वेषिणि कीदृगेषाम्
प्रचार इत्याकलनाय चारीः ।
छाया विधाय प्रतिवस्तुलग्नाः
प्रावेशयत् प्रष्टुमिवान्धकारः ॥ ३९ ॥
ध्वान्तस्य तेन क्रियमाणयेत्थम्
द्विषः शशी वर्णनयाऽथ रुष्टः ।

तमसैव रात्रौ यत् तिरस्कारणं तेनैव नक्षत्रशोभा यस्मिन्निति वा, इत्यादिव्याख्यानानि ज्ञातव्यानि । लक्ष्मीमिति पाठे नदीत्वेऽपि समासान्तविधेरनित्यत्वात् कबभावः । मूर्द्धाभिषिक्तो राजन्यः अन्धकारोऽस्त्रियाध्वेत्यमरः ॥ ३८ ॥

दिन इति । अन्धकार इत्याकलनाय सामस्त्येन ज्ञानार्थं प्रतिवस्तुलग्नाः पदार्थमात्रसम्बद्धाः प्रतिच्छाया एव चारीः गूढार्थवेदिकाश्चारनारीर्विधाय चारपदं ताभ्यो दत्त्वा दिनं प्रति सम्प्रेष्य समागतास्ताः तत्रत्यवृत्तान्तं प्रष्टुमिव पुनः प्रावेशयत्, निजनैकट्यमित्यर्थात् । इति किम् । ममान्धकारस्य द्वेषिणि मामसहमाने दिने विषये एषां वस्तूनां कीदृक् प्रचारो विहरणं स्नेहादिव्यवहारश्चेति । दिवा प्रतिपदार्थसम्बद्धाः छाया एव रात्रौ समागत्य मिलिता निजस्वामिनमन्धकारं प्राविशन् । रात्रौ हि प्रकाशाभावे छाया अन्धकारेण सहैकीभवतीति तत्सम्बन्धादेव महान्धकारः प्रतीयत इति भावः । एतेन प्रतिच्छायाऽपि तम एवेति वर्णितम् । अन्योऽपि रात्रौ लोकस्थितिं ज्ञातुकामः स्त्रीणां सर्वत्र प्रवेष्टुं शक्यत्वात् चारनारीः सम्प्रेष्य तत्रत्यवृत्तान्तं विचार्य समागतास्ताः प्रष्टुमात्मसविधं प्रवेशयति । छाया एव चारीः प्रतिवस्तुलग्ना विधायेति वा । चारपदं दत्त्वा यद्दिनं प्रत्येव प्रेषयामास, अत एव ताः दिने प्रतिवस्तुलग्ना दृश्यन्त इति वा । चारी पुंयोगान्ङीष् ॥ ३९ ॥

इदानीं चन्द्रोदयं वर्णयितुमुपक्रमते । ध्वान्तस्येति । तेन नराधिपेन नवेनेत्थं क्रियमाणया द्विषः शत्रुभूतस्य ध्वान्तस्य वर्णनया रुष्टः क्रुद्ध

उद्यन्नुपाश्लोकि जपारुणश्री-
र्नराधिपेनानुनयेच्छयेव ॥ ४० ॥
पश्यावृतोऽप्येष निमेषमद्रे-
रधित्यकाभूमितिरस्करिण्या।
प्रवर्षति प्रेयसि ! चन्द्रिकाभि-
श्चकोरचञ्चूचुलुकान् प्रतीन्दुः ॥ ४१ ॥
ध्वान्ते द्रुमान्तानभिसारिकास्त्वम्
शङ्कस्व सङ्केतनिकेतमाप्ताः।

इव जपाकुसुमवदरुणा श्रीर्यस्य स उदयन् उदयं प्राप्नुवन् शशी तेनैव राज्ञा अथानन्तरं अनुनयेच्छयेव प्रसादनवाञ्छयेवोपाश्लोकि श्लोकैस्तोतुमारब्धि। अन्योऽपि वैरिवर्णनया रुष्टः सन् अरुणो भवति, तत्परिहारार्थमुदितः सन् वर्णकेन प्रसादनार्थं स्तूयत इति प्रतीयमानोत्प्रेक्षा। इव शब्दस्योभयत्र योजना वा। उपाश्लोकि सत्येति णिजन्तात् कर्मणि चिण् ॥ ४० ॥

पश्येति। हे प्रेयसि ! प्राणप्रिये ! एष इन्दुश्चन्द्रिकाभिश्चकोराणां चन्द्रिकासववदमृतपायिनां पक्षिणां चञ्चू एव चुलुकास्तान् प्रति पूरयित्वा प्रकर्षेण वर्षति सुधामित्यर्थात्। यावता चकोरचञ्चूपूरं भवति तावत्प्रमाणं वर्षतीत्यर्थः। त्वं पश्य। किम्भूतः। अद्रेरुदयाचलस्याधित्यकाभूम्योर्द्धशिखरेणैव तिरस्करिण्या जवनिकया निमेषलक्षणमत्यल्पकालमावृतोऽपि सन् सम्पूर्णान्नुदितोऽपि प्रथमचन्द्रिकाभिरेव चकोराणामानन्दं करोति किम्पुनरुदितः सन्निति भावः। अन्योऽप्युपकारी दूरस्थोऽप्युदयोन्मुखोऽन्येषामुपकरोति ॥ ४१ ॥

ध्वान्त इति। हे प्रिये! त्वं चन्द्रोदयात् पूर्वं ध्वान्ते सति द्रुमान्तान्, तरुनिकटदेशानेव वृक्षाधोभागानेव सम्भोगार्थं कामुकदत्तसङ्केतनिकेतं प्राप्ताः ता अभिसारिकाः स्वैरिणीः शङ्कस्व सम्भावय। तया इदानीं चन्द्रोदये सति वृक्षाधोभागवर्त्तिच्छायाच्छलादुज्झितं पूर्वधृतं

च्छायाच्छलादुज्झितनीलचेला
ज्योत्स्नानुकूलैश्चलिता दुकूलैः ॥ ४२ ॥
त्वदास्यलक्ष्मीमुकुरं चकोरैः
स्वकौमुदीमादयमानमिन्दुः ।
दृशा निशेन्दीवरचारुभासा
पिवोरु रम्भातरुपीवरोरु ! ॥ ४३ ॥

तमोऽनुकूलं चेलं वस्त्रं याभिस्तादृशीः सतीः सवर्णत्वाज्ज्योत्स्नानुकूलैश्चन्द्रिकानुगुणैर्धवलतरैर्दुकूलैरुपलक्षिताः सतीश्चलिताः सम्भोगं कृत्वा स्वगृहं प्रति पुनः परावृत्तास्त्वं सम्भावय। तमसि सत्येव केनापि न ज्ञातव्यमिति वुद्ध्वा नीलं वस्त्रं परिधाय सङ्केतस्थानमागताः, चन्द्रोदये पुनर्नीलवस्त्रपरिधाने पूर्ववद्भीत्या तत् तत्रैव विहाय श्वेतं दुकूलं सवर्णत्वात् परिधाय केनापि न ज्ञाताः। नीलचोला इति पाठे चोलः कूर्पासः ॥ ४२ ॥

त्वदिति। हे रम्भातरुपीवरोरु! रम्भातरुवदतिपीवरौ ऊरू यस्यास्तत्सम्बुद्धिः त्वं निशायामिन्दीवरं नीलोत्पलं तद्वच्चारुभा यस्यास्तया दृशा ऊरु सादरमिन्दुं पिव विलोकय। किम्भूतम्। तवास्यलक्ष्म्याः मुखशोभाया अवलोकनार्थं मुकुरं दर्पणमिव। तथा चकोरैः प्रयोज्यैः स्वकौमुदीमादयमानं निजकौमुदीं चकोरान् पाययमानम्। उदिते चन्द्रे चकोराः सानन्दा जाताः नीलोत्पलानि च विकसितानीति भावः। एतेनेन्दोः परोपकारत्वं सूचितम्। विकसितेन्दीवरतुल्यया दृशा पिवेत्यनेन चन्द्रोदये हीन्दीवरं विकसति त्वं चैवम्भूतया दृशा यदा चन्द्रमवलोकयिष्यसि तदा जनस्त्वद्दृशं चन्द्रावलोकनविकसितमिन्दीवरमेवैतदिति ज्ञास्यतीति सूचितम्। दिवासङ्कोचादसादृश्यमिति। इन्दीवरस्य विकसितत्वद्योतनार्थं निशापदम्। चकोरैः गतिवुद्धीति कर्मत्वप्राप्तावपि, आदिखाद्योर्न इति प्रतिषेधात् कर्तरि तृतीया। आदयमानं निगरणार्थत्वात् परस्मैपदप्राप्तावपि अदेः प्रतिषेधो वक्तव्यः इति निषेधात्, णिचश्चेति तङ् ॥ ४३ ॥

असंशयं सागरभागुदस्थात्
पृथ्वीधरादेव मथः पुराऽयम् ।
अमुष्य यस्मादधुनाऽपि सिन्धौ
स्थितस्य शैलादुदयं प्रतीमः ॥ ४४ ॥
निजानुजेनातिथितामुपेतः
प्राचीपतेर्वाहनवारणेन ।
सिन्दूरसान्द्रे किमकारि मूर्ध्नि
तेनारुणश्रीरयमुज्जिहीते ॥ ४५ ॥

असंशयमिति । पुरा पूर्वं सागरभाक् समुद्रगर्भस्थोऽयं चन्द्रः मथो दण्डभूतात् पृथ्वीधरात् पर्वतान्मन्दराद्रेरेव हेतोरुदस्थादुत्पन्न इत्यसंशयं निश्चितं पुराणादौ यदेवं श्रूयते तत् सत्यमित्यर्थः । पुरा उदस्थात् प्रथमसम्भवावसरे तस्मादेव समुत्थित इति वा । तत्र हेतुमाह, यस्माद्धेतोरधुनाऽपि सम्भवान्तरावसरेऽपि सिन्धौ स्थितस्य सागरगर्भस्थस्याप्यमुष्य चन्द्रस्य शैलादुदयाचलादेवोदयमुत्पत्तिं प्रतीमो जानीमः । प्रत्यहं सागरस्थस्याप्यस्याचलोत्पत्तिशीलत्वरूपलिङ्गदर्शनात् समुद्रमथने प्रथमसम्भवावसरेऽप्ययमचलादेवोत्पन्न इति निश्चिनुम इत्यर्थः । उदयाचलशिखरं चन्द्रोऽतिक्रामतीति भावः ॥ ४४ ॥

निजेति । निजानुजेन एकस्मात् सिन्धोरुत्पन्नतया अस्माच्चन्द्रात् पश्चाज्जातेन कनीयसा भ्रात्रा प्राचीपतेरिन्द्रस्य वाहनवारणेन प्राच्यां स्थितेनैरावतेनातिथितामुपेतः प्राप्तः प्राच्यामुदितत्वात् तत्सविधं प्राप्तः सन्नयं चन्द्रोऽग्रजत्वात् सिन्दूरेण सान्द्रे मूर्ध्नि अकारि कृतः किम् । गौरवान्नमस्कारपूर्वं शिरस्यारोपितः किमित्यर्थः । तेन सान्द्रसिन्दूरशिरःस्थापनेन हेतुना लग्नसिन्दूरवशादयमरुणश्रीरारक्तशोभ उज्जीहीते उदयते किमिति वा । उदयंश्चन्द्रः सिन्दूररक्तो दृश्यत इत्यर्थः ॥ ४५ ॥

यत् प्रीतिमद्भिर्वदनैः स्वसाम्या-
दचुम्बि नाकाधिपनायिकानाम् ।
ततस्तदीयाधरयावयोगा-
दुदेति विम्बारुणविम्ब एषः ॥ ४६ ॥
विलोमिताङ्कोत्किरणाद्दुरूह-
दृगादिना दृश्यविलोचनादि ।
विधिर्विधत्ते विधुना वधूनाम्
किमाननं काञ्चनसञ्चकेन ॥ ४७ ॥

यदिति । वृत्तत्वादिगुणयोगेन स्वसाम्यात् प्रीतिमद्भिः नाकाधिपस्येन्द्रस्य नायिकानां वदनैर्यस्मात् स्वसविधमागत एष चन्द्रोऽचुम्बि तस्माद्धेतोस्तस्माच्चुम्बनाद्वा तदीयानां देवेन्द्रनायिकानामधरेषु न्यस्तो यावोऽलक्तकस्तस्य योगात् सम्बन्धाद्धेतोः विम्बवत् पक्वविम्बीफलवदरुणं विम्बं मण्डलं यस्य तादृश उदेति। अन्योऽपि समानः स्वसविधमागतः सन् सख्या प्रीत्या चुम्ब्यते। मुखैरिति बहुवचनेन तत्र प्रदेशे युगपदेव चुम्बनाद्बहुलयावकयोगात् सकलस्यापि चन्द्रविम्बस्य रक्तत्वं युक्तमिति सूचितम् ॥ ४६ ॥

विलोमितेति । विधिः विधुना चन्द्रेणैव काञ्चनस्य सञ्चकेन विम्बकेन कृत्वा वधूनामतिरमणीयमाननं विधत्ते किम्। किम्भूतेन। विलोमितः पराङ्मुखः कृतः स्वप्रभया जितोऽङ्कः कलङ्को येन एतादृशादुत्कटादतितेजस्विनः किरणाद्धेतोर्दुरूहो दुस्तर्क्यः दृगादिर्नेत्राद्यवयवो यस्य, अथ च विपरीतीकृतानामङ्कानां नेत्रादिनिर्म्माणार्थं निम्नोन्नतांशचिह्नस्थानानामुत्किरणं सङ्घट्टनं तस्माद्धेतोः, साक्षादलक्ष्यनेत्रकर्णनासिकाद्यवयवेन आननञ्च साक्षाद्दृश्या विलोचनादयो नासावर्णाद्यवयवा यस्य तादृशं, तस्मिन् ब्रह्मा स्त्रीमुखं चन्द्ररूपेण महाराष्ट्रभाषया ठसा इत्याख्येन स्वर्णस्य सञ्चकेन निर्ममे, सञ्चके हि निष्पाद्यस्य वस्तुनो निम्नोन्नत-

अनेन वेधा विपरीतरूप-
विनिर्म्मिताङ्कोत्किरणाङ्केन ।
त्वदाननं दृश्यदृगाद्यलक्ष्य-
दृगादिनैवाकृत सञ्चकेन ॥ ४८ ॥

अस्याः सुराधीशदिशः पुराऽऽसीद्यदम्बरं पीतमिदं रजन्या ।
चन्द्रांशुचूर्णव्यतिचुम्बितेन तेनाधुना नूनमलोहितायि ॥ ४९ ॥

भागा विपरीता एवोत्कीर्य्यन्ते तत्र च नेत्राद्यवयवा दुर्ज्ञेया भवन्ति, भवन्निर्मितमुखादौ च दृश्या भवन्ति तस्मादेवं तर्क्य इत्यर्थः । उदितमात्रश्चन्द्रोऽल्पतमसुवर्णसञ्चकवद्रक्तो दृश्यत इति भावः । उत्तमं सुवर्णं रक्तवर्णं भवति । आननमिति जात्यैकवचनम् ॥ ४७ ॥

अनेनेति । वेधा विपरीतरूपं यथा तथा विनिर्मितमुक्तविधमङ्कोत्किरणं यत्र तादृशमङ्कं यस्य तेन तथाऽलक्ष्यदृगादिना अनेन चन्द्रेणैव सञ्चकेन दृश्यं सुन्दरमथच प्रत्यक्षदर्शनयोग्यं दृगादि यस्य तादृशं त्वदाननमकृत त्वदाननमेव कृतं, नत्वन्याननमिति वा, अयमेवात्र लोके विशेषः । अयं श्लोकः क्षेपकः ॥ ४८ ॥

अस्या इति । हे भैमि ! अस्याः सुराधीशस्येन्द्रस्य दिशः यदम्बरं गगनं वस्त्रञ्च पुरा चन्द्रोदयात् पूर्वं रजन्या रात्या हरिद्रया च पीतं तमोव्याप्तत्वाददृश्यं पीतवर्णं वा आसीत् तेन गगनेन वस्त्रेण वा अधुना चन्द्रोदये चन्द्रांशूनां चूर्णैः श्लक्ष्णसूक्ष्मतेजोलेशैः कर्तृभिर्व्यतिचुम्बितेनातितरां स्पृष्टेन सता चन्द्रांशुवच्छुभ्रतरेण चूर्णेन ताम्बूलसाधनचूर्णद्रव्येण स्पृष्टेन सता नूनमलोहितायि, आरक्तीभूतम् । यत् तमसा पूर्वं नीलमभूत् तदेवेदानीमुद्यच्चन्द्रलोहितकरसंस्पर्शाद्रक्तं जातमित्यर्थः । हरिद्रया पीतवर्णं वस्त्रं चूर्णेन युक्तं सद् रक्तं भवति । देवेन्द्रस्त्रियाश्च वस्त्राणि नानावर्णयुक्तानि । चन्द्रांशव एव चूर्णमिति वा । अलोहितायि लोहितादिडाज्भ्य इति क्यषन्ताद्भावे चिण् ॥ ४९ ॥

तानीव गत्वा पितृलोकमेनमरञ्जयन् यानि स जामदग्न्यः ।
छित्त्वा शिरोऽस्राणि सहस्रबाहोर्विस्राणि विश्राणितवान् पितृभ्य
अकर्णनासस्त्रपते मुखं ते पश्यन्न सीतास्यमिवाभिरामम् ।
रक्तोऽस्रवर्षी वत लक्ष्मणाभिभूतः शशी शूर्पणखामुखाभः ॥ ५१ ॥

तानीति। सोऽतिवीरो जामदग्न्यः सहस्रबाहोः शिरश्छित्त्वा विस्राणि आमगन्धीनि यान्यस्राणि रक्तानि पितृभ्यः जमदग्न्यादिभ्यो विश्राणितवान् दत्तवान्, यै रक्तैः प्रतिज्ञातं पितृतर्पणं कृतवान्, तान्येव रक्तानि मन्त्रबलात् पितृलोकं गत्वा प्राप्य पितृलोकाधीशमेनं चन्द्रमरञ्जयन्, रक्तं चक्रुरिव। "चन्द्रो वै पितृलोकः" इति श्रुतेः। चन्द्रो रक्तवर्णो दृश्यत इति भावः। परशुरामः सहस्रार्जुनं हत्वा तदीयै रक्तैः पितृतर्पणं कृतवानितीतिहासः। विस्रं स्यादामगन्धि यदित्यमरः ॥ ५० ॥

अकर्णेति। हे प्रिये! शशी सीतास्यमिवाभिरामं कर्णादिक्षतशोभनं ते मुखं पश्यन् न त्रपते लज्जते, वत चित्रम्। किम्भूतः। न विद्येते कर्णनासे स्वभावादेव यस्य सः। तथा रक्ता आरक्ता उस्राः किरणास्तद्वर्षणशीलः रक्तः शोणस्तादृशौ किरणवर्षी च तादृशो वा। तथा लक्ष्मणा कलङ्केन अभिभूत आक्रान्तमध्योऽत एव शूर्पणखाया रावणभगिन्या मुखवदाभा यस्य सः, तद्वदनतुल्यः, एवं लज्जाकारणेषु सत्स्वपि न लज्जते तच्चित्रमित्यर्थः। त्वन्मुखं पश्यन्नप्युदयत्येव स्वप्रकाशयति च तस्मादेव न लज्जते इत्यपि चित्रमेव। शूर्पणखामुखमपि लक्ष्मणेन पराभूतं छिन्नकर्णनासत्वात् रुधिरवर्षि सत् राममभिलक्षीकृत्य वर्त्तमानमत एवातिभयरहितञ्च सीतामुखं पश्यदपि न लज्जते तदनन्तरमपि प्रौढिवादप्रदर्शनात्। अभिशब्दस्यावृत्तिः कार्या। लक्ष्मशब्दो नान्तः, पक्षेऽकारान्तः ॥ ५१ ॥

आदत्त दीप्तं मणिमम्बरस्य दत्त्वा यदस्मै खलु सायधूर्त्तः।
रज्यत्तुषारद्युतिकूटहेम तत्पाण्डु जातं रजतं क्षणेन ॥ ५२ ॥
बालेन नक्तं समयेन मुक्तं रौप्यं लसड्डिम्बमिवेन्दुविम्बम्।
भ्रमिक्रमादुज्झितपट्टसूत्रनेत्रावृतिं मुञ्चति शोणिमानम् ॥५३॥

आदत्तेति। हे भैमि! सायङ्कालरूपो धूर्त्तो यत् रज्यत् उदयकाले रक्तीभवत् तुषारद्युतिचन्द्र एव लेपवशाद्रज्यत् कूटहेम कृत्रिमं सुवर्णमस्मै गगनाय मूल्यरूपेण दत्त्वा दीप्तं प्रकाशमानमम्बरस्य मणिं सूर्यमादत्त जग्राह तदलीकं हेम क्षणमात्रेण पाण्डु शुभ्रं रजतं खलु रूप्यमिव जातं। धूर्त्तो हि रूप्यं लेपादिभिरुपलिप्तं सुवर्णीकृत्य ददाति, वस्त्वान्तरस्यमपि प्रसरद्दीप्तिकं रत्नञ्च गृह्णाति। उदयानन्तरमतिक्रान्तकियत्कालत्वाद्रक्तिमानं परित्यज्य चन्द्रो रूप्यवद्धवलो जात इति भावः। घजन्तोऽत्र सायशब्दः स यंशब्दसमर्थेनार्थः ॥ ५२ ॥

बालेनेति। हे प्रिये! रौप्यं रजतं रजतमयं लसद् विलसमानं डिम्बं बालक्रीडासाधनं भ्रमरकमिवेन्दुविम्बं कर्तृ भ्रमिक्रमाद्भ्रमणपरिपाट्याऽथ च ऊर्द्ध्वदेशगमनक्रमणेन उज्झिता त्यक्ता या पट्टसूत्रस्य नेत्रं दोरकं तत्कृता आवृत्तिर्वेष्टनं तद्रूपं, अथ च पट्टसूत्रजालिकावच्चन्द्रावरणं येन तं शोणिमानं रक्तिमानं मुञ्चति। किम्भूतमुभयं। नक्तंसमयरूपेण बालेनाथ च बालेन प्रदोषरूपेण रात्रिसमयेन मुक्तं भ्रमणार्थं करात् कृतमोचनं, अथ च उद्गीर्णं जनितोदयम्। शिशुक्रीडासाधनं हि भ्रमरकं काष्ठमयं भवति। ईश्वराणां च डिम्बं समृद्ध्यतिशयाद्राजतं पट्टसूत्रवलितदोरकस्रंसनात् तत्सम्बन्धजातं रक्तिमानं मुञ्चति। तथेदं चन्द्रविम्बमपीत्यर्थः। इदानीं चन्द्रो धवलो जात इति भावः। नेत्रावृत्ते रितिपाठे भ्रमिक्रम हेतोरुज्झिता पट्टसूत्र नेत्रावृत्तिर्येन तादृशात् भ्रमिक्रमाद्धेतोरिति वा। डिम्बं लडिम्बमिति वा गौडदेशभाषायां भ्रमरकस्य सञ्ज्ञा। महाराष्ट्रभाषायां कान्यकुब्जभाषायाञ्च भ्रमरा इति सञ्ज्ञा। रौप्यं सम्बन्धे विकारे वा अण्। नेत्रं मन्थगुणे वस्त्र इत्यभिधानान्नेत्रशब्दो यद्यपि मन्थवेष्टनगुणे मुख्यस्तथाऽप्यत्र गुणमात्रपर इति ज्ञेयम् ॥ ५३ ॥

ताराक्षरैर्यामसिते कठिन्या निशाऽलिखद्व्योम्नि तमःप्रशस्तिं ।
विलुप्य तामल्पयतोऽरुणोऽपि जातः करे पाण्डुरिमा हिमांशोः॥५४
सितो यदाऽत्रैष तदाऽन्यदेशे चकास्ति रज्यच्छविरुज्जिहानः ।
तदित्थमेतस्य निधेः कलानां को वेद वा रागविरागतत्त्वं ॥५५॥

तारेति। निशाऽसिते श्यामे व्योम्नि गगन एव कज्जलादिलिप्तश्यामलपट्टिकायां कठिन्याः शुभ्रधातुविशेषस्य सन्धिभिस्ताराक्षरैः शुभ्रैरक्षरैरिव नक्षत्ररूपैरक्षरैः कृत्वा यां तमःप्रशस्तिं तमोवर्णनश्लोकादिलिपिमलिखत्, ताराक्षरैः उपलक्षितां तमःप्रशस्तिं रात्रिः कठिन्याऽलिखदिति वा, तां लिपिं विलुप्य प्रोञ्छ्याल्पयतः परिमेयताराक्षरं कुर्वतो हिमांशोररुणेऽपि करे किरणेऽथ च पाणौ पाण्डुरिमा जातः। प्रौढकिरणे हि चन्द्रे नक्षत्राणामल्पता भवतीति खटिकालिखिताक्षराणि मार्ज्जयतश्चारक्तोऽपि करः खटिकासङ्गाद्धवलो भवतीति। तमसि नक्षत्राणि बहून्युज्ज्वलतराणि च दृष्टानि, चन्द्रे तु उदितेऽल्पानि निष्प्रभाणि च जातानि, चन्द्रस्य धवलो जात इति भावः ॥ ५४ ॥

सित इति। एष चन्द्रो यदा यस्मिन् कालेऽत्र देशे सितो धवलश्चकास्ति तदा तस्मिन्नेव कालेऽन्यदेशे रज्यच्छवी रक्तकान्तिरुज्जिहानः उदयन् शोभते। एवमत्रोदयन् रक्तोऽन्यत्र च श्वेत इत्यपि सामर्थ्यात् लभ्यं, एतद्देशस्थं प्रति इदानीं सितो दृश्यते द्वीपान्तरस्थं प्रति तूदयन्निदानीमेव दृश्यते यस्मात् तस्मात् कलानां निधेः पूर्णस्य चन्द्रस्य रागविरागयोर्लौहितत्वालौहितत्वयोस्तत्त्वं याथात्म्यमित्थममुनोक्तप्रकारेण को वा वेद, अपि तु कोऽपि निश्चेतुं न शक्नोतीत्यर्थः। उदयास्तमययोरतात्त्विकत्वाद्व्यवहितस्य यत्र तदा प्रथमदर्शनं तदा तत्रोदय इति दूरस्थस्य रक्तत्वप्रत्ययः क्रमसामीप्यात् तु धावल्यप्रत्यय इति तत्त्वम्। अन्यस्यापि चतुःषष्टिकलाभिज्ञस्यानुरागाननुरागयोर्याथात्म्यं कुत्रानुरक्तः कुत्र वा नेति कोऽपि न जानाति ॥ ५५ ॥

काश्मीरजैरश्मिभिरौपसन्ध्यैर्मृष्टं धृतध्वान्तकुरङ्गनाभि ।
चन्द्रांशुना चन्दनचारुणाऽङ्गं क्रमात् समालम्भि दिगङ्गनाभिः ॥५६॥
विधिस्तुषारर्त्तुदिनानि कर्त्तं कर्त्तं विनिर्म्माति तदन्तभिन्नैः ।
ज्योत्स्नीर्न चेत् तत्प्रतिमा इमा वा कथं कथं तानि च वामनानि ५

काश्मीरजैरिति । दिग्भिरेवाङ्गनाभिः सन्ध्यायाः समीपं उपसन्ध्यं तत्र जातैररुणैः रश्मिभिरेव काश्मीरजैः कुङ्कुमैः कृत्वा मृष्टं पूर्वं कृतोद्वर्त्तनं ततः सन्ध्यायामपगतायां धृता ध्वान्तरूपा मृगनाभिः कस्तूरी येन तादृशमङ्गं, क्रमात् कस्तूरीलेपनानन्तरं चन्द्रांशुनैव चन्दनेषु मध्ये चारुणोत्तमेन चन्दनेन कृत्वा समालम्भि, अलेपि । अन्या अपि अङ्गनाः कुङ्कुमादिक्रमेणाङ्गमनुलिम्पन्ति, चन्दनधवलैश्चन्द्रकरैः सर्व्वा अपि दिशो वितमस्काः कृता इति भावः । औपसन्ध्यैः सामीप्येऽव्ययीभावाद्भवार्थेऽण् ॥ ५६ ॥

विधिरिति । विधिः तुषारर्त्तोः शिशिरर्त्तोर्दिनानि कर्त्तं कर्त्तं छित्त्वा तेषां दिनानामन्तभिन्नैः मध्यसम्बन्धिभिः सारभूतैः शकलैः शुभ्रैः खण्डैः कृत्वा ज्योत्स्नीर्निशा विनिर्म्माति न चेदेवं नाङ्गीक्रियते यदि तदेमाश्चन्द्रिकायुक्ता रात्रयः तत्प्रतिमाः तैर्दिनैस्तुल्याः शीतलत्वप्रकाशत्वाभ्यां तत्सदृश्यः कथम् । तानि च दिनानि वामनानि न्यूनपरिमाणानि न्यूनशीतत्वादिगुणानि कथं वा, अपि तु दिनवामनतारात्रिदीर्घताऽन्यथानुपपत्तेः शिशिरतोर्दिनापेक्षया च ज्योत्स्नीनामतितमां शीतत्वप्रकाशवत्तानुपपत्तेश्च । शिशिरर्त्तुदिनानि छित्त्वैव तत्सारभूतैश्च शकलैश्चन्द्रिकान्विता रात्रयो ब्रह्मणा वर्द्धिता इत्यर्थः । चन्द्रचन्द्रिकया रात्रिः शीतला धवलतरा च कृतेति भावः । कर्त्तं कर्त्तं कृती छेदने इत्यस्मादाभीक्ष्ण्ये नमुल् द्विर्वचनञ्च । ज्योत्स्नी ज्योत्स्ना यस्यामस्तीत्यर्थे ज्योत्स्नातमिस्रेति साधुकृतात् ज्योत्स्नाशब्दादण्प्रकरणे ज्योत्स्नादिभ्यः उपसंख्यानमित्यर्थे अणि ङीप् ॥ ५७ ॥

इत्युक्तिशेषे स वधूं बभाषे सूक्तिश्रुतासक्तिनिबद्धमौनाम् ।
मुखाभ्यसूयानुशयादिवेन्दौ केयं तव प्रेयसि मूकमुद्रा ॥ ५८ ॥
भृङ्गारशृङ्गारसुधाकरेण वर्णस्रजाऽनूपय कर्णकूपौ ।
त्वच्चारुवाणीरसवेणितीरे तृणानुकारः खलु कोषकारः ॥ ५९ ॥

इतीति । स नलः इत्युक्तिशेषे एव चन्द्रवर्णनावसाने सूक्तीनां प्रसादादिगुणयुक्तानां शोभनवचनानां श्रुते श्रवणे विषये आसक्त्या रसातिशयात् तदेकतानतया बद्धं स्वीकृतं मौनं यया तां तूष्णीम्भावमास्थितां वधूं भैमीं प्रति इदं बभाषे । इति किम् । हे प्रेयसि ! इन्दौ विषये तवेयं मूकस्येव मुद्रा वाङ्निरोधरीतिः का किङ्कारणिका, त्वमपि किमिति न चन्द्रं वर्णयसीत्यर्थः । मौने स्वयमेव हेतुमुत्प्रेक्षते । मुखस्य चन्द्रकृतवदनसाम्यस्याभ्यसूया स्पर्द्धा तज्जन्यादनुशयात् मनोद्वेषादिव स्वस्पर्द्धाकारिणो हि वर्णने अन्येन क्रियमाणे अन्योऽपि कोपात् तूष्णीं तिष्ठति नानुमोदते स्वयञ्च न तं वर्णयति, तथा त्वन्मुखस्पर्द्धाकरणे सञ्जातकोपादिवेन्दुं न वर्णयसि नानुमोदसे च किमिति प्रश्नः । नलसूक्तिश्रवणादरकृतं मौनं कोपादिवेत्युत्प्रेक्षितम् ॥ ५८ ॥

भृङ्गारेति । हे प्रिये ! त्वं भृङ्गारसम्बन्धी भृङ्गारः स्वर्णकलशः तद्रूपेण सुधाकरेण चन्द्रेण हेतुना वर्णस्रजा कृत्वा मम कर्णकूपौ अनूपय जलपूर्णौ कुरु, वर्णस्रजः सरसत्वात् कर्णकूपयोर्जलपूर्णत्वकरणं युक्तम् । अथ च भृङ्गारसम्बन्धिसुवर्णकलशरूपस्य भवन्मुखस्य सम्बन्धि यत्पीयूषं तस्याकरेण खनिभूतया सरसया वर्णस्रजा कर्णकूपावनूपय । खलु यस्मात् कोषकार इक्षुविशेषः तव चारुवाण्या वक्रोक्त्यादिरूपाया वाचः सम्बन्धिनः शृङ्गारादयो रसास्तेषां वेणिः प्रवाहः तस्यास्तीरे समुद्यत् यत्तृणं तस्यानुकारः तत्सदृशः । अतिस्वादुरसोऽपीक्षुविशेषो यदीयसरसवाणीतीरतृणमनुकरोति न तु समो जातः, तां वाणीं श्रावय चन्द्रं वर्णयेति भावः । कोषकाराद्या इक्षुविशेषा इति क्षीरस्वामी । अनूपय अनूपशब्दात् तत्करोतीति णिचि लोट् ॥ ५९ !

अत्रैव वाणीमधुना तवापि श्रोतुं समीहे मधुनः सनाभिम्।
इति प्रियप्रेरितया तयाऽथ प्रस्तोतुमारम्भि शशिप्रशस्तिः ॥६०॥
पूरं विधुर्वर्द्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणिं कियन्ति।
पयांसि दोग्धि प्रियविप्रयोगात् सशोककोकीनयने कियन्ति ॥६१॥
ज्योत्स्नामयं रात्रिकलिन्दकन्यापूरानुकारेऽपहृतेऽन्धकारे।
परिस्फुरन्निर्मलदीप्तिदीपं व्यक्तायते सैकतमन्तरीपम् ॥ ६२ ॥

अत्रैवेति। प्रियेण इति प्रेरितया तया भैम्या अथानन्तरं शशिनः प्रशस्तिर्महित्वं प्रस्तोतुमारम्भि, आरब्धा। इति किं। हे भैमि! अहमत्रैव चन्द्रवर्णन एव विषये मधुनोऽमृतस्य सनाभिं तुल्यां तवापि वाणीमधुना श्रोतुं समीहे, इच्छामीति ॥ ६० ॥

पूरमिति। हे प्रिय! अयं विधुः पयोधेः पूरमागन्तुकजलप्रवाहं वर्द्धयितुमेणाङ्कमणिं चन्द्रकान्तं कियन्ति पयांसि दोग्धि तस्माद् गृह्णाति, तथा प्रियस्य चक्रवाकस्य विप्रयोगात् सशोकायाः कोक्या नयने अपि कियन्ति जलानि दोग्धि, ताभ्यामपि सकाशाद् गृह्णातीत्यहं शङ्के मन्ये, इति भैमी प्रियमवदत्। उदिते चन्द्रे सागरपूरो वृद्धिं प्राप्तश्चन्द्रकान्ता स्रवन्ति चक्रवाकी च भृशं रोदितीति भावः। दुहिर्द्विकर्मा ॥ ६१ ॥

ज्योत्स्नेति। हे प्राणेश! तमोऽवसरोऽतिश्यामा रात्रिरेव कलिन्दकन्या यमुना तस्याः पूर आगन्तुकातिनीलजलप्रवाहस्तदनुकारे तत्सदृशे तद्वदतिकृष्णेऽन्धकारेऽपहृते सति परिस्फुरन्ती निर्मला दीप्तिर्यस्य प्रकाशमानश्चासौ धवलद्युतिश्च तादृशो वा यश्चन्द्रः स एव दीपो यत्र तादृशं चन्द्रिकारूपसैकतं धवलतरवालुकामयं रात्रियमुनाया एव जलमध्यस्थितमन्तरीपं व्यक्तायते स्फुटमिव भवति प्रकटं दृश्यते। पूरावसरेऽस्फुटमपीदानीं स्फुटीभवतीति शङ्के। चन्द्रचन्द्रिकया सकलं धवलीकृतमिति भावः। व्यक्तायते, व्यक्तमिव भवतीत्यर्थे कर्त्तुः क्यङीति क्यङ्। अव्यक्तं व्यक्तं भवतीत्यर्थः सैकतं, सिताशर्कराभ्याञ्च इत्यस्यर्थेऽण् ॥६२॥

हासत्विषैवाखिलकैरवाणां विश्वं विशङ्केऽजनि दुग्धमुग्धम् ।
यतो दिवा बद्धमुखेषु तेषु स्थितेऽपि चन्द्रे न तथा चकास्ति ॥ ६३
मृत्युञ्जयस्यैष वसन् जटायां न क्षीयते तद्भयदूरमृत्युः ।
न वर्द्धते च स्वसुधाप्तजीव स्रङ्मुण्डराहूद्भवभीरतीव ॥ ६४ ॥

हासेति । अखिलकैरवाणां सकलकुमुदानां हासत्विषैव विकासदीप्त्यैव विश्वं सकलं जगत् दुग्धवन्मुग्धं शीतलं धवलञ्चाजनि जातं न तु चन्द्रेणेत्यहं विशङ्के विशेषेण मन्ये । यतो हेतोर्दिवा तेषु सकलकैरवेषु बद्धमुखेषु सङ्कुचितेष्वविकस्वरेषु सत्सु चन्द्रे स्थिते विद्यमानेऽपि सकलकुमुदविकासाभावात् सकलं जगत् तथा रात्राविव शीतलधवलतया न चकास्ति तस्मादिदं जगत् कुमुदहासत्विषैव शीतलं धवलञ्च कृतं न तु चन्द्रेणेत्यर्थः । कुमुदवत् दुग्धवच्च शीतला धवला चन्द्रिकाऽस्तीति भावः ॥ ६३ ॥

मृत्युमिति । मृत्युञ्जयस्य मृत्युञ्जितवतः शिवस्य जटायां वसन् एष चन्द्रः षोडशांशभूतो न क्षीयते, न अल्पपरिमाणो भवति । कलामात्रस्वरूपेणैव तत्र सदा वसंस्ततोऽपि न्यूनपरिमाणो न भवतीत्यर्थः । अथ च न क्षीयत न म्रियते यस्मात् तस्मात् मृत्युञ्जयात् सकाशाद्भयेन दूरो मृत्युर्मरणहेतुर्देवता यस्य सः, मृत्युञ्जयजटाजूटनिवासान्मृत्युना स्प्रष्टुमपि न शक्यते तस्मान्न क्षीयतेऽयमित्यर्थः । तर्हि तत्र वसन् वर्द्धते किं नेत्याशङ्क्याह । वर्द्धते च न उपचितोऽपि न भवतीत्यर्थः । यतः स्वस्य सुधया आप्तो जीवश्चैतन्यं यैस्तानि स्रजो मुण्डानि भूषणीभूतशिरोमालायाः शिरः कपालानि तान्येव राहवस्तेभ्य उद्भवा समुत्पन्ना भीर्यस्य, कथं, अतीव, नितरां भीत इत्यर्थः । सजीवमुण्डेषु बहवो राहव एवैते इति धिया भिया न वर्द्धते । भीतो हि सौख्याभावात् कृशतर एव भवति अथवा पूर्णस्य राहोः सकाशाद्भयमतः कारणाद्भयान्न क्षीयते न च

त्विषं चकोराय सुधा सुराय कलामपि स्वावयवं हराय।
ददज्जयत्येष समस्तमस्य कल्पद्रुमभ्रातुरथाल्पमेतत् ॥ ९५ ॥
अङ्केणनाभेर्विषकृष्णकण्ठः सुधाप्लुतेः कटभस्मपाण्डुः।
अर्हन्नपीन्दोर्निजमौलिधानात् मृडः कलामर्हति षोडशीं न ॥ ९६

वर्द्धत इत्येककल एव शिवशिरश्चन्द्र इत्यर्थः। एतेन चन्द्रस्य षोडशी कला वर्णिता। शिवशिरसि वर्तमानत्वादस्य माहात्म्यमपि वर्णितम्। मृत्युञ्जयेति सञ्ज्ञायां भृतृवृजीति खश्, अरुर्द्विषेति मुम् ॥ ६४ ॥

त्विषमिति। एष चन्द्रो जयति सर्व्वोत्कर्षेण प्रकाशते यतः। किम्भूतः। चकोराय स्वावयवं त्विषं निजांशभूतां चन्द्रिकां ददत्, तथा सुराय अग्न्यादिदेवेभ्यो निजांशभूतां सुधां ददत्, तथा हराय निजांशभूतां कलामपि ददत्, अथाऽपि अस्य चन्द्रस्यैतत् समस्तं परोपकारकरणमल्पमेवातिचमत्कारि न भवति, यतः समुद्रोत्पन्नत्वात् कल्पद्रुमस्य भ्राता। कल्पद्रुमस्तु कल्पितं सर्वं सर्वेभ्यो ददाति, अयन्तु न तथेत्यल्पमेवेत्यर्थः। एवम्बिधः परोपकारी न कोऽपीति भावः। चकोराय सुरायेति जात्यैकवचनम् ॥ ६५ ॥

अङ्केति। मृडः शिवो निजमौलौ धारणात् स्थापनाद्धेतोः षोड़शीं कलामर्हन् प्राप्नुवन्, अथ च पूजयन्नपि षोड़शीं कलां नार्हति न प्राप्नोति, न पूजयति वा। निजशिरसि धारणादेव तस्याः प्राप्तिः पूजा च सम्भावनीया, अतितरां पूज्यते स्वशिरसि धार्य्यते च। तथा चैतस्य षोड़शीं कलां मृड़ः प्राप्नुवन्, पूजयन्, अपि च तां प्राप्नोतीति विरोधपरिहारो यतः। किम्भूतस्येन्दोः, किम्भूतश्च मृड़ः। अङ्कभूतो य एणो हरिणस्तद्युक्ता नाभिर्मध्यभागो यस्य, अथचाङ्करूपा कलङ्करूपा एणनाभिः कस्तूरी यत्र मृड़स्तु विषेण कृष्णकण्ठः तथा सुधयाऽमृतेनाप्ता शुद्धिर्धावल्यं येन, मृड़स्तु कटभस्मना चिताभस्मना पाण्डुः तस्माच्चन्द्रस्याल्पमपि साम्यं शिवो न प्राप्नोति। किञ्च चन्द्रादधिकारेव शिवोऽभवि-

पुष्पायुधस्यास्थिभिरर्द्धदग्धैः सितासितश्रीरघटि द्विजेन्द्रः ।
स्मरारिणा मूर्द्धनि यद्धृतोऽपि तनोति तत्तौष्टिकपौष्टिकानि ॥
मृगस्य लोभात् खलु सिंहिकायाः सूनुर्मृगाङ्कं कवलीकरोति ।
स्वस्यापि दानादमुमङ्कसुप्तं नोज्झन्मुदा तेन च मुच्यतेऽसौ ॥ ६८ ॥

ष्यत् तर्हि तदीयकलां मौलौ नाधारयिष्यत्, सा तु मौलौ धृता तेन, तस्माच्चन्द्र एव शिवादधिक इत्यर्थः । शुभस्याशुभस्य च महदन्तरमिति भावः । षोडशीमपि कलां नार्हतीत्यनेन पूर्णचन्द्रं नार्हतीति वाच्यं, इत्यपि सूचितं । हरस्यापकर्षे विषं चिताभस्म च हेतुः । चन्द्रोत्कर्षे मृगमदोऽस्त्येतच्च ॥ ६६ ॥

पुष्पेति । ब्रह्मणा द्विजेन्द्रः पुष्पायुधस्य कामस्यार्द्धदग्धैरस्थिभिः कृत्वाऽघटि निर्मितः, अतएव सितासितश्रीः, उपान्तधवलमध्यश्यामल-कान्तिभिः स्मरास्थिभिरेव निर्म्मित इत्यत्र हेतुमाह । स्मरारिणा मूर्द्धनि धृतोऽपि अथ च कृतसम्मानोऽपि तस्य स्मरस्यैव तौष्टिकानि हर्षकारीणि पौष्टिकानि अभिवृद्धिकारीणि च यद्यस्मात् तनोति, कामारिणा पूज्यमानोऽपि कामहितमेव यस्मात् करोति, तस्मात् तदस्थिभिरेव घटित इत्यर्थः । एतादृक्कामोद्दीपकं किमपि नास्तीति भावः । अस्थिभिरिवेति प्रतीयमानोत्प्रेक्षा । अन्याश्रितोऽपि तदीयशत्रुहितं यः करोति स तदस्थिभिर्घटित इति लौकिक्युक्तिः । तौष्टिकपौष्टिकानि, प्रयोजनमिति ठञ् ॥ ६७ ॥

मृगस्येति । सिंहिकायाः सुतो राहुः मृगाङ्कं यत् कवलीकरोति तदङ्कमृगस्य लोभात् खलु ग्रासाभिलाषादिव सिंहिकायाः सुतः सिंहो मृगैरङ्कितं स्थलं मृगग्रासाभिलाषादेव स्वाधीनं करोति । तर्हि किमयं मुञ्चतीत्यत आह । अङ्कसुप्तं मध्यवर्त्तिनमथ चोत्सङ्गे विश्वासात् सुखेन निद्रितममुं मृगं स्वस्यापि दानाद्राहुकृतदन्तखण्डनादपि नोज्झत्, नात्यजत्, अथ च स्वशरीरस्यापि वित-

सुधाभुजो यत् परिपीय शून्यमेतं वितन्वन्ति तदर्हमेव ।
पुरा निपीयास्य पिताऽपि सिन्धुरकारि तुच्छः कलशोद्भवेन ६९
चतुर्दिगन्तीं परिपूरयन्तीज्योत्स्नैव कृत्स्ना सुरसिन्धुबन्धुः ।
क्षीरोदपूरोदरवासनाशवैरस्यमेतस्य निरस्यतीयम् ॥ ७० ॥

रणान्नात्यजत्, अयं चन्द्रस्तेन राहुणा तेन पुण्येन च हेतुना मुदा शरणागतरक्षणनिमित्तहर्षेण कृत्वा मुच्यते त्यज्यते। अन्योऽपि शरणागतं मृगं जिघांसोः सिंहाद्रक्षितमात्मानमपि ददानो हि तेन पुण्येन सिंहान्मुच्यते, अतएव स्वस्यापि दानादङ्कस्थमस्तं यतो नामुञ्चत् तेन हेतुनाऽयं विमुच्यते, अर्थाद्राहुणेत्यर्थः ॥ ६८ ॥

सुधेति। सुधाभुजो देवा एनं चन्द्रं परिपीय साकल्येन पीत्वा तुच्छं रिक्तं यद्वितन्वन्ति कुर्व्वन्ति तदर्हं, उचितमेव। यतोऽस्य पिता सिन्धुरपि कलशोद्भवेन अगस्त्येन पुरा निपीय तुच्छो रिक्तोऽकारि तस्मात् कुलक्रमागततुच्छत्वमित्यर्थः। एतस्य पूर्व्वेऽपि परोपकारनिरता तस्मादयमपि तथैवेति भावः। कलशादुत्पन्नेनापि सागरस्य पानमित्याश्चर्य्यं ॥ ६९ ॥

चतुरिति। चतुर्णां दिगन्तानां समाहारस्तां चतुर्दिक्प्रान्तानित्यर्थः। तां परिपूरयन्ती साकल्येन व्याप्नुवती। तथा श्वैत्यात् सुरसिन्धोर्मन्दाकिन्या बन्धुः सदृशी। तथा कृत्स्ना पूर्णा इयं ज्योत्स्ना एका क्षीरोदपूरोदरे वासः स्थितिः तस्य ह्रासाद्बहुकालं परित्यागाद्धेतोरेतस्य चन्द्रस्य वैरस्यं क्षीरसागरविरहजनितं दुःखं निरस्यति नाशयति। असौ चन्द्रिकायामेव क्षीरसागरबुध्या पितृवियोगदुःखं परित्यजतीत्यर्थः। सकलदिगन्तव्यापिधवलचन्द्रिकामध्यवर्त्ती चन्द्रः क्षीरसागरमध्यस्थ इव शोभत इति भावः। गङ्गावद्दुग्धवर्णेयं कौमुदीति भावः। चतुर्दिगन्ती। समाहारे द्विगोर्ङीप् ॥ ७० ॥

पुत्री विधोस्ताण्डविकाऽस्तु सिन्धोराख्या चकोरस्य दृशोर्वयस्या ।
तथाऽपि सेयं कुमुदस्य काऽपि ब्रवीति नाम्नैव हि कौमुदीति ॥ ७१
ज्योत्स्नापयःक्ष्मातटवास्तुवस्तुच्छायाच्छलाच्छिद्रधरा धरायाम् ।
शुभ्रांशुशुभ्रांशकराः कलङ्कनीलप्रभामिश्रनिभा विभान्ति ॥ ७२

पुत्रीति । इयं चन्द्रिका यद्यपि चन्द्रात् प्रसुतत्वाद्विधोः पुत्री अस्तु, सिन्धोः समुद्रस्य ताण्डविका नृत्योपदेशिकाऽपि नर्तयित्री अस्तु । चन्द्रिकया हि सिन्धुरुल्लास्यते सा च तस्य नप्त्री भवति, यद्वा इयं विधोः पुत्री सिन्धोस्ताण्डविका भवतु, तथा चकोरस्याख्या पेया भवतु, सकललोकस्य दृशोः प्रेमपात्रतया वयस्या सखी भवतु, तथाऽपि सेयं चन्द्रिका कुमुदस्य काऽप्यनिर्व्वचनीया सम्बन्धिनी भवतु, पूर्व्वनिर्द्दिष्टसर्व्वापेक्षया कुमुदस्यैव निरतिशयानन्दकारित्वात् केनाप्यनिर्व्वचनीयेन सम्बन्धिनी भवत्वित्यर्थः । हि यस्मात् कौमुदीति नाम्नैव कर्त्तृ ब्रवीति सर्व्वेषां तत्र तत्सम्बन्धसम्भवेऽपि कुमुदानामियं कौमुदीति तस्येदमिति सम्बन्धेऽपि कुमुदानामेव प्रीत्यतिशयेन सम्बन्धं वदतीत्यर्थः । कौमुदीति नाम्नैव हि स्पष्टं ब्रवीतीति च चन्द्रिकया सर्व्वेषामप्यानन्दः कृतः, कुमुदानान्तु विशेषत इति भावः । कार्य्येण कारणानुमानं । ताण्डविका, अर्शाद्यजन्तान्मत्वन्ताद्वा ताण्डवशब्दात् तत्करोतीति ण्यन्ताट्ठक् । अशनमर्शि दण्डादित्वाद्यत् । अश्येति च पाठः ॥ ७१ ॥

ज्योत्स्नेति । शुभ्रांशोश्चन्द्रस्य शुभ्रांशा धवलभागाश्च ते कराः किरणाश्च धरायां भूम्यां कलङ्कस्य नीलाभिः प्रभाभिर्मिश्रा निभा कान्तिर्येषां ते कलङ्कनीलकान्तिच्छुरिता इव विभान्ति । यतो ज्योत्स्नैव पयो जलं दुग्धं वा यस्मिंस्तादृशं क्ष्मातटं दुग्धधवलचन्द्रिकाधवलीकृतभूतलं तदेव वास्तु वसतिस्थानं येषां तानि वस्तूनि वृक्षादिपदार्थास्तेषां छाया छलं येषां तादृशानि छिद्राणि प्रकाशेन रिक्तत्वाद्बिलानि पदार्थप्रतिच्छायारूपाणि तानि धरन्तीति तादृशाः ।

कियान् यथाऽनेन वियद्विभागस्तमोनिरासाद्विशदीकृतोऽयं ।
अद्भिस्तथा लावणसैन्धवीभिरुद्भासिताभिः शितिरप्यकारि ॥७३॥
गुणौ पयोधेर्निजकारणस्य न हानिवृद्धी कथमेतु चन्द्रः ।
चिरेण सोऽयं भजते तु यत् ते न नित्यमम्भोधिरिवात्र चित्रं ७४

चन्द्रिकाधवलिताः पदार्थाश्चन्द्ररश्मय इव वृक्षादिप्रतिच्छायाश्चन्द्रकलङ्कनीलरश्मय एवेति धरायामपि निपतिताश्चन्द्रकिरणा नीलधवला एव शोभन्त इत्यर्थः। अन्यस्य करा हस्ताः कलङ्कवन्नीलस्य नीलमणेः प्रभया मिश्रकान्तयो नीलमणियुक्ताङ्गुलीयकप्रभामिश्रा विभान्ति। शुभ्रांशुशुभ्रांश्विति पाठेऽप्यंशुर्लेशे रवे रश्मावित्यभिधानादंशुशब्दस्य लेशवाचित्वात् स एवार्थः। ज्योत्स्नैव पयो जलं तस्य क्ष्मा भूमिः तस्यास्तटं तदेव वास्तु निवासस्थानं येषां तेषां वस्तूनां छायाव्याजेन छिद्राणि धरन्तीति वा ॥ ७२ ॥

कियानिति। उदितमात्रेणानेन चन्द्रेण तमोनिरासाद्धेतोः कियान् किञ्चिन्मात्रोऽयं वियद्विभागः पूर्वाकाशदेशो यथा विशदीकृतः तथा चन्द्रकिरणैरुद्भासिताभिर्दीप्तिं प्रापिताभिर्लावणसैन्धवीभिरद्भिः कियानयं वियद्विभागः शितिः श्यामोऽप्यकारि। अप्रौढप्रभे चन्द्रे पूर्वाकाशदेशस्तिमिरनिरासादुज्ज्वलो भवति ततो निरस्तस्य च तमसः प्रतीच्यां घनीभूतत्वात् पश्चिमाकाशदेशः श्यामलो भवतीति ततैवस्तुत्वं चा। समुद्रजलञ्च नीलं पूर्वाकाशदेश एव नीलैः समुद्रजलैः पुनर्नीलोऽप्यकारीति वा। लावणसैन्धवी, लवणसिन्धोरिमास्तस्येदं इत्यणि ङीबिति उभयपदवृद्धिः ॥ ७३ ॥

गुणाविति। चन्द्रो निजकारणस्य पयोधेर्हानिवृद्धिरूपौ गुणौ कथमेतु प्राप्नोतु, अपि तु कार्य्यगुणानां कारणगुणपूर्व्वकत्वनियमादवश्यमपचयोपचयौ चन्द्रं प्राप्नुत इति युक्तमेवैतत् न किञ्चिच्चित्रमित्यर्थः। तर्हि कुत्र चित्रमित्याशङ्क्याह। सोऽयं चन्द्रस्ते हानिवृद्धी

आदर्शदृश्यत्वमपि श्रितोऽयमादर्शदृश्यां न विभर्त्ति मूर्त्तिं ।
त्रिनेत्रभूरप्ययमत्रिनेत्रादुत्पादमासादयति स्म चित्रं ॥ ७५ ॥
इज्येव देवव्रजभोज्यऋद्धिः शुद्धा सुधादीधितिमण्डलीयं ।
हिंसां यथा सैव तथाऽङ्गमेषा कलङ्कमेकं मलिनं विभर्त्ति ॥७६॥

यच्चिरेण पक्षात्मपरिमितेन बहुना कालेन भजते न तु अम्भोधिरिव नित्यं प्रत्यहं भजतेऽत्र विषये चित्रमाश्चर्यं। समुद्रो यथा प्रत्यहं हानिवृद्धी भजते तथा पुत्रोऽपि चन्द्रो नेत्याश्चर्यमित्यर्थः॥ ७४ ॥

आदर्शेति। अयं चन्द्र आदर्शवद्दृश्यत्वं वृत्तत्वादिना रमणीयत्वं श्रितो भजमानोऽपि आदर्शवद् दृश्यां रमणीयां मूर्त्तिं न विभर्त्ति चित्रं। यो ह्यादर्शवद् दृश्यो भवति स एवादर्शवद् दृश्यां मूर्त्तिं न विभर्त्ति तद्वद्दृश्यो न भवतीति विरोधादाश्चर्यमित्यर्थः। अथ च दर्पणवद्दृश्यत्वं श्रितोऽप्यदर्शं दर्शमभिव्याप्य दृश्याममावास्यायां दर्शनयोग्यां मूर्त्तिं न विभर्त्ति इदानीं पूर्णत्वेन दृश्यमानोऽपि दर्शे लेशेनापि न दृश्यत इत्यर्थः, इति विरोधपरिहारः। दर्पणवद्दृश्यत्वं श्रितोऽपि आदर्शंदर्शं मर्यादीकृत्य कृष्णचतुर्दशीमभिव्याप्य दृश्यां मूर्त्तिं ग विभर्त्ति, अपि तु तावत्पर्यन्तं दृश्यो भवत्येवेति वा। तयाऽयं चन्द्रः, त्रिनेत्राद्भवति यस्तादृशस्त्रिनेत्रादुत्पन्नोऽपि, न त्रिनेत्रोऽत्रिनेत्रस्तस्मात्त्रिनेत्रव्यतिरिक्तात् सकाशादुत्पादमुत्पत्तिमासादयति स्म प्राप्नोत्यपि चित्रं। त्रिनेत्रादुत्पन्नोऽपि त्रिनेत्रादुत्पन्नो न भवतीत्याश्चर्यमित्यर्थः। अथ च त्रिनेत्रादुत्पन्नोऽप्यत्रिनेत्रादुत्पत्तिमाप्नोत्येतदपि विरुद्धं। अथ च त्रिनेत्रो भूर्वसतिस्थानं यस्य तादृशः तथाऽत्रेर्मुनेर्नेत्राच्चित्रमाश्चर्यरूपमुत्पादं प्राप्नोति विरोधपरिहारः। सहजसौन्दर्यमाश्चर्यमाहात्म्यं, कुलस्य माहात्म्यज्ञानेन चन्द्रस्य वर्णितं। चन्द्रस्यात्रिनेत्रसमुद्भवत्वं पुराणप्रसिद्धम्॥ ७५ ॥

इज्येति। देवानां व्रजैः समूहैर्भोज्या पेया ऋद्धिः समृद्धिर्यस्याः सा शुद्धा धवला इयं सुधादीधितेरमृतकरस्य मण्डली इज्येव याग

एकः पिपासुः प्रवहानिलस्य च्युतो रथाद्वाहनरङ्कुरेषः।
अस्त्यम्बरेऽनम्बुनि लेलिहास्यः पिवन्नमुष्यामृतविन्दुवृन्दं॥ ७७॥

इव शोभत इति शेषः। इज्याऽपि देवब्राह्मणभोज्यचरुपुरोडाशादिसृष्टि शुद्धा पवित्रा च भवति। तथैषा चन्द्रमण्डली कलङ्काख्यमेकं मध्यवर्त्तिनमङ्गमवयवं मलिनाकारं तथा विभर्त्ति। यथा सैवेज्यैव पूर्व्वोक्तगुणविशिष्टा सत्यपि एकां हिंसां पशुहिंसात्मकमङ्गं कर्म्मसाधनं मलिनं पातकहेतुभूतं विभर्त्ति। परोपकारशीलायाः सर्व्वात्मना शुद्धाया अपि चन्द्रमण्डल्या दैवादेकमङ्गं मलिनं जातमित्यर्थः। यागे हि हिंसामात्रमेव मालिन्यं। सुधाऽङ्गमिति पाठे कलङ्करूपमेकमङ्गं मलिनं सुधा इयैव विभर्त्ति, शुद्धाया मालिन्ययोगस्यानौचित्यादित्यर्थः। शुद्धस्यापि शीतधर्म्मस्य साङ्ख्यैर्दोषारोपणान्मालिन्यं सुधैवेत्यर्थः। इज्या व्रजयजोः इति क्यप्॥ ७६॥

एक इति। एष मृगाङ्को दृश्यमानः प्रसिद्ध एकः पिपासुः तृष्णाक्रान्तः सप्तवायुस्कन्धमध्यवर्त्तिनः प्रवाहाख्यस्यानिलस्य मृगवाहनस्य गगनचारिणो रथच्युतो वाहनभूतो रङ्कुर्मृगोऽनम्बुनि निर्जलेऽम्बरे लेलिहास्यो नितरां पौनःपुन्येन वा स्वादनकारि मुखं यस्य तादृशो भवन्नमुष्य चन्द्रस्यामृतविन्दुवृन्दं पिवन् सन्नस्ति। तृष्णाक्रान्तो रथं परित्यज्य पतितो निर्जलेऽपि गगने चन्द्रामृतविन्दुमास्वादयन् वायुवाहनमृग एवायं, न तु कश्चित् कलङ्कमृगो नामेत्यर्थः। अस्तीति वर्त्तमानप्रत्ययेनामृतास्वादनेन चन्द्रं परित्यज्य गन्तुमशक्तोऽधुनाऽपि वर्त्तत इति सूचितम्। एवमन्योऽपि तृष्णाक्रान्तो निर्जले देशे प्रस्रवणादेः पतज्जलविन्दुवृन्दं पिवन्ननुपशान्तपिपासो लेलिह सः संस्तत्रैव चिरं तिष्ठति। सप्तवायुस्कन्धाः पुराणप्रसिद्धाः। लेलिहेति नितरां पुनः पुनर्वा लेढीत्यर्थे यङि पचाद्यचि यङोचिचेति यङो लुक्॥ ७७॥

अस्मिन् शिशौ न स्थित एव रङ्कुर्यूनि प्रियाभिर्विहितोपदाऽयं।
आरण्यसन्देश इवौषधीभिरङ्के स शङ्के विधिना न्यधायि ॥७८॥
अस्यैव सेवार्थमुपागतानामास्वादयन् पल्लवमोषधीनां।
धयन्नमुष्यैव सुधाजलानि सुखं वसत्येष कलङ्करङ्कुः ॥ ७९ ॥
रुद्रेषुविद्रावितमार्त्तमारात्तारामृगं व्योमनि वीक्ष्य विभ्यत्।
मन्येऽयमन्यः शरणं विवेश मत्वेशचूडामणिमिन्दुमेणः ॥ ८० ॥

अस्मिन्निति। शिशौ बाले एककलात्मकेऽस्मिंश्चन्द्रे रङ्कुर्मृगो न स्थितो नासीदेव तस्यां दशायामदर्शनात्, किन्तु प्रियाभिरोषधीभिर्यूनि तरुणे पूर्णावयवेऽस्मिंश्चन्द्रेऽयं रङ्कुरुपदेव विहिता प्रेषिता। कीदृशी। अरण्ये भवः सन्दिश्यते प्रस्थाप्यते सन्देशस्तद्रूपा। अरण्यभवानां सन्देशरूपा वा। वयं भवत्प्रिया निर्जने वने मृगैः सह वसामस्त्वं तु स्वर्गे विजयी सुखेन वर्त्तस इति गूढार्थोपलम्भसूचिकेति यावत्। अनन्तरं विधुना प्रेयसीसन्देशरूपः स रङ्कुरङ्के मध्येऽथ चोत्सङ्गे प्रियाप्रेमभरेण न्यधायि, स्थापित इत्यहं शङ्के। अन्याऽपि प्रिया तरुणं प्रियं प्रति कञ्चित् सन्देशमुपदारूपेण प्रेषयति, स च तत् हृदयादौ धारयति। ओषध्यो हि वनवासिन्यः तदनुरूपमेव सन्देशं मृगं स्वप्रिये चन्द्रे प्रेषितवत्यः। आरण्यसन्देश इवायमुपदा प्रहितेति वा। यदेति पाठे यदाप्रभृति प्रेषितस्तदाप्रभृति तारुण्यदशायां चन्द्रेणायमङ्के न्यधायि, न तु पूर्वमित्यर्थः। आरण्येति भवार्थेऽण्। ७८ ॥

अस्येति। एष कलङ्करङ्कुर्विरहपीडितत्वादस्यैव चन्द्रस्य सेवार्थमुपगतानामोषधीनां पल्लवमास्वादयन्, तथाऽमुष्यैव सुधारूपाणि जलानि धयन् पिबन् सुखमनायासलब्धवृत्तिरिव वसति, आहारलोभादत्रैव वसतीत्यर्थः। अन्योऽपि मृगो जलकिशलययुते देशे सुखेन वसति कदाचिदपि न त्यजति। पल्लवं जात्यैकवचनं॥ ७९ ॥

रुद्रेति। दक्षयज्ञे वीरभद्रावतारस्य रुद्रस्येषुणा विद्रावितं, अत

पृष्ठेऽपि किं तिष्ठति नाथ! नाथरङ्कुर्विधोरङ्क इवेति शङ्का।
तत्त्वाय तिष्ठस्व सुखे स्व एव यद्द्वैरथे पृष्ठमपश्यदस्य ॥ ८१ ॥
उत्तानमेवास्य वलक्षकुक्षिं देवस्य युक्तिः शशमङ्कमाह।
तेनाधिकं देवगवेष्वपि स्यां श्रद्धालुरुत्तानगतौ श्रुतायां ॥ ८२ ॥

एवार्त्तं तारारूपं व्योमनि आरात् समीपे दूरे वा वीक्ष्य बिभ्यत् तत्क्षणमयमन्योऽपरो मृग इन्दुमौलस्य चूडामणिं मत्वा शरणं विवेश, शिवेन शिरसि स्थापितत्वादयं मान्य इत्येतदाश्रयेण रुद्रान्मामयं रक्षिष्यत्येवेत्याशयेनान्यो मृगश्चन्द्रं शरणं प्रविष्ट इत्यर्थः, इत्यहं मन्ये। अन्यः सजातीयं कञ्चिद्भीतं दृष्ट्वा स्वयमपि भीतः सन् कमपि शरणं याति। गतेत्यपिपाठः। तारामृगस्य रुद्रेषु द्रावणं काशीखण्डादौ ज्ञातव्यं ॥ ८० ॥

पृष्ठ इति। हे नाथ! विधोरङ्क इव यथा चन्द्रस्योत्सङ्गे कलङ्कमृगो वर्त्तते तथा रङ्कुः पृष्ठेऽपि पश्चाद्भागेऽपि किं तिष्ठति, अथ न तिष्ठति इति तव शङ्का चेद्वर्त्तत इति शेषः, तर्हि त्वं तत्त्वाय याथात्म्यज्ञानार्थं स्वे निजे सुखे एव विषये तिष्ठस्व निजसुखमेव निश्चयं पृच्छेत्यर्थः। यत्त्वन्मुखं द्वैरथे समानशोभाभिलाषाद् द्विरथसम्बन्धिनि द्वन्द्वयुद्धेऽस्य त्वन्मुखाद्भज्यमानत्वात् पलायमानस्य चन्द्रस्य पृष्ठं पश्चाद्भागमपश्यत् तस्मात् तत् स्वमुखमेव निःसंशयत्वेन पृच्छेत्यर्थः। त्वन्मुखं चन्द्रादधिकमिति भङ्ग्या नलमुखवर्णनं कृतं। तत्त्वाय तत्त्वं ज्ञातुं क्रियार्थोपपदेति तादर्थ्यमात्रे वा चतुर्थी। तिष्ठस्व स्थेयाख्यायां तङ्। स्वे वैकल्पिकत्वात् स्मिन्नभावः ॥ ८१ ॥

उत्तानमिति। युक्तिरर्थापत्तिरनुमानं वाऽस्य देवस्य चन्द्रस्य मध्यवर्त्तिनमङ्कं कलङ्करूपं शशमुत्तानं स्वर्गोन्मुखनखपादादिदृश्यमानपृष्ठभागमाह ब्रूते यतो वलक्षकुक्षिं धवलोदरं। यद्ययं शशकोऽस्मत्सम्मुखोदरोऽनुत्तानो भविष्यत् तर्हि मध्यवर्त्तिशशकोदरस्य धवलत्वाच्चन्द्र-

दूरस्थितैर्वस्तुनि रक्तनीले विलोक्यते केवलनीलिमा यत् ।
शशस्य तिष्ठन्नपि पृष्ठलोम्नां तन्नः परोक्षः खलु रागभागः ॥ ८३
भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं पदप्रयोगाध्वनि लोक एषः ।
शशो यदस्यास्ति शशी ततोऽयमेवं मृगोऽस्यास्ति मृगीति नोक्त ८४

मध्यभागोऽपि धवलोऽभविष्यत्, न च तथा दृश्यते, किन्तु मलिनः, तस्मादुत्तान एव शशकश्चन्द्रेऽस्तीति युक्तिरहेत्यर्थः। तेन चन्द्रशशकनिश्चितोत्तानत्वेनैव हेतुनाऽह देवगवेष्वपि सुरभीप्रभृतिषु विषये वेदे स्तुतायामुत्तानगतौ सुरलोकसम्मुखचरणतया गमने विषये पूर्वापेक्षयाऽधिकमतितरां श्रद्धालुरास्तिक्ययुक्तः स्यां उत्ताना वै देवगवाश्चरन्ति इति श्रुतिर्न्यायेपर्पक्षार्थतया स्तुत्यैवेत्यहमिदानीमधिकं मन्य इत्यर्थः। देवगवेषु गोरतद्धितलुकीति टच्। देवगवीष्विति पाठे टित्वात् ङीप् ॥ ८२ ॥

उक्तरीत्योत्तानगतौ सिद्धायामपि शशकस्य रक्तपृष्ठत्वान्नीलत्वेन प्रतीति कथमित्यत आह। दूरेति। दूरस्थितैर्द्रष्टृभी रक्तनीले मिश्रितोभयवर्णे वस्तुनि, केवलत्यक्तरागभागो नीलिमैव यद्यस्माद्विलोक्यते तत् तस्मात् कारणाच्छशस्य पृष्ठवर्त्तिरोम्णां तिष्ठन्नपि रागभागो रक्तिमांशो नोऽस्माकमतिदूरस्थितानां खलु निश्चितं परोक्षो दृग्गोचरो न भवति, किन्तु नीलिमैव दृश्यत इत्यर्थः। तिष्ठन् वर्त्तमानोऽपि परोक्ष इति विरोधाभासः। दूरस्थत्वान्न दृश्यत इति तत्परिहारः। खलूत्प्रेक्षायां वा ॥ ८३ ॥

भङ्क्तुमिति। एष कविलोकः पदानां सुप्तिङन्तानां प्रयोगाध्वनि विषये व्याकरणस्य प्रकृतिप्रत्ययविभागपूर्वं शब्दव्युत्पादनकारिणः शास्त्रस्य मदधीन एव सकलशब्दप्रयोग इति दर्पं गर्वं, यद्वा लक्षणया वैयाकरणस्य व्याकरणाधीन एव सकलशब्दप्रयोग इति गर्वं भङ्क्तुं त्याजयितुं प्रभुः समर्थः। यद्यस्माद्धेतोरयं चन्द्रः शशोऽस्यास्तीति

यावन्तमिन्दुम्प्रतिपत् प्रसूते प्रासावि तावानयमब्धिनाऽपि ।
तत्कालमीशेन धृतस्य मूर्ध्नि विधोरणीयस्त्वमिहास्ति लिङ्गं ॥८५॥
आरोप्यते चेदिह कैतकत्वमिन्दौ दलाकारकलाकलापे ।
तत् संवदत्यङ्कमृगस्य नाभिकस्तूरिका सौरभवासनाभिः ॥ ८६ ॥

ततो हेतोः शशो यथोक्तः, लोकेनेति शेषः। एवममुनैव प्रकारेण मृगोऽस्यास्तीति मृगीति नोक्तः। शशोऽस्यास्तीति मत्वर्थेऽत इनिठनौ इतीनौ यथायं शशीत्युच्यते तथा तेनैव सूत्रेण मृगोऽस्यास्तीत्यत्र इनः प्राप्तौ सत्यामपि मृगीति नोक्तः तस्मादतिव्याप्त्यादिदोषाद् व्याकरणमूल एव लोकप्रयोग इति नियमो न युक्तः किन्तु कृत्तद्धितसमासानामभिधानं नियामकमिति। लक्ष्यमुद्दिश्य लक्षणप्रवृत्तिर्न तु लक्षणमुद्दिश्य लक्ष्यप्रवृत्तिरिति, तस्मात् प्रयोगमूलं व्याकरणमिति व्याकरणाल्लोके प्रयोग एव बलीयानिति भावः। अप्रस्तुतप्रशंसा ॥ ८४ ॥

यावन्तमिति। शुक्ला प्रतिपद् यावन्तं यत्प्रमाणमेककलमिन्दुं प्रसूते, अब्धिनाऽपि तावांस्तत्प्रमाण एककल एवायं प्रासावि न तु पूर्ण इत्यर्थः। एतत् कथं ज्ञातमित्यत आह। तत्कालं तस्मिन् काले समुद्रादुत्पत्तेरवसर एव ईशेन मूर्ध्नि धृतस्य विधोरणीयस्त्वं नितरां कार्श्यमेवैककलत्वे लिङ्गं ज्ञापकमनुमापको हेतुरस्ति। यदि समुद्रेण सम्पूर्णोऽयमजनयिष्यत् तर्हि शिवेनापि तदानीमेव शिरसि तावानेवाधास्यत्, न तु तथा तस्मात् प्रतिपदा एककलप्रसूतः तावान् समुद्रेणापीति। प्रतिपदुत्पन्नोऽप्ययमेककलत्वादेव न दृश्यत इति भावः ॥ ८५ ॥

आरोप्यत इति। कैतकत्वमिह इन्दौ चेद् यदि आरोप्यते किम्भूते दलाकारः कैतकीपत्रसदृशो धवलः कलानां कलापः समूहो यस्य तस्मिन् केतकदलवच्छुभ्रकलापत्वाच्चन्द्रः कैतकमेवेति यदि उच्येत

आसीद् यथाज्योतिषमेव गोलः शशी समक्षं चिपिटस्ततोऽभूत्।
स्वर्भानुदंष्ट्रायुगयन्त्रकृष्टपीयूषपिण्याकदशावशेषः ॥ ८७ ॥
असावसाम्याद्वितनोः सखा नो कर्पूरमिन्दुः खलु तस्य मित्रं ।
दृश्यौ हि तौ द्वावपि पूर्वरूपाद् यद्वीर्य्यवत्तामधिकां दधाते८८

तत् तर्हि अङ्कमृगस्य मृगत्वेन नाभिकस्तूरिका कर्त्री आरोपितं तत्केतकत्वं कर्म्मीभूतं सौरभवासनाभिः कृत्वा संवदति। चन्द्रे केतकत्वं युक्तमित्यनुमन्यत इत्यर्थः। नाभिरिति पाठे, अङ्कमृगस्य नाभिः कर्त्री कस्तूरिकासम्बन्धीभिः सौरभवासनाभिः कृत्वा संवदतीति वा। केतक्यां कस्तूरीपरिमलो वर्त्तते, चन्द्रे च कलङ्कमृगनाभिरूपा कस्तूरी वर्त्तते, तस्माच्चन्द्रे केतकत्वमारोपयितुं युक्तमित्यर्थः। तत्केतकत्वमङ्कमृगस्य नाभिकस्तूरिकायाः परिमलस्य वासनाभिः सङ्क्रमणैः कृत्वा संवदति युक्त्या संवादं प्राप्नोत्येति वा। ताभिरिति पाठे, अतिप्रसिद्धाभिर्वासनाभिरित्यर्थः ॥ ८६ ॥

आसीदिति। एष शशी यथाज्योतिषं गर्गादिप्रणीतग्रहगणितशास्त्रानतिक्रमेण गोलो नारिकेलफलवद्वर्त्तुलोपरितनभाग एव पूर्व्वमासीत्, तर्हीदानीं कथमन्यथा दृश्यत इत्याशङ्क्याह। ततोऽनन्तरं कालक्रमेण स्वर्भानो राहोरूर्द्ध्वाधोभागस्थितदंष्ट्रायुगमेव यन्त्रं निष्पीडनचक्रं तेन कृष्टं निष्कृष्य गृहीतं पीयूषममृतं यस्य यस्माद्वा स चासौ पिण्याकदशो गृहीतरसनीरसतिलादिपिण्डीमात्ररूपोऽवशेष उद्धृतो भागो यस्य एवम्भूतः सन् चिपिटः पर्पटप्रायोऽभूदिति समक्षमिदानीं प्रत्यक्षेणानुभूयत एवेत्यर्थः। ज्योतिरधिकृत्य कृतो ग्रन्थो ज्योतिषं, अधिकृत्य कृते ग्रन्थे इत्यण्। ततो यथार्थेऽव्ययीभावः। ज्योतिश्शास्त्रे त्रयोदशाङ्गुलश्चन्द्रः षोडशाङ्गुलसूर्य्यस्याधोभागस्थो जलपूर्णकाचकूपिकाप्रायो यथोदितस्तथैव पूर्व्वमासीदित्युक्तम् ॥ ८७ ॥

असाविति। असौ चन्द्रो वितनोरनङ्गस्य सखा नो भवति।

स्थाने विधोर्वा मदनस्य सख्यं स शम्भुनेत्रे ज्वलति प्रलीनः ।
अयं लयं गच्छति दर्शभाजि भास्वन्मये चक्षुषि चादिपुंसः ॥८९॥

कुतः । असाम्यादसादृश्यात् । विवाहमैत्रवैराणि भवन्ति समशीलयोः इति शास्त्रादनयोः साङ्गानङ्गयोः सादृश्याभावात् मैत्री न सङ्गच्छत इत्यर्थः । तर्हि अनयोर्लोकप्रसिद्धा मैत्री कथमित्यत आह । खलु निश्चितं कर्पूरापरनाम्नैवेन्दुस्तस्यानङ्गस्य मित्रं तावतैव लोकप्रसिद्धिविरोधाभाव इत्यर्थः । तत्र हेतुमाह । यत् यस्मात् तौ द्वावपि कामकर्पूरौ दग्धौ सन्तौ पूर्व्वरूपाद्दग्धदशायाः सकाशादधिकां वीर्य्यवत्तां हि स्फुटं दधाते । पक्वो हि कर्पूरो वीर्य्यवत्तरो भवति । कामोऽपि दाहानन्तरं अधिकं वीर्य्यवान् अनुभूयते । तदुक्तं,

"कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववारवीर्य्याय तस्मै कुसुमधन्वने" ॥

इति । तस्मात् कामकर्पूरयोर्मैत्री युक्ता । घनसारश्चन्द्रसञ्ज्ञ इतिनिघण्टुः । कर्पूरमस्त्रियामित्यमरवचनात् कर्पूरशब्दो नपुंसकोऽपि ॥ ८८ ॥

स्थान इति । वाऽथवा विधोर्मदनस्य सख्यं स्थाने युक्तमेवेत्यर्थः । तत्रायं हेतुः । स कामः ज्वलति दीप्यमाने शम्भुनेत्रे प्रलीनः प्रकर्षेण लीन एकतां गतः प्रलयं गतो विनष्ट इत्यर्थः । अयं चन्द्रश्च दर्शभाजि दर्शनं दर्शस्तद्व्यापारयुक्तोऽथ चामावास्यां गते भास्वन्मये सूर्य्यरूपे आदिपुंसो विष्णोश्चक्षुषि लयमेकतां गच्छति । दर्शे हि चन्द्रः सूर्य्यं गच्छति अतएव दर्शस्य सूर्य्येन्दुसङ्गम इति नाम । सूर्य्यो विष्णोर्दक्षिणचक्षुः तथा च तुल्ययोर्हरिहरयोर्नेत्रयोर्द्वयोरपि चन्द्रकामयोः प्रलीनत्वाद्दर्शे चन्द्रस्याप्यनङ्गतया च समशीलत्वादुचितैव मैत्रीत्यर्थः । तथा च कामस्य चन्द्रसखिताप्रसिद्धिर्मुख्यैवस्तुक्तेति भावः ॥ ८९ ॥

नेत्रारविन्दत्वमगान्मृगाङ्कः पुरा पुराणस्य यदेष पुंसः ।
अस्याङ्क एवायमगात् तदानीं कनीनिकेन्दीन्दिरसुन्दरत्वं ॥ ९०
देवेन तेनैव च काश्यपिश्च साम्यं समीक्ष्योभयपक्षभाजौ ।
द्विजाधिराजौ हरिणाश्रितौ च युक्तं नियुक्तौ नयनक्रियायां ९१

नेत्रेति। पूरा पूर्व्वं यदा यस्मिन् काले एष मृगाङ्कः पुराणस्य पुंसः श्रीविष्णोर्नेत्रारविन्दत्वं नयनकमलत्वमगात्, तदानीं तस्मिन् कालेऽस्य विष्णुनेत्रारविन्दभूतस्यास्य चन्द्रस्यायमङ्कः कलङ्क एव कनीनिकाया इन्दीन्दिरस्य भ्रमरस्य सुन्दरत्वमगात् प्रायात्। अदादिति पाठे, अयं श्रीविष्णुरस्य चन्द्रस्याङ्के विषये कनीनिकेन्दीन्दिरसुन्दरत्वमदात्। नेत्रे हि कनीनिकया भाव्यं, अरविन्दे च भ्रमरेण, तथा चास्य नेत्रारविन्दरूपत्वादङ्कमेवोभयं श्रीविष्णुः कृतवानित्यर्थः। अङ्क एव कनीनिका कर्त्री भ्रमरेण सुन्दरत्वमस्यादादिति वा। इन्दीन्दिरालिषट्चरणचञ्चरीकालिनो द्विरेफाः स्युरिति हलायुधः॥ ९०॥

देवेनेति। तेन देवेन श्रीविष्णुनैव चन्द्रः काश्यपिर्गरुडश्चैतौ द्वावपि साम्यं समानधर्म्मतां समीक्ष्य तुल्यायां नयनक्रियायां क्रमेण नेत्रव्यापारे वाहनव्यापारे च यन्नियुक्तौ तद् युक्तमुचितमित्यर्थः। चावन्योन्यसमुच्चये साम्यमेवाह। उभय पक्षौ शुक्लपक्षकृष्णपक्षौ भजति चन्द्रः। गरुडस्तु द्वौ पक्षौ छदौ भजति। तादृशौ द्वावपि। तथा द्विजानां ब्राह्मणानां राजा चन्द्रः। गरुडस्तु पक्षिणां राजा तादृशौ। तथा हरिणेन कलङ्कमृगेणाश्रितश्चन्द्रः। गरुडस्तु हरिणा विष्णुना वहनार्थमाश्रितः। तादृशौ। एवमुभयोः साम्यात् समे एव व्यापारे नियुक्तौ। तदुचितं कृतमिति भावः। काश्यपि। वाह्वादित्वादिञ्॥ ९१॥

यैरन्वमायि ज्वलनस्तुषारे सरोजिनीदाहविकारहेतोः ।
तदीयधूमौघतया हिमांशौ शङ्के कलङ्कोऽपि समर्थितस्तैः ॥९२॥
खेदस्य धाराभिरिवापगाभिर्व्याप्ता जगद्भारपरिश्रमार्त्ता ।
छायापदेशाद्वसुधा निमज्ज्य सुधाम्बुधावुज्झति खेदमत्र ॥९३॥
समानुमैवं बहुकालनीलीनिपातनीलः खलु हेमशैलः ।
इन्दोर्जगच्छायमयेऽन्यथाऽङ्के पीतो विभागः प्रतिबिम्बितः स्यात्

यैरिति । यैः पण्डितैः सरोजिन्या दाहरूपाद्विकाराद्धेतोः तुषारे हिमे ज्वलनोऽग्निरन्वमायि, तुषारः साग्निर्भवितुमर्हति सम्बन्धे सति दाहकारित्वात् साग्निभूदेशवत् तप्तोदकवद्वेति हिमे विषये वह्निरनुमित इत्यर्थः, तैः पण्डितैर्हिमांशौ तुषारमये चन्द्रे वर्त्तमानः कलङ्कोऽपि तदीयधूमौघतया हिमाग्निसम्बन्धिधूमसमूहरूपत्वेन समर्थित इत्यहं शङ्के । वह्नौ हि धूमेन भाव्यं चन्द्रस्य तुषारमयत्वादुक्तरीत्या वह्निमान्, तथा च कलङ्को धूमसमूह एवेति तैः समर्थितमित्यहं सम्भावयामीत्यर्थः ॥ ९२ ॥

खेदस्येति । वसुधा छायापदेशात् स्वीयप्रतिबिम्बव्याजेन सुधाम्बुधावत्र चन्द्रे निमज्ज्यान्तःप्रविश्य खेदं जगद्भारपरिश्रमपीडामुज्झतीव । किम्भूता । जगद्भारवहननिमित्तः परिश्रमः तेनार्त्ता नितरां पीडिताऽत एव खेदस्य धाराभिरिवापगाभिर्व्याप्ता समन्तात् पूरिता। अमृतसमुद्रनिमज्जने हि खेदो गच्छत्येव यस्याश्च तत्तन्नदीरूपः खेदः तस्याः श्रमहरणे सुधासमुद्र एव उचितः। एतेन कलङ्कस्य मृगशशभूच्छायप्रभृतिमतभेदा दर्शिताः ॥ ९३ ॥

समेति । हेमशैलो मेरुः खलु निश्चितं सगमारभ्याद्य यावदतिक्रान्तेन बहुना कालेन कृत्वा नीलीनिपातः श्यामिकागमनं तेन कृत्वा नीलो बहुकालीनत्वान्नीलमलसम्बन्धान्नीलवर्णः स जात एवम्प्रकारा समानुमाऽनुमानमेवमहं सम्भावयामीत्यर्थः । अन्यथा यदि स्वर्णाचलः

माऽवापदुन्निद्रसरोजपूजाश्रियं शशी पद्मनिमीलितेजाः ।
अक्षिद्वयेनैव निजाङ्करङ्कोरलङ्कृतस्तामयमेति मन्ये ॥ ९५ ॥
य एष जागर्त्ति शशः शशाङ्के बुधो विधत्ते क इवात्र चित्रम् ।
अन्तः किलैतत् पितुरम्बुराशेरासीत्तुरङ्गोऽपि मतङ्गजोऽपि९६

कालभूयस्त्वेन न नीलीभूतः किन्तु हेममयत्वात् पीत एव स्यात्, तर्हि इन्दोर्ज्जगच्छायमये जगत्प्रतिविम्बभूते कलङ्करूपे प्रतीकेऽवयवे मेरोः पीतोऽपि भागः प्रतिविम्बितः स्यात् पीतोऽंशो दृश्येत, तस्मात् स्वर्णाचलो नील एव जातस्तथा च सकलाया अपि भूमेर्नीलवर्णत्वात् तत्प्रतिविम्बरूपः कलङ्कोऽपि नील एव युक्त इत्यर्थः। जगच्छायेति विभाषासेनेति षण्डत्वं ॥ ९४ ॥

मेति। शशी उन्निद्रैर्विकसितैः सरोजैः कृत्वा या पूजा तज्जनितां श्रियं माऽवापत् मा स्म लभत यतः पद्मनिमीलि कमलसङ्कोचकं तेजो यस्य सः। विकसितानामपि कमलानां पूजार्थं चन्द्रसविधे क्रियमाणानां चन्द्रतेजसां सङ्कोचस्यैव सम्भवादुन्निद्रसरोजपूजाश्रियं कथं प्राप्नोति। प्रकारान्तरेण प्राप्नोतीत्याह निजाङ्कभूतस्य रङ्कोर्मृगस्याक्षिद्वयेनैवालङ्कृतोऽयं चन्द्रः तामुन्निद्रपूजाश्रियमेति प्राप्नोति, तन्नयनयोरुन्निद्रकमलरूपत्वादित्यहं मन्ये। अङ्कमृगनेत्राभ्यां कृत्वाऽयं चन्द्रो विकसितकमलाभ्यां पूजामिव शोभां प्राप्नोतीति भावः इति वा ॥ ९५ ॥

य इति। य एष प्रत्यक्षदृश्यः शशः शशाङ्के जागर्त्ति स्फुरति, अत्र विषये क इव बुधश्चित्रमाश्चर्य्यं विधत्ते, अपि तु न कोऽपि। किल यस्मादेतत्पितुरम्बुराशेरन्तर्मध्ये उच्चैःश्रवः संज्ञकस्तुरङ्गोऽप्यासीदैरावताख्यो मतङ्गजोऽप्यासीत्। यदीयपितुर्मध्येऽश्वगजादिकं भवति तदीयपुत्रमध्ये शशमात्रसम्भवे किमाश्चर्य्यमित्यर्थः ॥ ९६ ॥

गौरे प्रिये भातितमां तमिस्रा ज्यौत्स्नी च नीले दयिता यदस्मिन्।
शोभातिलोभादुभयोस्तयोर्वा सितासितां मूर्त्तिमयं बिभर्त्ति ९७
वर्षातपानावरणं चिराय काष्ठौघमालम्ब्य समुत्थितेषु।
बालेषु ताराकवकेष्विहैकं विकस्वरीभूतमवैमि चन्द्रम् ॥९८॥

गौर इति। तमिस्रा तमोबहुलाऽस्य दयिता रात्रिर्गौरे प्रिये चन्द्रे विषये भातितमां, तथा ज्यौत्स्नी च चन्द्रिकायुक्ता धवलाऽस्य दयिता रात्रिर्नीले प्राणेशेऽस्मिन् चन्द्रे नितरां शोभते भिन्नवर्णे हि शोभेत इत्यर्थः। तस्माद्धेतोस्तयोस्तमिस्राज्योत्स्न्योरुभयोरपि विषये स्वस्य शोभाप्राप्तेर्व्वा लोभादभिलाषात् तयोरेव पत्न्योर्वा शोभाप्राप्तिस्तादभिलाषाद्धवलश्यामलसम्बन्धात् तमिस्राज्योत्स्न्योः शोभया भवितव्यमित्यर्थः। अयं चन्द्रः सितासितां धवलां श्यामलाञ्च मूर्त्तिं कायं बिभर्त्तीव। वा इवार्थे। शोभातिलोभादित्यन्वयः। नीलभागे ज्योत्स्नीं प्रियां धारयितुं, धवले च तामसीमिति यथासङ्ख्यम् ॥ ९७ ॥

वर्षेति। अहं बालेषु तनुषु अविकसितेषु चेह प्रत्यक्षदृश्येषु तारासु नक्षत्रेष्वेव कवकेषु छत्राकेषु मध्ये चिरकालोत्पन्नत्वाद्विकस्वरीभूतं विकसितमतिस्थूलमेकञ्छत्राकमेव चन्द्रमवैमि मन्ये। किम्भूतेषु ताराकवकेषु। चिराय बहुकालं वर्षार्त्तौ आतपे ग्रीष्मर्त्तौ च वर्षेषु जलवृष्टिषु आतपेषूष्णेषु च सत्सु अनावरणमनाच्छादितं काष्ठौघन्दिक्समूहमेव दारुसमूहमालम्ब्य समुत्थितेषूत्पन्नेषु, वर्षाकाले ह्यनावृतेषु जलस्तिमितेषु पश्चादुष्णातमेषु च। काष्ठेषु सूक्ष्मस्थूलानि छत्राकानि भवन्ति तथा च तारा अल्पकवकानि भवन्ति, चन्द्रस्तु स्थूलकवकमिवेत्युत्प्रेक्षा ॥ ९८ ॥

दिनावसाने तरणेरकस्मान्निमज्जनाद्विश्वविलोचनानि ।
अस्य प्रसादादुडुपस्य नक्तं तमोविपद्द्वीपवतीन्तरन्ति ।९९॥
किं नाक्ष्णि नोऽपि क्षणिकोऽणुकोऽयं भानोऽस्ति तेजोमयविन्दुरिन्दु
अत्रेस्तु नेत्रे घटते यदासीन्मासेन नाशी महतो महीयान् ॥ १०० ॥

दिनेति। विश्वस्य जगतो विलोचनानि दिनावसाने तरणेः सूर्य्यस्याकस्मादसम्भावितहेतोर्निमज्जनात् प्रतीचीसागरनीरप्रवेशाद्धेतोर्नक्तं रात्रौ तमोनिमित्तां स्खलनादिरूपां विपदमेव द्वीपवतीं महानदीमस्योडुपस्य चन्द्रस्य प्रकाशरूपात् प्रसादात् तरन्ति, चन्द्रेण निरस्य सर्व्वं प्रकाशितमिति भावः। अन्येऽपि रात्रौ तरणेर्नौकाया अकस्मान्मज्जनाद्धेतोर्ब्रुडनरूपमापन्नदीमुडुपस्याकस्मादागतस्य लघुयानपात्रस्य प्रसादात् तरन्ति ॥ ९९ ॥

किमिति। नोऽस्माकममहतां पामराणामपि अक्ष्णि नेत्रे विषये तेजोमयः तेजोरूपो विन्दुरेवायमिन्दुरङ्गुल्या नयनप्रान्तचिपिटीकरणे धवलवर्त्तुलाकारेण भानः शोभमानः किं नास्ति अपि त्वस्मदादिनेत्रेऽपीन्दुर्वर्त्तत एव। अणुकोऽल्पीयांस्तथा क्षणिकः क्षणमात्रावस्थायी यावच्चिपिटीकरणमेव दृश्यत इत्यर्थः। तर्ह्यस्माच्चन्द्रात् तस्य वैलक्षण्यं कथमित्यत आह। अत्रेर्मुनेर्नेत्रे तु पुनस्तेजोमयविन्दुरयमिन्दुर्महीयानितरापेक्षया नितरां महापरिमाण आसीत्। तथा मासेन कृत्वा नाशी मासावसानप्राप्तविनाशश्चाभूदिति यत् तद्घटते, एतद्युज्यत इत्यर्थः। यतो महतो महानुभावस्य। सर्व्वं हि महतां महदिति न्यायेन महतोऽत्रेर्नेत्रतेजोमयविन्दुरप्ययमिन्दुर्महापरिमाणश्चिरकालस्थायी चेत्यस्मन्नेत्रतेजोमयविन्दोरिन्दोर्वैलक्षण्यं युक्तमेवेति भावः। अणुकः, अल्प इति कन्। नाशी, अस्त्यर्थे इनिः ॥ १०० ॥

तातुमिति। मृतसञ्जीविन्यादय ओषधयः स्वशक्त्या स्वसामर्थ्येन निजरसवीर्य्यविपाकाढ्यां कृत्वा ओषधीशत्वात् पतिमेनं चन्द्रं क्षयिष्णु

त्रातुं पतिं नौषधयः स्वशक्त्या मन्त्रेण विप्राः क्षयिणं न शेकुः।
एनं पयोधिर्मणिभिर्न पुत्रं सुधाप्रभावैर्न निजाश्रयं वा ॥ १०१ ॥
वृथा निशानाथमहःसुधा वा हरेदसौ वा न जराविनाशौ।
पीत्वा कथं नाऽपरथा चकोरा विधोर्मरीचीनजरामराः स्युः १०२

प्रतिदिनं कलाक्षयवन्तमथ च क्षयरोगिणं सन्तं त्रातुं रक्षितुं न शेकुः। तथा विप्रा द्विजराजत्वान्निजं स्वामिनं क्षयिणं मन्त्रेण स्तुतिसामर्थ्येन कृत्वा रक्षितुं न शेकुः। तथा पयोधिरपि पुत्रं क्षयिणमेनं मणिभिरनेकप्रभावैरन्तरस्थै रत्नैः कृत्वा रक्षितुं न शशाकेति वचनपरिणामः। तथा सुधाऽपि स्वाधारभूतं क्षयिणमेनमजरामरत्वजनकैः प्रभावैः कृत्वा त्रातुं न शशाक, वा समुच्चये। ओषध्यादयः स्वशक्त्यादिरक्षणसाधने सत्यपि पतित्वात् प्रभुत्वात् पुत्रत्वान्निजाश्रयत्वाच्च क्षयाद्रक्षितुमर्हमप्येनं रक्षितुं समर्था न बभूवुरिति विशेषोक्त्या पूर्व्वकर्म्मजो रोगो महानुभावैरप्यपनेतुं न शक्यत इति व्यज्यते। अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति ओषध्यादीनां सामर्थ्यं प्रसिद्धम् ॥ १०१ ॥

वृथेति। निशानाथस्य चन्द्रस्य महः तेजः सुधा वा पीयूषरूपमेवेति लोकवादो वृथा असत्य एव भवेत्। वा अथ वा यदि चन्द्रतेजः सुधैवेति लोकप्रवादः सत्य एव तर्ह्यसौ चन्द्रतेजोरूपा सुधा जराविनाशौ जरामरणे न हरेद्विनाशयेत् चन्द्रतेजः सुधा नैवेत्यङ्गीकार्य्यम्। अथ चैतद्रूपा सुधाऽपि जरामरणे नाशयतीत्यङ्गीकार्य्यमित्यर्थः। अपरथाऽन्यथा यदि चन्द्रतेजः सुधेति प्रवादः सत्यस्तद्रूपा सुधा जरामरणे विनाशयेत् तर्हि चकोराख्याः पक्षिणो विधोर्मरीचीन् पीत्वाऽपि कथं किमिति नाजरामराः स्युर्जरामरणरहिता भवेयुः। चन्द्रतेजःसुधात्वे एतस्याश्च सुधाया जरामरणविनाशे सामर्थ्यसद्भावे तत्पाने चकोरैरप्यजरामरैर्भाव्यं, न च ते तथा, तस्मात् तत्तेजसः सुधात्वं वा वृथा भवेत्। सुधाभूतस्यापि जरामरणापहारे सामर्थ्यं नास्तीत्येतदङ्गीकर्त्तव्यं, तथा सुधाप्रभावैर्न निजाश्रयं वेति पूर्व्वश्लोकांशसमाधानमित्याशयः। अजरामरीस्युरिति पाठे च्विः ॥ १०२ ॥

वाणीभिराभिः परिपक्त्रिमाभिर्नरेन्द्रमानन्दजडञ्चकार।
मुहूर्त्तमाश्चर्य्यरसेन भैमी हैमीव दृष्टिस्तिमितञ्च तं सा ॥१०३॥
इतो मुखाद्वागियमाविरासीत् पीयूषधारामधुरेति जल्पन्।
अचुम्बदस्याः स मुखेन्दुविम्बं संवावदूकश्रियमम्बुजानाम् ॥१०४॥

वाणीभिरिति। सा भैमी आभिः पूर्व्वोक्ताभिः परिपाकेन निर्वृत्ताभिः परिणतकवित्वशक्तितया प्रसादादिगुणयुक्ताभिर्वाणीभिः कृत्वा तं नरेन्द्रमानन्दजडं हर्षपरवशञ्चकार। तथा मुहूर्त्तमद्भुापरनाम्नाश्चर्य्येण रसेनाय च तद्रूपेले जन तहैमीतुषारसम्बन्धिनी दृष्टिरिव भैमी स्तिमितमतिस्नेहात् प्राप्तस्तम्भं वाऽथचार्द्रञ्चकार हिमदृष्टिर्यथा अन्यं जडमार्द्रञ्च करोति तद्वेयमपि आनन्दजडं सातिस्नेहञ्च चकारेत्यर्थः। परिपक्त्रिमाभिः डित्वाक्त्रिर्वृत्तेऽर्थे क्त्रिः, क्त्रेर्मम्॥ १०२॥

इत इति। इत्येवं जल्पन्, वदन्, स नलोऽम्बुजानां संवावदूका नितरां संवादिनी श्रीर्यस्य तादृशं कमलतुल्यसौरभमस्या मुखेन्दुविम्बमचुम्बत्, चन्द्रकमलतुल्यं भैमीमुखं प्रीत्यतिशयादचुम्बदित्यर्थः। इति किम्। हे भैमि! इयमुक्तप्रकारा पीयूषधारावन्मधुरा वागितः प्रत्यक्षदृश्याद्भवन्मुखादाविरासीन्निःसृतेति। इत इत्यनेन सामीप्याभिनयकारिणा करेण भैमीमुखं चिवुके धृतमिति ध्वन्यते। मुखस्येन्दुविम्बत्वेन च पीयूषधारासम्बन्धौचिती सूच्यते। तथा च पीयूषधारया मधुरेत्यपि व्याख्येयं। संवावदूकेत्यादिना च भैम्याः पद्मिनीत्वं प्रसिद्धं। चन्द्रविम्बस्य कमलैः सह विसंवादो विरोधित्वात्। एतन्मुखचन्द्रविम्बस्य तु कमलैः सह संवादः कमलसौभाग्यभाक्त्वादित्यर्थः। प्रसिद्धचन्द्रविम्बादेतन्मुखचन्द्रविम्बमधिकमिति सूच्यते। अत्यर्थं संवदति संवावदूका सम्पूर्व्वोऽयं मैत्यां वर्त्तते॥ १०४॥

प्रियेणेति। प्रियेण 'इतो मुखादित्यादिपूर्वोक्तरूपं प्रियवचनमुक्त्वा भाषिता विदर्भभूमीपतेर्वंशेन कुलेन सृता जनिता, तथा

प्रियेण साऽथ प्रियमेवमुक्ता विदर्भभूमीपतिवंशमुक्ता।
स्मितांशुजालं विततान तारा दिवःस्फुरन्तीव कृतावतारा ॥१०५

स्ववर्णना न स्वयमर्हतीति नियुज्य मां त्वन्मुखमिन्दुरूपम्।
स्थानेऽत्युदास्ते शशिनः प्रशस्तौ धरातुरासाहमिति स्म साऽऽह १०६

तयेरितः प्राणसमः सुमुख्या गिरं परीहासरसोत्किरां सः।
भूलोकसारः स्मितवाक् तुषारभानुम्भणिष्यन् सुभगां बभाण १०७

स्फुरन्ती दीप्यमानकान्तिः सोल्लासा सा भैमी, अथ नलवचनानन्तरं स्मितांशुजालं विततान, तदेव नलाय प्रीतिदानमिव ददावित्यर्थः। केव। दिवः सकाशात् क्षीणपुण्यतया स्वेच्छया वा कृतावतारा भूलोकमागता रोहिणी तारेव। स्फुरन्ती किरणजालं विततारेति उत्प्रेक्षा, उपमा वा। वंशः कुलमेव वंशो वेणुस्तत्र जाता देवधार्यां मुक्ता मौक्तिकरूपा। कृतावतारेत्यत्र तरणं तारः, ऋदोरप् तदन्तात् प्रज्ञादित्वात् स्वार्थेऽणि, पश्चादवशब्देन सह सुपा इति समासः॥ १०५॥

स्वेति। सा धरातुरासाहं भूमीन्द्रमित्याह स्म। इति किम्। हे प्रिय! इन्दुरूपं त्वन्मुखमिति हेतोश्चन्द्ररूपत्वेनात्मस्तुतौ मां नियुज्य ज्य शशिनः प्रशस्तौ दर्शनविषयेऽत्युदास्तेऽतितरामुदासीनो भवति, एतत्स्थाने युक्तं। हेतुमेवाह। इति किं "सतामेतदकर्त्तव्यं परनिन्दाऽऽत्मनः स्तुतिः" इत्यादिवचनात् स्वयमात्मनैव स्ववर्णना स्वात्मस्तुतिर्नार्हति न युक्तेति। इयत्पर्यन्तं मया चन्द्रो वर्णित इदानीं त्वया वर्णनीयस्तूष्णीम्भावो युक्त इत्याशयेन भैमी चन्द्रस्तुतौ तं सोत्साहं प्रावर्त्तयदिति भावः। तुरासाहमित्यत्र तृतीयसर्गे धरातुरासाहेत्येतच्छ्लोकस्याऽशङ्का ज्ञातव्या। तत्रोत्तरं। इन्दुरूपं त्वन्मुखं चन्द्ररूपात्मस्तुतौ मां नियुज्य शशिनः प्रशस्तौ अत्युदास्ते साऽहं धरावदतराऽनुत्तानवेगा वा पृथ्वीवद् गम्भीरेत्यर्थः। अर्थात् तमाह स्मेति ज्ञातव्यं॥ १०६॥

तयेति। स भूलोके सारः श्रेष्ठतमो नलः स्मितवाक् तुषारभानुं

तवानने जातचरीं निपीय गीतिन्तदाकर्षणलोलुपोऽयम्।
हातुं न जातु स्पृहयत्यवैमि विधुं मृगस्त्वद्वदनभ्रमेण ॥ १०८ ॥
इन्दोर्भ्रमेणोपगमाय योग्ये जिह्वा तवास्ये विधुवास्तुमन्तं।
गीत्या मृगं कर्षति वत्स्यता किं पाशीबभूवे नयनद्वयेन ॥ १०९ ॥

चन्द्रं भणिष्यन् वर्णयिष्यन् सन् सुभगां सौभाग्यवतीं भैमीं बभाण। किम्भूतः। तया सुमुख्या भैम्या परीहासरसस्योक्तिरामुद्भावयित्रीं गिरमीरित उक्तः। तथा प्राणसमोऽतिप्रेयान्, तया चन्द्रवर्णने प्रेरितः सन् परीहासरसोक्तिराङ्गिरं बभाणेति वा। उक्तिरां, इगुपधेति कः, पूर्व्वेण षष्ठीसमासः। भणिष्यन् हेतोर्लृटः शता ॥ १०७ ॥

तवेति। हे प्रिये! अयं मृगः तवानने जातचरीम्भूतपूर्व्वां गीतिं स्वरमाधुरीं निपीय सादरमाकर्ण्येदानीमपि तस्या भवद्गीतेराकर्णनाय लोलुपोऽतितरां लुब्धोऽतिसादृश्यात् त्वद्वदनभ्रमेण विधुं हातुं जातु कदाचिदपि न स्पृहयतीत्यहमवैमि। मृगा हि गानप्रिया भवन्तीति चन्द्रं तन्मुखभ्रान्त्या त्यक्तुं नेच्छतीत्यहं शङ्के इत्यर्थः। जातचरी भूतपूर्व्वे चरट्। लोलुपः यङन्तात् पचाद्यचि, यङोऽचि चेति यङो लुक् ॥ १०८ ॥

इन्दोरिति। अतिसादृश्यादिन्दुरेवेदमिति इन्दोर्भ्रमेण मृगस्योपगमाय योग्ये प्राप्तुमर्हे तवास्ये वर्त्तमाना जिह्वा कर्त्री गीत्या वर्णस्वरमाधुर्य्या कृत्वा विधुरूपं वास्तु वसतिगृहं तद्विद्यते यस्य तं विधुवास्तुमन्तं चन्द्रमध्यस्थमपि मृगं कर्षति। गीतेर्मधुरतरत्वान्मृगस्य च प्रियगानत्वात् स्वसमीपमानयतीत्यर्थः। तदाकर्षणसाधनमुत्प्रेक्षते, वत्स्यतो आगमिष्यतो मृगस्य वासार्थं बन्धनं करिष्यता, नेत्रद्वयेन पाशीबभूवे किं तद्रूपया बन्धनरज्ज्वा समाकर्षतीत्यर्थः। अन्योऽपि शबरी गीत्या मृगमाकृष्य पाशेन बध्नाति। भवन्मुखं निष्कलङ्कमतस्ताधिकं गीतियुतञ्च। चन्द्रस्तु सकलङ्क इति भावः। चन्द्रदर्शनावसरेऽपि मध्ये मध्ये

आप्यायनाद्वा रुचिभिः सुधांशोः शैत्यात्तमःकाननजन्मनो वा।
यावन्निशायामथ घर्म्मदुःस्थस्तावद्व्रजत्यह्नि न शब्दपान्थः ११०
दूरेऽपि तत्तावकगानपानाल्लब्धावधिः स्वादुरसोपभोगे।
अतस्त्रपयैव क्षिपति क्षपायाः पतिः खलु स्वान्यमृतानि भासः १११

भैमीमुखवर्त्मना अनुरागातिशयसूचनार्था। अयं श्लोकः क्षेपक इति केचित् ॥ १०९ ॥

गगनस्थोऽपि मृगो भैमीमुखगीतिं कथमशृणोदित्याशङ्क्याह। आप्यायनादिति। शब्दरूपः पान्थो नित्यपथिको निशायां यावद् व्रजति तावदथ पश्चात् साकल्येन वाऽह्नि न गच्छति यस्माद्दिने घर्म्मातपेन दुःस्थः सन्तप्तः तस्माद्दिनेऽल्पमेव गच्छतीत्यर्थः। रात्रौ दूरगमने हेतुमाह। सुधांशोरमृतरूपाभी रुचिभिराप्यायनादुज्जीवितत्वाद्वा तम एव काननं वनं तस्माज्जन्म यस्य गाढान्धकारजाताच्छैत्याद्वा तेजसोऽभावे तमसः सम्भवादौष्ण्याभावाच्छैत्यं, अतएव रात्रौ बहु गच्छति दिने चोष्णे न श्रान्त इव बहु न गच्छति। शब्दा हि स्वभावादतिदूरेऽपि श्रूयन्ते दिवा तु न तथा। पथिकोऽपि रात्रौ शैत्याद् दूरं गच्छति, दिने चाल्पं। दूरश्रवणप्रतिपादकोऽयं श्लोकः ॥ ११० ॥

दूरेऽपीति। हे प्रिये! खलु निश्चितं क्षपायाः पतिश्चन्द्रो भासश्चन्द्रिका एव स्वान्यमृतानि क्षिपति, अधो मुञ्चति। किम्भूतः। दूरेऽपि अतितरां देशव्यवधानेऽपि तत्प्रसिद्धं मधुरतरं तावकं गानं तस्य पानात् सादरश्रवणाद्धेतोः स्वादुरसोपभोगे माधुर्य्यातिशयानुभवे विषये लब्धावधिः प्राप्तमर्य्यादः। उत्प्रेक्ष्यते। अतस्त्रपयेव अनुभूतभवद्गीतमाधुर्य्यापेक्षयाऽल्पमाधुर्य्यतयाऽवमाननयैवेत्यर्थः। अयं श्लोको भिन्न एव न तु युग्मम् ॥ १११ ॥

अस्मिन्निति। हे तन्वि! एष चन्द्र आदिपुंसः श्रीविष्णोर्यद्वामं चक्षुर्भूवेत्यस्मिन्नेत्रीभवने विषयेऽयं नेत्रभूतश्चन्द्रोऽस्मान्न विस्मापयते

अस्मिन्न विस्मापयतेऽयमस्मांश्चक्षुर्बभूवैष यदादिपुंसः ।
तदत्रिनेत्रादुदितस्य तन्वि कुलानुरूपं किल रूपमस्य ॥ ११२ ॥
आभिर्मृगेन्द्रोदरि कौमुदीभिः क्षीरस्य धाराभिरिव क्षणेन ।
अक्षालि नीलीरुचिरम्बरस्था तमोमयीयं रजनीरजक्या ॥ ११३ ॥
पयोमुचां मेचकिमानमुच्चैरुच्चाटयामास ऋतुः शरद्या ।
अतारि वामोरु तयाऽपि किञ्चिन्न प्रोञ्छितुं लाञ्छनकालिमाऽस्य॥१४

आश्चर्यं न प्रापयति । अस्मार्थेऽस्माकमाश्चर्यं न भवतीत्यर्थः । किल यस्माद्धेतोरत्रिनेत्रादुदितस्योत्पन्नस्यास्य तच्चक्षुर्भवनं कुलानुरूपं कुलोचितं स्वरूपं नेत्ररूपात् कारणाज्जातस्य नेत्रीभवनमुचितमेव तस्मादस्य पुराणपुरुषनेत्रीभवने न किञ्चिदस्माकं चित्रमित्यर्थः । विस्मापयते नित्यं स्मयतेः इत्यात्वं, भीस्म्योर्हेतुभये इति तङ् । अस्माज्जनान्तरापेक्षया बहुत्वं ॥ ११२ ॥

आभिरिति । हे मृगेन्द्रोदरवत् कृशमुदरं यस्यास्तादृशि ! रजन्येव रजकी तया क्षीरस्य दुग्धस्य धाराभिरेव दृश्यमानाभिर्धवलतराभिः कौमुदीभिः कृत्वाऽम्बरस्था तमोमयीयं नीली कज्जलवत् कालीरुचिः क्षणमात्रेणाक्षालि निरस्ता । रजक्या वसनस्था काली कान्तिर्दुग्धधाराभिः क्षणेन क्षाल्यते । तदुक्तं कलाकोशे ।

तैलं घृतेन तच्चोष्णजलैर्दुग्धेन कज्जलम् ।
नाशयेदम्बरस्थं तु मलं क्षारेण सोष्मणा ॥ इति ॥

चन्द्रिकाभिर्गगनं निर्मलीकृतमिति भावः । मृगेन्द्रोदरी नासिकोदरेति ङीष् । ओषधी प्राणिवाचित्वाभावान्नीलीति ङीप्समर्थनीयः । रजकी पुनः षित्वाङ्ङीष् ॥ ११३ ॥

पय इति । हे वामोरु ! या शरत् ऋतुः पयोमुचां मेघानां वर्षाकालीनमुच्चकैरतिशयितमपि मेचकिमानं कालिमानमुच्चाटयामास । तया कालिमापनयने दृष्टसामर्थ्यया शरदा यस्य चन्द्रस्य लाञ्छनरूपः कालिमा किञ्चिदल्पमपि प्रोञ्छितुं स्फोटयितुं नापारि । शरदृतौ

एकादशैकादशरुद्रमौलीनस्तं यतो यान्ति कलाः किमस्य ।
प्रविश्य शेषाश्च भवन्ति पञ्च पञ्चेषु तूणीमिषवोऽर्द्धचन्द्राः ॥ ११५ ॥
निरन्तरत्वेन विधाय तन्वि तारासहस्राणि यदि क्रियेत ।
सुधांशुरन्यः स कलङ्कमुक्तस्तदा त्वदास्यश्रियमाश्रयेत ॥ ११७ ॥
यत् पद्ममादित्सु, तवाननीयां कुरङ्गलक्ष्मा च मृगाक्षि लक्ष्मीं ।
एकार्थलिप्साकृत एष शङ्के शशाङ्कपङ्केरुहयोर्विरोधः ॥ ११७ ॥

चन्द्रे मलिनः कलङ्कोऽतितरां शोभत इति भावः । मेचकिमानं वर्णवाचित्वादिमनिच् ॥ ११४ ॥

एकेति । अस्तं यतो गच्छतोऽस्य चन्द्रस्यैकादशकला एकादशानां रुद्राणां मौलीन् प्रतियान्ति, किल गच्छन्तीव । शेषाः पञ्च कलास्तु पुनः पञ्चेषोः कामस्य तूणीमल्पमिषुधिं प्रविश्यार्द्धचन्द्राकारत्वादर्द्धचन्द्राख्या इषवो भवन्ति, विनाशसमयेऽप्ययं परापकारनिरत इति ध्वन्यते । तूणी अल्पत्वविवक्षया स्त्रीत्वे गौरादित्वाङ्ङीप् ॥ ११५ ॥

निरन्तरेति । हे तन्वि ! ताराणां नक्षत्राणां सहस्राणि निरन्तरत्वेनान्योन्यसम्बन्धतया विधायैकीकृत्य यदि अन्यः सुधांशुः क्रियेत, निर्म्मीयेत, तदा तर्हि स चन्द्रस्ताराणामकलङ्कत्वात् तन्मयत्वाच्च कलङ्केन मुक्तः सन् त्वदास्यस्य श्रियं शोभामाश्रयेत । क्रियानियतेरविवक्षितत्वाल्लृङभावः ॥ ११६ ॥

यदिति । हे मृगाक्षि ! यत् पद्मं तवाननीयां मुखसम्बन्धिनीं लक्ष्मीमादित्सु ग्रहीतुकामं कुरङ्गलक्ष्मा चन्द्रश्च तव मुखशोभां ग्रहीतुकामः तयोः शशाङ्कपङ्केरुहयोरेष विरोधः स त्वन्मुखशोभालक्षण एकोऽर्थस्तस्य लिप्साकृतः प्राप्तिवाञ्छानिमित्त एवेत्यहं शङ्के । एकद्रव्याभिलाषित्वेन विरोधः सुप्रसिद्धः । चन्द्रपद्मयोरपि विरोधः प्रसिद्ध एव । चन्द्रपद्माभ्यां सकाशात् ते मुखमधिकमिति भावः । आदित्सु, चन्द्रपक्षे लिङ्गविपरिणामः लक्ष्मीं, न लोकेति षष्ठीनिषेधः ॥ ११७ ॥

लब्धं न लेखप्रभुणाऽपि पातुं पीत्वा मुखेन्दोरधरामृतन्ते ।
निपीय देवैर्विवशीकृतायां घृणां विधोरस्य दधे सुधायां ॥११८॥
एनं स विभ्रद्विधुमुत्तमाङ्गे गिरीन्द्रपुत्रीपतिरोषधीशम् ।
अश्नाति घोरं विषमब्धिजन्म धत्ते भुजङ्गञ्च विमुक्तशङ्कः ॥११९॥
नास्य द्विजेन्द्रस्य बभूव पश्य दारान्गुरोर्यातवतोऽपि पातः ।
प्रवृत्तयोऽप्यात्ममयप्रकाशान् नघ्नन्ति न घ्नन्ति मदेहमाप्तान् १२०

लब्धमिति । हे प्रिये ! अहं सर्वैरपि देवैर्विवशीकृतायां निःशेषं पीत्वा भुक्तशेषीकृतायामस्य विधोश्चन्द्रस्य सुधायां घृणां जुगुप्सां दधे धारयामि । किं कृत्वा । लेखानां देवानां प्रभुणेन्द्रेणापि पातुं न लब्धं कृतप्रयत्नस्यापि तस्यावरणात् तेन दुष्प्रापं, केनाप्यनुच्छिष्टमित्यर्थः । ते मुखेन्दोरधररूपममृतं निपीय पीत्वा । चन्द्रसुधायाः सकाशात् त्वदधरामृतं स्वादुतरमिति भावः । अन्योऽप्युच्छिष्टभोजने जुगुप्सां धारयतीत्यर्थः ॥ ११८ ॥

एनमिति । स गिरीन्द्रपुत्रीपतिः शम्भुरेनमोषधीशं विधुमुत्तमाङ्गे शिरसि बिभ्रद्धारयन् सन्, अब्धिजन्म समुद्रोत्पन्नं घोरं दारुणमपि विषमश्नाति, मुक्तशङ्को भुजङ्गं सर्पं वासुकिञ्च धत्ते । शम्भोरप्युपकारकत्वेन पूज्यः श्रेष्ठोऽयमिति भावः । ओषधिस्वामिनोऽस्य शिरसि धारणादेव निःशङ्कं विषं भक्षयति सर्पांश्च धारयतीत्युत्प्रेक्षा । भुजङ्गं जात्यभिप्रायेणैकवचनं ॥ ११९ ॥

नेति । हे प्रिये ! द्विजेन्द्रस्यास्य चन्द्रस्यास्य गुरोर्वृहस्पतेर्दारान् भार्य्यां यातवतोऽपि गुरुतल्पगामिनोऽपीत्यर्थः पातः स्वर्गाद् भ्रंशः, अथ च पातित्यं न बभूव पश्य । चित्रमेतद्विलोकयेत्यर्थः । अथ वा युक्तमेतत् । प्रवृत्तयो धर्म्माधर्म्महेतुकर्म्मारम्भा अपि आत्ममाय आत्मस्वरूपमेव प्रकाशो येषां तान् प्रकाशान्तरनिरपेक्षान् प्रकाशस्वरूपान्, अथ च परमात्मैव प्रकाशो येषां तान् परमात्मस्वरूपातिरिक्तप्रकाशानभिज्ञान्

स्वधाकृतं यत् तनयैः पितृभ्यः श्रद्धापवित्रं तिलचित्रमम्भः ।
चन्द्रं पितृस्थानतयोपतस्थे तदङ्करोचिः खचिता सुधैव ॥ १२१ ॥
पश्योच्चसौधस्थितिसौख्यलक्ष्ये त्वं केलिकुल्याम्बुनि बिम्बमिन्दोः ।
चिरं निमज्ज्येह सतः प्रियस्य भ्रमेण यच्चुम्बति राजहंसी १२२

स्वप्रकाशात्मवादिनो ब्रह्मज्ञानिनोऽन्तिमदेहं तेजोरूपशरीरं पूर्णतां वा प्राप्तान्, अथ चानन्तरभाविमोक्षत्वात् प्रवीनशरीरप्रवाहापेक्षया शेषशरीरं प्राप्तान् जीवन्मुक्तान् पुरुषान् हि यस्मान्न नह्यन्ति शुभाशुभफलसम्बन्धेन न संबध्नन्तीत्यर्थः । तेषां तेजोविशेषेण प्रत्यवायो न विद्यत इति प्रामाणिकवचनात् तेजोरूपस्यास्य चन्द्रस्य पातो नाभूदिति युक्तमेव, नात्र चित्रमिति भावः । चन्द्रोऽप्यात्ममयप्रकाशः अन्तिमदेहं सम्पूर्णतां प्राप्तः ॥ १२० ॥

स्वधेति । तनयैः पुत्त्रैः श्रद्धया परलोकास्तित्वबुद्ध्या वितीर्णत्वात् पवित्रं कृष्णतिलैश्चित्रं मिश्रितं पितृभ्यः स्वधाकृतं यदम्भः पितृस्थानतया "चन्द्रो वै पितृलोकः" इति श्रुतेः । पितृलोकतया चन्द्रमुपतस्थे चन्द्रेण सङ्गतमभूदित्यर्थः । तत् कृष्णतिलमिश्रजलमेवाङ्कस्य कलङ्कस्य या रोचिः कान्तिः तया खचिता मिश्रिता सुधा पीयूषं । कृष्णतिला एव कलङ्कस्तत्र लग्नं जलमेव पीयूषं न त्वन्यः, कलङ्को न चान्यत् पीयूषमित्यर्थः । श्रद्धेति पितृलोकप्राप्तौ हेतुगर्भविशेषणं । उपतस्थे सङ्गतकरणे तङ् ॥१२१॥

पश्येति । हे प्रिये ! त्वदुच्चसौधस्थित्या लब्ध्वा सौख्येन निरन्तरायं लक्ष्ये दृश्ये केलिकुल्याया अम्बुनि तदिन्दोर्बिम्बं पश्य । तत् किम् । राजहंसी इह कुल्याजले निमज्ज्य चिरं सतोऽन्तर्वर्त्तमानस्य प्रियस्य राजहंसस्य भ्रमेण यच्चन्द्रबिम्बं चुम्बति । सौख्यं स्वार्थे सुखिनो भाव इति भावे वा ष्यञ् । सौक्ष्म्ये इति पाठे सूक्ष्मत्वेन लक्ष्ये । उन्नततरदेशस्थितं प्रत्यधोदेशस्थितं वस्तु सूक्ष्मं प्रतिभातीत्यर्थः ॥ १२२ ॥

सौवर्गवर्गैरमृतं निपीय क्षतोऽह्नि तुच्छः शशलाञ्छनोऽयं ।
पूर्णोऽमृतानां निशि तेऽत्र नद्यां मग्नः पुनः स्यात् प्रतिमाच्छलेन१२
समं समेते शशिनः करेण प्रसूनपाणाविह कैरविण्याः ।
विवाहलीलामनयोरिवाह मधुच्छलत्यागजलाभिषेकः ॥ १२४ ॥
विकासिनीलायतपुष्पनेत्रा मृगीयमिन्दीवरिणी वनस्था ।
विलोकते कान्तमिहोपरिष्टान्मृगन्तदेषाऽऽननचन्द्रभाजं ॥ १२५॥

सौवर्गेति । स्वर्गे भवा सौवर्गा देवास्तेषां वर्गैर्वृन्दैरमृतं निपीयाह्नि तुच्छो रिक्तः क्षतोऽयं शशलाञ्छनो निशि ते तवात्र क्रीडानद्यां प्रतिमाच्छलेन प्रतिबिम्बव्याजेन मग्नः सन् पुनरमृतानां जलैरथ च पीयूषैः पूर्णः स्यात्, भवेदित्यहं सम्भावयामीत्यर्थः । एतेन नदीजलस्यामृतत्वं सूचितं । अह्नि तुच्छः क्षतोऽपि पुनः क्रमेणामृतैः पूर्णः सन् रात्रौ तत्र क्रीडानद्यां प्रतिमाव्याजेन मग्नः पुनः पानभयादिव पलाय्य निलीनः स्यादित्यहं शङ्के इति वा । पूर्णोऽमृतानां पूरणार्थत्वाद् करणे षष्ठी ॥ १२३ ॥

सममिति । इह तव क्रीडानद्यां कैरविण्याः कुमुदिन्याः प्रसूनरूपे पाणौ शशिनः करेण रश्मिनाऽथ च पाणिना समं सह समेते सङ्गते सति मधु पुष्परस एव च्छलं यस्य तस्य त्यागजलस्य कन्यादानसम्बन्धिसङ्कल्पोदकस्याभिषेकः कर्त्ताऽनयोश्चन्द्रकुमुदिन्योर्विवाहलीलामाहेव सूचयतीव । चन्द्रकरस्पर्शमात्रेण कुमुदानि विकसितानि मकरन्दपूर्णानि च जातानीति भावः विवाहे उभयोः पाणिमेलनं, पाणौ दानजलाभिषेकोऽपि भवति ॥ १२४ ॥

विकासीति । हे प्रिये ! इह तव केलिनद्यां वनस्था जलनिवासिनी अथ च काननस्था, तथा विकासि नीलमायतं विस्तृतञ्च पुष्पमेव नेत्रं यस्यास्तत्तुल्यनेत्रा चेयं प्रत्यक्षदृश्या इन्दीवरिणी यस्मान्मृगी वनस्थत्वाद्विकासिनीलायतपुष्पनेत्रत्वाच्च हरिणी तत्तस्मादिन्दीवरिणीरूपा मृगी आननमिव यश्चन्द्रः सामर्थ्यात् त्वदानन-

तपस्यतामम्बुनि कैरवाणां समाधिभङ्गे विबुधाङ्गनायाः ।
अवैमि रात्रेरमृताधरोष्ठं मुखं मयूखस्मितचारु चन्द्रं ॥ १२६ ॥
अल्पाङ्कपङ्का विधुमण्डलीयं पीयूषनीरा सरसी स्मरस्य ।
पानात् सुधा नाम जलेऽप्यमृत्युं चिह्नं विभर्त्त्यत्रभवं स मीनं१७

तुल्यो यश्चन्द्रस्तद्भाजं तत्स्थं कान्तं सुन्दरमथ च तुल्यजातीयं स्वप्रियं मृगमुपरिष्टाद्विलोकते । विकसितकुसुमनेत्राणि ऊर्द्ध्वंप्रसारितानि दृश्यन्ते तर्हि प्रायेण चन्द्रस्यमुपरि वर्त्तमानं निजभर्त्तारं मृगं मृगी पश्यतीत्यर्थः । त्वदाननमेव यश्चन्द्रस्तत्स्थं चन्द्रत्वादनुमेयमृगमुपरिष्टात् पश्यति । त्वं प्रासादोपरि वर्त्तसे, इयञ्चाधोदेशे वर्त्तते नवेति पदच्छेदं कृत्वा चन्द्रभाजं निजप्राणेशं मृगमुपरिष्टान्न पश्यतीति न किन्तु पश्यत्येवेति व्याख्येयं । वनस्था मृगी हि नीलायतनेत्रा सती स्वकान्तं मृगमितस्ततो विलोकयतीत्यर्थः । ग्रथमित्यपपाठः । मृगपर एव वा व्याख्येयम् ॥ १२५ ॥

तपस्यतामिति । हे प्रिये ! अम्बुनि सदा निवासात् तत्र तपस्यतां कैरवाणां कुमुदानां समाधेर्दिवासङ्कोचस्यैव ध्यानस्य भङ्गे त्याजने विषये निमित्ते वा विबुधाङ्गनाया अप्सरोरूपाया रात्रेश्चन्द्रं मुखमेवाहमवैमि मन्ये । किम्भूत मुखं । अमृतमेवाधरोष्ठं यस्य, अथ चामृततुल्योऽधरोष्ठं यस्य यद्वाऽमृतमधरं यस्मात् पीयूषादधिकरस ओष्ठो यस्य, तथा मयूखा एव स्मितं । अथ च तत्समाधिभङ्गादेव चन्द्रकरवदुज्ज्वलं यत् स्मितं तेन वा चारु । चन्द्रविशेषणे लिङ्गविपरिणामः । देवाङ्गनानामप्येवंविधं मुखं रात्रौ जले तपस्यतां दुश्चरं तपश्चरतामपि मुनीनां समाधिभङ्गं करोति । तपस्यतामिति तपश्चरन्तीत्यर्थे कर्म्मणो रोमन्थतपोभ्यामिति क्यप्, तपसः परस्मैपदञ्चेति ग्रता ॥ १२६ ॥

अल्पेति । अल्पोऽङ्क एव पङ्को यस्यां तथा पीयूषमेव नीरं यस्यां सेयं विधुमण्डली स्मरस्य सरसी विशालं सर एव, अतएव स सरोऽत्रभवमस्यां चन्द्रसरस्यां समुत्पन्नं सुधानामेतदीयामृतपानीयजले जल-

तारास्थिभूषा शशिजह्नुजाभृच्चन्द्रांशुपांशुच्छुरितद्युतिर्द्यौः ॥
छायापथाच्छद्मफणीन्द्रहाराः स्वं मूर्त्तिमाह स्फुटमष्टमूर्त्तेः १२८
एकैव तारा मुनिलोचनस्य जाता किलैतज्जनकस्य तस्य ।
ताताधिका सम्पदभूदियं तु सप्तान्विता विंशतिरस्य ताराः १२९॥
मृगाक्षि यन्मण्डलमेतदिन्दोः स्मरस्य तत्पाण्डुरमातपत्रं ।
यः पूर्णिमानन्तरमस्य भङ्गः स छत्रभङ्गः खलु मन्मथस्य ॥ १३० ॥

रहितेऽपि स्थले जलाभावेऽपि वाऽमृत्युं मरणरहितं मीनं चिह्नमथ च सुधासरोजातत्वादनुमापकं लिङ्गं विभर्त्ति। मीना हि जलाद्बहिर्भूता म्रियन्त एव अयन्तु न म्रियते तस्माच्चन्द्रामृतसरसीभवत्वात् तदामृतपानाज्जलाभावेऽपि मृत्युरहित इति सर्वं युक्तमित्यर्थः ॥ १२७ ॥

तारेति। द्यौः स्वमात्मानमष्टमूर्त्तेर्हरस्य मूर्त्तिं शरीरं स्फुटं व्यक्तमाह ब्रवीति, यतः तारा एवास्थीनि तद्रूपा भूषा यस्याः, तथा शशिनमेव जह्नुजां गङ्गां विभर्त्तीति तद्भृत्, तथा चन्द्रांशव एव पांशवो भस्मानि तैः छुरिता कृताङ्गरागा द्युतिर्यस्याः सा, तथा च्छायापथा गगने दण्डाकारा दक्षिणोत्तरस्थाः धवला रेखा छद्म यस्य छायापथरूपः फणीन्द्रो वासुकिः स एव मुक्ताहारो यस्याः सा हरमूर्त्तिरप्युक्तविशेषणविशिष्टा, द्यौरप्येतादृशीति मूर्त्त्यन्तरापेक्षया व्यक्तमेव महेशस्य मूर्त्तिर्गगनं कथयतीवेत्यर्थः ॥ १२८ ॥

एकेति। एतस्य चन्द्रस्य जनकस्य तस्य प्रसिद्धस्यात्रिमुनिलोचनस्य तारा कनीनिका किलैकैव जाताऽभूत् किल पुराणादौ। अस्य तत्पुत्रस्य तु पुनरिय दृश्यमाना सम्पत् तातान्निजपितुरत्रिनेत्रात् सकाशादधिका, यद्यस्मादस्य ताराः कनीनिका अथ च नक्षत्राणि सप्तभिरन्विता विंशतिरभूदिति छलं। पितुः सकाशादधिकसम्पत्तित्वात् सभाग्योऽयमिति भावः। "सप्तविंशतिमिन्दवे" इति दक्षः सप्तविंशतिकन्या अश्विन्यादिकाश्चन्द्राय ददाविति पुराणम् ॥ १२९ ॥

मृगाक्षीति। हे मृगाक्षि! हरिणीनेत्रे! यदेतत् प्रत्यक्षदृश्य-

दशाननेनापि जगन्ति जित्वा योऽयं पुराऽपारि न जातु जेतुं।
ग्लानिर्विधोर्मानिनि सङ्गतेयं तस्य त्वदेकानननिर्जितस्य ॥१३१॥
दृष्टो निजां तावदियन्त्यहानि जयन्नयं पूर्व्वदशां शशाङ्कः।
पूर्णस्त्वदास्येन तुलांगतश्चेदनन्तरं द्रक्ष्यसि भङ्गमस्य ॥ १३२ ॥

मिन्दोर्मण्डलं तत् स्मरस्य पाण्डुरं श्वेतं साम्राज्यसूचकमातपत्रमेव। श्वेतच्छत्रदर्शने सति सम्राजो वश्या भवन्ति पूर्णधवलचन्द्रमण्डलस्य चोद्दीपकत्वात् तद्दर्शने सर्व्वेऽपि कामस्य वश्या भवन्ति तस्मादेतत् कामस्य श्वेतातपत्रमेवेति भावः। यच्च पूर्णिमानन्तरमेतस्य छत्रभूतस्येन्दुमण्डलस्य भङ्गो मोटनं कलाक्षयस्य स मन्मथस्य छत्रभङ्गः खलु, छत्रस्य मोटनं राज्यक्षयं सूचयति। कृष्णपक्षे चोद्दीपकमित्रचन्द्रक्षये कामः क्षीण एव तस्मात् कृष्णपक्षे योऽस्य भङ्गः स कामस्य छत्रभङ्ग इव सएव वेति भावः। खलूत्प्रेक्षायां, निश्चये वा ॥ १३० ॥

दशेति। दिग्विजयोद्यतेन दशाननेनापि जगन्ति जित्वाऽपि योऽयं चन्द्रः पुरा पूर्व्वं जातु कदाचिदपि जेतुं नापारि हे मानिनि! स्वमुखस्पर्द्धिनं चन्द्रमसहमाने! नैमित्तस्यास्य विधोरियं प्रत्यक्षदृश्यकलङ्करूपा ग्लानिर्लज्जा सङ्गता लग्ना, अथ च युक्तैव। यतस्तवैकेनाननेन नितरां जितस्य। यो हि दशाननेन दशभिरपि मुखैर्जेतुं नाशकि तस्य स्त्रियास्तवैकेन मुखेन निर्जितत्वे लज्जया मालिन्यमुचितमेवेत्यर्थः। त्वन्मुखमेतस्मादधिकमिति भावः। लज्जया ग्लानिर्भवतीति प्रतीयमानोत्प्रेक्षा। रावणश्चन्द्रं जेतुं प्रवृत्तस्तुषाराग्निना दह्यमानः कम्पमानतनुस्तमजित्वैव परावृत्त इति उत्तरकाण्डे कथा ॥ १३१ ॥

दृष्ट इति। अयं शशाङ्क इयन्त्ये तावन्ति अहानि शुक्लपक्षदिनानि तावदवधीकृत्य निजां पूर्व्वदशां पूर्व्वपूर्व्वदिनावस्थां जयन् निकाममुत्तरोत्तरदिनेषु कलावृद्ध्याऽधिकीभवंस्त्वया दृष्टः, इयन्ति दिनानि जयंस्तावज्जयन्नेव दृष्ट इत्यवधारणार्थो वा तावच्छब्दः,

क्षत्त्राणि रामः परिभूय रामात् क्षत्त्राद्यथाऽभज्यत स द्विजेन्द्रः ।
तथैष पद्मानभिभूय सर्व्वांस्त्वदास्यपद्मात् परिभूतिमेति ॥ १३३ ॥
अन्तः सलक्ष्मीक्रियते सुधांशो रूपेण पश्ये हरिणेन पश्य ॥
इत्येष भैमीमददर्शदस्य कदाचिदन्तं स कदाचिदन्तः ॥ १३४ ॥

अनयैव परिपाट्या पूर्णबिम्बोऽयं त्वदास्येन सह तुल्यं साम्यमथ च तोलनकाष्ठं गत आरूढश्चेत्तर्ह्यनन्तरं निकटं त्वमेव श्वः प्रभृत्येवास्य भङ्गं पराजयं कलाक्षयञ्च द्रक्ष्यसि, उत्तमेन सह स्पर्द्धमानो हि भङ्गं प्राप्नोत्येव। तुलादिव्येन हि हीनस्य पराजयः सर्व्वैर्दृश्यते। अहानि अत्यन्तसंयोगे द्वितीया। त्वदास्येनेति तुल्यार्थैरतुलोपमाभ्यामिति निषेधेऽपि सह योगे तृतीया। तथा च कालिदासस्तुलां यदारोहति दन्तवाससेत्यादि ॥ १३२ ॥

क्षत्त्राणीति। द्विजेन्द्रो जामदग्न्यपत्यत्वात् सोऽतिप्रसिद्धपराक्रमो रामः परशुरामः सर्व्वाणि क्षत्त्राणि परिभूयापि क्षत्त्रादेव रामाद्दाशरथेः सकाशात् यथाभज्यत पराभवं प्राप तथा तेनैव प्रकारेण एषोऽपि द्विजराजः सर्व्वान् पद्मानभिभूय सङ्कोचकरणात् पराभूयापि तद्वत्त्वापद्मात् सकाशात् परिभूतिं पराभवमेति सकलक्षत्त्रियाधिक्यं यथा श्रीरामस्य तथा सर्वपद्माधिक्यं त्वन्मुखपद्मस्येति भावः। वा पुंसि पद्ममित्यमरः ॥ १३३ ॥

अन्तरिति। हे पश्ये! चन्द्रदर्शनप्रवृत्ते! भैमि! हरिणेन पाण्डुरेण रूपेण वर्णेन कर्त्रा सुधांशोरन्तः प्रान्तभागः पूर्व्वमश्रीकोऽपीदानीं सलक्ष्मीक्रियते सलक्ष्मीकः क्रियते त्वं पश्य। अथ च चन्द्रस्य मध्यं हरिणेन मृगेण कर्त्रा रूपेण स्वीयनीलवर्णेन कृत्वा असलक्ष्म सलक्ष्म क्रियते सलक्ष्मीक्रियते सकलङ्कं क्रियत इत्यर्थः। पश्य एष स नल इत्यमुना प्रकारेणास्य चन्द्रस्यान्तं पर्य्यन्तभागं कदाचिदीक्षमाणां भैमीमददर्शत्, दर्शयामास। कदाचिच्चान्तर्मध्यभागं दर्शयामास। अङ्गु-

सागरान्मुनिविलोचनोदराद्
द्वयादजनि तेन किं द्विजः ।
एवमेव च भवन्नयं द्विजः
पर्य्यवस्यति विधुः किमत्रिजः ॥ १३५ ॥

ताराविहारभुवि चन्द्रमयीं चकार
यन्मण्डलीं हिमभुवं मृगनाभिवासां ।

त्यादिना चन्द्रश्वेतनीलप्रान्तमध्यभागप्रदर्शनपूर्व्वं श्लिष्टपदैस्तया सह क्रीडां चकारेति भाव इति मध्ये कवेरुक्तिः । हरिणः पाण्डुरः पाण्डुरित्यमरः । अन्त इत्यकारान्तमेकत्र अन्तरित्यव्ययमपरत्र मध्यवाचि । लक्ष्मीशब्दस्य समासान्तविधेरनित्यत्वात् कवभावे सलक्ष्मीशब्दाङ्ङिः । पक्षे सलक्ष्मशब्दाङ्ङिः । पश्ये पाघ्राध्मे त्यादिना कर्त्तर्य्येव शः । दृशेर्बुद्ध्यर्थत्वाद्गति बुद्धीति अणौ कर्त्तुर्णौ कर्म्मत्वाद्भैमीमिति द्वितीया ॥ १३४ ॥

सागरादिति । अयं चन्द्रः सागरान्मुनिविलोचनोदराच्चैतद्रूपाद्द्वयात् सकाशाद् यद्यस्मादजनि, उत्पन्नस्तेन कारणेन द्वाभ्यां जातत्वाद् द्विजः किं, एवमेव चानयैव रीत्या द्वाभ्यां जातत्वादेव द्विजो भवन्नयं विधुरत्रेर्मुनेर्जातः किं कथं पर्य्यवस्यति, द्वाभ्यां जातत्वे सत्यपि अत्रिमुनेरेव जात इति तात्पर्य्यवृत्त्या कथमुच्यत इत्यर्थः । अथ चैवमेव यथा अनेन प्रकारेण द्विजत्वं तथैवात्रिमुनिजो भवन्नयं द्विजः पर्य्यवस्यति । किं द्वाभ्यां जातत्वात् यथा द्विज उच्यते तथा द्विजादत्रिमुनेर्जातत्वादपि द्विज उच्यते, द्विजोत्पन्नो हि द्विज एव भवतीत्यर्थः । अथ च द्वाभ्यां जातत्वाद्द्विजीभवन्नेवं न त्रिभ्यो जात इत्यत्रिज इति तात्पर्य्यवृत्त्या कथ्यते । यो हि द्वाभ्यां जायते स त्रिजो न भवति, एवमेवायमत्रिजः कथ्यते किमित्यर्थः । द्विजस्त्रिजो न भवत्येव ॥ १३५ ॥

तारेति । हे तन्वि ! कृशाङ्गि ! धाता ताराणां नक्षत्राणां विहारभुवि गगने चन्द्रमयीं मण्डलीं विम्बं जिनस्य पुराणपुरुषस्य श्रीविष्णोर्मते-

तेनैव तन्वि ! सुकृतेन मते जिनस्य
स्वर्लोकलोकतिलकत्वमवाप धाता ॥ १३६ ॥
इन्दुं मुखाद्बहुतृणं तव यद्गृणन्ति
नैनं मृगस्त्यजति तन्मृगतृष्णयेव ।

ऽनुमतौ सत्यां तदादिष्टः सन् यच्चकार निर्ममे तेनैव सुकृतेन शोभनेन लोकोत्तरव्यापारेण कृत्वा स्वर्लोकः स्वर्गभुवनं तत्सम्बन्धिनां लोकानां सुराणां मध्ये तिलकत्वं श्रैष्ठ्यमाप किंभूतां मण्डलीं हिमस्य तुषारस्य भुवं स्थानभूतामति शीतलां, तथा मृगस्य नाभौ मध्ये वासो यस्यास्तां, यस्या मध्ये मृगोऽस्तीति यावत्। तादृशीं। अन्येषां सुराणामेतादृक्व्यापारकरणे सामर्थ्याभावात् ब्रह्मैव श्रेष्ठोऽभूदित्यर्थः। अथ च तारायां बुद्धदेव्या विहारस्थाने हिमभुवं शीतलां शुभ्रत्वाद्धिमाचलरूपां वा, तथा मृगनाभेः कस्तूर्याः वासः परिमलोऽवस्थानं वा यस्यां तां कस्तूरीमिश्रितां चन्द्रमयीं कर्पूरमयीं कर्पूरराशिं यच्चकार तेनैव पुण्येन जिनमते बौद्धदर्शने ब्रह्मा सुरश्रेष्ठत्वमधत्त। बौद्धा हि बुद्धदेवप्रासादे यस्तत्पूजार्थं कस्तूरीराशिं करोति स लोकमध्ये श्रेष्ठो भवतीति स्वदर्शने प्रत्यपादयन्। ब्रह्मा चैवमकृत तस्मादेव सर्वश्रेष्ठो जात इत्यर्थः। तेनैवेति पाठे उत्प्रेक्षा। बुद्धदेव्यां मता तारा ॥ १३६ ॥

इन्दुमिति। हे हिमांशुबिम्बस्य लक्ष्म्याः शोभाया विडम्बि सकाशान् न्यूनत्वात् परिहासकारि ततोऽप्यधिकशोभं मुखं यस्यास्तादृशि ! भैमि ! पण्डिता इन्दुं तव मुखात् सकाशात् तन्मुखमपेक्ष्य वा बहुतृणमीषदसमाप्तं तृणं तृणत्वमपि यस्य पूर्णं न सम्पन्नं तृणादपि निःसारमिति यावत्। अथ च बह्वधिकं तृणं यस्मात् तृणादपि निःसारं यद्यस्मात् गृणन्ति, तत्तस्माद्धेतोर्मृग एनं चन्द्रं मृगसम्बन्धिन्या तृष्णया कोमलतृणकवलनाभिलाषेणैवाथ वा चन्द्रे प्रयुक्तस्य बहुतृणशब्दस्य बहु च तत् तृणञ्च बहूनि तृणानि यस्मिंस्तादृशमित्येव रूपार्थग्रहणरूपया भ्रान्त्यैव न त्यजति। मृगो हि बहु च तृणं बहुतृणं देशं

अत्येति मोहमहिमा न हिमांशुबिम्ब-
लक्ष्मीविडम्बिमुखि ! वृत्तिषु पाशवीषु ॥ १३७ ॥
स्वर्भानुना प्रसभपानविभीषिकाभि-
र्दुःखाकृतैनमवधूय सुधा सुधांशुं
स्वं निह्नुते सितिमचिह्नममुष्य रागै-
स्ताम्बूलताम्रमवलम्ब्य तवाधरोष्ठम् ॥ १३८ ॥

वा न मुञ्चति । नन्वनुभवे सत्यप्यासंसारं कथं भ्रान्तिबाहुल्यमित्याशङ्क्यार्थान्तरन्यासमाह । पाशवीषु पशुसम्बन्धिनीषु वृत्तिषु व्यापारेषु विषये मोहमहिमा भ्रान्तिबाहुल्यं नात्येति, बहुकालातिक्रमे नापयाति । पशवो हि सर्वदा मूढा एवेत्यद्यापि मृगस्य भ्रान्तिर्नापयाति तस्मादेनं न त्यजतीति युक्तमित्यर्थः । मुखात् ल्यब्लोपे पञ्चमी । बहुलत्वमीषद्समाप्तौ विभाषासुपो बहुजिति बहुच् ॥ १३७ ॥

स्वर्भानुरिति । हे प्रिये ! सुधा एनं सुधांशुमवधूय त्यक्त्वा तवाधरोष्ठमवलम्ब्यामुष्य रक्तस्यौष्ठस्य रागै रक्तवर्णैः कृत्वा सितस्य भावः सितिमा धावल्यमेव चिह्नं यस्य तादृशं धवलरूपमपि स्वमात्मानं निह्नुते पुनः स्वर्भानुपानभिया तिरोदधाति । यतः स्वर्भानुना वारम्वारं प्रसभपानेन विभीषिकाभिर्भयोत्पादनैः कृत्वा दुःखाकृता प्रातिलोम्याचरणोत्पादितदुःखा । किम्भूतमधरोष्ठं । प्रसिद्धस्य ताम्बूलस्येव ताम्रो वर्णो यस्य ताम्बूलेनैव वा ताम्रं रक्तवर्णं । पुना राहुपानभिया त्वदधरमेव स्थानान्तरमाश्रित्य रूपान्तरेणात्मानं गोपायतीत्यर्थः । अन्योऽपि सभयं स्थानं हित्वा स्थानान्तरमाश्रित्य तत्रापि रूपान्तरं कृत्वा स्वं निह्नूते । सुधया चन्द्रस्य परित्यागात् त्वन्मुखाश्रयणात् त्वन्मुखं चन्द्रादधिकमिति भावः । ताम्बूलताम्रमित्युक्तरीत्योपमोत्प्रेक्षा वा । दुःखाकृता दुःखात् प्रातिलोम्ये कृति डाच् ॥ १३८ ॥

हर्य्यक्षीभवतः कुरङ्गमुदरे प्रक्षिप्य यद्वा शशं
जातस्फीततनोरमुष्य हरिता सूतस्य पत्न्या हरेः ।
भङ्गस्त्वद्वदनाम्बुजादजनि यत् पद्मात्तदेकाकिनः
स्यादेकःपुनरस्य स प्रतिभटो यः सिंहिकायाः सुतः१२८

हर्य्यक्षीति। हे प्रिये! मतभेदेन कलङ्करूपं कुरङ्गं यद्वा शशमुदरे मध्ये प्रक्षिप्य जाता स्फीता पूर्णा तनुर्यस्य हरेरिन्द्रस्य पत्न्या हरिता प्राच्या दिशा सूतस्य तत्रोदितस्य पूर्णस्यात एव हरेः श्रीविष्णोर्वामाक्षीभवतः। यद्वा सञ्जातपूर्णशरीरस्य मृगं यद्वा शशङ्कलङ्कं मध्ये निक्षिप्य मध्यस्थितकलङ्कस्य कनीनिकातुल्यत्वात् श्रीविष्णोर्वामनेत्रीभवतोऽमुष्य चन्द्रस्य त्वद्वदनाम्बुजात् सकाशाद्यद्भङ्गः पराजयोऽजनि तदेकाकिनः सर्व्वदा असहायादेकस्मात् पद्मात्, न त्वन्यस्मात् कमलात्, न ह्यन्यैः पद्मैरयं पराजीयते प्रत्युतायमेव पद्मानि पराजयतीत्यर्थः। अथ वाऽम्बुजतुल्यात् त्वद्वदनादेव पद्मादथ च पद्मसङ्ख्याकात् त्वद्वदनरूपादम्बुजाद् यदस्य भङ्गो जातस्तदेकाकिनोऽसहायस्य स्यात्, भवेत्, बहुभिरेकः पराजीयत इति युक्तमेवेत्यर्थः। यः सिंहिकायाः सुतो राहुः स पुनरेकोऽन्योऽस्य प्रतिभट्टः प्रतिमल्लः पराभावुको राहुरेव न त्वन्य इति। सम्प्रतीति पाठे, अद्य पुनरस्यैकः भटः प्रतिभटः सिंहिकायाः सुतः स्यादेकाकिनोऽस्य त्वन्मुखपद्मः प्रतिद्वन्द्वी न भवति अतुल्यत्वात्, किन्त्वेकाकी राहुरेवास्य प्रतिभटो युक्त इत्यर्थः। किञ्च स्वशत्रुभूताद्राहोरप्यस्यान्यः पराजय इति महदस्य कष्टं प्राप्तमित्यर्थः। अथ च हरिद्वर्णया हरेः सिंहस्य पत्न्या सिंहिकया प्रसूतस्य तथा मृगं शशं वा यं काञ्चन पशु जठरे निक्षिप्य भक्षयित्वा स्थितस्यात एव सञ्जातपुष्टशरीरस्यात एव हर्य्यक्षीभवतः सिंहतां प्राप्नुवतोऽस्य त्वन्मुखाद् यः पराजयोऽजनि स एकाकिनः केवलात् पद्माम्बुजादेव पराजयः। सिंहस्य गजाद्भङ्गो यथा तद्वदेतन्महच्चित्रमित्यर्थः। अथ च पद्मसङ्ख्याकादेकस्य पराजयः।

यत्पूजां नयनद्वयोत्पलमयीं वेधा व्यधात् पद्मभू-
र्वाक्पारीणरुचिः स चेन्मुखमयं पद्मः प्रिये तावकं।
कः शीतांशुरसौ तदा मखमृगव्याधोत्तमाङ्गस्थल-
स्थास्नुस्वस्तटिनीतटावनिवनीवानीरवासी वकः॥ १४०॥

सिंहोऽप्येको बहुसङ्ख्यैः पराजीयत एवेत्यर्थः। अथ च पद्मात्करभादष्टपदादेव भङ्गः सिंहस्य केवलमष्टपदादेव भङ्गः, पद्मचन्द्राभ्यां सकाशात् त्वन्मुखमधिकमिति भावः। हर्य्यक्षः केसरी हरीत्यमरः। गजाऽश्वरभाः पद्मा इत्यनेकार्थभाजः। प्रथमपक्षे हर्य्यक्षशब्दात्सिंहः, द्वितीयपक्षे हर्य्यक्षशब्दादेव॥ १३९॥

यदिति। हे प्रिये! वेधा नयनद्वयमेवोत्पलं तन्मयीं तद्रूपां तदुचितां यस्य पद्मस्य पूजां व्यधात् व्यरचयत्। यतोऽसौ श्रीविष्णोर्नाभौ वर्त्तमानात् पद्माद्भवतीति पद्मभूः। स हि स्वजनकस्य पद्मस्य पितृभक्त्या नेत्रद्वयेनैव नीलोत्पलयुगेन महतीं पूजामकृतेति भावः। वाक्पारीणा वाचः परतीरे भवा वाचा वर्णयितुमशक्या रुचिर्यस्य सोऽयं पद्मश्चेत् तावकं मुखं स एव भवन्मुखरूपो जात इत्यर्थः। अनन्तरं ब्रह्मणा स्वपितृबुद्ध्या नेत्रनीलोत्पलाभ्यां कृतपूजनत्वादत्र तव मुखे नीलोत्पलं दृश्यत इत्यर्थ इति चेत् तर्हि असौ शीतांशुः को नाम, अपि तु न कश्चित्, त्वन्मुखस्य पुरस्तादयं कः, स्मरणार्होऽपि नेत्यर्थः। तर्हि असौ क इति चेत् तत्राह। अयं वकः। किम्भूतः मखो दक्षमख एव मृगस्तस्य व्याधो हरस्तस्योत्तमाङ्गं शिरस्तल्लक्षणे स्थले स्थास्नुः स्थितिशीला स्वस्तटिनी गङ्गा तस्यास्तटावन्यां तीरभूम्यां या वनी महदल्पं वा यत् काननं तत्र ये वानीरा वेतसास्तन्मध्यवासी। चन्द्रस्य हरजटाजूटवासीति प्रसिद्धं। वाक्पारीणरुचिरिति ब्रह्मविशेषणं वा। अत्र यदपत्यस्य ब्रह्मणोऽपि सौन्दर्य्यं वागगोचरस्तत्पितुः पद्मस्य सौन्दर्य्यं मनसोऽपि गोचरो न भवतीत्यर्थः। त्वन्मुखस्य चन्द्रस्य च महदन्तरं साम्यसम्भावनाऽपि नास्तीति भावः। एतेन चन्द्रादिसुन्दरवृन्दं ब्रह्मणा दृष्टं, भवदीय-

जातं शातक्रतव्यां हरिति विहरतः काकतालीयमस्या-
मश्यामत्वैकमत्यस्थितसकलकलानिर्म्मितेर्निर्म्मलस्य ।
इन्दोरिन्दीवराभं बलविजयिगजग्रामणीगण्डपिण्ड-
द्वन्द्वापादानदानद्रवलवगलनादङ्कमङ्के विशङ्के ॥ १४१ ॥

मुखपद्मं तु ब्रह्मणोऽपि स्रष्टृत्वात् सर्व्वाधिकमिति सूचितम् । मखस्रगेत्यादिना चन्द्रस्यातिदैन्यं सूचितं, तन्मुखसाम्यप्राप्त्यर्थं तपश्चरणं सूचितम् । अन्योऽपि विशिष्टवस्तुप्राप्तये शिवस्थानयुक्तनदीतीरवानीरवासी तपस्यति । नदीतीरवानीरवासित्वं बकजातिः । वाक्पारीणा, अवार्थे राष्ट्रावारपाराद् घखौ इत्यत्रापि विगृहीतादपीति वचनात् खः ॥ १४० ॥

जातमिति । अहं इन्दोरङ्के बलविजयिन इन्द्रस्य गजग्रामणीर्हस्तिषु मध्ये प्रधानं प्राच्यामेव वर्त्तमानो य ऐरावतस्तस्य गण्डयोः कपोलयोः पिण्डयोः शिरःस्थितकुम्भस्थलयोश्च ये द्वे द्वन्द्वे गण्डद्वन्द्वं पिण्डद्वन्द्वञ्च ते एवापादानं निर्गमनस्थानं येषां ते च ते दानद्रवलवा मदजललेशास्तेषां गलनात् सम्पर्कात् काकतालीयमाकस्मिकं दैवसिद्धमिन्दीवराभं नीलोत्पलतुल्यं जातमेकं कलङ्कं विशङ्के मन्ये । किम्भूतस्येन्दोः । अस्यामङ्गुलीनिर्दिष्टायां पुरोदृष्टायां शतक्रतोरियं शातक्रतवती तस्यां हरिति दिशि विहरत उद्गच्छतः, तथाऽश्यामत्वे विषये ऐकमत्यं सर्व्वसत्त्वादस्तेन तत्र वा स्थिताभिर्वर्त्तमानाभिः सकलाभिः पञ्चदशभिरपि कलाभिः कृत्वा निर्म्मितिर्यस्य, अश्यामत्वैकमत्येन स्थिता सकलकलानिर्म्मितिर्यस्य स तादृशस्य वा । अत एव निर्म्मलस्य प्रत्येकं कलानां धावल्यस्य दृष्टत्वाद्धवलसकलकलानिर्म्मितत्वात् कारणधावल्याद्धवलस्य, अश्यामत्वैकमत्येन स्थिता याः सकलाः कलास्ताभिर्या निर्म्मितिस्तस्या वा हेतोर्धवलस्य पूर्व्वकारणधावल्यात् सकलोऽप्ययं धवल एवाभूत्, पश्चात्तु पूर्व्वदिग्भ्रमणवशात् तत्रैव भ्रमत ऐरावतस्य कपोलकुम्भस्थलगलन्मदजलं दैववशाल्लग्नं तेनायं मध्ये कालः प्रतिभातीत्यर्थः । तालतरुतले यदैव काकस्य उपवेशनं तदैव दैवात् काकस्योपरि तालफलपात इति काकतालमिव काकतालीयं समासान्ताच्छः । निर्म्मितेः पक्षे हेतौ पञ्चमी ॥ १४१ ॥

अंशं षोडशमामनन्ति रजनीभर्त्तुःकलां वृत्तय-
न्त्येनं पञ्चदशैव ताः प्रतिपदाद्याराकवर्द्धिष्णवः।
या शेषः पुनरुद्धृता तिथिमृते सा किं हरालङ्कृति-
स्तस्याःस्थानविलं कलङ्कमिह किं पश्यामि सश्यामिकं॥ १४२॥
ज्योत्स्नामादयते चकोरमिथुना द्राघीयसी लोचने
लिप्सुर्मूलमिवोपजीवितुमितः सन्तर्पणात्मीकृतात्।

अंशमिति। हे प्रिये! लोका रजनीभर्त्तुः षोडशमंशं कलानामनन्ति सत्यं कथयन्ति, ताश्च षोडशांशरूपाः प्रतिपत्, आदिर्यस्मिन् कर्म्मणि राकां पूर्णिमामभिव्याप्य वर्द्धिष्णवः प्रतितिथि एकैकाभिवृद्ध्या वर्द्धमानाः पञ्चदशसङ्ख्याका एव कला एनं चन्द्रं वृत्तयन्ति वर्त्तुलं कुर्व्वन्ति तिथिसङ्ख्यासाम्यात् पूर्णमण्डलं कुर्व्वन्तीत्यर्थः। या पुनः कला षोडशीं तिथिमृते उद्धृता प्रयोजनाभावाच्चन्द्राद्बहिष्कृता सा षोड़शी कला शेषा पञ्चदशकलाभ्योऽवशिष्टा सती, यद्वा षोड़शीं तिथिं विना प्रयोजनाभावाद्यावशिष्टा, सा निष्प्रयोजनत्वादुद्धृता चन्द्राद्बहिर्निष्काशिता सती हरालङ्कृतिः शिवशिरोभूषणं जाता किं, चन्द्रे प्रयोजनाभावाद्धरालङ्कृतिरिवाभूत् किमित्यर्थः। अहं तस्याश्चोद्धृतायाः षोड़श्याः कलायाः सश्यामिकं नभोनीलिम्ना सह वर्त्तमानं स्थानस्य पूर्व्वावस्थितेः सम्बन्धि बिलं विवरं तत्कलानवस्थित्या कृत्वा शून्यं नीलं नभोभागमेवेह चन्द्रमण्डलमध्ये कलङ्कं पश्यामि किं, मध्यवर्त्ति नीलं तत् स्थानं बिलमेवाहं कलङ्कत्वेन शङ्क इत्यर्थः। शेषशब्दस्याभिधेयलिङ्गत्वं पूर्व्वमेव दर्शितं। पूर्ण राका निशाकर इत्यमरः। वृत्तयन्ति तत्करोतीति णिच्। वर्द्धिष्णवः अलङ्कृञिति इष्णुच्। तिथिमृते ऋतेन पाशमिति वत्। श्यामिकेति मनोज्ञादेराकृतिगणत्वाद्भावे वुञ्॥ १४२॥

ज्योत्स्नामिति। हे मुग्धे! सुन्दरि! त्वद्वक्त्रं वृत्तत्वादिगुणैः समानमपि नयनश्रियाऽपि कृत्वाऽनधिकं समानमेव, विधित्सुरत एव स्वस्य द्राघीयसी अतिदीर्घे लोचने लिप्सुर्लब्धुमिच्छुर्विधुश्चकोरमिथुना चन्द्रिकोत्थेन स्वीयां ज्योत्स्नामादयते भक्षयति। ततोऽश्यते।

अङ्के रङ्कुमयं करोति च परिष्वङ्क्तुन्त्वदेवाहत-
स्त्वद्दृङ्नयनश्रियाऽप्यनधिकं मुग्धे विधित्सुर्विधुः ॥ १४३
लावण्येन तवास्यमेव बहुना तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्द्धमलिनेनारम्भि शेषेण तु ।

कामृतपानकृतसम्यक्तर्पणेनात्मीकृतात् स्ववशीकृतादितश्चकोरबालकात् सकाशान्मूलं स्वचन्द्रिकापानहेतुभूतमेतदीयातिदीर्घनेत्रद्वयमध्येषु उपजीवितुमादातुमिव। यद्वा किञ्चित् स्वचन्द्रिकां पाययित्वा ततो नेत्रद्वयलक्ष्मीप्राप्त्या मूलं चन्द्रिकारूपमूलधनं वर्द्धयितुमिव। अन्योऽप्युत्तमर्णोऽधमर्णस्य किञ्चिद्दत्त्वा तं वशीकृत्योत्तममिष्टं वस्तु ततो गृह्णाति तथा अयं चन्द्र आहत आदरयुक्तः सन्नङ्के मध्येऽथचोत्सङ्गे रङ्कुञ्च करोति, उत्सङ्गधारणेन लालयतीत्यर्थः। किमर्थमित्याशङ्क्याह। तन्मूलभूतमतिविशालं तदीयनयनयुगलं परिष्वङ्क्तुमिव संलग्नं कर्त्तुमेव। त्वन्मुखसाम्यनिमित्तं तस्य यन्नेत्रद्वयं सम्पादनीयम्। चन्द्रश्चकोरहरिणौ वञ्चयतीत्यर्थः। चन्द्रादुत्कृष्टं त्वन्मुखमिति भावः। परिमष्टुमिति पाठे एतन्नेत्ररामणीयकप्राप्त्यपायं मष्टुमिवेत्यर्थः। शिशुः सुप्रतार्य्य इति सूचयितुं शिशुपदम्। आदयते, अदेर्निगरणार्थत्वेऽप्यदेः प्रतिषेधो वक्तव्यः इति वक्तव्यान्निगरणादिपरस्मैपदाभावे णिचश्चेति तङ्। शिशुना आदिखाद्योर्नेति अणौ कर्मत्वाभावः। द्राघीयसी अतिशायने इयसुनि प्रियस्थिरेति द्राघादेशः, लिप्सुर्विधित्सुरिति च नलोकेति षष्ठीनिषेधः ॥ १४३ ॥

लावण्येति। हे प्रिये! बहुना कचित् पात्रे सञ्चितेनाखिलेन लावण्येन कृत्वा तवास्यमेवारम्भि निर्मितं, चन्द्रस्तु पुनः तस्य लावण्यस्याधारपात्रं स्पृशतीति स्पृक् लावण्यस्यानपात्रमात्रलग्नेनात एव प्रोञ्छनेन पात्रनिघर्षणेन कृत्वा लब्धता उपार्जितत्वं तेनार्द्धं कियत् खण्डं मलिनं यस्य तेन किञ्चिन्मलिनेन शेषेण भवन्यस्तुभिर्वर्णावशिष्टेनांशेन मध्याऽरम्भि निर्मितः। अत एव शेषमखण्डलोऽयं शोभत इत्यर्थः। शेषेण तु निर्मित इति वा। विधिना एतत्त्वन्मुखमृगाङ्कलक्षणद्वयं निर्माय दृष्टा अस्

निर्म्माय द्वयमेतदम्बु विधिना पाणी खलु क्षालितौ
तल्लेशैरधुनाऽपि नीरनिलयैरम्भोजमारभ्यते ॥ १४४ ॥
लावण्येन तवाखिलेन वदनं तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्द्धमलिनेनारम्भि शेषेण यः ।
यल्लेखाऽपि शिखामणिः सुषमयाऽहङ्कृत्य शम्भोरभू-
दब्जं तस्य पदं यदस्पृशदतः पद्मञ्च सद्म श्रियः ॥ १४५ ॥

पाणी प्रक्षालितौ खलु, लावण्यलेपकृतजलक्षालनादिव, तस्मात् तस्य क्षालनरजोमिलितलावण्यलेपस्य लेशैरल्पैरंशैरेव कर्तृभिरधुनाऽपि नीरनिलयैर्जलस्थायिभिः सद्भिरम्भोजमारभ्यते, निर्म्मीयते, कमलनिर्म्माणे ब्रह्मणः कोऽपि प्रयासो नेत्यर्थः । कमलाच्चन्द्रोऽधिकस्तस्मादपि त्वन्मुखलावण्यं साकल्येन निर्म्मितत्वादधिकमिति भावः । अम्भोजं जात्येकवचनम् ॥१४४॥

लावण्येति । अखिलेन लावण्येन तव वदनमारम्भि ततो भवद्वदनकामनीयवर्णनाचिन्ताऽपि दूरे तिष्ठतु, अप्रकाशकत्वादित्यर्थः । उक्तरीत्या तत्पात्रमात्रस्पृशा प्रोञ्छनलब्धतार्द्धमलनेन शेषेण यश्चन्द्रो विधिना निरमायि तस्य लेखाऽपि लावण्यनिर्मितस्य चन्द्रस्य षोडशांशरूपकलामात्रत्वादेव निष्कलङ्कत्वात् सुषमया परमशोभया कृत्वा अहङ्कृत्य मत्सापेक्षयाऽहमेव रमणीयेति दर्पमवलम्ब्य शम्भोः शिखामणिः शिरोभूषणमभूत्, शिवशिरस्यध्यारोहत् । अन्यदपि सदर्पमुत्तमशिरोऽधिरोहति । अब्जं कुमुदं कर्तृ यद्यस्मात् तस्य चन्द्रस्य पदं प्रतिबिम्बस्थानं जलमस्पृशत्, अतः श्रियः सद्माभूत्, चन्द्रकरसंस्पर्शादेव हि कुमुदं सश्रीकं भवति पद्मञ्च श्रियः पद्माभूत्
जलस्य चन्द्रकिरणस्पर्शात् पद्मस्य तत्रोत्पन्नत्वाद्वर्तमानत्वात् कुमुदसाहचर्याच्च पद्ममपि लक्ष्म्याः स्थानमभूत् । यद्वा पद्मञ्चातः कुमुदाद्धेतोः श्रियः सद्माभूत्, अब्जत्वजातियोगात् कुमुदाधारजलयोगाच्च कुमुदादेव परम्परया पद्मानां लक्ष्मीगृहत्वमभूदित्यर्थः । यद्वा या लेखा शम्भोः शिखामणिरभूत् तस्य शिखामणिभूतस्य चन्द्रस्य पदं स्थानं शिवमस्तकपूजावसरे यस्मात् कुमुदं पद्मञ्चास्पृशत्, अतस्तदुभयं श्रियः सद्माभूत्,

सपीतिः सप्रीतिरजनि रजनीशः परिषदा
परीतस्ताराणां दिनमणिमणिग्रावमणिकः ।
प्रिये ! पश्योत्प्रेक्षाकविभिरभिधानाय सुशकः
सुधामभ्युद्धर्त्तुं धृतशशकनीलाश्मचषकः ॥ १४६ ॥

चन्द्रस्य बद्धशिरःसम्बन्धादुभयं श्रीगृहमभूदित्यर्थः । यद्वा तस्य शम्भोः पदं चरणं पूजावशाद्यस्मात् कुमुदं पद्मञ्चास्पृशत् तस्मादुभयं श्रीसद्माभूत् । तस्य लावण्यस्नानं विधिहस्तलावण्यलेपक्षालनजलं यस्मात् कुमुदं पद्मञ्चास्पृशत्, यद्वा पद्ममेवास्पृशत्, यतोऽब्जं तस्मात् कुमुदं पद्मञ्च पद्ममेव वा श्रीसद्माभूदिति वा । त्वन्मुखलावण्यलेशपरस्परासंस्पर्शप्राप्तशोभानि चन्द्रादीनीति । त्वन्मुखलावण्यं वाङ्मनसगोचरं न भवतीति भावः । अर्थान्तरस्य स्पष्टत्वात् पूर्व्वार्द्धस्य त्वर्थान्तरप्रतिपादनार्थमनुवादत्वान्नायं श्लोकः पुनरुक्तः । अहमिति विभक्तिप्रतिरूपकमव्ययम् ॥ १४५ ॥

सपीतेरिति । हे प्रिये ! सप्रीतिस्ताराणामन्योऽन्यं सम्यग्या प्रीतिः सौहार्द्दं तस्माद्धेतोर्या सपीतिः सहपानं सुहृदो हि सहपानं कुर्व्वन्ति, तस्माद्धेतोः यद्वा सहपानाद्धेतोर्या सम्यक् प्रीती रुच्यभिवृद्धिस्तस्माद्धेतोस्ताराणां परिषदा सङ्घेन परीतः समन्ताद् व्याप्य रजनीशो दिनमणिर्मणिः सूर्य्यकान्तमणिस्तस्य ग्रावा शिला तेन घटितोऽतिधवलः स्थूलः पेयद्रव्याधारभूतो मणिकोऽलिञ्जर एवाजनि, सम्भूतः । विधिना तारापरिषदा वा व्यरचि इति पश्य । कीदृशः । सादृश्येन वस्त्वन्तरसम्भावनारूपायामुत्प्रेक्षायां विषये कविभिर्विशिष्टसम्भावनाचतुरैः श्रीहर्षादिभिर्महाकविभिस्तारापरिषदैव सुधामभ्युद्धर्त्तुं धृतो यो मध्यस्थितः शशकः कलङ्कः स एव नीलाश्मा नीलमणिस्तेन घटितं चषकं पानपात्रं यस्मिन्नेवम्भूत इवायमिति अभिधानाय वर्णयितुं सुशकः सुखेन शक्यः । चन्द्रो धवलत्वात् पीयूषपूर्णः सूर्य्यकान्तमणिक इव, कलङ्कश्च नीलमणिघटितं चषकमिव दृश्यते तत् पश्येत्यर्थः । यथा मणिस्थोदकाद्युद्धरणाय मणिकमध्ये चषकः स्थाप्यते तथा ताराभिः परस्पर

आस्यं शीतमयूखमण्डलगुणानाकृष्य ते निर्मितम्
शङ्के सुन्दरि ! शर्व्वरीपरिवृढस्तेनैष दोषाकरः ।
आदायेन्दुमृगादपीह निहिते पश्यापि सारे दृशौ
त्वद्वक्त्रे सति वा विधौ धृतिमयं दध्यादनन्धः कुतः १४७

शुचिरुचिमुडुगणमगणनमनुमति-
कलयसि कृशतनु ! न गगनतटमनु ।

मिलित्वा सुधापानं कर्त्तुं परिवेष्टितस्य सुधापूरितस्यास्यापि चन्द्रमणिकस्य मुखे सुधोद्धरणाय शशनामनीलमणिचषको निक्षिप्त इत्युत्प्रेक्षितं मन्यत इत्यर्थः । चषकोऽस्त्री पानपात्रमित्यमरः । सपीतेः, वोपसर्जनस्येति वा सहस्य इति योगविभागाद्वा सहस्य सः । कविभिः खल्वर्थयोगान्न षष्ठी । सुधक इति खल् ॥ १४६ ॥

आस्यमिति । हे सुन्दरि ! विधिना शीतमयूखस्य मण्डलं बिम्बं तस्य वृत्तत्वाह्लादकत्वादिगुणानाकृष्य गृहीत्वा ते आस्यं यतो निर्म्मितं तेन गुणगणोत्कर्षेण हेतुना शर्व्वर्याः परिवृढः प्रभुश्चन्द्रो दोषाणामाकर उत्पत्तिस्थानं न तु दोषा रात्रिस्तत्कारित्वाद्दोषाकर इत्यहं शङ्के । तथा अहं इन्दोर्मृगात् सकाशात् सारे दृशावादाय अतिश्रेष्ठे नेत्रे गृहीत्वा इह भवन्मुखे निहिते स्थापिते इत्यहं शङ्के । तेन कुतो ज्ञातमित्यत आह सुन्दरतरे त्वद्वक्त्रे जागरूके सति अनन्धश्चक्षुष्मान्तु-भवतारतम्यविच्चतुरोऽयं मृगो विधौ चन्द्रे धृतिं स्थितिमथ च समीचीनाधारपरितोषं कुतो वा दध्याद्धारयेदपि तु न कथञ्चित्, तस्मान्नेत्रोद्धरणादन्धत्वेनैव त्वन्मुखरमणीयकादर्शनादन्यत्र गन्तुमशक्तश्च तन्मुखं त्यक्त्वाऽत्रैवायं स्थित इत्यर्थः । त्वन्मुखं चन्द्राधिकं । नेत्रे च मृगनेत्राभ्यामधिके इति भावः । दारमिति क्वचित् पाठः ॥ १४७ ॥

शुचीति । हे कृशतनु ! त्वं गगनतटं नभःस्थलमनु उदीक्ष्य शुचिरुचिं श्वेतकान्तिं, तथा बहुत्वादगणनं सङ्ख्यातुमशक्यमनुमत्या निर्देश्यं प्रत्यक्षगम्यमुडुगणं प्रतिनिशं रात्रौ शमितत्वाच्चन्द्राधोभाग-

प्रतिनिशशशितलविगलदमृतभृत-
रविरथहयचयखुरबिलकुलमिव ॥ १४८ ॥

उपनतमुडुपुष्पजातमास्ते
भवतु जनः परिचारकस्तवायम्।
तिलतिलकितपर्प्पटाभमिन्दुम्
वितर निवेद्यमुपास्स्व पञ्चबाणम् ॥ १४९ ॥

द्विगलता स्रवताऽमृतेन भृतं पूर्णं रविरथस्य हयचयस्तस्य खुराणां यानि बिलानि न्यासस्थानविवराणि तेषां कुलं वृन्दमिव नातिशयेन कलयसि, अपि तु तदिवातितरां जानीहीत्यर्थः। प्रतिनिशं चन्द्राद्गलता धवलेनामृतेन पूर्णाः सूर्याश्वखुरगर्त्ता इव तारकाः शोभन्त इति भावः। गगनतटं कर्म्मप्रवचनीययोगे द्वितीया। प्रतिनिशं वीप्सायामव्ययीभावः। सर्व्वं लघु ॥ १४८ ॥

उपनतमिति। हे प्रिये! रक्तो भौमः शनिः कृष्णो गुरुः पीतः सितः कविरित्यादिज्योतिःशास्त्रादिप्रामाण्यान्नानावर्णाङ्कितान्युडूनि नक्षत्राण्येव पुष्पजातमुपनतं सम्पन्नमास्ते। अयं मल्लक्षणो जनः प्रारब्धकामदेवपूजायास्तव परिचारकश्चन्दनाद्युपचारोपनायकोऽथ च सम्भोगकारी भवतु, त्वं तिलैस्तिलकितः सञ्जाततिलकस्तिलैरेव वा तिलकवान् कृतो यः पर्पटः शालितण्डुलपिष्टरचितश्चिपिटस्तिलशष्कुलीसञ्ज्ञ उपदंशविशेषस्तद्वदाभा यस्य तत्तुल्यं सकलङ्कमध्यत्वादिविशिष्टपर्पटसदृशमिन्दुमेव निवेद्यं कामाय वितर, एवं पञ्चबाणं कामदेवमुपास्स्व पूजय। अन्योऽपि देवपूजकः पुष्पादिसामग्र्या देवं पूजयति, कश्चित् परिचारकोऽपि तस्य भवति, एवमत्रापि सर्व्वाणि नक्षत्राण्युदितानि, कामोद्दीपकश्चन्द्रोऽप्युदितः, सुरताकार्य्यकारी निषिद्धः सन्ध्यासमयोऽतिक्रान्तस्तस्मात् काममुपास्स्व सुरतेच्छुरस्मीति भावः। पञ्चबाण इत्यनेन कामस्यातिपीडाकारित्वं सूच्यते। सामान्यमित्यभिधानाज्जातशब्दः सामान्यवाची पुष्पजाते पर्य्यवस्यति। तिलकितेति तारकादित्वात् तत्करोतीति वा ण्यन्तान्निष्ठा ॥ १४९ ॥

स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भव-
श्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः।
पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये ॥ १५० ॥

इदानीं काव्यसमाप्तिं चिकीर्षुः श्रीहर्षो नायकमुखेनाशिषमाशास्ते। स्वर्भानुरिति। हे प्रिये! देवः प्रकाशमानस्तुषारद्युतिर्हिमकरोऽथ च हिमकर एव देवो वर्णनां पूजाञ्च कुर्व्वतां नोऽस्मदादीनामावयोर्वा तुष्टये परमानन्दायास्तु। किम्भूतः। स्वर्भानो राहोः प्रतिवारं पौनःपुन्येन यत् पारणं चन्द्रस्यैव गिलनं तेन तत्र वा मिलन् संलग्नो यो दन्तौघस्तद्रूपं यन्त्रं छिद्रकरणसाधनं तस्मादुद्भवो यस्याः सा श्वभ्राली दन्तदंशनक्षतविवरपरम्परा तया तस्याः सकाशाद्वा पतयालुः पतनशीला दीधितिसुधा किरणामृतं तद्रूपः सारः श्रेष्ठो भागो यस्य दीधितिसुधाया वा। यद्वा दीधितिसुधाया आसारो धारासम्पातो दीधितिसुधारूपो वा आसारो यस्य स अतएव पुष्पेष्वासनस्य पुष्पधनुषस्तत्प्रियाया रतेश्च परिणयानन्दो विवाहरूप आनन्दस्तत्सम्बन्धिन्यभिषेकोत्सवे महाभिषेकार्थं प्राप्ता सहस्रधारस्य सहस्रच्छिद्रगलज्जलधारस्य कलशस्येव श्रीः शोभा येन सः। महोत्सवे हि सहस्रधारेण सुवर्णकलशेन महाभिषेकः क्रियते तथा च राहुदन्तक्षतच्छिद्रपरम्परागलदमृतधारश्चन्द्रो गलज्जलधारसहस्रच्छिद्रसुवर्णकलश इव शोभमानः पूर्व्वोक्तवर्णनयोक्तविधत्वत्कृतपूजया च सुरतप्रवृत्तयोरावयोरुद्दीपकतया परमानन्दं कुर्यादिति भावः। एतेन तत्समयोचितरतिकामविवाहोत्सवाभिधानेन चन्द्रोऽस्तु नस्तुष्टये इत्यनेन च विलासिना नलेन स्वनिर्वर्त्त्यतृतीयपुरुषार्थपयोधिपीयूषरसास्वादनलालसोऽभिव्यज्यते। सुधाधार इत्यपि पाठे दीधितिसुधाया धारा यस्य सुधाया आधार इति वा, आनन्दपदेन तुष्टयेऽस्त्वित्याशिषा च ग्रन्थसमाप्तिं द्योतयति। महाभारतादौ वर्णितस्याप्युत्तरनलचरितस्य नीरसता-

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वाविंशो नवसाहसाङ्कचरिते चम्पूकृतोऽयं महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ।१५१

यथा यूनस्तद्वत् परमरमणीयाऽपि रमणी
कुमाराणामन्तःकरणहरणं नैव कुरुते ।

नायकानुदयवर्णने रसभङ्गसद्भावाच्च काव्यस्य च सहृदयहृदयाह्लादनफलत्वाच्चातोत्तरचरितं श्रीहर्षेण न वर्णितमित्यादि ज्ञातव्यं। न इति पद्येऽस्मदोर्द्वयोश्चेति द्वित्वेऽपि बहुवचनं ॥ १५० ॥

श्रीहर्षमिति। पूर्वार्द्धार्थः स्पष्टः। द्वाविंशतेः पूरणः सर्गो गतः समाप्तिं प्राप। किम्भूतस्य श्रीहर्षस्य। नवो यः साहसाङ्को नाम राजा तस्य चरिते विषये चम्पूं गद्यपद्यमयीं कथां करोतीति कृत् तस्य विनिर्मितवतः सोऽपि ग्रन्थो येन कृत इति सूच्यते। नृपसाहसाङ्केति पाठे नृपश्चासौ साहसाङ्कश्च तस्य गौडेन्द्रस्य चरिते विषये, चम्पूकृतो भोजराजस्य विक्रमार्कस्य वेति केचित्। द्वाविंश इति पूरणे डटि टिलोपः ॥ १५१ ॥

यथेति। यथा परमरमणीयाऽपि रमणी यूनस्तरुणस्य कामिनोऽन्तःकरणं कुरुते तद्वत् तया कुमाराणां बालिशानां चीरलाभमात्रेण परमपुरुषार्थप्राप्तिमभिमन्यमानानामननुभूतकामसुखानां चित्तं स्ववशं नैव कुरुते, अपि तु न काऽपि, तथेयं काव्यरचनारूपा परमरमणीया मदुक्तिरपि श्रवणमननादिवशात् सुधीभूय, अमृतत्वं प्राप्य सुधियः सकलदर्शनरहस्यवेदिनोऽतिसरसस्य पण्डितस्य चेतश्चेद्यदि मदयति आनन्दयति तर्ह्यस्याः सुधियोऽत्यादृततया मदुक्तेररसानां नीरसानां सर्वथैवासंस्पृष्टरसशब्दानामपि चलदुपलप्रायाणामटणाद्युक्षपशूनां पुरुषाणामनादरभरैस्तत्कृतावज्ञासमूहैः किं नाम स्यात्, अपि तु न किञ्चिदप्यस्यास्तैरपकर्तुं शक्यते। सुधीभिरादरे कृते सति नीरसैरकृते वाऽप्यादरे न किञ्चिदित्यर्थः। सुधीभिरादृतत्वात् सकलगुणपूर्णाति-

मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादरसपुरुषानादरभरैः ॥१५२॥
दिशि दिशि गिरिग्रावाणः स्वां वमन्तु सरस्वतीं
तुलयतु मिथस्तामापातस्फुरद्ध्वनिडम्बरां।

सरसेयं मदुक्तिरिति भावः मदुक्तेः सुधारूपत्वाभावात् क्षीरोदानन्तरञ्च सरसत्वप्रतीतेः सुधात्वात्। सुधीभूयेति च्विः। सुधिय इति जात्यभिप्रायेणैकेनापि सुधाया आदरे कृते महद्गौरवं, बहुभिरप्यज्ञैरनादरेषु कृतेष्वपि न किञ्चिद्दु लाघवमित्यभिप्रायेण वा। यून इति प्रतियोगिन एकवचनान्तत्वाच्चैकवचनं। कवेः स्वग्रन्थसुहृद्विषयेयमुक्तिः ॥ १५२ ॥

कविरर्थान्तरोक्त्या स्वीयामुक्तिं वर्णयति। दिशीति। गिरिग्रावाणोऽद्रिपाषाणाः दिशि दिशि स्वां निजां सरस्वतीं नदीं अन्तर्गतजलप्रस्रवणं वमन्तु मुञ्चन्तु, आपातेन समन्तादूर्ध्वदेशादधःपतनेन स्फुरन् प्रकाशमानो ध्वनिडम्बरः शब्दाडम्बरो यस्याः ताञ्च नदीं मिथस्तुलयतु, अन्यनद्या समीकरोतु जन इत्यर्थः। अथ वाऽपाते प्रथमारम्भ एव स्फुरद्ध्वनिडम्बरां स्फुरत्प्रपातघोषां तां जनो मिथस्तुलयतु, उभयथाख्यानेऽपि परिणामे तु न नदी न च तस्याः शब्दाडम्बरश्चिरन्तन इत्यर्थः। स क्षीरोदन्वान् परं केवलमपरो न विद्यते पर उत्कृष्टो यस्मादत्युत्कृष्टोऽथ वाऽन्य एव यतो यस्य क्षीरोदस्येदं यदीयममृतं सेतादृशमुदीर्य्यते उत्पद्यते। कीदृशं। मथितुर्देवादेः खेदच्छेदि मथनजनितक्लेशापहं। तथा प्रमोदनं नितरामानन्ददायि, तथा ओदन भक्तमास्वाद्य सिद्धान्नरूपं, अथ चैवम्भूतं परमुत्कृष्टममृतं यदीयमुदीर्य्यते स क्षीरोदन्वानपरः परोऽन्यो नास्ति किन्त्वेक एव। अथ च प्रतिदिशं सर्वदेशेषु गिरिवाख्यां विषये पाषाणतुल्या जडा अन्येकवयः स्वीयां वाणीमुद्गिरन्तु, आपातेन प्रतिभामात्रेण स्फुरन् ध्वन्याख्यकाव्यविशेषस्याडम्बरो यस्यां प्रथमारम्भ एव स्फुरन् शब्दाडम्बरोऽनुप्रासो यत्र वा तां वाणीं मिथोऽन्योऽन्यं जनः समीकरोतु वस्य कवेरुक्तिरस्यैवास्य च तस्येवेत्येव

स परमपरः क्षीरोदन्वान् यदीयमुदीयते
मथितुरमृतं खेदच्छेदि प्रमोदनमोदनं ॥ १५३ ॥
ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञंमन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु ।

तुलयतु। आपात इति विसर्जनीयान्तपाठे। आपातः प्रतिभासः तां तुलयत्वित्यर्थः। एवंविधं परं काव्यामृतं यदीयमुत्पद्यते स क्षीरसमुद्रतुल्यः श्रीहर्षकविः, अपरो नास्ति किन्त्वेक एव, अन्ये कवयः पर्व्वतग्रावतुल्याः, अहं श्रीहर्षस्तु क्षीरसमुद्रतुल्य इत्यर्थः। यथा क्षीरसागरो नीरार्थिनोऽपि तीरमात्रस्थान् क्षीरेण तर्पयति लक्ष्मीकौस्तुभामृतादिभिः परमानन्ददायिभिः कृतार्थयति, मदीयकाव्यविचारकस्यैव खेदच्छेदि प्रमोदनवचनामृतमुत्पद्यते नान्यकाव्यविचारकस्येत्यन्ये ग्रावतुल्याः क्षीरोदतुल्यस्त्वहमिति भावः ॥ १५३ ॥

इदानीं प्रसादरूपमुख्यगुणाभावादतिदुर्बोधत्वादकाव्यमिति ये वदन्ति तच्छङ्कामपनुदन् खलदर्पदलनार्थं गुरुसम्प्रदायेन विना दुर्बोधमित्यतिगाम्भीर्य्यप्रतिपादनार्थञ्च बुद्धिपूर्व्वमेव मयेदं काव्यं तत्र दुर्बोधं व्यरचीत्याह। ग्रन्थेति। आत्मानं प्राज्ञं मन्यते प्राज्ञंमन्यं मनो यस्यैवंविधोऽस्मिन् काव्ये हठेन स्वीयप्रज्ञाबलेन पठितमस्यास्ती पठितीदंकाव्यस्य पाठकः खलो मा खेलतु किमत्रास्ति अस्तुतमेव व्याकर्त्तुं शक्यते इत्यवज्ञापूर्व्वं दर्पाभिव्यक्तिं माकार्षीदित्येवमर्थः। इह काव्ये क्वचित् क्वचिदपि तत्र तत्र स्थले मया प्रयत्नाद् बुद्धिपूर्व्वं ग्रन्थग्रन्थिर्ग्रथ्यमानशब्दार्थकुटिलिकाऽन्यासि विन्यस्ता खलमुखभङ्गार्थं बुद्धिपूर्व्वं मयेदं काव्यं दुर्बोधं व्यरचि न तु प्रसन्नकाव्यकरणाशक्तेरित्यर्थः। क्वचित् क्वचिदपीत्यनेन तत्र प्रसन्नताऽप्यस्तीति न काव्यत्वहानिरिति सूच्यते। सज्जनस्य तु ग्रन्थविवेचनोपायमाह। श्रद्धेति। श्रद्धया गुरौ दैवतैकबुद्ध्या राद्धेन पूजितेन गुरुणा पूर्व्वमश्लथा अपि श्लथाः कृता व्याख्यया सुबोधाः कृता दृढाः स्वरूपतो दुर्बोधा ग्रन्थयोऽसौ स गुरुसम्प्रदायात्-

आराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-
त्वेतत्काव्यरसोर्म्मिमज्जनसुखव्यासज्जनं सज्जनः १५४
ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वराद्
यः साक्षात् कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवं।
यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियं १५५

गतार्थोऽन एव दर्पराहित्यात् सज्जनः साधुरेतत्काव्यस्य रसोर्म्मिरस्ततलहरी तस्यां मज्जनं तज्जनितसुखेषु विशेषेण आसमन्ताद्भावेन च मज्जनमवस्थानं समासादयतु प्राप्नोतु, गुरुपरम्परयाऽपि विना एकस्यापि पद्यस्यार्थो बोद्धुं न शक्यते तस्माद् गुरुपरम्परया एवाध्येयमिदं काव्यमित्यर्थः। यश्चेदं गुरुपरम्परया अधीते स सततं सुखी भवति इति महाकविस्तस्याशिषं ददाति। अस्मिन् पठतीत्यस्य च विषयस्येति कर्म्मणि सप्तमी। आराद्धेति राधेरनुदात्तत्वादिडभावः॥ १५४॥

इदानीं पण्डितानन्दजननद्वारा स्वकृतेरभ्युदयमाशास्ते। ताम्बूलेति। यः कान्यकुब्जेश्वरात् सकाशात् सकलपण्डिताधिक्यव्यञ्जनं ताम्बूलद्वयं विद्वद्योग्यमासनञ्च लभते। न केवलं राजपूज्य एव किन्तु यः समाधिषु अष्टाङ्गयोगेषु ध्यानेषु वा विषये प्रमोदार्णवं परमानन्दस्वरूपं परं वागाद्यगोचरं ब्रह्म साक्षात्कुरुते। न परं पूर्व्वोक्तगुणविशिष्टो ब्रह्मविदेव किन्तु यदीयं काव्यं मधुवर्षि, अतिसरसत्वादमृतवर्षि। न परं पूर्व्वोक्तगुणविशिष्टोऽतिसरसो महाकविरेव, किन्तु तर्कशास्त्रेष्वपि यस्योक्तयः धर्षिताः पराभूताः परे प्रतिवादिनो याभिस्तादृश्यः। तस्य विद्वच्चक्रचूडामणेः श्रीहर्षकवेरियं काव्यरचनारूपा कृतिः सुकृतिनां सुधियां मुदे आनन्दायाभ्युदीयात्, कृतिनामानन्दं कुर्व्वती सती आकल्पमतिवृद्धिं प्राप्नुयादित्याशीः। सर्व्वत्र यच्छब्दनिर्व्वाहो गुण एव। अभ्युदीयादिति इण् गतावित्यस्य रूपम्॥ १५५॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते उत्तरनैषधीयप्रकाशे द्वाविंशतितमः सर्गः॥ २२॥

समाप्तोऽयं ग्रन्थः॥

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi